वैयाकरणसिद्धान्तकौमुदी

बालमनोरमा-तत्त्वबोधिनीसहिता

(समासप्रभृतितद्धितप्रकरणान्ता)

(द्वितीय भाग)

म० म० पं० गिरिधरशर्मा चतुर्वेदः
म० म० पं० परमेश्वरानन्दशर्मा विद्याभास्करः

मोतीलाल बनारसीदास

दिल्ली □ वाराणसी □ पटना

श्रीः

श्रीमद्भट्टोजिदीक्षितविरचिता

वैयाकरणसिद्धान्तकौमुदी

(समासप्रभृतितद्धितप्रकरणान्ता)

श्रीमद्वासुदेवदीक्षितप्रणीतया बालमनोरमाख्यव्याख्यया श्रीमज्ज्ञानेन्द्र-
सरस्वतीविरचितया तत्त्वबोधिन्याख्यव्याख्यया च सनाथिता

महामहोपाध्याय
व्याकरणाचार्य-न्यायशास्त्र्याद्यनेकविरुदभाजा चतुर्वेदोपाह्व-
श्रीमद्गिरिधरशर्मणा महामहोपाध्यायश्रीपरमेश्वरानन्दशर्मणा च
संशोध्य सम्पादिता

मोतीलाल बनारसीदास
दिल्ली ☐ वाराणसी ☐ पटना

© मोतीलाल बनारसीदास
भारतीय संस्कृति साहित्य के प्रमुख प्रकाशक एवं पुस्तक विक्रेता
मुख्य कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली-७
शाखाएँ : १. चौक, वाराणसी-१ (उ० प्र०)
२. अशोक राजपथ, पटना-४ (बिहार)

पुनर्मुद्रण : दिल्ली, १९७७, १९८२

मूल्य : रु० ६० (सजिल्द)
४० (अजिल्द)

भारत सरकार द्वारा उपलब्ध किए गये
रियायती मूल्य के कागज पर मुद्रित।

श्री नरेन्द्र प्रकाश जैन, मोतीलाल बनारसीदास, बंगलो रोड, जवाहर नगर, दिल्ली-७
द्वारा प्रकाशित तथा श्री शान्तिलाल जैन, श्री जैनेन्द्र प्रेस, ए-४५, फेज १,
इंडस्ट्रियल एरिया, नारायणा, नई दिल्ली-२८ द्वारा मुद्रित

अथाऽव्ययीभावसमासप्रकरणम् । १७ ।

६४७ समर्थः पदविधिः । (२-१-१) पदसंबन्धी यो विधिः स

अथ समासाः । तदेवं विभक्त्यर्थं निरूप्य तदाश्रितसमासान्निरूपयिष्यन् तदुपोद्घातत्वेनाह—**समर्थः पदविधिः** । विधीयते इति विधिः—कार्यम् । पदस्य विधिः पदविधिरिति शेषषष्ठ्या समासः । तदाह—**पदसंबन्धी यो विधिरिति** ।

समर्थः पदविधिः । सामर्थ्यं च द्विविधं व्यपेक्षालक्षणमेकार्थीभावलक्षणं चेति । तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्यः परस्परसंबन्धः सा व्यपेक्षा । सैव वाक्ये राज्ञः पुरुष इत्यादौ । तत्र व्यपेक्षायां सत्यां यो यः संनिहितो योग्यश्च तेन तेन संबन्धोऽभ्युपेयते । यथा राज्ञः पुरुषोऽश्वश्च । राज्ञो देवदत्तस्य च पुरुष इति । एकार्थीभावस्तु राजपुरुष इत्यादिवृत्तावेव । स च प्रक्रियादशायां पृथगर्थत्वेन प्रथमगृहीतस्य विशिष्टैकार्थत्वरूपः । अत एव राजपुरुष इत्यत्र राज्ञि ऋद्धस्येति विशेषणं नान्वेति, पदार्थैकदेशत्वात् । न चैवं देवदत्तस्य गुरुकुलमित्यादावनन्वयापत्तिः, तत्रापि देवदत्तोत्तरषष्ठ्यर्थस्य गुरुणान्वयादिति वाच्यम् , देवदत्तस्य प्रधानभूतकुलेनैवान्वयात् । संबन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः, न तु तदितरः । उक्तं च 'समुदायेन संबन्धो येषां गुरुकुलादिना । संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह' इति । यद्वा-ससंबन्धिकपदार्थस्यैकदेशत्वेऽपि भवत्येव विशेषणान्वयः । उक्तं च—'संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते । वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते' इति । नन्वेवं राज्ञोऽपि नित्यसापेक्षत्वादेकदेशत्वेऽपि ऋद्धस्येति विशेषणेनान्वयोऽस्तु । मैवम् , राज्ञ ईशितुरीशितव्यं प्रति साकाङ्क्षत्वेऽपि ऋद्धं प्रत्यनाकाङ्क्षत्वात् । ननु वाक्ये क्लृप्तयैवावयवशक्त्योपपत्तौ विशिष्टार्थविषयकशक्त्यन्तरमेव मास्तु । सत्यम्—'बहूनां वृत्तिधर्माणां वचनैरेव साधने । स्यान्महद्गौरवं तस्मादेकार्थीभाव आस्थितः ॥ चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् । कर्तव्यं ते, न्यायसिद्धं त्वस्माकं तदिति स्थितम् ।' तथाहि—धवखदिराविति वृत्त्यैव क्रोडीकृतार्थत्वाच्चकारो न प्रयुज्यते, तथा चित्रग्वादौ यत्पदम् । त्वया तु वचनं कर्तव्यम् । निरूढलक्षणा तु शक्तितो नातीव भिद्यते । किंच प्राप्तमुदकं यमिति व्यस्ते समीचीनमुदकमिति विशेषणवत्समस्तेऽपि उदकविशेषणप्रयोगः समासघटकपदार्थानां प्राप्तः, स च 'वृत्तस्य विशेषणयोगो न' इति वचनेनैव वारणीयः । 'नामार्थयोरभेदान्वयः' 'प्रत्ययार्थः प्रधानम्' इति व्युत्पत्तित्यागश्च, प्राप्तो-

समर्थाश्रित इति। सूत्रे समर्थशब्दः समर्थाश्रिते लाक्षणिक इति भावः। सामर्थ्यं द्विविधम्—व्यपेक्षालक्षणम् एकार्थीभावलक्षणं च। तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्यः परस्परान्वयः तद् व्यपेक्षाभिधं सामर्थ्यम्, विशिष्टा अपेक्षा व्यपेक्षेति व्युत्पत्तेः, संबद्धार्थः समर्थ इति व्युत्पत्तेश्च। इदं च राज्ञः पुरुष इत्यादिवाक्य एव भवति। तत्र च एकैकस्य शब्दस्य यो यः संनिहितो योग्यश्च तेन तेनान्वयो भवति। यथा राज्ञः पुरुषोऽश्वश्चेति, राज्ञो देवदत्तस्य च पुरुष इति, ऋद्धस्य राज्ञः पुरुष इति च। एकार्थीभावलक्षणसामर्थ्यं तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। संगतार्थः समर्थः, संसृष्टार्थः समर्थ इति व्युत्पत्तेः। संगतिः संसर्गश्च एकीभाव एव। यथा—संगतं घृतं तैलेनेति एकीभूतमिति गम्यते, यथा वा संसृष्टोऽग्निरिति एकीभूत इति गम्यत इति भाष्याच्च। इदं च सामर्थ्यं राजपुरुष इत्यादिवृत्तावेव। अत एव ऋद्धस्य राजपुरुष इत्येवं राज्ञि पुरुषविशेषणे ऋद्धत्वविशेषणं नान्वेति, विशिष्टस्य एकपदार्थतया राज्ञः पदार्थैकदेशत्वात्। देवदत्तस्य गुरुकुलमित्यत्र तु उपसर्जनस्य नित्यसापेक्षत्वात् समासः। यद्वा गुरुवद्देवदत्तोऽपि विशेष्ये प्रधाने कुल एवान्वेति, तत्र गुरुणा कुलस्य उत्पाद्यत्वसंबन्धेनान्वयः। देवदत्तेन तु कुलस्य तदीयगुरूत्पाद्यतयाऽन्वयो गुरुगर्भः। उक्तं च हरिणा—

"संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥" इति
"समुदायेन संबन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह॥" इति च।

एतेन 'अयशशूल—' इति सूत्रे भाष्ये 'शिवस्य भगवतो भक्तः' इत्यर्थे शिवभागवत इत्यादि व्याख्यातम्। एकार्थीभावश्चायमलौकिकविग्रहवाक्ये कल्प्यते, यथा लादेशभूतशतृशानचोः अप्रथमासामानाधिकरण्यं कल्प्यते, तद्वत्। अत एव 'लस्य अप्रथमासमानाधिकरणेनार्थेनायोगादादेशानुपपत्तिः, तस्य कदाचन प्रयोगाभावादित्याक्षिप्य आदेशे सामानाधिकरण्यं दृष्ट्वा अनुमानाद् गन्तव्यं प्रकृतेरपि तद्भवति' इति 'लटश्शतृशानचौ—' इति सूत्रभाष्ये समाहितम्। 'सिद्धानां शब्दानामन्वाख्यानात् पचन्तं

दक इत्यादौ उदककर्तृकप्राप्तिकर्मेत्याद्यर्थाभ्युपगमात्। एकार्थभावे तु लाघवमिति दिक्। पदग्रहणं किम्, वर्णविधौ समर्थपरिभाषा मा भूत्। तिष्ठतु दध्यानय तक्रम्, इह स्यादेव यण्। विधिग्रहणं तु पदस्य विधिः पदयोर्विधिः पदानां विधिरित्यनेकविभक्त्यन्तसमासलाभार्थम्। पदस्येत्युक्तौ तु 'उपपदमतिङ्' इत्यादावेवास्योपस्थितिः

समर्थाश्रितो बोध्यः । ६४८ प्राक्कडारात्समासः । (२-१-३) 'कडाराः कर्मधारये' (सू ७४१) इत्यतः प्राक् समास इत्यधिक्रियते । ६४९ सह सुपा ।

देवदत्तं पश्येत्यादिप्रयोगदर्शनात् स्थानिनोऽपि लस्य प्रक्रियार्थं कल्पितस्य अप्रथमासामानाधिकरण्यमनुमीयते' इति कैयटः । अत्र प्रक्रियार्थं कल्पितस्येत्युक्त्या अन्यस्यापि प्रक्रियार्थं कल्पितस्य बोधकत्वकल्पना सूचिता । अलौकिकविग्रहवाक्ये श्रूयमाणानां च शब्दानां क्लृप्तशक्तित्यागे मानाभावात् प्रत्येकशक्तिसहकृतया समुदायशक्त्या विशिष्टोपस्थितिः । ततश्च अयमेकार्थीभावः अजहत्स्वार्था वृत्तिरिष्यते । वृत्तिविषये पदानां प्रत्येकमनर्थकत्वमाश्रित्य जहत्स्वार्था वृत्तिस्तु नाश्रयितुं युक्ता, महाबाहुः, सुपन्था इत्यादौ आत्वाद्यनापत्तेः, वृत्तौ महदादिशब्दानामनर्थकत्वाद् अर्थवद्ग्रहणासंभवे अनर्थकस्य 'आन्महतः–' इत्यादौ ग्रहणायोगात् । तदुक्तम्—

'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी ।' इति

अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव सेति तदर्थः । यथा अश्वकर्णमण्डपादौ । विस्तरस्तु शब्देन्दुशेखरे मञ्जूषायां चानुसंधेयः । समर्थः किम् ? पश्य कृष्णं श्रितो राममित्रम् । अत्र कृष्णश्रितयोः परस्परान्वयाभावाद्विशिष्टैकार्थोपस्थित्यजनकत्वान्न सामर्थ्यम् । **प्राक्कडारात्** । 'आकडारात्' इत्येव प्रागिति सिद्धे प्राग्ग्रहणमेकसंज्ञाधिकारेऽपि अव्ययीभावादिसंज्ञासमुच्चयार्थमिति भाष्ये स्पष्टम् । संपूर्वकस्य अस्यतेरेकीकरणात्मकः संश्लेषोऽर्थः । समस्यते अनेकं पदमिति समासः । 'अकर्तरि च कारके संज्ञायाम्' इति कर्मणि घञ् । अत एव मूले समस्यत इति वक्ष्यते । तथा च अन्वर्थेयं संज्ञा । **सह सुपा** । 'सुबामन्त्रिते' इत्यतः सुबित्यनुवर्तते । सुबन्तं सुबन्तेन सहोच्चारितं समाससंज्ञं भवतीति फलति । एवं सति पर्यभूषयदित्यादौ सुबन्तस्य तिङन्तेन

स्यादित्याहुः । सूत्रे समर्थशब्दो लाक्षणिक इति ध्वनयन्नाह—**समर्थाश्रित इति** । समर्थेति किम् , पश्यति कृष्णं श्रितो देवदत्तमित्यादौ कृष्णाश्रित इत्यादि समासो मा भूत् । तथा वक्रमुपगोरपत्यं चैत्रस्येत्यत्र 'तस्यापत्यम्' इत्युपगुशब्दादण् मा भूदिति । क्वचित्तु सापेक्षत्वेऽपि भाष्यप्रामाण्याद् वृत्तिरङ्गीक्रियते । तद्यथा—किमोदनं शालीनाम् । केषां शालीनामोदनमित्यर्थः । सक्त्वाढकमापणीयानाम् । आपणीयानां सक्तूनामाढकमित्यर्थः । कुतो भवान् पाटलिपुत्रकः । द्वे पाटलिपुत्रे, तत्र कस्मात्पाटलिपुत्राद्भवानागत इत्यर्थः । 'रोपधेतोः प्राचाम्' इति वुञ् । **प्राक्कडारात्समासः** । प्राग्ग्रहणमावर्तते, तेन पूर्वं समाससंज्ञा ततः संज्ञान्तरमपीति लभ्यते । तेनाव्ययीभावादिभिः समावेशः सिद्ध्यति । अन्यथा पर्यायः स्यात् । समसनं समासः, भावे घञ् । अनेकस्य पदस्य एकपदीभवनमित्यर्थ इत्येके । वस्तुतस्तु—'अकर्तरि च कारके–' इति कर्मणि घञ् ।

(२-१-४) 'सह' इति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिद्ध्यर्थत्वात्कतिपयतिङन्तोत्तरपदोऽयं समासः स च छन्दस्येव। पर्यभूषयत्। अनुव्यचलत्। 'सुपा'। सुप्सुपा सह समस्यते। समासत्वात्प्राति-

---

समासो न स्यात्, तत्राह—**सहेति योगो विभज्यत इति**। समाससंज्ञाया अन्वर्थत्वादेकस्याप्रसङ्गात् सुपेत्येतावतैव सहेति सिद्धे तद्ग्रहणं योगविभागार्थमिति भावः। सहेत्यत्र 'सुबामन्त्रिते–' इत्यतः सुबित्यनुवर्तते। प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम्। 'समर्थः पदविधिः' इत्यतः समर्थग्रहणमनुवृत्तं तृतीयया विपरिणम्यते तदाह—**सुबन्तमित्यादिना। समस्यत इति**। एकीक्रियते प्रयोक्तृभिरित्यर्थः। समाससंज्ञां लभत इति यावत्। केचित्तु सुबन्तं कर्तृ समर्थेन समस्यते–एकीभवतीत्यर्थः। कर्तरि लट्। 'उपसर्गादस्यत्यूह्योः' इत्यात्मनेपदम्। समासशब्दोऽपि कर्तरि बाहुलकाद्धञन्त एव, कर्मणि घञन्तो वा। तथा सति समस्यत इति कर्तरि तिङन्तं फलितार्थकथनपरमित्याहुः। ननु घटो भवतीत्यत्र समासे घटभवतीत्यपि लोके प्रयोगः स्यादित्यत आह—**योगविभागस्येति। कतिपयेति**। कतिपयानि तिङन्तानि उत्तरपदानि यस्येति विग्रहः। **पर्यभूषयदिति**। समासान्तोदात्तत्वे शेषनिघात इति 'कुगति-' इति सूत्रे कैयटः। देवो देवान् क्रतुना पर्यभूषयदित्यत्र तु स्वरव्यत्ययो बोध्यः। **अनुव्यचलदिति**। अचलदित्यनेन वेः पूर्वं समासे सति तेन अनोः समासः। न त्वनुव्योर्युगपत्समासः, सुबित्येकत्वस्य विवक्षितत्वात्। अत एव महिष्या अजायाश्च क्षीरमित्यत्र क्षीरशब्देन सुबन्तयोर्न समास इति कैयटः। **सुपा**। 'सुबामन्त्रिते–' इत्यतः सुबित्यनुवर्तते, समास इत्यधिकृतम्, तदाह—**सुप्सुपेति**। सुबन्तं सुबन्तेनेत्यर्थः। ततश्च पूर्वं भूत इति विग्रहे समाससंज्ञा स्थिता। **समास-**

अन्यथा सुबन्तं समस्यत इत्युत्तरग्रन्थो न संगच्छते। ननु अन्वर्थत्वात्समाससंज्ञायाः प्रत्येकमप्रसङ्गात्सहग्रहणं व्यर्थमित्याशङ्क्याह—**योगो विभज्यत इति**। 'सुबामन्त्रिते–' इत्यतः सुबित्यनुवर्तते तदाह—**सुबन्तमिति। समस्यत इति**। संपूर्वादस्यतेः कर्मणि तङ्। आचार्येणेति शेषः। समर्थेनेति तु सहयोगे तृतीया। समसनक्रियां प्रति सुबन्तं कर्म, न तु कर्तृ। यद्यपि सुबन्तस्य कर्तृत्वाभ्युपगमेऽपि 'उपसर्गादस्यत्यूह्योः' इति वार्तिकेन समस्यत इत्यत्रात्मनेपदं लभ्यते, तथापि समास इति व्याख्येयग्रन्थे कर्तरि घञ् दुर्लभः। बाहुलकं तु अगतिकगतिरिति कर्मत्वाभ्युपगम एव ज्यायान्। **स चेति**। एतदपि योगविभागस्येष्टसिद्ध्यर्थत्वादेव लभ्यते। **छन्दस्येवेति**। यदि लोकेऽपि स्यात्तर्हि यत्प्रकुरुते इत्यादौ स्वाद्युत्पत्तिः स्यात्। लिङ्गसर्वनामतामभ्युपेत्य 'स्वमोर्नपुंसकात्' इति लुकि कृतेऽपि 'ह्रस्वो नपुंसके–' इति ह्रस्वः स्यादि-

पदिकत्वम्। ६५० सुपो धातुप्रातिपदिकयोः । (२-४-७१) एतयोरवयवस्य सुपो लुक्स्यात् ।'भूतपूर्वे चरट्' (सू ११११) इति निर्देशाद् भूतशब्दस्य पूर्वनिपातः । पूर्वं भूतो भूतपूर्वः । 'इवेन समासो विभक्त्यलोपश्च' (वा १२३१,

---

त्वात् प्रातिपदिकसंज्ञेति । 'कृत्तद्धितसमासाश्च' इत्यनेनेति शेषः । **सुपो धातु।** धातुप्रातिपदिकयोरित्यवयवषष्ठीत्याह—**एतयोरवयवस्येति । लुक् स्यादिति ।** 'ण्यक्षत्रियार्षञितो यूनि लुक्' इत्यतस्तदनुवृत्तेरिति भावः । न च सुप इत्यनेन सप्तमीबहुवचनस्यैव ग्रहणं किं न स्यादिति वाच्यम्, 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुग्विधानात् सुप्प्रत्याहारस्यैवात्र ग्रहणमिति ज्ञापनात् । न चैवमपि पूर्वं भूत इति लौकिकविग्रहवाक्ये परिनिष्ठितसंधिकार्ययोः सुबन्तयोः समासे सति पूर्वमित्यत्र अमि पूर्वरूपस्य एकादेशस्य परादिवमाश्रित्य अमो लुकि समासदशायां वकारादकारो न श्रूयेत । पूर्वान्तत्वे तु परिशिष्टस्य मकारस्य सुप्त्वाभावात् कथं लुगिति वाच्यम्, 'सुपो धातु–' इति लुग्विषये 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इत्याश्रित्य संधिकार्यप्रवृत्तेः प्रागेवालौकिकविग्रहवाक्ये समासप्रवृत्तिरिति 'प्रत्ययोत्तरपदयोश्च'इति सूत्रभाष्ये स्थितम् । 'कृत्तद्धितसमासाश्च' इत्यत्र प्रौढमनोरमायामपि परिष्कृतमिदम् । 'भक्षैषा–' इति सूत्रव्याख्यावसरे प्रपञ्चितं चास्माभिः । एवं च पूर्व अम् भूत स् इत्यलौकिकविग्रहदशायामेव अमो लुक्प्रवृत्तेर्नोक्तदोषः । तथा च सुपो लुकि भूतपूर्वेति स्थितम् । ननु 'सुबन्तं सुबन्तेन समस्यते' इति समासशास्त्रे सुबन्तं प्रथमानिर्दिष्टम् । सुबन्तत्वं च द्वयोरप्यविशिष्टम् । ततश्च 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति वक्ष्यमाणोपसर्जनत्वस्य द्वयोरप्यविशिष्टत्वाद् 'उपसर्जनं पूर्वम्' इत्यन्यतरस्य पूर्वनिपाते विनिगमनाविरह इत्यत आह—**भूतपूर्वे चरडिति । पूर्वं भूत इति ।** लौकिकविग्रहोऽयम् । पूर्वमिति क्रियाविशेषणम् । **भूतपूर्व इति ।** समासत्वेन प्रातिपदिकत्वात् समुदायात् पुनर्यथायथं सुबुत्पत्तिरिति भावः । **इवेनेति ।** इवेत्यव्ययेन सुबन्तस्य समासः । 'सुपो धातु–'

त्यादि दूषणं 'कर्मणो यमभिप्रैति–' इति सूत्रेऽस्माभिरुद्भावितम् । **अनुव्यचलदिति ।** सुबिर्त्येकत्वस्य विवक्षितत्वात्पर्यायेण समासो बोध्यः । समासान्तोदात्तत्वे शेषनिघात इति 'कुगति–' इति सूत्रे कैयटः । **सुपो धातु ।** सुप इति प्रत्याहारस्य ग्रहणं 'पञ्चम्याः स्तोकादिभ्यः' इत्याद्यलुक्समासविधानाज्ज्ञापकात् । **निर्देशादिति ।** अन्यथा हि प्रथमानिर्दिष्टत्वाविशेषेऽपि उपसर्जनसंज्ञाया अन्वर्थत्वेन पूर्वशब्दस्यैव पूर्वनिपातः स्यादिति भावः ॥ **इवेनेति ।** अयमपि समासः पूर्ववत् काचित्क एव । तेन जीमूतस्येवेत्यादौ तैत्तिरीयाणां पृथक्पदत्वेन पाठः । 'उद्बाहुरिव वामनः' इत्यादौ व्यस्तप्रयोगश्च संगच्छत इति मनोरमायां स्थितम् । **विभक्त्यलोपश्चेति ।** समासावयवस्य सुपोऽलुग्विधाने-

११४१)। जीमूतस्येव। ६५१ अव्ययीभावः। (२-१-५) अधिकारोऽयम्। ६५२ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु। (२-१-६) 'अव्ययम्' इति योगो विभज्यते। अव्ययं समर्थेन सह समस्यते, सोऽव्ययीभावः। ६५३ प्रथमानिर्दिष्टं समास उपसर्जनम्। (१-२-४३)

इति लुगभावः। पूर्वपदस्य प्रकृतिसिद्धस्वरश्च भवति, न तु समासस्वर इति वक्तव्यमित्यर्थः। 'सह सुपा' इति सिद्धे समासविधानमिवशब्दस्य पूर्वनिपातनिवृत्त्यर्थम्। अन्यथा अत्र इवशब्दस्यापि सुबन्तत्वाविशेषात् समासशास्त्रे प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात् पूर्वनिपातः स्यात्। **जीमूतस्येवेति**। अत्र जीमूतशब्दस्य पूर्वपदस्य फिट्स्वरेणान्तोदात्तत्वमेव, न तु समासस्येत्यन्तोदात्तत्वम्। अत्र यथार्थत्वप्रयुक्तोऽव्ययीभावस्तु न, 'तत्र तस्येव' इति निर्देशात्। क्वाचित्कश्चायं समासः। अत एव बह्वृचा एव पदपाठे अवगृह्णन्ति, याजुषास्तु भिन्ने एव पदे पठन्ति 'उद्बाहुरिव वामनः' इत्यादिव्यस्तप्रयोगाश्च संगच्छन्ते। 'हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम्।' इत्यत्र तु मातरमिवेति भवितव्यम्। 'तिङ्समानाधिकरणे प्रथमा' 'अभिहिते प्रथमा' इति वार्तिकस्वारस्येन प्रथमायाः कारकविभक्तित्वोक्तिपरभाष्येण च क्रियायोग एव प्रथमायाः प्रवृत्त्या मातेति प्रथमायाः मातृसदृशीमित्यर्थे असाधुत्वादित्यास्तां तावत्। **अव्ययीभावः। अधिकारोऽयमिति**। एकसंज्ञाधिकारेऽपि अनया संज्ञया समाससंज्ञा न बाध्यत इति 'प्राक्कडारात्–' इत्यत्रोक्तम्। **अव्ययं विभक्ति**। विभक्त्यर्थाद्यभावेऽप्यपदिशमित्यादि साधयितुमाह—**अव्ययमिति योगो विभज्यत इति**। अत्र 'समर्थः पदविधिः' इत्यतः समर्थग्रहणमनुवृत्तं तृतीयान्ततया विपरिणम्यते। समास इति अव्ययीभाव इति चाधिकृतम्। तदाह—**अव्ययं समर्थेनेति। सोऽव्ययीभाव इति**। स समासः अव्ययीभावसंज्ञः स्यादित्यर्थः। तथा च दिशयोर्मध्यमित्यस्वपदविग्रहे मध्यार्थकस्य अपेत्यव्ययस्य दिशयोरित्यनेन समाससंज्ञा। तस्य समासस्याव्ययीभावसंज्ञा च सिद्धा। तथा च समासत्वात् प्रातिपदिकत्वे सुपो धातु–' इति सुब्लुकि सति दिशा अप इति स्थितम्। अत्र उपसर्जनकार्यं वक्ष्यन्नुपसर्जनसंज्ञामाह—**प्रथमानिर्दिष्टम्**। ननु समासे प्रथमानिर्दिष्टमुपसर्जनम् इति व्याख्याने असंभवः, समासे

ऽपि समासादुत्पन्नस्य सोः 'अव्ययात्–' इति लुग् भवत्येव, अनुपसर्जने तदन्तस्याप्यव्ययत्वादिति बोध्यम्। **अव्ययं विभक्ति**। विभक्तिरिह कारकशक्तिः। विभज्यते अनया प्रातिपदिकार्थ इति व्युत्पत्तेः। अत एव वक्ष्यति—विभक्त्यर्थादिषु विद्यमानमव्ययमिति। **प्रथमानिर्दिष्टम्**। अत्र समासपदं तद्विधायके लाक्षणिकम्। अन्यथा चिकी-

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्। ६५४ उपसर्जनं पूर्वम्। (२-२-३०) समासे उपसर्जनं प्राक्प्रयोज्यम्। ६५५ एकविभक्ति चापूर्वनिपाते। (१-२-४४) विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्, न

सति 'सुपो धातु-' इति प्रथमाया लुप्तत्वात्। समासे चिकीर्षिते प्रथमानिर्दिष्टम् इति व्याख्याने तु कृष्णं श्रितः कृष्णश्रित इत्यत्र विग्रहे कृष्णशब्दस्य द्वितीयानिर्दिष्टत्वादुपसर्जनत्वं न स्यात्। श्रितशब्दस्य प्रथमानिर्दिष्टत्वादुपसर्जत्वं स्यात्। अतो व्याचष्टे—**समासशास्त्र इति**। समासपदं समासविधायकशास्त्रपरमिति भावः। एवं च 'द्वितीया श्रित-' इति समासविधायकशास्त्रे द्वितीयान्तस्यैव कृष्णशब्दस्य द्वितीयेति प्रथमानिर्दिष्टत्वादुपसर्जनत्वम्। एवं च 'अव्ययम्-' इति समासविधावपेत्यस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वं स्थितम्। **उपसर्जनं पूर्वम्**। प्राक्कडारात् समास इत्यधिकृतम्। समास इति प्रथमान्तं योग्यतया सप्तम्यन्तं विपरिणम्यते, तदाह—**समासे उपसर्जनं प्राक् प्रयोज्यमिति**। पूर्वमित्यस्य पूर्वं प्रयोज्यमित्यर्थ इति भावः। एवं च प्रकृते अपेत्यस्य पूर्वं प्रयोगनियमः सिद्धः। अपदिशा इति स्थितम्। अत्र दिशाशब्दस्यापि उपसर्जनत्वमाह—**एकविभक्ति**। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यतः समास इति उपसर्जनमिति चानुवर्तते। समास इत्यनेन विग्रहवाक्यं लक्ष्यते। एकैव विभक्तिर्यस्य तदेकविभक्ति, नियतविभक्तिकमिति यावत्। एवं च विग्रहे यन्नियतविभक्तिकं तत्पूर्वनिपातभिन्नकार्ये कर्तव्य उपसर्जनं स्यादित्यर्थः। फलितमाह—**विग्रहे यन्नियतेति**। निष्कौशाम्बिशब्द उदाहरणम्। तत्र कौशाम्ब्या निष्क्रान्तो निष्क्रान्तं निष्क्रान्तेन निष्क्रान्ताय निष्क्रान्ताद् निष्क्रान्तस्य निष्क्रान्ते इति विग्रहेषु 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासे निष्कौशाम्बिः निष्कौशाम्बिं निष्कौशाम्बिना इत्यादि, इति स्थितिः। अत्र कौशाम्बीशब्द एव विग्रहे नियतविभक्तिक इति तस्योपसर्जनत्वमनेन भवति। समासशास्त्रे कौशाम्बीशब्दस्य पञ्चमीनिर्दिष्टत्वमेव, न तु प्रथमानिर्दिष्टत्वमिति 'प्रथमानिर्दिष्टम्-' इत्यनेनोपसर्जनत्वाप्राप्तौ वचनम्। तत्र कौशाम्बीशब्दस्य अनेन उपसर्जनत्वेऽपि न पूर्वनिपातः। तत्तद्विभक्त्यन्तैरेव समास इत्यत्र इदमेव सूत्रं प्रमाणम्। 'तुल्यार्थैः-' इति सूत्रे भाष्ये स्पष्टमिदम्। प्रथमान्तपदैनैव समास इति 'अनेकम्-' इति सूत्रे भाष्ये स्थितम्। प्रकृते च दिशयोर्मध्यः मध्यं मध्येनेत्यादिविग्रहवाक्येषु दिशाशब्दस्य नियतविभक्तिकत्वात् समासविधौ प्रथमानिर्दिष्टत्वाभावेऽपि

र्षिते समासे यत्प्रथमान्तमिति व्याख्यानप्रसक्त्या कृष्णश्रित इत्यादौ श्रितादिष्वतिप्रसङ्ग इत्याशयेनाह—**समासशास्त्र इति। विग्रह इति**। अनुवर्तमानेन समास-

तु तस्य पूर्वनिपातः। **६५६ गोस्त्रियोरुपसर्जनस्य।** (१-२-४८) उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। 'अव्ययीभावश्च' (सू ४५१) इत्यव्ययत्वम्। **६५७ नाव्ययीभावादतोऽम्त्वपञ्चम्याः।** (२-४-८३) अदन्तादव्ययीभावात्सुपो न लुक् तस्य तु पञ्चमीं विना

अनेनोपसर्जनत्वं भवति। पूर्वनिपातस्तु न भवतीति स्थितम्। **गोस्त्रियोः**। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यतो ह्रस्व इति प्रातिपदिकस्येति चानुवर्तते। उपसर्जनस्येति गोस्त्रियोर्विशेषणम्। प्रत्येकाभिप्रायमेकवचनम्। स्त्रीशब्देन स्त्रीप्रत्ययो गृह्यते। प्रत्ययग्रहणपरिभाषया तदन्तविधिः। उपसर्जनभूतस्य गोशब्दस्य स्त्रीप्रत्ययान्तस्य चेति लभ्यते। तदुभयं प्रातिपदिकस्य विशेषणम्। तदन्तविधिः। तदाह- **—उपसर्जनमित्यादिना**। अत्र च शास्त्रीयमेवोपसर्जनं गृह्यते, न त्वप्रधानमात्रम्, कुमारीमिच्छन् कुमारीवाचरन्वा ब्राह्मणः कुमारीत्यत्रातिप्रसङ्गात्। **अव्ययीभावश्चेत्यव्ययत्वमिति**। तथा च अव्ययीभावसमासादुत्पन्नानां सुपाम् 'अव्ययादाप्सुपः' इति लुक् स्यादिति शङ्कायामाह—**नाव्ययीभावात्**। अम् तु अपञ्चम्या इति छेदः। 'नाव्ययीभावादतः' इत्येकं वाक्यम्। 'ण्यक्षत्रियार्ष-' इत्यतो लुगित्यनुवर्तते। 'अव्ययादाप्सुपः' इत्यतः सुप इति च। अता अव्ययीभावो विशेष्यते, तदन्तविधिः, तदाह—**अदन्तादव्ययीभावात् सुपो न लुगिति**। अम् तु अपञ्चम्या इति वाक्यान्तरम्। पञ्चमीभिन्नस्य तु सुपः अमादेशः स्यात्। पञ्चम्यास्तु अम् न भवतीति लभ्यते।

ग्रहणेन विग्रहो लक्ष्यत इति भावः। **न तु तस्येति**। 'अनन्तरस्य-' इति न्यायात्पूर्वसूत्रेण विहितस्य पूर्वनिपातत्वं न निषिध्यते। तेन कुमारीश्रित इत्यादौ न दोषः। **गोस्त्रियोः**। उपसर्जनस्येति गोस्त्रियोर्विशेषणम्। एकवचनं तु प्रत्येकाभिप्रायेण। गोस्त्रीभ्यां तु प्रातिपदिकं विशेष्यते। विशेषणेन तदन्तविधिरित्याशयेनाह—**उपसर्जनं य इति**। उपसर्जनमिह शास्त्रीयं गृह्यते, न त्वप्रधानलक्षणम्। तेन कुमारीवाचरन्ब्राह्मणः कुमारीत्यत्र न दोष इत्युक्तम्। **स्त्रीप्रत्ययान्तमिति**। स्त्र्यधिकारोक्तटाबाद्यन्तमित्यर्थः। तेनातिलक्ष्मीरित्यादौ नातिप्रसङ्गः। नन्वेवमपि राजकुमारीपुत्र इत्यादावतिप्रसङ्ग इति चेत्, अत्राहुः—उपसर्जनस्य ससंबन्धितया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रति यदुत्तरपदभूतयोर्गोस्त्रियोर्गुणीभावस्तदैव ह्रस्वत्वमिति भाष्यादावुक्तत्वान्न दोषः। भाष्यादावपि उत्तरपदभूतयोरित्यर्थलाभस्तु 'कृत्तद्धित-' इत्यतः समासपदानुवर्तनादिति बोध्यमिति। **नाव्ययी**। अत्र 'अपञ्चम्याः' इति प्रतिषेधोऽनन्तरत्वादम एव, न तु व्यवहितस्यालुकोऽपि। अमुमेवार्थं द्योतयितुं सूत्रे तुशब्दः। **तस्य पञ्चमीं विनेति**। एवं चादन्तादव्ययीभावात्परस्य पञ्चमीभिन्नस्य सुपो

अमादेशश्च स्यात्। दिशयोर्मध्येऽपदिशम्। 'क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्।' इत्यमरः। ६५८ **तृतीया सप्तम्योर्बहुलम्।** (२-४-८४) अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात्। अपदिशम्, अपदिशेन अपदिशम्, अपदिशे। बहुलग्रहणात् सुमद्रम् उन्मत्तगङ्गम् इत्यादौ सप्तम्या नित्यमम्भावः। 'विभक्ति–' इत्यादेरयमर्थः—विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते, सोऽव्ययीभावः। विभक्तौ तावत्–हरौ इत्यधिहरि। सप्त-

---

तदाह—**नस्य पञ्चम्यीं विना अमादेश इति**। अत्रापञ्चम्या इति प्रतिषेधोऽयम् अनन्तरत्वादम एव भवति, न तु लुङ्निषेधस्यापि। एवं चादन्तादव्ययीभावात् परस्य सुपो न लुक्, किंत्वमादेशः। पञ्चम्यास्तु लुग् अमादेशश्च न भवतीति स्थितिः। सूत्रे एतत्सूचनार्थमेव तुशब्दः। 'अव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्येवोक्तौ तु अदन्तादव्ययीभावात् परस्य पञ्चमीभिन्नस्य सुपो लुकोऽपवादः अमादेशः स्यादित्येव लभ्येत। एवं सति पञ्चम्या अमोऽभावे 'अव्ययादाप्सुपः' इति लुक् स्यात्। अतो लुङ् निषिध्यत इत्यास्तां तावत्। **अपदिशमिति**। पञ्चमीभिन्नविभक्तीनामुदाहरणम्। पञ्चम्यास्तु अपदिशादित्युदाहार्यम्। यद्यपि नपुंसकह्रस्वत्वेनाप्येतत् सिध्यति, 'अव्ययीभावश्च' इति नपुंसकत्वस्य वक्ष्यमाणत्वात्। तथापि 'गोस्त्रियोः–' इति सूत्रं चित्रगुः, अतिखट्व इत्याद्यर्थमावश्यकमिति इहापि न्याय्यत्वादुपन्यस्तम्। तदेवमव्ययमिति भाष्यादृष्टेनापि योगविभागेन अपदिशमिति रूपसाधनं वृद्धसंमतमित्याह—**क्लीबाव्ययमिति। तृतीया।** 'नाव्ययीभावात्–' इत्यस्माद् अत इत्यनुवर्तते, तदाह—**अदन्तादिति**। अमादेशाभावे तु 'नाव्ययीभावात्–' इत्यलुक्। ननु वेति सिद्धे किं बहुलग्रहणेनेत्यत आह—**बहुलग्रहणादिति** तदेवमव्ययमिति योगं विभज्य व्याख्याय तदुत्तरखण्डं व्याख्यातुमुपक्रमते—**विभक्तीत्यादेरयमर्थ इति**। विभक्तीत्यनेन विभक्त्यर्थो विवक्षितः। उच्यन्त इति वचनाः। कर्मणि ल्युट्। विभक्ति, समीप, समृद्धि, व्यृद्धि, अर्थाभाव, अत्यय, असंप्रति, शब्दप्रादुर्भाव, पश्चात्, यथा, आनुपूर्व्य, यौगपद्य, सादृश्य, संपत्ति, साकल्य, अन्त एतेषां षोडशानां द्वन्द्वः। ते च ते वचनाश्च इति विग्रहः। विभक्त्यर्थादिषु वाच्येष्वित्यर्थः। अव्ययीभावः समास इति चाधिकृतम्। तदाह—**विभक्त्यर्थादिष्विति। विभक्तौ तावदिति**। विभक्त्यर्थे प्रथममुदाह्रियत इत्यर्थः। **हरौ इत्यधिहरीति**। हरौ इति लौकिकविग्रहः। तेन यावदव-

---

लुङ् न, पञ्चम्यास्तु लुगादेशावुभावपि न भवत इति स्थितम्। अतः किम्, अधिहरि। **दिशयोरिति**। दिशोरिति हलन्तेन विग्रहेऽपि एतदेव रूपम्। दिशशब्दस्य शरदादिषु पाठाट्टच्। **अपदिशमिति**। पञ्चमीव्यतिरिक्तविभक्तीनामुदाहरणमिदम्।

म्यर्थस्यैवात्र द्योतकोऽधिः । हरि ङि अधि इत्यलौकिकं विग्रहवाक्यम् । अत्र निपातेनाभिहितेऽप्यधिकरणे वचनसामर्थ्यात्सप्तमी । ६५६ अव्ययीभावश्च ।

गम्यते तावदेवाधिहरीति समासेनाप्युच्यत इत्यर्थः । अधिशब्दस्य हराविव्यनेन अव्ययीभावसमासे सुब्लुकि समासविधावव्ययमिति प्रथमानिर्दिष्टत्वाद् अधेः पूर्वनिपाते समासादुत्पन्नस्य सुपः 'अव्ययादाप्सुपः' इति लुगिति भावः । ननु लौकिकविग्रहे समस्यमानः अधिशब्दः कुतो नोपात्त इत्यत आह—**सप्तम्यर्थस्यैवात्र द्योतकोऽधिरिति** । तथा चाधिद्योत्यार्थस्य अधिकरणत्वस्य सप्तम्यैव उक्तत्वाद् अधिशब्दो न पृथगुपात्तः, नित्यसमासताया वक्ष्यमाणत्वेन स्वपदविग्रहानौचित्यादिति भावः । ननु हरौ इति परिनिष्ठितसंधिकार्यस्य समासे सति औ इत्यस्य सुपो लुकि समासे रेफादिकारः कुतः श्रूयेतेत्यत आह—**हरि ङि इति** । संधिकार्यात् प्राग लौकिकविग्रहवाक्य एव समासप्रवृत्तेः 'प्रत्ययोत्तरपदयोश्च' इति भाष्यसंमतत्वादिति भावः । यथा चैतत् तथा भूतपूर्व इत्यत्रानुपदमेवोक्तम् । नन्वधिना निपातेनाधिकरणस्योक्तत्वात् कथं हराविति सप्तमीत्यत आह—**अत्र निपातेनेति । वचनेति** । सुपेत्यनुवर्त्य सुबन्तेनात्र समासविधिसामर्थ्यात् सप्तमी स्यादेवेति भावः । वस्तुतस्तु अनभिहितसूत्रभाष्ये तिङ्कृत्तद्धितसमासैरित्येव परिगणनं दृष्टम् । अतो निपातेनाधिना अभिहितेऽप्यधिकरणत्वे सप्तमी निर्बाधा । 'विषवृक्षोऽपि संवर्ध्य स्वयं छेतुमसांप्रतम्' इत्यत्र तु एतत्त्व इत्यध्याहार्यम् । कृताऽभिधानाद् विषवृक्षाद् द्वितीया न भवति । न च कृत्तद्धितसमासैरिति परिगणनं भाष्ये प्रत्याख्यातमिति वाच्यम्, 'कटं करोति भीष्ममुदारं दर्शनीयम्' इत्यत्र परिगणनफलस्यान्यथासिद्धेरेव तत्रोक्तत्वादित्यास्तां तावत् । **अव्ययी-**

पञ्चम्यास्तु अपदिशादित्युदाहार्यम् । **विभक्तौ तावदिति** । तावच्छब्दः क्रमार्थः । लौकिकं विग्रहवाक्यं प्रदर्शयति—**हराविति** । प्राचा तु हरौ अधिकृत्येति विगृहीतम् । तदसत्, अधिहरीत्यत्र अधिकृत्येत्यर्थस्याप्रतीतेः । **हरि ङीति** । अलौकिके ङिशब्दस्यैव प्रवेश उचितः 'अन्तरङ्गानपि—' इति न्यायात् । अन्यथा ङेरौत्त्वे कृते अधिहरीति समासे हरिशब्देकारो दुर्लभः स्यादिति भावः । इह हरावधीति स्थिते इति प्राचोक्तमुपेक्षितम्, नित्यसमासेषु अस्वपदविग्रहस्यैवोचितत्वात् **अभिहितेऽपीति** । द्योतितेऽपीत्यर्थः । **वचनसामर्थ्यादिति** । सुपेत्यनुवर्त्य सुबन्तेन समासविधानसामर्थ्यात्सप्तमी स्यादेवेति भावः । नन्वभिहितेऽधिकरणे 'प्रातिपदिकार्थमात्र—' इति प्रथमैव स्यान्न तु सप्तमीति चेत्, अत्राहुः—अधीत्यस्य सुबन्तेन समासस्यावश्यकत्वेऽधिशब्दद्योत्याधिकरणार्थवाचकविभक्तेरेवेह स्वीकर्तुमुचितत्वादिति । यत्तु प्रसादकृता व्याख्यातम्—तिङ्कृत्तद्धितसमासैरिति परिगणनादधिनाभिहितेऽपि सप्तमी

(२-४-१८) अयं नपुंसकं स्यात् । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (सू ३१८)। गोपायतीति गाः पातीति वा गोपाः, तस्मिन्नित्यधिगोपम् । समीपे—कृष्णस्य समीपमुपकृष्णम् । समया ग्रामम् , निकषा लङ्काम् , आराद्वनादित्यत्र तु नाव्ययीभावः, 'अभितःपरितः—' (वा १४४२) 'अन्यारात्—' (सू ५९५) इति

भावश्च । अयं नपुंसकं स्यादिति । 'स नपुंसकम्' इत्यतः तदनुवृत्तेरिति भावः। नपुंसकत्वस्य फलमाह—**ह्रस्वो नपुंसक इति । गोपायतीति** । रक्षतीत्यर्थः । 'गुपू रक्षणे' विच् । 'आयादय आर्धधातुके वा' इत्यायप्रत्ययः । 'लोपो व्योः—' इति यलोपः । 'वेरपृक्तस्य' इति वकारलोपः । गोपाशब्द आकारान्तः । **गाः पातीति** । पातेर्विचि उपपदसमासे गोपाशब्द इति भावः । **अधिगोपमिति** । विभक्त्यर्थेऽव्ययीभावसमासे सुब्लुकि नपुंसकत्वे ह्रस्वत्वे सति 'नाव्ययीभावात्—' इत्यमि पूर्वरूपमिति भावः । 'गोस्त्रियोः—' इति तु नात्र प्रसज्यते, स्त्रीप्रत्ययान्तत्वाभावात् । **समीप इति** । समीपार्थकाव्ययस्य समासे उदाहरणं वक्ष्यत इत्यर्थः । **कृष्णस्य समीपमिति** । लौकिकविग्रहवाक्यमेतत् । अत्र समस्यमानस्य उपशब्दस्य स्थाने समीपमिति प्रयुक्तम् । कृष्णस्य उप इति तु न विग्रहः, नित्यसमासत्वेनास्वपदविग्रहौचित्यात् । ननु समया ग्रामम् , निकषा लङ्काम् , आराद्वनात् , इत्यत्रापि समयाद्यव्ययानां समीपार्थकत्वाद् अव्ययीभावः स्यात् , ततश्च 'ग्रामं समया, ग्रामं निकषा, वनादारात्' इति प्रयोगो न स्यात् । अव्ययीभावसमासे अव्ययस्य पूर्वनिपातनियमादित्यत आह—**समयेति** ।

स्यादेवेति । तन्न, परिगणनस्याकरे प्रत्याख्याततत्वात् 'कर्मणि द्वितीया' इति सूत्रे स्वयमपि तथैवोक्तत्वात् । 'क्रमादमुं नारद इत्यबोधि सः' इति प्रयोगविरोधाच्च । अत्र व्याचक्षते—'वचनग्रहणं विभक्त्यादिभिः प्रत्येकं संबध्यते' 'साकल्यान्तेषु' इत्येव वक्तव्ये वचनग्रहणात् । एवं च तत्सामर्थ्याद्विभक्त्यर्थमात्रवृत्तेरव्ययस्येह ग्रहणम् । तेन वृक्षस्योपरि, वृक्षस्य पुर इत्यत्र समासो न भवति । उपर्यादयो हि दिग्देशकालेष्वपि वर्तन्ते, न तु विभक्त्यर्थमात्रे । अत एव 'क्रमादमुं नारद इत्यबोधि सः' इत्यादौ नातिप्रसङ्गः, इति शब्दस्य सर्वनामवत्प्रकृतपरामर्शकत्वेन कर्मत्वमात्रानभिधायकत्वात् । एवं च विभक्तिशब्दः सप्तम्यां पर्यवस्यति । अत एव परिशिष्टे—'अधिकरणे' इत्येव सूत्रितम् । पाणिनिस्तु मात्रालाघवमभिप्रेत्य विभक्तिशब्दं प्रायुङ्क्त' इति । अन्ये तु—'लाघवात् 'ङिसमीपसमृद्धि—' इति वक्तव्ये विभक्तिग्रहणाद्विभक्तिशब्दो न सप्तम्यां पर्यवस्यति । ततश्च कर्मत्वमात्रद्योतकतायाम् 'इति नारदम्' इति समासो भवत्येव' इत्याहुः । **नपुंसकं स्यादिति** । एतच्च 'स नपुंसकम्' इत्यतो लभ्यते । **समीप इति** । अव्ययीभाव इत्यन्वर्थसंज्ञाश्रयणात्सप्तमीरूपाव्ययार्थप्राधान्य एवायं समासः । समीपवर्तिप्राधान्ये

द्वितीयापञ्चम्योर्विधानसामर्थ्यात् । मद्राणां समृद्धिः संमद्रम्[1] । यवनानां व्यृद्धिर्दुर्यवनम् । विगता ऋद्धिर्व्यृद्धिः । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्य-

विधानसामर्थ्यादिति । 'समया ग्रामम् ,निकषा लङ्काम् , आराद्वनात्' इत्यत्र शेषषष्ठ्यां सत्यामपि अव्ययीभावसमासे सति प्रातिपदिकावयवत्वाद् उपपदविभक्त्योः द्वितीयापञ्चम्योः षष्ठ्या वा लुकि समासात् प्रातिपदिकार्थादिविवक्षायां सर्वासु विभक्तिषु जातासु यथायथम् अम्भावे तद्विकल्पे च 'समयाग्रामम् ,निकषालङ्कम् , आराद्वनम् ,समयाग्रामेण, निकषालङ्केन, आराद्वनेन, समयाग्रामे, निकषालङ्के, आराद्वने' इति स्यादेव । ततश्च द्वितीयापञ्चम्योर्विधिर्व्यर्थः स्यात् , षष्ठ्यैव गतार्थत्वात् । न च समासात् पुनरुपपदविभक्ती द्वितीयापञ्चम्यौ शङ्क्ये, सकृत्प्रवृत्तयोः पुनः प्रवृत्त्ययोगात् । वस्तुतस्तु मध्यार्थकसमयाशब्दयोगे द्वितीयाविधानस्य दूरार्थकाराच्छब्दयोगे पञ्चमीविधानस्य चरितार्थत्वाद् इदमयुक्तम् । न चैवं सति 'समया ग्रामम्' इत्यादौ अव्ययीभावः शङ्क्यः, अभक्त इत्यादाविव विभक्त्यर्थसमीपादिमात्रवृत्त्यव्ययस्यैव ग्रहणात् , समयानिकषाऽऽराच्छब्दानां चाधिकरणशक्तिप्रधानतया समीपमात्रवृत्तित्वाभावात् । ग्रामस्य समीपे इति हि तेषामर्थः । उपशब्दस्तु तन्मात्रवाची । उपकृष्णं भक्ता इत्यत्र कृष्णसामीप्यवन्त इति बोधात् । **मद्राणां समृद्धिरिति** । समित्यव्ययपर्यायः समृद्धिशब्दो विग्रहवाक्ये ज्ञेयः । एतत्सूत्रविहितसमासस्य नित्यतया अस्वपदविग्रह । एवमग्रेऽपि ज्ञेयम् । **संमद्रमिति** । सर्वत्र सुब्लुगादि पूर्ववज् ज्ञेयम् । समृद्धा मद्राः संमद्रा इत्यादौ तु नाव्ययीभावः, वचनग्रहणसामर्थ्येनाव्ययार्थप्राधान्य एव तत्प्रवृत्तेरिति भाष्ये स्पष्टम् । **यवनानां व्यृद्धिर्दुर्यवनमिति** । दुर्शब्दार्थको व्यृद्धिशब्दो विग्रहे ज्ञेयः । **विगतेति** । अभावप्रतियोगिनीत्यर्थः । ऋद्धेरभावो व्यृद्धिरिति यावत् । न चार्थाभावेऽयमिति भ्रमितव्यम् , समस्यमानपदार्थाभावस्यैव तत्र विवक्षितत्वात् , इह च यवनाभावस्याप्रतीतेः । यवनीयऋद्ध्यभावस्यैव प्रतीतेः । तद् ध्वनयन्न् अर्थाभाव उदाहरति—**मक्षिकाणामभावो निर्मक्षिकमिति**। विग्रहे निर्शब्दसमानार्थ-

तु 'संख्ययाव्ययासन्ना–'इति बहुव्रीहिर्वक्ष्यति 'उपदशाः' इति यथा। **विधानसामर्थ्यादिति** । ननु समयाग्राममित्यादौ द्वितीयाविधानसामर्थ्यान्मास्त्वव्ययीभावः, आराद्वनादित्यत्र तु भवेदेव, 'अन्यारात्–' इति इति पञ्चमीविधानस्य दूरार्थकाराच्छब्दयोगे सावकाशत्वादिति चेत् , अत्र केचिदुत्प्रेक्षयन्ति—'दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्' इति षष्ठीपञ्चम्योः प्राप्तयोस्तदपवादतया पञ्चम्येव तेन विधीयते । तथा चान्तिकार्थकाराच्छब्दयोगे षष्ठ्यपवादतया पञ्चमीविधानं निरवकाशमेवेति तत्सामर्थ्यादव्ययीभावो नेत्युक्तिः सम्यगेवेति । तदपरे न क्षमन्ते । 'अन्तिकार्थाराच्छब्दयोगे विशिष्य पञ्चमीविधाना-

१ अयं पाठो बालमनोरमानुरोधी। इतरत्र तु 'सुमद्रम्' इति पाठः ।

योऽतिहिमम् । अत्ययो ध्वंसः । निद्रा संप्रति न युज्यत इत्यतिनिद्रम् । हरि-

---

कमभावपदमिति भावः । घटः पटो नेत्यत्र तु नाव्ययीभावः, अर्थग्रहणसामर्थ्येना-त्यन्ताभावस्यैव विवक्षितत्वात् । **हिमस्यात्ययोऽतिहिममिति ।** अतीत्यव्यय-पर्यायः अत्ययशब्दो विग्रहे ज्ञेयः । अर्थाभावेत्यनेन पौनरुक्त्यं निरस्यति—**अत्ययो ध्वंस इति ।** अर्थाभावशब्देनात्यन्ताभाव एव विवक्षितः । तेन पटस्य प्रागभावो निष्पटमिति न भवतीति भावः । सूत्रे असंप्रतीत्यस्य संप्रति न युज्यत इत्यर्थः । 'एतर्हि संप्रतीदानीम्' इत्यमरः । युजिक्रियान्तर्भावेण एकार्थीभावान्नञ्समासः । तदाह—**निद्रा संप्रति न युज्यत इत्यतिनिद्रमिति ।** अतीत्यव्ययस्यासंप्रत्यर्थकस्य स्थाने 'संप्रति न युज्यते' इति विग्रहवाक्यं ज्ञेयम् । सूत्रे शब्दप्रादुर्भाव इत्यनेन शब्दस्य

भावात्, 'अन्यारात्–' इति सूत्रस्य त्वन्यत्र कृतार्थत्वाच, सामीप्ये आराद्वनमित्यव्ययी-भावो दुर्वार एवेति । एवं हि व्याकुर्वतां 'पदस्येत्यपकर्षाभावे मृशार्थे सावकाशोऽयं यङ् पौनःपुन्ये परेण द्विर्वचनेन बाध्येत' इति 'नित्यवीप्सयोः' इति सूत्रस्थमनोरमाग्रन्थो-ऽनुकूल इति दिक् । **सुमद्रमिति ।** उत्तरपदार्थप्राधान्ये तु 'कुगति–' इति तत्पुरुषः । समृद्धा मद्राः सुमद्राः । **दुर्यवनमिति ।** न चार्थाभावेनेह सिद्धिः, येन समस्यते तदीयार्थाभावेऽत्र समासस्वीकारात् । न चेह यवनानामभावः, येनार्थाभावे समासः स्यात्, किं तु तदीयाया ऋद्धेरभाव इति । **निर्मक्षिकमिति ।** संसर्गाभावेऽयं समासो न त्वन्योन्याभावेऽपि । अर्थग्रहणसामर्थ्येन समस्यमानपदजन्यप्रतीतिविशेष्यविरोधिन एवाभावस्य ग्रहणात् । अन्योन्याभावस्य तु प्रतियोगितावच्छेदकेनैव विरोधात्तस्य च प्रकारत्वेऽप्यविशेष्यत्वात् । ये तु वदन्ति—'घटः पटो नेत्यत्रापि पटत्वात्यन्ताभाव एवार्थः, आकृत्यधिकरणन्यायेन जातेः पदार्थत्वादिति, तेषामपि मते अर्थग्रहणसामर्थ्या-देवाक्षिप्तधर्म्यभावे अयं समासो न तु धर्माभाव इति न दोषः । **अत्यय इति ।** स्पष्टार्थमेतत्, अर्थाभावेन गतार्थत्वात् । अर्थाभावेन संसर्गाभावो विवक्षितो न त्वन्यो-न्याभावः । घटः पटो नेत्यत्रातिप्रसङ्गादिति निष्कर्षात् । **संप्रति नेति ।** संप्रतीत्यव्य-यमिदानीमित्यर्थे । 'एतर्हि संप्रतीदानीम्' इत्यमरोक्तेः । तच्चाधिकरणशक्तिप्रधानत्वा-त्क्रियापदेनैवान्वयार्हम् । निषेधोऽपि क्रियाया एवोचितः, तदेतदाह—**युज्यत इति ।** असंप्रतीति सौत्रप्रयोगे तु युजिक्रियान्तर्भावेण नञ्समास इति बोध्यम् । यत्तु प्रसाद-कृतोक्तम्—'असंप्रति संप्रत्यभाव इत्यर्थः । अनेन उपभोग्यवस्तुनो यो वर्तमानः कालः स निषिध्यते' इति । तन्न, अधिकरणशक्तिप्रधानस्य क्रिययैवान्वयार्हस्य निषेधं प्रति प्रतियोगित्वेनान्वयस्यायुक्तत्वात् । न हि भूतले घटो नास्तीत्यनेन भूतलं निषिध्यत इति

---

१ 'निषेधप्रतियोगित्वेन' इति क्वचित् पाठः ।

शब्दस्य प्रकाश इतिहरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं समासः, 'ततः पश्चात्स्रंस्यते ध्वंस्यते' इति भाष्यप्रयोगात्। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। अनुरूपम्, रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थम्। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्तद्योगे

प्रकाशनं विवक्षितम्, तदाह—हरिशब्दस्य प्रकाश इतिहरि इति। इतीत्यव्ययं शब्दप्रकाशे वर्तते। तस्य हरिशब्देन स्वरूपपरेण षष्ठ्यन्तेन समास इति भावः। विष्णोः पश्चादनुविष्णु इति। अनु इत्यव्ययं पश्चादर्थे वर्तत इत्यर्थः। भाष्येति। 'अचः परस्मिन्–' इति सूत्रभाष्य इत्यर्थः। 'ततः पश्चात्' इत्यत्राव्ययीभावे तु पश्चाच्छब्दस्य पूर्वनिपातः स्यादिति भावः। एतद्भाष्यप्रयोगादेव एतत् सूत्रे तत्तदर्थबोधकपदघटकतया गृहीताव्ययेन तत्तदर्थकेनायं समासो नेति विज्ञायते। अत एव 'यथाऽसादृश्ये' इति सूत्रे सादृश्यसंपत्तीति प्राप्नोतीत्येवोक्तं भाष्ये। यथाशब्देन तु भवत्येव समासः, उत्तरसूत्रारम्भात्। सूत्रे यथाशब्देन तदर्थो लक्ष्यते। यथार्थे विद्यमानमव्ययं समस्यत इति लभ्यत इत्यभिप्रेत्याह—योग्यतेति। अनुरूपमिति। अत्रानु इत्यव्ययं योग्यतायाम्, अतो यथार्थे वर्तत इति भावः। अर्थमर्थं प्रतीति। लौकिकविग्रहवाक्यम्। अत्र वीप्सायां द्विर्वचनम्। 'लक्षणेत्थंभूताख्यान–' इति वीप्सायां द्योत्यायां प्रतेः कर्मप्रवचनीयत्वात् तद्योगे द्वितीया। समासे तु द्विर्वचनं न, समासेन वीप्साया द्योतितत्वाद् इति 'हयवरट्' इति सूत्रे कैयटः। प्रतिना तस्योक्तत्वादिति तु तत्त्वम्। नन्वर्थमर्थं प्रतीति लौकिकविग्रहप्रदर्शनं न संभवति। नित्यसमासत्वादित्यत आह—प्रतिशब्दस्येति। सामर्थ्यादिति। अव्ययीभावसमासस्य नित्यत्वं तु शेषषष्ठ्यामपि अव्ययीभावे सुब्लुकि समासात् सर्वविभक्तीनाममभावे तद्विकल्पे च प्रत्यर्थं प्रत्यर्थेनेत्यादिसिद्धे द्वितीयाफलकं प्रतेः कर्मप्रवचनीयत्वविधानमनर्थकं स्यादिति भावः। वस्तुतस्तु प्रतिस्थानमित्यादौ 'उपसर्गात्सुनोति–' इति षत्वाभावसंपादनेन कर्मप्रवचनीयत्वं चरितार्थमेव। 'अर्थमर्थं प्रति प्रत्यर्थम्' इति 'सरूपाणाम्–' इति सूत्रे

कश्चिदभ्युपैति, येनात्र वर्तमानकालनिषेधो युक्त्यर्हः स्यात्। इतिहरीति। स्वरूपपरे षष्ठ्यन्तेन हरिशब्देन सह प्रकाशार्थस्येतिशब्दस्य समासः। ततः पश्चादिति। सति चात्राव्ययीभावे पश्चाच्छब्दस्य पूर्वनिपातः स्यादिति भावः। भाष्यप्रयोगादिति। 'अनेकमन्यपदार्थे' इति सूत्रे 'सर्वपश्चात्' इति भाष्यप्रयोगाच्चेत्यपि बोध्यम्। प्रत्यर्थमिति। वृत्तौ वीप्सान्तर्भावान्न द्विर्वचनम्। प्रतिशब्दस्येति। यत्त्वाहुः—'ग्रामस्य वृक्षं वृक्षं प्रतीत्यत्र सापेक्षत्वेन समासाभावे द्वितीयाविधानं सावकाशमिति।

द्वितीयागर्भं वाक्यमपि । शक्तिमनतिक्रम्य यथाशक्ति । हरेः सादृश्यं सहरि । वक्ष्यमाणेन सहस्य सः । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपदिति विग्रहे—

६६० अव्ययीभावे चाकाले । (६-३-८१) सहस्य सः स्यादव्ययीभावे, न तु काले । सचक्रम् । काले तु सहपूर्वाह्णम् । सदृशः सख्या ससखि । यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्यादित्येवमर्थम् । क्षत्राणां संपत्तिः सक्षत्रम् । ऋद्धेराधिक्यं समृद्धिः, अनुरूप आत्मभावः संपत्ति-

---

भाष्ये प्रयोगदर्शनाद् इह वैकल्पिकसमास इति तत्त्वम् । **शक्तिमनतिक्रम्य यथाशक्तीति** । 'परावरयोगे च' इति क्त्वाप्रत्ययः । परावरत्वं च बौद्धम् । अत्र यथेत्यव्ययं पदार्थानतिक्रमे वर्तत इत्यर्थः । **हरेः सादृश्यं सहरीति** । अत्र सहेत्यव्ययं सादृश्ये वर्तत इति भावः । **वक्ष्यमाणेनेति** । 'अव्ययीभावे चाकाले' इत्यनेनेत्यर्थः । **ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठमिति** । कार्यं कृतमिति शेषः । तत्तद्विभक्त्या विग्रह इति पक्षाभिप्रायेणेदम् । पूर्वस्य क्रमेण इत्यनुपूर्वम्, ततः स्वार्थे ष्यञ् । यद्यपि एतत्सूत्रगृहीताव्ययेन समासो नेत्यनुपदमेवोक्तम्, तथापि सूत्रगृहीतानुनाप्यनुज्येष्ठमिति समासः, अनुपूर्वेति निर्देशात् । सूत्रे युगपच्छब्दात् स्वार्थे ष्यञ् यौगपद्यशब्दः । तद् ध्वनयन्नाह—**चक्रेण युगपदिति** । युगपत्पर्यायस्य सहशब्दस्य चक्रेण इत्यनेन समासे कृते सतीत्यर्थः । युगपच्छब्देन तु न समासः, सूत्रे गृहीतत्वादिति भावः । **अव्ययीभावे । सहस्य सः स्यादिति** । 'सहस्य सः संज्ञायाम्' इत्यतः तदनुवृत्तेरिति भावः । **न तु काल इति** । कालवाचके परे सहस्य सो नेत्यर्थः । **सचक्रमिति** । चक्रेण युगपत्प्रयुक्तमित्यर्थः । **सहपूर्वाह्णमिति** । समीपादौ अव्ययीभावः । सूत्रे सादृश्येति स्वार्थे ष्यञ् । तद् ध्वनयन्नाह—**सदृशः सख्या ससखीति** । सहेत्यव्ययं सदृशार्थकमिति भावः । **गुणभूतेऽपीति** । वचनग्रहणसामर्थ्येनाव्ययार्थप्राधान्य एव समासप्रवृत्तेः गुणीभूतसादृश्य अप्राप्त्या तद्ग्रहणमिति भावः । **क्षत्राणां संपत्तिः सक्षत्रमिति** । क्षत्रियाणामनुरूपं कर्मेत्यर्थः । सहेत्यव्ययमत्र संपत्तौ वर्तत इति भावः । संपत्तिसमृद्धिशब्दयोः पौनरुक्त्यं परिहरति—**ऋद्धेरिति** । धनधान्यादेरित्यर्थः ।

तन्न, नित्यसमासेषु 'सविशेषणानां वृत्तिर्न' इत्यस्याप्रवृत्तेः । **आनुपूर्व्येणेति** । अनुपूर्वस्य भाव आनुपूर्व्यम्, ब्राह्मणादित्वात् ष्यञ् । **चक्रेण युगपदिति** । अत्र केचित्—युगपच्चक्रमिति समासेनैव भवितव्यम्, युगपच्छब्दस्याप्यव्ययत्वात्, किं तु 'चक्रेणैककाले' इत्यादि विग्रहीतुमुचितमित्याहुः । **सहपूर्वाह्णमिति** । साकल्येऽव्ययीभावः । **गुणभूतेऽपीति** । यदि सादृश्य इति नोच्यते, तर्हि यत्र सादृश्यं प्रधानमवगम्यते तत्रैव

१यद्यपि 'यद्यपि' इति क्वचिदपि नास्ति तथापि उत्तरत्र 'तथापि' इति दर्शनाद् अस्माभिर्निवेशितम् ।

रिति भेदः । तृणमप्यपरित्यज्य सतृणमत्ति । साकल्येनेत्यर्थः । न त्वत्र तृणभक्षणे तात्पर्यम् । अन्ते—अग्निग्रन्थपर्यन्तमधीते साग्नि । ६६१ **यथाऽसादृश्ये** । (२–१–७) असादृश्य एव यथाशब्दः समस्यते । तेनेह न—यथा हरिस्तथा

अनुरूप इति । अनुरूपो योग्य आत्मभावः, स्वोचितं कर्मेति यावत् । **तृणमप्यपरित्यज्य सतृणमत्तीति** । 'परावरयोगे च' इति क्त्वा । परावरत्वं बौद्धमेव । सहशब्दोऽत्रापरिवर्जने वर्तते । न तु तृणसहभावेऽपीति भावः । नन्वेवं सति साकल्ये कथमिदमुदाहरणं स्यादित्यत आह—**साकल्येनेत्यर्थ इति** । पात्रे परिविष्टं सकलं भक्षयतीति यावत् । **न त्वत्रेति** । तृणभक्षणस्याप्रसक्तेरिति भावः । **अन्त इति** । उदाहरणं वक्ष्यत इति शेषः । सूत्रे अन्तशब्देन अन्तावयवसाहित्यं विवक्षितमित्यभिप्रेत्योदाहरति—**अग्निग्रन्थपर्यन्तमधीते साग्नीति** । अग्निशब्देन अग्निचयनप्रतिपादको ग्रन्थो विवक्षितः । तेनान्तावयवेन सहितं ग्रन्थमिति विग्रहः । अग्निग्रन्थपर्यन्तमिति बहुव्रीहिः । ग्रन्थमिति अन्यपदार्थाध्याहारः । अधीत इति तु न समासप्रविष्टम् । अन्तावयवेन अग्निग्रन्थेन सहितं वेदकल्पसूत्रादिभागमधीत इत्यर्थः । अत्र कृत्स्नस्यानध्येतव्यत्वाद् अग्निग्रन्थपर्यन्ताध्ययने तत्कात्स्न्यानवगमात् साकल्यात्पृथगुक्तिः । **यथाऽसादृश्ये** । असादृश्य इति छेदः, व्याख्यानात् । असादृश्ये योग्यतावीप्सापदार्थानतिवृत्तिरूपे वर्तमानं यथेत्यव्ययं समस्यत इत्यर्थस्य यथार्थत्वादेव सिद्धेः नियमार्थमिदमित्याह—**असादृश्य एवेति** । ननु 'प्रकारवचने थाल्' इति विहितथा-

---

स्यात्, अव्ययार्थप्राधान्यस्याव्ययीभावे औत्सर्गिकत्वादिति भावः । **अन्त इति** । इदानीमेतावान् प्रदेशोऽध्येतव्य इति यावतो ग्रन्थप्रदेशस्य परिग्रहः कृतस्तदपेक्षा समाप्तिरिहान्तशब्देन विवक्षिता, सा चासकलेऽप्यध्ययने भवतीति साकल्यात्पृथगुच्यते । **साग्नीति** । अग्निशब्दस्तत्प्रतिपादकग्रन्थे वर्तते, स च तृतीयान्तो नित्यं समस्यते । न चैवमग्निना सहेति प्रयोगो दुर्लभ इति वाच्यम्, साहित्यमात्रस्य विवक्षायां तत्प्रयोगस्योपपत्तेः । अन्तत्वविवक्षायां तु समासस्य नित्यत्वादग्निग्रन्थपर्यन्तमित्यस्वपदविग्रहो दर्शितः । यत्तु केचित्—*अग्निरन्तोऽस्येति प्रथमान्तेनाग्नेरन्तत्वमिति षष्ठ्यन्तेन वा विग्रहः*, समासोऽपि प्रथमान्तेन षष्ठ्यन्तेन वेत्याहुः, तन्न, सहशब्दस्यान्तवाचकत्वाभावादन्तत्वस्य तु सुतरामलाभात्, सहयुक्ते तृतीयाया न्याय्यत्वाच्च सतृणमत्तीत्यत्र साकल्यस्येव साग्नीत्यत्रान्तत्वस्यापि साहित्यद्योत्यतया तत्र तृतीयान्तेन समासं स्वीकृत्य इह तत्परित्यागस्य निष्प्रमाणत्वाच्च । अत्रेदं बोध्यम्—'तदधीते–' इत्यध्येतृप्रत्ययस्य वैकल्पिकत्वात्साग्नीत्यत्राण् नोक्तः । कृतेऽप्यध्येतरि 'सर्वादेः सादेश्च लुग्वक्तव्यः' इति वक्ष्यमाणत्वात्साग्नीत्येव रूपमिति । **यथाऽसा** । निःसंदेहाय 'सादृश्ये यथा' इत्येव वक्तव्ये

हरः। हरेरुपमानत्वं यथाशब्दो द्योतयति। तेन 'सादृश्य' इति वा 'यथार्थे' इति वा प्राप्तं निषिध्यते। **६६२ यावदवधारणे।** (२-१-८) यावन्तः श्लोकास्ता-वन्तोऽच्युतप्रणामा यावच्छ्लोकम्। **६६३ सुप्प्रतिना मात्रार्थे।** (२-१-९) शाकस्य लेशः शाकप्रति। मात्रार्थे किम्–वृक्षं वृक्षं प्रति विद्योतते विद्युत्। **६६४**

ल्प्रत्ययान्तस्य कथं सादृश्ये वृत्तिरित्यत आह—**हरेरिति**। सामान्यस्य भेदको यो विशेषः स प्रकारः, तस्मिन् प्रकारे थालिति 'प्रकारवचने थाल्' इत्यस्यार्थः। ततश्च यद्विशेषधर्मवान् हरिः तद्विशेषधर्मवान् हर इति बोधे सति यत्तच्छब्दाभ्यां तयोः प्रकारयोः अभेदावगमाद् उपमानत्वप्रतीतिरिति भावः। **तेनेति**। प्राप्तमित्यत्रान्वयः। सादृश्यार्थकत्वेनेत्यर्थः। **सादृश्य इति वेति**। 'अव्ययं विभक्ति–' इति सूत्रगतेन सादृश्य वर्तमानमव्ययं समस्यत इत्यंशेन वा यथार्थे विद्यमानमव्ययं समस्यत इत्यंशेन वा प्राप्तमव्ययीभावसमासकार्यं निषिध्यत इति भावः। भाष्ये तु प्रकारवचने यथाशब्दयोगे सादृश्येत्यनेनैव प्राप्तिरुक्ता, न तु यथार्थत्वेन प्राप्तिरुक्ता। यथाशब्दस्य सूत्रगृहीत्विन तद्योगे यथार्थेत्यप्रवृत्तेरिति तदाशय इति शब्देन्दुशेखरे विस्तरः। **यावदवधारणे**। इयत्तापरिच्छेद गम्ये यावदित्यव्ययं समस्यते। सोऽव्ययीभाव इत्यर्थः। **यावन्त इति**। यत् परिमाणे येषामिति विग्रहे 'यत्तदेतेभ्यः परिमाणे वतुप्' इति वतुप्प्रत्ययः। यावदित्यव्ययमेव समस्यते, विग्रहस्तु तद्धितान्तेनैव, नित्यसमासत्वेन अस्वपदविग्रहौचित्यात्। अवधारणे किम्। यावद्दत्तं तावद्भुक्तम्। इयद् भुक्तमिति नावधारयतीत्यर्थः। **सुप्प्रतिना मात्रार्थे**। सुबिति छेदः। मात्रा लेशः। तस्मिन्नर्थे विद्यमानेन प्रतिना सुबन्तं समस्यत इत्यर्थः। सुबित्यनुवर्तमाने पुनः सुब्ग्रहणं संनिहितस्याव्ययमित्यस्यानुवृत्त्यर्थम्। तद् ध्वनयन्नुदाहरति—**शाकस्य लेशः शाकप्रतीति**। अत्र प्रतीत्यव्ययं मात्रार्थकम्। अतस्तेन शाकस्येति सुबन्तस्य समासः। समासविधौ सुबन्तस्य प्रथमानिर्दिष्टत्वेन उपसर्जनत्वापूर्वनिपातः, न तु प्रतेः, तस्य समासविधौ तृतीयानिर्दिष्टत्वात्। **वृक्षं वृक्षं प्रतीति**। अत्र प्रतेः मात्रार्थकत्वाभावाद् न तेन समासः।

विपरीतोच्चारणं नञः श्लेषलाभार्थमिति व्याचष्टे—**असादृश्य इति। यावन्त इति**। यत्परिमाणमेषां ते। 'यत्तदेतेभ्यः–' इति वतुप्। **यावच्छ्लोकमिति**। यावदित्यव्ययं समस्यते, विग्रहस्तु तद्धितान्तेनेत्यस्वपदविग्रहत्वमस्त्येव। अवधारणे किम्, यावद्दत्तं तावद्भुक्तम्, कियद् भुक्तं वा नावधारयतीत्यर्थः। **सुप्प्रतिना**। सुबित्यनुवर्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थमिति ध्वनयन्नुदाहरति—**शाकप्रतीति**। नन्वारम्भसामर्थ्यादव्ययभिन्नमेव सुप्समस्यत इति चेत्, अत्राहुः—पुनः सुब्ग्रहणाभावे दोषामन्यमहः, दिवामन्या रात्रिरिति वृत्तिविषये सत्त्वप्रधानतादर्शनात्तादृशाव्यया-

अक्षशलाकासंख्याः परिणा। (२-१-१०) द्यूतव्यवहारे पराजय एवायं समासः। अक्षेण विपरीतं वृत्तमक्षपरि। शलाकापरि। एकपरि। ६६५ विभाषा।

न च 'लक्षणेत्थम्–' इति कर्मप्रवचनीयत्वविधानसामर्थ्यादेवात्र समासो न भविष्यति, सति समासे द्वितीयायाः षष्ठ्या वा लुकि अविशेषात्, सकृत्प्रवृत्ततया समासात्तद्विभक्त्यनुत्पत्तेरिति वाच्यम्, वृक्षं प्रति सिञ्चति इत्यादौ 'उपसर्गात् सुनोति–' इति षत्वनिवृत्त्या कर्मप्रवचनीयत्वस्य चरितार्थत्वादित्यन्यत्र विस्तरः। **अक्षशलाका।** समस्यन्ते सोऽव्ययीभाव इति शेषः। **द्यूतव्यवहार इति।** वार्तिकमिदम्। इदं द्यूतं तावत् पञ्चभिः अक्षैः शलाकाभिर्वा भवति। यदि अक्षाः शलाका वा कृत्स्ना उत्ताना अवाञ्चो वा पतन्ति, तदा पातयिता जयति। अन्यथा पराजयत इति स्थितिः। **अक्षेणेति।** कर्तरि तृतीया। विपरीतं वृत्तमित्यत्र वृतेर्भावे क्तः। विपरीतमिति क्रियाविशेषणम्। जये यथा परिवर्तितव्यं न तथा परिवृत्तमित्यर्थः। **शलाकापरीति।** शलाकया विपरीतं वृत्तमिति भावः। **एकपरीति।** एकेन विपरीतं वृत्तमित्यर्थः। एवं द्विपरि

न्येव मात्रार्थे प्रतिना समस्येरन्, तथा च दिवसस्य लेशो दिवाप्रति दोषाप्रतीत्यादीनामेवोदाहरणत्वं संभाव्येतेति। **वृक्षं प्रतीति।** ननु लक्षणादौ प्रतेः कर्मप्रवचनीयसंज्ञाविधानसामर्थ्याद् द्वितीयागर्भं वाक्यमेव स्यात्, न तु समासः, तस्य लेशार्थे सावकाशत्वादिति चेत्। मैवम्, वृक्षं प्रति सिञ्चन्तीत्यादौ षत्वनिवारकत्वेन कर्मप्रवचनीयसंज्ञाविधानस्य चरितार्थत्वान्मात्रार्थग्रहणाभावे लक्षणादावप्यनेन समासप्रसङ्गात्। वीप्सायामव्ययीभावे तु प्रत्यादेः पूर्वनिपातत्वे प्रत्यर्थं सिञ्चन्तीत्यादौ षत्वाप्रसक्त्या कर्मप्रवचनीयविधानस्याचरितार्थतया तत्सामर्थ्याद् द्वितीयागर्भं वाक्यमपीत्युक्तं मूलकृता 'अव्यये विभक्ति–' इति सूत्रे। अत्र नव्याः—प्रत्यर्थमित्यव्ययीभावे वीप्सायां द्योतकत्वेन विद्यमानमव्ययं समस्यते। वीप्साद्योतकस्य यदि कर्मप्रवचनीयसंज्ञाविधिः स्वीक्रियते, तदापि प्रतिस्तवनं प्रतिस्थानमित्यादौ षत्वनिवारणाय प्रतीत्यस्य कर्मप्रवचनीयसंज्ञा चरितार्थैव। वस्तुतस्तु वीप्सायां विषयभूतायां प्रत्यादेः कर्मप्रवचनीयसंज्ञा, न तु वीप्साद्योतकस्यैव। अन्यथा वृक्षं वृक्षं प्रति सिञ्चन्तीत्यत्र 'द्विर्वचनेनैव वीप्सा द्योत्यते। प्रतिशब्दस्तु क्रियया संबध्यते। कर्मणि द्वितीया। कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् षत्वं न' इत्यादिमनोरमाग्रन्थो 'लक्षणेत्थंभूता–' इति सूत्रस्थो दत्तजलाञ्जलिः स्यात्। ततश्च संज्ञाविधानसामर्थ्यस्योपक्षीणत्वाद् अर्थमर्थं प्रतीत्यादिभाष्यप्रयोगादेव द्वितीयागर्भं वाक्यमपि भवतीत्येवं व्याख्येयमित्याहुः। पराजयं द्योतयितुमाह— **विपरीतं वृत्तमिति।** पूर्वं जये यथा वृत्तं तथा न वृत्तमित्यर्थः। **एकपरीति।** एकेन विपरीतं वृत्तमित्यर्थः। एवं द्विपरीत्यादि—'विभाषापपरिबहिर्–' इति योगं

(२-१-११) अधिकारोऽयम् । एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम् । 'सुप्सुपा' इति तु न नित्यसमासः । अव्ययम् इत्यादिसमासविधानाज्ज्ञापकात् ।

त्रिपरि इत्यादि । **विभाषा । अधिकारोऽयमिति** । ततश्च उत्तरत्र समासविधिषु एतदनुवर्तत इति लभ्यते । ननु 'प्राक्कडारात् समासः' इत्यत ऊर्ध्वं 'सह सुपा' इत्यतः प्रागेव कुतो विभाषाधिकारो न कृत इत्यत आह—**एतत्सामर्थ्यादिति** । मध्ये विभाषाधिकारपाठसामर्थ्यादेवेतः प्राचीनानां नित्यसमासत्वं गम्यत इत्यर्थः । यद्यपीतः प्राचीनानां विकल्पे प्रमाणाभावादेव नित्यत्वं सिद्धम् । तथापि तस्यैव लिङ्गेन दृढीकरणमिति बोध्यम् । नन्वेवं सति 'सुप्सुपा' इत्यपि नित्यसमासः स्यात् । ततश्च पूर्वं भूतः इति लौकिकविग्रहवाक्यमनुपपन्नं स्यात् । 'सुप्सुपा' इति विषये विस्पष्टं पटुः विस्पष्टपटुरिति विग्रहप्रदर्शनपरम् 'आ कडारात्–' इति सूत्रस्थभाष्यमपि विरुध्येतेत्यत आह—**सुप्सुपेति तु न नित्यसमास इति** । कुत इत्यत आह—**अव्ययमित्यादीति** । 'आ कडारात्' इत्येव सिद्धे 'प्राक्कडारात्' इति प्राग्ग्रहणं समाससंज्ञाया अव्ययीभावादिसंज्ञासमावेशार्थम् । अन्यथा एकसंज्ञाधिकारात् पर्यायः स्यादिति 'आ कडारात्–' इति सूत्रे भाष्ये स्थितम् । तत्र 'अव्ययं विभक्ति–' इत्याद्यव्ययीभावादिविधिषु 'सुप्सुपा' इति समासमनूद्य नाव्ययीभावादिसंज्ञा विधेयाः । 'उपपदमतिङ्' 'कर्तृकरणे कृता बहुलम्' 'आख्यातमाख्यातेन क्रियासातत्ये' इत्यादौ सुबन्तस्य सुबन्तेन समासस्य उद्देश्यस्याप्रसिद्धेः । अतस्तेषु समासविधानस्यावश्यकत्वाद् अर्थाधिकारानुरोधात् सर्वत्र समास इत्यनुवृत्तं विधेयसमर्पकमित्यास्थेयम् । तत्र 'सुप्सुपा' इत्येव सिद्धे 'अव्ययं विभक्ति–' इत्याद्यव्ययीभावादिविधिषु समाससंज्ञाविधानं व्यर्थं सत् ततः प्राचीनविधेर्वैकल्पिकत्वं ज्ञापयति । न चाव्ययीभावादिविधिषु समासविध्यभावे अव्ययादीनां समासशास्त्रे प्रथमा-

---

विभज्य व्याचष्टे—**विभाषेति** । इतः प्राचीनानां समासानां टिघुभादिसंज्ञानामिव वाग्रहणाभावान्नित्यत्वं न्यायत एव सिद्धम्, तच्च लिङ्गेनापि द्रढयति—**एतदिति** । नन्वेवं 'सुप्सुपा' इत्यपि नित्यं स्यात्, इष्टापत्तौ तु 'पूर्वं भूतो भूतपूर्वः, सुप्सुपेति समासः' इति वृत्तिग्रन्थो विरुध्येत । तथा शाकलसूत्रे 'सिन्नित्यसमासयोः शाकलप्रतिषेधः' इत्यत्र 'नित्यग्रहणेन नार्थः, इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्वः' इति भाष्यं कैयटो व्याख्यत्—'वाप्यश्व इति 'सुप्सुपा' इति समासः, 'संज्ञायाम्' इति सप्तमीसमासस्य तु नित्यत्वात्सिद्धः प्रतिषेध इति, सोऽपि ग्रन्थो विरुध्येतेत्याशङ्कायामाह—**सुप्सुपेति त्विति** । नन्वत्र किं प्रमाणमित्यत आह—**अव्ययमित्यादीति** । सुप्सुपेत्यनेनैव सिद्धे समासे 'अव्ययम्–' इत्यादिसूत्रैः पुनः समासविधानं प्राचीनस्य काचित्कतां ज्ञापयतीत्यर्थः । एवं च इवेन समासस्यापि काचित्कत्वाद् 'उद्बाहुरिव वामनः' इत्यादि

६६६ अपपरिबहिरञ्चवः पञ्चम्या । (२-१-१२) अपविष्णु संसारः, अप विष्णोः । परिविष्णु, परि विष्णोः । बहिर्वनम् ,बहिर्वनात् । प्राग्वनम् ,प्राग्वनात् ।
६६७ आङ् मर्यादाऽभिविध्योः । (२-१-१३) एतयोराङ् पञ्चम्यन्तेन वा

निर्दिष्टत्वाभावेन उपसर्जनत्वाभावात् पूर्वनिपातनियमो न स्यात् , तदर्थमव्ययीभावादि-विधिषु समासविधानं चरितार्थमिति वाच्यम् , 'प्रथमानिर्दिष्टम्–' इति सूत्रे समास इत्यस्य समासत्वव्याप्याव्ययीभावादिविधायके शास्त्रे इत्यर्थाभ्युपगमेन अव्ययादीनाम् उपसर्जनत्वसिद्धेर्वक्तुं शक्यत्वात् । तस्मादव्ययीभावादिविधिषु समासविधानं 'सुप्सुपा' इति समासस्य वैकल्पिकत्वं ज्ञापयतीति स्थितम् । 'आ कडारात्–' इति सूत्रे 'सुप्सुपा' इति समासविषये 'विस्पष्टं पटुर्विस्पष्टपटुः' इति विग्रहप्रदर्शनपरभाष्यं चेह लिङ्गमित्यलं बहुना । एवं च 'इवेन समासः–' इत्यादि वैकल्पिकमिति सिद्धम् । यद्यपि नित्यसमासा-धिकारे 'कुगति–' इत्यत्रापि इवेनेति वार्तिकं पठितम् , तथापि 'सुप्सुपा' इत्यत्र पठित-मेव तत्रापि स्मार्यत इति कैयटः ।

अपपरिबहिः । समस्यते सोऽव्ययीभाव इति शेषः । **अपविष्णिवति ।** अत्र अप इत्यव्ययं वर्जने । विष्णुं वर्जयित्वा संसरणमित्यर्थः । **अप विष्णोरिति ।** लौकिकविग्रहवाक्यम् , समासस्य वैकल्पिकत्वेनास्वपदविग्रहनियमाभावात् । 'अपपरी वर्जने' इति अपेत्यव्ययस्य कर्मप्रवचनीयत्वात् तद्योगे 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । तदन्तेन अपेत्यस्याव्ययीभावसमासः, सुब्लुक् । अपेत्यव्ययस्य प्रथमानिर्दिष्टत्वात् पूर्व-निपातः । समासात् सुबुत्पत्तिः । 'अव्ययादाप्सुपः' इति लुक् । एवं यथायथमग्रेऽपि ज्ञेयम् । **परिविष्णिवति ।** अत्रापि परिर्वर्जने । पञ्चम्यादि पूर्ववत् । **बहिर्वनम् बहिर्वनादिति ।** अस्मादेव ज्ञापकाद् बहिर्योगे पञ्चमी । इतरत् पूर्ववत् । अदन्त-त्वादम्भावः । **प्राग्वनम् , प्राग्वनादिति ।** अञ्चूत्तरपदयोगे पञ्चमी । **आङ् मर्या-दाभिविध्योः । एतयोरिति ।** मर्यादाभिविध्योः विद्यमान इत्यर्थः । मर्यादाया-

---

सिद्धम् । 'इवेन–' इति वार्तिकं तु यद्यपि 'कुगति–' इत्यत्र पठ्यते, तथापि 'सुप्सुपा' इत्य-त्रत्यमेव नित्याधिकारे स्मारितमिति कैयटः । एवं स्थिते 'उद्बाहुरिव वामनः' इत्यादि-लोकप्रयोगसिद्धये इवेन समासस्य छन्दोविषयकत्वं कल्पयन्तः प्रत्युक्ताः । छन्दस्यपि तत्समासस्य नित्यत्वानभ्युपगमात् । जीमूतस्येवेत्यत्र हि बह्वृचैः समासाभ्युपगमेऽपि तैत्तिरीयैर्व्यस्तस्यैव पाठात् । एतच्च मनोरमायां स्थितम् । **अपपरिबहि ।** अपपरि-योगे 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी विहिता, अञ्चूत्तरपदयोगेऽपि 'अन्यारात्–' इत्या-दिना विहितैव । तेनात्र 'पञ्चम्या' इति ग्रहणं 'बहिर्योगे पञ्चमी भवति' इति ज्ञापना-

समस्यते, सोऽव्ययीभावः । आमुक्ति संसारः, आ मुक्तेः । आबालं हरिभक्तिः, आ बालेभ्यः । ६६८ **लक्षणेनाभिप्रती आभिमुख्ये** । (२-१-१४) आभिमुख्यद्योतकावभिप्रती चिह्नवाचिना सह प्राग्वत् । अभ्यग्नि शलभाः पतन्ति, अग्निमभि । प्रत्यग्नि, अग्निं प्रति । ६६९ **अनुर्यत्समया** । (२-१-१५) यं पदार्थं समया द्योत्यते तेन लक्षणभूतेनानुः समस्यते, सोऽव्ययीभावः । अनुवनमशनिर्गतः । वनस्य समीपं

मुदाहरति—**आमुक्तीति** । मुक्तेः प्रागित्यर्थः । अभिविधावुदाहरति—**आबालमिति** । बालानारभ्य इत्यर्थः । 'आङ् मर्यादावचने' इत्युभयत्रापि कर्मप्रवचनीयत्वात् 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । **लक्षणेनाभि** । लक्षणेनेत्येतद्व्याचष्टे—**चिह्नवाचिनेति** । **प्राग्वदिति** । समस्येते सोऽव्ययीभाव इत्यर्थः । **अभ्यग्नि शलभाः पतन्तीति** । शलभाः क्षुद्रजन्तुविशेषाः स्थूलमक्षिकाः । **अग्निमभीति** । विग्रहोऽयम् । 'अभिरभागे' इति 'लक्षणेत्थम्–' इति चाभिप्रत्योः कर्मप्रवचनीयत्वम्, अग्निज्ञाप्यं तदभिमुखं च शलभपतनमित्यर्थः । **अनुर्यत्समया** । लक्षणेनेत्यनुवर्तते । यदिति समयायोगे 'अभितःपरितः–' इति द्वितीयान्तं सामान्ये नपुंसकम्, तदाह—**यं पदार्थमिति** । **अनुवनमिति** । अत्र वनशब्दो वनसमीपदेशे लाक्षणिकः ।

र्थम् । 'ज्ञापकसिद्धं न सर्वत्र' इति 'करस्य करभो बहिः' इत्यपि सिद्धम् । **आबालमिति** । 'आ परमाणोरा च भूगोलकम्' इति किरणावलीप्रयोगस्तु प्रामादिकः । समासमध्ये चशब्दप्रयोगासंभवात् । 'आ च भूगोलकात्' इति पाठस्तूचितः । **लक्षणेना** । 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरस्तदाह—**चिह्नवाचिनेति** । इहाभिप्रती लक्ष्यलक्षणभावम् आभिमुख्यं चेत्युभयं द्योतयत इति फलितम् । **अग्निमभि । अग्निं प्रतीति** । 'अभिरभागे' 'लक्षणेत्थंभूता–' इत्यनेन च अभिप्रत्योः कर्मप्रवचनीयत्वाद् द्वितीया । लक्षणेनेति किम्, स्रुघ्नं प्रतिगतः । स्रुघ्नादागतस्तमेव प्रतिनिवृत्त इत्यर्थः । अत्र हि स्रुघ्नः कर्म, न तु लक्षणम् । अभिप्रतीति किम्, येनाग्निस्तेन गतः । येन पथा अग्निर्गतस्तेन गत इति प्रतीतेर्भवति गमनस्याग्निर्लक्षणम्, आभिमुख्यमप्यस्तीति येनतेनशब्दयोरग्निशब्देन समासः स्यात् । आभिमुख्ये किम्, अभ्यङ्का गावः । प्रत्यङ्काः । अभिनवः प्रतिनवश्चाङ्क आसामिति बहुव्रीहिः । अङ्को ह्यत्र भवति गवां लक्षणम्, आभिमुख्यं तु नास्ति । ननूत्सर्गत अव्ययार्थप्राधान्येऽव्ययीभावस्वीकारात्कथमिह प्रसङ्गः । अत्राहुः—इह प्रकरणे बहुव्रीहिविषये अव्ययीभावो भवतीति ज्ञापनार्थमिदम् । तेन 'संख्या वंश्येन, द्विमुनि व्याकरणमित्यादि सिद्धमिति । **अनुर्यत्स** । यदिति समयायोगे द्वितीयेति ध्वनयति—**यं पदार्थमिति** । यस्य पदार्थस्य समीपमित्यर्थः । लक्षणेनेत्यनुवर्तत इत्याह—**लक्षणभूतेनेति** । चिह्नवाचिनेत्यर्थः । 'अव्ययं

गत इत्यर्थः। ६७० **यस्य चायामः।** (२-१-१६) यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते। अनुगङ्गं वाराणसी। गङ्गाया अनु । गङ्गादैर्घ्यसदृश-

---

वनसमीपस्य लक्षणत्वं वस्तुसदेव निमित्तम्, तदाह—**वनस्य समीपं गत इत्यर्थ इति**। वस्तुतो लक्षणीभूतस्य वनस्य समीपं गत इति यावत्। 'अव्ययं विभक्ति-' इत्यादिना सिद्धे विभाषार्थमिदं सूत्रम्। ततश्च वनस्यानु इति लौकिकविग्रहवाक्यमुदाहार्यम्। नात्र कर्मप्रवचनीयसंज्ञा शङ्क्या, वस्तुसत एवात्र लक्षणत्वस्य निमित्तत्वाश्रयणात्। लक्षणत्वस्य निमित्तत्वे तु वनमनु इत्येव वाक्यमुदाहार्यम्। **यस्य चायामः।** लक्षणेनेत्यनुवर्तते। अनुरित्यनुवर्त्य आवर्त्य तृतीयया विपरिणम्यते। तत्र एकं लक्षणेनेत्यत्र संबध्यते। द्वितीयं तु अनुनेत्येतद् 'यस्य चायामः' इत्यनन्तरं संबध्यते। द्योत्यत इति शेषः। आयामो दैर्घ्यम्, तदाह—**यस्य दैर्घ्यमिति**। यद्दैर्घ्यसदृशं दैर्घ्यमित्यर्थः। **समस्यत इति**। सोऽव्ययीभाव इत्यपि बोध्यम्। अनुगङ्गमिति समासः। लौकिकविग्रहं दर्शयति—**गङ्गाया अन्विति**। इहापि लक्षणत्वं वस्तुसदेव निमित्तम् न त्वनुद्योत्यम्। अतो न कर्मप्रवचनीयत्वम्। द्योत्यत्वेनान्वये तु गङ्गामन्विति युक्तम्। अनुगङ्गमित्यत्र गङ्गाशब्देन गङ्गादैर्घ्यसदृशं दैर्घ्यं लक्ष्यते। तदे-

---

विभक्ति-' इत्यनेन सिद्धे विभाषार्थं सूत्रम्। तेन पक्षे 'वनस्यानु' इत्युदाहार्यमिति मनोरमायां स्थितम्। अत्र वदन्ति—वनस्येति षष्ठीह दुर्लभा, कर्मप्रवचनीययुक्ते द्वितीयाया दुर्वारत्वात्, तत्सामर्थ्यात्समया लङ्कामितिवत्समासबाधे प्रसक्ते अस्य विध्यर्थत्वात्। न चायमनुः सामीप्यमात्रद्योतकः, न लक्ष्यलक्षणभावद्योतकश्चेति वाच्यम्, लक्षणेनेत्यनुवृत्तिवैयर्थ्यात्। न चैवमपि लक्षणमात्रद्योतकत्वं नास्तीति वाच्यम्, 'लक्षणेत्थम्-' इत्यत्र मात्रपदाभावात्। अभिमभि, अभिं प्रतीति पूर्वसूत्रस्थोदाहरणप्रत्युदाहरणविरोधाच्च। अतोऽत्र पक्षे वनमनु इत्युदाहार्यम्। वनस्य समीपं गत इति मूलस्थं विवरणवाक्यं तु लक्षणभूतस्य वनस्य समीपं गत इति व्याख्येयमिति। अन्विति किम्, ग्रामं समया। यत्समयेति किम्, वृक्षमनु विद्योतते विद्युत्। लक्षणेन किम्, अनुवनम्। उपकृष्णमितिवदत्र नित्यमव्ययीभावः। **यस्य चा**। इहानुरित्यनुवर्त्य आवृत्त्यैकं तृतीयान्तत्वेन विपरिणमय्य व्याचष्टे—**अनुनेति। लक्षणभूतेनेति**। लक्षणेनेत्यनुवर्तत इति भावः। **अनुगङ्गमिति**। इहायामोपलक्षणत्वं चानुना द्योत्यते, लक्ष्यं तु समासार्थः। अत एव वाराणस्या सामानाधिकरण्यम्। एवं स्थिते फलितमाह—**गङ्गादैर्घ्येति। वाराणसीति**। वरं च तदनश्च वरानः श्रेष्ठोदकम्। 'अनः क्लीबं जले शोके मातृस्यन्दनयोर्द्वयोः' इति रुद्रभसौ। तस्याद्दूरे भवा। 'अदूरभवश्च' इत्यण्, आदिवृद्धिः, 'पूर्वपदात्संज्ञायाम्-' इति णत्वम्। **गङ्गाया अन्विति**। समासाभावपक्षे

दैर्घ्योपलक्षितेत्यर्थः। ६७१ **तिष्ठद्गुप्रभृतीनि च।** (२-१-१७) एतानि निपात्यन्ते। तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु दोहनकालः। आयतीगवम्। इह शत्रादेशः पुंवद्भावविरहः समासान्तश्च निपात्यते। इत्यादि। ६७२ **पारे मध्ये षष्ठ्या वा।** (२-१-१८) पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते। एदन्तत्वं चानयोर्निपात्यते। पक्षे षष्ठीतत्पुरुषः। पारेगङ्गादानय, गङ्गापारात्।

वानुयोत्यम्। तदाह—**गङ्गादैर्घ्येति। तिष्ठद्गुप्रभृतीनि च। एतानीति।** शब्दरूपाणीत्यर्थः। **तिष्ठन्ति गाव इति।** फलितार्थकथनम्। तिष्ठन्त्यो गावो यस्मिन् काले स तिष्ठद्गु इत्येव वक्तव्यम्, 'सुप्सुपा' इत्यनुवृत्तेः। **दोहनकाल इति।** तदा गवां शयनोपवेशनयोरभावादिति भावः। **आयतीगवमिति।** आयत्यो गावो यस्मिन् काले इति विग्रहः। **इहेति।** उदाहरणद्वय इत्यर्थः। **शत्रादेश इति।** तिष्ठन्त्यो गाव इति आयत्यो गाव इति च प्रथमासमानाधिकरणत्वाद् 'लटश्शतृशानचौ–' इत्यप्राप्तौ तन्निपातनमिति भावः। **पुंवद्भावेति।** तिष्ठन्तीशब्दस्येव आयतीशब्दस्यापि 'स्त्रियाः पुंवत्–' इति पुंवत्त्वस्य प्राप्तौ तदभावो निपात्यत इति भावः। **समासान्तश्चेति।** आयतीगोशब्दस्य टच् समासान्तो निपात्यते, तत्पुरुष एव गोशब्दस्य टज्विधेरिति भावः। समासान्तश्चेति चकाराद् अव्ययीभावश्च निपात्यत इति ज्ञेयम्। तथा च तिष्ठद्गोशब्दस्य नपुंसकह्रस्वत्वम्। अव्ययत्वात् सुपो लुक्। आयतीगवशब्दात्तु 'नाव्ययीभावात्–' इत्यम्भाव इत्यादि फलति। **इत्यादीति।** खलेयवं खलेबुसम् इति सप्तम्या अलुग् इत्यादि ग्राह्यम्। **पारे मध्ये षष्ठ्या वा।** पारे मध्ये इति न सप्तम्यन्तयोर्ग्रहणम्। किं तु पारमध्यशब्दयोरेवेत्याह—**पारमध्यशब्दाविति। समस्येते इति।** अव्ययीभावसंज्ञौ चेत्यपि बोध्यम्। ननु पारमध्यशब्दयोरकारान्तयोः ग्रहणे कथमेकारनिर्देश इत्यत आह—**एदन्तत्वं चेति।** ननु विभाषा इत्यधिकारादेव सिद्धे वाग्रहणं किमर्थमित्यत आह—**पक्षे षष्ठीतत्पुरुष इति।** वाग्रहणाभावेऽयमव्ययीभावसमासो विशेषविहितत्वात् षष्ठीसमासं बाधेत। तदबाधार्थं वाग्रहणमिति भावः। **पारेगङ्गादानयेति।** गङ्गायाः पाराद् इति विग्रहे अव्ययी-

---

प्रागुक्तरीत्या गङ्गामन्वित्युदाहार्यमित्याहुः। **तिष्ठद्गुप्रभृतीनि च।** चकार एवकारार्थे। तेनैषां वृत्त्यन्तरं न भवति, परमतिष्ठद्गु इत्यादि न भवतीत्यर्थः। **तिष्ठद्ग्विति।** 'गोस्त्रियोः–' इति ह्रस्वः। प्रथमासमानाधिकरणे शत्रादेशस्यासंभवादाह—**इह शत्रादेश इति। इत्यादीति।** आदिशब्देन खलेयवम्, खलेबुसम्। सप्तम्या अलुक्। लूनयवम्–लूयमानयवमित्यादि ग्राह्यम्। **पारेमध्ये। निपात्यत इति।** यत्र सप्तम्यर्थो न संभवति तदर्थमेकारान्तत्वनिपातनम्। सप्तम्यर्थसंभवे तु 'तत्पुरुषे

मध्येगङ्गात्, गङ्गामध्यात्। महाविभाषया वाक्यमपि। गङ्गायाः पारात्। गङ्गाया

भावसमासे सति सुब्लुकि पारशब्दस्य पूर्वनिपाते निपातनादेत्वे नपुंसकह्रस्वत्वे पारेगङ्गशब्दात् समासात् पुनः पञ्चम्युत्पत्तिः। 'अव्ययादाप्–' इति न लुक्, अदन्ततया 'नाव्ययीभावात्–' इति निषेधात्। अपञ्चम्या इति पर्युदासादम्भावश्च नेति भावः। **गङ्गापारादिति**। षष्ठीसमासपक्षे ज्ञेयम्। **मध्येगङ्गादिति**। पारेगङ्गादितिवद्रूपम्। **गङ्गामध्यादिति**। षष्ठीसमासे ज्ञेयम्। पारे मध्ये इति सप्तम्यन्ते षष्ठ्या समस्येते इति व्याख्याने तु गङ्गायाः पारे मध्ये इति विग्रहे समासे सति 'तत्पुरुषे कृति बहुलम्' इति बहुलग्रहणात् सप्तम्योरलुकि नपुंसकह्रस्वत्वे समासात् पुनरुत्पन्नायाः सप्तम्या अम्भावे पारेमध्यं पारेगङ्गम् इति सिद्धेः एकारनिर्देशो व्यर्थः स्यात्। अतो यत्र सप्तम्यर्थो न संभवति तदर्थमेकारनिपातनमिति भाष्ये स्पष्टम्। एतत्सूचनायैव पञ्चम्यन्तोदाहरणमिति बोध्यम्। ननु यदि वाग्रहणमिह पक्षे षष्ठीसमासप्राप्त्यर्थमेव स्यात्, तर्हि गङ्गाया मध्यादिति वाक्यं न स्यादित्यत आह—**महाविभाषयेति**। विभाषेत्यधिकृता महाविभाषा। सर्वेषु समासविधिषु प्रायेण तस्यानुवृत्तेः महत्त्वं बोध्यम्। ननु अव्ययीभावसमासस्य षष्ठीसमासापवादत्वेऽपि तस्य महाविभाषया वैकल्पिकत्वात् तदभावपक्षे उत्सर्गतः षष्ठीतत्पुरुषः प्रवर्तत एव। तस्यापि षष्ठीसमासस्य विभाषाधिकारस्थत्वेन वैकल्पिकत्वात् तदभावपक्षे वाक्यमपि सिध्यत्येव। तस्मादिह सूत्रे वाग्रहणं व्यर्थमेवेति चेत्, उच्यते, 'यत्र उत्सर्गापवादौ महाविभाषया विकल्पितौ तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते' इति ज्ञापनार्थमिह वाग्रहणम्। तेन पूर्वं कायस्येत्यत्र एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति। दक्षस्यापत्यं दाक्षिरित्यत्र अत इञा मुक्ते 'तस्यापत्यम्' इत्यण् न भवति, किं तु वाक्यमेवेति भाष्ये स्पष्टम्।

कृति बहुलम्' इति बहुलग्रहणादलुकापि सिद्धेः, अतोऽत्र सप्तम्यर्थाभावसूचनाय पञ्चम्यन्तमुदाहरति—**पारेगङ्गादिति**। **महाविभाषयेति**। नन्वपवादेऽव्ययीभावे महाविभाषया विकल्पिते पक्षे तदुत्सर्गः षष्ठीतत्पुरुषः प्रवर्तते, तस्यापि विभाषाधिकारस्थत्वेन वैकल्पिकत्वात्पक्षे वाक्यमपि सिध्यतीति सूत्रे वाग्रहणं व्यर्थमेवेति चेत्, अत्राहुः—महाविभाषया एकार्थीभावस्य पाक्षिकत्वे यदा एकार्थीभावस्तदा षष्ठीसमासं बाधित्वा नित्यमव्ययीभावे प्राप्ते पक्षे षष्ठीसमाससमावेशार्थमिह वाग्रहणम्। 'व्यपेक्षासामर्थ्यमेके' इति पक्षे तु वृत्तावपि व्यपेक्षालक्षणमेव सामर्थ्यमिति वाक्यस्य नित्य बाधे प्रसक्ते तया वृत्तिर्विकल्प्यते। तथा चाव्ययीभावे विकल्पिते पूर्वोक्तरीत्या पक्षे तत्पुरुषस्तस्यापि वैकल्पिकत्वाद्वाक्यमपि सिद्ध्यत्येव, तथापि 'यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते' इति ज्ञापनायेदम्। तेन पूर्वकाय-

मध्यात्। ६७३ **संख्या वंश्येन**। (२-१-१९) वंशो द्विधा, विद्यया जन्मना च, तत्र भवो वंश्यः, तद्वाचिना सह संख्या वा समस्यते। द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य[1]। त्रिमुनि। विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकरणम्। एकविंशतिभारद्वाजम्। ६७४ **नदीभिश्च**। (२-१-२०) नदीभिः सह संख्या

संख्या वंश्येन। वंशो द्विधेति। वंशः संततिः। 'संततिर्गोत्रजननकुलान्यभिजनान्वयौ। वंशोऽन्ववायः संतानः' इत्यमरः। **विद्यया जन्मनेति**। तत्र जन्मना वंशः पुत्रादिपरम्परेति प्रसिद्धमेव। विद्यया तु वंशः गुरुपरम्परा, 'यस्माद्धर्मानाचिनोति स आचार्यः। तस्मै न द्रुह्येत् कदाचन। स हि विद्यातस्तं जनयति। तच्छ्रेष्ठं जन्म। शरीरमेव मातापितरौ जनयतः' इत्यापस्तम्बस्मरणात्। **तत्र भवो वंश्य इति**। दिगादित्वाद् यत्। **वा समस्यत इति**। सोऽव्ययीभाव इत्यपि बोध्यम्। **द्वौ मुनी वंश्याविति**। विग्रहोऽयम्। मुनिशब्दो विद्यावंश्यवाचीति सूचनाय वंश्यावित्युक्तम्। **द्विमुनि व्याकरणस्येति**। द्वौ च तौ मुनी चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' इति कर्मधारयं बाधित्वा अव्ययीभावः। अव्ययत्वात् सुब्लुक्। व्याकरणविद्यायाः प्रवर्तकौ द्वौ मुनी पाणिनिकात्यायनावित्यर्थः। **त्रिमुनीति**। त्रयो मुनयः पाणिनिकात्यायनपतञ्जलय इति विग्रहः। नन्वेवं त्रिमुनि व्याकरणमिति सामानाधिकरण्यानुपपत्तिरित्यत आह—**विद्यातद्वतामिति**। यद्यपि बहुव्रीहिणाप्येतत् सिद्धम्। तथापि विभक्त्यन्तरेषु रूपभेद इत्याहुः। अथ जन्मना वंश्यमुदाहरति—**एकविंशतिभारद्वाजमिति**। एकविंशतिः भरद्वाजा इति कर्मधारयं बाधित्वा अव्ययीभावः। तत्र विग्रहवाक्ये भरद्वाजशब्दाद् बिदादित्वादञ्। 'यञञोश्च' इति लुक्। समासे तु 'उपकादिभ्योऽन्यतरस्यामद्वन्द्वे' इति लुगभावः। 'तृतीयासप्तम्योर्बहुलम्' इति सूत्रे 'एकविंशतिभारद्वाजम्' इति प्रयोगदर्शनेन उपकादिषु भारद्वाजशब्दस्य पाठानुमानात्।

स्येत्येकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति, दक्षस्यापत्यं दाक्षिरित्यत्र अतइञा मुक्ते अण् न भवति, किंतूभयत्र वाक्यमेवेति। **संख्या वंश्येन**। वंशः संतानस्तत्र भवो वंश्यः। दिगादित्वाद्यत्। **द्विमुनीति**। पाणिनिकात्यायनौ। **त्रिमुनीति**। तौ द्वौ पतञ्जलिश्चेति त्रयो वंश्याः। व्याकरणस्येति संबन्धे षष्ठी। स्वपदार्थप्राधान्य एवायं समासः। यदा त्वन्यपदार्थप्राधान्यविवक्षा त्रयो मुनयो वंश्या यस्येति तदा बहुव्रीहिरेवेत्याहुः। **त्रिमुनि व्याकरणमिति**। यद्यप्येतद्बहुव्रीहिणाऽप्युपपन्नम्, तथापि विभक्त्यन्तर रूपेऽपि विशेषोऽस्त्येवेति भावः। वस्तुतस्तु 'लक्षणेनाभिप्रती-' इति सूत्रे आभिमुख्यग्रहणाद्बहुव्रीहिविषयेऽप्यव्ययीभावो भवतीति द्विमुनि व्याकरणमित्यादि

१ अयं विरामो बालमनोरमानुरोधेन। तत्त्वबोधिनीमते तु 'द्विमुनि' इत्येवं द्विमुनिशब्दानन्तरं विरामः।

प्राग्वत्। 'समाहारे चायमिष्यते' (वा १२४६)। सप्तगङ्गम्। द्वियमुनम्। ६७५
अन्यपदार्थे च संज्ञायाम्।(२-१-२१) अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायाम्। विभाषाधिकारेऽपि वाक्येन संज्ञानवगमादिह

नदीभिश्च। प्राग्वदिति। नदीभिः संख्या समस्यते सोऽव्ययीभाव इत्यर्थः। **समाहारे चेति**। वार्तिकम्। चकार एवार्थे, भाष्ये चकारविहीनस्यैव पाठात्। **सप्तगङ्गमिति।** सप्तानां गङ्गानां समाहार इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासं बाधित्वा अव्ययीभावसमासः। **द्वियमुनमिति।** द्वयोर्यमुनयोः समाहार इति विग्रहः। अत्र नदीशब्देन नदीशब्दविशेषस्य नदीवाचकानां च ग्रहणम् इति संख्यासंज्ञासूत्रे भाष्ये स्पष्टम्। तेन पञ्चनदं सप्तगोदावरमित्यादि सिध्यति। **अन्यपदार्थे च।** संख्येति निवृत्तम्। नदीभिरित्यनुवर्तते। तदाह—**सुबन्तं नदीभिरिति। समस्यत इति।** सोऽव्ययीभाव इत्यपि बोध्यम्। **संज्ञानवगमादिति।** सम्यग् ज्ञायत इति संज्ञा। 'आतश्चोपसर्गे' इति कर्मण्यङ्। उन्मत्ता गङ्गा यस्मिन्निति वाक्येन देशविशेषस्यानवगमादिह नित्यसमास इत्यर्थः। ततश्च नास्ति लौकिकविग्रहः, अस्वपदविग्रहो वेति फलति। वस्तुतस्तु विभाषाधिकारादयमपि समासो वैकल्पिक एव। अत एव 'द्वितीयतृतीय-' इति सूत्रे अन्यतरस्यांग्रहणेन उत्सर्गापवा-

---

सिद्धमित्यवोचाम। जन्मनोदाहरति—**एकविंशतिभारद्वाजमिति।** एकविंशतिर्भरद्वाजवंश्या इति विग्रहः। ननु भरद्वाजाद्विदाद्यञो 'यञञोश्च' इति लुक् प्राप्नोति। न च वर्तिपदानां स्वार्थोपसर्जनैकत्वविशिष्टार्थान्तरोपसंक्रमाल्लुगभाव इति कैयटोक्तमादर्तव्यम्। वृत्तिप्रवेशात्प्रागेव प्राप्नुवतोऽन्तरङ्गस्य लुको दुर्वारत्वात्। अन्यथा गर्गाणां कुलं गर्गकुलमित्यपि न स्यात्। अत्राहुः—भाष्यकारप्रयोगादेव लुगभावोऽत्र बोध्य इति। एतच्च 'तृतीयासप्तम्योः-' इति सूत्रे शब्दकौस्तुभे स्पष्टम्। **नदीभिश्च।** स्वरूपस्य संज्ञायाश्च नेह ग्रहणं बहुवचननिर्देशात्, किं त्वर्थस्य। न च तस्य समासः संभवति, अतस्तद्वाचिनामयं समासः, ते च न केवलं विशेषशब्दा एव, किं तु सामान्यशब्दा अपि। तेन पञ्चनदं सप्तगोदावरमिति सिद्धम्। 'गोदावर्याश्च नद्याश्च' इति वक्ष्यमाणेन समासान्तोऽच्। चकारेण संख्येत्यनुकृष्यत इत्याह—**संख्येति।** स्यादेतत्, पुरस्तादपवादन्यायेन 'पूर्वकालैक-' इत्यस्यैवेदं बाधकं स्यात्ततश्चैकनदीत्यत्राव्ययीभावे तन्निबन्धनस्य 'नदीपौर्णमास्या-' इति टचः प्रसङ्गः। समाहारे तु परत्वाद् द्विगुरेव स्यादित्यत आह—**समाहारे चायमिति।** एवकारार्थश्चकारः। एवं च द्विगोरपवादोऽयमव्ययीभाव इति फलितम्। **अन्यपदार्थे च।** संख्येति निवृत्तम्। नदीग्रहणमनुवर्तते। तदाह—**सुबन्तं नदीभिः सहेति।** अन्यपदार्थ इति किम्, कृष्णावेणी। **संज्ञानवगमादिति।** सम्यग् ज्ञायत इति संज्ञा, 'आतश्चोपसर्गे'

नित्यसमासः । उन्मत्तगङ्गं नाम देशः । लोहितगङ्गम् । ६७६ समासान्ताः । (५-४-६८) इत्यधिकृत्य । ६७७ अव्ययीभावे शरत्प्रभृतिभ्यः । (५-४ १०७) शरदादिभ्यष्टच्स्यात्समासान्तोऽव्ययीभावे । शरदः समीपमुपशरदम् ।

दयोर्मद्धाविभाषाविषयत्वाद् अपवादाभावे उत्सर्गस्याप्रवृत्तिरिति ज्ञापितेऽर्थे उन्मत्तगङ्गमित्युदाहृतम् । 'अव्ययीभावेन मुक्ते बहुव्रीहिर्न' इति चोक्तं भाष्ये । अस्य समासस्य नित्यत्वे तु तदसंगतिः स्पष्टैव, कदाप्यव्ययीभावमुक्त्यसंभवात् । **समासान्ताः । इत्यधिकृत्येति ।** आपादपरिसमाप्तेरिति भावः । अत्र समासपदम् अलौकिकविग्रहवाक्यपरमेव । अत एव बहुकुमारीक इत्यत्र ह्रस्वो न। 'गोस्त्रियोः–' इति सूत्रे 'अन्तः' इति सूत्रे च भाष्ये स्पष्टमेतत् । एवं चालौकिकविग्रहवाक्ये समाससंज्ञासमकालमेव समासान्ता इति सिद्धान्तः । अन्तशब्दश्चरमावयववाची । अत एव उपशरदमित्यादौ 'नाव्ययीभावात्–' इत्यम् । तत्र टचस्तदनवयवत्वे टजन्तस्याव्ययीभावसमासत्वाभावादम् न स्यात् । तथा च टचस्तदनवयवत्वे 'अव्ययानां भमात्रे टिलोपः' इति प्रसज्येत। टचस्तदवयवत्वे तु तदन्तस्यैवाव्ययीभावसमासतया अव्ययत्वादुपशरद् इत्यस्याव्ययत्वाभावान्न टिलोपः । समासान्तप्रत्ययास्त्वालौकिकविग्रहवाक्ये सुपः परस्तादेव भवन्ति। अत एव 'प्रत्ययस्थात्–' इति सूत्रभाष्ये 'बहुचर्मिका' इत्युदाहृतं संगच्छते। विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः । **अव्ययीभावे ।** 'राजाहस्सखिभ्यष्टच्' इत्यतः टजित्यनुवर्तते। तदाह—**शरदादिभ्य इति ।** अव्ययीभावे उत्तरपदं यत् शरदादिप्रकृतिकं सुबन्तं तदन्तात् टच् स्यात् । स च अलौकिकविग्रहवाक्यान्तावयव इत्यर्थः । **उपशरदमिति ।** 'अव्ययं विभक्ति–' इत्यादिना समीपार्थकस्य उपेत्यव्ययस्य शरद इति षष्ठ्यन्तेनाव्ययीभावः । टच् । टचः समासावयवत्वेन तदन्तस्याव्यीभावसमासत्वाभावाद् अनव्ययत्वाद् 'अव्ययानां भमात्रे टिलोपः' इति न भवति । विपाट्शब्दो नदीविशेषे वर्तते। 'विपाशा तु विपाट् स्त्रियाम्' इत्यमरः । 'लक्षणेनाभिप्रती–' इति अव्ययीभावसमासः ।

इति कर्मण्यङ् । संज्ञिनो देशविशेषस्यानवगमादित्यर्थः । अन्यपदार्थानवगमादिति तु नोक्तम्, यस्येत्यादिपदान्तरसमभिव्याहारेणान्यपदार्थप्रतीतेः। अत एव बहुव्रीहिर्न नित्यसमास इति भावः । संज्ञायां किम्, शीघ्रगङ्गो देशः । अथाव्ययीभावेऽसाधारणान् समासान्तानाह—**अव्ययी ।** शरदादिभ्य इति वक्तव्ये 'पर्यायेषु लाघवचिन्ता नाद्रियते' इति प्रभृतिग्रहणं कृतम् । **टच् स्यादिति ।** 'राजाहःसखिभ्यः–' इत्यतष्टजनुवर्तत इति भावः । **समासान्त इति ।** समासस्य समासार्थोत्तरपदस्य वा चरमावयव इत्यर्थः । तेनोपशरदमित्यत्र 'नाव्ययीभावात्–' इत्यम् सिध्यति, अव्ययीभावस्यादन्तत्वात्, द्विपुरीत्यादौ तु 'ऋक्पूरब्धूः–' इत्यप्रत्यय उत्तरपदस्यावयव इति

प्रतिविपाशम् । शरद्, विपाश्, अनस्, मनस्, उपानह्, दिव्, हिमवत्, अनडुह्, दिश्, दृश्, विश्, चेतस्, चतुर्, त्यद्, तद्, यद्, कियत्, 'जराया जरस् च' (ग १४७) । उपजरसम् । 'प्रतिपरसमनुभ्योऽक्ष्णः' (ग १४८) । 'यस्येति च' (सू ३११) । **प्रत्यक्षम्** । अक्ष्णः परम् इति विग्रहे समासान्तविधानसामर्थ्यादव्ययीभावः । 'परोक्षे लिट्' (सू २१७१) इति निपातनात्परस्यौकारा-

---

शरदादिगणं पठति—**शरदित्यादिना** । अत्र झयन्तानां 'झयः' इति विकल्पे प्राप्ते नित्यार्थः पाठः । 'जराया जरश्च' इति शरदादिगणसूत्रम् । जराशब्दस्य जरसादेशश्चास्मिन् गणे वाच्य इत्यर्थः । **उपजरसमिति** । जरायाः समीपमित्यर्थः । सामीप्ये उपेत्यव्ययस्य जराया इति षष्ठ्यन्तेनाव्ययीभावसमासे कृते टच्, सुब्लुक्, उपेत्यस्य पूर्वनिपातः । टचो विभक्तित्वाभावात् तस्मिन् परेऽप्राप्ते जरसि अनेन जरस् । टजन्ताद्यथायथं सुपः अम्भाव इति भावः । 'प्रतिपरसम्–' इत्यपि गणसूत्रम् । एतेभ्यः परस्याक्षिशब्दस्य इह गणे पाठ इत्यर्थः । **यस्येति चेति** । टचस्तद्धितत्वात्तस्मिन् परे इकारस्य लोप इति भावः । **प्रत्यक्षमिति** । अक्षिणी प्रतीति विग्रहः । अक्ष्णोरभिमुखमित्यर्थः । 'लक्षणेत्थम्–' इति कर्मप्रवचनीयत्वाद् द्वितीया । 'लक्षणेनाभिप्रती–' इत्यव्ययीभावः । टच्, सुब्लुक्, 'यस्येति च' इति इकारलोपः । प्रत्यक्षशब्दाद् यथायथं सुबुत्पत्तिः, अम्भाव इति भावः । **परमिति** । व्यवहितमित्यर्थः । अविषय इति यावत् । अक्ष्णः परमिति विग्रहे अव्ययीभाव इत्यन्वयः । ननु परशब्दस्यानव्ययत्वात् कथमिहाव्ययीभाव इत्यत आह—**समासान्तविधानसामर्थ्यादिति** । प्रतिपरसमिति परशब्दात् परस्याक्षिशब्दस्य टजर्थं शरदादिगणे पाठोऽवगतः । 'अव्ययीभावे शरत्प्रभृतिभ्यः' इत्यव्ययीभावे टज्विहितः । तत्सामर्थ्यादनव्ययस्यापि परशब्दस्याव्ययीभाव इत्यर्थः । **परोक्षमिति** । अक्ष्णः परमिति विग्रहे परमित्यस्य

'अकारान्तोत्तरपदो द्विगुः स्त्रियाम्–' इति स्त्रीत्वे 'द्विगोः' इति ङीप् सिध्यतीति बोध्यम् **प्रतिविपाशमिति** । 'लक्षणेनाभिप्रती–' इति समासः । 'विपाशा तु विपाट् स्त्रियाम्' इत्यमरः । गणं पठति–**शरदित्यादिना** । अत्र ये झयन्तास्तेषां 'झयः' इति विकल्पे प्राप्ते नित्यार्थः पाठः । इह 'जराया जरस्–' 'प्रतिपर–' इति च द्वयं गणसूत्रम् । **उपजरसमिति** । जरायाः समीप इत्यर्थः ॥ **यस्येति चेति** । टचस्तद्धितत्वात्तस्मिन्परे इकारलोप इति भावः । **प्रत्यक्षमिति** । वीप्साया यथार्थत्वेन समासः । अक्ष्णोराभिमुख्यमित्यर्थे 'लक्षणेनाभिप्रती–' इति वा समासः । **अक्ष्णः परमिति** । अविषय इत्यर्थः । वृत्तिविषये अक्षिशब्द इन्द्रियमात्रपरः । अव्ययाघटितसमुदायस्य कथमिहाव्ययीभावो विधायकसूत्राभावादित्याशङ्क्याह—

देशः–परोक्षम्। 'परोक्षा क्रिया' इत्यादि तु अर्शआद्यचि। समक्षम्। अन्वक्षम्। ६७८ अनश्च। (५–४–१०८) अन्नन्तादव्ययीभावाट्टच्स्यात्। ६७९ नस्तद्धिते। (६–४–१४४) नान्तस्य भस्य टेर्लोपः स्यात्तद्धिते। उपराजम्। अध्यात्मम्। ६८० नपुंसकादन्यतरस्याम्।(५–४–१०९)अन्नन्तं यत्क्लीबं तदन्तादव्ययीभावाट्टज्वा

अक्षि इत्यनेनाव्ययीभावसमासः। टच्, सुब्लुक्। परशब्दस्य ओकारोऽन्तादेशः, पररूपम्। परोक्षाद्यथायथं सुप्, अम्भाव इति भावः। **अर्शआद्यचीति**। परोक्षमस्यास्तीत्यर्थे परोक्षशब्दाद् धर्मप्रधानाद् 'अर्शआदिभ्योऽच्' इति मत्वर्थीये अच्प्रत्यये कृते 'यस्येति च' इत्यकारलोपे टापि च कृते, परोक्षा क्रिया इत्यादि ज्ञेयमित्यर्थः। अत्र गणसूत्रे परग्रहणं प्रक्षिप्तमिति युक्तम्, 'परोक्षे लिट्' इति सूत्रस्थभाष्यकैयटयोरत्र समासान्तस्यापि निपातनेनैव साधितत्वात्। **समक्षमिति**। अक्ष्णोर्योग्यमित्यर्थः। यथार्थेऽव्ययीभावः। टच्, इकारलोप इति भावः। **अन्वक्षमिति**। अक्ष्णोः पश्चादित्यर्थः। पश्चादर्थे अव्ययीभावः। शेषं समक्षवत्। **अनश्च**। अव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणम्यते। अन इति तद्विशेषणम्। तदन्तविधिः। तदाह— **अन्नन्तादिति**। **नस्तद्धिते**। न इति षष्ठ्यन्तम्। तेन भस्येत्यधिकृतं विशेष्यते, तदन्तविधिः। टेरिति सूत्रमनुवर्तते, 'अल्लोपोऽनः' इत्यस्माल्लोप इति च। तदाह— **नान्तस्येति**। **उपराजमिति**। राज्ञः समीपमित्यर्थः। सामीप्ये उपेत्यस्याव्ययीभावः। 'अनश्च' इति टच्, सुब्लुक्, टिलोपः, उपराजशब्दाद्यथायथं सुप्, अम्भावः। टजन्तस्यैवाव्ययीभावसमासत्वाट्टचि परे अव्ययानां भमात्रे टिलोपाप्रवृत्तेः 'नस्तद्धिते' इत्यारम्भः। **अध्यात्ममिति**। आत्मनीत्यर्थः। विभक्त्यर्थे अव्ययीभावः। शेषं पूर्ववत्। **नपुंसकादन्यतरस्याम्**। अन इत्यनुवृत्तं नपुंसकस्य विशेषणम्, तदन्त-

---

विधानसामर्थ्यादिति। **समक्षमिति**। अक्ष्णो योग्यम्। **अन्वक्षमिति**। अक्ष्णः पश्चादित्यर्थेऽव्ययीभावः। **नस्तद्धिते**। न इत्यनेन भस्येत्यधिकृतं विशिष्यते, विशेषणेन तदन्तविधिरत आह—**नान्तस्य भस्येति**। ननूपराजमित्यत्र 'नस्तद्धिते' इति व्यर्थम्, 'अव्ययानां भमात्रे–' इति टिलोपेनैव सिद्धेः। न चाव्ययत्वं टज्विशिष्टे पर्याप्तमिति वाच्यम्, अव्ययीभावसंज्ञाया उपजीव्यत्वेन टचः पूर्वभागस्याप्यव्ययत्वानपायात्। अत्राहुः—भाष्ये लुङ्मुखस्वरोपचारेषु त्रिष्वेव कार्येषु अव्ययीभावस्याव्ययसंज्ञाविधानान्न दोष इति। युक्तं चैतत्, अन्यथा उपशरदमित्यादौ टिलोपः प्रसज्येत॥ **अध्यात्ममिति**। आत्मनीत्यध्यात्मम्। विभक्त्यर्थेऽव्ययीभावः। **नपुंसकादन्य**। नपुंसकग्रहणमन्नन्तस्य विशेषणं नाव्ययीभावस्य, अव्यभिचारादित्याह—**अन्नन्तं यत्क्लीबमिति**। अन्नन्तेन

स्यात्। उपचर्मम्, उपचर्म। ६८१ **नदीपौर्णमास्याग्रहायणीभ्यः** ।(५-४-११०) वा टच्स्यात्। उपनदम्, उपनदि। उपपौर्णमासम्, उपपौर्णमासि। उपाग्रहायणम्, उपाग्रहायणि। ६८२ **झयः** । (५-४-१११) झयन्तादव्ययीभावाट्टज्वा स्यात्। उपसमिधम्, उपसमित्। ६८३ **गिरेश्च सेनकस्य** । (५-४-११२) गिर्यन्तादव्ययीभावाट्टज्वा स्यात्। सेनकग्रहणं पूजार्थम्। उपगिरम्, उपगिरि॥

॥ इत्यव्ययीभावसमासप्रकरणम् ॥

विधिः, अन्नन्तात् क्लीबादिति लब्धम्। तेनाव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणतं विशेष्यते, तदन्तविधिः। तदाह—**अन्नन्तादिति। उपचर्मम्, उपचर्मेति।** चर्मणः समीपमित्यर्थः। सामीप्ये उपेत्यव्ययस्याव्ययीभावः। टचि टिलोपः, अम्भावः। टजभावे उपचर्मेति रूपम्। **नदीपौर्णमासी।** शेषपूरणेन सूत्रं व्याचष्टे—**वा टजिति।** अन्यतरस्यामिति टजिति चानुवर्तत इति भावः। नदी पौर्णमासी आग्रहायणी एतदन्तादव्ययीभावसमासाट्टज्वा स्यादिति यावत्। अत्र नदीसंज्ञकस्य न ग्रहणम्, पौर्णमास्याग्रहायणीग्रहणाल्लिङ्गात्। **उपनदमिति।** नद्याः समीपमित्यर्थः। सामीप्ये उपेत्यस्याव्ययीभावसमासः। टच् 'यस्येति च' इतीकारलोपः। उपनदशब्दात् सुप्, अम्भाव इति भावः। **उपनदीति।** टजभावे रूपम्। नपुंसकह्रस्वः। 'अव्ययादाप्सुपः' इति लुक्। **उपपौर्णमासमिति।** पौर्णमास्याः समीपमित्यर्थः। टचि उपनदमितिवद्रूपम्। **उपपौर्णमासीति।** टजभावे रूपम्। एवम् उपाग्रहायणम् उपाग्रहायणीति ज्ञेयम्। अग्रे हायनमस्या आग्रहायणी मार्गशीर्षपौर्णमासी, अत ऊर्ध्वं मकरायनप्रवृत्त्या उदगयनप्रवृत्तेः। उदगयनादिरेव हि संवत्सरस्यादिः, 'अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः।' इति प्रसिद्धेः। **झयः।** झया अव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणतं विशेष्यते। तदन्तविधिः। अन्यतरस्यामिति टजिति चानुवर्तते। तदाह—**झयन्तादिति। गिरेश्च सेनकस्य।** सेनको नामाचार्यः। **पूजार्थमिति।** अन्यतरस्यांग्रहणानुवृत्त्यैव विकल्पसिद्धेरिति भावः। **उपगिरमिति।** गिरेः

चाव्ययीभावविशेषणात्तदन्तविधिरित्याह—**तदन्तादिति । उपचर्ममिति ।** टचि टिलोपोऽदन्तत्वादम्भावश्च। **नदीपौर्ण।** इह स्वरूपस्यैव ग्रहणं न संज्ञायाः, पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात्। **उपनदीति।** टजभावे नपुंसकह्रस्वः। अत्र व्याचक्षते—'वृत्तिग्रन्थमनुरुध्येदं विकल्पकथनम्। परमार्थतस्तु नेहान्यतरस्यामित्यनुवर्तते, 'बहुगण-' इति सूत्रस्थभाष्यविरोधात्। तत्र हि नदीशब्देन नदीविशेषाणां गङ्गायमुनादीनां ग्रहणमाशङ्क्य शरत्प्रभृतिषु विपाट्शब्दपाठान्नेति समाहितम्। न

अथ तत्पुरुषसमासप्रकरणम् । १८ ।

६८४ **तत्पुरुषः ।** (२-१-२२) अधिकारोऽयम्, प्राग्बहुव्रीहेः। ६८५ **द्विगुश्च ।** (२-१-२२) द्विगुरपि तत्पुरुषसंज्ञः स्यात् । इदं सूत्रं त्यक्तुं शक्यम्। 'संख्यापूर्वो द्विगुश्च' इति पठित्वा चकारबलेन संज्ञाद्वयसमावेशस्य सुवचत्वात् । समासान्तः प्रयोजनम् । पञ्चराजम् । ६८६ **द्वितीया श्रितातीतपतितग-**

समीपमित्यर्थः। टचि 'यस्येति च' इति इकारलोपः, अम्भावः। इह सेनकग्रहणाद् 'नदीपौर्णमासी–' इत्यत्र 'झयः' इत्यत्र चान्यतरस्यांग्रहणं नानुवर्तत इति केचित् ।

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां-
बालमनोरमाख्यायां अव्ययीभावसमासप्रकरणम् ॥

अथ तत्पुरुषसमासनिरूपणम् । तत्पुरुषः । प्रागिति । 'शेषो बहुव्रीहिः' इत्यतः प्रागित्यर्थः । **द्विगुश्च । द्विगुरपीति ।** 'तद्धितार्थोत्तरपदसमाहारे च' इति वक्ष्यमाणसमासस्य 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञा विधास्यते । स द्विगुसमासोऽपि तत्पुरुषसंज्ञक इति यावत् । एतत्सूत्राभावे एकसंज्ञाधिकाराद् द्विगुसंज्ञया तत्पुरुषसंज्ञा बाध्येतेति भावः । **इदमिति ।** 'द्विगुश्च' इत्येतदित्यर्थः । तर्हि द्विगुसंज्ञया तत्पुरुषसंज्ञा बाध्येतेत्यत आह—**संख्येति ।** 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञाविधायकं सूत्रम् । तत्र चकारः पठनीयः । ततश्च संख्यापूर्वसमासो द्विगुसंज्ञकस्तत्पुरुषसंज्ञकश्च स्यादिति लभ्यते । एवं च चकारेण लघुना तत्पुरुषसंज्ञासमुच्चयलाभाद् 'द्विगुश्च' इति गुरुभूतं सूत्रं न कर्तव्यमित्यर्थः । ननु मास्तु द्विगोस्तत्पुरुषत्वमित्यत आह—**समासान्तः प्रयोजनमिति ।** तदुदाहृत्य दर्शयति—**पञ्चराजमिति ।** पञ्चानां राज्ञां समाहार इति विग्रहे 'तद्धितार्थ–' इति द्विगुः । तस्य तत्पुरुषत्वाद् 'राजाहस्सखिभ्यष्टच्' इति टच् । 'स नपुंसकम्' इति नपुंसकत्वम् । 'अका-

---

चेदं भाष्यं 'नदीपौर्णमासी–' इत्यत्र टचः पाक्षिकत्वे संगच्छते, नित्यार्थतया तत्पाठस्योपपत्तेः । अत एव सेनकग्रहणमुत्तरत्रार्थवत् । कैयटस्तु व्यवस्थितविभाषामाश्रित्य वृत्तिग्रन्थं कथंचित्समर्थितवानिति । **गिरेश्च सेनकस्य । पूजार्थमिति ।** अन्यतरस्यामित्यनुवृत्त्या विकल्पसिद्धेरिति भावः ॥

द्विगुश्च । चकारबलेन संज्ञाद्वयसमावेशस्येति । न चैवं द्विगुतत्पुरुषयोः पर्यायता स्यादिति शङ्क्यम्, योगं विभज्य संख्यापूर्वस्य तत्पुरुषसंज्ञां विधाय पश्चाद् द्विगुसंज्ञाविधानेन चकारपठनमन्तरेणापि पर्यायत्वसिद्धेः । नापि द्वौ अन्यौ यस्य द्व्यन्य इत्यत्रातिप्रसङ्गः शङ्क्यः, 'तद्धितार्थोत्तरपद–' इति सूत्रमनुवर्त्य 'तद्धितार्थ–' इत्यत्र 'उक्तस्त्रिविधः संख्यापूर्वः' इति व्याख्यानात् । द्विगोस्तत्पुरुषत्वे

तात्यस्तप्राप्तापन्नैः। (२-१-२४) द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते, स तत्पुरुषः। कृष्णं श्रितः कृष्णश्रितः। दुःखमतीतो दुःखातीत इत्यादि।

रान्तोत्तरपदो द्विगुः स्त्रियाम्' इति तु न भवति, समासान्तस्य टचः समुदायावयवत्वेन उत्तरपदावयवत्वाभावात्। न च 'संख्यापूर्वो द्विगुश्च' इति पाठे द्विगुतत्पुरुषसंज्ञयोः पर्यायेण प्रवृत्तिः स्यात्, अतः समुच्चयार्थं 'द्विगुश्च' इति पृथक्सूत्रमस्त्विति वाच्यम्, संख्यापूर्व इति द्विगुरिति च योगौ विभज्य पूर्वेण संख्यापूर्वस्य तत्पुरुषसंज्ञाविधिः, द्विगुरित्यनेन द्विगुसंज्ञाविधिरित्याश्रयणे सति, चकारमन्तरेणापि पर्यायेण प्रवृत्तिसिद्ध्या चकारस्य समुच्चयार्थत्वोपपत्तेः। **द्वितीया श्रित। द्वितीयान्तमिति।** प्रत्ययग्रहणपरिभाषया लभ्यस्तदन्तविधिः। ननु सुपेत्यनुवृत्तं बहुवचनान्ततया विपरिणतं प्रत्ययग्रहणपरिभाषया सुबन्तपरम्। प्रत्ययग्रहणपरिभाषया च प्रत्ययग्रहणे प्रकृतिप्रत्ययसमुदायग्रहणं लभ्यते। तथा च सुबन्तैरित्यस्य सुप्तत्प्रकृतिसमुदायैरित्यर्थः पर्यवस्यति। श्रितादिशब्दास्तु क्तप्रत्ययान्ता एव, न तु सुबन्ताः, तेषां सुब्घटितसमुदायात्मकत्वाभावादित्यत आह—**श्रितादिप्रकृतिकैः सुबन्तैरिति।** श्रितादिशब्दाः श्रितादिप्रकृतिकेषु लाक्षणिका इति भावः। 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' इत्यस्य तु नायं विषयः, 'कर्तृकरणे कृता—' 'साधनं कृता' इतिवत् कारकविशेषानुपादानादिति प्रौढमनोरमायां स्थितम्। न च श्रितादीनां समर्थविशेषणत्वात्तदन्तविधौ श्रितान्तादिशब्दप्रकृतिकैरित्यर्थलाभात् कृष्णं परमश्रित इत्यत्रापि समासः स्यादिति वाच्यम्, समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात्। **कृष्णं श्रित इति।** श्रयतेर्गतिविशेषार्थकत्वाद् 'गत्यर्थाकर्मक—' इति कर्तरि क्तः। 'न लोक—' इति कृद्योगषष्ठीनिषेधात् कर्मणि द्वितीया। समासविधौ द्वितीयेति प्रथमानिर्दिष्टत्वात् कृष्णशब्दस्य पूर्वनिपातः। **दुःखातीत इति।** दुःखमतीत इति विग्रहः। 'इण् गतौ'। अतिपूर्वात् कर्तरि क्तः। **इत्यादीति।** गर्तं पतितो गर्तपतितः। 'पत्लृ गतौ' कर्तरि क्तः। तनि-

---

फलमाह—**समासान्त इति।** टजचावित्यर्थः। अचि तूदाहरणम् -'तत्पुरुषस्याङ्गुलेः—' इत्यचि द्व्यङ्गुलमिति बोध्यम्। **पञ्चराजमिति।** समाहारद्विगौ 'राजाहःसखिभ्यः—' इति टच् समासस्यैवायमन्तावयव इति उत्तरपदस्यानकारान्तत्वात् स्त्रीत्वाभावः। 'समासार्थोत्तरपदान्ताः समासान्ताः' इति पक्षे तु अकारान्तोत्तरपदत्वेऽपि पात्रादित्वान्नेति बोध्यम्। काशिकायां तु पञ्चराजीत्युदाहृतम्। स क्वाचित्कोऽपपाठ इति हरदत्तः। अत्र केचित्—पात्रादित्वकल्पने मानाभावात्पञ्चराजीति काशिकोक्तोदाहरणमपि सम्यगेवेत्याहुः॥ **द्वितीया श्रितातीत—।** श्र्यादीनां गतिविशेषवाचित्वाद् 'गत्यर्थाकर्मक—' इति कर्तरि क्तः। 'प्रत्ययग्रहणे तदन्तग्रहणम्' इत्याशयेनाह—

पतिदरिद्रातिभ्यः सनो वेट्कत्वेन 'यस्य विभाषा' इति इण्निषेधप्राप्तावपि अत एव निपातनादिट्। ग्रामं गतः ग्रामगतः, ग्राममत्यस्तः अतिक्रान्तः ग्रामात्यस्तः, ग्रामं प्राप्तः

द्वितीयान्तमिति। श्रितादिप्रकृतिकैरिति। यद्यपि संबोधने सुबन्तत्वं संभवति तथाप्यन्यत्रापि समासस्येष्टत्वात् श्रितादयस्तद्घटितसमुदाये लाक्षणिका इह गृह्यन्त इति भावः। एवं 'खट्वा क्षेपे' 'गर्गादिभ्यो यञ्' इत्यादावप्यूह्यम्। न हि खट्वेत्यस्य द्वितीयान्तत्वम्, गर्गादीनां षष्ठ्यन्तत्वं वा संभवति। स्यादेतत्, द्वितीयान्तस्य श्रित-प्रकृतिकसुबन्तेन समासे काष्ठश्रितेयो न सिध्येत्। श्रितशब्दाट्टापि ततः सुपि काष्ठं श्रिता काष्ठश्रितेति समासे श्रिताशब्दस्यैव टाबन्तत्वात्, ततः 'स्त्रीभ्यो ढक्' इति ढकि काष्ठश्रैतेय इति स्यात्। 'गतिकारकोपपदानाम्–' इति सुबुत्पत्तेः प्राक् कृदन्तेन समासे तु श्रितान्तस्य टाबन्तत्वादिष्टं सिध्यतीति चेत्। मैवम्, प्रधानस्त्रीप्रत्यये तदादिनियमाभावेन काष्ठश्रितेयस्य निर्बाधत्वात्। न च कदाचित् श्रिताशब्दादपि ढक् स्यादिति वाच्यम्, जहत्स्वार्थायां वृत्तौ श्रिताशब्दस्यानर्थकत्वेनापत्ययोगा-संभवात्। अजहत्स्वार्थायामपि न दोषः, समुदायावयवसंनिधौ समुदायस्यैव कार्य-प्रयोजकत्वात्। अन्यथा सुन्दरदुहितुरपत्यं सुन्दरदौहित्र इत्यापत्तेरिति दिक्। **कृष्णं श्रित इति।** 'न लोका–' इति षष्ठीनिषेधः। **कृष्णश्रित इति।** 'प्रथमानिर्दिष्टम्–' इति द्वितीयान्तस्य पूर्वनिपातः। यद्यपीह श्रितशब्दोऽपि प्रथमा-निर्दिष्टस्तथापि समासविधायके 'प्रथमानिर्दिष्टमुपसर्जनम्' इत्युक्तमिति नास्त्यतिप्रसङ्गः। नन्वेवमव्ययादीनामुपसर्जनसंज्ञार्थम् 'अव्ययं विभक्ति–' इत्यादिना समासविधानस्या-वश्यकत्वात् 'सुप्सुपा' इति समासस्यानित्यत्वे प्रागुक्तज्ञापकं न संभवत्येव, तथा चाव्ययीभावतत्पुरुषादिसमासाभावपक्षे 'सुप्सुपा' इति समासप्रवृत्त्या अप विष्णोः, परि विष्णोः, 'कृष्णं श्रितः, राज्ञः पुरुष इत्यादिविग्रहवाक्यानि न सिध्येरन्निति चेत्', अत्राहुः—पुनः समासविधानं न केवलमुपसर्जनसंज्ञार्थम्, तस्याः प्रकारान्तरेणापि सिद्धेः। तथाहि—'प्राक्कडारात्समासः' इत्यनन्तरं 'प्रथमानिर्दिष्टमुपसर्जनम्' 'एकविभक्ति चापूर्वनिपाते' इति पठित्वा समासाधिकारे प्रथमानिर्दिष्टमिति व्याख्यायामुपसर्जनसंज्ञा सिध्यत्येव, विभक्त्यर्थादिषु विद्यमानमव्ययं सुबन्तेन चेत्समस्यते स समासोऽव्ययी-भावः स्यात्, द्वितीयान्तं चेत्स समासस्तत्पुरुषः, इत्येवं व्याख्यानादव्ययीभावतत्पु-रुषादिसंज्ञापि सिध्यतीति पुनः समासविधानं व्यर्थं सज्ज्ञापयतीति। ननु 'अव्ययं विभक्ति–' इत्यादीनां समासविधायकत्वे सिद्धे भवदुक्तमेतत्स्यात्, तत्रैव मानं न पश्याम इति चेत्, अत्र केचित्—उक्तरीत्यैवोपसर्जनसंज्ञायां सिद्धायां 'प्रथमानिर्दिष्टम्–' इति सूत्रे समासग्रहणं व्यर्थं सत्समासविधायके प्रथमानिर्दिष्टमित्यर्थलाभार्थम्, तेनामीषां

'गम्यादीनामुपसंख्यानम्' (वा १२१७) ग्रामं गमी ग्रामगमी । अन्नं बुभुक्षुः अन्नबुभुक्षुः । ६८७ स्वयं क्तेन । (२-१-२५) 'द्वितीया–' (सू० ६८६) इति न संबध्यते, अयोग्यत्वात् । स्वयंकृतस्यापत्यं स्वायंकृतिः । ६८८ खट्वा क्षेपे । (२-१-२६)

ग्रामप्राप्तः । संशयमापन्नः संशयापन्नः । **गम्यादीनामिति** । गम्यादिप्रकृतिकैः सुबन्तैरपि द्वितीयान्तं समस्यते, स तत्पुरुष इति यावत् । **ग्रामं गमीति** । 'गमेरिनिः' इति औणादिक इनिप्रत्ययः, स च 'भविष्यति गम्यादयः' इति वचनाद् भविष्यति काले भवति । 'अकेनोः–' इति कृद्योगषष्ठीनिषेधात् कर्मणि द्वितीया । ग्रामं गमिष्यन्नित्यर्थः । **अन्नं बुभुक्षुरिति** । भुजेः सन् । 'सनाशंसभिक्ष उः' । 'न लोक–' इति कृद्योगषष्ठीनिषेधात् कर्मणि द्वितीया । बुभुक्षुशब्दो गम्यादौ पठित इति भावः । **स्वयं क्तेन** । क्तप्रत्ययान्तप्रकृतिकसुबन्तेन स्वयमित्यव्ययं समस्यते, स तत्पुरुष इत्यर्थः । **अयोग्यत्वादिति** । स्वयमित्यव्ययस्य आत्मनेत्यर्थकस्य कर्तृशक्तिप्रधानतया तृतीयाया एवोचितत्वादिति भावः । स्वयमित्यव्ययस्य समासे असमासेऽपि को भेदः । असमासेऽपि 'अव्ययादाप्सुपः' इति लुकः प्रवृत्तेरित्यत आह—**स्वयंकृतस्यापत्यं**

समासविधायकत्वं सिध्यतीति । अथवा 'सुप्सुपा' इति समासस्यानित्यत्वे आकरग्रन्थ एव प्रमाणम्, अन्यथा 'सिन्नित्यसमासयोः' इति वार्तिके 'नित्यग्रहणेन नार्थः' इदमपि सिद्धं भवति—वाप्यामश्वो वाप्यश्वः, इत्यादिप्रागुक्तभाष्यकैयटग्रन्थस्यासामञ्जस्यापत्तेरिति दिक् । ननु कृष्णश्रित इत्यस्य कृष्णकर्मकश्रयणकर्तेति ह्यर्थः, स च कृष्णः श्रितो येनेति कर्मणि क्तान्तेन बहुव्रीहिणापि सुलभ इति किमनेन समासारम्भेण । मैवम् । बहुव्रीहौ श्रितकृष्ण इति निष्ठान्तस्य पूर्वनिपातप्रसङ्गात् । 'शेषाद्विभाषा' इति समासान्तः कप् प्रसज्येतेति दिक् । **दुःखातीत इति** । अतिपूर्वकादिणः कर्तरि क्तः । अवशिष्टान्यप्युदाहरणान्यूह्यानि । कूपपतितः । यद्यपि 'तनिपतिदरिद्रातिभ्यः–' इति विकल्पितेट्कत्वाद् 'यस्य विभाषा' इतीण्निषेधेन भाव्यम्, तथाप्यत एव निपातनादिडित्याहुः । वस्तुतस्तु चुरादावदन्तेषु पठितस्य 'पत गतौ च' इत्यस्याश्रयणेन पतितः सिध्यति, 'यस्य विभाषा' इत्यत्रैकाच इत्यनुवृत्तेः सर्वसंमतत्वात् । ग्रामगतः । तुहिनात्यस्तः । अत्यासो व्यतिक्रमः । सोऽपि गतिविशेष एवेति कर्तरि क्तः, आदिकर्मणि क्तो वात्राभ्युपेयः । सुखप्राप्तः । दुःखापन्नः । **गम्यादीनामिति** । गम्यादयश्च प्रयोगतो ज्ञेयाः । **ग्रामगमीति** । 'गमेरिनिः' इत्यौणादिक इनिः, स च 'भविष्यति गम्यादयः' इति भविष्यत्काले । 'अकेनोः–' इति षष्ठीनिषेधात्कर्मणि द्वितीया । **अयोग्यत्वादिति** । स्वयमित्यस्यात्मनेत्यर्थकस्य कर्त्रर्थतया द्वितीयान्तत्वानुपपत्तिरिति भावः । **स्वायंकृतिरिति** । असति समासे कार्तिरिति स्यादिति

खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायाम्। खट्वारूढो जाल्मः। नित्यसमासोऽयम्। न हि वाक्येन निन्दाऽवगम्यते। ६८९ सामि। (२-१-२७) सामिकृतम्। ६९० कालाः। (२-१-२८) 'क्तेन' इत्येव। अनत्यन्तसंयोगार्थं वचनम्। मासप्रमितः प्रतिपच्चन्द्रः। मासं परिच्छेत्तुमारब्धवा-

---

स्वायंकृतिरिति। स्वयंकृतस्यापत्यमित्यर्थे 'अत इञ्' इति स्वयंकृतशब्दात् षष्ठ्यन्तादिञि तद्धितान्तप्रातिपदिकावयवत्वात् सुब्लुकि, 'यस्येति च' इत्यकारलोपे, आदिवृद्धौ, स्वायंकृतिशब्दः। समासाभावे तु कृतशब्दस्यैव षष्ठ्यन्तत्वात्तत इञि ऋकारस्यादिवृद्धौ रपरत्वे स्वयंकार्तिः इत्येव स्यादिति भावः। वस्तुतस्तु असामर्थ्यादिह न तद्धितः। स्वयंकृतशब्दस्य समासस्वरः प्रयोजनम्। **खट्वा क्षेपे**। क्तेनेत्यनुवर्तते। प्रत्ययग्रहणात्तदन्तविधिः। क्षेपो निन्दा। द्वितीयेति सुपेति चानुवर्तते। तदुभयमपि प्रत्ययग्रहणपरिभाषया तदन्तपरं सत् प्रकृतिप्रत्ययसमुदायपरम्। खट्वाशब्दस्य च सुब्घटितसमुदायात्मकत्वासंभवाद् अत्र खट्वाशब्दः क्तप्रत्ययान्तशब्दश्च तत्प्रकृतिके लाक्षणिक इत्याह—**खट्वाप्रकृतिकमिति**। **खट्वारूढो जाल्म इति**। 'जाल्मोऽसमीक्ष्यकारी' इत्यमरः। खट्वा अम् आरूढ स् इत्यलौकिकविग्रहः। लौकिकविग्रहस्तु नास्तीत्याह—**नित्यसमासोऽयमिति**। तत् कुत इत्यत आह—**न हि वाक्येन निन्दाऽवगम्यत इति**। वृत्त्यर्थबोधकं वाक्यं लौकिकविग्रहः। तत्र खट्वामारूढ इति वाक्यं हि गृहस्थाश्रमिणि निन्दां न गमयति। खट्वारूढ इति समासस्तु रूढ्या निन्दां गमयति। तथा च भाष्यम् 'अधीत्य स्नात्वा गुर्वनुज्ञातेन खट्वा आरोढव्या। यस्तावदन्यथा करोति, स खट्वारूढोऽयं जाल्म इत्युच्यते' इति। अत्र जाल्म इत्यनेन उद्वृत्ते अयं शब्दो रूढः, अवयवार्थे तु नाभिनिवेष्टव्यम् इति सूचितम्। **सामि**। सामीत्यव्ययमर्धे वर्तते। तत् क्तान्तप्रकृतिकसुबन्तेन समस्यत इत्यर्थः। **सामिकृतमिति**। समासाभावे तु तद्धितवृत्तौ सामिकार्तिरिति स्यादिति भावः। **कालाः**। **क्तेनेत्येवेति**। क्तेनेत्यनुवर्तत एवेत्यर्थः। कालवाचिप्रकृतिकद्वितीयान्ताः क्तप्रत्ययान्तप्रकृतिकसुबन्तेन वा समस्यन्त इत्यर्थः। ननु 'अत्यन्तसंयोगे च' इत्युत्तरसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह—**अनत्यन्तेति**। **मासप्रमित इति**।

भावः। **खट्वारूढ इति**। 'जाल्मोऽसमीक्ष्यकारी स्यात्' इत्यमरः। वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वारोढव्या। ब्रह्मचर्य एव भूमिशयनार्होऽपि यः खट्वामारोहति स जाल्मः। रूढश्चायम्। तेन खट्वामारोहतु मा वा, निषिद्धानुष्ठानपरः सर्वोऽपि खट्वारूढ इत्युच्यते। अत एवाह—**नित्येति**। **सामि**। सामीत्येतदव्ययमर्धशब्दपर्यायः। **कालाः**। बहुवचननिर्देशः स्वरूपनिरासार्थः। कालवाचिनो

निरर्थः। ६६१ अत्यन्तसंयोगे च। (२-१-२६) 'कालाः' इत्येव। अक्रान्तार्थं वचनम्। मुहूर्तं सुखं मुहूर्तसुखम्। ६६२ तृतीया तत्कृतार्थेन गुणवचनेन। (२-१-३०) 'तत्कृत' इति लुप्ततृतीयाकम्। तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत्। शङ्कुलया खण्डः शङ्कुलाखण्डः।

मासं प्रमित इति विग्रहः। प्रपूर्वकाद् माधातोः 'आदिकर्मणि क्तः कर्तरि च' इति कर्तरि क्तः। तदाह—**मासं परिच्छेत्तुमिति**। इह प्रतिपच्चन्द्रेण मासस्य नात्यन्तसंयोग इति भावः। **अत्यन्तसंयोगे च। काला इत्येवेति**। तेन अत्यन्तसंयोगे कालवाचिनो द्वितीयान्ताः सुबन्तेन सह वा समस्यन्त इति लभ्यत इत्यर्थः। ननु 'कालाः' इति पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह—**अक्रान्तार्थमिति**। अत्र क्तेनेति निवृत्तमिति भावः। **मुहूर्तं सुखमिति**। अत्यन्तसंयोगे द्वितीया। मुहूर्तव्यापि सुखमित्यर्थः। **तृतीया तत्कृत**। तत्कृतेत्यस्याव्यवहितमप्यर्थेनेति परित्यज्य गुणवचनेनेत्यत्रान्वयं वक्तुमाह—**तत्कृतेति लुप्ततृतीयाकमिति**। तत्र तृतीयेत्यनेन तृतीयान्तं विवक्षितम्। तत्कृतेति लुप्ततृतीयाकं भिन्नं पदम्। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते। तत्कृतेत्येतच्च गुणद्वारा गुणवचनेऽन्वेति। ततश्च तृतीयान्तं तृतीयान्तार्थकृतो यो गुणस्तद्वाचिना समस्यते, अर्थशब्देन च तृतीयान्तं समस्यत इति वाक्यद्वयं संपद्यत इति भाष्ये स्थितम्। तदाह—**तृतीयान्तमित्यादिना**। गुणेत्यस्य तत्कृतत्वसापेक्षत्वेऽपि सौत्रः समासः। इदं सूत्रं कृतशब्दार्थद्वारक एव सामर्थ्ये प्रवर्तते, न तु साक्षात्परस्परान्वये— इति भाष्ये स्पष्टम्। न च घृतेन पाटवमित्यत्रातिप्रसङ्गः शङ्क्यः, गुणेनेति सिद्धे वचनग्रहणाद् गुणोपसर्जनद्रव्यवाचिशब्दो गृह्यत इति व्याख्यानात्। **शङ्कुलया खण्डः शङ्कुलाखण्ड इति**। देवदत्त इति शेषः। शङ्कुलाखण्डो देवदत्त इत्येव भाष्य उदाहृतम्। 'खडि

द्वितीयान्ताः क्रान्तेन सह वा समस्यन्त इति सूत्रार्थः। ननु 'काला अत्यन्तसंयोगे' इत्येवास्तु क्तेनेति निवृत्तम्, नार्थो योगविभागेनेत्यत आह—**अनत्यन्तेति**। **मासप्रमित इति**। 'माङ् माने', आदिकर्मणि क्तः कर्तरि। इह प्रतिपच्चन्द्रेण नास्त्यत्यन्तसंयोगः। **मुहूर्तमिति**। मुहूर्तव्यापीत्यर्थः। 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया। **तृतीया तत्कृता। लुप्तेति**। सौत्रत्वादिति भावः। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते। तदर्थकृतत्वं च गुणवाचकस्यार्थद्वारा विशेषणम्। तृतीयान्तार्थकृतो यो गुणस्तद्वचनेनेति। तदेतद्व्याचष्टे—**तृतीयान्तार्थेत्यादिना**। **अर्थशब्देन चेति**। सोऽपि स्वतन्त्रं निमित्तमिति भाव। नन्वर्थेन समासासंभवाद्वाची शब्दो ग्रहीष्यते, किमत्र वचनग्रहणेन। अत्राहुः—गुणमुक्तवान् गुणवचनः।

धान्येनार्थो धान्यार्थः । 'तत्कृत' इति किम्—अक्ष्णा काणः । ६९३ पूर्व-

---

भेदने' भावे घञ् । खण्डनं खण्डः । मत्वर्थीयः अर्शआद्यच् । शङ्कुलयेति करणे तृतीया । शङ्कुलाकृतखण्डनक्रियावानित्यर्थः । यत्तु 'आकडारात्—' इति सूत्रभाष्ये 'समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसंख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दस्वरूपं गुणवचनसंज्ञं भवति' इत्युक्तम् । तदेतत् प्रकृते न प्रवर्तते, गुणमुक्तवता गुणवचनेनेति भाष्येण यौगिकत्वावगमात् । अतोऽत्र गुणशब्देन धर्ममात्रं विवक्षितम् । एवं च खण्डशब्दस्य क्रियावचनत्वेऽपि न क्षतिः । तत्त्वबोधिन्यां तु 'वोतो गुणवचनात्' इत्यत्र 'सत्त्वे निविशतेऽपैति—' इत्यादिलक्षणलक्षितो गुणोऽत्र गृह्यत इत्युक्तम् । तद्व्याख्यावसरे क्रियाया गुणत्वं नास्तीत्यप्युक्तम् । इह तु खण्डशब्दस्य क्रियावाचिनोऽपि गुणवचनत्वमास्थितम् । तत्तु प्रकृतसूत्रस्थभाष्यविरुद्धत्वात् पूर्वोत्तरविरुद्धत्वाच्चोपेक्ष्यम् । अर्थशब्देन समासमुदाहरति—**धान्येनेति** । अर्थशब्दो धनपरः । हेतौ तृतीया । धान्यहेतुकं धनमित्यर्थः । अत्र धनस्य धान्यहेतुकत्वेऽपि तत्करणकत्वाभावादप्राप्तौ पृथगुक्तिः, धान्येनेति प्रकृत्यादित्वात्तृतीया, धान्याभिन्नं धनमित्यर्थ इति केचित् । ननु शङ्कुलया खण्ड इत्यत्र 'कर्तृकरणे कृता बहुलम्' इत्येव सिद्धे तत्कृतेति व्यर्थमिति पृच्छति—**तत्कृत इति किमिति** । गुणवचनेन चेत् तत्कृतेनैवेति नियमार्थं तत्कृतग्रहणमित्यभिप्रेत्य प्रत्युदाहरति—**अक्ष्णा काण इति** । नह्यक्ष्णा काणत्वं कृतम्, किं तु रोगादिनेति भावः । गुणवचनेनेति किम्? गोभिर्वपावान् । गोसं-

---

'कृत्यल्युटो बहुलम्' इति भूते कर्तरि ल्युट् । गुणमुक्त्वा यो द्रव्यमुक्तवान् स गुणवचनः, स्तेन घृतेन पाटवमिति गुणमात्रनिष्ठेन समासो न भवति । गुणश्चात्र 'सत्त्वे निविशतेऽपैति—' इत्यादिलक्षणलक्षितो गृह्यते, न तु प्रवृत्तिनिमित्तं घटत्वादिः, तत्कृतत्वासंभवादिति । **शङ्कुलया खण्ड इति** । करणेऽत्र तृतीया । 'खडि भेदने' इत्यस्माद्भावे घञि व्युत्पादितः खण्डशब्दः क्रियारूपापन्ने गुणे वर्तित्वा पश्चान्मत्वर्थलक्षणया तद्वति द्रव्ये वर्तत इति गुणवचनो भवति । **धान्येनेति** । करणे तृतीया । अर्थ्यत इत्यर्थः प्रयोजनम् । कर्मणि घञ् । अर्थनमर्थः अभिलाषो वा । भावे घञ् । अर्थशब्दस्य रूढत्वे तु धान्येनेति हेतौ तृतीया, 'कर्तृकरणे कृता-' इत्यनेन गतार्थत्वशङ्कैवात्र नेति रूढत्वाभ्युपगमपक्ष एव श्रेयान् । **तत्कृतेति किमिति** । 'कर्तृकरणे कृता—' इति सिद्धमिति प्रश्नः । इतरो गुणवचनेन चेत्तत्कृतेनैवेति नियमार्थमिदमित्याशयेन प्रत्युदाहरति—**अक्ष्णेति** । न ह्यक्ष्णा काणत्वं कृतं किं तु कर्मादिनेवेति भावः । तृतीया त्विह 'येनाङ्गविकारः' इत्यनेन । **काण इति** । 'कण निमीलने' इत्यस्माद्धञ् । गुणवचनत्वं तूक्तरीत्या खण्डशब्दस्येवास्यापि बोध्यम् । गुणवचनेनेति

सदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः । (२-१-३१) तृतीयान्तमेतैः प्राग्वत् । मासपूर्वः । मातृसदृशः । पितृसमः । ऊनार्थे—माषोनं कार्षापणम् । माषविकलम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः । मिश्र-

---

बन्धिक्षीरादिभोजनेन देवदत्तस्य वपावत्त्वमित्यस्ति तत्कृतत्वम्, किं तु न गुणवचनोऽसौ । **पूर्वसदृश । एतैरिति** । पूर्व, सदृश, सम, ऊनार्थ, कलह, निपुण, मिश्र, श्लक्ष्ण एतैरित्यर्थः । **मासपूर्व इति** । मासेन पूर्व इति विग्रहः । मासात् प्रागुत्पन्न इत्यर्थः । यद्यप्यवधित्वसंबन्धे 'अन्यारादितरर्ते–' इति दिक्शब्दयोगे पञ्चमी प्राप्ता, दिशि दृष्टः शब्दो दिक्शब्द इत्यभ्युपगमात् । तथाप्यत एव ज्ञापकात् तृतीया । हेतौ तृतीयेत्यन्ये । **मातृसदृश इति** । मात्रा सदृश इति विग्रहः । **पितृसम इति** । पित्रा सम इति विग्रहः । 'तुल्यार्थैरतुलोपमाभ्याम्–' इति तृतीया । 'तुल्यार्थैः–' इति षष्ठ्यां षष्ठीसमासेनैव सिद्धमित्याहुः । **ऊनार्थेति** । उदाहरणसूचनमिदम् । **माषोनमिति** । माषाख्यपरिमाणविशेषेण ऊनं परिमाणमित्यर्थः । अत एव ज्ञापकादवधित्वे तृतीया, हेतौ वा । अर्थग्रहणं च ऊनेनैव संबध्यते, न तु पूर्वादिभिरपि, समसदृशयोः पृथगुपादानात् । अर्थग्रहणस्य प्रयोजनमाह—**माषविकलमिति** । माषेण विकलमिति विग्रहः । हीनमित्यर्थः । पूर्ववत् तृतीया । **वाक्कलह इति** । वाचा कलह इति विग्रहः । **आचारनिपुण इति** । आचारेण निपुण इति विग्रहः । आचारहेतुकनैपुण्यवानित्यर्थः । **गुडमिश्र इति** । गुडेन मिश्र इति विग्रहः । **आचारश्लक्ष्ण इति** । आचारेण श्लक्ष्ण इति विग्रहः । आचारहेतुककुशलत्ववानित्यर्थः । ननु गुडसंमिश्रा इत्यत्र कथं समासः ? सुबन्तविशेषणत्वेऽपि समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात् । तत्राह—**मिश्रग्रहणे सोपसर्गस्यापि ग्रहण-**

किम्, गोभिर्वपावान् । गोसंबन्धिदध्यादिभोजनेन देवदत्तस्य वपावत्त्वमित्यस्ति तत्कृतत्वम्, न त्वसौ गुणवचनः । **पूर्वसदृश** । इह समसदृशाभ्यां योगे 'तुल्यार्थैः–' इति तृतीया । *अन्यैर्योगे त्वत एव वचनात्, 'हेतौ' इति वा तृतीया । इह सदृशग्रहणं* व्यर्थं षष्ठीसमासेन गतार्थत्वात् । न च 'तत्पुरुषे तुल्यार्थतृतीया–' इति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यम् । 'सदृशप्रतिरूपयोः सादृश्ये' इति सूत्रेण तत्सिद्धेरिति मनोरमायां स्थितम् । विद्यया सदृशो विद्यासदृश इत्यादौ हेतुत्वप्रकारकबोधार्थं तृतीयासमासोऽप्यावश्यक इति त्वन्ये । पूर्वसूत्रेणैव तत्कृतत्वात्तृतीयासमासोऽपि सिध्यतीत्यपरे । **ऊनार्थ इति** । पूर्वसूत्रेऽर्थशब्देन समासस्योक्तत्वादिहार्थग्रहणमभिधेयपरम् । तच्चोनशब्देनैव संबध्यते, न तु पूर्वादिभिः, समसदृशयोः पृथग्ग्रहणादिति भावः ।

ग्रहणे सोपसर्गस्यापि ग्रहणम्, 'मिश्रं चानुपसर्गमसन्धौ' (सू ३८८८) इत्यत्रानुपसर्गग्रहणात्। गुडसंमिश्रा धानाः। 'अवरस्योपसंख्यानम्' (वा १२२६) मासेनावरो मासावरः। ६६४ कर्तृकरणे कृता बहुलम्। (२-१-३२) कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (प २९) नखनिर्भिन्नः। कर्तृकरणे इति किम्—भिक्षाभिरुषितः। हेतावेषा तृतीया। बहुलग्रहणं सर्वोपाधिव्यभिचारार्थम्। तेन 'दात्रेण लूनवान्' इत्यादौ न। कृता किम्—काष्ठैः पचतितराम्। ६६५ कृत्यैरधिकार्थवचने। (२-१-३३)

मिति। कुत इत्यत आह—मिश्रं चेति। असन्धौ मिश्रेत्युत्तरपदमुपसर्गहीनं तृतीयान्तात् परमन्तोदात्तमिति तदर्थः। अत्रानुपसर्गग्रहणादितरत्र मिश्रग्रहणे सोपसर्गग्रहणं विज्ञायत इत्यर्थः। मासेनावर इति। मासेन पूर्व इत्यर्थः। न्यून इत्यर्थे ऊनार्थकत्वादेव सिद्धम्। कर्तृकरणे। कर्ता च करणं चेति समाहारद्वन्द्वात् सप्तमी। तृतीयेत्यनुवर्तते। प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम्। कृतेत्यपि तथैव। तदाह—कर्तरि करणे चेति। प्राग्वदिति। समस्यते स तत्पुरुष इत्यर्थः। इह कृद्ग्रहणेन क्तप्रत्यय एव गृह्यते, बहुलग्रहणादिति भाष्यम्। अतः क्तान्तमेवोदाहरति—हरिणा त्रात इति। पालित इत्यर्थः। ननु कृदन्तस्य समर्थविशेषणत्वेऽपि समासप्रत्ययविधौ तदन्तविधिप्रतिषेधान्नखनिर्भिन्न इत्यत्र न स्यादित्यत आह—कृद्ग्रहण इति। परिभाषेयं 'गतिरनन्तरः' इति सूत्रे भाष्ये स्थिता। पचतितरामिति।

मिश्रं चेति। 'पणबन्धेनैकार्थ्ये संधिस्तत्राप्रयुज्यमानो मिश्रशब्द उपसर्गरहितोऽन्तोदात्तः' इति सूत्रार्थः। अवरस्येति। अत्र व्याचक्षते—ऊनार्थेत्येव सिद्धत्वादिदं सुत्यजमेव। न चावरशब्दस्योनार्थकत्वमप्रसिद्धमिति वाच्यम्। 'सप्तदशावराः सत्रमासीरन्' इति श्रुतौ 'अव्यक्तानुकरणाद् द्व्यजवरार्धात्' इति सूत्रे च तत्प्रसिद्धेरिति। कर्तृकरणे। समाहारद्वन्द्वात्सप्तमीत्याशयेनाह—कर्तरि करणे चेति। अत्र केचित्—कर्तृकरणे इति प्रथमाद्विवचनं तृतीयया विशेष्यते, विशेषणेन च तदन्तविधिस्तेन तृतीयान्ते कर्तृकरणे कृदन्तेन समस्येते इति व्याख्यान्तरमित्याहुः। सर्वोपाधीति। कर्तरि करणे च या तृतीया तदन्तमपि बहुलग्रहणात् क्वचिन्न समस्यते। क्वचित्तु विभक्त्यन्तरमपि समस्यते बहुलग्रहणादेवेत्यर्थः। समासाभावं प्रदर्शयति—दात्रेण लूनवानित्यादाविति। आदिशब्देन दात्रेण छिन्नवान् हस्तेन कुर्वन् इत्यादि ग्राह्यम्। विभक्त्यन्तरमपि समस्यत इत्यस्योदाहरणं तु पादहारकः, गलेचोपकः। ह्रियत इति हारकः, बाहुलकात्कर्मणि ण्वुल्। पादाभ्यामित्यपादानपञ्चम्यन्तस्य समासः। 'चुप मन्दायां गतौ' हेतुमण्णिजन्तात्कर्मणि ण्वुल्।

स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनम्, तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत्। वातच्छेद्यं तृणम्। काकपेया नदी। ६९६ अन्नेन व्यञ्जनम्। (२-१-३४) संस्कारद्रव्यवाचकं तृतीयान्तमन्नेन प्राग्वत्। दध्ना ओदनो दध्योदनः। इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम्। ६९७ भक्ष्येण मिश्री-

अतिशयेन पचतीत्यर्थः। 'अतिशायने' 'तिङश्च' इत्यनुवृत्तौ 'द्विवचनविभज्य–' इति तरप्। 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इत्याम्। अत्र तद्धितान्तेन समासनिवृत्त्यर्थं कृद्ग्रहणमिति भावः। **कृत्यैरधिकार्थवचने।** **अर्थवादवचनमिति।** अविधायकोक्तिरित्यर्थः। **वातच्छेद्यं तृणमिति।** वातेन छेद्यमिति विग्रहः। छेत्तुं योग्यमित्यर्थः। 'ऋहलोर्ण्यत्' इति कृत्यप्रत्ययः। कोमलत्वेन स्तुतिः, दुर्बलत्वेन निन्दा वा। **काकपेयेति।** 'अचो यत्' इति यत्, 'ईद्यति' इति ईत्त्वम्, गुणः। अत्र पूर्णाम्भस्त्वेन स्तुतिः, अल्पाम्भस्त्वेन निन्दा वा। **अन्नेन व्यञ्जनम्।** व्यञ्जनशब्दं व्याचष्टे—**संस्कारेति।** संस्क्रियते गुणविशेषवत्तया क्रियते अनेनेति संस्कारः, उपसेकादिसाधनं दध्यादि, तद्वाचकमित्यर्थः। **अन्नेनेति।** अन्नम् ओदनः, तद्वाचकशब्देनेत्यर्थः। 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इति कोशः। **दध्ना ओदनो दध्योदन इति।** नन्विह दध्नेति करणत्वस्य उपसिक्तपदापेक्षत्वाद् असामर्थ्यात् कथमिह समास इत्यत आह—**अन्तर्भूतेति।** उपसेकक्रियां विना दध्नोऽन्नसंस्कारकत्वानुपपत्त्या दध्ना इत्यस्य दधिकरणकोपसेके वृत्तेर्नासामर्थ्यमिति भावः। तदुक्तं भाष्ये—'युक्तार्थसंप्रत्ययाच्च सामर्थ्यम्' इति। **भक्ष्येण मिश्रीकरणम्।** मिश्री-

'अमूर्धमस्तकात्–' इत्यलुक्। कर्तृत्वकरणत्वयोः क्रियानिरूपितत्वेन क्रियासमर्पककृदन्तेनैव भवेत्समासः, 'सुपा' इत्यधिकारात्तिङन्तेन तु नातिप्रसङ्ग इत्याशयेन पृच्छति—**कृता किमिति।** इतरस्तु तिङन्तप्रकृतिकतद्धितान्तप्रकृतिकसुबन्तेनासमासस्तत्फलमित्याशयेन प्रत्युदाहरति—**काष्ठैरिति।** **कृत्यैरधिकार्थे।** पूर्वसूत्रस्यैव प्रपञ्चोऽयं न तु नियमार्थमित्याहुः। **वातच्छेद्यमिति।** पूर्ववत् कृत्यः। कोमलत्वाद्वातेनापि छेत्तुं शक्यत इति स्तुतिः, वातेनापि छेत्तुं शक्यते निर्बलत्वादिति निन्दा वा। **काकपेयेति।** 'शकि लिङ् च' इति शक्यार्थे कृत्यः। पूर्णतोयत्वात्तटस्थैः काकैरपि पातुं शक्येति स्तुतिः, अल्पतोयत्वेन निन्दा वा। **अन्नेन।** 'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री' इत्यमरः। व्याख्यानान्नेह स्वरूपग्रहणं तदाह—**संस्कारकेत्यादि।** **भक्ष्येण।** खरविशदमभ्यवहार्यं भक्ष्यम्। खरं कठिनं विशदं विविक्तावयवं खाद्यं भक्ष्यमित्यर्थः। यत्प्रत्ययान्तस्य ण्यन्तस्य च भक्ष्यतेस्तत्रैव प्रयोगात्। अभ्यव-

१ 'असदुक्तिः' इति क्वचित् पाठः।

करणम् । (२-१-३५) गुडेन धाना गुडधानाः । मिश्रणक्रियाद्वारा सामर्थ्यम् । ६९८ **चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः** । (२-१-३६) चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । तदर्थेन प्रकृतिविकृतिभाव एव, बलिरक्षितग्रहणाज्ज्ञापकात् । यूपाय दारु यूपदारु । नेह–

क्रियते खाद्यं द्रव्यमनेनेति मिश्रीकरणं गुडादि । तद्वाचकं तृतीयान्तं भक्ष्यवाचकेन समस्यत इत्यर्थः । कठिनद्रव्यं खाद्यं पृथुकादि भक्ष्यं विवक्षितम् । **गुडेन धाना गुडधाना इति** । 'धाना भृष्टयवे स्त्रियः' इत्यमरः । गुडेन मिश्रा धाना इत्यर्थः । ननु गुडकरणत्वस्य मिश्रपदापेक्षत्वान्न सामर्थ्यमित्यत आह—**मिश्रणेति** । गुडेनेत्यस्य गुडकरणकमिश्रणे वृत्तेर्नासामर्थ्यमिति भावः । **चतुर्थी** । प्रत्ययग्रहणपरिभाषया चतुर्थीत्यनेन चतुर्थ्यन्तं गृह्यते । तदर्थ, अर्थ, बलि, हित, सुख, रक्षित एषां द्वन्द्वः । चतुर्थ्यन्तमेतैः षड्भिः समस्यते, स तत्पुरुष इति फलितम् । तदर्थेत्यत्र तच्छब्देन चतुर्थ्यन्तार्थो विवक्षितः । तस्मै चतुर्थ्यन्तार्थाय इदं तदर्थम् । 'अर्थेन नित्यसमास–' इति वक्ष्यमाणः समासः । चतुर्थ्यन्तवाच्यप्रयोजनकं यत् तत् तदर्थमिति पर्यवस्यति । तदाह—**चतुर्थ्यन्तार्थायेत्यादिना** । **तदर्थेनेति** । तदर्थेन समास इति यदुक्तं तत्प्रकृतिविकृतिभाव एव भवति; न त्वन्यत्रेत्यर्थः । कुत इत्यत आह—**बलिरक्षितेति** । यदि तादर्थ्यमात्रे अयं समासः स्यात्, प्रकृतिविकृतिभाव

इत्यादिप्रयोगस्तु भाक्तः । **गुडधाना इति** । ननु धानानां प्रत्येकं विभक्तावयवत्वाभावात्कथमेतदुदाहरणं संगच्छत इति चेत् । मैवम् । भृष्टयवसमुदायस्य धानात्वात्समुदायं प्रति समुदायिनामवयवत्वाच्च तदुपपत्तेः । **चतुर्थी तदर्थार्थ** । तच्छब्देन प्रकृता चतुर्थी परामृश्यते, प्रत्ययग्रहणात्तदन्तग्रहणम्, चतुर्थ्यन्तेन सामर्थ्यात्तदर्थो लक्ष्यत इत्याशयेनाह—**चतुर्थ्यन्तार्थाय यदिति** । चतुर्थ्यन्तवाच्याय यूपाय यद्दार्वादि तद्वाचिना चतुर्थ्यन्तं समस्यत इत्यर्थः । **बलिरक्षितग्रहणादिति** । हितसुखग्रहणं तु न ज्ञापकम्, तद्योगे 'चतुर्थी चाशिषि–' इति अतादर्थ्येऽपि चतुर्थीसंभवादिति भावः । ननु 'चतुर्थी चाशिषि–' इति विहिता या चतुर्थी तदन्तस्य समासो न भवति, समासादाशिषोऽनवगमादिति केचिदाहुरिति कैयटेनोक्तम् । ततश्च तत्पक्षे हितसुखग्रहणमपि बलिरक्षितग्रहणवज्ज्ञापकमेवेति चेत् । अत्र नव्याः—ब्राह्मणाय हितं ब्राह्मणहितम्, गोहितम्, गोसुखमित्यतादर्थ्यचतुर्थ्यन्तेनापि समासः स्वीक्रियते । सा चातादर्थ्यचतुर्थी 'हितयोगे च' इति वार्तिकात् 'चतुर्थी तदर्था–' इत्यादिना हितसुखशब्दाभ्यां समासविधानाज्ज्ञापकाद्वा संभवतीति हितसुखग्रहणं न ज्ञापकमिति सम्यगेवेत्याहुः । **यूपायेति** । *तादर्थ्ये चतुर्थी । एवमग्रेऽपि यथासंभवमूह्यम् ।*

रन्धनाय स्थाली । अश्वघासादयस्तु षष्ठीसमासाः । 'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्' (वा १२७३-१२७४)। द्विजायायं द्विजार्थः

एवेति नोच्येत, तर्हि बलिरक्षितग्रहणं व्यर्थं स्यात् । भूतेभ्यो बलिः, गोभ्यो रक्षितं तृणमित्यत्रापि बलेर्भूतार्थतया रक्षिततृणस्य गवार्थतया च तदर्थेत्येव समाससिद्धेरिति भावः । **यूपायेति** । अत्र चतुर्थ्यन्तवाच्ययूपार्थं दारु । अतो दारुशब्देन यूपायेत्यस्य समासः, यूपस्य दारुविकृतित्वाच्च, तक्षादिना अष्टाश्रीकृतवृक्षस्यैव यूपशब्दार्थत्वात् । अथ प्रकृतिविकृतिभावग्रहणस्य प्रयोजनमाह—**नेहेति । रन्धनायेति** । पाकायेत्यर्थः । 'रध हिंसायाम्' । इह पाको विवक्षितः । भावे ल्युट् , अनादेशः । 'रधिजभोरचि' इति नुम् । स्थाल्याश्चतुर्थ्यन्तवाच्यपाकार्थत्वेऽपि प्रकृतिविकृतिभावविरहान्न समासः । ननु अश्वेभ्यो घासः—अश्वघासः, धर्माय नियमो धर्मनियम इत्यादौ कथं तदर्थेन समासः, प्रकृतिविकृतिभावविरहादित्यत आह—**अश्वघासादयस्तु षष्ठीसमासा इति** । नचैवं रन्धनाय स्थालीत्यत्रापि षष्ठीसमासः स्यादेवेति प्रकृतिविकृतिभावनियमो व्यर्थ इति वाच्यम्, शाब्दबोधे संबन्धत्वतादर्थ्यत्वकृतवैलक्षण्येन उक्तनियमसाफल्यात् । एवं च रन्धनस्य स्थालीति संबन्धत्वेन भाने षष्ठीसमास इष्ट एव । तादर्थ्यत्वेन भाने चतुर्थीसमासवारणाय तु प्रकृतिविकृतिभावनियमाश्रयणमित्यास्तां तावत् । तदेवं तदर्थेत्यंशः प्रपञ्चितः । अथेदानीमर्थशब्देन चतुर्थ्यन्तस्य समासे विशेषमाह—**अर्थेनेति** । अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमास इति वक्तव्यम् । अन्यथा विभाषाधिकाराद्विकल्पः स्यात् । विशेष्यस्य प्रधानस्य यल्लिङ्गं तल्लिङ्गमित्यपि वक्तव्यम् । अन्यथा अर्थशब्दस्य नित्यं पुँल्लिङ्गत्वात् 'परवल्लिङ्गम्–' इति सर्वत्र पुँल्लिङ्गतैव स्यादित्यर्थः । अर्थशब्दोऽत्र वस्तुपरः । 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः । इह उपकारकं वस्तु विवक्षितमित्यभिप्रेत्योदाहरति—**द्विजायायं द्विजार्थः सूप इति** । तत्र द्विजायायमित्यस्वपदविग्रहः । तत्र अर्थशब्दस्थाने अय-

---

अश्वघासादय इति । एतच्च भाष्यकृतोक्तम् । नन्वेवं रन्धनाय स्थालीत्यत्रापि षष्ठीसमासः स्यादेवेति प्रकृतिविकृतिभाव एवेति नियमो निष्फल एव । न च स्वरे विशेषः, 'चतुर्थी तदर्था–' इति पूर्वपदप्रकृतिस्वरस्यापि प्रकृतिविकृतिभाव एवेष्यमाणत्वात् । अत्राहुः—'संबन्धत्वतादर्थ्यत्वकृतवैलक्षण्येनोक्तनियमसाफल्यान्न दोषः । अत्र च मानमेतदेव भाष्यम्—'न माषाणामश्नीयात्' 'दाशरथाय मैथिली' इत्यादिप्रयोगा अपि इत्थमेव विवक्षाभेदेन निर्वाह्याः । एवं च 'पूर्वसदृश–' इति सूत्रे सदृशग्रहणं व्यर्थमिति कैयटहरदत्तादीनामुक्तिः प्रामादिकीत्यवधेयम् । शाब्दबोधकृतवैलक्षण्यस्य तत्रापि सत्त्वादिति । **अर्थेन नित्येति** । अन्यथा विभाषाधिकारात्पक्षे

सूपः । द्विजार्था यवागूः । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् । ६९९ पञ्चमी भयेन । (२-१-३७) चोराद्भयं चोरभयम् । 'भयभीतभीतिभीभिरिति वाच्यम्' (वा १२७५) वृकभीतः । ७०० अपेता-

---

मिति शब्दः, नित्यसमासत्वेनास्वपदविग्रहौचित्यात् । द्विजायेति तादर्थ्यचतुर्थी । तदन्तस्य अर्थशब्देन समासः, विशेष्यसूपशब्दस्य पुँल्लिङ्गत्वात् समासस्य पुँल्लिङ्गता च । द्विजस्य उपकारकः सूप इत्यर्थः । **द्विजार्था यवागूरिति** । द्विजायेयमिति विग्रहः । अर्थशब्दस्य नित्यपुँल्लिङ्गत्वेऽपि 'परवल्लिङ्गम्–' इति पुँल्लिङ्गं बाधित्वा अनेन विशेष्य-लिङ्गानुसारेण स्त्रीलिङ्गता । **द्विजार्थं पय इति** । द्विजायेदमिति विग्रहः । अत्र विशेष्यलिङ्गानुसारान्नपुंसकत्वम् । भाष्ये तु चतुर्थ्यैव तादर्थ्यस्योक्तत्वाद् 'उक्तार्थानामप्रयोगः' इति न्यायेन अर्थशब्देन विग्रहाप्रसक्तेर्नित्यसमासत्वं न्यायसिद्धमेव । गुरोरिदं गुर्वर्थमित्यादाविव लिङ्गमपि लोकत एव सिद्धमिति वार्तिकमिदं प्रत्याख्यातम् । **भूतबलिरिति** । भूतेभ्यो बलिरिति विग्रहः । तादर्थ्यचतुर्थ्यन्तस्य बलिशब्देन समासः । **गोहितमिति** । गोभ्यो हितमिति विग्रहः । गवामनुकूलमित्यर्थः । 'हितयोगे च' इति शेषषष्ठ्यपवादश्चतुर्थी । तदन्तस्य हितशब्देन समासः । **गोरक्षितमिति** । तृणादिकमिति शेषः । गोभ्यो रक्षितमिति विग्रहः । तादर्थ्यचतुर्थ्यन्तस्य रक्षितशब्देन समासः ।

पञ्चमी भयेन । पञ्चम्यन्तं भयशब्देन सुबन्तेन समस्यत इत्यर्थः । **चोराद्भयं चोरभयमिति** । 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात् पञ्चमी । **भयभीतभीतिभीभिरिति** । सूत्रे भयशब्दस्यैव ग्रहणाद् भीतादेरप्राप्ते समासे वचनम् । **वृकभीत इति** । वृकभीतिः, वृकभीरित्यप्युदाहार्यम् । अत्र भाष्ये अपर आहेत्युक्त्वा 'भयनिर्गतजुगुप्सुभिरिति वक्तव्यम्' इत्युक्त्वा वृकभयम्, ग्रामनिर्गतः, अधर्मजुगुप्सुः–इत्युदाहृतम् । चोरत्रस्तः, भोगोपरत इत्यादौ 'सुप्सुपा' इति वा मयूरव्यंसकादित्वाद्वा समासः । **अपेतापोढ** । 'अल्पश–' इति स्वार्थे शस्, अत एव निपा-

---

द्विजायार्थ इति प्रयोगः स्यादिति भावः । **विशेष्यलिङ्गता चेति** । वचनाभावे त्वर्थशब्दस्य नित्यपुंस्त्वात् 'परवल्लिङ्गम्–' इति सर्वत्र पुँल्लिङ्गप्रयोग एव स्यादिति भावः । **पञ्चमी भयेन** । भयेनेति स्वरूपग्रहणम् नार्थस्य, प्रमाणाभावात्, 'भयभीत–' इति वार्तिकारम्भाच्च । तेन वृकात्त्रास इत्यादौ समासो न । कथं तर्हि 'भोगोपरतो ग्रामनिर्गतः' इत्यादिप्रयोगाः । अत्राहुः—बहुलग्रहणात् क्वचिद्विभक्त्यन्तरमपि कृता समस्यत इति प्रागेवोक्तत्वात्, 'सुप्सुपा' इत्यनेन वा तदुपपत्तिरिति । **अपेतापोढ** । पञ्चमीति वर्तते, प्रत्ययग्रहणात्तदन्तग्रहणम् । अल्पश इत्यत्र 'बह्वल्पार्थाच्छस्कारकात्–'

पोढमुक्तपतितापत्रस्तैरल्पशः। (२-१-३८) एतैः सहाल्पं पञ्चम्यन्तं समस्यते, स तत्पुरुषः। सुखापेतः। कल्पनापोढः। चक्रमुक्तः। स्वर्गपतितः। तरङ्गापत्रस्तः। अल्पशः किम्—प्रासादात्पतितः ७०१ **स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन।** (२-१-३९) स्तोकान्मुक्तः। अल्पान्मुक्तः। अन्तिकादागतः। अभ्याशादागतः। दूरादागतः। विप्रकृष्टादागतः। कृच्छ्रादागतः। 'पञ्चम्याः स्तोकादिभ्यः' (सू ९५९) इत्यलुक्। ७०२ **षष्ठी।** (२-२-८) राज्ञः पुरुषो राजपुरुषः। ७०३ **याजकादिभिश्च।** (२-२-९) एभिः षष्ठ्यन्तं समस्यते। 'तृजकाभ्यां कर्तरि' (सू ७०९) इत्यस्य प्रतिप्रसवोऽयम्। ब्राह्मणयाजकः।

तनात्। तदाह—**अल्पं पञ्चम्यन्तमिति।** 'बह्वल्पार्थात्—' इति शस् तु न भवति, 'बह्वल्पार्थान्मङ्गलामङ्गलवचनम्' इति वक्ष्यमाणत्वात्। **स्तोकान्तिक।** स्तोक, अन्तिक, दूर एतदर्थकानि, कृच्छ्र एतानि पञ्चम्यन्तानि क्तप्रत्ययान्तेन समस्यन्त इत्यर्थः। अर्थग्रहणं स्तोकान्तिकदूरेषु संबध्यते। **अल्पान्मुक्त इति।** स्तोकपर्यायस्योदाहरणम्। **अभ्याशादागत इति।** अन्तिकपर्यायस्योदाहरणम्। **विप्रकृष्टादागत इति।** दूरशब्दपर्याय उदाहार्यः। 'करणे च स्तोक–' इति पञ्चमी। दूरादागत इत्यत्र तु 'दूरान्तिकार्थेभ्यः–' इति पञ्चमी। अत्र 'सुपो धातु–' इति लुकमाशङ्क्याह—**पञ्चम्याः स्तोकादिभ्य इत्यलुगिति।**

षष्ठी। षष्ठ्यन्तं सुबन्तेन समस्यते, स तत्पुरुष इत्यर्थः। **राजपुरुष इति।** राजन् अस् पुरुष स् इत्यलौकिकविग्रहवाक्ये समासे सति सुब्लुकि अन्तर्वर्तिनीं विभक्तिं प्रत्ययलक्षणेनाश्रित्य न लोपः। न च लुका लुप्तत्वान्न प्रत्ययलक्षणमिति। वाच्यम्, पदत्वस्य सुब्घटितसमुदायधर्मत्वेन तस्य अङ्गकार्यत्वाभावादिति भावः। **याजकादिभिश्च।** ननु 'षष्ठी' इति पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह—**तृजकाभ्यामिति। ब्राह्मणयाजक इति।** ब्राह्मणस्य याजक इति विग्रहः, यजतेर्ण्यन्तात् कर्तरि ण्वुल्, अकादेशः। 'कर्तृकर्मणोः कृति' इति कर्मणि

इति शस्। यद्यपि 'बह्वल्पार्थान्मङ्गलामङ्गलवचनम्' इति वक्ष्यति, तथाप्यत एव निपातनाच्छसिति बोध्यम्। कारकत्वं तु समसनक्रियां प्रति पञ्चम्यन्तस्य कर्मत्वात्तदभिधायित्वाच्चाल्पशब्दस्य, तदेतदाह—**अल्पं पञ्चम्यन्तमिति। स्तोकान्मुक्त इत्यादि।** 'करणे च स्तोकाल्प–' इति पञ्चमी। दूरादागत इत्यादौ तु 'दूरान्तिकार्थेभ्यः–' इत्यनेन। **षष्ठी राजपुरुष इति।** राजन् अस् पुरुष सु इत्यलौकिकविग्रहे समासे कृते सुपो लुक्यन्तवर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः। **याजकादिभिश्च।** याजक। पूजक। परिचारक। परिवेषक। स्नातक। अध्यापक। उत्पादक। होतृ।

देवपूजकः। 'गुणात्तरेण तरलोपश्चेति वक्तव्यम्' (वा ३८४१)। तरबन्तं यद्-गुणवाचि तेन सह समासस्तरलोपश्च। 'न निर्धारणे' (सू ७०४) इति 'पूरणगुण-' (सू ७०५) इति च निषेधस्य प्रतिप्रसवोऽयम्। सर्वेषां श्वेततरः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्। 'कृद्योगा च षष्ठी समस्यत इति वाच्यम्' (वा ११३७) इध्मस्य प्रव्रश्चन इध्मप्रव्रश्चनः। **७०४ न निर्धारणे।** (२-२-१०) निर्धारणे या षष्ठी सा न समस्यते। नृणां द्विजः श्रेष्ठः। 'प्रतिपद-

---

षष्ठी। **देवपूजक इति।** देवानां पूजक इति विग्रहः। पूजकशब्दो याजकादिरिति भावः। भूभर्तेति तृजन्तस्योदाहार्यम्, भर्तृशब्दस्य याजकादित्वात्। **गुणात्तरेणेति।** वार्तिकमिदं 'सर्वे गुण-' इति सूत्रे भाष्ये स्थितम्। गुणवाचकाद् विहितो यस्तरप् तदन्तेन षष्ठी वा समस्यते, तरपो लोपश्चेत्यर्थः। फलितमाह—**तरबन्तं यदिति।** ननु 'षष्ठी' इति सूत्रेणैव सिद्धे किमर्थमिदमित्यत आह—**न निर्धारण इति।** 'सर्वे गुण-' इति सूत्रे भाष्ये तु 'पूरणगुण इत्यस्यापवाद' इत्येवोक्तम्। सर्वशब्दानुवृत्तेः सर्वशब्द एवेदं वार्तिकमित्यभिप्रेत्योदाहरति—**सर्वेषां श्वेततरः सर्वश्वेत इति।** बकानां गुण इति शेषः। द्रव्यान्तरवृत्तिश्वेतरूपापेक्षया सर्वेषां बकानां श्वेतगुणोऽयमधिक इत्यर्थः। 'द्विवचनविभज्य-' इति विभक्तव्योपपदे तरप्। अत्र सर्वेषामिति षष्ठ्यन्तस्य श्वेततरशब्देन समासे तरपो लोपे सर्वश्वेत इति रूपम्। **सर्वमहानिति।** ईश्वर इति शेषः। पूर्ववत्तरप्। सर्वेषां महत्तर इति विग्रहः। इतरसंबन्धिमहत्त्वापेक्षया ईश्वरस्य महत्त्वमधिकमित्यर्थः। **कृद्योगेति।** कृता योगो यस्या इति विग्रहः। 'कर्तृकर्मणोः कृति' इति विहितेति भाष्यम्। **इध्मप्रव्रश्चन इति।** कुठार इति शेषः। प्रवृश्च्यतेऽनेनेति प्रव्रश्चनः। करणे ल्युट्। इध्मानां प्रव्रश्चन इति विग्रहः। कर्मणि षष्ठी। 'प्रतिपदविधाना-' इति वक्ष्यमाणनिषेधस्यापवादोऽयम्। **न निर्धारणे। नृणां द्विजः श्रेष्ठ इति।** अत्र नृणामिति षष्ठ्यन्तस्य द्विजशब्देन समासो न भवति। पुरुषाणामुत्तमः पुरुषोत्तम इत्यत्र तु शेषषष्ठ्येव, न तु

पोतृ। भर्तृ। रथगणक। पत्तिगणक। वृत्। **गुणात्तरेणेति।** एतच्च वार्तिकं 'सर्वे गुणकार्त्स्न्ये' इत्यत्र पठितम्। **कृद्योगा षष्ठीति।** 'कर्तृकर्मणोः कृति' इति कृत्संनियोगेन कृतेत्यर्थः। यदा तु 'प्रतिपदविधाना-' इत्यादिनिषेधवचनमारभ्यते, तदेदं तद्बाधनायारब्धव्यम्। तस्यैवानारभ्यत्वमनुपदं वक्ष्यामः। **इध्मव्रश्चन इति।** वृश्च्यते छिद्यतेऽनेनेति व्रश्चनः कुठारादिः, करणे ल्युट्। इध्मानामिति कर्मषष्ठ्यन्तस्यानेन समासः। **नृणामिति।** 'यतश्च निर्धारणम्' इति षष्ठी। द्विजशब्देनात्र समासप्रसङ्गः, तदपेक्षया हि षष्ठी। श्रेष्ठत्वं द्विजेतरमनुष्येभ्यः, तेषां सामान्यशब्देनोप-

विधाना षष्ठी न समस्यत इति भाष्यम्' (वा १३२०)। सर्पिषो ज्ञानम्।

निर्धारणषष्ठी। यतो निर्धारणम्, यच्च निर्धार्यते, यच्च निर्धारणहेतुः, एतत्त्रितयसंनिधान एव तस्याः प्रवृत्तेरिति कैयटः। गुणेन निषेधस्त्वनित्य इति तरप्सूत्रे कैयटः। केचित्तु 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।' इति गीतावाक्यात् कर्मधारय एव। उत्तमशब्दस्य विशेषणत्वेऽपि राजदन्तादित्वात् परनिपात इत्याहुः। **प्रतिपदविधानेति**। पदं पदं प्रतीति वीप्सायामव्ययीभावः। प्रतिपदं विधानं यस्याः सा प्रतिपदविधाना। 'षष्ठी शेषे' इति शेषलक्षणां षष्ठीं वर्जयित्वा सर्वा षष्ठी प्रतिपदविधानेति भाष्यम्। **सर्पिषो ज्ञानमिति**। अत्र 'ज्ञोऽविदर्थस्य करणे' इति

स्थिततया तान्विहायानुपस्थितकल्पनाया अन्याय्यत्वात्। अथ कथं पुरुषोत्तम इति। यस्मान्निर्धार्यते, यश्चैकदेशो निर्धार्यते, यश्च निर्धारणहेतुः, एतत्त्रितयसंनिधाने सत्येवायं निषेध इति 'द्विवचनविभज्योप–' इति सूत्रे कैयटः। अन्ये तु—पुरुषेषूत्तम इति निर्धारणसप्तम्याः 'संज्ञायाम्' इति समासः। न चैवं 'न निर्धारणे' इति व्यर्थम्। स्वरे भेदात्। सप्तमीसमासे हि 'तत्पुरुषे तुल्यार्थ–' इत्यादिना पूर्वपदप्रकृतिस्वरः, षष्ठीसमासे तु 'समासस्य' इत्यन्तोदात्तत्वं स्यात्तच्चानिष्टमित्याहुः। तन्मन्दम्। 'संज्ञायाम्' इति समासस्य नित्यत्वेन स्वपदविग्रहासंगतिप्रसङ्गात्। तस्मात्कैयटोक्तसमाधानमेव समीचीनमिति नव्याः। **प्रतिपदविधानेति**। पदं पदं प्रति विहिता प्रतिपदविधाना। 'षष्ठी शेषे' इति विहायान्येन 'ज्ञोऽविदर्थस्य–' इत्यादिना विहिता सर्वैव षष्ठीत्यर्थः। धातुकारकविशेषं गृहीत्वैव 'ज्ञोऽविदर्थस्य–' इत्यादिना षष्ठी विधीयत इति भवति तस्याः प्रतिपदविधानत्वम्। नन्वनेनैव गतार्थत्वाद् 'न निर्धारणे' इति व्यर्थमिति चेद्। अत्राहुः—'यतश्च निर्धारणम्' इति सूत्रं न षष्ठीं विधत्ते, किं तु सप्तमीमेव। षष्ठी तु तया मा बाधीति प्रतिप्रसूयत इत्यन्यदेतत्। एवं 'स्वामीश्वराधिपति–' इत्यादिष्वपि। तेन गृहस्वामी, सर्वेश्वरः, निषादाधिपतिरित्यादि सिद्धमिति। वस्तुतस्तु 'ज्ञोऽविदर्थस्य–' इत्यादिचतुर्दशसूत्रीमध्ये 'दिवस्तदर्थस्य' इत्यादिषट्सूत्रीं विहायावशिष्टायामष्टसूत्र्यां 'शेषे' इति वर्तते, तथा च 'न माषाणामश्नीयात्' इत्यादाविव 'षष्ठी शेषे' इत्येव सिद्धे नियमार्थं प्रकरणम्, 'इह षष्ठ्येव न तु तल्लुक्' इति। तथा च लुकः प्रयोजकीभूतः समास एव नेति फलितोऽर्थः। ततश्च 'प्रतिपदविधाना–' इति वचनं न कर्तव्यम्। एवं स्थिते 'कृद्योगा षष्ठी–' इति वचनमपि मास्तु। 'कर्तृकर्मणोः कृति' इत्यत्र हि 'शेषे' इति निवृत्तम्। तथा चाप्राप्तषष्ठीविधानार्थमेव तदिति समासनिवृत्तिप्रसङ्गाभावात् 'षष्ठी' इत्यनेनैव समाससिद्धेः। **सर्पिषो ज्ञानमिति**। वस्तुतः करणस्य संबन्धमात्रविवक्षया 'ज्ञोऽविदर्थस्य–' इति

७०५ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । (२-२-११)
पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते । पूरणे—सतां षष्ठः । गुणे—काकस्य कार्ष्ण्यम् , ब्राह्मणस्य शुक्लाः । यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदे-

---

विहितषष्ठ्याः समासो न भवति । 'न निर्धारणे' इति प्रत्याख्येयमेवेति भाष्ये स्पष्ट-मित्यलम् । **पूरणगुण** । पूरणगुणसुहितानि अर्था येषां ते पूरणगुणसुहितार्थाः, ते च सच्च अव्ययं च तव्यश्च समानाधिकरणं चेति समाहारद्वन्द्वात् तृतीया । तदाह—**पूरणाद्यर्थैरिति । पूरण इति** । उदाहरणं वक्ष्यत इति शेषः । **सतां षष्ठ इति** । षण्णां पूरण इत्यर्थे 'तस्य पूरणे डट्' 'षट्कतिकतिपयचतुरां थुक्' । न च कुम्भपूरणमित्यत्रापि स निषेधः स्यादिति वाच्यम् , 'सोऽचि लोपे चेत् पादपूरणम्, इति निर्देशेन पूरणार्थकप्रत्ययस्यैव ग्रहणात् । 'उञ्छषष्ठाङ्कितसैकतानि' इत्यत्र तु उञ्छात्मकः षष्ठ इति व्याख्येयम् । **गुण इति** । उदाहरणं वक्ष्यत इत्यर्थः । प्रधानत्वेन वा उपसर्जनत्वेन वा गुणवाची गुणशब्दः व्याख्यानात् । तदाह—**काकस्य कार्ष्ण्यम् , ब्राह्मणस्य शुक्ला इति** । कृष्णशब्दाद् 'गुणवचनब्राह्मणादिभ्यः—' इति भावे ष्यञ् । शुक्लशब्दात्तु 'गुणवचनेभ्यो मतुपो लुक्' इति लुक् । ननु दन्ता इति शेषपूरणेन ब्राह्मणस्य दन्ताः शुक्ला इत्यर्थे ब्राह्मणशब्दस्य दन्तशब्देनैवान्वयात् शुक्लशब्देनान्वयाभावादसामर्थ्यात् कथमिह समासप्रवृत्तिरित्यत आह—**यदा प्रकरणादिनेति** । प्रकरणादर्थाद्वेत्यर्थः । दन्ताः संयुक्ताः शुभावहाः, न तु विरला इत्या-

---

षष्ठी । सर्पिःसंबन्धि प्रवर्तनमित्यर्थः । **पूरणगुण** । अर्थशब्दस्य त्रिषु संबन्धादाह—**पूरणाद्यर्थैरिति** । अत्र प्राचोक्तम् 'एतदर्थैः षष्ठी न समस्यते' इति, तन्न्यूनम् । तथा हि सती सुहितान्तानामेव ग्रहणं स्यात् , तावतामेवार्थशब्देन समस्तत्वादिति ध्वनयन्नाह **सदादिभिश्चेति । षष्ठ इति** । षण्णां पूरणः षष्ठः । 'तस्य पूरणे डट्', 'षट्कतिकतिपयचतुरां थुक्' । कथं तर्हि 'तान्युञ्छषष्ठाङ्कितसैकतानि' इति । प्रमाद एवाय-मित्येके । उञ्छेषु षष्ठ उञ्छात्मकः षष्ठ इति वा व्याख्येयमिति मनोरमायां स्थितम् । **गुण इति** । 'सत्त्वे निविशतेऽपैति—' इत्यादिलक्षणलक्षितो गुणोऽत्र गृह्यते, न त्वदेङ्लक्षणः, अर्थग्रहणात् । नापि संख्या । 'क्रोशशतयोजनशतयोः' इति वार्तिके निर्देशात् । **काकस्य कार्ष्ण्यम् । ब्राह्मणस्य शुक्ला इति** । व्याप्तिन्यायात्केवल-गुणवाची गुणोपसर्जनद्रव्यवाची च गुणशब्देन गृह्यत इति भावः । ननु ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसङ्ग एव नास्ति, ब्राह्मणशब्दस्य दन्तैरेवान्वयाद् ब्राह्मणस्य ये दन्तास्ते शुक्ला इत्यर्थादत आह—**यदेति** । शुक्लशब्द एवेह विशेष्यसमर्पक इति भावः । चन्दनगन्धो घटरूपमित्यादावनेन निषेधे प्राप्ते 'तत्स्थैश्च गुणैः समासो वक्तव्यः'

दमुदाहरणम्। अनित्योऽयं गुणेन निषेधः, 'तदशिष्यं संज्ञाप्रमाणत्वात्' (सू १३१५) इत्यादिनिर्देशात्। तेन अर्थगौरवम्, बुद्धिमान्द्यम् इत्यादि सिद्धम्। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृतीयासमासस्तु स्यादेव। स्वरे विशेषः।

दिदन्तवर्णने प्रकृते यदा ब्राह्मणस्य शुक्ला इत्युच्यते, तदा प्रकरणाद् दन्ता इति विशेष्योपस्थितिः। यदा वा सर्ववर्णेषु दन्तवस्त्रभूषणेषु प्रकृतेषु ब्राह्मणस्य शुक्ला इत्युच्यते, तदा अर्थाद् दन्ता इति विशेष्योपस्थितिः, तत्र सामर्थ्यसत्त्वात् समासे प्राप्ते निषेध इत्यर्थः। अत्र 'आकडारात्–' इति सूत्रोक्तगुणवचनसंज्ञकानां 'तृतीया तत्कृत–' इति सूत्रे प्रपञ्चितानां गुणानां न ग्रहणम्, अत्र गुणवचनशब्दाभावात्। किं तु 'वोतो गुणवचनात्' इति सूत्रभाष्ये प्रपञ्चितानां 'सत्त्वे निविशतेऽपैति–' इत्यादिलक्षणलक्षितगुणानामेव ग्रहणमिति बोध्यम्। एतेन 'आकडारात्–' इति सूत्रभाष्ये तद्धितान्तस्य गुणवचनत्वपर्युदासात् कथं कार्ष्ण्यादिशब्दानां गुणवाचित्वमिति निरस्तम्। अथ अर्थगौरवमित्यादौ षष्ठीसमासं साधयितुमाह—**अनित्योऽयमिति। संज्ञाप्रमाणत्वादिति।** संज्ञायाः प्रमाणत्वं संज्ञाप्रमाणत्वम्, तस्मादिति विग्रहः। अत्र प्रमाणत्वस्य गुणत्वात् तेन षष्ठीसमासनिषेधात्समासनिर्देशोऽनुपपन्नः स्यात्। अतो गुणेन समासनिषेधोऽनित्य इति विज्ञायत इत्यर्थः। **इत्यादीति।** आदिना गुणकार्त्स्न्यमित्यादिसंग्रहः। वस्तुतस्तु अनित्यो गुणेन निषेध इत्ययमर्थो भाष्ये न दृश्यते, न च कृष्णैकत्वमित्यादौ समासानुपपत्तिरिति वाच्यम्, 'पङ्क्तिविंशति–' इति सूत्रे विंशत्यादिशब्दा भाववचना भवन्तीत्युक्त्वा गवां विंशतिर्गवां सहस्रमित्यर्थे गोविंशतिर्गोसहस्रमित्यादिप्रयोगात्। अर्थगौरवमित्यादौ तु अर्थगतं गौरवमिति मध्यमपदलोपिसमासो बोध्य इति शब्देन्दुशेखरे प्रपञ्चितम्। सुहितपदं व्याचष्टे—**सुहितार्थास्तृप्त्यर्था इति।** नपुंसके भावे क्त इति भावः। **फलानां सुहित इति।** करणत्वस्याविवक्षायां संबन्धविवक्षायां षष्ठी। अर्थग्रहणात् फलानां तृप्तिरित्यादावपि न समासः। फलसुहितमिति कथं समास इत्यत आह—**तृतीयासमासस्तु स्यादेवेति।** करणत्वविवक्षायां तृतीया। 'कर्तृकरणे कृता बहुलम्' इति समास इति भावः। तर्हि सुहितयोगे षष्ठीसमासनिषेधो व्यर्थ इत्यत आह—**स्वरे विशेष इति।**

इति वार्तिकेन समासः प्रतिप्रसूयते। गन्धत्वेन प्रतीयमानो गन्धो न कदापि गुणिसमानाधिकरणः। किं तु स्वप्रधानः इदमेव हि तात्स्थ्यं नाम। ननु 'पिनष्टि गन्धान्' इति प्रयोगदर्शनात् शुक्लशब्दादितुल्य एव गन्धशब्दो न तत्स्थगुणवचन इति चेत्। न। पिनष्टीति प्रयोगे हि गन्धानिति न गुणशब्दः, मालतीकुसुमादिषु गन्धशब्दप्रयोगदर्शनात्। किं तु चन्दनत्वादिजातिनिमित्तकोऽन्य एव सः। तस्माच्चन्दनगन्ध

सत्—द्विजस्य कुर्वन्, कुर्वाणो वा, किङ्कर इत्यर्थः। अव्ययम्—ब्राह्मणस्य कृत्वा। पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते, तेन तदुपरि इत्यादि सिद्धमिति रक्षितः। तव्यः—ब्राह्मणस्य कर्तव्यम्। तव्यता तु भवत्येव, स्वकर्तव्यम्। स्वरे भेदः।

तृतीयासमासे 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। षष्ठीसमासे तु समासस्येत्यन्तोदात्तत्वमिति फलभेद इति भावः। **सदिति**। सद्योगे षष्ठीसमासनिषेध उदाह्रियत इत्यर्थः। 'तौ सत्' इति शतृशानचोः सदिति संज्ञा वक्ष्यते। ननु द्विजस्य कुर्वन्निति न कर्मणि षष्ठी, 'न लोक–' इति निषेधात्। नापि द्विजस्य घटं कुर्वन्निति घटाद्यपेक्षया शेषषष्ठी, तर्हि सापेक्षत्वेनासामर्थ्यात् कुर्वन्नित्यनेन समासाप्रवृत्तेरित्यत आह—**किङ्कर इत्यर्थ इति**। द्विजं परिचरन्नित्यर्थ इति यावत्। कृञ्धातुरिह परिचरणे वर्तत इति फलितम्। **अव्ययमिति**। उदाहरणं वक्ष्यत इति शेषः। **पूर्वोत्तरेति**। सत्तव्याभ्यां कृद्भ्यामित्यर्थः। 'अनेकमन्यपदार्थे' इति सूत्रभाष्ये सर्वपश्चादिति प्रयोगश्चेह लिङ्गम्। **तव्य इति**। उदाहरणं वक्ष्यत इत्यर्थः। **ब्राह्मणस्य कर्तव्यमिति**। 'अर्हे कृत्यतृचश्च' 'तव्यत्तव्यानीयरः' इति कृत्यस्तव्यः। 'कृत्यानां कर्तरि वा' इति षष्ठी। **तव्यता तु भवत्येवेति**। षष्ठीसमास इति शेषः। तकारानुबन्धरहितस्यैव तव्यस्य सूत्रे ग्रहणात्तव्यतो न ग्रहणमिति भावः। **स्वकर्तव्यमिति**। स्वस्य कर्तव्यमिति विग्रहः। 'कृत्यानां कर्तरि वा' इति षष्ठी। अत्र तव्यता योगात् समासनिषेधो नेति भावः। ननु तव्यत्प्रत्ययमाश्रित्य ब्राह्मणकर्तव्यमिति समाससंभवात् किं तव्ययोगे तन्निषेधेनेत्यत आह—**स्वरे भेद इति**। तव्यति कृते

इत्यादौ तत्स्थत्वं सुस्थमेव। एवं घटरूपमित्यादावपि। नन्वेवमपि 'बलाकायाः शौक्ल्यम्' 'केशस्य नैल्यम्' इत्यादावतिप्रसङ्ग इति चेत्, अत्राहुः—'गुणिवचनादुत्पन्नष्यञा शुक्लादिगुणस्यैवाभिधानात्तद्वाचकपदानां गुणिसामानाधिकरण्यसत्त्वान्न दोषः। तथा च प्राधान्येनाप्राधान्येन वा द्रव्याप्रतिपादकत्वे सति गुणप्रतिपादकत्वं तत्स्थगुणवाचित्वम्' इत्यर्थ इति। **फलानामिति**। करणस्य शेषत्वविवक्षायां षष्ठी। **स्वरे विशेष इति**। 'तत्पुरुषे तुल्यार्थ–' इति पूर्वपदप्रकृतिस्वरं बाधित्वा 'थाथ–' आदिसूत्रेणान्तोदात्तत्वे प्राप्ते तदपवादेन 'तृतीया कर्मणि' इत्यनेन पूर्वपदप्रकृतिस्वरे सत्याद्युदात्त इष्टः, षष्ठीसमासे तु अन्तोदात्तत्वं स्यात्तच्च नेष्यत इति भावः। तृपिश्च सकर्मकोऽप्यस्ति 'पितॄनतार्प्सीत्समममंस्त बन्धून्' इति भट्टिप्रयोगात्। तेनास्मात् कर्मणि क्तो नास्तीति न शङ्कनीयम्। **द्विजस्य कुर्वन् कुर्वाण इति**। नेयं घटाद्यपेक्षया षष्ठी द्विजस्य घटं कुर्वन्निति। तथा हि सत्यसामर्थ्यादेव समासाप्रसक्तौ निषेधोऽयं व्यर्थः स्यादतो व्याचष्टे—**किंकर इत्यर्थ इति**। **ब्राह्मणस्य कृत्वेति**। तादर्थ्यरूपसंबन्धस्य सामान्य-

समानाधिकरणेन—तक्षकस्य सर्पस्य । विशेषणसमासस्त्विह बहुलग्रहणान्न । 'गोर्धेनोः' इत्यादिषु 'पोटायुवति–' (सू ७४४) इत्यादीनां विभक्त्यन्तरे चरि-

---

कृदुत्तरपदप्रकृतिस्वरेण प्रकृतिस्वरः, तव्ये तु नेति फलभेद इति भावः । **समानाधिकरण इति** । समानाधिकरणेन 'षष्ठ्यन्तं न समस्यते इत्यत्रोदाहरणं वक्ष्यत इत्यर्थः । **तक्षकस्य सर्पस्येति** । अत्र समासे सति पुनः समासात् षष्ठ्यत्पत्तौ तक्षकसर्पस्येति न भवतीत्यर्थः । ननु षष्ठीसमासस्य निषेधेऽपि 'विशेषणं विशेष्येण बहुलम्' इति कर्मधारयसमासो दुर्वारः । अतः किं षष्ठीसमासनिषेधेनेत्यत आह— **विशेषणसमासस्त्विति** । ननु षष्ठीसमासनिषेधसामर्थ्यादेवात्र कर्मधारयो न भविष्यति । तत् किमगतिकगत्या बहुलग्रहणाश्रयणेन । न च कर्मधारयस्वर एव यथा स्यात् , न तु षष्ठीसमासस्वर इत्येतदर्थः षष्ठीसमासनिषेध इति वाच्यम् , उभयथापि 'समासस्य' इत्यन्तोदात्तत्वस्याविशिष्टत्वादिति चेत् , मैवम्—कर्मधारये हि सति गमनस्य श्रेयस इत्यादौ 'अज्यावमकन्यापवत्सु भावे, इति पूर्वपदप्रकृतिस्वरः । षष्ठीसमासे त्वन्तोदात्तत्वं स्यात् । तन्मा भूदित्येतदर्थं षष्ठीसमासनिषेध आवश्यक इति समासनिषेधस्य चरितार्थत्वान्न तस्य विशेषणसमासनिवृत्तिसामर्थ्यमिति बहुलग्रहणमाश्रितम् । न चैवमपि तक्षकसर्प इति प्रथमान्तविग्रहे कर्मधारये सति तक्षकसर्पस्येति दुर्निवारमिति वाच्यम् , निषेधसमार्थ्यादेव प्रथमान्तकर्मधारयमाश्रित्य तक्षकसर्पस्येत्येवंजातीयकप्रयोगाभावोन्नयनात् । अथ समानाधिकरणेन निषेधे उदाहरणान्तरमाह—**गोर्धेनोरिति** । गोर्धेनोरित्यादिषु षष्ठीसमासः प्राप्तः, सोऽप्यनेन वार्यत इत्यन्वयः । आदिना यूनः खलतेरित्यादिसंग्रहः । ननु षष्ठीसमास एवात्र न प्रसज्यते, 'पोटायुवति–' 'युवा खलति–' इत्यादिविशेषविहितकर्मधारयेणात्र परस्यापि षष्ठीसमासस्य बाधितत्वादित्यत आह— **पोटायुवतीत्यादीनां विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधक इति** । 'पोटायुवति–' 'युवा खलति–' इत्यादिविधयो गौर्धेनुः, युवा खलतिरित्यादिषु प्रथमा-

---

रूपेण विवक्षायां षष्ठी । ब्राह्मणसंबन्धिनी या क्रिया तदनन्तरमित्यर्थः । **कृदव्ययमेवेति** । 'अनेकमन्यपदार्थे' इति सूत्रे 'सर्वपश्चात्–' इति भाष्यप्रयोगादिति भावः । **इत्यादीति** । तथा च भट्टिः प्रायुङ्क्त—'यत्कृतेऽरीन्निगृह्णीमः' । 'आदेयाः किंकृते भोगाः कुम्भकर्ण त्वया विना' इति । **रक्षित इति** । कैयटहरदत्तौ तु अव्ययप्रतिषेधे 'वृक्षस्योपरि' इत्युदाहरन्तौ अकृदव्ययेनापि निषेधं मन्येते, तौ च प्रागुक्तभाष्यप्रयोगविरोधादुपेक्ष्याविति भावः । **तव्यता तु भवत्येवेति** । सूत्रे निरनुबन्धग्रहणादिति भावः । **स्वकर्तव्यमिति** । कर्तृषष्ठ्या समासः । **स्वरे भेद इति** । कृदुत्तरपदप्रकृतिस्वरेण तित्स्वरस्यावस्थानादन्तस्वरित इष्टः । तव्येन तु समासे मध्यो-

तार्थानां परस्वाद्बाधकः षष्ठीसमासः प्राप्तः, सोऽप्यनेन वार्यते । ७०६ **क्तेन च पूजायाम्** । (२-२-१२) 'मतिबुद्धि-' (सू ३०८६) इति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते। राज्ञां मतो बुद्धः पूजितो वा। राजपूजित इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य समासः ।७०७ **अधिकरणवाचिना च** ।

विभक्त्यन्तेषु सावकाशाः । षष्ठीसमासस्तु राज्ञः पुरुष इत्यादावसमानाधिकरणे सावकाशः । गोर्धेनोः, यूनः खलतेरित्यादिषु उभयं प्राप्तम् । तत्र 'पोटायुवति' 'युवा खलति' इत्यादिविधीन् बाधित्वा षष्ठीसमासः प्राप्तः, सोऽप्यनेन समानाधिकरणेनेति निषेधेन वार्यत इत्यर्थः । न च निषेधसामर्थ्यादेव 'पोटायुवति-' इत्यादिसमासोऽपि बाध्यतामिति वाच्यम् , षष्ठीसमासे गोर्धेनोरित्यादौ अन्यतरस्य पूर्वनिपातः । 'पोटायुवति-' इत्यादिसमासे तु गोयुवादिशब्दस्यैवेति फलभेदस्य स्पष्टत्वात् । समानाधिकरणेन निषेधश्चायं क्वाचित्क एव, अन्यस्य पदस्यार्थ इत्यर्थे अन्यपदार्थ इति निर्देशात् । तेन नीलोत्पलस्य गन्ध इत्यादिसिद्धः । **क्तेन च पूजायाम्** । अत्र पूजाग्रहणं 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रोपलक्षणम् । तदाह—**मतिबुद्धीति सूत्रेणेति । राज्ञां मतो बुद्धः पूजितो वेति** । राज्ञा इष्यमाणो ज्ञायमानः पूज्यमान इति क्रमेणार्थः। 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः । 'क्तस्य च वर्तमाने' इति षष्ठी । नन्वेवं सति राजपूजितो राजमतो राजबुद्ध इति कथं समास इत्यत आह—**राजपूजित इत्यादाविति । अधिकरणवाचिना च** । शेषपूरणेन सूत्रं व्याचष्टे—**क्तेनेति** ।

दात्तत्वं स्यात् , तच्च नेष्यत इति भावः । **सोऽप्यनेनेति** । षष्ठीसमासेन 'पोटायुवति-' इति समासो वारितः, सोऽपि षष्ठीसमासः 'पूरणगुण-' इत्यनेन वार्यत इत्यर्थः। **क्तेन च पूजायाम्** । सूत्रोपलक्षणं पूजाग्रहणं व्याख्यानादित्याह-**मतिबुद्धीति । राज्ञामिति** । 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी । **भूत इति** । न च तक्रकौण्डिन्यन्यायेन मत्यादिभ्यः क्तस्य वर्तमानकालो भूतकालतां बाधत इति वाच्यम् । 'तेनैकदिक्' इत्यतः 'तेन' इत्यधिकारे 'उपज्ञाते' इति निर्देशेन भूतकालस्याबाधज्ञापनात् । 'उपज्ञाते' इत्यत्र हि भूते क्तः, न तु वर्तमाने । अन्यथा 'क्तस्य च वर्तमाने' इति षष्ठी विधानादुपज्ञातशब्दस्य तेनेति तृतीयायोगो न स्यात् । न चैवमपि ज्ञानार्थेष्वेव ज्ञापकत्वमस्त्विति वाच्यम् । 'पूजितो यः सुरासुरैः' इति प्रयोगानुरोधेन सामान्यविषयज्ञापकत्वस्यैव न्याय्यत्वात् । अन्ये तु कारकषष्ठ्या एव समासनिषेधोऽयम् , शेषषष्ठ्या तु समासः स्यादेवेत्याहुः । एतेन 'कलहं स रामसहितः कृतवान्' इति भट्टिप्रयोगो व्याख्यातः । रामसहितः स कलहं कृतवानित्यन्वयः । **अधिकरणवाचिना च** ।

(२-२-१३) क्तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा। ७०८ कर्मणि च। (२-२-१४) 'उभयप्राप्तौ कर्मणि' (सू ६२४) इति या षष्ठी सा न समस्यते। आश्चर्यो गवां दोहोऽगोपेन। ७०९ तृजकाभ्यां कर्तरि।

इदमेषामासितं शयितं गतं भुक्तं वेति। 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' इत्यधिकरणे क्तः। 'अधिकरणवाचिनश्च' इति षष्ठी। **कर्मणि च**। क्तेनेति निवृत्तम्। कर्मणि या षष्ठी सा न समस्यते–इत्यर्थे अपां स्रष्टेत्यादावपि निषेधसिद्धेः 'तृजकाभ्यां कर्तरि' इति व्यर्थं स्यात्। किं तु चकार इतिपर्यायः। कर्मणीति सप्तम्येकवचनमुच्चार्य या षष्ठी विहिता सा न समस्यत इत्यर्थः। फलितमाह—**उभयेत्यादिना। आश्चर्य इति**। यद्यप्यत्र 'कर्तृकर्मणोः कृति' इत्येव कर्मणि षष्ठी, न तु 'उभयप्राप्तौ कर्मणि' इति सूत्रेण, तस्य सूत्रस्य कर्मण्येव षष्ठी, न तु कर्तरीति नियमपरत्वात्। तथापि नियमसूत्राणां विधिरूपेण निषेधरूपेण च द्वेधा प्रवृत्तेः स्वीकारान्न दोषः। शब्दानुशासनमित्यत्र तु वस्तुत आचार्यस्य कर्तृत्वेऽपि तस्यानुपादानादुभयप्राप्तावित्यस्याप्रवृत्तेर्नायं निषेधः, 'कृत्वोऽर्थप्रयोगे–' 'इत्यतः प्रयोगे' इत्यनुवृत्त्या कर्तृकर्मणोरुभयोः प्रयोग एव तस्य प्रवृत्तेः। यद्वा 'शेषे विभाषा' अविशेषेण विभाषेत्याश्रित्य उभयप्राप्तावित्यभावपक्षे 'कर्तृकर्मणोः कृति' इत्येव षष्ठ्याः प्राप्तेर्नायं निषेध इत्यलम्। **तृजकाभ्यां कर्तरि**। कर्तरीति तृजकयोरेव विशेषणम्, श्रुतत्वात्। न

वाचिग्रहणं चिन्त्यप्रयोजनमिति हरदत्तादयः। **इदमेषामिति**। 'क्तोऽधिकरणे च–' इति क्तः। 'अधिकरणवाचिनश्च' इति कर्तरि षष्ठी। 'अधिकरणे च' इत्येव सिद्धे सूत्रद्वयेऽपि वाचिग्रहणं स्पष्टार्थमित्याहुः। ननु किंवृत्तं यद्वृत्तमित्यत्र न कर्मणि क्तः, वृतेरकर्मकत्वात्। तथा चाधिकरणक्तान्तेन कथमिह समास इति चेन्न मैवम्, नायमधिकरणे क्तः, किंतु 'गत्यर्थाकर्मक–' इति कर्तरि। किमा वृत्तं निष्पन्नमित्यर्थः। **कर्मणि च**। क्तेनेति नानुवर्तते, 'क्तेन च पूजायाम्' इति निषेधवैयर्थ्यप्रसङ्गात्। षष्ठी त्वनुवर्तते, किंतु सापि या काचित्कर्मणि षष्ठी न गृह्यते। 'अपां स्रष्टा' इत्यादावनेनैव सिद्धौ 'तृजकाभ्यां कर्तरि' इति निषेधवैयर्थ्यापत्तेः। किं च 'इध्मव्रश्चनः' इत्यादौ समाससिद्धये वचनं कर्तव्यं स्यात्। न च 'कृद्योगलक्षणा षष्ठी समस्यते' इति वार्तिकमस्त्येवेति वाच्यम्, तस्य सिद्धान्ते प्रत्याख्यानात्। ततश्च निपातानामनेकार्थत्वादितीत्यर्थे चशब्दोऽयम् तदाह—**कर्मणीति या षष्ठीति**। सप्तम्येकवचनान्तं पदमुच्चार्य या षष्ठी विहिता परिशेषिता वेत्यर्थः। नियमसूत्राणां विधिमुखेन निषेधमुखेन वेति द्वेधा प्रवृत्तेः स्वीकृतत्वात्। **गवां दोह इति**। अगोपेनेत्युपन्यासस्त्विह उभयप्राप्तिप्रदर्शनार्थः। ननु कथम् अथ शब्दानुशासनमिति। अत्र व्याचख्युः–शब्दानामितीयं

(२-२-१५) **कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः। अपां स्रष्टा। वज्रस्य भर्ता। ओदनस्य पाचकः। कर्तरि किम्-इक्षूणां भक्षणमिक्षुभक्षिका। पत्यर्थभर्तृशब्दस्य तु याजकादित्वात्समासः। भूभर्ता। कथं तर्हि 'घटानां निर्मातुस्त्रिभुवन-**

तु षष्ठ्याः। तदाह—**कर्त्रर्थतृजकाभ्यामिति। अपां स्रष्टा, वज्रस्य भर्तेति।** 'ण्वुल्तृचौ' इति कर्तरि तृच्, 'कर्तृकर्मणोः—' इति कर्मणि षष्ठी। एवमोदनस्य पाचक इति पचेः कर्तरि ण्वुल्। अकादेश इति विशेषः। **इक्षुभक्षिकेति।** 'स्त्रियां क्तिन्' इत्यधिकारे धात्वर्थनिर्देशे ण्वुल्। कर्मणि षष्ठ्याः समासः। 'कर्मणि च' इति निषेधस्तु न, कर्तुः प्रयोग एव तत्प्रवृत्तेः। ननु 'भुवो भर्ता भूभर्ता' इत्यत्रापि निषेधः स्यात्। न च भर्तृशब्दस्य याजकादौ पाठाद् भवत्येव षष्ठीसमासः। 'याजकादिभिश्च' इत्यस्य प्रतिप्रसवार्थत्वादिति वाच्यम्, एवं तर्हि वज्रस्य भर्तेत्यत्रापि समासप्रसङ्गादित्यत आह—**पत्यर्थेति।** याजकादौ पत्यर्थकस्यैव भर्तृशब्दस्य ग्रहणम्, व्याख्यानात्। ततश्च वज्रस्य भर्तेत्यत्र 'याजकादिभिश्च' इति समासो नेति भावः। **कथं तर्हीति।** त्रयाणां भुवनानां समाहारस्त्रिभुवनम्, तद्धितार्थ इति द्विगुः। 'अकारान्तो-

---

षष्ठी 'कर्तृकर्मणोः—' इति विहिता, न तु 'उभयप्राप्तौ—' इत्यनेन, आचार्यस्य कर्तुः वस्तुतः सत्त्वेऽपि इहानुपादानात्। 'कृत्वोर्थप्रयोगे—' इत्यतः 'प्रयोगे' इत्यनुवर्तनात्कर्तृकर्मणोरुभयोरुपादान एवायं नियम इति स्वीकारात्। 'आश्चर्यो गवां दोहोऽगोपेन' इत्यत्र हि आश्चर्यं प्रतिपाद्यम्, तच्च यदशिक्षितो दोग्धा दुर्दोहा गावश्च दोग्धव्यास्तदैव निर्वहति, न त्वन्यथा। अतः कर्तृकर्मणोर्विशिष्योपादानादस्तूभयप्राप्तिः, इह तु 'शब्दानामिदमनुशासनम्, न त्वर्थानाम्' इत्यर्थनिवृत्तिपरं वाक्यम्, न तु कर्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः। अस्तु वा यथाकथंचिदुभयप्राप्तिः, तथापि न क्षतिः, 'उभयप्राप्तौ—' इति सूत्रे 'अविशेषेण विभाषा' इति पक्षस्यापि विद्यमानतया नियमाप्रवृत्तिपक्षे 'आचार्यस्य शब्दानुशासनम्' इति प्रयोगसंभवात्। यदि वा शेषलक्षणा षष्ठीति व्याख्यायते, तदा तु समासनिषेधशङ्कैवात्र नास्तीति। **तृजकाभ्याम्।** इह 'कर्तृषष्ठ्या तृजकाभ्याम्' इति वृत्तिकारव्याख्यानमयुक्तमिति ध्वनयन्नाह—**कर्त्रर्थतृजकाभ्यामिति।** कर्तृग्रहणं तृजकयोरेव विशेषणमिति युक्तम्, तयोः श्रुतत्वात्, न तु षष्ठ्या इति भावः। यद्यपि कर्तरीति तृचो न विशेषणम्, व्यभिचारात्, तथाप्यकस्य विशेषणत्वेन तदावश्यकमित्याह—**इक्षुभक्षिकेति।** 'पर्यायार्हर्णा—' इति भावे ण्वुच्। कर्मणि षष्ठ्या समासः। ननु वज्रस्य भर्तेत्युदाहरणमयुक्तम्। भर्तृशब्दस्य याजकादित्वेन समासावश्यंभावादित्याशङ्क्याह—**पत्यर्थभर्तृशब्दस्येति।** यद्यपि याजकादिष्वर्थविशेषविशिष्टतया भर्तृशब्दो न पठितः, तथापि रूढेर्बलीयस्त्वात्पतिपर्याय-

विधातुश्च कलहः' इति। शेषषष्ठ्या समास इति कैयटः। ७१० कर्तरि च (२-२-१६) कर्तरि षष्ठ्या अकेन न समासः। भवतः शायिका। नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्। ७११ नित्यं क्रीडाजीविकयोः। (२-२-१७) एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। 'संज्ञायाम्' (सू ३२८६) इति भावे ण्वुल्। जीविकायाम्—दन्तलेखकः। तत्र क्रीडायां विकल्पे, जीविकायां 'तृजकाभ्यां

त्तरपदो द्विगुः स्त्रियाम्' इति तु न भवति, पात्राद्यन्तस्य नेत्युक्तेः। त्रिभुवनस्य विधातेति तृचो योगे कथं कर्मणि षष्ठ्याः समास इत्याक्षेपः। परिहरति—**शेषषष्ठ्येति**। प्रत्यासत्त्या कारकषष्ठ्या एवायं निषेध इति 'बहुषु—' इति सूत्रे कैयट आहेत्यर्थः। **कर्तरि च**। कर्तरीत्येतत् षष्ठीत्यनुवृत्ते अन्वेति, तदाह—**कर्तरि षष्ठ्या इति। अकेनेति**। 'तृजकाभ्यां कर्तरि' इत्यतस्तदनुवृत्तेरिति भावः। **भवतः शायिकेति**। 'स्त्रियां क्तिन्' इत्यधिकारे धात्वर्थनिर्देशे ण्वुल्, अकादेशः, टाप्। 'कर्तृकर्मणोः—' इति कर्तरि षष्ठी। अत्र अकस्य कर्त्रर्थकत्वाभावात् 'तृजकाभ्याम्—' इत्यस्य न प्राप्तिः। ननु पूर्वसूत्रे 'तृजकाभ्याम्—' इति समस्तपदोपादानात् कथमिहाकस्यैवानुवृत्तिः, न तु तृच इत्यत आह—**नेहेति। तद्योग इति**। तृचः कर्तरि विहितत्वेन स्रष्टा कृष्ण इत्यादौ कर्तुः कृताभिहिततया तत्र कर्तरि षष्ठ्या एवाप्रसक्त्या तत्समासनिषेधस्य शशशृङ्गेण कण्डूयनं न कर्तव्यमितिवदसंभवपराहतत्वादित्यर्थः। **नित्यं क्रीडाजीविकयोः। उद्दालकपुष्पभञ्जिकेति**। उद्दालकः श्लेष्मातकः, तस्य पुष्पाणि, तेषां भञ्जनमित्यस्वपदविग्रहः। **संज्ञायामिति**। 'स्त्रियां क्तिन्' इत्यधिकारे 'संज्ञायाम्' इति भावे ण्वुलित्यर्थः। अत्र कर्मणि षष्ठ्याः समासः। वस्तुतस्तु 'स्त्रियां क्तिन्' इत्यधिकारे 'धात्वर्थनिर्देशे ण्वुल्' इति भावे ण्वुलित्येव युक्तम्। 'संज्ञायाम्' इति तु अधिकरणार्थमिति कृदन्ते वक्ष्यते। तथा सति उद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायामिति विग्रहः। **जीविकायामिति**। उदाहरणं वक्ष्यत इत्यर्थः। **दन्तलेखक इति**। दन्तानां लेखनेन जीवतीत्यस्वपदविग्रहः, लिखेः कर्तरि ण्वुल्। अकादेशः। जीविका समासगम्या। ननु 'षष्ठी' इति सूत्रेणैवात्र षष्ठीसमाससिद्धेः किमर्थ-

---

स्यैव तत्र ग्रहणम्, न तु यौगिकस्येति भावः। **शेषषष्ठ्येति**। न्यासकारस्तु तृजन्तमेतत्, 'न लोका—' इति निषेधस्त्वनित्यः, 'त्रकाभ्याम्—' इति वक्तव्ये तृचः सानुबन्धग्रहणाज्ज्ञापकादित्याह। केचित्तु—'जनिकर्तुः—' 'तत्प्रयोजको हेतुश्च' इति निर्देशादनित्योऽयं समासनिषेध इत्याहुः। तन्मन्दम्, शेषषष्ठीसमासेनोक्तनिर्देशोपपत्तेः। **कर्तरि च। नेह तृजिति**। न चोत्तरार्थत्वं शङ्क्यम्। तृच् क्रीडाजीविकयोर्नास्तीति जयादित्ये-

कर्तरि' (सू ७०१) इति निषेधे प्राप्ते वचनम्।। ७१२ **पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। (२-२-१)** अवयविना सह पूर्वादयः समस्यन्ते, एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः।

मिदमित्यत आह—**तत्रेति**। तत्र तस्मिन् उदाहरणद्वये क्रीडाबोधक उद्दालकपुष्पभञ्जिकेत्यत्र विभाषाधिकारात् षष्ठीसमासविकल्पे प्राप्ते, जीविकाबोधके तु दन्तलेखक इत्यत्र 'तृजकाभ्याम्-' इति षष्ठीसमासनिषेधे प्राप्ते इदं सूत्रमारब्धमित्यर्थः। **पूर्वापर**। 'पूर्वापराधरोत्तम्' इति समाहारद्वन्द्वात् प्रथमैकवचनम्। एकदेशशब्दोऽवयवे रूढः। एकदेशोऽस्यास्तीत्येकदेशी अवयवी, तेनेति लभ्यते। अधिकरणं द्रव्यम्। एकमधिकरणम् एकाधिकरणम्। एकत्वविशिष्टद्रव्ये वर्तमानेन अवयविवाचकसुबन्तेन पूर्वापराधरोत्तरशब्दाः सुबन्ताः समस्यन्ते, स तत्पुरुष इत्यर्थः। फलितमाह—**अवयविना सहेत्यादिना**। ननु पूर्वश्चासौ कायश्चेति कर्मधारयेणैव पूर्वकाय इत्यादि सिद्धम्। भक्त्या कायशब्दस्य कायावयववाचित्वेन सामानाधिकरण्योपपत्तेरित्यत आह—**षष्ठीसमासापवाद इति**। पूर्वं कायस्येति विग्रहे 'षष्ठी' इति सूत्रेण समासे सति षष्ठ्यन्तस्य समासविधौ प्रथमानिर्दिष्टत्वात् पूर्वनिपातः स्यात्। तन्निवृत्त्यर्थमिदं वचनमित्यर्थः। **पूर्वं कायस्येति**। अत्र पूर्वं कायस्येति विग्रहवाक्यम्। अर्धमिति गम्यम्। विशेष्याभिप्रायं नपुंसकत्वम्। 'तस्य परमाम्रेडितम्' इति निर्देशादवयववृत्तिदिक्शब्दयोगे पञ्चम्यभावात् षष्ठी। **पूर्वकाय इति**। पूर्वशब्दस्य समासविधौ प्रथमानिर्दिष्टत्वात् पूर्वनिपातः। 'परवल्लिङ्गम्-' इति पुंस्त्वमिति भावः। 'यत्र उत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुन-

---

र्नोत्सर्गःप्रवर्तते' इति भावः। वामनस्तु—'अके जीविकार्थे' इत्यत्र 'अक' इति किम्, 'रमणीयकर्ता' इति प्रत्युदाहरन् जीविकायां तृचमिच्छति। **भावे ण्वुलिति**। भञ्जनं भञ्जिका। पुष्पाणामिति कर्मणि षष्ठी। 'भावे' इत्युपलक्षणम्, अधिकरणे ण्वुल्यपि बाधकाभावादिति मत्वा 'संज्ञायाम्' इति सूत्रे कृदन्ते मनोरमायामुक्तम्—'उद्दालकः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्दालकपुष्पभञ्जिका' इति। **पूर्वापर**। एकदेशशब्दोऽवयवे रूढः। अत एव तस्य कर्मधारयत्वेऽपि ततो मत्वर्थीयः। 'कृष्णसर्पवान्' इत्यत्रेव 'न कर्मधारयान्मत्वर्थीयः' इति निषेधस्य रूढेष्वप्रवृत्तेः। यद्यपीह 'एकगोपूर्वात्' इति ठञ् प्राप्तः, तथाप्यतएव निर्देशादिनिस्तदेतदाह—**अवयविनेति**। नन्विदं सूत्रं व्यर्थम्, पूर्वकाय इत्यादिप्रयोगाणां कर्मधारयेणैव सिद्धेः, ऊर्ध्वकाय इतिवत्, 'समुदाये हि वृत्ताः शब्दा अवयवेष्वपि प्रवर्तन्ते' इति न्यायादत आह—**षष्ठीसमासापवाद इति**। तथा च कायपूर्व इत्याद्यनिष्टप्रयोगनिवृत्तये

अपरकायः। एकदेशिना किम्—पूर्वं नाभेः कायस्य। एकाधिकरणे किम्—पूर्वं छात्राणाम्। सर्वोऽप्येकदेशोऽह्ना समस्यते। 'संख्याविसाय–' (सू २३८) इति ज्ञापकात्। मध्याह्नः। सायाह्नः। केचित्तु सर्व एकदेशः कालेन समस्यते

त्सर्गो न प्रवर्तते' इति 'पारे मध्ये षष्ठ्या वा' इत्यत्रोक्तम्। ततश्च एकदेशिसमासाभावे षष्ठीसमासो न भवति। **अपरकाय इति**। अपरं कायस्येति विग्रहः। अधरकायः। उत्तरकायः। **एकदेशिना किमिति**। एकद्रव्यवाचिना पूर्वादयः समस्यन्त इत्येवास्त्वित्यर्थः। **पूर्वं नाभेः कायस्येति**। अत्र नाभेरिति पूर्वशब्देऽन्वेति। दिग्योगे पञ्चमी। नाभ्यपेक्षया यत् पूर्वमर्धं तत् कायावयवभूतमित्यर्थः। अत्र नाभिशब्दस्य नाभ्यपेक्षया पूर्वांशेऽन्वयः। अत्र पूर्वस्यांशस्य नाभिरवधिरेव, न त्ववयवी। अतो नाभिशब्देन पूर्वशब्दस्य समासो न भवतीत्यर्थः। **पूर्वश्छात्राणामिति**। अत्र छात्रशब्दः छात्रसमुदायपरः। उद्भूतावयवसमुदायापेक्षं बहुवचनम्। अवयवावयविभावसम्बन्धे षष्ठी। छात्रसमुदायस्य पूर्वमर्धमित्यर्थः। अत्र छात्रसमुदायस्य एकत्वेऽपि उद्भूतावयवकतया बहुत्वादेकत्वसंख्यावैशिष्ट्याभावान्न समास इति भावः। ननु अह्नो मध्यं मध्याह्न इत्यत्र कथमेकदेशिसमासः। मध्यशब्दस्य पूर्वादिष्वनन्तर्भावादित्यत आह—**सर्वोऽप्येकदेश इति**। पूर्वादिभिन्नोऽपीत्यर्थः। **ज्ञापकादिति**। 'तत्पुरुषस्य–' इति 'अहस्सर्वैकदेशसंख्यातपुण्याच्च–' इति च प्रकृते 'अह्नोऽह्न एतेभ्यः' इत्येकदेशवाचकात् परस्य अहन्शब्दस्य अह्नादेशो विधीयते। ततश्चाह्नः साय इति विग्रहे अवयविवृत्तिना अहन्शब्देन षष्ठ्यन्तेन अवयववृत्तिसायशब्दस्य तत्पुरुषसमासे सति प्रथमानिर्दिष्टत्वात् सायशब्दस्य पूर्वनिपाते सति एकदेशवृत्तिसायशब्दात् परस्य अहन्शब्दस्य अह्नादेशे 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे सायाह्न इति भवति। तस्मात् सप्तम्येकवचने परे 'संख्याविसाय–' इति सायशब्दपूर्वकस्य अह्नशब्दस्य अहन्ना-

---

सूत्रमिति भावः। **पूर्वं कायस्येति**। यद्यपि 'अन्यारात्–' इति सूत्रे दिशि दृष्टः शब्दो दिक्शब्द इति व्याख्यानेन संप्रत्यदिग्वृत्तिनापि योगे पञ्चमी स्वीकृतेति षष्ठीह दुर्लभा, तथापि 'तस्य परमाम्रेडितम्' इति लिङ्गात् 'अवयववाचिदिक्शब्दयोगे पञ्चमी न' इत्युक्तत्वात् षष्ठ्येव भवतीति भावः। **पूर्वं नाभेरिति**। नाभेर्यः पूर्वो भागः स कायस्यावयव इत्यर्थः। नाभेरिति दिग्योगलक्षणा पञ्चमी। तेनात्र पूर्वस्य भागस्य नाभिरवधिः, न त्वेकदेशीति नाभ्या सह समासो नेत्यर्थः। कायेन तु स्यादेव 'पूर्वकायो नाभेः' इति। पूर्वशब्दस्य नित्यसापेक्षत्वात् प्रधानत्वाच्च। **पूर्वश्छात्राणामिति**। नात्र निर्धारणे षष्ठी, किंतु समुदायसमुदायिसंबन्धे। बहुवचनं तूद्भूतावयवभेदसमुदायविवक्षया। ततश्छात्राणामेकदेशित्वे सत्यप्येकत्ववैशिष्ट्याभावान्न समासः। **सर्वो-**

न स्वह्नेव । ज्ञापकस्य सामान्यापेक्षत्वात् । तेन मध्यरात्रः, उपारताः पश्चिमरात्रगोचरा इत्यादि सिद्धमित्याहुः । ७१३ अर्धं नपुंसकम् । (२-२-२) समांशवाच्यर्धशब्दो नित्यं क्लीबे, स प्राग्वत् । 'एकविभक्तावषष्ठ्यन्तवचनम्' (वा

देशविकल्प उक्तः । सायाह्नि, सायाहनि, सायाह्ने इत्युदाहरणम् । तत्र अह्नः साय इति विग्रहे यदि सायशब्दस्य पूर्वाग्रप्रविष्टत्वादहन्शब्देन समासो न स्यात् तदा 'षष्ठी' इति सूत्रेण अहन्शब्दस्य षष्ठ्यन्तस्य सायशब्देन समासे सति षष्ठ्यन्तस्यैव समासशास्त्रे प्रथमानिर्दिष्टत्वात् पूर्वनिपाते सति सायशब्दात् परस्याह्नशब्दस्य अह्नादेशविधानं निर्विषयं स्यात् । अतः 'सर्वोऽप्येकदेशोऽह्ना समस्यते' इति विज्ञायत इत्यर्थः । **मध्याह्न इति** । अह्नो मध्यमिति विग्रहे अयं समासः । 'राजाहस्सखिभ्यष्टच्' इति टच् । 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः । **सायाह्न इति** । अह्नः साय इति विग्रहः । मध्याह्नवत् । ननु 'सर्वोऽप्येकदेशः कालेन समस्यते' इत्ययुक्तम्, 'संख्याविसाय-' इति सूत्रे अहन्शब्दस्यैवोपात्ततया तदितरकालवाचिना सर्वस्यैकदेशस्य समासज्ञापनानुपपत्तेरित्यत आह--**ज्ञापकस्येति** । अहन्शब्देन सह सायशब्दस्य एकदेशिसमासं सिद्धवत्कृत्य सायशब्दादह्नशब्दोपादानात् सर्वेणापि अवयविवृत्तिकालवाचिना सर्वस्यैकदेशस्य समासो ज्ञाप्यते, ज्ञापकस्य सामान्यापेक्षत्वात् । नन्वहन्शब्देन सायशब्दस्यैव पूर्वाग्रप्रविष्टत्वेऽपि समासो ज्ञाप्यत इति भावः । **मध्यरात्र इति** । रात्रेर्मध्यमित्यर्थः । **पश्चिमरात्रेति** । रात्रेः पश्चिममिति विग्रहः । 'अहस्सर्वैकदेश-' इत्यच्समासान्तः । **अर्धं नपुंसकम्** । अर्धमिति नपुंसकलिङ्गनिर्देशादेव नपुंसकत्वे लब्धे पुनर्नपुंसकग्रहणं नित्यनपुंसकलिङ्गस्य ग्रहणार्थमित्यभिप्रेत्याह--**समांशवाच्यर्धशब्दो नित्यं क्लीब इति** । वर्तत इति शेषः । 'वा पुंस्यर्धोऽर्धं समेंऽशके' इति कोशादिति भावः । अंशसामान्यवाची अर्धशब्दः पुंसि वा नपुंसके वा भवति । समे त्वंशे अर्धशब्दो नपुंसकलिङ्ग एवेत्यर्थः । भाष्ये तु सम्प्रविभागे नपुंसकलिङ्गोऽर्धशब्दः । अंशसामान्यवाची तु पुँल्लिङ्ग इत्युक्तम् । **स प्राग्वदिति** । स नित्यनपुंसकलिङ्गः अर्धशब्दः

ऽपीति । पूर्वादिभिन्नोऽपीत्यर्थः । **ज्ञापकादिति** । अन्यथा अहस्य सायपूर्वत्वं न स्यादिति भावः । **मध्याह्न इति** । 'राजाहःसखिभ्यः-' इति टच् । 'अह्नोऽह्न-' इत्यह्नादेशः । अयं चादेशो मध्याह्नसायाह्नशब्दयोरूर्ध्वकायवत्कर्मधारयेण न निर्वहति, तस्यैकदेशिसमासप्रयुक्तत्वात्, अतोऽत्र ज्ञापकाश्रयणं युक्तमेवेति बोध्यम् । **इत्याहुरिति** । न चैवं दिनमध्यो रात्रिमध्य इत्यादि न सिध्येदिति वाच्यम्, ज्ञापकसिद्धस्यासार्वत्रिकत्वात् । **अर्धं नपुंसकम्** । खण्डवाच्यर्धशब्दो न नित्यनपुंसकः, ग्रामार्धो नगरार्ध इति यथा । समांशवाची तु नित्यनपुंसकः, स एवेह गृह्यते, 'पूर्वापरा-' इति पूर्वसूत्र

१७३)। एकदेशिसमासविषयकोऽयमुपसर्जनसंज्ञानिषेधः। तेन 'पञ्चखट्वी' इत्यादि सिध्यति। अर्धं पिप्पल्या अर्धपिप्पली। 'क्लीबे' किम्—ग्रामार्धः।

अवयविवाचिना समस्यत इत्यर्थः। अर्धशब्दस्य पूर्वाद्यनन्तर्भावात् पूर्वेण न प्राप्तिः। ननु अर्धं पिप्पल्या अर्धपिप्पलीत्युदाहरणं वक्ष्यति। तत्र अर्धं पिप्पल्या अर्धपिप्पली, अर्धेन पिप्पल्या अर्धपिप्पल्या, अर्धाय पिप्पल्या अर्धपिप्पल्यै, अर्धात्पिप्पल्या अर्धपिप्पल्याः, अर्धस्य पिप्पल्या अर्धपिप्पल्याः, अर्धे पिप्पल्या अर्धपिप्पल्याम् इति विग्रहेषु पिप्पलीशब्दस्य नियतविभक्तिकतया 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनत्वात् 'गोस्त्रियोः-' इति ह्रस्वः स्यादित्यत आह—**एकविभक्ताविति**। 'एकविभक्ति चापूर्वनिपाते' इति सूत्रे 'अषष्ठ्यन्तम्' इति वक्तव्यमित्यर्थः। ततश्च पिप्पलीशब्दस्य षष्ठ्यन्तत्वान्नोपसर्जनत्वमिति न ह्रस्व इत्यर्थः। नन्वेवं सति पञ्चानां खट्वानां समाहारः समाहारं समाहारेणेत्यादिविग्रहेषु खट्वाशब्दस्य नियतविभक्तिकत्वेऽपि षष्ठ्यन्तत्वाद् अनुपसर्जनत्वाद् 'गोस्त्रियोः–' इति ह्रस्वाभावे अदन्तत्वाभावेन 'द्विगोः' इति ङीबभावे पञ्चखट्वेति स्यात्, पञ्चखट्वीति न स्यादित्यत आह—**एकदेशिसमासविषयकोऽयमिति**। 'अपथं नपुंसकम्' इति सूत्रभाष्ये पञ्चखट्वीत्युदाहरणमत्र लिङ्गमिति भावः। **अर्धपिप्पलीति**। प्रथमानिर्दिष्टमित्यर्धशब्दस्योपसर्जनत्वात् पूर्वनिपातः। पिप्पलीशब्दस्य तु विग्रहे नियतविभक्तिकत्वेऽपि 'एकविभक्तौ–' इति निषेधादुपसर्जनत्वाभावान्न ह्रस्व इति भावः। **ग्रामार्ध इति**। ग्रामस्यार्ध इति विग्रहः। ग्रामस्यांश इत्यर्थः। अर्धशब्दस्य समांशवाचित्वाभावेन नित्यनपुंसकत्वाभावान्नायं समासः।

एवार्धशब्दे पठनीये 'अर्धम्' इति योगविभागेन निर्देशान्नपुंसकत्वे लब्धे, पुनर्नपुंसकग्रहणादित्याशयेन व्याचष्टे—**नित्यं क्लीबे स इति**। यो नित्यनपुंसकलिङ्गः स इत्यर्थः। **प्राग्वदिति**। एकत्वविशिष्टेनावयविना समस्यत इत्यर्थः। अन्ये तु व्याचख्युः—'अर्धम्' इति निर्देशादेव नपुंसकत्वे सिद्धे नपुंसकग्रहणं 'सूत्रेषु लिङ्गनिर्देशो न विवक्षितः' इति ज्ञापयितुम्, तेन 'तस्येदम्' इत्यादि लिङ्गत्रयेऽपि भवतीति। अर्धपिप्पलीत्यत्र 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनसंज्ञायां 'गोस्त्रियोः–' इति ह्रस्वः स्यादित्याशङ्क्य समाधत्ते—**अषष्ठ्यन्तवचनमिति**। तेन पिप्पलीशब्दस्यानुपसर्जनत्वान्न दोष इति भावः। नन्वेवं पञ्चानां खट्वानां समाहारः पञ्चखट्वीति न सिद्ध्येत्, उपसर्जनसंज्ञानिषेधेन खट्वेत्याकारे ह्रस्वाप्रवृत्तेरदन्तत्वाभावेन 'द्विगोः' इति ङीपोऽप्रवृत्तेः, अत आह—**एकदेशिसमासविषयकोऽयमिति**। 'पञ्चखट्वी' इति भाष्योदाहरणमेव 'अषष्ठ्यन्त' इत्यस्य संकोचे लिङ्गमिति भावः। **अर्धपिप्पलीति**।

द्रव्यैक्य एव । अर्धं पिप्पलीनाम् । ७१४ **द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्** । (२-२-३) एतान्येकदेशिना सह प्राग्वद्वा । द्वितीयं भिक्षाया द्वितीयभिक्षा । 'एकदेशिना' किम्-द्वितीयं भिक्षाया भिक्षुकस्य । अन्यतरस्याङ्ग्रहणसामर्थ्यात् 'पूरणगुण-' (सू ७०५) इति निषेधं बाधित्वा पक्षे षष्ठीसमासः ।

किन्तु 'षष्ठी' इत्येव समास इति षष्ठ्यन्तस्य पूर्वनिपातः । **द्रव्यैक्य एवेति** । एकाधिकरण इत्यनुवर्तत एवेत्यर्थः । **अर्धं पिप्पलीनामिति** । अत्र द्रव्यैक्याभावान्न समासः । सति समासे अर्धपिप्पलीत्येव स्यात्, विशेष्यैक्यात् । इदं सूत्रं 'परवल्लिङ्गम्-' इति सूत्रभाष्ये प्रत्याख्यातम् । **द्वितीयतृतीय** । द्वितीयं भिक्षाया इति विग्रहोऽयम् । भिक्षाया द्वितीयमर्धमित्यर्थः । **द्वितीयभिक्षेति** । द्वितीयशब्दस्य प्रथमानिर्दिष्टत्वात् पूर्वनिपातः । 'परवल्लिङ्गम्-' इति स्त्रीत्वम् । **द्वितीयं भिक्षाया भिक्षुकस्येति** । भिक्षाया द्वितीयं भागं भिक्षुकस्येत्यन्वयः । भिक्षाया इत्यवयवषष्ठी द्वितीयमित्यत्रान्वेति । द्वितीयमित्येतत्तु भिक्षुकस्येत्यत्र कर्मत्वेनान्वेति । 'न लोक-' इति निषेधान्न षष्ठी । अत्र द्वितीयमित्यस्य भिक्षुकस्येत्यनेन समासो न भवति । द्वितीयं प्रति भिक्षुकस्य एकदेशित्वाभावादित्यर्थः । ननु विभाषाधिकारेण विकल्पे सिद्धे अन्यतरस्याङ्ग्रहणं व्यर्थमित्यत आह--**अन्यतरस्यामिति** । अन्यतरस्याङ्ग्रहणसामर्थ्यात् पक्षे षष्ठीसमास इत्यन्वयः । अन्यथा षष्ठ्यपवादभूतेनानेन समासेन मुक्ते उत्सर्गो न प्रवर्तेत । महाविभाषाधिकारे 'अपवादेन मुक्ते उत्सर्गो न प्रवर्तते' इति 'पारे मध्ये षष्ठ्या वा' इति वाग्रहणेन ज्ञापितत्वादिति भावः । ननु 'पूरणगुण-' इति निषेधात् कथमिह षष्ठीसमास इत्यत आह--**पूरणगुणेति निषेधं बाधित्वेति** ।

परवल्लिङ्गत्वात्स्त्रीत्वम् । **अर्धं पिप्पलीनामिति** । सति समासे अर्धपिप्पलीत्येव स्यात्, विशेष्यैक्यात्, परवल्लिङ्गमिति लिङ्गातिदेशेऽपि वचनातिदेशाभावाच्चेति भावः । 'अर्धपिप्पल्यः' इति प्रयोगस्तु 'अर्धानि पिप्पलीनाम्' इति विग्रहे असाधुश्चेदपि खण्डसमुच्चये साधुरेव, अर्धं पिप्पल्या अर्धपिप्पली, अर्धपिप्पली च अर्धपिप्पली चेत्यादिविग्रहात् । एकदेशिना किम्, अर्धं पशोर्देवदत्तस्य । अत्र देवदत्तः स्वामी, न त्ववयवीति न तेन समासः । इदं सूत्रं 'परवल्लिङ्गम्-' इत्यत्र भाष्ये प्रत्याख्यातम् । तथा---अर्धपिप्पलीति हि कर्मधारयेण सिद्धम्, 'समुदाये दृष्टाः शब्दा अवयवेष्वपि वर्तन्ते' इति न्यायात् । समप्रविभागादन्यत्र तवाप्येषैव गतिः, 'अर्धाहारः' 'अर्धोक्तम्' 'अर्धविलोकितम्' इत्यादिप्रयोगदर्शनात् । न च समप्रविभागे षष्ठीसमासं बाधितुमिदं सूत्रमिति वाच्यम्, षष्ठीसमासस्यापीष्टत्वात् । अत एव कालिदासः प्रयुङ्क्ते---'प्रेम्णा शरीरार्धहरा हरस्य' इति । **द्वितीयतृतीय** । षष्ठीसमासापवादोऽयं योग इति वृत्तिकृतोक्त-

भिक्षाद्वितीयम्। ७१५ प्राप्तापन्ने च द्वितीयया। (२-२-४) पक्षे 'द्वितीया श्रित-' (सू ६८६) इति समासः। प्राप्तो जीविकां प्राप्तजीविकः, जीविकाप्राप्तः। आपन्नजीविकः, जीविकापन्नः। इह सूत्रे 'द्वितीयया अ' इति छित्त्वा अकारोऽपि विधीयते। तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका। आपन्नजीविका। ७१६ कालाः परिमाणिना। (२-२-५) परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते। मासो जातस्य मासजातः। अहजातः। द्वयोरह्नोः समाहारो

अन्यथा अन्यतरस्याङ्ग्रहणवैयर्थ्यादिति भावः। इत्येकदेशिसमासनिरूपणम्। **प्राप्तापन्ने च द्वितीयया**। प्राप्त, आपन्न एतौ शब्दौ द्वितीयान्तेन समस्येते इत्यर्थः। चकारो द्वितीयासमाससमुच्चयार्थः। तदाह—**पक्ष इति**। वस्तुतस्तु 'द्वितीया श्रित-' इति सूत्रे 'प्राप्तापन्नशब्दाभ्यां द्वितीयायाः समासविधानमपि निरवकाशमेव इति तत्समुच्चयस्य सिद्धत्वात् चकारो न तत्समुच्चयार्थः' इति भाष्ये स्थितम्। तत्र प्रकृतसूत्रेण समासे प्राप्तापन्नयोः पूर्वनिपातः। 'द्वितीयाश्रित-' इति समासे तु द्वितीयान्तस्य पूर्वनिपातः। तदाह—**प्राप्तजीविक इत्यादि**। अथ जीविकां प्राप्ता स्त्री जीविकामापन्ना स्त्री इति विग्रहे प्रकृतसूत्रेण समासे सति पूर्वपदयोरकारमन्तादेशं साधयितुमाह—**इह सूत्र इति। आकारोऽपीति**। प्राप्तापन्ने द्वितीयया समस्येते, तयोरकारोऽन्तादेशश्चेत्यर्थलाभादिति भावः। **तेनेति**। प्राप्तापन्नयोराकारस्यान्तस्य स्थाने अकारविधानेनेत्यर्थः। **कालाः परिमाणिना**। परिमाणिपदं व्याचष्टे—**परिच्छेद्यवाचिनेति**। काला इति बहुवचनात् कालविशेषवाचका इत्यर्थः। **मासो जातस्य मासजात इति**। अत्र विग्रहे मासः प्रधानम्। समासे तु जातः प्रधा-

---

मयुक्तमिति ध्वनयन्नाह—**निषेधं बाधित्वेति। प्राप्तजीविक इति**। 'गोस्त्रियोः-' इत्युपसर्जनह्रस्वः। 'द्विगुप्राप्तापन्ना-' इति वक्ष्यमाणेन परवल्लिङ्गनिषेधः। न चेदं बहुव्रीहिणा गतार्थमिति शङ्क्यम्, स्वरे विशेषात्। प्राप्तसुख इत्यादौ निष्ठान्तस्य 'जातिकालसुखादिभ्यः-' इति परनिपातापत्तेश्च। 'प्राप्तापन्ने च-' इति चकारेण विधेयसमुच्चयार्थेनाकारप्रश्लेषानुमानात्। प्राप्तापन्ने समस्येते अ च अत्वं च तयोः स्यादिति भाष्ये स्थितम्। तत्र चकारात्पूर्वमेवाकारं छित्त्वा सौत्रत्वात्प्रकृतिभावो नेति प्राञ्चः। इमं क्लेशं परिहरन्नाह—**द्वितीयया अ इति। प्राप्ता स्त्रीति**। एकादेशस्य पूर्वान्तत्वेन ग्रहणाल्लिङ्गविशिष्टपरिभाषया वा टाबन्तयोरपि प्राप्तापन्नयोः समासः। **कालाः परिमाणिना**। परिमीयते परिच्छिद्यते येन तत्परिमाणं परिच्छेदकम्, तद्वान्परिमाणी तदाह—**परिच्छेद्यवाचिनेति। काला इति**। कालविशेषवाचका इत्यर्थः। सूत्रे बहुवचननिर्देशात्कालसामान्यस्यापरिच्छेदकत्वाच्च। **मासो जातस्येति**। षष्ठीसमासे

अहः। अह्नो जातस्य इति विग्रहे 'उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां

नम्। मासजातो दृश्यतामित्यादौ जातस्यैव दर्शनकर्मत्वादिप्रतीतेः। विशेषणविशेष्यभावस्तु एकार्थीभावसम्बन्धसाध्यः। एतदेवाभिप्रेत्य मूले क्वचित् पुस्तके मासो जातस्य यस्य स इति पठितम्। तत्र विग्रहे जातस्येति परिच्छेद्यपरिच्छेदकभावे षष्ठी। जातपरिच्छेदको मास इति विग्रहवाक्ये बोधः। मासपरिच्छेद्यो जात इति समासाद्बोधः। तत्र मासस्तावज् जननं साक्षात् परिच्छिनत्ति। जननाश्रयं तु देवदत्तं जननद्वारा परिच्छिनत्ति। तथा च मासपरिच्छेद्यजननाश्रयो देवदत्त इति समासाद्बोधः फलति। षष्ठीसमासापवादोऽयम्। षष्ठीसमासे तु जातमास इति स्यात्। न च मासो जातस्य यस्य स मासजात इति बहुव्रीहिणैवैतत्सिद्धमिति वाच्यम्, समानाधिकरणानामेव बहुव्रीहिविधानात्, 'निष्ठा' इति जातशब्दस्य पूर्वनिपातापत्तेश्च। 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति जातशब्दस्य परनिपातस्तु न, सुखादावस्य पाठकल्पनायां प्रमाणाभावादित्यलम्। **द्व्यह्नो जातस्येति**। 'तद्धितार्थ–' इति समाहारे द्विगुः। 'राजाहस्सखिभ्यः–' इति टच्। 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम्। **उत्तरपदेनेति**। 'तद्धितार्थ–' इति सूत्रभाष्ये इदं वार्तिकं पठितम्। तेन हि सूत्रेण उत्तरपदे परे दिक्संख्ययोस्सुबन्तेन द्विगुसमासो विहितः। उत्तरशब्दश्च समासस्य चरमावयवे रूढः। ततश्च द्वे अहनी जातस्य यस्येति विग्रहे त्रयाणां समासे सति जात-

प्राप्ते वचनम्। ननु जातः पुरुषस्तस्य तु हस्तवितस्त्यादिकं परिच्छेदकम्, न तु कालः, तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत्, अत्राहुः—साक्षात्क्रियां परिच्छिन्दन्नपि कालस्तद्द्वारा देवदत्तं परिच्छिनत्ति। यस्य हि जननादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते। तत्र व्यवहारकालजननक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येवेति। इह विग्रहे षष्ठीनिर्दिष्टस्यापि वृत्तौ प्राधान्यं द्योतयितुं 'यस्य सः' इत्युक्तम्। अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः। एवं बहुव्रीहावपीति बोध्यम्। ननु 'जातस्य मासः' इति विग्रहे वृत्तौ मासशब्दस्य पूर्वनिपातार्थमेतत्सूत्रारम्भस्यावश्यकत्वेऽपि मासविशेष्यकबोध एवात्रोचित इति किमनेन 'जातस्य यस्य सः' इति कथनेनेति चेत्, अत्राहुः—'मासजातो मृतः' इत्यादिप्रयोगानुरोधेन विग्रहे 'यस्य सः' इति स्वीक्रियत इति। **मासजात इति**। यद्यपि मासो जातो यस्येति बहुव्रीहिणापीदं सिध्यति, 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति वचनात्। न च स्वरे विशेषः, 'वा जाते' इत्यन्तोदात्तत्वस्यापि सिद्धेः। तथापि षष्ठीसमासापवादार्थमिदमारम्भणीयमेव। किं च मासो जातवतो यस्य स मासजातवानित्येतदर्थमपीदमवश्यारम्भणीयमिति दिक्। **उत्तरपदेनेति**। परिमाणयुत्तरपदहेतुकद्विगुसिद्धये

तत्पुरुषस्योपसंख्यानम्' (वा १२८८)। द्वे अहनी जातस्य यस्य स द्व्यह्नजातः। 'अह्नोऽह्न–' (सू ७८०) इति वक्ष्यमाणोऽह्नादेशः। पूर्वत्र तु 'न संख्यादेः समाहारे' (सू ०१३) इति निषेधः ७१७ सप्तमी शौण्डैः। (२-१-४०) सप्तम्यन्तं शौण्डादिभिः प्राग्वद्वा। अक्षेषु शौण्डोऽक्षशौण्डः। अधिशब्दोऽत्र पठ्यते। 'अध्युत्तरपदात्–' (सू २०७१) इति खः। ईश्वराधीनः। ७१८

शब्दे उत्तरपदे संपन्ने पूर्वयोस्सुबन्तयोर्द्विगुसमासप्रवृत्तिर्वक्तव्या। स च समासत्रयाणां 'कालाः परिमाणिना' इति पूर्वसूत्रेण न सम्भवति, 'सुप्सुपा' इत्येकत्वस्य विवक्षितत्वात्। अत उत्तरपदेन परिमाणिना परिच्छेद्यवाचिना परनिमित्तभूतेन हेतुना द्विगोस्सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं वक्तव्यमित्यर्थः। उत्तरपदभूतपरनिमित्तकद्विगुसिद्धये त्रिपदतत्पुरुषो वाच्य इति यावत्। 'सुप्सुपा' इत्येकत्वं विवक्षितमित्यत्र इदमेव लिङ्गम्। **द्वे अहनी इति**। द्वे अहनी जातस्येति विग्रहे त्रयाणां समासे सुब्लुकि द्व्यहन् जात इति जातशब्दे उत्तरपदे परे द्वि अहन् इत्यनयोः 'तद्धितार्थ–' इति द्विगुसमासे 'राजाहस्सखिभ्य–' इति टचि 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशे द्व्यह्नजात इति रूपमित्यर्थः। अत्र पूर्वयोर्द्विगुतत्पुरुषत्वाभावे टच् अह्नादेशश्च न स्यातामिति भावः। ननु द्वयोरह्नोस्समाहारो द्व्यह इति कथं पूर्वमुक्तम्। तत्राप्यह्नादेशप्रसङ्गादित्यत आह—**पूर्वत्र त्विति**। **निषेध इति**। अह्नादेशनिषेध इत्यर्थः। इति षष्ठीसमासनिरूपणम्।

सप्तमी शौण्डैः। **शौण्डादिभिरिति**। बहुवचननिर्देशाद् गणपाठाच्च शौण्डशब्दस्तदादिपरः। **अक्षेषु शौण्ड इति**। शौण्डः क्रियाकुशलः। वैषयिकाधिकरणत्वे सप्तमी। अक्षविषयकक्रीडाकुशल इत्यर्थः। **अत्रेति**। शौण्डादावित्यर्थः। **ईश्वराधीन इति**। प्रयम इति शेषः। 'ईश्वरे अधि' इति विग्रहः। 'अधिरीश्वरे'

त्रिपदतत्पुरुषो वक्तव्य इत्यर्थः। 'सुप्सुपा' इत्येकत्वस्य विवक्षितत्वादप्राप्ते वचनम्। अस्मादेव वार्तिकारम्भात् 'सुप्सुपा' इत्येकत्वं विवक्षितमिति ज्ञायते। **अह्नादेश इति**। त्रिपदतत्पुरुषे सत्युत्तरपदे परतः 'तद्धितार्थ–' इत्यवान्तरद्विगौ सतीति भावः। **पूर्वत्रेति**। द्व्यहजात इत्यत्रेत्यर्थः। **सप्तमी शौण्डैः**। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्च आकृतिगणतिरित्यभिप्रेत्याह—**शौण्डादिभिरिति**। **अक्षशौण्ड इति**। शौण्डः प्रवीणः। इह आसक्तिरूपा क्रिया वृत्तावन्तर्भवतीति तद्द्वारकं च सामर्थ्यम्। यथा दध्योदनगुडधानादौ उपसेचनमिश्रीकरणादिद्वारा सामर्थ्यम्। तेन कारकाणां क्रियैव संबन्ध इति नियमस्य न व्यभिचारः। **अधिशब्द इति**। आधेयप्रधान इति शेषः। अधिकरणप्रधानस्य त्वव्ययीभाव एव, अधिहरीति यथा। **ख इति**। नित्यमिति

सिद्धशुष्कपक्वबन्धैश्च। (२-१-४१) एतैः सप्तम्यन्तं प्राग्वत्। सांकाश्यसिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रबन्धः। ७१९ ध्वाङ्क्षेण क्षेपे (२-१-४२) ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायाम्। तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः। तीर्थकाकः। ७२० कृत्यैर्ऋणे। (२-१-४३) सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वदावश्यके। मासेदेयम् ऋणम्। ऋणग्रहणं नियोगोपलक्षणार्थम्।

इत्यधेः कर्मप्रचनीयत्वम्। 'यस्मादधिकम्–' इति सप्तमी। तदन्तस्य अधिना समासः, सुब्लुक्, 'अषडक्ष–' इति अध्युत्तरपदत्वात् खः, ईनादेशः, ईश्वराधीन इति रूपम्। **सिद्धशुष्क**। सप्तमीत्यनुवर्तते। तदाह—**एतैस्सप्तम्यन्तं प्राग्वदिति। सांकाश्यसिद्ध इति**। संकाशेन निर्वृत्तं नगरं साङ्काश्यम्, तत्र सिद्ध उत्पन्नो ज्ञातो वेत्यर्थः। **आतपशुष्क इति**। आतपे शुष्क इति विग्रहः। **स्थालीपक्व इति**। स्थाल्यां पक्व इति विग्रहः। **चक्रबन्ध इति**। चक्रे बन्ध इति विग्रहः। शौण्डादिगणे एतेषां पाठाभावात् पृथगुक्तिः। **ध्वाङ्क्षेण क्षेपे**। ध्वांक्षेत्यर्थग्रहणम्, व्याख्यानात्। तदाह—**ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यत इति**। क्षेपपदं व्याचष्टे—**निन्दायामिति। तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्ष इति**। ध्वाङ्क्षः काकः, स इव यो गुरुकुले चिरं न तिष्ठति स इत्यर्थः। एवं हि निन्दा भवति। अर्थग्रहणस्य प्रयोजनमाह—**तीर्थकाक इति। कृत्यैर्ऋणे**। सप्तमीत्यनुवर्तते। कृत्यग्रहणेन प्रत्ययग्रहणपरिभाषया कृत्यसंज्ञकप्रत्ययान्तग्रहणम्। 'ऋणपदमावश्यकोपलक्षणम्' इति भाष्यम्, तदाह—**सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वदावश्यक इति। मास इति**। सामीप्याधिकरणत्वे सप्तमी। मासाव्यव-

---

शेषः। 'विभाषाञ्चेः–' इति विभाषाग्रहणसामर्थ्यादिति वक्ष्यमाणत्वात्। अन्तःशब्दोऽत्र पठ्यते, स चाधिकरणप्रधानः, मध्ये इत्यर्थात्। तद्योगे अवयविन आधारत्वविवक्षायां सप्तमी, यथा वृक्षे शाखेति। वने अन्तर्वनमान्तर्वसति। यस्त्वधिकरणत्वमात्रवृत्तिरन्तःशब्दस्तस्य तु 'विभक्त्यर्थे' इति नित्यमव्ययीभावः। 'प्रनिरन्तःशर–' इति णत्वम्। वने इति अन्तर्वणम्। यत्तु तत्पुरुषस्य वैकल्पिकत्वात्पक्षे अव्ययीभाव इति हरदत्तेनोक्तम्, तच्चिन्त्यम्, तत्पुरुषस्य वैकल्पिकत्वेऽपि अव्ययीभावस्य नित्यत्वाद्वने अन्तरिति तदुक्तस्वपदविग्रहस्यायोगात्। किं च विभक्त्यर्थमात्रवृत्तेरव्ययीभावः, वचनग्रहणसामर्थ्यात्। अन्यथा वृक्षस्योपरीत्यादावतिप्रसङ्गः स्यात्। ततश्च मध्यवाचिनः प्रसङ्ग एव नास्तीति दिक्। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अन्तर। अधि। पटु। पण्डित। कुशल। चपल। निपुण। वृत्। **कृत्यैः**। कृत्प्रत्ययान्तेनैव समास इष्यते। 'अस्पराः' इत्यनुवृत्तेः। बहुवचनं तु प्रकृतिभेदाभिप्रायम्। तथैवो-

पूर्वाह्णे गेयं साम। ७२१ संज्ञायाम्। (२-१-४४) सप्तम्यन्तं सुपा प्राग्वत् संज्ञायाम्। वाक्येन संज्ञानवगमान्नित्यसमासोऽयम्। अरण्येतिलकाः। वनेकशेरुकाः। 'हलदन्तात्सप्तम्याः—' (सू ९६९) इत्यलुक्। ७२२ क्तेनाहोरात्रावयवाः। (२-१-४५) अह्नो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतम्, अपररात्रकृतम्। अवयवग्रहणं किम्—अह्नि दृष्टम्। ७२३ तत्र। (२-१-४६) 'तत्र' इत्येतत्सप्तम्यन्तं क्तान्तेन सह प्राग्वत्। तत्रभुक्तम्। ७२४ क्षेपे। (२-१-४७) सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायाम्। 'अवतप्तेनकुलस्थितं त एतत्' ७२५ पात्रेसमितादयश्च (२-१-४८) एते निपात्यन्ते

ह्नितोत्तरकाले प्रत्यर्पणीयमृणमित्यर्थः। ऋणपदस्यावश्यकोपलक्षणतायाः प्रयोजनमाह—**पूर्वाह्णेगेयं सामेति**। 'तत्पुरुषे कृति—' इत्यलुक्। यत्प्रत्यय एव कृत्योऽत्र विवक्षित इति भाष्यम्, तेनेह न-पूर्वाह्णे दातव्या भिक्षेति। **संज्ञायाम्**। सप्तमीत्यनुवर्तते, तदाह—**सप्तम्यन्तं सुपा प्राग्वत् संज्ञायामिति**। **अरण्येतिलका** इति वनेकशेरुका इति च संज्ञाशब्दौ। 'हलदन्तात् सप्तम्याः—' इत्यलुक्। **क्तेनाहोरात्रावयवाः**। अहोरात्रयोः अवयवा इति विग्रहः। सप्तमीत्यनुवर्तते। क्तेनेति तदन्तग्रहणम्, तदाह—**अह्नो रात्रेश्चावयवा इति**। अहरवयवस्योदाहरति—**पूर्वाह्णकृतमिति**। रात्र्यवयवस्योदाहरति—**अपररात्रकृतमिति**। **तत्र**। तत्रेति शब्दस्वरूपग्रहणम्। सप्तमीति क्तेनेति चानुवर्तते। तदाह—**तत्रेत्येतत् सप्तम्यन्तं क्तेन सह प्राग्वदिति**। **तत्रभुक्तमिति**। समासस्वरः प्रयोजनम्। तत्रभुक्तस्येदं तात्रभुक्तम् इति च। **क्षेपे**। सप्तमीति क्तेनेति चानुवर्तते, तदाह—**सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायामिति**। **अवतप्तेनकुलस्थितं त एतदिति**। स्थितमिति भावे क्तः। नकुलेन स्थितम्। 'कर्तृकरणे कृता बहुलम्' इति समासः। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया नकुलस्थितशब्दोऽपि क्तान्तः। तेन सहावतप्ते इति सप्तम्यन्तस्य अनेन समासे कृते 'तत्पुरुषे कृति—' इत्यलुक्। हे देवदत्त, ते तव, एतद् अवस्थानम्, अवतप्ते नकुलस्थितमित्यन्वयः। यथा अवतप्तप्रदेशे नकुला न चिरं तिष्ठन्ति तथा कार्याण्युपक्रम्य तान्यनिर्वर्त्य इतस्ततो धावनमित्यर्थः। अव्यवस्थितोऽसीति निन्दा ज्ञेया। **पात्रेसमितादयश्च**। **निपात्यन्त इति**। कृतसमासादिकार्या एते शब्दा

दाहरति—**मासेदेयमिति**। 'तत्पुरुषे कृति—' इत्यलुक्। नेह मासे दातव्यम्। **नियोगोपलक्षणार्थमिति**। नियोगो निर्धारणम्। आवश्यकोपलक्षणार्थमित्यर्थः। **नित्यसमासोऽयमिति**। अत एव 'पुरुषोत्तमः' इति स्वपदविग्रहोऽसंगत इत्य-

क्षेपे। पात्रेसमिताः। भोजनसमय एव सङ्गताः, न तु कार्ये। गेहेशूरः। गेहेनर्दी। आकृतिगणोऽयम्। चकारोऽवधारणार्थः। तेनैषां समासान्तरे घटकतया प्रवेशो न। परमाः पात्रेसमिताः। ७२६ **पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन।** (२-१-४९) 'विशेषणं विशेष्येण–' (सू ७२९) इति सिद्धे पूर्वनिपातनियमार्थं सूत्रम्। एकशब्दस्य 'दिक्संख्ये संज्ञायाम्'

निर्दिश्यन्त इत्यर्थः। **पात्रेसमिता इति।** इण् गतौ, संपूर्वाद् 'गत्यर्थाकर्मक–' इति कर्तरि क्तः। निपातनात् सप्तम्या अलुक्। भोजनपात्रे निहिते सति संगता इत्यर्थः। फलितमाह—**भोजनेति। गेहेशूर इति।** गेह एव प्रकटितशौर्यः[1], न तु युद्ध इत्यर्थः। **गेहेनर्दीति।** नर्द शब्दे, 'सुप्यजातौ–' इति णिनिः। समासे सति निपातनादलुक्। गेह एव गर्जति, युद्धादौ तु न प्रवर्तत इत्यर्थः। **चकारोऽवधारणार्थ इति।** ततश्च एते यथा गणे पठितास्तथैव भवन्तीत्यर्थः। ततः किमित्यत आह—**तेनेति।** ततश्च परमाश्च ते पात्रेसमिताश्चेत्यादौ समासो न भवति। **पूर्वकालैक।** सुबित्यनुवृत्तं बहुवचनेन विपरिणम्यते। सुपेति चानुवर्तते। पूर्वः कालो यस्य स पूर्वकालः। पूर्वकालवृत्तिरित्यर्थः। ततश्च पूर्वकालेत्यनेन पूर्वकालवृत्त्यर्थकशब्दस्य ग्रहणम्। एकादिशब्दास्तु षट् स्वरूपपरा एव। तथा च पूर्वकालादयस्सप्त सुबन्ताः समानाधिकरणेन सुबन्तेन समस्यन्ते, स तत्पुरुष इत्यर्थः। समानम् एकम् अधिकरणं वाच्यं यस्येति विग्रहः। एकार्थवृत्तित्वं सामानाधिकरण्यमिति फलितम्। **पूर्वनिपातेति।** पश्चादनुलिप्तः पूर्वं स्नातत्वेन, पूर्वं स्नातो वा पश्चादनुलिप्तत्वेन विशेष्टुं शक्यते। अतो 'विशेषणं विशेष्येण–' इति समासे सति अन्यतरस्य पूर्वनिपाते प्राप्ते पूर्वकालवृत्तिशब्दस्यैव पूर्वनिपातार्थमिदं वचनम्। एवमेकादीनामपीत्यर्थः। एकशब्दविषये प्रयोजनान्तरमप्याह—**एकशब्दस्येति।** 'दिक्संख्ये संज्ञायां समस्येते' इति नियमस्य वक्ष्यमाणतया एकनाथ इत्यत्र विशेषणसमासस्य

बोचाम। **अवतप्त इति।** नकुलेन स्थितं नकुलस्थितम्। 'कर्तृकरणे कृता–' इति समासः। कृद्ग्रहणपरिभाषया नकुलस्थितशब्दोऽपि क्तान्त इति तेन सह सप्तम्यन्तस्य समासः। 'तत्पुरुषे कृति–' इति सप्तम्या अलुक्। अव्यवस्थितत्वप्रतिपत्त्यात्र निन्दावगम्यते। **पात्रेसमितादयश्च।** संपूर्वादिणः क्तः। **गेहेनर्दीति।** 'नर्द शब्दे' इत्यस्मात् 'सुप्यजातौ–' इति णिनिः। **घटकतया प्रवेशो नेति।** 'परमाः पात्रेसमिताः' इति वाक्यमेव भवति, न तु 'सन्महत्–' इत्यादिना समासान्तरमिति भावः एतच्च शब्दकौस्तुभे स्थितम्। अन्ये तु 'केवलाः पात्रेसमिताः' इति वाक्यमेव, न तु 'पूर्वकालैक–' इत्यादिना समासान्तरमित्याहुः। **पूर्वकालैक।** पूर्वकाल इत्यर्थ-

---

१ 'प्रकटितयशाः' इति क्वचित् पाठः।

(सू ७२७) इति नियमबाधनार्थं च। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः। ७२७ दिक्संख्ये संज्ञायाम्। (२-१-५०) 'समानाधिकरणेन' इत्यापादपरिसमाप्तेरधिकारः। संज्ञायामेवेति नियमार्थं सूत्रम्। पूर्वेषु-

---

बाधे प्राप्ते तत्प्रतिप्रसवार्थमप्येकग्रहणमित्यर्थः। **स्नातानुलिप्त इति**। विग्रहवाक्यवदिह पूर्वपश्चाच्छब्दाभावेऽपि स्नानानुलेपनयोः पौर्वापर्यं समासगम्यमेव। पूर्वकालः समस्यत इत्युक्ते परकालेनेत्यर्थात्प्रतीतेः। **एकनाथ इति**। एकश्चासौ नाथश्चेति विग्रहः। **सर्वयाज्ञिका इति**। यज्ञमधीयते विदन्ति वा याज्ञिकाः। 'क्रतूक्थादिसूत्रान्ताट् ठक्'। सर्वे च ते याज्ञिकाश्चेति विग्रहः। **जरन्नैयायिका इति**। जरन्तश्च ते नैयायिकाश्चेति विग्रहः। न्यायमधीयते विदन्ति वा नैयायिकाः। पूर्ववत् ठक्। 'न य्वाभ्याम्–' इत्यैजागमो वृद्धिनिषेधश्च। 'जीर्यतेरतृन्' इति भूते अतृन्। जीर्णनैयायिका इत्यर्थः। **पुराणमीमांसका इति**। मीमांसामधीयते मीमांसकाः। 'क्रमादिभ्यो वुन्'। पुराणाश्च ते मीमांसकाश्चेति विग्रहः। **नवपाठका इति**। नवाश्च ते पाठकाश्चेति विग्रहः। अत्र पुराणसाहचर्यान्नवशब्दो नूतनवाच्येव गृह्यते। न तु संख्याविशेषवाची। **केवलवैयाकरणा इति**। व्याकरणमधीयते विदन्ति वा वैयाकरणाः। 'तदधीते तद्वेद' इत्यण्। 'न य्वाभ्याम्–' इति वृद्धिनिषेध ऐजागमश्च। केवलाश्च ते वैयाकरणाश्चेति विग्रहः। **दिक्संख्ये संज्ञायाम्। अधिकार इति**। 'पूर्वकालैक–' इति सूत्रस्थं समानाधिकरणेनेत्येतद् आपादसमाप्तेरनुवर्तत इत्यर्थः। ततश्च दिक्संख्ये समानाधिकरणेन सुबन्तेन समस्येते, स तत्पुरुष इत्यर्थः। ननु 'विशेषणं विशेष्येण–' इत्येव सिद्धे किमर्थमिदं वचनमित्यत आह— **संज्ञायामेवेति**। न चैवं सति पञ्च गावो यस्य स पञ्चगुरिति बहुव्रीहिर्न स्यात्,

---

निर्देशः। इतरेषां तु षण्णां स्वरूपग्रहणम्। पूर्वत्वस्य ससंबन्धिकत्वात्पूर्वकालोऽपरकालेन समस्यते। तथैवोदाहरति—**स्नातानुलिप्त इति**। अत्र क्रियाशब्दत्वात्पाचकपाठकवत्पर्यायः प्राप्तः। **याज्ञिका इत्यादि**। यज्ञमधीयते विदन्ति वा याज्ञिकाः। 'क्रतूक्थादि–' इति ठक्। एवं नैयायिकाः। 'जीर्यतेरतृन्' इति भूतेर्थेऽतृन्। जरन्तश्च ते नैयायिकाश्च। जीर्णनैयायिका इत्यर्थः। मीमांसामधीयते विदन्ति वा मीमांसकाः, 'क्रमादिभ्यो वुन्'। **नवपाठका इति**। पठन्तीति पाठकाः। 'ण्वुल्तृचौ' इति ण्वुल् संख्यावाची नवशब्दोऽत्र न गृह्यते, 'दिक्संख्ये संज्ञायाम्' इति नियमात्। समानाधिकरणेनेति किम्, एकस्याः शौक्ल्यम्। षष्ठीसमासोऽपि इह न भवति। 'पूरणगुण–' इति निषेधात्। **दिक्संख्ये संज्ञायाम्। नियमार्थमिति**। 'तत्पुरुषे

कामशमी सप्तर्षयः। नेह, उत्तरा वृक्षाः। पञ्च ब्राह्मणाः। ७२८ **तद्धितार्थोत्तरपदसमाहारे च।** (२-१-५१) तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वद्वा। पूर्वस्यां शालायां भवः पौर्वशालः।

पञ्चानां गवां समाहारः पञ्चगवमित्यत्र 'तद्धितार्थ—' इति समासश्च न स्यादिति वाच्यम्। 'विशेषणं विशेष्येण—' इति यदि दिक्संख्ययोस्समासः स्यात् तर्हि संज्ञायामेवेति नियमशरीराभ्युपगमात्। पूर्वसूत्रम्, पूर्वमासः, पूर्वसमुद्र इत्यादौ तु संज्ञात्वाभावेऽपि कालदेशवाचकत्वात् समासो भवत्येव। ननु 'त्रिलोकनाथः पितृसद्मगोचरः' इति कथं कालिदासप्रयोगः, त्रिलोकशब्दस्य असंज्ञात्वात्। त्रयाणां लोकानां समाहार इति विग्रहे 'तद्धितार्थ—' इति द्विगुसमासे तु 'द्विगोः' इति ङीप्प्रसङ्गः। 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीलिङ्गत्वात्। पात्रादित्वाद् न स्त्रीत्वमित्यभ्युपगमे 'यदि त्रिलोकी गणनापरा स्यात्' इत्यादिप्रयोगा न युज्येरन्निति चेत्, सत्यम्। लोकशब्दोऽत्र लोकसमुदायपरः। त्र्यवयवो लोकस्त्रिलोक इति मध्यमपदलोपी समासः। एतच्च 'द्विगोर्लुगनपत्ये' इति भाष्ये स्पष्टम्। षोडशपदार्थानामित्यत्र तु षोडशसंख्याकाः पदार्था इति मध्यमदलोपी समास इत्यलम्। **पूर्वेषुकामशमीति।** पूर्वशब्दस्य इषुकामशमीशब्देन समासः। देशविशेषस्य संज्ञेयम्। **सप्तर्षय इति।** मरीच्यत्रिप्रभृतीनां सप्तानामृषीणां संज्ञेयम्। **नेहेति।** असंज्ञात्वादिति भावः। **तद्धितार्थे।** एकापि सप्तमी विषयभेदाद् भिद्यते। तत्र तद्धितार्थेत्यंशे वैषयिकाधारत्वे। उत्तरपदेत्यंशे सामीपिकमाधारत्वमादय परसप्तमी पर्यवस्यति। समाहारांशे तु वाच्यतया आधारत्वे सप्तमी। पूर्वसूत्राद् दिक्संख्ये इत्यनुवर्तते, तदाह—**तद्धितार्थे विषय इति।** तद्धितार्थे भविष्यत्तद्धितजन्यज्ञानविषये सतीत्यर्थः। तद्धिते भविष्यतीति यावत्। **प्राग्वदिति।** समानाधिकरणेन समस्यते, स तत्पुरुष इत्यर्थः। तद्धितार्थे दिक्समासमुदा-

---

संज्ञायामेव दिक्संख्ये समस्येते' इति नियमशरीरम्। तेन पञ्चगुरित्यादि सिध्यति। कथं तर्हि 'त्रिलोकनाथः पितृसद्मगोचरः' इति कालिदासः, त्रिलोकशब्दस्यासंज्ञात्वात्। न च समाहारे द्विगुः, 'द्विगोः' इति ङीप्प्रसङ्गात्। न च पात्रादित्वं कल्प्यम्, 'यदि त्रिलोकी गणना परा स्यात्' इत्यादिप्रयोगाणामसंगत्यापत्तेः। न च 'उत्तरपदे' इति समासः, त्रिपदतत्पुरुषस्य इह दुर्लभत्वाद्। अत्राहुः— लोकशब्दोऽत्र लोकसमुदायपरः। त्र्यवयवो लोकस्त्रिलोकः। 'शाकपार्थिवादित्वादुत्तरपदलोपः' इति। **पञ्च ब्राह्मणा इति।** यद्यप्यत्र कृतेऽपि समासे रूपे विशेषो नास्ति, तथापि विभक्त्यन्तरे पञ्चभिर्ब्राह्मणैरित्यादौ विशेषो बोध्यः। **तद्धितार्थो।** असंज्ञार्थं वचनम्। एकापि सप्तमी विषयभेदाद्भिद्यत इत्याशयेनाह—**तद्धितार्थे विषय इत्यादि।** यदि तु

समासे कृते 'दिक्पूर्वपदादसंज्ञायां ञः' (सू १३२८) इति ञः । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' (वा १३७६) । आपरशालः । पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः । तेन शालाशब्दे आकार उदात्तः । पूर्वशालाप्रियः । दिङ्‌ समाहारो नास्त्यनभिधानात् । संख्या-

---

हरति—**पूर्वस्यामिति** । **समासे कृत इति** । पूर्वस्यां शालायां भव इति विग्रहे 'तद्धितार्थे–' इति समासे कृते 'दिक्पूर्वपदात्–' इति ञप्रत्यये कृते 'यस्येति च' इत्याकारलोपे आदिवृद्धिरिति भावः । **सर्वनाम्न इति** । मात्रशब्दः कार्त्स्न्ये । समासतद्धितादिवृत्तिगतसर्वनाम्नां पुंवत्त्वमिति तदर्थः । यदि तु तद्धिते परे दिक्संख्ये समस्येते इत्युच्यते, तर्हि उत्पन्ने तद्धिते समासः, समासे कृते दिक्पूर्वपदत्वात्तद्धित इत्यन्योन्याश्रयप्रसङ्गः । तद्धितार्थे वाच्ये दिक्संख्ये समस्येते इति तु न व्याख्यातम् । तद्धितार्थस्य तद्धितवाच्यतया समासार्थत्वाभावात् । अतस्तद्धिते भविष्यतीत्येव व्याख्यातुमुचितम् । **आपरशाल इति** । अपरस्यां शालायां भव इति विग्रहः । समासादि पौर्वशालवत् । उत्तरपदे परतो दिक्समासमुदाहरति—**पूर्वा शाला प्रिया यस्येत्यादिना** । ननु बहुव्रीहिसमासे कृते सुपा लुप्तत्वाद् उत्तरपदे परतः पूर्वयोः किमनेन समासेनेत्यत आह—**तेन शालाशब्दे आकार उदात्त इति** । अवान्तरतत्पुरुषे सति समासान्तोदात्तत्वेन लकारादाकार उदात्त इत्यर्थः । असति त्ववान्तरतत्पुरुषे पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं स्यादिति भावः । ननु पूर्वेषां पुरुषाणां समाहार इत्यत्रापि समासः स्यादित्यत आह—**दिङ्‌ङ्विति** । दिक्षु समाहारो द्विगुविषयो न भवतीत्यर्थः ।

'तद्धितार्थे वाच्ये' इति व्याख्यायेत, तर्हि पौर्वशाल इत्यादौ तद्धितो न स्यात् । तदर्थस्य समासेनैवोक्तत्वात् । 'द्विगोर्लुगनपत्ये' इति ज्ञापकादुक्तेऽपि तद्धितार्थे तद्धितो भवतीति कल्पनायां प्रतिपत्तिगौरवमिति भावः । 'तद्धिते परे' इति तु न व्याख्येयमेव। तद्धिते परतः समासः, समासे कृते 'दिक्पूर्वपदात्–' इत्यादिना तद्धित इत्यन्योन्याश्रयप्रसङ्गात् । **समाहारे च वाच्य इति** । तेन पञ्चगवमित्यादौ समासेनैव समाहारस्योक्तत्वात्समूहार्थप्रत्ययो नोत्पद्यते । अन्यथा अत्र 'गोरतद्धितलुकि' इति टज्न स्यात् , सामूहिकप्रत्ययस्य 'द्विगोर्लुगनपत्ये' इति लुकः प्रवृत्तेरिति भावः । **सर्वनाम्न इति** । एतच्च पूर्वापरोदाहरणान्वयि । यद्यपि 'स्त्रियाः पुंवत्–' इत्यनेनापि प्रकृतरूपसिद्धिः, तथाप्युत्तरपूर्वेत्याद्यर्थं 'सर्वनाम्न–' इति वचनमावश्यकम् , प्रतिपदोक्तत्वाद् । इहापि तदुपन्यासो न्याय्य इति भावः । **वृत्तिमात्र इति** । तद्धितवृत्तौ समासवृत्तौ चेति कैयटः— **आकार उदात्त इति** । असति त्ववान्तरे तत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्या-

यास्तद्धितार्थे—षण्णां मातॄणामपत्यं षाण्मातुरः । पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहाववान्तरतत्पुरुषस्य विकल्पे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' (१२८७) ७२६ गोरतद्धितलुकि । (५-४-९२) गोऽन्तात्तत्पुरुषाट्टच् स्यात्समासान्तः, न तद्धितलुकि । पञ्चगवधनः । पञ्चानां गवां समाहारः ।

समाहारे दिक्पूर्वपदसमासो नास्तीति यावत् । संख्यायास्तद्धितार्थे इति । समास उदाह्रियत इत्यर्थः । तत्र तद्धितार्थे उदाहरति—षाण्मातुर इति । 'मातुरुत्संख्यासम्भद्रपूर्वायाः' इत्यण्, प्रकृतेरुकारश्चादेशः, आदिवृद्धिश्च । अथ उत्तरपदे परत उदाहरति—पञ्च गाव इति । अवान्तरतत्पुरुषस्येति । उत्तरपदे परतो विहितस्येत्यर्थः । विकल्पे प्राप्त इति । महाविभाषाधिकारादिति शेषः । ततश्च पञ्चगोशब्दयोस्तत्पुरुषाभावपक्षे 'गोरतद्धितलुकि' इति तत्पुरुषप्रयुक्तटजभावे पञ्चगोधनं इत्यपि स्यादिति भावः । द्वन्द्वतत्पुरुषयोरिति । उत्तरपदे परतो यौ द्वन्द्वतत्पुरुषौ तयोर्नित्यत्वं वक्तव्यमित्यर्थः । समासग्रहणं तु संपातायातम् , अनन्वयाद् उत्तरपदे परतः समाससंज्ञया अव्यभिचाराच्च, उत्तरपदशब्दस्य समासोत्तरखण्डे रूढत्वात् । गोरतद्धितलुकि । 'तत्पुरुषस्याङ्गुले–' इत्यतस्तत्पुरुषस्येत्यनुवृत्तं पञ्चम्या विपरिणतं गोरित्यनेन विशेष्यते । तदन्तविधिः । 'राजाहस्सखिभ्यः–' इत्यतष्टजित्यनुवर्तते । समासान्त इत्यधिकृतम् । तदाह—गोऽन्तादित्यादिना । अतद्धितलुकीति किम् ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः । अत्र तद्धितस्य 'अध्यर्ध–' इति लुक् । पञ्चगवधन इति । त्रिपदबहुव्रीहौ कृते सति धनशब्दे उत्तरपदे परे पूर्वयोस्तत्पुरुषे टचि अवादेश इति भावः । अत्र 'द्वन्द्वतत्पुरुषयोः–' इति वार्तिके द्वन्द्वस्योदाहरणं तु वाक् च त्वक् च प्रिया यस्य स वाक्त्वचप्रिय इति बोध्यम् । इह त्रिपदबहुव्रीहौ कृते पूर्वयोर्नित्यद्वन्द्वः । तेन 'द्वन्द्वाच्चुदषहान्तात् समाहारे' इति टजपि नित्य एव । न च वाक्त्वक्छब्दयोः परस्परसामानाधिकरण्याभावात् कथमिह त्रिपदबहुव्रीहिरिति वाच्यम् । द्वयोः प्रियाशब्दसामानाधिकरण्यमादाय तदुपपत्तेः । 'सप्तमीविशेषणे बहुव्रीहौ' इति ज्ञापकेन कण्ठेकाल इत्यादाविव व्यधिकरणबहुव्रीहिसंभवाच्च । 'वाक्त्वचप्रियः' इति भाष्ये उदाहरणमेवात्र लिङ्गमित्यलम् । अथ समाहारे उदाहर्तुं विग्रहं दर्शयति—पञ्चानां गवां समाहार इति । अत्र समासे सति 'गोरतद्धितलुकि' इति टचि

धुदात्तत्वमेव स्यादिति भावः । षाण्मातुर इति । 'मातुरुत्संख्यासंभद्रपूर्वायाः' इत्युदादेशः । 'अनपत्ये' इत्युक्तेः 'द्विगोर्लुग्–' इति लुग् न । विकल्पे प्राप्त इति महाविभाषयेति शेषः । ततश्च तत्पुरुषप्रयुक्तटजभावे पञ्चगोधन इत्यपि स्यादिति भावः । मनोरमायां तु—विकल्पे प्राप्ते नित्यसमासार्थं द्वन्द्वतत्पुरुषयोरित्येतद्वचनमिति प्राचां

७३० संख्यापूर्वो द्विगुः। (२-१-५२) 'तद्धितार्थ-' (सू ७२८) इत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुः स्यात्। **७३१ द्विगुरेकवचनम्। (२-४-१)**

अवादेशे पञ्चगवशब्दस्य द्विगुकार्यं विधास्यन् द्विगुसंज्ञामाह। **संख्यापूर्वो द्विगुः।** संख्या पूर्वोऽवयवो यस्येति बहुव्रीहिः। 'तद्धितार्थ-' इति पूर्वसूत्रविहितसमासः अन्यपदार्थः, प्रत्यासत्तेः, तदाह—**तद्धितार्थेत्यत्रोक्तस्त्रिविध इति।** तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये इत्येवं त्रिप्रकारो यः संख्यापूर्वः समास उक्तः स द्विगुरिति यावत्। तथा च पञ्चगवशब्दस्य समाहारे वाच्ये विहितसमासत्वाद् द्विगुसंज्ञा स्थिता। तद्धितार्थे तु पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः। 'संस्कृतं भक्षाः' इत्यण्। 'द्विगोर्लुगनपत्ये' इति लुक्। उत्तरपदे यथा-पञ्चनावप्रियः। 'नावो द्विगोः' इति समासान्तष्टच्। **द्विगुरेकवचनम्।** अत्र 'समाहारग्रहणं कर्तव्यम्' इति वार्तिकात् समाहार इति लभ्यते। वक्तीति वचनम्। बाहुलकः कर्तरि ल्युट्। सामान्ये नपुंसकम्। समाहारे द्विगुः एकार्थप्रतिपादकः स्यादिति लभ्यते। तत्र यदि समाह्रियत इति कर्मणि घञि समाहारशब्दः समाहृतप्रधानः, तदा समाहृतगत-

---

प्रन्थमनुसृत्योक्तम्। वस्तुतस्तु त्रयाणां समासे कृते अन्यपदार्थोपसंक्रमेण परस्परसंबन्धाभावाद् द्वन्द्वतत्पुरुषयोरप्राप्तौ सत्यां वचनमिदमित्यादि स्थितम्। द्वन्द्वस्योदाहरणं तु—वाक् च दृषच्च प्रिये अस्य वाग्दृषदप्रियः। छत्रोपानहप्रियः। इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वन्द्वः, तेन 'द्वन्द्वाच्चुदषहान्तात्-' इति समासान्तष्टजपि नित्य एव। **गोरतद्धित।** 'तत्पुरुषस्य-' इत्यनुवर्तते टच, तदाह—**गोन्तादित्यादि।** ननु ग्रहणवता प्रातिपदिकेन तदन्तविधेरभावात्तत्पुरुषस्यावयवो यो गोशब्दस्तस्माट्टजित्यर्थः स्यात्। तथा च गोमूत्रमित्यादावतिप्रसङ्गः स्यादत आह—**समासान्त इति।** अयं भावः—'समासान्ताः' इत्यधिकाराट्टचा समासान्तेन भवितव्यम्। गोरिति पञ्चमीश्रवणात्ततः परेणापि। न चैतत्तदन्तविधिमन्तरेणोपपद्यत इति सामर्थ्यात्तदन्तविधिलाभः, ततश्च तत्पुरुषस्येति षष्ठ्यन्तं पञ्चम्यन्तेन विपरिणम्यत इति। **न तद्धितलुकीति।** लुग्विषय इत्यर्थः, न तु तद्धितलुकि सतीति। समासान्तानामन्तरङ्गत्वात्। अतद्धितलुकीति किम्, पञ्चभिर्गोभिः क्रीतः पञ्चगुः। अत्र तद्धितस्य ठकः 'अध्यर्धपूर्व-' इति लुक्। **संख्यापूर्वो द्विगुः। अत्रोक्त इति।** अयं भावः—पूर्वसूत्रविषयैरेवेयं संज्ञा। 'अनन्तरस्यैव-' इति न्यायात्। एतदर्थमेव हि सूत्रद्वयं कृतम्, अन्यथा 'दिक्संख्ये संज्ञातद्धितार्थोत्तरपदसमाहारेषु' इत्येव ब्रूयात्। तेन सप्तर्षय इत्यत्र 'इगन्तकालकपाल-' इत्यादिना पूर्वपदप्रकृतिस्वरो न भवति। किं तु समासान्तोदात्त एव। तथा च लक्ष्यम्-'सप्त ऋषयस्तपसे ये

द्विग्वर्थः समाहार एकवत्स्यात्। 'स नपुंसकम्' (सू ८२१) इति नपुंसकत्वम्।

द्वित्वबहुत्वयोः एकत्वानुपपत्तेरतिदेशस्सम्पद्यते । तदाह--**द्विग्वर्थः समाहार एकवदिति**। यदा समाहरणं समाहारः समूहः, तदा तस्यैकत्वादेव सिद्धमिति नेदं सूत्रमारम्भणीयमिति भाष्ये स्पष्टम्। केचित्तु समूहस्य वस्तुत एकत्वेऽपि उद्भूतावयवभेदविवक्षया द्विबहुवचनव्यावृत्त्यर्थमिदम्। एवं चात्र उद्भूतावयवभेदविवक्षा न कर्तव्येति फलतीत्याहुः। **स नपुंसकमिति**। समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यादिति

निषेदुः' । 'सप्तर्षीणां सुकृतां यत्र लोकः' इत्यादि । **त्रिविधः संख्यापूर्व इति**। तद्धितार्थे विषये, उत्तरपदे च परतः, समाहारे च वाच्ये, संख्यापूर्वो यः समासः स इत्यर्थः । तद्धितार्थे यथा—पञ्चकपालः । 'संस्कृतं भक्षाः' इत्यणो 'द्विगोर्लुगनपत्ये' इति लुक् । उत्तरपदे यथा—पञ्चनावप्रियः । 'नावो द्विगोः' इति समासान्तष्टच्। समाहारे—पञ्चमूली। 'द्विगोः' इति ङीप् । **द्विगुरेकवचनम्**। वक्तीति वचनम्, बाहुलकात्कर्तरि ल्युट्। 'सामान्ये नपुंसकम्'। द्विगुः समास एकार्थप्रतिपादको भवतीत्यर्थ । न च वस्तुतोऽनेकार्थस्यैकार्थ्यं कथंचिदुपपद्यत इति सामर्थ्यादतिदेशः संपद्यत इत्याह—**एकवत्स्यादिति**। समाहारे इति तूपसंख्यानाल्लभ्यते। समाहारे यो द्विगुस्तदर्थ एकवदित्यन्वयः। समाहारे किम्, तद्धितार्थे मा भूत्। पञ्चसु कपालेषु संस्कृताः पञ्चकपालाः, पञ्चभिर्गोभिः क्रीताः पञ्चगवः पटाः । पञ्चगवे पञ्चगवानीत्यत्र तु प्रथमद्विग्वर्थस्यैकवद्भावे कृते योऽयमेकशेषे कृते द्विग्वर्थसमुदायस्तस्याद्विग्वर्थत्वाद्बहिरङ्गत्वाच्चैकवद्भावो न भवतीति स्थितमाकरे । यदा 'तद्धितार्थ–' इति सूत्रे 'समाहारे' इति कर्मसाधनस्तदा समाहृतप्रधानो द्विगुरिति बहुत्वे प्राप्ते अनेन एकवद्भावः क्रियते। यदा तु भावसाधन एव समाहारस्तदा समूहप्रधानत्वाद् द्विगोः समूहस्य चैकत्वात्सिद्धमेकत्वमिति नास्य प्रयोजनम् । न च 'स नपुंसकम्' इति नपुंसकत्वार्थमेकत्वविधानमिति वाच्यम्, समुदायवाचकेषु 'सामान्ये नपुंसकम्' इत्यभ्युपगमे बाधकाभावादित्याहुः। वस्तुतस्तु 'तद्धितार्थ–' इति सूत्रे समाहार इति भावे घञ् न तु कर्मणि। पञ्चगवमित्यत्र पञ्च गावः समाहृता इत्यर्थाभ्युपगमे समाह्रियमाणानां बहुत्वेन एकवचनानुपपत्तेः । न च 'द्विगुरेकवचनम्' इति सूत्रादेवमिति वाच्यम्, पञ्चखट्वीत्यसिद्धेः । तत्र हि पञ्च खट्वाः समाहृताः, पञ्चसु खट्वासु समाहृतास्विवत्येवं विग्रहासंभवेन नियतविभक्तित्वाभावाद् 'एकविभक्ति चापूर्वनिपाते' इत्यप्रवृत्तेरनुपसर्जनत्वाद् 'गोस्त्रियोः–' इति ह्रस्वो न स्यात् । ततश्च 'आबन्तो वा' इति स्त्रीत्वपक्षे 'द्विगोः' इत्यदन्तलक्षणो ङीप् स्यात्। भावसाधनत्वे त्वेकविभक्तित्वादुपसर्जनत्वमव्याहतमेव। समाहारापेक्षया नियमेन वर्तिपदानां षष्ठ्यन्तत्वात्, तथा च पञ्चखट्वीत्यादिरूपं निर्बाधमेवेति दिक्। **स नपुंसकमिति** । एतस्यार्थो मूल

पञ्चगवम् । ७३२ **कुत्सितानि कुत्सनैः** । (२-१-५३) कुत्स्यमानानि कुत्सनैः सह प्राग्वत् । वैयाकरणखसूचिः । मीमांसकदुर्दुरूढः । ७३३ **पापाणके कुत्सितैः** । (२-१-५४) पूर्वसूत्रापवादः । पापनापितः । अणककुलालः ।

तदर्थो मूले वक्ष्यते । इति द्विगुसमासः । **कुत्सितानि कुत्सनैः** । वर्तमाने क्तः, व्याख्यानात् । तदाह—**कुत्स्यमानानीति** । कुत्सनैरिति करणे ल्युट् । **प्राग्वदिति** । समानाधिकरणेन समस्यते स तत्पुरुष इत्यर्थः । **वैयाकरणखसूचिरिति** । वैयाकरणश्चासौ खसूचिश्चेति विग्रहः । यः प्रक्रियां पृष्टस्सन् प्रश्नं विस्मारयितुमाकाशं दर्शयति पश्यति वा स एवमुच्यते । अत्र वैयाकरणः प्रक्रियाविस्मरणाभिन्धः । खसूचनं निन्दाहेतुः । **मीमांसकदुर्दुरूढ इति** । 'दुल उत्क्षेपे' चुरादिः । दुर्पूर्वादौणादिकः कूटप्रत्ययः । 'बहुलमन्यत्रापि' इति णेर्लुक् । रलयोरभेदाद् रः । यो मीमांसामधीत्यान्यथा जानानो दुराक्षेपं करोति स एवमुच्यते । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । विशेषणसमासे तु विशेषणस्य पूर्वनिपातः स्यात् । **पापाणके कुत्सितैः** । पापशब्दः अणकशब्दश्च कुत्सितवाचकैः समस्यते, स तत्पुरुष इत्यर्थः । ननु विशेषणसमासेनैव सिद्धे किमर्थमिदमित्यत आह—**पूर्वसूत्रेति** । पापमस्यास्तीति मत्वर्थीयः अर्शआद्यच् । पापशब्दः पापवति वर्तते । अणकशब्दः कुरूपिणि वर्तते । 'कुरूपकुत्सितावद्यखेटगर्ह्याणकास्समाः ।' इत्यमरः । ततश्च पापाणकशब्दौ निन्दाहेतुभूतपापकुरूपात्मकप्रवृत्तिनिमित्तौ कुत्सनाभिधायिनौ । ततश्चानयोः पूर्वसूत्रेण समासे परनिपातः स्यात् । अतः पूर्वनिपातनियमार्थमिदं सूत्रमित्यर्थः । **पापनापित इति** । पापश्चासौ नापितश्चेति विग्रहः । **अणककुलाल इति** । अणकश्चासौ

एव स्फुटीभविष्यति । **कुत्सितानि** । 'कुत्स अवक्षेपणे' कर्मणि क्तः । स च 'मतिबुद्धि-' इति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्तमाने विहित इत्याशयेनाह—**कुत्स्यमानानीति** । तत्प्रतिपादकानीत्यर्थः । उभयत्र बहुवचननिर्देशः स्वरूपविधिनिरासार्थः । **वैयाकरणखसूचिरिति** । सूचयतेः 'अच इः' । यः पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयत्यभ्यासवैधुर्यात्स एवमुच्यते । न तु वस्तुतो व्याकरणं तदध्ययनं वा कुत्सितम् । वेदाङ्गत्वेन तस्य प्रशस्तत्वात् । तथापि तस्य प्रतिभानाभावेन निष्फलत्वात्कुत्स्यते । **दुर्दुरूढ इति** । 'दुल उत्क्षेपे' दुर्पूर्वः । औणादिकः कूटप्रत्ययः । 'बहुलमन्यत्रापि' इति णेर्लुक् । रलयोरेकत्वस्मरणाल्लस्य रः । विशेष्यस्य पूर्वनिपातनियमार्थं सूत्रम् । शब्दप्रवृत्तिनिमित्तकुत्सायामेवायं संनिधानात् । तेनेह न—नैयायिको दुराचारः । **पापाणके** । एतौ कुत्सनाभिधायिनौ । 'कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः' इत्यमरः । ततश्चानयोः पूर्वसूत्रेण समासे परनिपातः स्यात्,

१ क्वचित्तु 'दुर्दुरूढः' इति पाठः ।

७३४ उपमानानि सामान्यवचनैः। (२-१-५५) घन इव श्यामो घनश्यामः। इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः

कुलालश्चेति विग्रहः। **उपमानानि सामान्यवचनैः।** उपमीयन्ते सदृशतया परिच्छिद्यन्ते यैस्तान्युपमानानि सादृश्यनिरूपकाणीत्यर्थः। सामान्य उपमानोपमेयसाधारणधर्मः, तमुक्तवन्तः शब्दाः सामान्यवचनाः। बाहुलकः कर्तरि ल्युट्। पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये ये पर्यवस्यन्ति ते सामान्यवचना इति यावत्। तथा च सादृश्यनिरूपकशब्दापरपर्याया उपमानशब्दा उपमानोपमेयसाधारणधर्मविशिष्टवाचिभिः समानाधिकरणैः समस्यन्ते, स तत्पुरुष इत्यर्थः। **घन इव श्यामो घनश्याम इति।** नन्विह घन इव श्याम इति विग्रहे घनशब्दस्य श्यामशब्दस्य चैकार्थवृत्तित्वलक्षणसामानाधिकरण्याभावात् कथमिह समासः, इवशब्दापेक्षत्वेनासामर्थ्याच्चेत्यत आह—**इह पूर्वपदमिति।** एवं च घनशब्दो लक्षणया घनसदृशे रामे वर्तते, श्यामशब्दोऽपि रामे वर्तत इति सामानाधिकरण्यम्। अत एव मृगीव चपला मृगचपला इत्यत्र 'पुंवत्कर्मधारय—' इति पुंवत्त्वं सिध्यति। घनशब्दस्य भूतपूर्वगत्योपमानपरत्वं निर्वाह्यम्। तथा च 'घनसदृशश्यामः' इति बोधः। सादृश्यं तद्भिन्नत्वे सति तद्गतधर्मवत्त्वम्। एवं च सादृश्यप्रतियोग्यनुयोगिनोस्साधारणधर्मवत्त्वं लब्धम्। स चेह साधारणधर्म उत्तरपदोपस्थाप्य एव गृह्यते, संनिहितत्वात्। तथा च घनगतश्यामत्वसदृशश्यामत्ववान् इति बोधपर्यवसानम्। ननु विशेषणसमासेन सिद्धे

तस्मात्पूर्वनिपातनियमार्थमिदं सूत्रमित्याशयेनाह—**पूर्वसूत्रापवाद इति। उपमानानि।** उपमीयते येन तदुपमानम्। उपपूर्वान्माङः करणे ल्युट्। प्रादिसमासः। उपपूर्वको माङ् सादृश्यवाचके परिच्छेदे रूढः। येन वस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थः। यथा गौरिव गवयः। इह हि गौः करणं सादृश्ये हेतुः, पुरुषः परिच्छेत्ता। स हि गौः सादृश्येन गवयं परिच्छिनत्ति। **सामान्यवचनैरिति।** समानो धर्मः सामान्यम्। चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्। उपमानोपमेयसाधारणो यो धर्मस्तद्विशिष्टवचनैरित्यर्थः। न तु साधारणधर्ममात्रवचनैरिति। एतच्च वचनग्रहणाल्लभ्यते। सामान्यमुक्तवन्तः सामान्यवचनाः। बाहुलकात्कर्तरि भूते ल्युट्। ये पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये पर्यवस्यन्ति ते तथोक्ताः। तच्च सामान्यविशिष्टमुपमानशब्दस्य संबन्धिशब्दत्वादाक्षिप्तमुपमेयमेव विज्ञायते। **लाक्षणिकमिति।** अत एव सामानाधिकरण्यान्मृगीव चपला मृगचपलेत्यादौ पुंवद्भावः। उत्तरपदोपस्थितश्यामत्वचपलत्वादिद्वारकमेवेह सादृश्यं गृह्यते, संनिधानात्। कथं तर्हि उपमानपरतेति चेत्,

प्रयुज्यते । पूर्वनिपातनियमार्थं सूत्रम् । ७३५ **उपमितं व्याघ्रादिभिः सामान्याप्रयोगे**। (२-१-५६) उपमेयं व्याघ्रादिभिः सह प्राग्वत्साधारणधर्मस्याप्रयोगे सति । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । पुरुषव्याघ्रः । नृसोमः । व्याघ्रादिराकृतिगणः । सामान्याप्रयोगे किम्–पुरुषो व्याघ्र इव शूरः । ७३६ **विशेषणं विशेष्येण बहुलम्** । (२-१-५७) भेदकं समानाधिकरणेन भेद्येन

किमर्थमिदं सूत्रमित्यत आह—**पूर्वनिपातेति** । अन्यथा उभयोरपि गुणवचनतया विशेषणविशेष्यभावे कामचारात् खञ्जकुब्जः कुब्जखञ्ज इतिवदनियमः स्यादिति भावः। **उपमितम्** । **प्राग्वदिति** । समानाधिकरणेऽस्समस्यते, स तत्पुरुष इत्यर्थः। अत्रोपमितस्य नित्यमुपमानाकाङ्क्षत्वादुपमानभूतव्याघ्रादिभिरित्यर्थसिद्धम् । ननु विशेषणसमासेनैव सिद्धे किमर्थमिदं सूत्रमित्यत आह—**विशेष्यस्येति** । उपमानोपमेयसमभिव्याहारे उपमानस्यैव विशेषणत्वात्पूर्वनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातनार्थमिदमित्यर्थः । **पुरुषव्याघ्र इति** । पुरुषो व्याघ्र इवेति विग्रहः । अत्र सादृश्योपपादकः शौर्यात्मकः साधारणधर्मः, स इह नोपात्त इति भवति समासः । **पुरुषो व्याघ्र इव शूर इति** । शौर्येण व्याघ्रसदृश इति यावत् । अत्र शौर्यस्योपमानोपमेयसाधारणधर्मस्य प्रयोगान्न समास इति भावः । 'भाष्याब्धिः क्वातिगम्भीरः' इति कैयटप्रयोगस्तु मयूरव्यंसकादित्वात्समाधेयः। भाष्यमेवाब्धिरिति रूपकं वा । न च पुरुषशब्दस्य शूरशब्दसापेक्षत्वादसामर्थ्यादेवात्र समासस्य न प्रवृत्तिः। अतः '–सामान्याप्रयोगे' इति व्यर्थमिति वाच्यम् , समस्यमानेष्वप्रधानस्यैव हि सापेक्षत्वं सामर्थ्यविघातकम्, न तु प्रधानस्य । तथा चात्र पुरुषस्य प्रधानतया तस्य शूरापेक्षत्वेऽपि अस्त्येव सामर्थ्यमिति समासप्रवृत्तेः, तन्निवृत्त्यर्थं सामान्याप्रयोग इति वचनम् । इदमेव प्रधानस्य सापेक्षत्वेऽपि न सामर्थ्यविघातकत्वमिति ज्ञापयति । तेन राजपुरुषः सुन्दर इत्यादौ समासः सिद्धो भवतीति भाष्ये स्पष्टम् ।

विशेषणं विशेष्येण बहुलम् । विशिष्यते अनेनेति विशेषणम् , इतरस्माद्व्यावर्तकम् । व्यावर्त्यं तु विशेष्यं भिन्नत्वेन ज्ञायमानम् । समानाधिकरणेनेत्यधिक-

भूतपूर्वगत्या शक्यार्थमादाय तत्परतेत्यवेहि । **पूर्वनिपातेति** । अन्यथाऽनियमः स्यात् खञ्जकुब्जवदिति भावः । किं च 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय–' इति सूत्रे प्रतिपदोक्तस्यास्यैवोपमानग्रहणेन ग्रहणार्थमपीदं सूत्रम् । अत एव मयूरव्यंसकादित्वात्समासे उपमानस्वरो न प्रवर्तेत इति सिद्धान्तः । **उपमितम्** । उपमेयमुपमितम् । भूतकालोऽत्र न विवक्षितः । तच्च संबन्धिशब्दत्वादुपमानमाक्षिपति । तथा चोपमानभूतैर्व्याघ्रादिभिरित्यर्थः । **पुरुषो व्याघ्र इव शूर इति** । तत्र हि शूरसापेक्षस्यापि

बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात् क्वचिन्नित्यम्, कृष्णसर्पः। क्वचिन्न, रामो जामदग्न्यः। ७३७ **पूर्वापरप्रथमचरमजघन्यसमान-**

तम्, तदाह—**भेदकमिति**। **प्राग्वदिति**। समस्यते स तत्पुरुष इत्यर्थः। **नीलमुत्पलं नीलोत्पलमिति**। नीलपदं तावदुत्पलमनीलादुत्पलाद्व्यावर्तयतीति विशेषणसमर्पकम्। तस्य उत्पलपदेन विशेष्यसमर्पकेण समासः। प्रथमानिर्दिष्टत्वाद्विशेषणस्य पूर्वनिपात इति भावः। न च उत्पलपदम् अनुत्पलान्नीलं व्यावर्तयतीत्युत्पलपदस्यापि विशेषणत्वं स्यादिति वाच्यम्, जातिशब्दो गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पक एव, न तु विशेषणसमर्पकः, स्वभावात्। यथा—नीलोत्पलम्, पाचकब्राह्मण इति। गुणशब्दयोः समभिव्याहारे विशेषणविशेष्यभावस्य न नियमः। यथा—खञ्जकुब्जः कुब्जखञ्ज इति। क्रियाशब्दयोरप्यनियमः। यथा—पाचकपाठकः पाठकपाचक इति। तथा गुणक्रियाशब्दयोरप्यनियमः। यथा—खञ्जपाचकः पाचकखञ्ज इति भाष्ये स्पष्टम्। तथा कैलासाद्रिः, मन्दराद्रिः, अयोध्यानगरी इत्यादौ संज्ञाशब्दा अपि विशेषणसमर्पका एव, स्वभावात्। सामान्यजातिविशेषजातिशब्दयोः समभिव्याहारे तु विशेषजातिरेव विशेषणम्, शिंशपावृक्ष इत्यादि ज्ञेयम्। ननु वाग्रहणेन सिद्धे बहुलग्रहणं किमर्थमित्यत आह—**बहुलग्रहणादिति**। **पूर्वापर**। पूर्वादयः समानाधिकरणेन समस्यन्त इत्यर्थः। विशेषणसमासे-

---

पुरुषस्य प्रधानत्वात् 'राजपुरुषः सुन्दरः' इतिवदत्रापि समासः स्यात्, स मा भूदिति 'सामान्याप्रयोगे' इत्युक्तमिति भावः। कथं तर्हि 'भाष्याब्धिः क्वातिगम्भीरः' इति कैयटः। सामान्यप्रयोगसत्त्वेनास्याप्राप्तेः। अत्र केचित् प्रमाद एवायमित्याहुः। इह गाम्भीर्येण सादृश्यं न विवक्षितम्, किं तु विततदुरवगाहत्वादिना। तस्य हि विततत्वादेरप्रयोगोऽस्त्येवेति निर्बाधः समास इति मनोरमायां स्थितम्। **विशेषणम्**। विशिष्यते येन तद्विशेषणम्, कर्तुः करणत्वविवक्षायां ल्युट्, तदाह—**भेदकमिति**। व्यावर्तकमित्यर्थः। विशेषणविशेष्ययोः स संबन्धिकतया अन्यतरोपादानमात्रेणेतराक्षेपसंभवे उभयोरुपादानं स्पष्टार्थमिति कैयटः। एतच्च 'कुत्सितानि कुत्सनैः' इत्यत्रापि तुल्यम्। हरदत्तस्त्वाह—समस्यमानपदद्वयजन्यबोधप्रकारकयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्परव्यभिचारस्तत्रैव समासो यथा स्यात्, नान्यत्रेत्येतदर्थमुभयोपादानम्। तथा च नीलोत्पलादौ समासो भवति, न तु 'तक्षकः सर्पः' इत्यादौ। न हि तक्षकत्वं सर्पत्वं व्यभिचरतीति। तन्मन्दम्। कैलासाद्रिः, मन्दराद्रिः, भावपदार्थः, तर्कविद्या, व्याकरणशास्त्रम्, भोजराजः, इत्यादिप्रयोगाणामसंगत्यापत्तेः। ननु विशेषणविशेष्यभावे कामचारात्पाचकपाठकादाविव नीलोत्पलादावप्यव्यवस्थितः पूर्वनिपातः स्यात्। इति चेदत्राहुः—

मध्यमध्यमवीराश्च। (२-१-५८) पूर्वनिपातनियमार्थमिदम्। पूर्ववैयाकरणः। अपराध्यापकः। 'अपरस्यार्धे पश्चभावो वक्तव्यः' (वा १२१३) अपरश्चासावर्धश्च पश्चार्धः। कथम् 'एकवीरः' इति। 'पूर्वकालैक-' (सू ७२१) इति बाधित्वा परत्वादनेन समासे 'वीरैकः' इति हि स्यात्। बहुलग्रहणात्सविष्यति।

७३८ श्रेण्यादयः कृतादिभिः। (२-१-५९) 'श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम्' (वा १२१६)। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। ७३९ क्तेन

नैव सिद्धे किमर्थमिदमित्यत आह—**पूर्वनिपातेति।** **अपराध्यापक इति।** बहुलग्रहणानुवृत्त्या पाचकादिक्रियाशब्दैः पूर्वादीनामेषां न समास इति समर्थसूत्रे भाष्ये स्थितम्। ततश्च 'अपराध्यापकः' इत्युदाहरणमुपेक्ष्यम्। अपरमीमांसक इत्युदाहरणमुचितम्। **अपरस्यार्धे इति।** 'पश्चात्' इति सूत्रभाष्ये इदं वार्तिकं स्थितम्। प्रथमवैयाकरणः, चरमवैयाकरणः, 'मध्यान्मः' मध्यमवैयाकरणः, वीरवैयाकरणः। आक्षिपति—**कथमेकवीर इति।** हि यतः, अनेन प्रकृतसूत्रेण, वीरशब्दस्यैकशब्देन समासे सति वीरशब्दस्य पूर्वनिपाते सति वीरैक इति स्यात्। अतः 'एकवीरः' इति कथमित्यन्वयः। ननु 'पूर्वकालैक-' इति सूत्रेणैकशब्दस्य वीरशब्देन समासे सति 'एकवीरः' इति निर्बाधमित्यत आह—**पूर्वकालैकेति बाधित्वा परत्वादिति।** परिहरति—**बहुलग्रहणादिति।** बहुलग्रहणानुवृत्तेरस्य सूत्रस्याप्रवृत्तौ पूर्वकालेत्येव समासो भवतीत्यर्थः। **श्रेण्यादयः।** श्रेण्यादयः कृतादिभिः समानाधिकरणैः समस्यन्ते, स तत्पुरुष इत्यर्थः। **श्रेण्यादिष्विति।** श्रेण्यादिषु समासविधौ च्व्यर्थवचनम्-च्विप्रत्ययार्थेऽभूततद्भावे गम्ये श्रेण्यादीनां समासो वक्तव्य इत्यर्थः। **अश्रेणय इति।** शिल्पेन पण्येन वा जीविनां समूहाः श्रेणयः। पूर्वं शिल्पेन पण्येन वा

जातिशब्दस्य गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पकत्वैव। तेन नीलोत्पलं पाचकब्राह्मण इति व्यवस्थित एव प्रयोगः। गुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोश्चानियम एव। खञ्जकुब्जः कुब्जखञ्जः। पाचकपाठकः पाठकपाचकः। खञ्जपाचकः पाचकखञ्ज इति। अत्र मूलमुपसर्जनमिति महासंज्ञा। अप्रधानं ह्युपसर्जनम्। गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति। **अपरस्यार्धे इति।** एतच्च 'पश्चात्' इति सूत्रे भाष्ये स्थितम्। **बहुलग्रहणादिति।** एकेषु मुख्येषु वीरयते पराक्रमते इति वा बोध्यम्। **श्रेण्यादयः।** आद्य आदिशब्दो व्यवस्थावाची। द्वितीयस्तु प्रकारवाची। 'श्रेण्यादयः पठ्यन्ते, कृतादिराकृतिगणः' इति भाष्यात्। श्रेणि, एक, पूग, मुकुन्द, राशि, विशिख, निचय, निधनादिः श्रेण्यादिः। कृत, मित, मत, भूतादिः कृतादिः यदा तु सिद्धा एव श्रेणयः सम्यक् कृतास्तदा समासो नेष्यत इत्याशयेनाह—**अश्रे-**

नञ्विशिष्टेनानञ् । (२-१-६०) नञ्विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते । कृतं च तदकृतं च कृताकृतम् । 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्' (वा १३१०) । शाकप्रियः पार्थिवः शाकपार्थिवः । देवब्राह्मणः ।

७४० **सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः** । (२-१-६१) सद्वैद्यः । वध्य-

जीवितुमसमर्था इदानीं तेन जीवितुं समर्थाः कृता इत्यर्थे समासे सति 'श्रेणिकृताः' इति भवतीत्यर्थः । श्रेणिशब्दो ह्रस्वान्तः भाष्ये तथैवोदाहरणात् । यदा तु सिद्धा एव श्रेण्यः परिष्कृतास्तदा तु न समासः, च्व्यर्थाभावात् । च्विप्रत्ययान्तस्य तु परत्वात् 'कुगति–' इति नित्यसमासः । ततः 'च्वौ च' इति श्रेणिशब्दस्य दीर्घः । **क्तेन नञ्विशिष्टेनानञ्** । नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह नञ्रहितं क्तान्तं समस्यते, स तत्पुरुष इत्यर्थः । **कृतं च तदिति** । एकदेशस्य करणात्कृतम्, एकदेशान्तरस्याकरणात्तदेवाकृतम् । पूर्वनिपातनियमार्थम् । सिद्धं च तदभुक्तं चेत्यत्र तु नायं समासः, विशिष्टशब्दो ह्यत्राधिकवाची । यथा देवदत्ताद्यज्ञदत्तः स्वाध्यायेन विशिष्ट इत्युक्ते अधिक इति गम्यते । नञैव विशिष्टं नञ्मात्राधिकेन क्तान्तेनेति लभ्यते । एवं च समानप्रकृतिकत्वं क्तान्तयोः पर्यवसन्नमिति बोध्यम् । **शाकपार्थिवादीनामिति** । 'वर्णो वर्णेन' इति सूत्रभाष्ये इदं वार्तिकं पठितम् । **शाकप्रियः पार्थिवः शाकपार्थिव इति** । शाकः प्रियो यस्य स शाकप्रियः । 'वा प्रियस्य' इति प्रियशब्दस्य परनिपातः शाकप्रियश्चासौ पार्थिवश्च इति विग्रहे बहुव्रीहिगर्भो विशेषणसमासः । तत्र पूर्वखण्डे बहुव्रीहौ उत्तरपदस्य प्रियशब्दस्य लोपः । **देवब्राह्मण इति** । देवाः प्रिया यस्य स देवप्रियः, स चासौ ब्राह्मणश्चेति विग्रहः । पूर्ववदुत्तरपदलोपः । देवपूजको ब्राह्मण इति वा विग्रहः । **सन्महत्परम** । समानाधिकरणैः समस्यन्ते, स तत्पुरुष इति शेषः । **सद्वैद्य इति** । सन् वैद्य इति विग्रहः । चिकित्सा-

ण्यः **श्रेण्य इति** । एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणिः । च्व्यन्तानां तु 'कुगति–' इति नित्यसमासः, परत्वात् । श्रेणीकृतम् । इह तु 'च्वौ च' इति दीर्घः । **क्तेन** । विशिष्टशब्दोऽवधारणार्थः । नञ्मात्राधिकेन नञ्रहितं समस्यत इति सूत्रार्थः । तेनेह न–सिद्धं चाभुक्तं च । नुडिडधिकेनापीति वाच्यम् । अशितं चानशितं च अशितानशितम् । क्लिष्टाक्लिशितम् । 'क्लिशः क्त्वानिष्ठयोः' इति वेट् । **कृताकृतमिति** । एकदेशकरणात्कृतम् । एकदेशान्तरस्याकरणात्तदेवाकृतम् । **शाकपार्थिव इति** । पृथिव्या ईश्वरः पार्थिवः । 'तस्येश्वरः' इत्यण् । शाकप्रिय इति बहुव्रीहिः, तस्य पार्थिवशब्देन समासे कृते पूर्वसमासे यदुत्तरपदं प्रिय इति तस्य लोपः । तथा देवब्राह्मण इत्यत्र देवस्य पूजको देवपूजक इति पूर्वस्मिन् षष्ठीसमासे

मात्वेन महत आकारः । महावैयाकरणः । पूज्यमानैः किम्-उत्कृष्टो गौः । पङ्काद् उद्धृत इत्यर्थः । वृन्दारकनागकुञ्जरैः पूज्यमानम् । (२-१-६२) गोवृन्दारकः । व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनम् ।
७४२ कतरकतमौ जातिपरिप्रश्ने । (२-१-६३) कतरकठः । कतमकलापः ।

शास्त्रकूलंकषज्ञानत्वं सत्त्वम् । तेन वैद्यस्य पूजा गम्यते । पूर्वनिपातनियमार्थं सूत्रम् । **वक्ष्यमाणेनेति** । महांश्चासौ वैयाकरणश्चेति विग्रहे अनेन समासे सति महच्छब्दस्य 'आन्महतः–' इति वक्ष्यमाणेन आकारे अन्तादेशे सवर्णदीर्घे महावैयाकरण इति भवतीत्यर्थः । ननु उत्कृष्टो गौरित्यत्रोत्कृष्टशब्दस्य अतिशयितवाचितया तेन गोः पूजावगमात् कथमिह समासो न भवतीत्यत आह—**पङ्कादुद्धृत इत्यर्थ इति** । उत्पूर्वकः कृषधातुरिहोद्धरणार्थक इति भावः । परमवैद्यः, उत्तमवैद्यः, उत्कृष्टवैद्यः । गुणक्रियाशब्दैः समासे सदादीनां पूर्वनिपातनियमार्थमिदं सूत्रम् । **वृन्दारकनागकुञ्जरैः** । समानाधिकरणैः समस्यत इति शेषः । विशेषणसमासेनैव सिद्धे विशेष्यस्य पूर्वनिपातनियमार्थं सूत्रम् । **गोवृन्दारक इति** । वृन्दारकशब्दो देवतावाची । 'अमरा निर्जरा देवाः' इत्युपक्रम्य 'वृन्दारका दैवतानि' इत्यमरः । गौः वृन्दारक इवेति विग्रहः । गौः नाग इव गोनागः । गौः कुञ्जर इव गोकुञ्जरः । नागशब्दः कुञ्जरशब्दश्च गजवाची । अत्र गोर्वृन्दारकादितुल्यत्वात् श्रैष्ठ्यं गम्यत इति पूज्यमानता । ननु व्याघ्रादेराकृतिगणत्वाद् 'उपमितं व्याघ्रादिभिः–' इत्येव सिद्धे किमर्थमिदमित्यत आह—**व्याघ्रादेरिति । सामान्येति** । गोकुञ्जरः श्रेष्ठ इत्यादाविति भावः । **कतरकतमौ** । जातिपारिप्रश्ने गम्ये कतरकतमौ समानाधिकरणेन समस्येते इत्यर्थः । **कतरकठ इति** । अनयोः कः कठ इत्यर्थः । 'किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' कठेन प्रोक्तमधीते कठः । वैशम्पायनान्तेवासित्वात् प्रोक्ते णिनिः । 'कठचरकाल्लुक्' इति तस्य लुक् । ततः 'तदधीते–' इत्यणः 'प्रोक्ताल्लुक्' इति लुक् । **कतमकलाप इति** । एषां कः कलाप इति विग्रहः । कलापिना प्रोक्तमधीते कलापः । 'कलापिनोऽण्' 'सब्रह्मचारि' इति टिलोपः । 'वा बहूनां जातिपरिप्रश्ने डतमच्' । ननु घटत्वादिवत् कठशाखाध्येतृत्वादिकं न जातिः । 'आकृतिग्रहणा जातिः' इति लक्षणस्य 'लिङ्गानां च न सर्वभाक्', 'सकृदाख्यातनिर्ग्राह्या' इति लक्षणस्य च तत्रा-

---

यदुत्तरपदं पूजक इति तस्य लोपो ज्ञेयः । **सन्महत्** । गुणक्रियाशब्दैः सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रम् । **कतरकतमौ** । जातिपरिप्रश्ने किम् । कतरो देवदत्तः । 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति व्युत्पादितकतमशब्दसाहचर्यात्तादृशस्यैव कतरशब्दस्यापि ग्रहणे सिद्धे जातिपरिप्रश्नग्रहणं ज्ञापयति 'कतमशब्दोऽर्था-

'गोत्रं च चरणैः सह' इति जातित्वम्। **७४३ किं क्षेपे। (२-१-६४)** कुत्सितो राजा किंराजा, यो न रक्षति। **७४४ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। (२-१-६५)** **७४५ तत्पुरुषः समानाधिकरणः कर्मधारयः। (१-२-४२)** **७४६ पुंवत्कर्मधारयजातीयदेशीयेषु। (६-३-४२)** कर्मधारये जातीयदेशीययोश्च

प्रवृत्तेरित्यत आह--**गोत्रं चेति**। अत्र कतमशब्दस्य जातिपरिप्रश्न एव व्युत्पादनात् कतरार्थमेव जातिपरिप्रश्नग्रहणम्। एवं च अनयोः कतरो देवदत्त इत्यत्र न भवति समासः। एषां कतमो देवदत्त इति तु नास्त्येव। जातिपरिप्रश्न एव डतमचो विधानात्। वस्तुतस्तु डतरडतमविधौ द्वयोरिति बहूनामिति जातिपरिप्रश्ने इति प्रत्याख्यातं भाष्ये। एवं च कतम एषां देवदत्त इत्यप्यस्ति। तत्र समासाभावाय जातिपरिप्रश्नग्रहणम् इति शब्देन्दुशेखरे स्थितम्। **किं क्षेपे**। क्षेपो निन्दा। तत्र गम्ये किमित्यव्ययं समानाधिकरणेन समस्यते, स तत्पुरुष इत्यर्थः। **कुत्सितो राजेति**। अस्वपदविग्रहोऽयम्। किम्पदस्थाने कुत्सितपदमिति ज्ञेयम्, वाक्येन निन्दानवगमेन स्वपदलौकिकविग्रहासम्भवात्। **किंराजेति**। 'राजाहस्सखिभ्यः-' इति टच् तु न, 'किमः क्षेपे' इति निषेधात्। ननु राज्ञो बहुसम्पत्तिशालिनः कथं कुत्सितत्वमित्यत आह--**यो न रक्षतीति**। स किंराजेत्यन्वयः।

पोटायुवति। पोटादिभिः समानाधिकरणैर्जातिवाचकं समस्यते, स तत्पुरुष इत्यर्थः। अथ कर्मधारयवार्थं वक्ष्यन् कर्मधारयसंज्ञामाह--**तत्पुरुषः समान**। समानम् एकमधिकरणं वाच्यं ययोः पदयोः, ते समानाधिकरणे पदे, ते अस्य स्त इति समानाधिकरणः, मत्वर्थीयः अर्शआद्यच्। समानाधिकरणानेकपदावयवकस्तत्पुरुषः कर्मधारसंज्ञको भवतीत्यर्थः। तत्पुरुषाधिकारे इयं संज्ञा न कृता, तथा सत्येकसंज्ञाधिकारात् कर्मधारयसंज्ञया तत्पुरुषसंज्ञा बाध्येतेत्याहुः। **पुंवत्कर्मधारय**। स्त्रियाः पुंवद्भाषितपुंस्कादनूङिति वर्तते। एकापि सप्तमी विषयभेदाद्भिद्यते। कर्मधारयांशे अधिकरणसप्तमी। जातीयदेशीयविषये परसप्तमी। तदाह--**कर्मधारय इति**। तथाभूतमित्यनन्तरं स्त्रीवाचकमिति शेषः। भाषितपुंस्कादनूङित्येतत् 'स्त्रियाः पुंवत्-' इति सूत्रे स्फुटीकरिष्यते। ननु कर्मधारये 'स्त्रियाः पुंवत्-' इत्यनेन सिद्धं पुंवत्त्वम्,

---

न्तरेऽपि साधुः' इति। तथा च प्रत्युदाहृतं प्राचीनवृत्तिषु 'कतरो भवतोर्देवदत्तः। कतमो भवतां देवदत्तः' इति। **किं क्षेपे। किंराजेति**। 'किमः क्षेपे' इति समासान्तनिषेधः। क्षेपे किम्, को राजा पाटलिपुत्रे ?। एवं 'किंसखा यो द्रुह्यति' 'किंगौः यो न वहति' इत्यप्युदाहरणं बोध्यम्। **तत्पुरुषः**। समानाधिकरणशब्दः अर्शआद्य-

परतो भाषितपुंस्कात्पर ऊङभावो यस्मिंस्तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया। तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री, दत्तभार्या, पञ्चमभार्या, स्रौघ्नभार्या, सुकेशभार्या, ब्राह्मणभार्या। एवं पाचक-

---

जातीयदेशीययोस्तु 'तसिलादिष्वाकृत्वसुचः' इत्यनेन सिद्धमित्यत आह—**पूरणीप्रियादिष्वप्राप्त इति**। अपूरणीप्रियादिष्विति पर्युदासादिति भावः। **महानवमीति**। महती चासौ नवमी चेति विग्रहः। 'सन्महत्–' इत्यादिना समासः। नवानां पूरणी नवमी। 'तस्य पूरणे डट्' 'नान्तादसंख्यादेर्मट्'। टित्त्वाद् ङीप्। अत्र नवमी शब्दस्य पूरणप्रत्ययान्तत्वात्तस्मिन् परे 'स्त्रियाः पुंवत्–' इति पुंवत्त्वमप्राप्तमनेन विधीयते। कृते पुंवत्त्वे 'आन्महतः–' इत्यात्त्वमिति भावः। **कृष्णचतुर्दशीति**। चतुर्दशानां पूरणी चतुर्दशी डट्। 'नस्तद्धिते' इति टिलोपः। टित्त्वान्ङीप्। कृष्णा चासौ चतुर्दशी चेति विग्रहः। **महाप्रियेति**। महती चासौ प्रिया चेति कर्मधारयः। अत्रापि प्रियादिपर्युदासादप्राप्तमनेन विधीयत इति भावः। 'पुंवत्कर्मधारय–' इत्यस्य प्रयोजनान्तरमाह—**तथा कोपधादेरिति**। 'न कोपधायाः' 'संज्ञापूरण्योश्च' 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' 'स्वाङ्गाच्चेतः' 'जातेश्च' इति पञ्चसूत्र्या प्रतिषिद्ध इत्यर्थः। **कर्मधारयादाविति**। कर्मधारये जातीयदेशीययोश्च परयोरित्यर्थः। **पाचकस्त्रीति**। पाचिका चासौ स्त्री चेति कर्मधारयः। अत्र 'न कोपधायाः' इति पुंवत्त्वस्य प्रतिषेधः प्राप्तः। **दत्तभार्या, पञ्चमभार्येति**। दत्ता चासौ भार्या चेति, पञ्चमी चासौ भार्या चेति च कर्मधारयः। अत्र 'संज्ञापूरण्योश्च' इति प्रतिषेधः प्राप्तः। **स्रौघ्नभार्येति**। स्रौघ्नी चासौ भार्या चेति कर्मधारयः। अत्र 'वृद्धिनिमित्तस्य च–' इति प्रतिषेधः प्राप्तः। **सुकेशभार्येति**। सुकेशी चासौ भार्या चेति कर्मधारयः। अत्र 'स्वाङ्गाच्च' इति निषेधः प्राप्तः। **ब्राह्मणभार्येति**। ब्राह्मणी चासौ भार्या चेति

जन्तः। समानाधिकरणपदक इत्यर्थः। **भाषितपुंस्कादित्यादि**। एतच्च 'स्त्रियाः पुंवत्–' इति सूत्रे स्फुटीकरिष्यते। ननु तेनैव कर्मधारयेपि सिद्धम्, जातीयदेशीययोस्तु 'तसिलादिषु–' इति सिद्धम्, तत्किमनेन सूत्रेणेत्यत आह—**पूरणीप्रियादिष्विति। तथेति च। महानवमीति**। नवानां पूरणी। 'तस्य पूरणे डट्' 'नान्तादसंख्यादेर्मट्' टित्त्वान्ङीप्। महती चासौ नवमी चेति विग्रहः। पुंवद्भावे कृते वक्ष्यमाणेन महत आकारः। **कोपधादेरिति**। 'न कोपधायाः' 'संज्ञापूरण्योश्च' 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' 'स्वाङ्गाच्चेतः' 'जातेश्च' इति पञ्चसूत्र्या प्रतिषिद्ध इत्यर्थः। क्रमेणोदाहरति—**पाचकस्त्रीति**। जातीयदेशीययोरपि प्रतिप्रसवमुदाहरति—

जातीया पाचकदेशीया इत्यादि । इभपोटा । पोटा स्त्रीपुंसलक्षणा । इभयुवतिः । अग्निस्तोकः । उदश्वित्कतिपयम् । गृष्टिः सकृत्प्रसूता, गोगृष्टिः । धेनुर्नवप्रसूता, गोधेनुः । वशा वन्ध्या गोवशा । वेहद्गर्भघातिनी गोवेहत् । बष्कयण्य-तरुणवत्सा, गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः ।

कर्मधारयः । अत्र 'जातेश्च' इति निषेधः प्राप्तः । अथ जातीयदेशीययोः प्रतिप्रसव-मुदाहरति—**एवं पाचकजातीया पाचकदेशीयेति** । 'प्रकारवचने-' इति जाती-यर्, 'ईषदसमाप्तौ-' इति देशीयर् । उभयत्रापि 'तसिलादिषु-' इति पुंवत्त्वस्य 'न कोपधायाः' इति निषेधः प्राप्तः । **इत्यादीति** । दत्तजातीया, दत्तदेशीया, पञ्चम-जातीया, पञ्चमदेशीया, सौघ्नजातीया, सौघ्नदेशीया, सुकेशजातीया, सुकेशदेशीया, ब्राह्मणजातीया, ब्राह्मणदेशीया । तदेवं 'पुंवत्कर्मधारय-' इति सूत्रं निरूप्य 'पोटायु-वति-' इति सूत्रस्य कर्मणोदाहरणान्याह—**इभपोटेति** । पोटा चासौ इभी चेति कर्मधारयः । इभीशब्दस्य पुंवत्त्वम् । जातेः पूर्वनिपातार्थमिदं सूत्रम् । **पोटा स्त्री-पुंसलक्षणा इति** । कोशवाक्यमिदम् । स्त्रीपुंसयोर्लक्षणानि चिह्नानि यस्या इति बहुव्रीहिः । **इभयुवतिरिति** । युवतिश्चासौ इभी चेति विग्रहः । कर्मधारये पुंवत्त्वम् । **अग्निस्तोक इति** । स्तोकः अल्पः, स चासौ अग्निश्चेति विग्रहः । **उदश्वित्क-तिपयमिति** । 'तक्रं ह्युदश्वित्' इत्यमरः । कतिपयं च तदुदश्विच्चेति कर्मधारयः । **गृष्टिः सकृत्प्रसूतेति** । कोशवाक्यमिदम् । **गोगृष्टिरिति** । गृष्टिश्चासौ गौश्चेति कर्मधारयः । **धेनुर्नवप्रसूतेति** । कोशवाक्यमिदम् । **गोधेनुरिति** । धेनुश्चासौ गौश्चेति विग्रहः । **वशा वन्ध्येति** । कोशवाक्यमिदम् । **गोवशेति** । वशा चासौ गौश्चेति । विग्रहः । **वेहद्गर्भघातिनीति** । कोशवाक्यमिदम् । **गोवेहदिति** । वेहच्चासौ गौश्चेति विग्रहः । **बष्कयण्यतरुणवत्सेति** । 'चिरसूता बष्कयणी' इत्य-मरः । तरुणवत्सेत्यपपाठः । **गोबष्कयणीति** । बष्कयणी चासौ गौश्चेति विग्रहः । **कठप्रवक्तेति** । प्रवक्ता अध्यापकः, स चासौ कठश्चेति विग्रहः । **कठाध्यापक इति** । अध्यापकश्चासौ कठश्चेति विग्रहः । **कठधूर्त इति** । धूर्तश्चासौ कठश्चेति

एवमिति । पाचिकाप्रकारवती पाचकजातीया । 'प्रकारवचने जातीयर्' । **पाचक-देशीयेति** । 'ईषदसमाप्तौ-' इति देशीयर् । उभयत्र 'तसिलादिषु-' इति पुंवद्भावस्य 'न कोपधायाः' इति निषेधः प्राप्तः, पटुजातीया पटुदेशीयेत्यादौ तस्य चरितार्थ-त्वात् । **इत्यादीति** । आदिपदाद् दत्तजातीया, पञ्चमजातीया, सौघ्नजातीया, सुकेशजातीया, ब्राह्मणजातीया । एवं दत्तदेशीयेत्याद्युदाहार्यम् । **स्त्रीपुंसलक्षणेति** । स्तनश्मश्र्वादियुक्ता स्त्रीत्यर्थः । **उदश्विदिति** । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु

७४७ प्रशंसावचनैश्च। (२-१-६६) एतैः सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रकाण्डम्। गवोद्धः। गोतल्लजः। प्रशस्ता गौरित्यर्थः। मतल्लिकादयो नियतलिङ्गाः, न तु विशेष्यनिघ्नाः। जातिः किम्—कुमारी मतल्लिका। **७४८ युवा खलतिपलितवलिनजरतीभिः।** (२-१-६७)

विग्रहः। 'धूर्तोऽक्षदेवी' इत्यमरः। विट इत्यन्ये। न च 'कुत्सितानि कुत्सनैः' इत्यनेन सिद्धिः शङ्क्या, प्रवृत्तिनिमित्तकुत्सायामेव तत्प्रवृत्तेः। न हि कठत्वं कुत्सितम्। **प्रशंसावचनैश्च। एतैरिति**। रूढया प्रशंसावाचकैरित्यर्थः। **जातिरिति**। 'पोटायुवति-' इत्यतस्तदनुवृत्तेरिति भावः। **प्राग्वदिति**। समानाधिकरणैः समस्यते, स तत्पुरुष इत्यर्थः। जातेः पूर्वनिपातनियमार्थं सूत्रम्। **गोमतल्लिकेति**। मतल्लिका चासौ गौश्चेति विग्रहः। **गोमचर्चिकेति**। मचर्चिका चासौ गौश्चेति विग्रहः। **गोप्रकाण्डमिति**। प्रकाण्डं चासौ गौश्चेति विग्रहः। **गवोद्ध इति**। उद्धश्चासौ गौश्चेति विग्रहः। 'अवङ् स्फोटायनस्य' 'आद् गुणः'। **गोतल्लज इति**। तल्लजश्चासौ गौश्चेति विग्रहः। सर्वत्र परवल्लिङ्गता। मतल्लिकादिशब्दानामप्रसिद्धत्वाद्व्याचष्टे—**प्रशस्ता गौरित्यर्थ इति**। गोशब्दस्य स्त्रीलिङ्गत्वाभिप्रायात्प्रशस्तेति स्त्रीलिङ्गनिर्देशः। गोशब्दस्य पुंल्लिङ्गत्वे तु प्रशस्त इति पाठ्यम्। ननु गोशब्दस्य पुंल्लिङ्गत्वे मतल्लिकामचर्चिकाप्रकाण्डशब्दानामपि विशेष्यनिघ्नत्वात् पुंल्लिङ्गतापत्तिः। गोशब्दस्य स्त्रीलिङ्गत्वे तु प्रकाण्डोद्धतल्लजानामपि स्त्रीलिङ्गतापत्तिश्चेत्यत आह—**मतल्लिकादय इति**। 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि' इत्यमरः। **कुमारी मतल्लिकेति**। अवस्थाविशेषात्मकवयोविशेषवाचित्वान्न जातिवाची कुमारीशब्द इति न समासः। समासे तु 'पुंवत्कर्मधारय-' इति पुंवत्त्वं स्यादिति भावः। **युवा खलति**। युवन्शब्दः खलत्यादिभिः समानाधिकरणैः समस्यते, स तत्पुरुष इत्यर्थः। विशेषणसमासेन सिद्धे किमर्थमिदमित्यत आह—**पूर्वेति**। युवन्शब्दस्य खलत्यादिशब्दानां च गुणवाचित्वाद्विशेषणत्वे कामचारात्पूर्वनिपातस्यानियमे प्राप्ते तन्नियमार्थमिदं सूत्रमित्यर्थः। खलतिः केशहीनशिराः। 'पलितं जरसा शौक्ल्यम्' 'वलिनो वलिभः समौ' इत्यमरः। **युवा खलतिः युवखलतिरिति**।

निर्जलम्' इत्यमरः। **कठधूर्त इति**। नात्र कठत्वं कुत्स्यते, अतः 'कुत्सितानि कुत्सनैः' इति गतार्थता न शङ्क्या, प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्रवृत्तेः। 'जनयति कुमुदभ्रान्तिं धूर्तबको बालमत्स्यानाम्' इत्यत्र धूर्तबक इत्यसाधुरेव। **प्रशंसावचनैश्च।** वचनग्रहणं रूढिशब्दपरिग्रहार्थम्। तेन ये यौगिकाः प्रशस्तशोभनरमणीयादयः, ये च विशेषवचनाः शुचिमृद्वादयः, ये तु गौण्या वृत्त्या प्रशंसां गमयन्ति 'सिंहो माणवकः'

पूर्वनिपातनियमार्थं सूत्रम्। लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते। युवा खलतिर्युवखलतिः। युवतिः खलती युवखलती। युवजरती। युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात्सामानाधिकरण्यम्। ७४९ कृत्यतुल्याख्या अजात्या। (२-१-६८) भोज्योष्णम्। तुल्यश्वेतः। सदृशश्वेतः। अजात्या किम्-भोज्य ओदनः। प्रतिषेधसामर्थ्याद्विशेषणसमासोऽपि न। ७५० वर्णो

अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः। ननु युवेति पुँल्लिङ्गनिर्देशात् कथं युवतिशब्दस्य समास इत्यत आह--**लिङ्गविशिष्टेति**। **युवतिः खलतिः युवखलतिरिति**। 'पुंवत्कर्मधारय-' इति पुंवत्त्वम्। **युवजरतीति**। जरती वृद्धा। युवतिश्चासौ जरती चेति विग्रहः। 'पुंवत्कर्मधारय-' इति पुंवत्त्वम्। ननु युवतिः कथं जरती स्यादित्यत आह---**युवत्यामेवेति**। **कृत्यतुल्याख्या**। कृत्यप्रत्ययान्ताः तुल्यवाचकाश्च जातिभिन्नवाचकेन समानाधिकरणेन समस्यन्ते स तत्पुरुष इत्यर्थः। **भोज्योष्णमिति**। भोज्यं च तदुष्णं चेति विग्रहः। 'ऋहलोर्ण्यत्' इति ण्यत्। अर्हे कृत्यप्रत्ययः। भोज्योष्णशब्दयोः क्रियागुणशब्दत्वात् विशेषणत्वे कामचारादनियतपूर्वनिपाते प्राप्ते नियमार्थमिदम्। **तुल्यश्वेत इति**। तुल्यश्चासौ श्वेतश्चेति विग्रहः। उभयोर्गुणवचनतया विशेषणत्वानियमेऽपि तुल्यशब्दस्यैव पूर्वनिपातः। आख्याग्रहणस्य प्रयोजनमाह---**सदृशश्वेत इति**। सदृशशब्दस्य तुल्यपर्यायत्वादिति भावः। **भोज्य ओदन इति**। अत्र ओदनशब्दस्य जातिवाचित्वात्तेनायं समासो न भवतीत्यर्थः। नन्वेतत्समासाभावेऽपि विशेषणसमासो दुर्वार इत्यत आह--**प्रतिषेधेति**। भोज्यशब्दपूर्वनिपातस्योभयत्राप्यविशिष्टतया 'अजात्या' इति पर्युदा-

इत्यादयस्ते सर्वे व्युदस्यन्ते। **गवोद्ध इति**। 'अवङ् स्फोटायनस्य' इत्यवङि 'आद् गुणः'। 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि' इत्यमरः। 'प्रशंसावचनगोटायुवति-' इत्येकयोगसंभवे पृथग्योगकरणं चिन्त्यफलम्। **युवखलतीति**। 'इदिकारादक्तिनः' इति ङीष्। 'पुंवत्कर्मधारय-' इति युवतिशब्दस्य पुंवद्भावः। **जरतीति**। 'जीर्यतेरतृन्', 'उगितश्च' इति ङीप्। एवं युवपलितः, युववलिन इत्युदाहार्यम्। वलिनशब्दः पामादिः। **कृत्यतुल्याख्या**। तुल्यमहान् सदृशमहानित्यादौ तु परत्वादनेन 'सन्महत्-' इति बाध्यते। 'तस्य सत्कुल्यशालिनः' इति भट्टिप्रयोगे तु 'सतां कुल्यं सत्कुल्यम्' इति षष्ठीसमासो बोध्यः। एवं 'परमपूज्यः' इत्यादिष्वपि। **वर्णो**। समानाधिकरणेन वर्णवाचिना वर्णवाचि समस्यत इत्यर्थः। 'विशेषणं विशेष्येण-' इत्यनेनैव सिद्धे पृथग्विधानं 'वर्णो वर्णेष्वनेते' इति

१ क्वचित्तु '-भयथा' इति पाठः।

वर्णेन। (२-१-६९) समानाधिकरणेन सह प्राग्वत्। कृष्णसारङ्गः। ७५१ **कडाराः कर्मधारये** (२-२-३८) कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः। कडारजैमिनिः। जैमिनिकडारः। ७५२ **कुमारः श्रमणादिभिः।** (२-१-७०) कुमारी श्रमणा कुमारश्रमणा। इह गणे श्रमणा प्रव्रजिता

सवैयर्थ्यादिति भावः। **वर्णो।** शेषपूरणेन सूत्रं व्याचष्टे—**समानाधिकरणेनेति।** वर्णवाचिना समानाधिकरणेन वर्णवाची समस्यते, स तत्पुरुष इत्यर्थः। **कृष्णसारङ्ग इति।** सारङ्गश्चित्रवर्णवान्। कृष्णशब्दः कृष्णावयवके लाक्षणिक इति सामानाधिकरण्यम्। कृष्णश्चासौ सारङ्गश्चेति विग्रहः। विशेषणसमासेन सिद्धे इदं प्रपञ्चार्थमेव। यत्तु 'वर्णो वर्णेष्वनेते' इति स्वरविधौ प्रतिपदोक्तत्वादस्यैव ग्रहणार्थमिदम्। तेन सारङ्गस्यावयवः कृष्णः सारङ्गकृष्ण इत्यत्र 'वर्णो वर्णेषु—' इति स्वरो नेति, तच्चिन्त्यम्, कर्मधारयस्वरप्रकरणे 'वर्णो वर्णेष्वनेते' इति सूत्रस्य पाठेनैव सिद्धेरिति दिक्। **कडाराः कर्मधारये।** 'उपसर्जनं पूर्वम्' इत्यतः पूर्वमित्यनुवर्तते। कडारा इति बहुवचननिर्देशात्तदादिग्रहणम्, तदाह—**कडारादय इति।** 'उपसर्जनं पूर्वम्' इति नित्ये प्राप्ते विकल्पोऽयम्। **कडारजैमिनिरिति।** कडारश्चासौ जैमिनिश्चेति विग्रहः। **कुमारः श्रमणादिभिः।** कुमारशब्दः श्रमणादिभिः समानाधिकरणैः समस्यते, स तत्पुरुष इत्यर्थः। **कुमारी श्रमणा कुमारश्रमणेति।** 'पुंवत्कर्मधारय—' इति पुंवत्त्वम्। श्रमणा परित्यक्तसर्वाङ्गा। ननु सूत्रे कुमारशब्दस्य पुँल्लिङ्गस्यैव पाठात् कथमिह स्त्रीलिङ्गस्योदाहरणमित्यत आह—**इहेति।** ननु गणे स्त्रीलिङ्गानामेव पाठे सूत्रस्य कथं तेषु प्रवृत्तिः। न च लिङ्गविशिष्ट-

---

पूर्वपदप्रकृतिस्वरो विधीयमानः प्रतिपदोक्तत्वादेतत्समासपूर्वपदस्यैव भवतु नान्यस्येत्येतदर्थम्। **कृष्णसारङ्ग इति।** सारङ्गश्चित्रपर्यायः, स च गुणोपसर्जनद्रव्यपरः। कृष्णशब्दोऽपि कृष्णावयवके भाक्तः। एवं च गौणे सामानाधिकरण्ये 'विशेषणं विशेष्येण—' इत्यप्रवृत्तौ समासार्थमपीदमारब्धव्यमित्याहुः। ननु 'तृतीया तत्कृता—' इत्यनेनैवायं समासः सिध्यति, सारङ्गत्वस्य कृष्णादिकृतत्वात्। नापि स्वरे भेदः, 'तत्पुरुषे तुल्यार्थतृतीया—' इत्यनेनैव पूर्वपदप्रकृतिस्वरसिद्धेरिति चेत्। अत्राहुः—कृष्णशुक्लो हरितशुक्ल इत्याद्यर्थं समासोऽनेनावश्यं विधेयः। नहीह तत्कृतत्वमस्ति। यद्यपीह 'विशेषणं विशेष्येण—' इत्यनेन समासः सिध्यति, तथापीष्टः स्वरो न सिध्यति। न च प्रतिपदोक्तसमासोऽकिंचित्करः, व्यावर्त्यालाभादिति वाच्यम्, कृष्णशुक्ली इत्यादेर्व्यावर्त्यस्य संभवादिति। **कडारादय इति।** बहुवचननिर्देशादिति भावः। आदिशब्देन गडुलशाण्डिल्यः, शाण्डिल्यगडुल इत्यादि। एतच्च भाष्ये स्पष्टम्। एत-

गर्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते । लिङ्गविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यम् । **७५३ चतुष्पादो गर्भिण्या ।** (२–१–७१) चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत् । गोगर्भिणी । 'चतुष्पाज्जातिरिति वक्तव्यम्' (वा १३११) । नेह । स्वस्तिमती गर्भिणी । **७५४ मयूरव्यंसकादयश्च ।** (२–१–७२) एते निपात्यन्ते । मयूरो व्यंसकः मयूरव्यंसकः । व्यंसको धूर्तः । उदक्चावाक्चोच्चावचम् । निश्चितं च प्रचितं च निश्चप्रचम् । नास्ति किञ्चन यस्य

परिभाषयेति वाच्यम्, तत्सद्भावे प्रमाणाभावादित्यत आह—**लिङ्गेति । एतदेवेति ।** एतदपीत्यर्थः, 'युवा खलति–' इतिसूत्रे जरतीग्रहणस्यापि तज्ज्ञापकत्वात् । न हि युवन्शब्दस्य जरतीसामानाधिकरण्यमस्ति । **चतुष्पादो गर्भिण्या ।** 'जातिग्रहणं कर्तव्यम्' इति वार्तिकमभिप्रेत्य आह—**चतुष्पाज्जातीति । गोगर्भिणीति ।** गर्भिणी चासौ गौश्चेति विग्रहः । विशेष्यस्य पूर्वनिपातार्थमिदं सूत्रम् । जातिरिति किम् ? कालाक्षी गर्भिणी । **मयूरव्यंसकादयश्च । एते निपात्यन्त इति ।** कृतसमासकार्या निर्दिश्यन्त इत्यर्थः । **मयूरव्यंसक इति ।** व्यंसकश्चासौ मयूरश्चेति विग्रहः । **व्यंसको धूर्त इति ।** अत्र कोषो मृग्यः । गुणवचनत्वाद् व्यंसकशब्दस्य पूर्वनिपाते प्राप्ते इदं वचनम् । **उच्चावचमिति ।** उदक्शब्दस्य उच्चेत्यादेशः । अवाक्शब्दस्य अवचादेशश्च । 'उच्चावचं नैकभेदम्' इत्यमरः । **निश्चप्रचमिति ।** निश्चितशब्दस्य निश्चादेशः । प्रचितशब्दस्य प्रचादेशः । **नास्ति किञ्चनेति ।** चनेत्यव्ययमप्यर्थे । नास्ति किमपि यस्येत्यर्थे बहुव्रीह्यपवादश्चिपदस्तत्पुरुषः । नञो नकारस्य लोपश्च निपात्यते । 'न लोपो नञः' इति तु नात्र प्रवर्तते, किंशब्दस्य उत्तरपदत्वाभावात् समासचरमखण्ड एव

देवेति । एवकारः स्फुटसिद्धत्वद्योतनार्थो न त्ववधारणार्थः । 'युवा खलति–' इति सूत्रे जरतीग्रहणस्यापि ज्ञापकत्वसंभवात् । न हि युवनशब्दस्य पुंस्त्वे जरतीसामानाधिकरण्यं संगच्छते । **चतुष्पादो ।** मण्डूकप्लुत्या अत्र 'जातिः' इत्यनुवर्तत इत्याह—**जातिवाचीति ।** जातिः किम्, कालाक्षी गर्भिणी । चतुष्पात्किम्, ब्राह्मणी गर्भिणी । प्रत्युदाहरणे 'विशेषणम्–' इति समासः स्यादेव । गर्भिणीकालाक्षीत्यादिपूर्वनिपाते विशेषः । **मयूर ।** चकारोऽत्रावधारणार्थः । तेन 'परममयूरव्यंसकः' इत्यादि समासान्तरं न भवति । **धूर्त इति ।** एवं च गुणवचनत्वात्पूर्वनिपाते प्राप्ते इदं वचनमारब्धमिति भावः । अन्ये तु मयूर इव व्यंसको मयूरव्यंसक इत्यादौ 'उपमानानि सामान्यवचनैः' इति समासस्यापवादोऽयम् । तेन 'समासस्य' इत्यन्तोदात्तत्वमिह सिध्यति । 'तत्पुरुषे तुल्यार्थ–' इत्युपमानपूर्वपदप्रकृतिस्वरस्योप-

सोऽकिञ्चनः। नास्ति कुतो भयं यस्य सोऽकुतोभयः। अन्यो राजा राजान्तरम्। चिदेव चिन्मात्रम्। 'आख्यातमाख्यातेन क्रियासातत्ये' (ग २०)। अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता। पचतभृज्जता। खादतमोदता। 'एहीडादयोऽन्यपदार्थे' (ग १८) एहीड इति यस्मिन्कर्मणि तदेहीडम्। एहि-यवम्। उद्धर कोष्ठादुत्सृज देहीति यस्यां क्रियायां सोद्धरोत्सृजा। उद्धमविधमा। असातत्यार्थमिह पाठः। 'जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति'। (ग २१)। जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्कर्ताभिधीयत इत्यर्थः। जहिजोडः। जहिस्तम्बः। ७५५ ईषदकृता। (२-२-७)

उत्तरपदशब्दस्य रूढत्वात्। **नास्ति कुत इति**। कुतोऽपि भयमस्य नास्तीति विग्रहस्यार्थः। **अकुतो भय इति**। बहुव्रीह्यपवादस्तत्पुरुषः। **अन्यो राजा राजान्तरमिति**। अत्र अन्तरशब्दः अन्यपर्यायः। तस्य स्थाने अन्यशब्दो विग्रहवाक्ये ज्ञेयः, नित्यसमासत्वेन अस्वपदविग्रहौचित्यात्। नित्यसमासत्वं च राजान्तरमित्यस्य व्याख्यानादेव ज्ञेयम्। अत्र अन्तरशब्दस्य परनिपातः। **चिदेव चिन्मात्रमिति**। 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः। नित्यसमासत्वसूचनाय अस्वपदविग्रहः। निपातनादनुनासिकनित्यतेत्याहुः। **आख्यातमिति**। गणसूत्रम्। क्रियासातत्ये गम्ये तिङन्तं तिङन्तेन समस्यते, स तत्पुरुष इत्यर्थः। **अश्नीतपिबतेति**। इहासुबन्तत्वेऽपि समासः। क्रियारूपस्यान्यपदार्थस्य प्राधान्यात् स्त्रीत्वाट्टाप्। एवं पचतभृज्जतेत्यादावपि। **एहीडादय इति**। इदमपि गणसूत्रम्। अन्यपदार्थे एहीडादयो निपात्यन्त इत्यर्थः। एहि ईडे इति विग्रहः। ईडे इति लडुत्तमपुरुषैकवचनम्। डकारादेकारस्य अकारादेशः। **एहियवमिति**। यौमीत्यस्य यवादेशः। उत्सृजेत्यस्य विवरणम्—**देहीति**। **इह पाठ इति**। एहीडादिष्वित्यर्थः। 'जहि कर्मणा बहुलम्–' इत्यपि गणसूत्रम्। **कर्ता अभिधीयत इति**। उक्तेः कर्तेत्यर्थः। **जहिजोड इति**। जोड इति कस्यचित् संज्ञा। जहि जोडं जहि जोडमित्याभीक्ष्ण्येन य आह स जहिजोडः। **जहिस्तम्ब इति**। जहि स्तम्बम्, जहि स्तम्बमिति य आहेति विग्रहः। इति समानाधिकरणाधिकारः। **ईषदकृता**। ईषच्छब्दः अकृदन्तप्रकृतिकसुबन्तेन समस्यते, स तत्पुरुष

मानसंशब्दनेन विहिते प्रतिपदोक्तसमासे चरितार्थत्वादित्याहुः। **राजान्तरमिति**। अन्तरशब्दोऽत्र भिन्नवाची। **चिन्मात्रमिति**। 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः अन्तरमात्रशब्दाभ्यां सह नित्यसमास इत्युभयत्र अस्वपदविग्रहो दर्शितः। नित्यसमासत्वं तु अवधारणार्थकचकारेण लब्धमित्याहुः। **अश्नीतपिबतेति**। इह क्रियारूपस्यान्यपदार्थस्य प्राधान्यात् स्त्रीत्वाट्टाप्। एवमग्रेऽपि—**उद्धर कोष्ठादित्यादि**। उद्धर

ईषत्पिङ्गलः। 'ईषद् गुणवचनेनेति वाच्यम्' (वा १३१६)। ईषद्रक्तम्। ७५६ नञ्। (२-२-६) नञ्सुपा सह समस्यते। ७५७ नलोपो नञः। (६-३-७३) नञो नस्य लोपः स्यादुत्तरपदे। न ब्राह्मणोऽब्राह्मणः। ७५८ तस्मान्नुडचि।

इत्यर्थः। **ईषत्पिङ्गल इति।** पिङ्गलशब्दः अव्युत्पन्नप्रातिपदिकमिति भावः। **ईषद्गुणवचनेनेति।** अकृतेत्यपहायेति शेषः। **नञ्।** इदं समानाधिकरणाधिकारस्थं नेत्यभिप्रेत्याह—**सुपा समस्यत इति।** **न लोपो नञः।** नेति लुप्तषष्ठीकं पदम्। तदाह—**नञो नस्येति।** **उत्तरपद इति।** 'अलुगुत्तरपदे' इत्यतस्तदनुवृत्तेरिति भावः। नञोऽशिति सिद्धे लोपवचनम् अकब्राह्मण इति साकच्कार्थमित्याहुः। **अब्राह्मण इति।** अत्रारोपितत्वं नञर्थः। आरोपितत्वं च ब्राह्मणत्वद्वारा ब्राह्मणेऽन्वेति। आरोपितब्राह्मणत्ववानिति बोधः। अर्थाद् ब्राह्मणभिन्न इति पर्यवस्यति। केचित्तु नञ् भिन्नवाची, ब्राह्मणाद्भिन्न इत्यर्थ इत्याहुः। तदयुक्तम्, ब्राह्मणाद्भिन्न इत्यर्थे पूर्वपदप्राधान्यापत्तेः। तथा च 'उत्तरपदार्थप्रधानस्तत्पुरुष' इति भाष्योद्घोषो विरुध्येत। किं च अते, अतस्मै, अतस्मादित्यादौ सर्वनामकार्यं शीभावस्मायादिकं न स्यात्, तच्छब्दार्थस्य नञर्थं प्रति विशेषणत्वे अप्रधानत्वात् 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इत्युक्तेः। तथा असः इत्यादौ 'तदोः सः सावनन्त्ययोः' इति सर्वाद्यन्तर्गतत्यदादिकार्यं सत्वं च न स्यात्। अनेकमित्यत्र एकवचनानुपपत्तिश्च। एकभिन्नस्य एकत्वासंभवेन द्वित्वबहुत्वनियमेन च द्विबहुवचनापत्तेः। तथा सति 'अनेकमन्यपदार्थे' इति नोपपद्येत, 'एतत्तदोःसुलोपः—' इत्यत्र अनञ्समासग्रहणं चात्र लिङ्गम्। तद्धि असः शिवः, अनेषः शिव इत्यादौ सुलोपाभावार्थम्। तद्भिन्न एतभिन्न इत्यर्थे तु तच्छब्दाद्यर्थस्य उप-

---

उत्सृजेत्येतावानेव विग्रहः। उत्सृजेत्यस्य विवरणं देहीति। क्रोष्टादिति तुद्धरेत्यस्याकाङ्क्षापूरणार्थमुक्तम्। **समासेन चोत्कर्तेति।** जहिजोडमिति आभीक्ष्ण्येन य आह स जहिजोडः। एवं जहि स्तम्बमिति य आह स जहिस्तम्बः। **नञ्।** इह 'नलोपो नञः' इत्यत्र विशेषणार्थो ञकारः। तत्फलं च नैकधेत्यत्रालोपः। 'अव्यये नञ्कुनिपातानाम्' इत्यव्ययपूर्वपदप्रकृतिस्वरार्थं अकारोच्चारणमित्यन्ये। **सुपा सह समस्यत इति।** उत्तरपदार्थप्रधानोऽयं समासः। तथा हि आरोपितत्वं नञा द्योत्यते। तथा च अब्राह्मणशब्दाद् 'आरोपितो ब्राह्मणः' इति बोधे अर्थाद् 'ब्राह्मणभिन्नः' इत्यर्थः पर्यवस्यति। अतएवानुपसर्जनत्वादतस्मिन् असः इत्यादौ सर्वनामकार्यं सिध्यति। तत्पुरुषस्यौत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधम्। 'एतत्तदोः—' इति सूत्रे अनञ्समासग्रहणं चेह लिङ्गमित्यादि मनोरमायामनुसन्धेयम्। **नलोपो नञः।** 'नञोऽश्' इति वक्तव्ये नलोपवचनं साकच्कार्थम्। तेन नञोऽकचि अक-

(६-३-७४) लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। अर्था-

सर्जनतया त्यदाद्यत्वानापत्तौ हल्ङ्यादिलोपस्य दुर्वारत्वात्तद्वैयर्थ्यं स्पष्टमेव। तस्मादुत्तरपदार्थप्राधान्यं भाष्योक्तमनुसृत्य आरोपितत्वमेव नञर्थ इति युक्तम्। विस्तरस्तु प्रौढमनोरमायां शब्दरत्ने मञ्जूषायां च ज्ञेयः। प्राचीनास्तु 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः'। इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोअश्वेभ्यः, अधर्म इत्युदाजहुः तत्र सादृश्यादिकं प्रकरणादिगम्यमित्याहुः। **तस्मान्नुडचि**। तच्छब्देन पूर्वसूत्रावगतो लुप्तनकारो नञ् परामृश्यते। उत्तरपद इत्यनुवृत्तम् अचीत्यनेन विशेष्यते। तदादिविधिः। 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वात्' इतिपरिभाषया सप्तमी षष्ठीं प्रकल्पयति। तदाह—**लुप्तनकारादिति। अनश्व इति**। समासे सति नञो नकारस्य लोपे तत्परिशिष्टाकारस्य नुट्, टकार इत्, उकार उच्चारणार्थः। टित्त्वादाद्यवयव इति भावः। नुक् तु न कृतः। ङमुट्प्रसङ्गात्। ननु 'उत्तरे कर्मण्यविघ्नमस्तु' इत्यादौ विघ्नानामभाव इत्यर्थे नञ्तत्पुरुषे सति परवल्लिङ्गत्वे अविघ्न इति स्यात्। न च अर्थाभावे अव्ययीभावेन तत्सिद्धिरिति वाच्यम्, अव्ययीभावस्य निर्मक्षिकमित्यादौ सावका-

शत्वात्। अन्यथा अनुपलब्धिः, अविवाद इति न सिद्ध्येदित्या-

ब्राह्मणः, अकृलश्च इत्यादि सिद्धमित्याहुः। **उत्तरपद इति**। 'अलुगुत्तरपदे' इत्यधिकारादिति भावः। उत्तरपदे किम्, घटो नास्ति, पटो नास्ति। नन्वेवमपि 'स्त्रैणार्थः' इत्यत्र नलोपः स्यादिति चेत्। अत्राहुः—उत्तरपदाक्षिप्तपूर्वपदेन। नञं विशेष्य 'पूर्वपदभूतस्य नञः, इति व्याख्यानान्न भवति। 'स्त्रीपुंसाभ्याम्–' इति विहितस्य नञ्प्रत्ययस्यापूर्वपदत्वात्। अतएव चात्र 'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' इति परिभाषा नोपतिष्ठते। न च प्रत्ययग्रहणे तदन्तग्रहणान्नञ्प्रत्ययान्तस्य पूर्वपदत्वं संभवत्येवेति 'प्रत्ययाप्रत्यययोः–' इत्येतदुपतिष्ठत एवेति वाच्यम्। 'हृदयस्य हृल्लेख–' इति सूत्रे अण्ग्रहणात्पृथग् लेखग्रहणेन 'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति ज्ञापनात्। यद्वा 'अमूर्धमस्तकात्–' 'विभक्त्यप्रथमायाम्' इत्यादिज्ञापकाद् 'नलोपो नञः' इत्यत्राव्ययमेव नञ् गृह्यते, न तु प्रत्यय इति। **तस्मान्नुडचि**। 'ङः सि धुट्' इत्यत्रेवाचीति सप्तम्याः षष्ठी प्रकल्प्यत इत्याह—**अजादेरिति**। अचा उत्तरपदविशेषणाद् 'यस्मिन्विधिः–' इति तदादिविधिर्लभ्यत इति भावः। **अनश्व इति**। नुटः परादित्वेन अपदान्तत्वाद् 'ङमो ह्रस्वात्–' इति ङमुण्न भवति। ननु विघ्नानामभावोऽविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यादव्ययीभावस्य निर्मक्षिकादौ सावकाशत्वात्। अन्यथा अनुपलब्धिः, अविवाद इति न सिद्ध्येदित्या-

भावेऽव्ययीभावेन सहायं विकल्प्यते । 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति 'अद्रुतायामसंहितम्' (वा ११६७) इति च भाष्यवार्तिकप्रयोगात् । तेन अनुपलब्धिः, अविवादः, अविघ्नम् इत्यादि सिद्धम् । 'नञो नलोपस्तिङि क्षेपे' (वा ११८४)। अपचसि त्वं जाल्म । नैकधा इत्यादौ तु नशब्देन सह 'सुपा' (सू ६४९) इति समासः । ७५६ नभ्राण्नपान्नवेदानासत्यानमुचिन-

---

शतया परत्वात्तत्पुरुषस्यैव प्रसङ्गादित्यत आह—**अर्थाभाव इति । रक्षेति ।** पस्पशाह्निकभाष्ये इदं वाक्यम् । रक्षा च ऊहश्च आगमश्च लघु च असंदेहश्च इति द्वन्द्वः । 'परवल्लिङ्गम्–' इति पुंस्त्वम् । अत्र संदेहाभाव इत्यर्थे असंदेहशब्दस्य असंदेहा इति प्रयोगात् तत्पुरुषो विज्ञायते। अव्ययीभावे रक्षोहागमलघ्वसंदेहमिति स्यात् । **अद्रुतायामसंहितमिति** । 'परः सन्निकर्षः संहिता' इति सूत्रे पठितमिदं वार्तिकम् । अद्रुतायां वृत्तौ संहिताभाव इत्यर्थः । अत्र अव्ययीभावे सति असंहितमिति प्रयोगाद् अव्ययीभावेऽपि अर्थाभावो नञा गम्यो भवतीति विज्ञायते । अन्यथा तत्पुरुषे सति परवल्लिङ्गत्वादसंहितेति स्यात् । ततश्च नञा गम्ये अभावे तत्पुरुषाव्ययीभावयोर्विकल्प इति स्थितम् । **तेनेति** । अनुपलब्धिरित्यत्र अविवाद इत्यत्र च तत्पुरुषः, अविघ्नमित्यत्र अव्ययीभावश्च सिध्यतीत्यर्थः । शब्देन्दुशेखरे तु अन्यथा प्रपञ्चितम् । **नञो नलोपस्तिङि क्षेप इति** । 'न लोपो नञः' इति सूत्रस्थवार्तिकमिदम् । नञो नकारस्य लोपः स्यात् तिङि परे निन्दायामिति वक्तव्यमित्यर्थः । **अपचसि त्वं जाल्मेति ।** कुत्सितं पचसीत्यर्थः । अत्र अ इति भिन्नं पदम्, तिङन्तेन समासाभावात् । वार्तिकमिदं प्रसङ्गादुपन्यस्तम् । नञ्समानार्थकेन अ इत्यव्ययेनापि सिद्धमिदमिति वार्तिकं विफलमेव । केचित्तु अस्मादेव वार्तिकादव्ययेषु अ इत्यस्य पाठः अप्रामाणिक इत्याहुः । ननु नैकधेत्यत्रापि नञ्समासे 'न लोपो नञः' इति नकारस्य लोपे 'तस्मान्नुडचि' इति नुटि अनेकधेत्येव स्यादित्यत आह—**नैकधेत्यादौ त्विति ।** एतदर्थमेव 'नञ्' इति सूत्रे 'न लोपो नञः' इति सूत्रे च ञकारानुबन्धग्रहणमिति भावः । **नभ्राण्नपात्-** । सुग-

---

शङ्क्याह—अर्थाभावेऽव्ययीभावेन सहेत्यादि । अविघ्नमिति । यद्यप्यविद्यमाना विघ्ना यस्मिन्निति बहुव्रीहिणा अविघ्नं कर्मेत्यादिप्रयोगः सिद्ध्यति, तथापि 'उत्तरे कर्मण्यविघ्नमस्तु' इत्यादिप्रयोगा अव्ययीभावं विना स्वरसतो न सिद्ध्यन्तीति भावः । **नञो नलोप इति** । तिङन्तेन समासाभावादप्राप्ते वचनम् । **अपचसीति ।** कुत्सितं पचसीत्यर्थः । **नशब्देनेति** । नञा समासे त्वनेकधेत्येव स्यादिति भावः । **नभ्राट्** । सत्सु साधवः सत्याः । 'तत्र साधुः' इति यत् । न सत्या असत्याः । न असत्या नासत्याः । इह बहुवचनमविवक्षितम् । तेन 'नासत्यावश्विनौ दस्रौ' इति

कुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या । (६-३-७५) पाद् इति शत्रन्तः। वेदा इत्यसुन्नन्तः। न सत्या असत्याः। न असत्या नासत्याः। न मुञ्चतीति नमुचिः। न कुलमस्य। न खमस्य। न स्त्री पुमान्। स्त्रीपुंसयोः पुंसकभावो निपातनात्। न क्षरतीति नक्षत्रम्। क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते। न क्रामतीति नक्रः। 'क्रमेर्डः'। न अकमस्मिन्निति नाकः। ७६० **नगोऽप्राणिष्वन्यतरस्याम्।** (६-३-७७) नग इत्यत्र नञ्प्रकृत्या वा। नगाः—अगाः पर्वताः। अप्राणिषु इति किम्-अगो वृषलः शीतेन। 'नित्यं क्रीडा-' (सू ७११) इत्यतो नित्यम् इत्यनुवर्तमाने-७६१ **कुगतिप्रादयः।** (२-२-१८) एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः। 'गतिश्च' (सू २१) इत्यनुवर्तमाने। ७६२ **ऊर्यादिच्विडाचश्च।** (१-४-६१) एते क्रियायोगे गतिसंज्ञाः स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटा-

---

मम्। **अनुवर्तमान इति।** समासविधयो वक्ष्यन्त इति शेषः। **कुगतिप्रादयः। समस्यन्त इति।** स तत्पुरुष इत्यपि ज्ञेयम्। **कुत्सितः पुरुष इति।** नित्यसमासत्वादस्वपदविग्रहः। कुत्सितार्थकस्य कु इत्यव्ययस्यैवात्र ग्रहणम्, न तु पृथ्वीपर्यायस्य, गत्यादिसाहचर्यात्। **गतिश्चेत्यनुवर्तमान इति।** क्रियायोग इति चेति बोध्यम्। **ऊर्यादिच्विडाचश्च।** च्विडाचौ प्रत्ययौ। **ऊरीकृत्येति।** ऊरीत्यव्ययमङ्गीकारे, तस्य कृत्वेत्यनेन गतिसमासः। समासेऽनञ्पूर्वे क्त्वो ल्यप्। **शुक्लीकृत्येति।** अशुक्लं शुक्लं कृत्वेत्यर्थः। 'कृभ्वस्तियोगे-' इत्यभूततद्भावे च्विः। गतिसमासे सति क्त्वो ल्यप्, वेरपृ-

---

सिद्धम्। **नुमचिरिति।** 'सर्वधातुभ्य इन्'। 'इगुपधात्कित्' इति कित्वान्न गुणः। **क्षरतेः क्षीयतेर्वेति।** 'क्षर संचलने' भ्वादिः। 'क्षि निवासगत्योः' तुदादिः। **कुगति।** कुशब्दोऽत्राव्ययं गृह्यते, न तु पृथिवीवाचकः, गत्यादिसाहचर्यात्। **ऊर्यादिच्विडाचश्च।** 'उपसर्गाः क्रियायोगे' इत्यतोनुवर्तनादाह—**क्रियायोग इति।** च्विडाचौ कृभ्वस्तियोगे विहितौ तत्साहचर्यादूर्यादीनामपि तत्रैव गतिसंज्ञा। तेनेह न-ऊरीपक्त्वा। माधवादिग्रन्थे तु 'आविःप्रादुःशब्दौ मुक्त्वा अन्येषां करोतिनैव योगे गति संज्ञा' इति स्थितम्। तथैवोदाहरति—**ऊरीकृत्येति।** एतच्च मनोरमानुसारेणोक्तम्। वस्तुतस्तु ऊरीभूयेति भाष्योदाहरणाद्दिङ्मात्रमुदाहरति, ऊरीकृत्येत्यवतरितुयुक्तम्। संज्ञाफलं समासस्तत्फलं च ल्यबिति बोध्यम्। ऊरी उररी एतावङ्गीकारे। आविःशब्दस्य तु साक्षात्प्रभृतिषु पाठात् कृञो योगे गतिसंज्ञाविकल्पः, भ्वस्तियोगे त्वनेन नित्यमिति बोध्यम्। कथं तर्हि 'वारुणीमदविशङ्कमथाविश्चक्षुषो भवदसाविव रागः' इति माघ इति चेत्। अत्राहुः—'ते प्राग्धातोः' इतिसूत्रस्य प्रयोगनियमार्थत्व-

कृत्य । 'कारिकाशब्दस्योपसंख्यानम्' (वा ११३२) कारिका क्रिया । कारिकाकृत्य । ७६३ **अनुकरणं चानितिपरम्** । (१-४-६२) खाट्कृत्य । अनितिपरं किम्-खाडिति कृत्वा निरष्ठीवत् । ७६४ **आदरानादरयोः सदसती** ।

स्येति वलोपः । 'अस्य च्वौ' इति ईत्वम् । **पटपटाकृत्येति** । पटपटा इति शब्दं कृत्वेत्यर्थः । 'अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच्' इति पटच्छब्दाड्डाचि द्वित्वम्, टिलोपः । 'नित्यमाम्रेडिते डाचि' इति तकारपकारयोः पकार एकादेशः । गतिसमासे क्त्वो ल्यप् । **कारिकाशब्दस्योपसंख्यानमिति** । गतिसंज्ञाया इति शेषः । कारिकाशब्दं व्याचष्टे—**कारिका क्रियेति** । 'क्रियां क्तिन्' इत्यधिकारे धात्वर्थनिर्देशे ण्वुल् । **कारिकाकृत्येति** । क्रियां कृत्वेत्यर्थः । द्वितीयान्तस्य गतिसमासे क्त्वो ल्यप्, सुब्लुक्, कारिकाशब्दोऽत्र न कर्त्रीवाची, न श्लोकवाची च, व्याख्यानात् । **अनुकरणं चानितिपरम्** । अनुकरणं गतिसंज्ञं स्याद् इतिपरं वर्जयित्वेत्यर्थः । **खाट्कृत्येति** । खाडिति शब्दं कृत्वेत्यर्थः । गतिसमासे क्त्वो ल्यप् । **खाडिति कृत्वेति** । न चात्र इतिशब्देन व्यवहितत्वे क्रियायोगाभावादेव गति संज्ञा न भविष्यति, तत्किमनितिपरग्रहणेनेति वाच्यम्, यथाकथंचित्क्रियायोगसत्त्वात् । 'ते प्राग्धातोः' इति सूत्रं तु ते गत्युपसर्गा धातोः प्रागेव प्रयोज्याः, न तु परत इति प्रयोगनियमपरमेवेति भावः । **आदरानादरयोः सदसती** । सदिति असदिति च अव्यये आदरानादरयोः क्रमेण

पक्षे प्रकृते अनुपपत्तावपि संज्ञानियमार्थत्वपक्षे दोषलेशोऽपि नास्तीति ।—**शुक्लीति** । 'कृभ्वस्तियोगे संपद्य कर्तरि च्विः' । 'अस्य च्वौ' इतीकारः । **पटपटाकृत्येति** । 'डाचि बहुलं द्वे भवतः' इति पटच्छब्दस्य द्वित्वम् । 'अव्यक्तानुकरणाद्–' इति डाचि टिलोपः । 'नित्यमाम्रेडिते डाचि' इति तकारपकारयोः पकार एकादेशः । निपातसंज्ञायाः समावेशार्थं सूत्रे चकारः । तेन ऊरीकृतमित्यत्र 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरे क्रियमाणे निपातप्रयुक्तमाद्युदात्तत्वं भवति । **कारिकेति** । भावे 'पर्यायार्हर्ण–' इति ण्वुच् । तदाह—**क्रियेति** । 'क्रियायोगे' इत्यनेन कारिकाशब्दस्य विशेषणात् श्लोकवाची कारिकाशब्दोऽत्र न गृह्यत इति भावः । क्रियाशब्दस्यात्र मर्यादास्थितिरर्थः । यत्न इत्यन्ये । **अनुकरणं च** । 'ते प्राग् धातोः' इत्यस्य संज्ञानियमपक्षेऽनितीति व्यर्थमिति मत्वा पृच्छति । **अनितिपरं किमिति** । इतरस्तु प्रयोगनियमपक्षे खाडित्यनुकरणस्येतिशब्दे परे गतिसंज्ञानिवारणायानितिपरमित्यावश्यकमिति प्रत्युदाहरति—**खाडिति कृत्वेति** । सत्यां संज्ञायाम् एष प्रयोगो नैव स्यात्, किंतु 'इति खाट्कृत्य' इत्येव स्यादिति भावः । न च 'इति खाट्कृत्य' इति न भवति, इतेः परस्यानुकरणस्य गतिसंज्ञानिषेधादिति वाच्यम्,

(१-४-६३) सत्कृत्य । असत्कृत्य । ७६५ भूषणेऽलम् । (१-४-६४) अलंकृत्य । भूषणे किम्-अलं कृत्वौदनं गतः । पर्याप्तमित्यर्थः । 'अनुकरणम्-' (सू ७६२) इत्यादित्रिसूत्री स्वभावात्कृञ्विषया । ७६६ अन्तरपरिग्रहे । (१-४-६५) अन्तर्हत्य । मध्ये हत्वेत्यर्थः । अपरिग्रहे किम्-अन्तर्हत्वा गतः । हतं परिगृह्य गत इत्यर्थः । ७६७ कणेमनसी श्रद्धाप्रतीघाते । (१-४-६६) कणेहत्य पयः पिबति । मनोहत्य । कणेशब्दः सप्तमीप्रतिरूपको निपातः अभिलाषातिशये वर्तते । मनश्शब्दोऽप्यत्रैव । ७६८ पुरो-

---

विद्यमाने गतिसंज्ञके स्त इत्यर्थः । **सत्कृत्येति** । आदरं कृत्वेत्यर्थः । **असत्कृत्येति** । अनादरं कृत्वेत्यर्थः । गतिसमासे क्त्वो ल्यप् । **भूषणेऽलम्** । भूषणे विद्यमानम् अलमित्यव्ययं गतिसंज्ञकं स्यादित्यर्थः । **अलंकृत्येति** । कटकादिधारणेन परिष्कारं कृत्वेत्यर्थः । **कृञ्विषयेति** । कृञ्योग एव भवतीत्यर्थः । वस्तुतस्तु संकोचे प्रमाणाभावाद् धात्वन्तरयोगेऽपि त्रिसूत्रीप्रवृत्तिर्युक्ता । अत एव अलं भुक्त्वा ओदनं गत इति वृत्तिकृता प्रत्युदाहृतम् । **अन्तरपरिग्रहे** । अपरिग्रहे वर्तमानम् अन्तरित्यव्ययं गतिसंज्ञकं स्यादित्यर्थः । **हतं परिगृह्येति** । हत्वा गमनं हृतम् अपरिगृह्य परिगृह्य वा भवति । तत्र आद्यमुदाहरणम्, द्वितीयं प्रत्युदाहरणमित्यर्थः । अपरिग्रह इति प्रयोगोपाधिरेव, न तु वाच्यकोटिप्रविष्टम् । **कणेमनसी श्रद्धाप्रतीघाते** । कणे शब्दो मनश्शब्दश्च श्रद्धाप्रतीघाते गतिसंज्ञकौ स्तः । अत्यन्ताभिलाषः श्रद्धा, तस्या निवृत्तिः प्रतीघातः । **कणेहत्येति** । गतिसमासे क्त्वो ल्यप् । **मनोहत्येति** । पयः पिबतीत्यनुषज्यते । ननु समासे कृते कणे इति सप्तम्याः कथं न लुगित्यत आह—**कणे शब्द इति** । ननु श्रद्धाप्रतीघातस्य कथमिहावगतिः, श्रद्धावाचकशब्दाभावात् । मनसो घाते सति कथं वा पयःपानमित्यत आह—**अभिलाषातिशय इति** । कणेशब्द इत्यनुष-

---

'अनितिपरम्' इत्यत्र इतिः परो यस्मात्तद् इतिपरम्, न इतिपरमनितिपरमिति बहुव्रीहिघटितनञ्तत्पुरुषाश्रयणात् । स्यादेतत्—अनुकरणस्येतिशब्दपरत्वे क्रियायोगाभावाद्गतिसंज्ञा नास्तीति खाडिति कृत्वेति रूपं निर्बाधम्, किमनेनानितिपरग्रहणेनेति चेत्, अत्राहुः—इतिकृत्वेति समुदाय एवायं कृत्वेत्यर्थे वर्तते । तथा च इतिशब्दः क्रियाविशेषकः, इति तद्घटितसमुदायस्य क्रियावाचकत्वादस्त्येव क्रियायोग इति । **हतं परिगृह्येति** । हत्वा[1] गमनं द्विधा--हतं त्यक्त्वा परिगृह्य चेति । आद्यमुदाहरणम्, द्वितीयं तु प्रत्युदाहरणम् । अपरिग्रह इति च प्रयोगोपाधिः, न तु वाच्यकोटिनिविष्टमिति भावः । **कणेहत्येति** । अत्यन्तमभिलष्य तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः । तथा च श्रद्धाया अपगमात्तत्प्रतिघातो गम्यते । प्रत्युदाहरणं तु कणे हत्वा गतः । सूक्ष्म-

ऽव्ययम्। (१-४-६७) पुरस्कृत्य। ७६९ अस्तं च। (१-४-६८) अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। ७७० अच्छ गत्यर्थवदेषु। (१-४-६९) अव्ययम् इत्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा चेत्यर्थः। अव्ययं किम्—जलमच्छं गच्छति। ७७१ अदोऽनुपदेशे। (१-४-७०) अदःकृत्य अदःकृतम्। परं प्रत्युपदेशे प्रत्युदाहरणम्—अदः कृत्वा अदः कुरु। ७७२ तिरोऽन्तर्धौ। (१-४-७१)। तिरोभूय। ७७३

उच्यते। 'परावरयोगे च' इति सूत्रेण क्त्वा। अभिलाषनिवृत्तिपर्यन्तं पयः पिबतीत्यर्थः। श्रद्धाप्रतीघाते किम्? कणे हत्वा गतः। सूक्ष्मस्तण्डुलावयवः कणः, तद्विषये हत्वा गत इत्यर्थः। मनो हत्वा गतः, विषपानादौ मनःप्रवृत्तिं प्रतिबध्य गत इत्यर्थः। **पुरोऽव्ययम्**। पुर इत्यव्ययं गतिसंज्ञकं स्यात्। **पुरस्कृत्येति**। गतिसमासे क्त्वो ल्यप्। अव्ययं किम्? पुरम्, पुरौ, पुरः कृत्वा गतः। **अस्तं च**। पूर्वसूत्रादव्ययमित्यनुवर्तत इत्याह—**मान्तमव्ययमिति**। **अस्तकृत्येति**। तिरोधानं प्राप्येत्यर्थः। अव्ययं किम्? काण्डम् अस्तं कृत्वा। प्रक्षिप्तं कृत्वेत्यर्थः। **अच्छगत्यर्थवदेषु**। गत्यर्थधातुषु वदधातौ च प्रयुज्यमानेषु अच्छेत्यव्ययं गतिसंज्ञकं स्यात्। **अच्छगत्येति**। गतिसमासे क्त्वो ल्यप्। **अच्छोद्येति**। वदधातोः क्त्वा। गतिसमासे क्त्वो ल्यप्। अच्छेत्यव्ययमाभिमुख्ये, तथथा—बर्हिरच्छंतीति। तदाह—**अभिमुखमिति**। **अलमच्छं गच्छतीति**। अत्राच्छशब्दस्य नाव्ययत्वम्, न गतिसंज्ञा, नापि 'प्राग्रीश्वरान्निपाताः' इत्यधिकृतनिपातसंज्ञा। निपातत्वे सति हि अव्ययत्वाद् विभक्तिलुक् स्यादिति भावः। **अदोऽनुपदेशे**। अदरशब्दः अनुपदेशे गतिसंज्ञः स्यात्। **अदःकृत्येति**। गतिसमासे क्त्वो ल्यप्। अमुं यज्ञं कृत्वेत्यर्थे तु सुब्लुक् च। **अदःकृतमिति**। 'गतिरनन्तरः' इति स्वरः फलम्। यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणम्। **परं प्रतीति**। अदः कुर्वित्यादावित्यर्थः। **तिरोऽन्तर्धौ**। अन्तर्धिः व्यवधानम्, तत्र तिरस् इत्यव्ययं गतिसंज्ञकं स्यादित्यर्थः। **तिरोभूयेति**। गतिसमासे क्त्वो ल्यप्।

स्तण्डुलावयवः कणः, तस्मिन् हत्वेत्यर्थः। **पुरस्कृत्येति**। 'पूर्वाधरावराणाम्—' इत्यसिप्रत्ययान्तोऽयमव्ययम्। 'नमस्पुरसोः—' इति विसर्गस्य सः। 'अमुं पुरः पश्यसि' इत्यत्र तु स्थितमित्यध्याहारेण दर्शि प्रत्यगतित्वात्सत्वाभावः। अव्ययं किम्, पुरं पुरौ पुरः कृत्वा गतः। **अस्तं च**। अव्ययमिति किम्, अस्तं कृत्वा काण्डं गतः, क्षिप्तमित्यर्थः। **अच्छमिति**। सत्यां हि गतिसंज्ञायां निपातसंज्ञकत्वेनाव्ययत्वात्सुब्लुक् स्यादिति भावः। **अदःकृत्येति**। यदा स्वयमेव पर्यालोचयति 'अदः कृतम्' इति—

विभाषा कृञि। (१-४-७२)। तिरस्कृत्य, तिरःकृत्य, तिरः कृत्वा। ७७४ **उपाजेऽन्वाजे।** (१-४-७३)। एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य, उपाजे कृत्वा। अन्वाजेकृत्य, अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः। ७७५ **साक्षात्प्रभृतीनि च।** (१-४-७४) कृञि वा गतिसंज्ञानि स्युः। 'च्व्यर्थ इति वाच्यम्' (वा ११४२)। साक्षात्कृत्य, साक्षात् कृत्वा। लवणांकृत्य, लवणं कृत्वा। मान्तत्वं निपातनात्। ७७६ **अनत्याधान उरसिमनसी।** (१-४-७५)। उरसिकृत्य, उरसि कृत्वा। अभ्युपगम्येत्यर्थः। मनसिकृत्य,

---

व्यवहितो भूत्वेत्यर्थः। **विभाषा कृञि।** कृञि प्रयुज्यमाने तिरस् इत्यव्ययं गतिसंज्ञं वा स्यादित्यर्थः। **तिरस्कृत्य तिरःकृत्येति।** गतिसंज्ञापक्षे गतिसमासे क्त्वो ल्यप्। 'तिरसोऽन्यतरस्याम्' इति सत्वविकल्पः। **तिरः कृत्वेति।** गतित्वाभावपक्षे सत्वमपि न भवति, तद्विधौ गतिग्रहणानुवृत्तेरित्याहुः। केचित्तु तिरस्कार इति परिभवे प्रयोगदर्शनात् सत्वविधौ गतिग्रहणं नानुवर्तयन्ति। **उपाजेऽन्वाजे। उपाजेकृत्येति।** गतिसंज्ञापक्षे गतिसमासे क्त्वो ल्यप्। अन्वाजेकृत्येत्यपि तथैव। उपाजे, अन्वाजे इत्यव्यये दुर्बलस्य बलाधाने वर्तेते। तदाह—**दुर्बलस्येति। साक्षात्प्रभृतीनि च।** शेषपूरणेन सूत्रं व्याचष्टे—**कृञि वेति।** साक्षादित्यव्ययम्। **च्व्यर्थ इति।** अभूततद्भावे गम्ये सतीति वक्तव्यमित्यर्थः। **साक्षात्कृत्येति।** अप्रत्यक्षं प्रत्यक्षं कृत्वेत्यर्थः। गतित्वपक्षे क्त्वो ल्यप्। तत्र सुब्लुकमाशङ्क्याह-**मान्तत्वमिति।** लवणम्, उष्णम्, शीतम्, उदकम्, आर्द्रम् इति पञ्चानां साक्षात्प्रभृतिगणे मान्तत्वं निपात्यत इत्यर्थः। **अनत्याधाने।** उरसि मनसि इति विभक्तिप्रतिरूपके अव्यये गतिसंज्ञे वा स्तः अनत्याधाने। **उरसिकृत्येति।** गतित्वपक्षे क्त्वो ल्यप्। इह अत्याधानं न गम्यत इत्याह—**अभ्युपगम्येत्यर्थ इति। मनसिकृत्येति।** गतित्वपक्षे क्त्वो ल्यप्।

तदेदमुदाहरणम्। 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम्। **प्रत्युदाहरणमिति।** अदःकृत्वा अदःकुर्वित्यादीत्यर्थः। **तिरोऽन्तर्धौ।** अन्तर्धौ किम्, तिरोभूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः। **विभाषा कृञि। तिरःकृत्वेति।** गतित्वाभावपक्षे 'तिरसोऽन्यतरस्याम्' इति सत्वमपि न भवति। तद्विधौ गतिग्रहणानुवृत्तेः। माधवस्तु—पराभवे तिरस्कार इति प्रयोगदर्शनात्सत्वविधौ गतिग्रहणानुवृत्तिं केचिन्नेच्छन्तीत्याह—**उपाजेऽन्वाजे।** एतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते, तदाह-**दुर्बलस्येति। साक्षात्प्रभृ।** साक्षात्। मिथ्या। अमा। श्रद्धा। लवणम्। उष्णम्। शीतम्। उदकम्। आर्द्रम्। गतिसंज्ञासंनियोगेन लवणादीनां पञ्चानां मकारान्तत्वं निपात्यते। प्रादुस्। नमस्। आविस्। इत्यादि। आकृति-

मनसि कृत्वा। निश्चित्येत्यर्थः। अत्याधानमुपश्लेषणम्, तत्र न। उरसि कृत्वा पाणिं शेते। ७७७ मध्ये पदे निवचने च। (१-४-७६) एते कृञि वा गतिसंज्ञाः स्युरनत्याधाने। मध्येकृत्य, मध्ये कृत्वा। पदेकृत्य, पदे कृत्वा। निवचनेकृत्य, निवचने कृत्वा। वाचं नियम्येत्यर्थः। ७७८ नित्यं हस्ते पाणावुपयमने। (१-४-७७) कृञि। उपयमनं विवाहः। स्वीकारमात्रमित्यन्ये। हस्तेकृत्य। पाणौकृत्य। ७७९ प्राध्वं बन्धने। (१-४-७८) प्राध्वम् इत्यव्ययम्। प्राध्वंकृत्य। बन्धनेनानुकूल्यं कृत्वेत्यर्थः। प्रार्थनादिना त्वानुकूल्यकरणे

इहापि नात्याधानं गम्यत इत्याह—**निश्चित्येत्यर्थ इति**। अत्याधानशब्दं विवृण्वन् तस्य प्रयोजनमाह—**अत्याधानमुपश्लेषणमिति**। संयोग इत्यर्थः। **उरसि कृत्वेति**। उरसि पाणिं निधाय शेत इत्यर्थः। अत्र पाणिसंश्लेषणावगमान्न गतिसंज्ञेति भावः। **मध्ये पदे**। गतित्वे तदभावे च त्रयाणामेदन्तत्वं निपात्यते। **मध्येकृत्येति**। गतिसमासे क्त्वो ल्यप्। मध्यं कृत्वेत्यर्थः। **पदेकृत्येति**। गतिसमासे क्त्वो ल्यप्। पदं कृत्वेत्यर्थः। **निवचनेकृत्येति**। वचनाभावं कृत्वेत्यर्थः। तदाह—**वाचं नियम्येत्यर्थ इति**। वचनस्य अभावो निवचनम्। अर्थाभावे अव्ययीभाव इति भावः। **नित्यं हस्ते**। शेषपूरणेन सूत्रं व्याचष्टे—**कृञीति**। हस्ते इति पाणाविति च शब्दौ कृञि नित्यं गतिसंज्ञौ भवत उपयमन इति यावत्। **हस्तेकृत्य पाणौकृत्येति**। कन्यां स्वीकर्तुं पाणिं गृहीत्वेत्यर्थः। एदन्तत्वमौदन्तत्वं चानयोर्निपात्यते। उपयमने किम्? हस्ते कृत्वा सुवर्णं गतः। अन्यदीयमिति बुद्धया दातुं परावृत्त इत्यर्थः। **प्राध्वं बन्धने**। प्राध्वमिति न द्वितीयान्तमित्याह—**प्राध्वमित्यव्ययमिति**। बन्धने गम्ये प्राध्वमित्यव्ययं गतिसंज्ञकं स्यादित्यर्थः। **प्राध्वं-**

गणोऽयम्। **साक्षात्कृत्येति**। असाक्षाद्भूतं यथा साक्षाद् भवति तथा कृत्वेत्यर्थः। च्व्यन्तेषु तु पूर्वविप्रतिषेधाद् 'ऊर्यादिच्विडाचश्च' इति नित्यैव संज्ञा। तेन लवणीकृत्येत्यत्र मान्तत्वं न भवति। तद्धि पाक्षिकम्, गतिसंज्ञासंनियोगेनेह गणे निपातनात्। भाष्यकृता लवणशब्दस्य लवणीशब्दस्य वा विकल्पेन लवणशब्द आदिश्यते तस्य च संज्ञाविकल्प इत्युक्तम्। उभयथापि त्रैरूप्यं निर्बाधम्। **अनत्या**। उरसिमनसीविभक्तिप्रतिरूपकौ। **मध्ये पदे**। 'विभाषा कृञि' इति वर्तते। चकाराद् 'अनत्याधाने' इति च। एषामनत्याधानरूपार्थविशेषे एदन्तत्वमविशेषेण निपात्यते, न तु गतिसंज्ञसंनियोगेन। अनत्याधाने किम्, पदे कृत्वा शिरो नमति। **वाचं नियम्येति**। निवचनं हि वचनाभावः। अर्थाभावेऽव्ययीभावः। **नित्यं हस्ते**। उपयमनरूपार्थ एवैतयोरेदन्तमौदन्तत्वं च निपात्यते। **हस्तेकृत्येति**। परिणीयेत्यर्थः। उपयमने

प्राध्वं कृत्वा । ७८० **जीविकोपनिषदावौपम्ये** । (१-४-७९) जीविकामिव कृत्वा जीविकाकृत्य । उपनिषदमिव कृत्वा उपनिषत्कृत्य । औपम्ये किम्-जीविकां कृत्वा । प्रादिग्रहणमगत्यर्थम् । सुपुरुषः । अत्र वार्तिकानि । 'प्रादयो गताद्यर्थे प्रथमया' (वा १३३१) प्रगत आचार्यः प्राचार्यः । 'अत्यादयः क्रान्ता-

---

कृत्येति । गतिसमासे क्त्वो ल्यप् । अत्र प्राध्वमिति मान्तमव्ययं बन्धनेन आनुकूल्ये वर्तते, तदाह—**बन्धनेनेति** । बन्धनग्रहणस्य प्रयोजनमाह—**प्रार्थनादिनेति** । **जीविकोपनिष** । उपमैव औपम्यम्, तस्मिन्विषये जीविकाशब्दः, उपनिषच्छब्दश्च कृञा योगे गतिसंज्ञौ स्तः । **जीविकामिवेति** । अशनपानादिजीवनोपायो जीविका । तामिव अवश्यं कृत्वेत्यर्थः । **जीविकाकृत्येति** । गतिसमासे क्त्वो ल्यप् । **उपनिषदमिव कृत्वेति** । उपनिषद् वेदान्तभागः, तामिव रहसि भाव्यत्वेन कृत्वेत्यर्थः । **उपनिषत्कृत्येति** । गतिसमासे क्त्वो ल्यप् । उभयत्रापि सुब्लुक् । तदेवं 'कुगतिप्रादयः' इत्यत्रत्यगतिसमासाः प्रपञ्चिताः । ननु गतिग्रहणेनैव सिद्धे प्रादिग्रहणं व्यर्थमित्यत आह—**प्रादिग्रहणमगत्यर्थमिति** । **सुपुरुष इति** । अत्र क्रियायोगाभावादगतित्वेऽपि समासः । सोः पूजार्थकत्वेऽपि धातुवाच्यक्रियायोगाभावान्न गतित्वम् । भाष्ये तु 'कुगतिप्रादयः' इति सूत्रमपनीय तत्स्थाने 'कुङ्स्वतिदुर्गतयः समस्यन्त इति वक्तव्यम्' इत्युक्त्वा 'कुब्राह्मणः, आकडारः, सुब्राह्मणः, अतिब्राह्मणः, दुर्ब्राह्मणः, दूरीकृत्य' इत्युदाहृतम् । स्वती पूजायाम्, दुर्निन्दायाम्, आङीषदर्थे, कुः पापार्थे इति सौनागव्याकरणवचनम् इति भाष्ये स्पष्टम् । **अत्र वार्तिकानीति** । 'प्रादयो गताद्यर्थे समस्यन्त इति वक्तव्यम्' इति वार्तिकं पठित्वा तत्र व्यवस्थापकानि पञ्च वार्तिकानि सौनागव्याकरणसिद्धानि भाष्ये यानि पठितानि तानि प्रदर्श्यन्त इत्यर्थः । **प्रादय इति** । गताद्यर्थे विद्यमानाः प्रादयः समस्यन्त इत्यर्थः । **प्रगत आचार्य इति** । प्रेत्यस्य विवरणं गत इति, गत आचार्य इत्येव अस्वपदविग्रहः, नित्यसमासत्वात् । अभिगतो मुखम् अभिमुखः, प्रतिगतोऽक्षं प्रत्यक्ष इत्यादि ।

किम्, हस्ते कृत्वा कार्षापणं गतः । स्वीकारमात्रमिति पक्षे तु नालमिति बुद्ध्या परावृत्य दानार्थं गत इति योज्यम् । एवं तावद् गतिसमासनुदाहृत्य प्रादिसमासान् वक्तुमारभते । **प्रादिग्रहणमिति** । **सुपुरुष इति** । क्रियायोगाभावाद् गतित्वाभावः । अव्यवस्थया समासप्रसक्तौ व्यवस्थाप्रवचनानि पठ्यन्ते । **प्रादय इति** । आदिशब्द उभयत्र प्रकारे । तेन दुराचारः पुरुषो दुष्पुरुष इत्यादि सिद्धम् । **प्रगत आचार्य इति** । अनेन गतार्थे वृत्तिमस्वपदविग्रहेण नित्यसमासतां च दर्शयति । एवं प्रगतः पितामहः प्रपितामहः । प्रमातामह इत्यादि । **अत्यादय इति** । आदिपदादभिगतो

र्थे द्वितीयया' (वा १३३६) । (अतिक्रान्तो मालामतिमालः । 'अवादयः क्रुष्टाद्यर्थे तृतीयया' (वा १३३७) (अवक्रुष्टः कोकिलया अवकोकिलः । 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा १३३८) । (परिग्लानोऽध्ययनाय पर्यध्ययनः । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा १३३९) निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । 'कर्मप्रवचनीयानां प्रतिषेधः' (वा १३३६) वृक्षं प्रति । ७८१ तत्रोपपदं सप्तमीस्थम् । (३-१-९२) सप्तम्यन्ते पदे 'कर्मणि–' (सू २९१३)

अत्यादय इति । क्रान्ताद्यर्थे अत्यादयः समस्यन्त इत्यर्थः । **अतिक्रान्तो मालामिति** । अतिशब्दः क्रान्ते वर्तते । क्रान्तो मालामित्यस्वपदविग्रहः । तत्र क्रमुधातोरतिक्रमणमर्थः । **अतिमाल इति** । 'एकविभक्ति च–' इति मालाशब्दस्य उपसर्जनत्वाद् 'गोस्त्रियोः–' इति ह्रस्वः । **अवादय इति** । क्रुष्टाद्यर्थे अवादयः समस्यन्त इत्यर्थः । **अवकोकिल इति** । कोकिलया आहूत इत्यर्थः । **पर्यादय इति** । ग्लानाद्यर्थे पर्यादयः समस्यन्त इत्यर्थः । अध्ययनाय अध्ययनार्थम् , तेन श्रान्त इत्यर्थः । परिरत्र ग्लाने वर्तते । **निरादय इति** । क्रान्ताद्यर्थे निरादयः समस्यन्त इत्यर्थः । **निष्कौशाम्बिरिति** । अतिमालवद् ह्रस्वः । निरित्यव्ययं निर्गमने वर्तते । **कर्मप्रवचनीयानां प्रतिषेध इति** । वार्तिकमेतत् । **वृक्षं प्रतीति** । 'लक्षणेत्थम्–' इति कर्मप्रवचनीयत्वान्न प्रादिसमासः । इदं तु वार्तिकं भाष्ये प्रत्याख्यातम् । अथोपपदसमासं वक्ष्यन्नुपपदसंज्ञामाह—**तत्रोपपदं सप्तमीस्थम्** । अधिकारोऽयम् । सप्तमीति तदन्तग्रहणम् । सप्तम्यन्ते पदे वाच्यवाचकभावसंबन्धेन तिष्ठतीति सप्तमीस्थम् । सप्तम्यन्तवाच्यमिति यावत् । धातोरित्यधिकारसूत्रादुत्तरसूत्रमिदम् । ततश्च तदधिकारान्तर्गतेषु 'कर्मण्यण्' इत्यादिसूत्रेषु यत्सप्तम्यन्तमुच्चारितं तदेव इह विवक्षितम् । एवं च तदुदाहरणे कुम्भं करोति कुम्भकार इत्यत्र सप्तम्यन्तवाच्यं कुम्भादीति पर्यवसन्नम् । कुम्भादेश्च उपपदसंज्ञायां प्रयोजनाभावात्तद्वाचकपदेषु विश्राम्यति । तथा च धातोरित्यधिकारान्तर्गत कर्मणीत्यादिसूत्रे यत्सप्तम्यन्तं कर्मणीत्यादि तद्वाच्यं यत् कुम्भादि तद्वाचकं पदम् उपपदसंज्ञं स्यादित्यधिकृतं वेदितव्यमित्यर्थः फलति । तदाह—**सप्तम्यन्ते पद इत्यादिना** । तत्र 'धातोः कर्मणः समानकर्तृकात्–'

मुखमभिमुखः । उद्गतो वेलामुद्वेलः । प्रतिगतोऽक्षं प्रत्यक्ष इत्यादि सिद्धम् । **अतिमाल इति** । 'गोस्त्रियोः–' इति ह्रस्वः । **अवादय इति** । आदिपदात् परिणद्धो वीरुधा परिवीरुत् । संनद्धो वर्मणा संवर्मेति । **पर्यादय इति** । आदिपदादुद्युक्तः सङ्ग्रामाय उत्सङ्ग्रामः । **अध्ययनायेति** । तादर्थ्ये चतुर्थी । गुरुकुलवासादिना परिग्लानोऽध्ययनार्थमित्यर्थः । **निरादय इति** । आदिपदादुत्क्रान्तः कुलादुत्कुलः । निर्गतमङ्गु-

इत्यादौ वाच्यत्वेन स्थितं कुम्भादि, तद्वाचकं पदमुपपदसंज्ञं स्यात् । तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात्। ७८२ उपपदमतिङ् । (२-२-१९) उपपदं

इति, 'धातोरेकाचो हलादेः–' इति 'धातोः' इति च क्रमेण त्रयो धात्वधिकाराः। तत्र प्रत्यासत्त्या तृतीयधात्वधिकारस्थसप्तम्यन्तस्यैव ग्रहणाद् 'धातोरेकाचः–' इत्यधिकारे 'च्लि लुङि' इत्यत्र सप्तम्यन्तं न गृह्यते । अन्यथा कर्मणीत्यादाविव लुङन्ते अभूदित्यादावुपपदे धातोः च्लिरित्यर्थः स्यात् । ननु तत्रेति व्यर्थम्, तृतीयधात्वधिकारस्य प्रकृतत्वादेव ग्रहणसंभवादित्याशङ्क्याह—**तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यादिति** । अयमाशयः । तत्रेति भिन्नं वाक्यं क्रमव्यत्यासेन योज्यम् । सप्तमीस्थमुपपदसंज्ञं स्यात् । तत्र–तस्मिन्सति इति चाधिकृतं वेदितव्यमिति । तथा चोपपदे सति वक्ष्यमाणः प्रत्ययः स्यादिति तत्रेत्यस्यार्थः फलति। तथा च 'कर्मण्यण्' इत्यत्र इदं सूत्रमुपस्थितम् । कर्मणीति सप्तम्यन्तं प्रथमान्तत्वेन विपरिणम्यते। सप्तमीनिर्देशस्तु उपपदसंज्ञाप्रवृत्त्यर्थः। धातोरण् स्यात् कर्तर्यर्थे, कर्मवाचकं तु कुम्भादिपदम् उपपदसंज्ञं प्रत्येतव्यम्, तस्मिन्नुपपदे सत्येव अण् स्यादिति फलति । तस्मिन् सत्येवाण् स्यादित्यभावे तु कार इत्येवं केवलादपि धातोः कर्तर्यर्थे अण्प्रत्ययः स्यात्।

लिभ्यो निरङ्गुलम् । **प्रतिषेध इति** । 'कुगतिप्रादयः' इति प्रसक्तसमासस्य वक्तव्यः प्रतिषेधः, स च 'सुराजा, अतिसखा' इति भाष्यादिप्रयोगात्स्वतिभिन्नानामेव कर्मप्रवचनीयानामित्यर्थः । **वृक्षं प्रतीति** । 'लक्षणेत्थंभूता–' इति कर्मप्रवचनीयत्वविधिसामर्थ्यादिह समासो नेति चेत्, तर्हि अपिस्तुतमित्युदाहार्यम् । 'अपि स्तुयाद्विष्णुम्' इत्यादौ 'अपिः पदार्थसंभावना–' इत्यस्य सावकाशत्वात्स्वरे विशेषसत्त्वाच्चेत्याहुः । **तत्रोपपदम्** । सप्तमीस्थमित्येतद्व्याचष्टे—**सप्तम्यन्त इत्यादिना तद्वाचकं पदमिति** । एतच्चोपपदमित्यन्वर्थसंज्ञाबलाल्लभ्यते । अत एव संज्ञाविधावपि सप्तमीग्रहणेन सप्तम्यन्तं गृह्यते । 'धातोः' इति पृथगधिकारबलात् 'संनिहिते धात्वधिकारे' इति लभ्यते । तेन 'च्लि लुङि' इत्यस्य लुङन्ते अभूदित्यादावुपपदे धातोश्च्लिरित्यर्थो न भवति । तत्रग्रहणं व्याचष्टे—**तस्मिन् सत्येवेति** । उपपदे सत्येवेत्यर्थः । तत्रग्रहणाभावे तु 'घः कर्मणि ष्ट्रन्' इत्यादाविव 'कर्मण्यण्' इत्यादावपि कर्मण्यभिधेये अणित्याद्यर्थः स्यात् । तथा च कर्तर्यण् प्रत्ययो न स्यात् । किं च सप्तम्यन्तनिर्देशस्योपपदसंज्ञार्थतया चरितार्थत्वात्केवलादपि धातोः कर्तर्यण्प्रत्ययः संभाव्येत, कृते तु तत्रग्रहणे कुम्भाद्युपपदस्य प्रत्ययोत्पत्तौ निमित्तत्वप्रतीत्या केवलादण्प्रत्ययशङ्कैव नास्ति । एवं स्थिते 'घः कर्मणि–' इत्यादौ क्वचिदर्थग्रहणं व्याख्यानादित्याहुः। अन्ये तु 'तत्रोपपदम्–' इत्यस्य 'कर्मण्यण्' इत्यादेश्चैकवाक्यतया प्रवृत्तावुपपदसंज्ञाया

सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्चायं समासः । कुम्भं करोतीति कुम्भकारः । इह कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यम् । अतिङ् किम्–मा भवान् भूत्। 'माङि लुङ्' (सू २२१९) इति सप्तमीनिर्देशान्माङुपपदम् ।

कर्मणीति सप्तम्यन्तनिर्देशस्तु कुम्भकार इत्यादौ उपपदसंज्ञां प्रापय्य 'उपपदमतिङ्' इति नित्यसमासस्पादनेन कुम्भ इत्यस्य कार इत्यस्य च साधुत्वप्रापणार्थतया चरितार्थः। तस्मिन्नुपपदे सत्येवाण् स्यादित्युक्ते तु कुम्भाद्युपपदस्य अण्प्रत्ययोत्पत्तौ निमित्तत्वावगमाच्च केवलादण्प्रत्ययः, उपपदसंज्ञायाः प्रत्ययविधिसंनियोगशिष्टत्वलाभात् । 'धः कर्मणि ष्ट्रन्' 'भुवो भावे' इत्यादौ सप्तम्यन्तमर्थनिर्देशपरमेव, व्याख्यानादिति भाष्यकैयटादिषु स्पष्टम् । **उपपदमतिङ् । सुबन्तमिति ।** 'सुबामन्त्रिते' इत्यतस्तदनुवृत्तेरिति भावः । **समर्थेनेति ।** प्रथमान्तं समर्थग्रहणं तृतीयान्ततया विपरिणम्यत इति भावः । **अतिङन्तश्चायं समास इति ।** सूत्रे तिङिति तदन्तग्रहणमिति भावः । समासः तिङन्तघटितो न भवतीत्यर्थः । अतिङ् किम् ? कारको व्रजति । 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति व्रजतावुपपदे कृञो ण्वुल्, अकादेशः । उपपदं समर्थेनेत्येतावत्युक्ते इहाप्युपपदसमासः स्यात् । अतः अतिङ्ग्रहणम् । नन्वेवं सुबित्यनुवृत्तेः प्रयोजनाभाव इति वाच्यम्, चर्मकार इत्यत्र नलोपार्थकत्वात् । उपपदमतिङन्तं समर्थेन समस्यत इति व्याख्याने तु सुबिति नानुवर्तेत । ततश्च चर्मकार इत्यत्र नलोपो न स्यादिति भावः । **कुम्भमिति ।** कुम्भं करोतीत्यर्थे 'कर्मण्यण्' इति कर्मीभूतकुम्भवाचकपदे उपपदे कृञ्धातोः कर्तरि अण्प्रत्यये 'अचो ञ्णिति' इति वृद्धौ रपरत्वे कारशब्दः । तेन कुम्भशब्दस्य समासे कुम्भकारशब्द इत्यर्थः । ननु कुम्भं करोतीति कथं विग्रहप्रदर्शनम्, अतिङन्तः समास इत्युक्तत्वादित्यत आह—**कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यमिति ।** लोके प्रयोगानर्हत्वमलौकिकत्वम् । 'प्रत्ययोत्तरपदयोश्च' इति सूत्रभाष्यरीत्या अलौकिकविग्रहवाक्य एव समासप्रवृत्तिः । कुम्भं करोतीति तदर्थप्रदर्शनमात्रमिति भावः । कुम्भ अम् कार इत्यपपाठः, कृद्योगे षष्ठ्या विधानात । **मा भवान् भूदिति ।** अत्र भूदिति तिङन्तेन माङः समासनिवृत्त्यर्थमतिङ्ग्रहणमिति भावः । भवानिति पदं तु

निर्विषयत्वापत्तेस्तद्ग्रहणं विनापीष्टं सिद्ध्यत्येवेत्याहुः। **उपपदमतिङ्। समर्थेनेति।** तेन महान्तं कुम्भं करोतीत्यादौ नातिप्रसङ्गः। **अतिङन्तश्चेति ।** सुबिति तु अनुवर्तत एवेति अतिङन्तमिति नोक्तमिति भावः। **कुम्भ असिति ।** अमिति तु नोक्तम्, कृद्योगे षष्ठीविधानात् । **अतिङ् किमिति ।** 'सुपा' इत्यधिकारात्किमनेनेति प्रश्नः। इतरो वक्ष्यमाणं ज्ञापकं मनसि निधाय प्रत्युदाहरति—**मा भवानिति ।** समासाभावसूच-

अतिङ्ग्रहणं ज्ञापयति सुपा इत्येतन्नेहानुवर्तत इति । पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्यातिङ्ग्रहणं तत्रापकृष्यते । सुपा इति च निवृत्तम् । तथा च 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' (प ७६) इति सिद्धम् । व्याघ्री । अश्वक्रीती । कच्छपी । ७८३ अमैवाव्ययेन । (२-२-२०) अमैव

समासाभावसूचनाय मध्ये प्रयुक्तम् । ननु माङः तृतीयधात्वधिकारे सप्तमीनिर्दिष्टत्वं तु अदृष्टम्, येन तस्य उपपदत्वात् समासः प्रसज्यत इत्यत आह--**माङिति** । ननु अतिङ्ग्रहणं व्यर्थम्, मा भवान् भूदित्यत्र सुपेत्यनुवृत्त्यैव समासनिवृत्तिसंभवादित्यत आह—**अतिङ्ग्रहणमिति** । एवं च उपपदम् असुबन्तेन समस्यत इति फलितम् । गतिसमासोऽप्यसुबन्तेनेत्याह—**पूर्वसूत्र इति** । उत्तरसूत्रात्पूर्वसूत्रे अनुवृत्तिरपकर्षः ।'कुप्रादयः' इति 'गति' इति च योगो विभज्यते। कुप्रादयः सुबन्तेन समस्यन्ते। गतिस्तु समर्थेन समस्यते । अतिङन्तश्च समास इति व्याख्येयमिति यावत् । ततः किमित्यत आह—**तथा चेति** । गतिकारकोपपदानां कृदन्तैः सह सुबुत्पत्तेः प्राक् समासो वक्तव्य इति प्राचीनव्याकरणोक्तं सिद्धं भवतीत्यर्थः । यद्यप्युक्तरीत्या गत्युपपदयोरेव लाभः, तथाप्येकदेशानुमतिद्वारा प्राचीनपरिभाषेयं सिध्यति अथ परिभाषायाः फलं दर्शयितुं गतिसमासमुदाहरति--**व्याघ्रीति** । व्याजिघ्रतीति व्याघ्रः । व्याङ्पूर्वाद् घ्राधातोः 'आतश्चोपसर्गे' इति कः, 'आतो लोप इटि च' इत्याल्लोपः । 'पाघ्राध्माधेट्दृशःशः' इति तु न भवति, 'जिघ्रतः संज्ञायां नेति वाच्यम्' इति निषेधात् । आङो घ्रशब्देन गतिसमासः । आघ्रशब्देन वेः गतिसमासः । तत्र यदि घ्रशब्दस्य सुबन्तत्वमपेक्ष्येत तर्हि स्त्रीप्रत्यये उत्पन्ने सुबुत्पत्तिः स्यात, स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्याणां क्रमिकत्वस्य 'कुत्सिते' इति सूत्रस्थभाष्यदर्शितस्य ङ्याप्प्रातिपदिकात्' इत्यत्र अस्माभिः प्रपञ्चितत्वात् । ततश्च सुबुत्पत्तये लिङ्गसंख्याकारकं क्रमेण अपेक्ष्यमिति प्रथमं लिङ्गसंयोगे सति अदन्तत्वात् टाप् स्यात् । न तु जातिलक्षणङीष्, घ्रशब्दमात्रस्य जातिवाचित्वाभावात् । ततश्च घ्राशब्देन सुबन्तेन समासे सति व्याघ्राशब्दस्य

नाय भवानिति मध्ये प्रयुक्तम् । **पूर्वसूत्र इति** । 'कुप्रादयः गतिः' इति योगं विभज्य 'कुप्रादयः सुबन्ताः सुबन्तेन समस्यन्ते, गतिस्तु सुबन्तोऽतिङन्तेन समस्यत इति व्याख्येयमित्यर्थः । **तथा चेति** । यद्यप्युक्तरीत्या गत्युपपदयोरेव लाभः, तथापि त्रितयविषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा इहापि ज्ञाप्यत इति भावः । कारकांशे तु 'कर्तृकरणे कृता–' इति सूत्रस्थबहुलग्रहणमुक्तार्थे साधकमित्यपि मनोरमायां स्थितम् । **प्रागिति** । कृदन्तावरमपदात्सुबुत्पत्तेः पूर्वं समास इत्यर्थः । प्रथमान्तसुब्ग्रहणं त्विहानुवर्तत एव । तेन राजदर्शीत्यादौ पूर्वपदे नलोपादि कार्यं सिद्ध्यति । परिभाषा-

अदन्तत्वाभावाद् जातिलक्षणो ङीष् न स्यादिति भावः। यद्यप्युपपदत्वेनाप्येतत्सिद्धम्, तथापि गतित्वसंभवमात्रेणेदमित्याहुः। वस्तुतस्तु आङो घ्राशब्देन उपपदसमासः, 'आतश्चोपसर्गे' इति सप्तमीनिर्देशात्। येस्तु आघ्रशब्देन गतिसमास इति तदंशे गतिसमासोदाहरणमित्याहुः। अथ कारकसमासमुदाहरति—**अश्वक्रीतीति**। अश्वेन क्रीतेति विग्रहे 'कर्तृकरणे कृता—' इति समासः। 'क्रीतात्करणपूर्वात्' इति ङीष्। सुबन्तेन समासे तु उक्तरीत्या पूर्वं टापि अदन्तत्वाभावाद् ङीष् न स्यादिति भावः। उपपदसमासमुदाहरति—**कच्छपीति**। कच्छः तीरम्, तेन तस्मिन् वा पिबतीति कच्छपी। 'सुपि स्थः' इत्यत्र 'सुपि' इति योगविभागात् कः, उपपदसमासः। तस्य सुबन्तापेक्षायाम् उक्तरीत्या टावेव स्यात्, न तु जातिलक्षणङीषिति भावः। **अमैवाव्ययेन**। अमैवेत्यनन्तरं तुल्यविधानमित्यध्याहार्यम्। 'तुल्यार्थैरतुलो-

---

फलं दर्शयन् गतिमुदाहरति—**व्याघ्रीति**। व्याजिघ्रतीति व्याघ्री। 'आतश्चोपसर्गे' इति कः। 'पाघ्राध्माधेट्—' इति शस्तु संज्ञायां न भवति, व्याघ्रादिभिरिति निर्देशादिति वक्ष्यते। व्याङोर्घ्रशब्देन गतिसमासः। स यदि घ्रशब्दस्य सुबन्ततामपेक्षेत, तर्हि सुबुत्पत्तये संख्याद्यपेक्षेत। ततः प्रागेव लिङ्गयोग इति लिङ्गनिमित्तप्रत्ययेन टापा भाव्यं न तु ङीषा। घ्रशब्दमात्रस्य जातिवाचित्वाभावात्, ततो घ्रशब्देन समास इत्यदन्तत्वाभावाज्जातिलक्षणो ङीष् न स्यादिति भावः। यद्यप्युपपदत्वेनाप्येतत्सिद्धम्, तथापि गतिग्रहणमाङो घ्रशब्देन सामासे पश्चादाघ्रशब्देन विशब्दस्य समासार्थमावश्यकमेव। आङ्पूर्वाद्धातोः कप्रत्ययविधानादाङ्युपपदसंज्ञाभ्युपगमेऽपि विशब्दे तदनभ्युपगमादिति बोध्यम्। कारकमुदाहरति—**अश्वक्रीतीति**। अश्वेन क्रीता। 'कर्तृकरणे कृता-' इति समासः। 'क्रीतात्करणपूर्वात्' इति ङीष्। सुबन्तेन समासे तु टापा भाव्यमित्यदन्तत्वाभावात् 'क्रीतात्करण—' इत्ययं ङीष् न स्यादिति ज्ञेयम्। उपपदमुदाहरति—**कच्छपीति**। कच्छेन पिबतीति कच्छपी। 'सुपि' इति योगविभागात्कः। इहापि समासस्य सुबन्ततापेक्षायां टाबेव स्यान्न ङीषित्यादिव्याघ्रीत्यत्रेव बोध्यम्। प्राचा तु 'उपपदमतिङन्तं समस्यते' इत्युक्तम्, तदसत्। तथा सति प्रथमान्तसुब्ग्रहणनिवृत्त्यापत्त्या राजदर्शी चर्मकार इत्यादौ नलोपो न स्यादपदान्तत्वात्। प्राटितेत्यादौ 'अतो गुणे' इति पररूपं च स्यात्। स्यादेतत्—कच्छेन साधनेन पिबतीत्यर्थाभ्युपगमे कच्छस्य कारकत्वेन कच्छपीति रूपसिद्धौ नेदमुपपदस्यासाधारणोदाहरणमिति चेत्, एवं तर्हि माषवापिणीत्युदाहर्तव्यम्। 'सुप्यजातौ—' इति णिनौ कृते माषोपपदस्य कृदन्तेन समासे 'प्रातिपदिकान्त—' इत्यादिना पूर्वपदस्थान्निमित्तात्परस्य समासप्रातिपदिकान्तनकारस्य णत्वं सिद्ध्यति। सुबन्तेन समासे त्वन्तरङ्गत्वात्प्रान्त-

तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते। स्वादुङ्कारम् । नेह—'कालसमयवेलासु तुमुन्' (सू ३१७१) । कालः समयो वेला वा भोक्तुम्। अमैवेति किम्—अग्रे भोजम्—अग्रे भुक्त्वा । 'विभाषाऽग्रेप्रथमपूर्वेषु' (सू ३३४५) इति क्त्वाणमुलौ । अमा चान्येन च तुल्यविधानमेतत् । ७८४ तृतीयाप्रभृतीन्यन्यतरस्याम् । (२-२-२१) 'उपदंशस्तृतीयायाम्' (सू

पमाभ्याम्—' इति तृतीया । **अमैव तुल्येति** । अम्प्रत्ययमात्रविधायकशास्त्रेण अमैव सह यस्य उपपदसंज्ञा विधीयते तदुपपदमव्ययेन समस्यत इति यावत् । पूर्वसूत्रेणैव सिद्धे नियमार्थमिदमित्याह—**तदेवेति** । विवरणवाक्ये द्वितीय एवकारो नियमलभ्यः, न तु सूत्रस्थः, तस्य अप्राप्ते अमा तुल्यविधानत्वे अवधारणार्थत्वात् । **स्वादुंकारमिति** । स्वादुं कृत्वेत्यर्थः । ओदनं भुङ्क्ते इति शेषः । 'स्वादुमि णमुल्' इति णमुल्, स्वादुशब्दस्य मान्तत्वं निपातनात् । 'कृन्मेजन्तः' इत्यव्ययत्वम् । तदेवेति नियमस्य प्रयोजनमाह—**नेहेति** । उपपदसमास इति शेषः । **भोक्तुमिति** । यद्यपि 'कालसमयवेलासु—' इति सप्तमीनिर्देशात् कालसमयवेलानामुपपदत्वम् , तथापि कालादीनामुपपदसंज्ञा तुमुना तुल्यविधानैव, न त्वमा । अत एव कालादीनामुपपदत्वेऽपि न समास इत्यर्थः । **अमैवेति किमिति** । अमैवेत्येवकारः किमर्थ इति प्रश्नः । **अमा चान्येन चेति** । अम्प्रत्ययेन क्त्वाप्रत्ययेन च सह उपपदसंज्ञा अग्रेप्रथमपूर्वशब्दानां विहिता, ततश्च उपपदत्वस्य अमैव तुल्यविधानत्वाभावाद् न उपपदसमास इति भावः। **तृतीयाप्रभृतीन्यन्यतरस्याम्** । तृतीयाशब्देन 'उपदंशस्तृतीयायाम्' इत्यारभ्य 'अन्वच्यानुलोम्ये' इत्यन्तसूत्रोपात्तान्युपपदानि विवक्षितानि । अमेति, अव्ययेनेति चानुवर्तते, एवकारस्तु नानुवर्तते, अस्वरितत्वात् । अमेत्येतदव्ययविशेष-

---

लक्षणे ङीपि पश्चाद्यापिनीशब्देन समासे गर्गभगिनीत्यत्रेव णत्वं न स्यादित्येके । अन्ये तु कच्छेन हेतुना पिबतीत्यर्थविवक्षायां कच्छस्याकारकत्वात्कच्छपीत्युपपदस्योदाहरणं सम्यगेवेत्याहुः । **अमैवाव्ययेन** । पूर्वेण सिद्धे नियमार्थमिदम् । **तुल्यविधानमिति** । एतच्चाध्याहारेण लभ्यम् । **तदेवेति** । यस्मिन्नुपपदे येन वाक्येन अमेव विहितस्तदेवोपपदमव्ययेन समस्यते नान्यदित्यर्थः । नियमबललभ्योऽयमेवकारो न तु सूत्रस्थः । **स्वादुंकारमिति** । 'स्वादुमि णमुल्' । अव्ययेनेति किम् , कुम्भकारः । असति ह्यव्ययग्रहणे अमैव यत्तुल्यविधानं तदेव केनचित्समर्थेन समस्यते । तथा सति 'स्वादुंकारः' इत्यत्रैव समासः स्यान्न तु कुम्भकार इत्यत्र । अथ पूर्वसूत्रवैयर्थ्यभीत्या अव्ययविषयकनियम इति चेत् , तर्हि अमन्तविषयक एव किं न स्यात्, 'अमन्तेन यः समासः सोऽमैव तुल्यविधानस्य' इति । तथा चाग्रेभोजमित्यत्र समासो

३३६८) इत्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं भुङ्क्ते-मूलकोपदंशम् । उच्चैःकारम् । ७८५ क्त्वा च। (२-२-२२) तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य, उच्चैः कृत्वा। 'अव्ययेऽयथाभिप्रेत-' (सू ३३८१) इति क्त्वा। तृतीयाप्रभृतीनीति किम्-अलं कृत्वा, खलु कृत्वा। ७८६ तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः।

णम्। तदाह--**उपदंशस्तृतीयायामित्यादिना**। **मूलकेन उपदंशं भुङ्क्ते मूलकोपदंशमिति**। 'उपदंशस्तृतीयायाम्' इति णमुल्। अमैव तुल्यविधानत्वात् पूर्वसूत्रेण नित्यं[1] प्राप्ते विकल्पोऽयम् । ननु मूलकेनेत्यस्य भुङ्क्त इत्यत्रैवान्वयाद् उपदंश इत्यत्रानन्वयादसामर्थ्यात् कथमिह समास इति चेत्, मैवम्--उपदंशनक्रियां प्रति हि मूलकस्य आर्थिकं कर्मत्वमादाय सामर्थ्यमुपपाद्यम्। तृतीया तु प्रधानक्रियानुरोधात् परत्वाच्चोपपाद्येत्यन्यत्र विस्तरः। **उच्चैःकारमिति**। उच्चैः कृत्वेत्यत्र तु 'अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ'। तत्र उच्चैःकारमित्यत्र उपपदत्वस्य अमैव तुल्यविधानत्वाभावाद् 'अमैवाव्ययेन' इत्यप्राप्ते अनेन विकल्पः। समासपक्षे 'आदिर्णमुल्यन्यतरस्याम्' इति कृदुत्तरपदप्रकृतिस्वर आद्युदात्तत्वम्। असमासपक्षे तु उच्चैरिति फिट्सूत्रेण अन्तोदात्तत्वमिति फले भेदः। अमन्तेनेति किम्? पर्याप्तो भोक्तुम्। 'पर्याप्तिवचनेषु' इति तुमुन्। **क्त्वा च**। तृतीयाप्रभृतीनीति पूर्वसूत्रमनुवर्तते। क्त्वेति तृतीयार्थे प्रथमा। टायां 'सुपां सुलुक् पूर्वसवर्ण-' इति पूर्वसवर्णदीर्घ इत्यपरे। तदाह--**तृतीयेति**। ननु 'उपदंशस्तृतीयायाम्' इत्यतः प्रागेव समानकर्तृकयोरिति क्त्वाविधेः पाठात् कथमुच्चैः कृत्वेत्युदाहरणमित्यत आह--**अव्ययेऽयथेति**। 'अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ' इति सूत्रेणेत्यर्थः। **अलं कृत्वेति**। 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इत्येतद् 'उपदंशस्तृतीयायाम्' इत्यतः पूर्वमेव पठितम्। अतः तद्विहितक्त्वो मान्तेन सह समासाभावाद् न ल्यबिति भावः। इत्युपपदसमासाः।

मा भूत्, अग्रे भुक्त्वा कालो भोक्तुमित्यत्र तु स्यादेवेति भावः। तदेवेति किम्, कालो भोक्तुम्, समयो भोक्तुम्। अमैवेत्येवकारेणामा चान्येन च तुल्यविधानस्योपपदस्य समासनिवारणेऽपि तुमुना तुल्यविधानस्य स्यादेव, अतस्तन्निवारणाय तदेवेत्युक्तम्। **तृतीयाप्रभृतीन्यन्यतरस्याम्**। उभयत्र विभाषेयम्। अमैव तुल्यविधानस्य प्राप्तेऽमा चान्येन च तुल्यविधानस्याप्राप्ते चारम्भात्। प्राप्ते यथा--'उपदंशस्तृतीयायाम्' मूलकेनोपदंशं मूलकोपदंशम्। अप्राप्ते यथा--'अव्ययेऽयथाभिप्रेताख्यान-' इति क्त्वाणमुलौ। उच्चैःकारम्। इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः 'आदिर्णमुल्यन्यतरस्याम्' इत्याद्युदात्तत्वम्। असमासे तु उच्चैरित्यन्तोदात्तत्वम्। 'उदि चेर्डैसिः' इति

[1] 'नित्ये' इति क्वचित् पाठः।

(५-४-८६) संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात् । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलं दारु । निर्गतमङ्गुलिभ्यो निरङ्गुलम् । ७८७ अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः । (५-४-८७) एभ्यो रात्रेरच्स्यात्, चात्संख्याव्ययादेः । 'अहर्ग्रहणं द्वन्द्वार्थम्' (वा ३३५२) अहश्च रात्रिश्चाहो-

---

अथ तत्पुरुषेषु असाधारणसमासान्तान् वक्तुमुपक्रमते—**तत्पुरुषस्यांगुलेः संख्याव्ययादेः** । 'अच्प्रत्यन्ववपूर्वात्-' इत्यतः अजित्यनुवर्तते, समासान्त इत्यधिकृतम् । तेन समासस्य अन्तावयव इति लभ्यते । प्रत्ययः परश्च इत्यधिकाराद् अच्प्रत्ययस्य तत्पुरुषात् परत्वेऽपि तस्य तदवयवत्वाद् अङ्गुलेरिति अवयवषष्ठी । अङ्गुलेरिति तत्पुरुषविशेषणम्, तदन्तविधिः । तदाह—**संख्याव्ययादेरिति** । संख्या च अव्ययं च संख्याव्यये, ते आदी यस्येति विग्रहः । **द्व्यङ्गुलमिति** । 'तद्धितार्थे-' इति द्विगुः । 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' 'प्रमाणे लः' 'द्विगोर्नित्यम्' इति लुक् । द्व्यङ्गुलिशब्दादचि तस्य तद्धितत्वात्तस्मिन् परे 'यस्येति च' इति इकारलोपः । **निरङ्गुलमिति** । 'निरादयः कान्ताद्यर्थे-' इति समासः, अच्, इलोपः । **अहस्सर्वैकदेशसंख्यातपुण्याच्च । एभ्यो रात्रेरिति** । अहन्, सर्व, एकदेश, संख्यात, पुण्य एभ्यः परस्य रात्रिशब्दस्येत्यर्थः । अहन्नादिपूर्वपदकस्य रात्र्यन्तस्य तत्पुरुषस्येति यावत् । ननु अहरादिः रात्र्यन्तस्तत्पुरुषो नास्त्येव । अह्नो रात्रिरिति वा अहश्चासौ रात्रिश्चेति वा असंभवादित्यत आह—**अहर्ग्रहणं द्वन्द्वार्थमिति** । न च ब्रह्मणो यदहः तस्यावयव-

---

व्युत्पत्तिपक्षे प्रत्ययस्वरस्य, अव्युत्पत्तिपक्षे तु 'फिषः' इत्यस्य च प्रवृत्तेरित्याहुः । मनोरमायां तु उच्चैरित्यन्तोदात्तस्वरादिषु तथा पाठादिति स्थितम् । अमेत्यनुवर्तत इत्याह—**अमन्तेनेति** । तेनेह न—पर्याप्तो भोक्तुम् । 'पर्याप्तिवचनेषु-' इति तुमुन् । **क्त्वा च** । क्त्वेति तृतीयान्तम् । 'आतः' इति योगविभागादालोपः, 'क्त्वि स्कन्दिस्यन्दोः' इतिवदिति हरदत्तः । तन्न । सवर्णदीर्घेणापि तृतीयान्तत्वोपपत्तेः । **अलं कृत्वेति** । 'अलंखल्वोः प्रतिषेधयोः-' इति सूत्रस्य 'उपदंशस्तृतीयायाम्' इत्यस्मात्पूर्वत्वान्नेह समासः । तत्पुरुषे असाधारणान्समासान्तानाह—**तत्पुरुषस्येति** । अलोन्त्यविधिं बाधित्वा 'प्रत्ययः' 'परश्च' इति परत्वात्तत्पुरुषात्पर एवाच्प्रत्ययो भवति । यथा गापोष्टक: कित्वेऽपि गापाभ्यां पर एव टग् भवति, न त्वन्तावयवः । अमस्तु अनुबन्धकरणसामर्थ्यात्परविधिर्बाध्यते । एवं च लाघवात् 'तत्पुरुषादङ्गुलेः-' इति वक्तव्ये 'तत्पुरुषस्याङ्गुलेः-' इति तु समासान्तापेक्षया अवयवषष्ठीत्याहुः । **द्व्यङ्गुलमिति** । 'तद्धितार्थ-' इति समासः । 'द्विगोर्नित्यम्' इति मात्रचो लोप इति वृत्तिकृत् । मनोरमायां तु द्वयसचो लुगिति स्थितम् । **द्वन्द्वार्थमिति** । अह्नो रात्रिरिति

रात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वं रात्रेः पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारो द्विरात्रम्। अतिक्रान्तो रात्रिमतिरात्रः। ७८८ **राजाहस्सखिभ्यष्टच्।** (५-४-९१) एतदन्तात्तत्पुरुषाट्टच्स्यात्। परमराजः। अतिराजी कृष्णसखः। ७८९ **अह्नष्टखोरेव।** (६-४-१४५) एतयोरेव परतोऽह्नष्टिलोपः

भूता या मानुषी रात्रिरिति षष्ठीतत्पुरुषः संभवतीति वाच्यम्, अहर्ग्रहणं द्वन्द्वार्थमिति भाष्यप्रामाण्येन एवं जातीयकतत्पुरुषस्य प्रयोगाभावोन्नयनात्। **अहोरात्र इति।** द्वन्द्वादच्, इलोपः, 'जातिरप्राणिनाम्' इत्येकवत्त्वम्। 'स नपुंसकम्' इति बाधित्वा, 'रात्राह्नाहाःपुंसि' इति पुंस्त्वम्। **सर्वा रात्रिः सर्वरात्र इति।** सर्वा रात्रिरिति विग्रहे 'पूर्वकालैक–' इति कर्मधारयः। अच्, इकारलोपः। 'रात्राह्ना–' इति पुंस्त्वम्। 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवत्त्वम्। एकदेशेत्यर्थग्रहणमित्यभिप्रेत्योदाहरति–**पूर्वमिति।** पूर्वं रात्रेरिति विग्रहे 'पूर्वापराधरोत्तरम्–' इत्येकदेशिसमासः। अच्, इलोपः, 'रात्राह्ना–' इति पुंस्त्वम्। **संख्यातरात्र इति।** संख्याता रात्रिरिति विग्रहे कर्मधारयः। 'पुंवत्कर्मधारय–' इति पुंवत्त्वम्। **पुण्यरात्र इति।** पुण्या रात्रिरिति विग्रहे कर्मधारयः। 'पुंवत्कर्मधारय–' इति पुंवत्त्वम्। अच् इलोपः 'रात्राह्ना–' इति पुंस्त्वम्। **द्विरात्रमिति।** तद्धितार्थ इति द्विगुः। संख्यादित्वादच्, इलोपः। 'संख्यापूर्वं रात्रं क्लीबम्' इति नपुंसकत्वम्। **अतिरात्र इति।** 'अत्यादयः क्रान्ताद्यर्थे–' इति समासः। अव्ययादित्वादच्, इलोपः, 'रात्राह्ना–' इति पुंस्त्वम्। **राजाहस्सखिभ्यष्टच्।** 'तत्पुरुषस्याङ्गुलेः–' इत्यतः तत्पुरुषस्येत्यनुवृत्तं पञ्चमीबहुवचनत्वेन विपरिणतं राजाहस्सखिभ्य इत्यनेन विशेष्यते। तदन्तविधिः, तदाह–**एतदन्तादिति। परमराज इति।** परमश्चासौ राजा चेति विग्रहः। समासान्तष्टच्। 'नस्तद्धिते' इति टिलोपः। **अतिराज इति।** अतिक्रान्तो राजानमिति विग्रहः, 'अत्यादयः–' इति समासः। टचि टिलोपः। **कृष्णसख इति।** कृष्णस्य सखेति विग्रहः समासान्तष्टच्। 'यस्येति च'

षष्ठीतत्पुरुषस्यासंभवादिति भावः। ननु अहःशब्दस्याहस्तुल्यतायां रात्रिशब्दस्य वा रात्रितुल्यतायां गौणत्वसंभवादहश्चासौ रात्रिश्चेति कर्मधारयोऽस्त्विति चेन्न। मुख्यसंभवे गौणग्रहणायोगात्। 'हेमन्तशिशिरावहोरात्रे च–' इत्यत्र द्वन्द्वे समासान्तदर्शनाच्च। **अहोरात्र इति।** 'जातिरप्राणिनाम्' इत्येकवद्भावः। 'स नपुंसकम्' इत्येतद्बाधित्वा परत्वाद् 'रात्राह्नाहाः–' इति पुंस्त्वम्। एतेनैकवद्भावात् क्लीबतेति प्राचो ग्रन्थः परास्तः। 'मासेन स्यादहोरात्रः' इत्यादिग्रन्थविरोधाच्च। **सर्वरात्र इति।** 'पूर्वकालैक–' इति समासः। **पूर्वरात्र इति।** 'पूर्वापराधरोत्तरम्–' इत्येकदेशिसमासः। यदा तु रात्रिशब्दस्यैकदेशे लक्षणां स्वीकृत्य कर्मधारयोऽभ्युपगम्यते तदा पूर्वरात्रिरित्येव भवति। **द्विरात्रमिति।** 'संख्यापूर्वं रात्रं क्लीबम्' इति वक्ष्यते।

स्यात्, नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः क्रतुः। तद्धितार्थे द्विगुः। 'तमधीष्टः-' (सू १७४४) इत्यधिकारे 'द्विगोर्वा' इत्यनुवृत्तौ 'रात्र्यहस्संवत्सराच्च' (सू १७५१) इति खः। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह-मद्राणां राज्ञी मद्रराज्ञी। ७६० अह्नोऽह्न एतेभ्यः। (५-४-८८) सर्वादिभ्यः पर-

इति इकारलोपः। अह्नष्टखोः। शेषपूरणेन सूत्रं व्याचष्टे—**टिलोपः स्यादिति**। टेरित्यनुवर्तते, 'अल्लोपोऽनः' इत्यस्माद् लोप इति चेति भावः। 'नस्तद्धिते' इत्येव सिद्धे नियमार्थमिदमित्याह—**नान्यत्रेति**। एवकारस्तु अह्न एव टखोरिति विपरीतनियमव्यावृत्त्यर्थः। टखोरेवेति किम्? अह्ना निर्वृत्तम् आह्निकम्, 'कालाट्ठञ्' इत्यधिकारे 'तेन निर्वृत्तम्' इति ठञ्। टिलोपाभावादल्लोपः। टप्रत्यये उदाहरति—**उत्तमाह इति**। उत्तमं च तदहश्चेति विशेषणसमासः। 'राजाहस्सखिभ्यष्टच्' इति टच्। 'अह्नष्टखोरेव' इति प्रकृतिसूत्रेण टिलोपः, 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम्। ख उदाहरति—**द्वे अहनी भृत इति**। अत्यन्तसंयोगे द्वितीया। भृतः परिक्रीत इत्यर्थः। द्व्यहीन इत्यत्र प्रक्रियां दर्शयति—**तद्धितार्थे द्विगुरिति**। कोऽत्र तद्धित इत्यत आह—**तमधीष्ट इत्यादि**। तथा च द्व्यहन्शब्दात् खस्य ईनादेशे 'अह्नष्टखोरेव' इति टिलोपे द्व्यहीन इतिरूपमित्यर्थः। नन्वत्र 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः कुतो न स्यात्। न च खे टिलोपविधिसामर्थ्यान्नाह्नादेश इति वाच्यम्, अहीन इत्यत्र खे टिलोपविधेः चरितार्थत्वात्, इति चेत्, न—समासान्ते पर एवाह्नादेशविधानात्। प्रकृते तु समासान्तविधेरनित्यत्वाद् 'राजाहस्सखिभ्यः-' इति न टच्। यद्यपि उत्तमाह इत्यत्र द्व्यहीन इत्यत्र च 'नस्तद्धिते' इत्येव टिलोपः सिद्धः, तथापि आह्निकमित्यादावावश्यकस्य नियमविधेर्विधिमुखेनापि प्रवृत्त्यभ्युपगमादिह तदुपन्यासः। ननु मद्राणां राज्ञी मद्रराज्ञीत्यत्रापि लिङ्गविशिष्टपरिभाषया 'राजाहस्सखिभ्यः-' इति टच् स्यादित्याशङ्क्याह—**लिङ्गेति। अनित्यत्वादिति**। समासान्तप्रकरणे लिङ्गविशिष्टपरिभाषा नेति 'ङ्याप्प्रातिपदिकात्-' इत्यत्र भाष्ये उक्तत्वादिति भावः। **मद्रराज्ञीति**। न च टचि सत्यपि 'यस्येति च' इतीकारलोपे मद्रराज्ञ्शब्दात् टित्त्वाद् ङीपि मद्रराज्ञीति निर्बाधमिति वाच्यम्, टचि हि सति 'भस्याढे तद्धिते' इति पुंवत्त्वे टिलोपे मद्रराजी इति स्यादिति भावः। **अह्नोऽह्न एतेभ्यः**। पूर्वसूत्रे अहस्सर्वैकदेशसंख्यातपुण्यशब्दा

अह्नष्टखोरेव। 'नस्तद्धिते' इत्येव सिद्धे नियमार्थमिदम्। एवकारस्त्वह्न एव टखयोरिति विपरीतनियमशङ्कानिरासार्थः। 'आत्माध्वानौ खे' इति प्रकृतिभावविधानेन तन्निरासे प्रतिपत्तिगौरवं स्यादिति भावः। टखोरेवेति किम्, अह्ना निर्वृत्तमाह्निकम्। 'कालात्' इत्यधिकारे 'तेन निर्वृत्तम्' इति ठञ्। टिलोपाभावाद् 'अल्लोपोऽनः' इत्यकारलोपः। **उत्तमाह इति**। 'सर्वैकदेशसंख्यात-' इत्यत्र उत्तमशब्दस्यापाठादह्ना-

स्याहन्शब्दस्याह्नादेशः स्यात् समासान्ते परे । ७६१ अह्नोऽदन्तात् । (८-४-७) अदन्तपूर्वपदस्थाद्रेफात्परस्याऽह्नादेशस्य नस्य णः स्यात् । सर्वाह्णः । पूर्वाह्णः । संख्याताह्नः । द्वयोरह्नोर्भवः, 'कालाट्ठञ्' (सू १३८१) 'द्विगोर्लुगनपत्ये' (सू १०८०) इति ठञो लुक्, द्व्यह्नः । स्त्रियामदन्तत्वाट्टाप्, द्व्यह्ना । द्व्यह्नप्रियः ।

निर्दिष्टाः । तत्र चकारेण संख्याव्यये अनुकृष्टे । अहश्शब्दवर्जं ते सर्वे एतच्छब्देन परामृश्यन्ते, न त्वहश्शब्दः, अहश्शब्दात् परस्य अहन्शब्दस्य तत्पुरुषे असंभवादित्यभिप्रेत्य व्याचष्टे—**सर्वादिभ्य इति । समासान्ते पर इति ।** एतत् तु प्रकरणाल्लब्धम् । **अह्नोऽदन्तात् ।** 'पूर्वपदात्संज्ञायाम्–' इत्यतः पूर्वपदादित्यनुवृत्तम् अदन्तादित्यत्रान्वेति । 'रषाभ्यां नो णः–' इति सूत्रं षकारवर्जमनुवर्तते । पूर्वपदादित्यनेन पूर्वपदस्थादिति विवक्षितम्, तदाह—**अदन्तपूर्वेति ।** तदन्तविधिनैव सिद्धे अन्तग्रहणं स्पष्टार्थम् । लक्षेषु अहस्सु भवो लक्षाह्ण इत्यत्र णत्वार्थं षादित्यपि बोध्यम् । समासान्ते पर इति किम् ? द्वे अहनी भृतो द्व्यहीनः । अत्र समासान्तविधेरनित्यत्वात् टजभावे अह्नादेशो न । **सर्वाह्ण इति ।** सर्वमहरिति विग्रहे 'पूर्वकाल–' इति समासे 'राजाहस्सखिभ्यः–' इति टच्, अह्नादेशः, णत्वम्, 'रात्राह्नाहाः–' इति पुंस्त्वम् । **पूर्वाह्ण इति ।** समासादि सर्वाह्णवत् । **संख्याताह्न इति ।** संख्यातमहरिति विग्रहः । विशेषणसमासः, टच्, अह्नादेशः । निमित्ताभावान्न णत्वम् । पुण्यपूर्वस्य त्वग्रे वक्ष्यते । संख्यापूर्वस्य उदाहरति—**द्वयोरह्नोरित्यादि । द्व्यह्न इति ।** तद्धितार्थे द्विगुः । टच्, ततो भवार्थे ठञ्, तस्य लुक्, अह्नादेशः । प्रसङ्गादाह—**स्त्रियामिति । द्व्यह्नेति ।** द्वयोरह्नोर्भवेत्यर्थः । ठञ् लुक् च पूर्ववत् । 'अपरिमाणबिस्त–' इति न ङीप् । ठञ्निमित्तस्तु ङीप् नेत्यपरिमाणबिस्तेत्यत्रोक्तम् । टचष्टित्त्वेऽप्युपसर्जनत्वात् 'टिड्ढ–' इति न ङीप् । वस्तुतस्तु स्त्रीत्वमेवात्र नास्ति, रात्राह्नाहाःपुंसीत्युक्तेरिति शब्देन्दुशेखरे प्रपञ्चितम् । संख्यापूर्वस्योदाहरणान्तरमाह—**द्व्यह्नप्रिय इति ।** द्वे

देशो न । **द्व्यहीन इति ।** समासान्तविधेरनित्यत्वान्न टच् । सति तु तस्मिन्नह्नादेशः प्रसज्येत । न च नान्तस्य खे परे टिलोपविधिसामर्थ्यान्न टजिति वाच्यम्, अहीन इत्यत्र तस्य सावकाशत्वात् । **अनित्यत्वादिति ।** अत्र च लिङ्गं 'शक्तिलाङ्गलाङ्कुश–' इत्यत्र घटीग्रहणम् । **मद्रराज्ञीति ।** यद्यत्र टच् स्यात्तदा 'भस्याढे–' इति पुंवद्भावे टिलोपे च मद्रराजीत्यनिष्टरूपं स्यादिति भावः । **अह्नोऽह्न एतेभ्यः ।** एतच्छब्देन 'अहःसर्वैकदेश–' इति सूत्रस्थाः परामृश्यन्ते । सूत्रे तु तस्मिन्नहरादयो निर्दिष्टाश्चकारेण च संख्याव्यये अनुकृष्टे तत्र सर्वेषां बुद्धिस्थत्वाविशेषेऽप्यहःशब्द इह न गृह्यते, असंभवादित्याशयेनाह—**सर्वादिभ्य इति । समासान्ते पर इति ।** एतच्च

अत्यहः। ७१२ क्षुम्नादिषु च (८-४-३९) एषु णत्वं न स्यात्। दीर्घाही

अहनी प्रिये यस्येतिविग्रहः। 'तद्धितार्थ-' इत्युत्तरपदे द्विगुः, टच्, अह्नादेश इति भावः। अव्ययपूर्वस्योदाहरति-**अत्यह्न इति**। अहरतिक्रान्त इति विग्रहः। 'अत्यादयः-' इति समासः। टच्, अह्नादेश इति भावः। **क्षुम्नादिषु च**। 'रषाभ्याम्-' इत्यतो णः इति 'न भाभूपूकमि-' इत्यतो नेति चानुवर्तते, तदाह—**एष्विति**। **दीर्घाही प्रावृडिति**। वर्षतौं प्रावृट्शब्दः स्त्रीलिङ्गः। 'स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः' इत्य-

---

प्रकरणात्तल्लभ्यम्। भाष्ये तु अह्नादेशः प्रत्याख्यातः 'अह्न एभ्यः अच् स्याट्टचोऽपवादः' इति व्याख्यायाम्, 'अह्नष्टखोरेव' इति नियमाट्टिलोपाभावे 'अल्लोपोऽनः' इत्यकारलोपात्सर्वाह्न इत्यादिरूपसिद्धेः। **रेफादिति**। यदि तु लक्ष्ये अहस्सु भव इत्यादिव्युत्पत्त्या लाह्नाह्न इत्यपि प्रयोगोऽस्ति, तर्हि षादित्यपि बोध्यम्। 'रषाभ्याम्-' इत्यधिकारात्। **ठञो लुगिति**। अणो लुगिति वृत्तिकाराद्युक्तमयुक्तमिति भावः। प्रसङ्गादाह **स्त्रियामिति**। नन्विह स्त्रीत्वं दुर्लभं 'रात्राह्नाहाः पुंसि' इति वचनादिति चेत्, मैवम्। सर्वमहः सर्वाह्न इत्यादावुपक्षीणस्य तद्वचनस्य लुप्ततद्धितायामप्रवृत्तेः। 'लुपि युक्तवत्-' इति लिङ्गातिदेशो ह्यत्र प्रमाणम्। प्राकृतलिङ्गानुशासनानां लुप्तप्रत्ययेषु प्रवृत्तौ तद्वैयर्थ्यापत्तेः। अत एव लवणः सूपः, लवणा यवागूरित्यादौ न क्लीबत्वम्। किं च 'द्विगुप्राप्तापन्ना-' इत्यादिना परवल्लिङ्गत्वे प्रतिषिद्धे तदपवादस्य 'रात्राह्नाहाः-' इत्यस्याप्राप्तिरेवेति द्व्यहशब्दोऽयं विशेष्यनिघ्न एव, न तु नियतपुंल्लिङ्गः। एवं चात्र भवार्थकतद्धिते लुप्तेऽपि 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन भवार्थवत्तन्निष्ठस्त्रीत्वाभिधानमपि न्याय्यमेवेति दिक्। **टाबिति**। न चेह ठञन्तत्वाद् ङीप् स्यादिति शङ्क्यम्, ठञो लुप्तत्वात्। न च प्रत्ययलक्षणम्, वर्णाश्रयत्वात्। ठञो योऽकारस्तदन्तान्ङीबिति तत्र व्याख्यातत्वात्। अत एव वृत्तिकाराद्युक्ताणो लुक्पक्षेऽपि न ङीप्, 'अण्योकारः' इति तत्र व्याख्यातत्वात्। न चैवमपि टजन्तत्वान्ङीप् स्यादेवेति वाच्यम्, टचः समासान्ततया तदन्तस्य तद्धितार्थं प्रत्युपसर्जनत्वात्। अत एव हि आपिशलिना प्रोक्तमधीयाना ब्राह्मणी आपिशलेत्युदाहृतं भाष्ये। 'द्विगोः' इति ङीप् तु न शङ्क्य एव, 'अपरिमाण-' इति निषेधात्। अतष्टाबेवात्र युक्तस्तथैवोदाहरति—**द्व्यहेति**। 'अह्नोऽह्न-' इति सूत्रे अह्नादेशं प्रत्याख्याय 'अच्प्रत्यन्वव-' इत्यतोऽचमनुवर्त्य 'टजपवादोऽच्' इति व्याचक्षाणस्य भाष्यकारस्य मते तु निर्विवाद एवात्र टाप्। कथं तर्हि कालनिर्णयदीपिकायां द्व्यहीति प्रयोग इति चेत्। अत्राहुः—द्वे अहनी यस्यां तिथाविति बहुव्रीहौ नान्तलक्षणो ङीब् बोध्यः। द्वयोरह्नोर्भव इति व्याख्यानग्रन्थस्तु फलितार्थकथनपरतया ज्ञेय इति। संख्यादिभिन्नस्य तत्पुरुषस्य

प्रावृट् । एवं चैतदर्थमह्न इत्यदन्तानुकरणक्लेशो न कर्तव्यः । 'प्रातिपदिकान्त–' (सू १०५५) इति णत्ववारणाय क्षुभ्नादिषु पाठस्यावश्यकत्वात् । अदन्तादिति तपरकरणादिह–परागतमहः पराह्णः । ७६३ न संख्यादेः समाहारे । (५-४-८६) समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात् । 'संख्यादेः' इति स्पष्टार्थम् । द्वयोरह्नोः समाहारो द्व्यहः । त्र्यहः । ७६४ उत्तमैकाभ्यां च । (५-४-९०) आभ्यामह्नादेशो न । उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह । 'पुण्यैकाभ्याम्' इत्येव सूत्रयितुमुचितम् । पुण्याहम् । सुदिनाहम् । सुदिनशब्दः प्रशस्त-

---

मरः । दीर्घाण्यहानि यस्मिन्निति बहुव्रीहिः । 'अन उपधालोपिनोऽन्यतरस्याम्' इति ङीप्, 'अल्लोपोऽनः' इत्युपधालोपः । 'अह्नोऽदन्तात्' इति णत्वं तु क्षुभ्नादित्वान्नेति भावः । ननु क्षुभ्नादिषु दीर्घाह्नीत्यस्य पाठो व्यर्थः, 'अह्नोऽदन्तात्' इत्यत्र हि अह्न इत्यदन्तात् षष्ठ्यर्थे प्रथमा । अदन्तपूर्वपदस्थान्निमित्तात् परस्य अह्नशब्दस्य नस्य णत्वं स्यादिति तदर्थः । दीर्घाह्नीत्यत्र च अह्नादेशस्याप्रसक्त्या अदन्तत्वाभावादेव णत्वस्याप्राप्तौ किं तन्निवृत्त्यर्थेन क्षुभ्नादिपाठेनेत्यतआह–**एवं चेति** । एवं सति–दीर्घाह्नीशब्दस्य क्षुभ्नादिपाठे सति, एतदर्थम्–'अह्नोऽदन्तात्' इति णत्वनिवृत्त्यर्थम्, अह्न इत्यस्य अदन्तत्वानुसरणं षष्ठ्यर्थे व्यत्ययेन प्रथमानुसरणं क्लेशावहं न कर्तव्यमित्यर्थः, क्षुभ्नादिपाठादेव णत्वनिवृत्तिसिद्धेरिति भावः । ननु दीर्घाह्नीत्यस्य णत्वाभावाय किं क्षुभ्नादिपाठोऽभ्युपगम्यताम् उत अह्न इत्यस्य अदन्तत्वमित्यत्र विनिगमनाविरह इत्यत आह—**प्रातिपदिकान्तेति** । अथ 'अह्नोऽदन्तात्' इत्यत्र पूर्वपदविशेषणे अदन्तादिति तपरत्वस्य प्रयोजनमाह—**अदन्तादिति । पराह्ण इति** । 'प्रादयो गताद्यर्थे–' इति समासः, टच्, अव्ययात्परत्वादह्नादेशः । परेति पूर्वपदस्यादन्तत्वाभावाद् न णत्वमिति भावः । **न संख्यादेः समाहारे । अह्नादेश इति** । 'अह्नोऽह्नः–' इत्यतस्तदनुवृत्तेरिति भावः । ननु संख्यादिभिन्नस्य तत्पुरुषस्य समाहारे अभावादेव सिद्धे संख्यादेरिति व्यर्थमित्यत आह–**स्पष्टार्थमिति । द्व्यह इति** । समाहारे द्विगुः । टच्, 'रात्राह्ना–' इति पुंस्त्वम् । संख्यादित्वात्प्राप्तस्य अह्नादेशस्य निषेधः । **त्र्यह इति** । त्रयाणामह्नां समाहार इति विग्रहः । समासादि द्व्यहवत् । **उत्तमैकाभ्यां च** । ननु उत्तमशब्दात्परस्याहन्शब्दस्य अह्नादेशाप्रसक्तेरुत्तमग्रहणं व्यर्थमित्यत आह—**उत्तमशब्द इति** । उत्तमशब्दः अन्त्ये वर्तते । यथा द्वादशाहे 'उदयनीयातिरात्र उत्तममहः' इति अन्त्यमिति गम्यते । 'अहस्सर्वैकदेशसंख्यातपुण्याद्–' इत्युपात्तेषु अन्त्यः पुण्यशब्दो विवक्षित इत्यर्थः । तर्हि पुण्यैकाभ्याम् इत्येव कुतो न सूत्रितमित्याशङ्क्य स्वतन्त्रेच्छत्वान्महर्षेरित्याह—**पुण्यैकाभ्यामित्येवेति** ।

वाची। एकाहः। 'उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थम्' इत्येके। संख्याताहः।
७६५ अग्राख्यायामुरसः। (५-४-९३) टच्स्यात्। अश्वानामुर इव अश्वोरसम्। मुख्योऽश्व इत्यर्थः। **७६६ अनोश्मायस्सरसां जातिसंज्ञयोः।** (५-४-९४) टच्स्याज्जातौ संज्ञायां च। उपानसम्, अमृताश्मः, कालायसम्, मण्डूकसरसम् इति जातिः। महानसम्, पिण्डाश्मः, लोहितायसम्, जलसरसम् इति संज्ञा। **७६७ ग्रामकौटाभ्यां च तक्ष्णः।** (५-४-९५) ग्रामस्य तक्षा

पुण्याहमिति। पुण्यमहरिति विग्रहे विशेषणसमासः, टच्, टिलोपः, 'पुण्यसुदिनाभ्यां च' इति नपुंसकत्वम्। **एकाह इति।** एकमहरिति विग्रहे 'पूर्वकाल-' इति समासः। टच्, टिलोपः। **उपान्त्यस्यापीति।** लक्षणयेति शेषः। पुण्येत्यनुक्त्वा उत्तमग्रहणमेव लक्षणाबीजम्, उत्तमं च एकं चेति द्वन्द्वः, सौत्रं द्विवचनमिति भावः। **संख्याताह इति।** संख्यातमहरिति विग्रहे विशेषणसमासः, टच्, टिलोपः। 'रात्राह्ना-' इति पुंस्त्वम्। उपान्त्य-संख्यातशब्दपूर्वकत्वाद् नाह्नादेशः। **अग्राख्यायामुरसः।** शेषपूरणेन सूत्रं व्यचष्टे—**टच् स्यादिति।** पञ्चम्यर्थे सप्तमी। अग्रं प्रधानं तद्वाची य उरश्शब्दः तदन्तात् तत्पुरुषात् टच् स्यादित्यर्थः। 'अभ्याख्यायाम्' इति पाठान्तरम्। अग्रे भवमग्र्यम्, मुख्यमिति यावत्। **अश्वानामुर इवेति।** उरो यथा प्रधानं तथेत्यर्थः। उरश्शब्दस्य मुख्ये वृत्तौ लक्षणाबीजमिदम्। **अश्वोरसमिति।** उरश्शब्देन मुख्यवाचिना षष्ठीसमासः, टच्, 'परवल्लिङ्गम्-' इति नपुंसकत्वम्। अग्राख्यायामिति किम्? देवदत्तस्योरः देवदत्तोरः। **अनोऽश्मायस्।** **उपानसमिति।** उपगतमनः इति प्रादिसमासः। **अमृताश्म इति।** अमृतः अश्मेति विग्रहः। टचि, टिलोपः। **कालायसमिति।** कालम् अय इति विग्रहः, टच् 'परवल्लिङ्गम्-' इति नपुंसकत्वम्। **मण्डूकसरसमिति।** षष्ठीसमासः। टच्। जातिविशेषा एते। महानसम्, पिण्डाश्मः, लोहितायसम्, जलसरसमिति संज्ञाविशेषाः। **ग्रामकौटाभ्यां च तक्ष्णः।** **आभ्यां टजिति।**

समाहारे त्वसंभवादाह—**स्पष्टार्थमिति।** **पुण्याहमिति।** 'पुण्यसुदिनाभ्याम्-' इति क्लीबत्वं वक्ष्यति। **उपान्त्यस्यापीति।** यथा 'प्रथमयोः-' इति प्रथमाद्वितीययोर्ग्रहणं द्विवचननिर्देशात्, तथेहापि उत्तमग्रहणसामर्थ्यादन्त्ययोर्द्वयोर्ग्रहणम्। उत्तमौ चैकश्चेति विग्रहे सौत्रं द्विवचनमिति तेषामाशयः। **अग्राख्यायाम्।** पञ्चम्यर्थे सप्तमी। अग्रं प्रधानम्। अग्रवाची य उरःशब्दस्तदन्तात्तत्पुरुषाट्टच् स्यात्। अग्राख्यायां किम्, देवदत्तस्योरो देवदत्तोरः। **ग्रामकौटाभ्याम्।** 'जातिसंज्ञयोः' इति नानुवर्तते। ग्रामेति किम्, राज्ञस्तक्षा राजतक्षा। **अतिश्व इति।** श्वानमतिक्रान्तो

ग्रामतक्षः । साधारण इत्यर्थः । कुट्यां भवः कौटः, स्वतन्त्रः । स चासौ तक्षा च कौटतक्षः । ७९८ **अतेः शुनः** । (५-४-९६) अतिश्वो वराहः । अतिश्वी सेवा । ७९९ **उपमानादप्राणिषु** । (५-४-९७) अप्राणिविषयकोपमानवाचिनः शुनष्टच्स्यात् । आकर्षः श्वेवाकर्षश्वः । अप्राणिषु किम्—वानरः श्वेव वानरश्वा । ८०० **उत्तरमृगपूर्वाच्च सक्थ्नः** । (५-४-९८) चादुपमानात् । उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । फलकमिव सक्थि फलकसक्थम् । ८०१ **नावो द्विगोः** । (५-४-९९) नौशब्दान्ताद् द्विगोष्टच्स्यात्, न तु तद्धितलुकि । द्वाभ्यां नौभ्यामागतो द्विनावरूप्यः । 'द्विगोर्लुगनपत्ये' (सू

ग्रामकौटाभ्यां परो यस्तक्षन्शब्दः तदन्तात्तत्पुरुषाट्टच् स्यादित्यर्थः । **ग्रामतक्ष इति** । टचि टिलोपः । **साधारण इति** । ग्रामे यावन्तो जनाः सन्ति तावतां विधेय इत्यर्थः । **कुट्यां भव इति** । कुटीमेकां कयादिना सम्पाद्य तत्र यो वसति, न तु परकीयभूमिप्रदेशे, स कौट इत्यर्थः । फलितमाह—**स्वतन्त्र इति** । **कौटतक्ष इति** । टचि, टिलोपः । **अतेश्शुनः** । अतीत्यव्ययात् परो यः श्वन्शब्दः, तदन्तात्तत्पुरुषाट्टजित्यर्थः । **अतिश्व इति** । श्वानमतिक्रान्त इति विग्रहः । अत्यादय इति समासः । टचि, टिलोपः । श्वापेक्षयाधिकवेगवान् वराह इत्यर्थः । **अतिश्वी सेवेति** । श्वानमतिक्रान्तेत्यर्थः, श्वापेक्षया नीचा सेवेति यावत् , टच् , टिलोपः । टित्त्वाद् ङीप्, 'यस्येति च' इत्यकारलोपः । **उपमानादप्राणिषु । आकर्षः श्वेवेति** । आकृष्यते कुसूलादिगतधान्यमनेनेत्याकर्षः, पञ्चाङ्गुलो दारुविशेषः । 'उपमितं व्याघ्रादिभिः—' इति समासः । टच् , टिलोपः, आकर्षश्व इति रूपम् । उपमानात् किम् ? शुनो निष्क्रान्तो निश्वा । **उत्तरमृग** । उत्तर, मृग, पूर्व एभ्य उपमानाच्च परो यः सक्थिशब्दः तदन्तात्तत्पुरुषाट्टच् स्यादित्यर्थः । **उत्तरसक्थमिति** । उत्तरं सक्थीति विग्रहः । पूर्वं सक्थीति विग्रहे 'पूर्वकाल—' इति समासः । **फलकसक्थमिति** । फलकमिव सक्थीति विग्रहे मयूरव्यंसकादित्वात् समासः । सर्वत्र टच् , टिलोपः । **नावो द्विगोः । न तु तद्धितलुकीति** । 'गोरतद्धितलुकि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । **द्विनावरूप्य इति** । तद्धितार्थे समासः, टच् , आवादेशः । 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' तस्य 'द्विगोर्लुगनपत्ये' इति लुकमाशङ्क्याह—**द्विगो-**

जवेनेत्यर्थः । **अतिश्वीति** । नीचेत्यर्थः । **आकर्षः श्वेति** । 'उपमितं व्याघ्रादि—' इति समासः । आकृष्यतेऽनेन खलादिगतं धान्यमित्याकर्षः काष्ठविशेषः । उपमानात्किम् , निष्क्रान्तः शुनो निश्वा । **फलकसक्थमिति** । अत एव ज्ञापकादसामान्यवचनेनाप्युपमानस्य समास इति माधवः । **द्विनावरूप्य इति** । 'हेतुमनुष्येभ्यः—'

१०८०) इत्यत्र अचि ह्रस्वस्यापकर्षणाद्धलादेर्न लुक् । पञ्चनावप्रियः । द्विनावम् त्रिनावम् । अतद्धितलुकीति किम्-पञ्चभिर्नौभिः क्रीतः पञ्चनौः । ८०२ अर्धाच्च । (५-४-१००) अर्धान्नावष्टच्स्यात् । नावोऽर्धम् अर्धनावम् । क्लीबत्वं लोकात् । ८०३ खार्याः प्राचाम् । (५-४-१०१) द्विगोरर्धाच्च खार्याष्टज्वा स्यात् । द्विखारम्, द्विखारि । अर्धखारम्, अर्धखारी । ८०४ द्वित्रिभ्यामञ्जलेः । (५-४-१०२) टज्वा स्याद् द्विगौ । द्व्यञ्जलम्, द्व्यञ्जलि । अतद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः । ८०५ ब्रह्मणो जानपदाख्यायाम्

लुगनपत्य इत्यत्रेति । अपकर्षणादिति । 'गोत्रेऽलुगचि' इत्युत्तरसूत्रादित्यर्थः । **पञ्चनावप्रिय इति** । पञ्च नावः प्रिया यस्येति विग्रहे उत्तरपदे द्विगुः, टच्, आवादेशः । **द्विनावमिति** । द्वयोः नावोः समाहार इति विग्रहे द्विगुः, टच्, आवादेशः, 'स नपुंसकम्' इति नपुंसकत्वम् । **त्रिनावमिति** । तिसृणां नावां समाहार इति विग्रहः, द्विनाववत् । **पञ्चनौरिति** । तद्धितार्थे समासः । आर्हीयष्ठक्, 'अध्यर्ध-' इति लुक् । **अर्धाच्च** । अर्धशब्दात् परो यो नौशब्दः तदन्तात् तत्पुरुषाट्टजित्यर्थः । **अर्धनावमिति** । 'अर्धं नपुंसकम्' इति समासः, टच्, आवादेशः । अत्र 'परवल्लिङ्गम्-' इति स्त्रीत्वमाशङ्क्याह—**क्लीबत्वं लोकादिति** । **खार्याः प्राचाम्** । खारीशब्दान्ताद् द्विगोः, अर्धपूर्वकाद् खारीशब्दान्तात्तत्पुरुषाच्चेत्यर्थः । **द्विखारमिति** । द्वयोः खार्योः समाहार इति विग्रहे द्विगुः । टच्, 'यस्येति च' । 'स नपुंसकम्' इति नपुंसकत्वम् । टजभावपक्षे 'स नपुंसकम्' इति नपुंसकत्वान्नपुंसकह्रस्वः । **अर्धखारमिति** । खार्या अर्धमिति विग्रहः । 'अर्धं नपुंसकम्' इति समासः, टच्, 'यस्येति च' । क्लीबत्वं लोकात् । **अर्धखारीति** । पूर्ववत् समासः । टजभावपक्षे 'परवल्लिङ्गम्-' इति स्त्रीत्वम् । एकविभक्तावषष्ठ्यन्तवचनादुपसर्जनत्वाभावान्न ह्रस्वः । अर्धखारि इति क्वचिद् ध्रस्वान्तपाठः, तदा क्लीबत्वं लोकात्, ततो नपुंसकह्रस्वः । **द्वित्रिभ्यामञ्जलेः** । शेषपूरणेन सूत्रं व्याचष्टे—**टज्वा स्यादिति** । **द्विगाविति** । **द्व्यञ्जलमिति** । द्वयोरञ्जल्योः समाहार इति विग्रहे द्विगुः, टच्, 'यस्येति च' 'स नपुंसकम्' । **द्व्यञ्जलीति** । समाहारे द्विगुः । टजभावे सति नपुंसकह्रस्वत्वम् । **अतद्धितलुकीत्येवेति** । अनुवर्तत एवेत्यर्थः । **अञ्जलिभ्यां क्रीत इति** ।

इति रूप्यः । **पञ्चनौरिति** । आर्हीयष्ठक् । 'अध्यर्धपूर्व-' इति लुक् । **खार्याः** । **द्विगोरिति** । खारीशब्दान्ताद् द्विगोरित्यर्थः । **अर्धखारमिति** । अर्धनावमिव क्लीबत्वं लोकात् । **अर्धखारीति** 'परवल्लिङ्गम्-' इति स्त्रीत्वम् । **टज्वा स्याद् द्विगाविति** । द्विगाविति किम्, द्वयोरञ्जलिः द्व्यञ्जलिः । **द्व्यञ्जलमिति** । समाहारे द्विगुः ।

(५-४-१०४) ब्रह्मान्तात्तत्पुरुषाट्टच्स्यात्समासेन जानपदत्वमाख्यायते चेत् , सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः। ८०६ **कुमहद्भ्यामन्यतरस्याम्**। (५-४-१०५) आभ्यां ब्रह्मणो वा टच्स्यात्तत्पुरुषे । कुत्सितो ब्रह्मा कुब्रह्मः , कुब्रह्मा। ८०७ **आन्महतः समानाधिकरणजातीययोः**। (६-३-४६) महत आकारो-

---

अञ्जलिशब्दः अञ्जलिपरिमितधान्यादौ वर्तते, केवलस्याञ्जलेः मूल्यत्वासम्भवात्। परिमाणत्वात् ठञ्। 'अध्यर्ध–' इति तस्य लुक्। **ब्रह्मणो जानपदाख्यायाम्**। जनपदे भवो जानपदः, भावप्रधानो निर्देशः। तस्य केनाख्येत्याकाङ्क्षायां प्रकृतत्वात् समासेनेति लभ्यते, तदाह—**समासेन जानपदत्वमाख्यायते चेदिति**। जानपदत्वमित्यनन्तरं ब्रह्मण इति शेषः। **सुराष्ट्रे ब्रह्मेति**। ब्रह्मशब्दोऽत्र पुँल्लिङ्गः। ब्रह्मा विप्रः। 'वेदास्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः' इत्यमरः। सप्तमीति योगविभागात् समासः। टच् , टिलोपः, 'परवल्लिङ्गम्–' इति पुंस्त्वम्। जानपदेति किम्? देवब्रह्मा नारदः। **कुमहद्भ्यामन्यतरस्याम्**। **कुब्रह्मेति**। टजभावे रूपम्। 'कुगतिप्रादयः' इति समासः। **कुब्रह्म इति**। टचि रूपम्, टिलोपः। अथ महत्पूर्वस्य टज्विकल्पमुदाहरिष्यन् विशेषमाह—**आन्महतः**। 'अलुगुत्तरपदे' इत्युत्तरपदाधिकारस्थमिदं सूत्रम्। उत्तरपदे इत्यनुवृत्तं समानाधिकरणपदे अन्वेति, न तु जातीय इति, तस्य प्रत्ययत्वात् , तदाह—**महत आत्त्वमित्यादिना**। **महाब्रह्म इति**। महांश्चासौ ब्रह्मा चेति विग्रहः। 'सन्महत्–' इत्यादिना समासः। आत्त्वम्। सवर्णदीर्घः। 'कुमहद्भ्याम्–' इति टच्। टिलोपः, 'परवल्लिङ्गम्–' इति पुंस्त्वम्। **महाब्रह्मेति**। टजभावे आत्वे रूपम्। अथ प्रसङ्गादुक्तमात्त्वविधिं प्रपञ्चयिष्यन् समानाधिकरणे पुनरुदाहरति—**महादेव इति**। जातीये उदाहरति—**महाजातीय इति**। महत्सदृश इत्यर्थः। प्रकारवचने जातीयर् , आत्त्वम् , सवर्णदीर्घः। **समानाधिकरणे किमिति**। 'आन्महतो जातीये च' इत्येवास्तु। चकारादुत्तरपदसमुच्चये

अतद्धितलुकीत्येवोक्त। एतच्च पूर्वसूत्रेऽपि बोध्यम्। **अञ्जलिभ्यां क्रीत इति**। नात्राञ्जलिः पाणिद्वयम् , तस्य मूल्यत्वासंभवात् , किं तु अञ्जलिपरिमितो व्रीह्यादिर्विवक्षितः। ततश्च परिमाणत्वाद् ह्यञ्जलिरित्यत्र ठञ्। तस्य तु 'अध्यर्धपूर्व–' इति लुक्। **ब्रह्मणो**। जनपदे भवो जानपदः। 'ह्येकयोः–' इतिवद्भावप्रधानो निर्देशस्तस्याख्यायां प्रत्यासत्त्या समासेनेत्येतल्लभ्यते, तदाह—**समासेन जानपदत्वमिति**। कस्येत्याकाङ्क्षायां संनिधानाद् ब्रह्मण इति लभ्यते। **सुराष्ट्रब्रह्म इति**। 'सप्तमी' इति योगविभागात्समासः। जानपदेति किम्, देवब्रह्मा नारदः। **कुब्रह्म इति**। ब्राह्मणपर्यायो ब्रह्मन्शब्दः। **आन्महतः**। तकार उच्चारणार्थः, न तु सर्वादेशार्थं

ऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे। महाब्रह्मः, महाब्रह्मा। महादेवः। महाजातीयः। समानाधिकरणे किम्-महतः सेवा महत्सेवा। लाक्षणिकं विहाय प्रतिपदोक्तः 'सन्महत्–' (सू ७४०) इति समासो ग्रहीष्यते इति चेत्, महाबाहुः न स्यात्। तस्मात् 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य–' (प ११४) इति परिभाषा नेह प्रवर्तते, समानाधिकरणग्रहणसामर्थ्यात्।

सति महत आत्त्वं स्याद् उत्तरपदे जातीये च परत इत्यर्थलाभादेव महादेव इत्यादिसिद्धेः किं समानाधिकरणेनेति प्रश्नः। **महतः सेवा महत्सेवेति**। अत्र षष्ठीसमासे आत्त्वनिवृत्त्यर्थं समानाधिकरणग्रहणमिति भावः। ननु षष्ठीसमासो लाक्षणिकः, समस्यमानपदं विशिष्य अनुच्चार्य सामान्यशास्त्रत एव निर्वर्तितत्वात्। 'सन्महत्–' इत्ययं समासस्तु सन्महदादिशब्दं समस्यमानं विशिष्योच्चार्य विहितत्वात् प्रतिपदोक्तः। ततश्च लक्षणप्रतिपदोक्तपरिभाषया 'आन्महतो जातीये च' इत्यत्र 'सन्महत्–' इति प्रतिपदोक्तसमासोत्तरपदग्रहणे सति तत एव षष्ठीसमासोत्तरपदनिराससंभवाद्व्यर्थमेव समानाधिकरणग्रहणमिति शङ्कते—**लाक्षणिकमित्यादिना**। परिहरति—**महाबाहुर्न स्यादिति**। महान्तौ बाहू यस्येति विग्रहः। अस्य समासस्य 'अनेकमन्यपदार्थे' इति सामान्यविहितत्वात् प्रतिपदोक्तत्वाभावात्तदुत्तरपदे परे आत्त्वं न स्यात्, अतः समानाधिकरणग्रहणमित्यर्थः। ननु कृतेऽपि समानाधिकरणग्रहणे लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तेर्दुर्वारत्वाद् महाबाहुरित्यत्रात्त्वं न स्यादेवेत्यत आह—**तस्मादिति**। तच्छब्दार्थमाह— **समानाधिकरणग्रहणसामर्थ्यादिति**। एवं च लक्षणप्रतिपदोक्त-

---

इत्याह—**आकारोऽन्तादेशः स्यादिति**। इहोत्तरपदाधिकारे पूर्वपदमाक्षिप्यते। तच्च महता विशेषितमिति तदन्तविधिर्लभ्यते। 'ग्रहणवता–' इति निषेधस्तु प्रत्ययविधिविषय इत्युक्तत्वात्। तेन महाबाहुवदतिमहाबाहुरिति प्रयोगो भवति। परममहत्परिमाणमित्यत्र तु परममहतो द्रव्यस्य परिमाणमिति षष्ठीतत्पुरुषोऽभ्युपगम्यत इति न तत्रात्वप्रसक्तिरिति वृद्धाः। यत्तु वर्धमानेनोक्तम्—'इष्टकेषीकामालानाम्–' इत्यत्र तदन्तविध्युपसंख्यानसामर्थ्यादुत्तरपदाधिकारे तदन्तविधिर्नास्ति, तेन परममहत आत्वं नेति, तद्भाष्यकैयटविरुद्धम्। तथा हि 'येन विधिः–' इति सूत्रे पदाधिकारे प्रयोजनमिष्टकचितं पक्वेष्टकचितमिति भाष्ये उदाहृतम्, कैयटेन च पदशब्देन उत्तरपदं गृह्यत इति व्याख्यातम्। एतदेवार्थतः काशिकायामुपनिबद्धम्, न तु 'इष्टकेषीका–' इत्यत्र कात्यायनोक्तमुपसंख्यानमस्ति। ननु प्रतिपदोक्तसमासे यदुत्तरपदं तस्मिन्नेव परे आत्वं स्यान्नान्यत्रेति किमनेन समानाधिकरणग्रहणेनेत्यत आह— **महाबाहुरिति**। बहुव्रीहिरयम्, स च सामान्यशास्त्रनिर्वृत्तत्वाल्लाक्षणिक इति भावः

'आत्' इति योगविभागादात्वम्, 'प्रागेकादशभ्यः–' (सू ११९९) इति निर्देशाद्वा, एकादश। महतीशब्दस्य 'पुंवत्कर्मधारय–' (सू ७४६) इति पुंवद्भावे कृते आत्वम्, महाजातीया। 'महत आत्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च' (वा ३९९०)। असामानाधिकरण्यार्थमिदम्। महतो महत्या वा घासो महाघासः। महाकरः। महाविशिष्टः। 'अष्टनः कपाले हविषि' (वा ३९९१) अष्टाकपालः। 'गवि च युक्ते' (वा ३९९२)। गोशब्दे परे युक्त इत्यर्थे गम्ये अष्टन आत्वं स्यादिति वक्तव्यमित्यर्थः। अष्टागवं शकटम्।

परिभाषां बाधित्वा लाक्षणिकस्यापि ग्रहणार्थं समानाधिकरणग्रहणमिति भावः। न च सुमहान्तौ बाहू यस्य स सुमहाबाहुरित्यत्र कथमात्वम्। आत्वविधेः पदाङ्गाधिकारस्थत्वाभावेन तदन्तविध्यभावादिति वाच्यम्, उत्तरपदाक्षिप्तपूर्वपदस्य महता विशेषणे सति तदन्तविधिलाभात्। परममहत्परिमाणवानित्यत्र तु महतः परिमाणं महत्परिमाणम्, परमं महत्परिमाणमिति षष्ठीसमासगर्भः कर्मधारय इति दिक्। ननु 'आन्महतः–' इत्यत्र महत एव ग्रहणाद् 'अष्टनः–' इत्युक्तसूत्रे अष्टनोरेव ग्रहणाद् एकादशेत्यत्र कथमात्वमित्यत आह—**आदिति योगविभागादात्वमिति।** योगविभागस्य भाष्यादृष्टत्वादाह—**प्रागेकादशभ्य इति निर्देशाद्वेति। एकादशेति।** एकश्च दश चेति द्वन्द्वः। एकाधिका दशेति वा। आन्महत इत्यत्र लिङ्गविशिष्टपरिभाषया महतीशब्दस्यापि जातीयर्प्रत्यये परे महतीजातीयेति स्यादित्यत आह—**महतीशब्दस्येति।** न च परत्वात्पुंवत्त्वं बाधित्वा आत्वं स्यादिति वाच्यम्, 'आन्महतः–' इत्यत्र लिङ्गविशिष्टपरिभाषा न प्रवर्तत इति ङ्याप्सूत्रे भाष्ये उक्तत्वादिति भावः। **महत आत्व इति।** घास, कर, विशिष्ट एषु परतो महत आत्वं पुंवत्त्वं च वक्तव्यमित्यर्थः। ननु 'आन्महतः -'इत्यात्वे 'पुंवत्कर्मधारय-' इति पुंवत्त्वे च सिद्धे किमर्थमिदमित्यत आह—**असामानाधिकरण्यार्थमिदमिति। महाकर इति।** महतो महत्या वा कर इत्यर्थः। **महाविशिष्ट इति।** महतो महत्या वा विशिष्टः, अधिक इत्यर्थः। **अष्टन इति।** कपाले उत्तरपदे हविषि वाच्ये अष्टन आत्वं वक्तव्यमित्यर्थः **अष्टाकपाल इति।** अष्टसु कपालेषु संस्कृतः पुरोडाश इत्यर्थे तद्धितार्थे द्विगुः। 'संस्कृतं भक्षाः' इत्यण्। 'द्विगोर्लुगनपत्ये' इति लुक्। आत्वं सवर्णदीर्घः। **गवि च युक्त इति।** वार्तिकमिदम्। तत्सूचयितुमाह—**वक्तव्यमित्यर्थ इति। अष्टागवं शकटमिति।** अष्टौ गावो यस्येति बहु-

---

अष्टनः कपाल इति। कपाले उत्तरपदे हविषि वाच्ये अष्टन आत्वं वक्तव्यमित्यर्थः। **अष्टाकपाल इति।** 'संस्कृतं भक्षाः' इत्यणो 'द्विगोर्लुगनपत्ये' इति लुक्।

'अच्प्रत्यन्वव-' (सू ९४३) इत्यत्र 'अच्' इति योगविभागाद्बहुव्रीहावप्यच्। अष्टानां गवां समाहारोऽष्टगवम्, तद्युक्तत्वाच्छकटमष्टागवमिति वा। ८०८ **द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः**। (६-३-४७) आत्स्यात्। द्वौ च दश च द्वादश। अधिका दशेति वा। द्वाविंशतिः। अष्टादश। अष्टाविंशतिः। अबहुव्रीह्यशीत्योः किम्-द्वित्राः, द्व्यशीतिः। 'प्राक्शतादितिवक्तव्यम्' (वा ३११३) नेह-द्विशतम्, द्विसहस्रम्। ८०९ **त्रेस्त्रयः**। (६-२-४८) त्रिशब्दस्य त्रयस्

व्रीहिः। आत्वम्, सवर्णदीर्घः। अष्टभिर्गोभिर्युक्तमित्यर्थः। ननु 'गोरतद्धितलुकि' इति टज्विधेस्तत्पुरुषमात्रविषयत्वाद् अष्टागवमिति कथमित्यत आह—**अच्प्रत्यन्ववेत्यत्रेति**। तत्पुरुषत्वे अष्टगवशब्दष्टजन्त एवेत्याह—**अष्टानामिति**। तथा च समाहारद्विगोस्तत्पुरुषत्वाद् 'गोरतद्धितलुकि' इति टच् सुलभ इत्यर्थः। नन्वष्टानां गवां समाहार इत्यर्थे शकटे कथमन्वयः, युक्तार्थवृत्तित्वाभावात्, कथं वा आत्वमित्यत आह—**तद्युक्तत्वादिति**। समाहारद्विगुरूपतत्पुरुषाट्टचि व्युत्पन्नस्य अष्टगवशब्दस्य लक्षणया अष्टभिर्गोभिर्युक्ते वर्तमानस्य आत्वमित्यर्थः। **द्व्यष्टनः**। शेषपूरणेन सूत्रं व्याचष्टे—**आत्स्यादिति**। द्विशब्दस्य अष्टन्शब्दस्य च संख्यावाचके उत्तरपदे परे आत्स्याद्, न तु बहुव्रीह्यशीत्योरित्यर्थः। द्विशब्दस्योदाहरति—**द्वादशेति**। द्वौ च एकश्च द्व्येकाः, अधिक एक द्व्येक इत्यादौ तु नास्ति, 'एकादिनवान्तानां परस्परं द्वन्द्वतत्पुरुषौ न स्तः' इति 'चार्थे-' इति सूत्रे भाष्ये ध्वनितत्वादिति शब्देन्दुशेखरे स्थितम्। **द्वाविंशतिरिति**। द्वौ च विंशतिश्चेति समाहारद्वन्द्वः। 'स नपुंसकम्' इति क्लीबत्वं तु न। किंतु लोकात् स्त्रीत्वम्। इतरेतरयोगस्तु न, अनभिधानात्। अधिका विंशतिरिति तत्पुरुषो वा। अथाष्टन्शब्दस्योदाहरति—**अष्टादशेति**। अष्टौ च दश चेति द्वन्द्वः। अष्टाधिका दशेति वा। **अष्टाविंशतिरिति**। अष्टौ च विंशतिश्चेति समाहारद्वन्द्वः। स्त्रीत्वं लोकात्। अष्टाधिका विंशतिरिति वा। **द्वित्रा इति**। द्वौ वा त्रयो वेति विग्रहः। 'संख्याव्यय-' इति बहुव्रीहिः। 'बहुव्रीहौ संख्येये डच्' इति डच्। बहुव्रीहित्वादत्र द्विशब्दस्य आत्त्वं न। **द्व्यशीतिरिति**। द्वौ चाशीतिश्चेति समाहारद्वन्द्वः। स्त्रीत्वं लोकात्। अधिका अशीतिरिति वा। अत्राशीतिपरकत्वाद् द्विशब्दस्यात्त्वं न। **प्राक्शतादिति**। 'द्व्यष्टनः संख्यायाम्-' इत्येतत् शतप्रभृतिसंख्याशब्दे परे न भवतीति वक्तव्यमित्यर्थः। **द्विशतमिति**। द्वौ च शतं चेति समाहारद्वन्द्वः। अधिकं शतमिति वा। एवं द्विसहस्रमित्यत्रापि। **त्रेस्त्रयः**। सन्धि-

---

'अर्ध्यर्धपूर्व-' इत्यणो लुग्मिति केषांचिद् व्याख्यानं तु प्रामादिकम्, 'संस्कृतम्-' इत्यणः अनार्हीयत्वात्। **त्रेस्त्रयः**। संधिवेलादिषु त्रयोदशीति पाठात्सान्तोऽयमादेश इति

स्यात्पूर्वविषये। त्रयोदश। त्रयोविंशतिः। बहुव्रीहौ तु त्रिदश त्रिदशाः। सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक्शतादित्येव, त्रिशतम्। त्रिसहस्रम्। **८१० विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्।** (६-३-४९) द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत्, द्वाचत्वारिंशत्। अष्टचत्वारिंशत्, अष्टाचत्वारिंशत्। त्रिचत्वारिंशत्, त्रयश्चत्वारिंशत्। एवं पञ्चाशत्षष्टिसप्ततिनवतिषु। **८११ एकादिश्चैकस्य चादुक्।** (६-३-७६) एकादिर्नञ्प्रकृत्या स्यादेकस्य चादुगागमश्च। नञो विंशत्या सह समासे कृते एकशब्देन सह 'तृतीया' इति योगविभागात्समासः। अनुनासिकविकल्पः

वेलादिषु त्रयोदशेति पाठात् सकारान्तोऽयमादेश इत्याह—**त्रयस्स्यादिति। पूर्वविषय इति।** प्राक्शतात् संख्याशब्दे उत्तरपदे परतः, न तु बहुव्रीह्यशीत्योरित्यर्थः। **त्रयोदशेति।** त्रयश्च दश चेति, त्र्यधिका दशेति वा विग्रहः। सुब्लुकि त्रिशब्दस्य त्रयस्, रुत्वम्, उत्वम्, आद्गुणः। एवं त्रयोविंशतिरित्यपि। **त्रिदशा इति।** त्रिरावृत्ता दशेत्यर्थः। 'बहुव्रीहौ संख्येये डच्–' इति डच्। नन्वत्र त्रिरित्यस्य 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' 'द्वित्रिचतुर्भ्यः सुच्' इति सुजन्तत्वात् समासेऽपि सुचः श्रवणापत्तिरित्यत आह—**सुजर्थे बहुव्रीहिरिति।** सुजर्थे क्रियाभ्यावृत्तौ लक्षणया विद्यमानस्य त्रिशब्दस्यैवात्र 'संख्याव्यय–'इति बहुव्रीहिः, न तु सुजन्तस्येत्यर्थः। **त्र्यशीतिरिति।** त्रयश्चाशीतिश्चेति समाहारद्वन्द्वः। स्त्रीत्वं लोकात्। त्र्यधिकाशीतिरिति वा। **त्रिशतमिति।** त्रयश्च शतं चेति समाहारद्वन्द्वः, त्र्यधिकं शतमिति वा। एवं त्रिसहस्रमित्यपि। **विभाषा चत्वारिंशत्।** व्यवहितस्यापि द्व्यष्टनोरित्यस्य सम्बन्धाय—**सर्वेषामिति।** द्व्यष्टनोस्त्रेश्चेत्यर्थः। तदाह—**द्व्यष्टनोस्त्रेश्चेति। एकादिश्च।** 'न लोपो नञः' इत्यतो नञ इति षष्ठ्यन्तमनुवर्तते। तच्च प्रथमया विपरिणम्यते। 'नभ्राण्नपात्–' इत्यतः प्रकृत्येत्यनुवर्तते, तदाह—**एकादिर्नञ् प्रकृत्येति।** एक आदिर्यस्येति विग्रहः। **एकस्य चादुगागमश्चेति।** आदुगिति अदुगिति वा छेदः। **नञो विंशत्येति।** न विंशतिरिति विग्रहे नञ्समासे सति नविंशतिशब्दस्य एकशब्देन तृतीयान्तेन सह एकेन नविंशतिरिति विग्रहे समास इत्यन्वयः। ननु तत्कृतत्वाद्यभावात् कथमिह तृतीयासमास इत्यत आह—**तृतीयेति योगविभागादिति। अनुनासिकविकल्प इति।**

ध्वनयन्नाह। **त्रयस्स्यादिति। सुजर्थे बहुव्रीहिरिति।** 'संख्ययाव्यया-' इत्यादिनेति शेषः। **एकादिरिति।** अदुगिति छेदः। पररूपं त्वकारोच्चारणसामर्थ्या-

एकेन नविंशतिः एकान्नविंशतिः-एकादूनविंशतिः। एकोनविंशतिरित्यर्थः। 'षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं च धासु वेति वाच्यम्' (वा ४००१-४००२)। षोडन्, षोडश, षड्धा, षोढा। ८१२ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। (२-४-२६)

तृतीयासमासे कृते सुब्लुकि एक नविंशति इति स्थिते 'न लोपो नञः' इति प्राप्तस्य नकारलोपस्य प्रकृतिभावान्निवृत्तौ एकशब्दस्यादुगागमः, तत्र ककार इत्, उकार उच्चारणार्थः। कित्त्वादन्तावयवः, सवर्णदीर्घः, एकाद् नविंशतिरिति स्थिते 'यरोऽनुनासिके-' इति दकारस्य पक्षे अनुनासिकनकार इत्यर्थः। अदुगागमपक्षेऽपि पररूपं तु अकारोच्चारणसामर्थ्यान्न भवति। एकेन न विंशतिरिति विग्रहवाक्यम्। एकेन हेतुना विंशतिर्न भवतीत्यर्थः। **एकान्नविंशतिः, एकादूनविंशतिरिति**। अनुनासिकत्वे तदभावे च रूपम्। **एकोनविंशतिरित्यर्थ इति**। पर्यवस्यतीति शेषः। एकेन ऊनेति विग्रहः। 'पूर्वसदृश-' इति समासः। सा चासौ[1] विंशतिश्च। **षष उत्वमिति**। दतृशब्दे दशन्शब्दे च उत्तरपदे परे धाप्रत्यये च परे षष्शब्दस्य उत्वम् उत्तरखण्डस्य दतृशब्दस्य दशन्शब्दस्य धाप्रत्ययस्य च आदेर्दकारस्य धकारस्य च टुत्वं च वक्तव्यमित्यर्थः। टुत्वमित्येव छेदः, न तु ष्टुत्वमिति प्रयोजनाभावात्। 'धासु वा' इति बहुवचनाद्विधार्थधाप्रत्ययस्यैव ग्रहणमिति भाष्यम्। धाप्रत्यये परे षष उत्वं वा स्यात्। टुत्वं तु उत्वपक्षे तदभावपक्षे च पूर्ववाक्यान्नित्यमेवेति कैयटः। उत्वपक्ष एव नित्यं टुत्वमिति हरदत्तः। **षोडन्निति**। षड् दन्ता यस्येति बहुव्रीहौ 'वयसि दन्तस्य दतृ' इति दत्रादेशः, ऋकारस्य इत्वम्। अन्त्यषकारस्य उत्वम्। आद्गुणः, दकारस्य टुत्वेन डकारः, सुप्रत्यये उगित्त्वान्नुम्, सुलोपः, संयोगान्तलोपः। तस्यासिद्धत्वान्न दीर्घः। षोडन् इति रूपम्। **षोडशेति**। षट् च दश चेति, षडधिका दशेति वा विग्रहः। अन्त्यस्य षकारस्य उत्वम्, आद्गुणः, दकारस्य टुत्वेन डकारः। हरदत्तमतमनुसृत्य उत्वाभावपक्षे धासु वेत्यस्योदाहरति-- **षड्धेति**। 'संख्याया विधार्थे धा'। अन्त्यस्य षकारस्य उत्वाभावपक्षे तु टुत्वमपि न भवति। 'झलां जशोऽन्ते' इति जश्त्वेन षकारस्य ड इति भावः। उत्वपक्षे उदाहरति--**षोढेति**। धाप्रत्ययः, अन्त्यस्य षकारस्य उत्वम्, आद् गुणः, टुत्वेन धस्य

ढ भवति। **धासु वेति**। 'संख्याया विधार्थे-' इत्यादिना विहितस्य धाप्रत्ययस्यैवेह ग्रहणम्, 'प्रत्ययाप्रत्यययोः-' इति परिभाषया। तेनेह न-षट् दधातीति षड्धा। 'आतोऽनुपसर्गे कः' टाप्। **षोडन्निति**। षड् दन्ता अस्य षोडन्। 'वयसि दन्तस्य-' इति दत्रादेशः। **परवल्लिङ्गम्**। इतरेतरयोगे द्वन्द्वोऽत्र गृह्यते न समाहारे द्वन्द्वः। 'स

१—साचेत्यादि विग्रहः क्वचिन्नास्ति।

एतयोः परपदस्येव लिङ्गं स्यात् । कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्धपिप्पली । 'द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः' (वा १५४५) पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलं कुमार्यै अलंकुमारिः । अत एव ज्ञापकात्समासः ।

ढ इति भावः । कैयटमते तु उत्वाभावपक्षेऽपि ढुत्वं नित्यमेव । षड्ढा । कैयटमतमेव युक्तम्, षोढा, षड्ढा इत्येव भाष्ये उदाहृतत्वादिति शब्देन्दुशेखरे स्थितम् । **परवल्लिङ्गम्** । परवदिति षष्ठ्यन्ताद्वतिः । तदाह—**एतयोः परपदस्येवेति** । द्वन्द्वपदमत्र इतरेतरयोगद्वन्द्वपरम्, समाहारद्वन्द्वे 'स नपुंसकम्' इत्यस्य तदपवादत्वात् । **कुक्कुटमयूर्याविमे इति** । अत्र द्वन्द्वे अवयवलिङ्गेनानियमे प्राप्ते नियमार्थमिदम् । **अर्धपिप्पलीति** । 'अर्धं नपुंसकम्' इति तत्पुरुषः । अस्य एकदेशिसमासस्य पूर्वपदार्थप्रधानतया पूर्वपदलिङ्गे प्राप्ते उत्तरपदलिङ्गार्थं विधिः । अत्र 'द्वन्द्वतत्पुरुषयोः' इति षष्ठ्यन्तमर्थपरम् । द्वन्द्वतत्पुरुषार्थयोरित्यर्थः । एवं च कुक्कुटमयूर्याविमे इत्यनुप्रयोगेऽपि तदेव लिङ्गम् । **द्विगुप्राप्तेति** । द्विगु, प्राप्त, आपन्न, अलंपूर्व, गतिसमास एतेषु परवल्लिङ्गस्य प्रतिषेधो वक्तव्य इत्यर्थः । **पञ्चस्विति** । उत्तरपदस्य नपुंसकत्वात् समासस्य नपुंसकत्वं प्राप्तं न भवति, किन्तु विशेष्यलिङ्गमेव । **प्राप्तजीविक इति** । अत्र उत्तरपदस्य जीविकाशब्दस्य यल्लिङ्गं तत्समासस्य न भवति । अलंपूर्वस्योदाहरति—**अलं कुमार्यै, अलंकुमारिरिति** । अत्र उत्तरपदकुमारीलिङ्गं समासस्य न भवति । नन्वत्र तदर्थादियोगाभावान्न चतुर्थीसमासः । 'पर्यादयो ग्लानाद्यर्थे–' इत्यपि न भवति, तस्य समासस्य नित्यत्वेन अलं कुमार्यै इति भाष्ये विग्रहप्रदर्शनानुपपत्तेरित्यत आह—**अत एवेति** । 'एकविभक्ति च–' इति कुमारीशब्दस्योपसर्जनत्वाद्ध्रस्वः ।

नपुंसकम्' इत्यपवादस्य वक्ष्यमाणत्वात् । 'सूत्रे द्वन्द्वतत्पुरुषयोः' इति न सप्तमीद्विवचनम् । तथात्वे द्वन्द्वे तत्पुरुषे च यत्परपदं तद्वल्लिङ्गं पूर्वपदस्यातिदिश्येत, परपदस्य संबन्धिशब्दत्वेन पूर्वपदाक्षेपकत्वात्, ततश्च मयूरीकुक्कुटावित्यत्र पूर्वपदे ईकारनिवृत्तिप्रसङ्गः । कुक्कुटमयूर्यौ, अर्धपिप्पलीत्यादौ तु पूर्वपदे स्त्रीप्रत्यय उत्पद्येत । किं तु षष्ठीद्विवचनमित्याशयेनाह—**एतयोरिति** । द्वन्द्वतत्पुरुषार्थयोरित्यर्थः । एवं चानुप्रयोगेऽपि तदेव लिङ्गं सिद्धम् । उपमेये षष्ठ्यभ्युपगमाद्वतिरपि षष्ठ्यन्तादेव इत्याशयेनाह—**परपदस्येवेति** । भाष्ये तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति प्रत्याख्यातमिदं सूत्रम् । अस्मिँश्च प्रत्याख्याते तुल्यन्यायत्वाल्लिङ्गानुशासनं सर्वमेव प्रत्याख्यातम्, तथापि तत्प्रौढिवादमात्रम् । अन्यथा व्याकरणस्यैव वैयर्थ्यप्रसङ्गात् । **गतिसमासेष्विति** । गतिग्रहणं प्रादीनामुपलक्षणं मुख्यस्य गतेरसंभवादित्याशयेन

निष्कौशाम्बिः। ८१३ **पूर्ववदश्ववडवौ**। (२-४-२७) द्विवचनमतन्त्रम्। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः। ८१४ **रात्राह्नाहाः पुंसि**। (२-४-२९) एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव। अनन्तरत्वात्परवल्लिङ्गतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः पूर्वरात्रः। पूर्वाह्णः।

गतिसमासमुदाहरति-**निष्कौशाम्बिरिति**। अत्र कौशाम्बीशब्दलिङ्गं समासस्य न भवति। यद्यपि निरादिसमास एवायम्, न तु गतिसमासः, प्रादिग्रहणमगत्यर्थमित्युक्तेः। तथापि गतिसमासग्रहणं प्रादिसमासोपलक्षणमित्याशयः। **पूर्ववदश्ववडवौ**। अश्वश्च वडवा च इति द्वन्द्वे परवल्लिङ्गं बाधित्वा पूर्ववल्लिङ्गार्थमिदम्। अश्ववडवाविति द्वन्द्वः पूर्वपदस्य लिङ्गं लभत इत्यर्थे बहुवचने विभक्त्यन्तरे च न स्यादित्यत आह—**द्विवचनमतन्त्रमिति**। उपलक्षणमिदम्। द्विवचनं विभक्तिश्चेति द्वयमपि अविवक्षितमित्यर्थः। पूर्ववद्ग्रहणमत्र लिङ्गम्। अन्यथा निपातनादेव सिद्धे किं तेनेति भावः। **रात्राह्नाहाः**। द्वन्द्वतत्पुरुषयोरित्यनुवृत्तं प्रथमाबहुवचनेन विपरिणतं रात्रादिभिर्विशेष्यते, तदन्तविधिः। रात्राह्नाहान्तद्वन्द्वतत्पुरुषाः पुंसीत्यर्थः। फलितमाह—**एतदन्ताविति**। परवल्लिङ्गतापवादः। ननु अहोरात्र इति समाहारद्वन्द्वे 'स नपुंसकम्' इति नपुंसकत्वप्रसङ्गः। न च नपुंसकत्वस्याप्ययं पुंस्त्वविधिरपवाद इति वाच्यम्, 'पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान्' इति न्यायेन अस्य पुंस्त्वविधेः परवल्लिङ्गतामात्रापवादत्वात्। तस्मादहोरात्राविति इतरेतरद्वन्द्व एवेहोदाहर्तुमुचित इत्यत आह—**अनन्तरत्वादिति**। **अयमिति**। पुंस्त्वविधिरिति शेषः। **अहोरात्र इति**। अहश्च रात्रिश्च तयोस्समाहार इति द्वन्द्वे परत्वान्नपुंसकत्वम् अपवादत्वात् परवल्लिङ्गमपि बाधित्वा अनेन पुंस्त्वम्। 'अहस्सर्वैकदेश–' इत्यच्। **पूर्वाह्न**

उदाहरति। **निष्कौशाम्बिरिति**। **अतन्त्रमिति**। अत्र च लिङ्गं पूर्ववद्ग्रहणम्। अन्यथा निपातनादेव सिद्धे किं तेनेति भावः। इह समासार्थस्य वा पूर्ववल्लिङ्गातिदेशः, उत्तरपदार्थस्य वा, उभयथाप्यश्ववडवौ शोभनावित्यनुप्रयोगेऽपि पुंस्त्वं सिध्यति। ननु समासार्थस्य पुंस्त्वेऽपि स्वाश्रयस्त्रीत्वस्यानिवर्तनाट्टापः श्रवणप्रसङ्गः। न चातिदेशवैयर्थ्यम्, शसि नत्वप्रवृत्त्या अनुप्रयोगे पुँल्लिङ्गत्वभावेन च तत्सार्थक्यादिति चेदत्राहुः—इहैव निपातनाद् 'अश्ववडवपूर्वापराधरोत्तराणाम्–' इत्यत्र निपातनाद्वा टापो निवृत्तिरिति। **अहोरात्र इति**। प्राचा तु अहोरात्रमित्युदाहृतम्। तन्नेति प्रागेवोक्तम्। अत्र वदन्ति 'रात्राह्ना–' इत्यनेन रात्रादीनामेव पुंस्त्वं विधीयते। तदन्तस्य तु 'परवल्लिङ्गम्-' इत्येव सिध्यति। अत एव भिन्नविषयत्वाद् 'विप्रतिषेधे परं कार्यम्' इति न प्रवर्तते। एवं च 'रात्राह्नाहाः–' इति पुंस्त्वाप्रवृत्त्या समाहारे 'स नपुंसकम्' इत्येव भवति, परवल्लिङ्गापवादत्वादिति।

ग्रहः 'संख्यापूर्वं रात्रं क्लीबम्' (लि १३१)। द्विरात्रम्, त्रिरात्रम्, गणरात्रम्। **८१५ अपथं नपुंसकम्** । (२-४-३०) तत्पुरुषः इत्येव । अन्यत्र तु-अपथो देशः। कृतसमासान्तनिर्देशान्नेह-अपन्थाः । **८१६ अर्धर्चाः पुंसि च** । (२-४-३१) अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्धर्चः, अर्धर्चम्।

इति । अहःपूर्वमित्येकदेशिसमासः । 'राजाहस्सखिभ्यः' इति टच्। 'अह्नोऽह्नः' इत्यह्नादेशः। परवल्लिङ्गं नपुंसकं च बाधित्वा पुंस्त्वम्। **द्व्यह्न इति** । द्वयोरह्नोस्समाहार इति विग्रहे द्विगुः, टच्, 'न संख्यादेस्समाहारे' इत्यह्नादेशनिषेधः। परवल्लिङ्गं बाधित्वा पुंस्त्वम्। उत्तरपदस्याहन्शब्दस्य अकारान्तत्वाभावान्न स्त्रीत्वम्, समासान्तस्य समासभक्तत्वात्। **संख्यापूर्वम्** । लिङ्गानुशासनसूत्रमिदम्। न त्वष्टाध्यायीस्थं सूत्रम्, नापि वार्तिकम्, भाष्ये अदर्शनात्। 'रात्राह्नाहाः पुंसि' इत्यस्यायमपवादः। **द्विरात्रमिति** । समाहारद्विगुः। 'अहस्सर्वैकदेश-' इत्यच्। **गणरात्रमिति** । गणशब्दो बहुपर्यायः, 'बहुगणवतु-' इति संख्यात्वम्। गणानां रात्रीणां समाहार इति द्विगुः, अच्। **अपथं नपुंसकम्** । न पन्था इति विग्रहे नञ्समासे नञो नस्य लोपे 'ऋक्पूः-' इत्यप्रत्यये टिलोपे अपथशब्दः, स नपुंसकमित्यर्थः। परवल्लिङ्गतापवादः। **तत्पुरुष इत्येवेति** । 'परवल्लिङ्गम्-' इत्यतस्तदनुवृत्तेरिति भावः। द्वन्द्वग्रहणं तु नानुवर्तते, अयोग्यत्वात्। **अन्यत्र त्विति** । बहुव्रीहावित्यर्थः। **अपन्था इति** । 'पथो विभाषा' इति समासान्तविकल्पः। 'पथः संख्याव्ययादेः' इति वक्ष्यमाणवार्तिकेन गतार्थमेवेदं सूत्रम्। **अर्धर्चाः** । बहुवचनात्तदादीनां ग्रहणमित्याह—**अर्धर्चा-**

तन्न। उक्तरीत्या द्व्यहत्र्यहादावपि नपुंसकत्वप्रसङ्गात्। न चेष्टापत्तिः। द्व्यहस्त्र्यह इति प्राचाप्युदाहृतत्वेन स्वमूलग्रन्थेन सह विरोधापत्तेः। 'ते तु त्रिंशदहोरात्रः' इत्यादिकोशविरोधाच्च। तस्माद्रात्राद्यन्तस्यैवायं पुंस्त्वविधिः, 'द्वन्द्वस्तत्पुरुषयोः-' इति प्रक्रमणात् तथा च भिन्नविषयत्वाद्यभावाद् रात्राह्नाहाः-' इति पुंस्त्वं समाहारनपुंसकतां परत्वेन बाधत एव। **संख्यापूर्वमिति** । अत्र च 'अपथपुण्याहौ नपुंसकौ'। 'संख्यापूर्वा रात्रिः' इति लिङ्गानुशासनसूत्रं मूलम्। संख्याग्रहणेषु कृत्रिमाकृत्रिमन्यायो न प्रवर्तते 'द्व्यष्टनः संख्यायाम्-'इति सूत्रे अशीतिपर्युदासादित्याशयेनोदाहरति। **द्विरात्रम्। त्रिरात्रम्। गणरात्रमिति** । गणानां बहुरात्रीणां समाहार इति विग्रहः। **अपथं नपुंसकम्। तत्पुरुष इत्येवेति** । द्वन्द्वग्रहणं तु नानुवर्तते अयोग्यत्वादिति भावः। **अपन्था इति** । 'पथो विभाषा' इति समासान्तविकल्पः। इदं सूत्रं शक्यमकर्तुम्। 'पथः संख्याव्ययादेः' इति वक्ष्यमाणवार्तिकेन गतार्थत्वात्। प्रसङ्गादाह **अर्धर्चा इति** । इह केषांचिदर्थभेदेन व्यवस्थेष्यते। सा च व्यवस्था मद्यमकरन्दमाक्षिकाणां वाची मधुशब्दो द्विलिङ्गः,

ध्वजः, ध्वजम् । एवं तीर्थशरीरमण्डपीयूषदेहाङ्कुशकलशेत्यादि । ८१७ **जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्** । (१-२-५८) एकोऽप्यर्थो वा बहुवद्भवति । ब्राह्मणाः पूज्याः—ब्राह्मणः पूज्यः । ८१८ **अस्मदो द्वयोश्च** । (१-२-५९) एकत्वे द्वित्वे च विवक्षितेऽस्मदो बहुवचनं वा स्यात् । वयं ब्रूमः । पक्षे, अहं ब्रवीमि, आवां ब्रूव इति वा । 'सविशेषणस्य प्रतिषेधः' (वा ७२१) । पटुरहं ब्रवीमि । ८१९ **फल्गुनीप्रोष्ठपदानां च नक्षत्रे** । (१-२-६०) द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् । पूर्वे फल्गुन्यौ, पूर्वाः फल्गुन्यः । पूर्वे प्रोष्ठपदे—पूर्वाः प्रोष्ठपदाः । नक्षत्रे किम्—फल्गुन्यौ माणविके ।

दय इति । अर्धर्चमिति । ऋचोऽर्धमिति विग्रहे 'अर्धं नपुंसकम्' इति समासः । 'ऋक्पूः–' इति अच् । परवल्लिङ्गं स्त्रीत्वं बाधित्वा पुंनपुंसकत्वविकल्पः । **जात्याख्यायाम् ।** आकृत्यधिकरणन्यायेन घटादिशब्दानां जातिवाचकत्वाज्जातेश्चैकत्वादेकवचनमेव स्यादित्यारम्भः । जातिशब्दे एकत्वे बहुवचनं वा स्यादित्यक्षरार्थः । तथा सति ब्राह्मणाः भोज्या इत्यादौ विशेषणान्न स्यादित्याशङ्क्य एकस्मिन्नर्थे विद्यमानः शब्दो बहूनर्थान् वक्ति, एकार्थो बहुवद्भवतीति लभ्यते इत्यभिप्रेत्याह—**एकोऽप्यर्थ इति ।** बहुत्वप्रयुक्तं कार्यं लभत इत्यर्थः । **अस्मदो द्वयोश्च । सविशेषणस्येति ।** 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः' इत्यत्र तु अवयवगतबहुत्वाभिप्रायं बहुवचनम् । **फल्गुनी ।** नक्षत्रे इति प्रथमाद्विवचनम् । नक्षत्रे यद्यभिधीयेते इत्यर्थः । चेन द्वयोरित्यनुकर्षः । तदाह—**द्वित्वे इति । पूर्वे प्रोष्ठपदे इति ।** स्त्रीत्वादौङश्शीभावः । 'प्रोष्ठपदा भाद्रपदा स्त्रियाम्' इत्यमरः । **फल्गुन्यौ माणविके इति ।** फल्गुनीनक्षत्रयुक्तकाले जाते इत्यर्थः । 'नक्षत्रेण युक्तः–' इत्यण् । 'लुबविशेषे' इति लुप् । ततो

चैत्रादिवाची तु पुँल्लिङ्गः । क्रियावचनस्तु विशेष्यलिङ्ग इत्येवं यथायथं ज्ञेयम् । 'अर्धर्चाः पुंसि च' 'स नपुंसकम्' इत्यनयोर्मध्ये 'जात्याख्यायाम्–' इति चतुःसूत्र्याः संगतिरिह चिन्त्या । बहूनां वचनं प्रतिपादनमिति व्याख्यानात् फलितोऽत्रातिदेश इत्याशयेनाह । **एकोप्यर्थो वा बहुवदिति** । एवं च विशेषणादपि सिद्धमिति ध्वनयन्नुदाहरति–**ब्राह्मणाः पूज्या इति**। जात्याख्यायां किम् , देवदत्तो यज्ञदत्तः । एकस्मिन् किम् , व्रीहियवौ । **अस्मदो द्वयोश्च** । चाद् 'एकस्मिन् बहुवचनमन्यतरस्याम्' इति च वर्तते तदेवाह–**एकत्वे द्वित्वे च विवक्षित इत्यादि । फल्गुनीप्रोष्ठपदानां च** । चकारेण द्वयोरनुकर्षणादाह–**द्वित्व इति । फल्गुन्यौ माणविके इति** । फल्गुनीशब्दाद् 'नक्षत्रेण युक्तः कालः' इत्यण् । तस्य 'लुबविशेषे' इति लुप् । ततो जातार्थे 'फल्गुन्यषाढाभ्यां टानौ' इति टः, टित्त्वाद् ङीप् । न चायं गौणः,

---

१ 'पूर्वफल्गुन्यौ' इति क्वचित् पाठः ।

८२० तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्। (१-२-६३) बहुत्वं द्वित्ववद्भवति। तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू। तिष्येति किम्-विशाखानूराधाः। नक्षत्रेति किम्--तिष्यपुनर्वसवो माणवकाः। **८२१ स नपुंसकम्।** (२-४-१७) समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात्। परवल्लिङ्गापवादः। पञ्चगवम्। दन्तोष्ठम्। 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' (वा १५२६)। पञ्चमूली। 'आबन्तो वा' (वा १५२७) पञ्चखट्वम्, पञ्चखट्वी।

जातार्थे 'फल्गुन्यषाढाभ्यां टानौ' इति टः। टित्वाद् ङीप्। **तिष्यपुनर्वस्वोः। विशाखानूराधा इति।** विशाखे च अनूराधाश्चेति विग्रहः। **तिष्यतिपुनर्वसव इति।** तिष्यश्च पुनर्वसू चेति विग्रहः। तिष्यशब्दात् पुनर्वसुशब्दाच्च 'नक्षत्रेण युक्तः–' इत्यण्। 'लुबविशेषे' इति लुप्। ततो जातार्थे सन्धिवेलाद्यण्। 'श्रविष्ठाफल्गुनी–' इत्यादिना लुक्। जात्याख्यायामित्यादिचतुस्सूत्र्या अत्र संगतिश्चिन्त्या। **स नपुंसकम्।** 'द्विगुरेकवचनम्' इति द्विगुः 'द्वन्द्वश्च प्राणि–' इति द्वन्द्वश्च तच्छब्देन परामृश्यते। तौ च समाहारार्थावेव विवक्षितौ, व्याख्यानात्। तदाह—**समाहार इति। पञ्चगवमिति।** पञ्चानां गवां समाहार इति द्विगुः। **दन्तोष्ठमिति।** दन्ताश्च ओष्ठौ चेति विग्रहः। 'द्वन्द्वश्च प्राणि–' इति समाहारद्वन्द्वः। **अकारान्तेति।** अकारान्तम् उत्तरपदं यस्येति विग्रहः। 'स नपुंसकम्' इत्यस्यापवादः। **पञ्चमूलीति।** समाहारद्विगुः, स्त्रीत्वम्, 'द्विगोः' इति ङीप्। **आबन्तो वेति।** स्त्रियां वेति वक्तव्यमित्यर्थः। **पञ्चखट्वमिति।** समाहारद्विगुः। नपुंसकत्वे ह्रस्वः।

यौगिकत्वात्। तथा च गौणमुख्यन्यायाप्रवृत्त्या नक्षत्रग्रहणमावश्यकमिति भावः। **तिष्यपुनर्वस्वोः विशाखानुराधा इति।** विशाखे चानुराधाश्चेति विग्रहः। **तिष्यपुनर्वसव इति।** तिष्यपुनर्वसुशब्दाभ्यां पूर्ववद् 'नक्षत्रेण युक्तः कालः' इत्यण्, 'लुबविशेषे' इति च लुप्। ततो जातार्थे 'संधिवेला-' आदिसूत्रेण अण्, तस्य तु श्रविष्ठाफल्गुन्यनुराधा-' इत्यादिना लुक्। नक्षत्र इत्यनुवर्तमाने पुनर्नक्षत्रग्रहणं पर्यायाणामपि यथा स्यादित्येतदर्थमित्याकरः। एवं च 'सिध्यपुनर्वसू' इत्यपि सिध्यतीति दिक्। बहुवचनस्य किम्, इदं तिष्यपुनर्वसु। 'चार्थे द्वन्द्वः' इतिसमाहारद्वन्द्वोऽयम्। **स नपुंसकम्।** 'अनन्तरस्य–' इति न्यायोऽत्र नाश्रीयते, तथात्वे द्विगुसंग्रहो न स्यादित्याशयेनाह–**द्विगुर्द्वन्द्वश्चेति।** अत्र व्याचक्षते–प्रकरणादेवानुवाद्यलाभे 'स'ग्रहणमेतत्प्रकरणानुपात्तस्यापि समाहारद्वन्द्वस्य संग्रहार्थम्, तेन संज्ञापरिभाषमित्यादि सिद्धमिति। **पञ्चगवमिति।** 'तद्धितार्थे–'इत्यादिना समाहारे द्विगुः। **दन्तोष्ठमिति।** 'द्वंद्वश्च प्राणि-' इत्यादिना समाहारे द्वन्द्वः। **पञ्चखट्वमिति।** नपुंसकह्रस्व। **पञ्चखट्वीति।** उपस-

१ 'नुराधः' इति क्वचित् पाठः। २ 'पूली' इति क्वचित्।

'अनो नलोपश्च, वा च द्विगुः स्त्रियाम्' (वा १२२८) पञ्चतक्षी, पञ्चतक्षम्। **'पात्राद्यन्तस्य न'** (वा १२२९)। पञ्चपात्रम्। त्रिभुवनम्। चतुर्युगम्। **पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा'** (वा १२२३) **पुण्याहम्। सुदिनाहम्।** 'पथः संख्याव्य-

---

पञ्चखट्वीति । उपसर्जनह्रस्वत्वे अदन्तत्वाद् 'द्विगोः' इति स्त्रीत्वपक्षे ङीप्। **अनो नलोपश्चेति** । अन इत्यावर्तते । एकं प्रथमया विपरिणतं द्विगुरित्यत्रान्वेति । तदन्तविधिः । अन्नन्तो द्विगुः स्त्रियां वा स्यात्, अनो नस्य लोपः स्यादित्यर्थः । वाग्रहणं स्त्रियामित्यत्रैव संबध्यते, न तु नलोपेऽपि । तेन स्त्रीत्वाभावेऽपि नलोपः । **पञ्चतक्षीति** । पञ्चानां तक्ष्णां समाहार इति द्विगुः, स्त्रीत्वम्, नलोपः, 'द्विगोः' इति ङीबिति भावः । **पञ्चतक्षमिति** । समाहारद्विगुः । स्त्रीत्वाभावपक्षे 'स नपुंसकम्' इति नपुंसकत्वम्, नलोप इति भावः । न चान्तर्वर्तिनीं विभक्तिमाश्रित्य तक्षन्शब्दस्य सुबन्तत्वेन पदत्वाद् 'न लोपः प्रातिपदिक–' इत्यनेन नलोपो भविष्यतीति वाच्यम्, 'उत्तरपदत्वे च–' इति प्रत्ययलक्षणनिषेधात् । **पात्राद्यन्तस्य नेति** । पात्रादिर्गणः। तदन्तस्य समाहारद्विगोः न स्त्रीत्वमिति वक्तव्यमित्यर्थः । **पञ्चपात्रम्, त्रिभुवनम्, चतुर्युगमिति** । स्त्रीत्वाभावे 'स नपुंसकम्' इति नपुंसकत्वमिति भावः । **पुण्येति** । पुण्यसुदिनाभ्यां परो यः अहन्शब्दः तदन्तस्य तत्पुरुषस्य नपुंसकत्वं वक्तव्यमित्यर्थः। 'रात्राह्न–' इत्यस्यापवादः । **पुण्याहमिति** । पुण्यम् अहरिति कर्मधारयः, 'राजाहः–' इति टच्, टिलोपः । 'उत्तमैकाभ्यां च' इति अह्नादेशनिषेधः । **सुदिनाहमिति** । सुदिनम् अहरिति कर्मधारयः, टच्, टिलोपः, प्रशस्तपर्यायः

र्जनह्रस्वत्वे सत्यदन्तत्वाद् 'द्विगोः' इति स्त्रीत्वपक्षे ङीप्। **अनो नलोपश्चेति** । उत्तरपदत्वे चापदविधौ-'इतिप्रत्ययलक्षणप्रतिषेधादप्राप्तो नलोप इति भावः। इह वाशब्दः स्त्रियामित्यनेन संबध्यते, न तु पूर्वेण। तेन नित्यो नलोप इत्याह—**पञ्चतक्षमित्यादि**। **पात्राद्यन्तस्येति** । स्त्रीत्वमिति शेषः। आकृतिगणोऽयम् । **सुदिनाहमिति** । प्रशस्तपर्यायः सुदिनशब्दः, 'सुदिनासु सभासु कार्यमेतत्प्रतिचिन्वीत विशेषतः स्वयं च' इत्यादिप्रयोगात्। **पथः संख्याव्ययेति**। संख्याव्ययरूपो य आदिस्तस्मादित्यर्थः। **त्रिपथम्, विपथमिति** । 'ऋक्पूरब्धूः-' इत्यप्रत्ययः । **सुपन्थाः, अतिपन्था इति**। 'न पूजनात्' इति समासान्तनिषेधः। कथं तर्हि 'व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः' इत्यमर इति चेत्, प्रमाद एवायमिति बहवः। मनोरमायां तु 'पथे गतौ' इत्यस्मात् पचाद्यचि पथति व्याप्नोतीति व्युत्पादितः पथशब्दोऽस्ति। तथा च त्रिकाण्डशेषः 'वाटः पथश्च मार्गः स्यात्' इति। तेन पथशब्देन समासे पुंस्त्वमुपपन्नम्। न चैवं विपथसिद्धावपि कापथो न स्यात्कादेशस्य दुर्लभत्वादिति वाच्यम्, 'ईषदर्थे च' इति तत्संभवात्कुत्सायाम-

यादेः' (वा १२२४)। संख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः। त्रयाणां पन्थास्त्रिपथम्। विरूपः पन्था विपथम्। कृतसमासान्तनिर्देशान्नेह—सुपन्थाः, अतिपन्थाः। 'सामान्ये नपुंसकम्' (वा ४०४३)। मृदु

सुदिनशब्द इति न पौनरुक्त्यम्। **पथः संख्याव्ययादेरिति**। नपुंसकत्वं वक्तव्यमिति शेषः। संख्याव्ययेति समाहारद्वन्द्वः। संख्याव्ययमादिरिति कर्मधारयः, दिग्योगे पञ्चमी, पर इति शेषः, पथ इति कृतसमासान्तादकारान्तात् प्रथमा। तदाह—**संख्याव्ययादेरिति**। परवल्लिङ्गतापवादः। **त्रिपथमिति**। 'ऋक्पूः—' इति अप्रत्ययः, टिलोपः। एवं विपथमित्यपि। 'प्रादयो गताद्यर्थे—' इति समासः। **सुपन्थाः, अतिपन्था इति**। 'स्वती पूजायम्' इति समासः। 'न पूजनात्' इति समासान्तनिषेधः। आवश्यकत्वादनेन सिद्धे 'अपथं नपुंसकम्' इति न कार्यम्। **सामान्ये नपुंसकमिति**। न्यायसिद्धमेतत्, विशेष्यविशेषणासंनिधाने सति स्त्रीत्वपुंस्त्वयोरनभिव्यक्तौ 'उभयोरन्तरं यच्च तदभावे नपुंसकम्' इति लक्षणलक्षितनपुंसकत्वस्यैव न्याय्यत्वात्। अत एव 'दाण्डिनायन—' इति सूत्रभाष्ये एकश्रुतिः स्वरसर्वनाम, नपुंसकं लिङ्गसर्वनामेत्युक्तम्। **मृदु पचतीति**। क्रियाविशेषणमिदं द्वितीयान्तम्। पचेर्हि विक्लित्त्यनुकूलव्यापारोऽर्थः। तत्र विक्लित्त्यंशे मृदुत्वमन्वेति। विक्लित्तिश्च व्यापारे साध्यत्वेनान्वेति। तथा च मृदु पाकं करोतीत्यर्थः। तथा च धातूपात्तव्यापारं प्रति कर्मीभूतेन विक्लित्त्यंशेन सामानाधिकरण्याद् मृद्विति द्वितीया। यत्र तु धात्वर्थः करणत्वेनान्वेति 'यजेत स्वर्गकामः' इत्यादौ, तत्र हि यागेन स्वर्गं कुर्यादित्यर्थः। तत्र क्रियाविशेषणस्य तृतीयान्तत्वमेव 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इत्यादावित्यन्यत्र विस्तरः। **प्रातः कमनीयमिति**। रमणीयमित्यर्थः। अत्रापि प्रातरित्यव्ययस्य विशेष्यस्यालिङ्गत्वात् तद्विशेषणस्य कमनीयशब्दस्यानव्ययस्य लिङ्गविशेषावगमकत्वाभावाद् नपुंसकत्वमेवेति भावः। इदं चानियतलिङ्गविषयम्।

र्थतः पर्यवसानादिति स्थितम्। केचित् तु 'पथः संख्या-'इति वार्तिके कृतसमासान्तस्यैव ग्रहणं न तु पचाद्यजन्तस्य,इत्यत्र बीजाभाद्विपथः कापथ इतिप्रयोगो दुरुपपाद एवेत्याहुः। अत्र माधवः—परवल्लिङ्गापवादत्वात्तत्पुरुष एवेदं प्रवर्तते नान्यत्र। विपथा नगरी, बहुव्रीहिरयम्। पन्थानमतिक्रान्ता अतिपन्था। इहापि न, 'द्विगुप्राप्ता—' इत्यादिना परवल्लिङ्गतायाः प्रतिषेधादिति। **सामान्ये नपुंसकमिति**। अनियतलिङ्गविषयकमिदम्। तेनादिः पचति, प्रातरादिरिति पुंस्त्वमेव। **मृदु पचतीति**। क्रियाविशेषणत्वाद्-द्वितीयान्तम्। धातूपात्तभावनां प्रति हि फलांशः कर्मीभूतः। तथा च फलसामानाधिकरण्ये द्वितीया। अत एव सकृल्ल्वावित्यादौ कारकपूर्वकत्वाद्यण्। यत्र तु भावनां

पचति। प्रातः कमनीयम्। ८२२ **तत्पुरुषोऽनञ्कर्मधारयः**। (२-४-१९) अधिकारोऽयम्। ८२३ **संज्ञायां कन्थोशीनरेषु**। (२-४-२०) कन्थान्तस्तत्पुरुषः क्लीबं स्यात्, सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा। सुशमस्यापत्यानि सौशमयः, तेषां कन्था सौशमिकन्थम्। संज्ञायाम् किम्—वीरणाकन्था। उशीनरेषु किम्—दाक्षिकन्था। ८२४ **उपज्ञोपक्रमं तदाद्याचिख्यासायाम्**। (२-४-२१) उपज्ञान्तः उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात्, तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते। पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः। नन्दोपक्रमं द्रोणः। ८२५ **छाया बाहुल्ये**। (२-४-२२)

तेन आर्दि वचति प्रातरादिरित्यत्र न भवति, आदिशब्दस्य नियत लिङ्गत्वात्। **तत्पुरुषोऽनञ्**। नञ्समासकर्मधारयाभ्यां भिन्नस्तत्पुरुषो वक्ष्यमाणकार्यभागित्यर्थः। तदाह—**अधिकारोऽयमिति**। 'परवल्लिङ्गम्–' इत्यतः प्रागिति शेषः। **संज्ञायां कन्था**। सुगममेव। **उपज्ञा**। उपज्ञायते प्रथमं ज्ञायत इत्युपज्ञा। 'स्त्रियां क्तिन्' इत्यधिकारे 'आतश्चोपसर्गे' इति कर्मण्यङ्। उपक्रम्यते आरभ्यते इत्युपक्रमः। कर्मणि घञ्। 'नोदात्तोपदेशस्य' इति वृद्धिनिषेधः। उपज्ञा चोपक्रमश्चेति समाहारद्वन्द्वः। तत्पुरुष इत्यस्य विशेषणमिदम्, तदन्तविधिः, 'स नपुंसकम्' इत्यतो नपुंसकमित्यनुवर्तते। तदाह—**उपज्ञान्त उपक्रमान्तश्चेति**। तच्छब्देन उपज्ञोपक्रमौ विवक्षितौ। आदिशब्दो भावप्रधानः प्राथम्ये वर्तते। तयोरादिः प्राथम्यं तदादिः। तस्य आचिख्यासा आख्यातुमिच्छा, विवक्षायामिति यावत्। तदाह—**तयोरादिरित्यादि**। **पाणिनेरुपज्ञेति**। कर्तरि षष्ठी। **पाणिन्युपज्ञं ग्रन्थ इति**। पाणिनिना प्रथमं ज्ञायमान इत्यर्थः। इदं प्रकरणं परवल्लिङ्गत्वस्य विशेष्यनिघ्नत्वस्य चापवादः। **नन्दोपक्रमं द्रोण इति**।

प्रति करणतया धात्वर्थविशेषोऽन्वेति तत्र तद्विशेषणानां तृतीयान्ततैव, ज्योतिष्टोमेन यजेतेत्यत्र यथा। एतच्च 'करणे यजः' इति सूत्रे वृत्तिपदमञ्जर्योः स्पष्टम्। **तत्पुरुषोऽनञ्**। नञ्समासकर्मधारयभिन्नस्तत्पुरुषो वक्ष्यमाणकार्यभाग्भवतीति सूत्रार्थः। **उपज्ञो**। उपज्ञायत इत्युपज्ञा। 'आतश्चोपसर्गे' इति कर्मण्यङ्। उपक्रम्यत इत्युपक्रमः। कर्मणि घञ्। 'नोदात्तोपदेशस्य–' इति वृद्धिप्रतिषेधः। उपज्ञा च उपक्रमश्चेति समाहारद्वन्द्वः। स चानुवर्तमानस्य तत्पुरुषस्य विशेषणम्। तच्छब्देन उपज्ञोपक्रमौ परामृश्येते। तदेतत्सकलमभिप्रेत्याह—**उपज्ञान्त इत्यादि**। आख्यातुमिच्छा आचिख्यासेतीच्छासना इह विवक्षैव शब्दप्रवृत्तौ नियामिका, न तु वस्तुस्थितिरिति ज्ञाप्यते। तेन 'त्वदुपक्रमसौजन्यम्' इत्याद्यपि सिध्यति। **पाणिनेरिति**। कर्तरि

छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये-इक्षूणां छाया इक्षुच्छायम् । 'विभाषा सेना-' (सू ८२८) इति विकल्पस्यायमपवादः । 'इक्षुच्छायानिषादिन्यः' इति तु 'आ समन्तान्निषादिन्यः' इत्याङ्श्लेषो बोध्यः । **८२६ सभा राजाऽमनुष्यपूर्वा । (२-४-२३)** राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् । इनसभम् । ईश्वरसभम् । 'पर्यायस्यैवेष्यते' (वा ५११) नेह-राजसभा, चन्द्रगुप्तसभा । अमनुष्यशब्दो रूढया रक्षःपिशाचादीनाह । रक्षस्सभम्, पिशाचसभम् । **८२७ अशाला च । (२-४-२४)** सङ्घा-

---

नन्देनारभ्यमाण इत्यर्थः । कर्तरि षष्ठ्याः समासः । **छाया बाहुल्ये** । छायया तत्पुरुषस्य विशेषणात् तदन्तविधिमभिप्रेत्याह—**छायान्त इति । पूर्वपदार्थेति** । कस्य बाहुल्ये इत्याकाङ्क्षायाम् आपादकद्रव्यनिमित्तकत्वात् छायायाः तद्बाहुल्ये इति गम्यते । तच्चापादकद्रव्यमर्थात् पूर्वपदार्थभूतमिति भावः । बाहुल्ये किम् ? कुड्यस्य छाया कुड्यच्छाया । **सभा** । राजा च अमनुष्यश्च राजामनुष्यौ, तौ पूर्वौ यस्याः सा राजामनुष्यपूर्वा इति विग्रहः । सभया तत्पुरुषविशेषणात्तदन्तविधिः । राजशब्देन राजपर्याय एव विवक्षितः, न तु राजन्शब्दः । तदाह—**राजपर्यायपूर्व इति । इनसभम्, ईश्वरसभमिति** । इनस्य ईश्वरस्य वा सभेति विग्रहः । इनेश्वरशब्दौ राजपर्यायाविति भावः । पर्यायमात्रग्रहणे प्रमाणं दर्शयति—**पर्यायस्यैवेष्यत इति** । भाष्यकृतेति शेषः । 'स्वं रूपम्-' इति सूत्रे 'जित्पर्यायवचनस्यैव राजाद्यर्थम्' इति वार्तिकं भाष्ये पठितमिति भावः । **राजसभेति** । राजन्शब्दपूर्वकत्वेऽप्यत्र राजपर्यायपूर्वकत्वं नास्तीति भावः । **चन्द्रगुप्तसभेति** । चन्द्रगुप्त इति राजविशेषस्य नाम, न तु तत्पर्याय इति भावः । नन्वमनुष्यपूर्वकत्वाद् देवसभेत्यादावपि स्या-

---

षष्ठी । **नन्दोपक्रममिति** । नन्दस्योपक्रममिति विग्रहः । **छाया बाहुल्ये** । बाहुल्ये सति या छाया तद्वाची यश्छायान्तस्तत्पुरुष इत्यर्थः । इह कस्य बाहुल्य इत्यपेक्षायामावरकद्रव्यनिमित्तत्वाच्छायायास्तद्बाहुल्य इति गम्यते । तच्चावरकं पूर्वपदार्थभूतमेवेत्याशयेनाह—**पूर्वपदार्थबाहुल्य इति** । पूर्वपदार्थबाहुल्ये किम्, कुड्यस्य च्छाया कुड्यच्छाया । **प्रश्लेषो बोध्य इति** । केचित्तु—'इक्षुच्छायनिषादिन्यः' इत्येव पठन्ति । **सभा । इनसभमित्यादि** । इनशब्दोऽत्र राजपर्यायः, ईश्वरशब्दश्च । ननु 'स्वं रूपम्-' इति वचनाद्राजशब्दस्यैव ग्रहणं युक्तं न पर्यायस्येत्यत आह—**पर्यायस्यैवेष्यत इति** । एवकारेण स्वरूपस्य विशेषाणां च निरासः । कथं तर्हि 'नृपतिसभामगमञ्च वेपमानः' इति कीचकवधे । अत्र केचित्—ना पतिर्यस्यां सभायामिति बहुव्रीहौ कृते पश्चात्कर्मधारयः । 'अनञ्कर्मधारयः' इत्युक्तेर्न क्लीबत्वमित्याहुः । रक्षितस्त्वाह—

तार्थां या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् । स्त्रीसभम् । स्त्रीसङ्घात इत्यर्थः । अशाला किम्–धर्मसभा । धर्मशालेत्यर्थः । ८२८ **विभाषा सेनासुराच्छायाशालानिशानाम्** । (२-४-२५) एतदन्तस्तत्पुरुषः क्लीबं वा स्यात् । ब्राह्मणसेनम्, ब्राह्मणसेना । यवसुरम्, यवसुरा । कुड्यच्छायम्, कुड्यच्छाया । गोशालम्, गोशाला । श्वनिशम्, श्वनिशा । 'तत्पुरुषोऽनञ्कर्मधारयः' (सू ८२२) इत्यनुवृत्तेर्नेह । दृढसेनो राजा । असेना । परमसेना ।

॥ इति तत्पुरुषसमासप्रकरणम् ॥

दित्यत आह—**अमनुष्यशब्दो रूढ्येति** । असुरशब्दो दैत्यानिवेति भावः । **अशाला च** । अशालार्थकेत्यर्थः । सभाशब्दः शालायां सङ्घातार्थे च वर्तते । तत्र राजामनुष्यपूर्वकस्य शालावाचिनः सभाशब्दस्य पूर्वसूत्रे क्लीबत्वमुक्तम् । संप्रति संघातवाचिनः सभाशब्दस्य क्लीबत्वमुच्यत इत्याह—**संघातार्था या सभेति** । सभाशब्द इत्यर्थः । **विभाषा सेना** । प्रथमार्थे षष्ठी । तत्पुरुष इत्यनुवृत्तं सेनादिभिर्विशेष्यते । तदन्तविधिः । तदाह—**एतदन्त इति** । प्रत्येकाभिप्रायमेकवचनम् । **श्वनिशमिति** । शुनो निशेति विग्रहः । कृष्णचतुर्दशीत्याहुः । 'शुनश्चतुर्दश्यामुपवसतः पश्यामः' इति तिर्यगधिकरणे शाबरभाष्ये स्थितम् । **दृढसेन इति** । दृढा सेना यस्येति बहुव्रीहिः । तत्पुरुषत्वाभावाद् न क्लीबत्वविकल्पः । **असेनेति** । तत्पुरुषत्वेऽपि नञ्समासत्वान्न क्लीबत्वविकल्पः । **परमसेनेति** । कर्म-

---

गजपतिवन्नृपतिरपि राजविशेषस्तेनात्र नानुपपत्तिरिति । **अशाला च** । शालावाची संघातवाची च सभाशब्दस्तत्र राजामनुष्यपूर्वत्वे शालावाचिनः क्लीबत्वमुक्तम् । अनेन तु संघातवाचिनो विधीयत इत्याह—**संघातार्थेति** । **विभाषा सेना** । प्रथमार्थे षष्ठीति । सेनादिभिस्तत्पुरुषो विशेष्यते । विशेषणेन तदन्तविधिस्तदाह—**एतदन्त इति** । **श्वनिशमिति** । कृष्णचतुर्दशी । तस्यां किल केचिच्छ्वान उपवसन्ति । एतच्च शाबरभाष्ये तिर्यगधिकरणे स्पष्टम् । 'तत्पुरुष–' इत्याद्यधिकारसूत्रस्यात्रैव प्रयोजनम्, न तु 'संज्ञायां कन्थोशीनरेषु' इत्यादिपञ्चसूत्र्याम् । अतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य च तत्रासंभवादित्याकरे स्थितम् । तथैव प्रत्युदाहरति—**दृढसेन इत्यादि** । ननु बहुव्रीहौ विशेष्यनिघ्नता न्याय्यैवेति किमनेन तत्पुरुषग्रहणेन । मैवम्, न्यायापेक्षया वचनस्य बलीयस्त्वात् । किं चासति तद्ग्रहणे द्वन्द्वे नपुंसकता स्यात्परवल्लिङ्गापवादत्वादस्य प्रकरणस्येति दिक् ॥ इति तत्पुरुषः ॥

अथ बहुव्रीहिसमासप्रकरणम् । १६ ।

८२६ शेषो बहुव्रीहिः । (२-२-२३) अधिकारोऽयम् । 'द्वितीया श्रित–' (सू ६८६) इत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्यर्थः । ८३० अनेकमन्यपदार्थे । (२-२-२४) अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः । अप्रथमाविभक्त्यर्थे

धारयत्वाद् न क्लीबत्वम् । 'तत्पुरुषोऽनञ्कर्मधारयः' इत्यधिकारस्य अत्रैव प्रयोजनमिति कैयटे प्रपञ्चितम् ।

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां तत्पुरुषसमासप्रकरणम् ।

शेषो बहुव्रीहिः । त्रिकस्येति । विभक्तेरित्यर्थः । ननु 'द्वितीया श्रित–' इति 'तृतीया तत्कृत–' इति 'चतुर्थी तदर्थ–' इति 'पञ्चमी भयेन' इति 'षष्ठी' इति 'सप्तमी शौण्डैः' इति च द्वितीयादिविभक्तीनां षण्णां समासो विहितः । विशेषणं विशेष्येणेत्यादिना तु प्रथमाया अपि समासो विहितः, अतः शेषविभक्तिर्दुर्लभेत्यत आह—**विशिष्येति ।** विशेषणसमासस्य वस्तुतः प्रथमाविभक्तौ प्रवृत्तावपि प्रथमाविभक्तिं विशिष्य उच्चार्यविधानाभावात् समासविधिषु विशिष्यनिर्दिष्टद्वितीयादिविभक्तिषट्कापेक्षया शेषः प्रथमाविभक्तिरिति भावः । तदाह—**प्रथमान्तमित्यर्थ इति** । एतच्च भाष्ये स्पष्टम् । **अनेकमन्यपदार्थे । प्रथमान्तमिति ।**

शेषो बहुव्रीहिः । 'शिष् असर्वोपयोगे' कर्मणि घञ् । अत्र वृत्तिकृद् यत्रान्यसमासो नोक्तः स शेष इत्याह । येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसंज्ञकः समासो न विहितः स शेष इत्यर्थ इति हरदत्तो व्याख्यत् । एतच्च 'प्राक्कडारात्परं कार्यम्' इति पाठाभिप्रायेण बोध्यम् । अस्मिंस्तु पक्षे शेषग्रहणाभावे उन्मत्तगङ्गमित्यत्र परत्वाद्बहुव्रीहिः स्यात् निरवकाशत्वाच्चाव्ययीभाव इत्युन्मत्तगङ्ग इत्याद्यनिष्टं पक्षे प्रसज्येत । 'आकडारादेका–' इति पाठाभ्युपगमपक्षे त्वेकसंज्ञाधिकारेणैवोन्मत्तगङ्गमित्यादिसिद्धेः शेषग्रहणं व्यर्थम् । निरवकाशतयाऽव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधात् । अतस्तत्रापि प्रयोजनमाह—**द्वितीया श्रितेत्यादिनेति ।** शेषाधिकारस्थव्रीहेरेव 'शेषाद्विभाषा' इति कप्प्रत्ययो नान्यस्माद्बहुव्रीहेरित्येतल्लाभार्थमपि शेषग्रहणमावश्यकमिति बोध्यम् । **यस्य त्रिकस्येति ।** यद्यपि 'प्रादयो गताद्यर्थे प्रथमया' इत्युक्तम् । तथापि 'द्वितीया श्रितादिभिः' इतिवत् 'प्रथमा केनचित्सह समस्यते' इति

बहुव्रीहिरिति समानाधिकरणानामिति च फलितम्। प्राप्तमुदकं यं स प्राप्तोदको

शेषग्रहणानुवृत्तिलभ्यमिदम्। एवं च सुप्सुपेति नानुवर्तते, प्रयोजनाभावात्। अनेकं सुबन्तमिति पाठेऽपि प्रथमान्तमित्यर्थः। **अन्येति**। उपस्थितप्रथमान्तातिरिक्तेत्यर्थः। एवं चपञ्चभिर्भुक्तमन्नं यस्य स पञ्चभुक्त इति बहुव्रीहिनिवृत्त्यर्थं 'बहुव्रीहिः समानाधिकरणानामिति वक्तव्यम्' इति वार्तिकं यद्भाष्ये स्थितम्, यच्च वृष्टे देवे यो गतः स वृष्टदेव इति बहुव्रीहिनिवृत्त्यर्थम् 'अप्रथमाविभक्त्यर्थे बहुव्रीहिर्वक्तव्यः' इति वार्तिकम्, तदुभयमपि न कर्तव्यमित्याह—**अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितमिति**। शेषग्रहणादिति शेषः। शेषग्रहणात् प्रथमान्त इति लभ्यत इति हि भाष्यम्। पञ्चभिर्भुक्तमस्य इत्यत्र च समस्यमानपदयोरेकस्याप्रथमान्तत्वान्न बहुव्रीहिरिति फलितम्। प्रथमान्तातिरिक्तस्य पदस्यार्थे वर्तमानं समस्यते इत्यर्थाश्रयणाद् वृष्टे देवे गत इत्यत्रापि न बहुव्रीहिरिति फलितमिति भावः। तत्र द्वितीयार्थबहुव्रीहिमुदाहरति—**प्राप्तमिति**। 'गत्यर्थाकर्मक–' इति कर्तरि क्तः।

नोक्तमित्यर्थः। वार्तिककृता प्रथमयेत्युक्तावपि सूत्रकृता नोक्तमिति वा। **प्रथमान्तमिति**। कण्ठेकाल इत्यादिबहुव्रीहिस्तु ज्ञापकसाध्य इति भावः। **अन्यस्य पदस्यार्थ इति**। समस्यमानपदातिरिक्तस्य पदस्यार्थ इत्यर्थः। पदेन हि प्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः कर्मकर्त्रादिरभिधीयते। प्रथमान्तेन तु प्रातिपदिकार्थमात्रम्। यद्यपि त्रिकपक्षे संख्या प्रत्ययार्थः, तथापि तस्याः प्रकृत्यर्थं प्रति विशेषणत्वान्न प्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः प्रथमान्तस्यास्ति। एवं च 'द्वितीयान्तार्थे' इति फलितम्। तदाह—**अप्रथमाविभक्त्यर्थ इति**। **समानेति**। एतच्च शेषग्रहणाल्लभ्यम्। अनेकं किम्, बहूनामपि यथा स्यात्। एतच्च मूल एव स्फुटीभविष्यति। अनिज्विधौ केवलग्रहणं ज्ञापकीकृत्यानेकग्रहणमिह सुत्यजमित्याहुः। अन्यग्रहणं किम्, बहुव्रीहितत्पुरुषयोर्विषयविभागो यथा विज्ञायेत, स्वपदार्थे हि सावकाशं तत्पुरुषं परत्वादन्यपदार्थे बहुव्रीहिर्बाधते। असति त्वन्यग्रहणे कण्ठेकाल इत्यादौ व्यधिकरणपदे बहूनां समुदाये च सावकाशं बहुव्रीहिं स्वपदार्थ इवान्यपदार्थेऽपि नीलोत्पलं सर इत्यादौ समानाधिकरणे तत्पुरुषो बाधेत। पदग्रहणं किम्, वाक्यार्थे मा भूत्। प्राह्वती नदी। इह मा स्नासीरिति वाक्यार्थो गम्यते। अर्थग्रहणं किम्, यावता पदेन पदान्तरस्य वृत्त्यसंभवादेव पदार्थे भविष्यति। अत्राहुः—प्रकृत्यर्थविशिष्टप्रत्ययार्थाभिधानं यथा स्यात्। अन्यथा प्राधान्यात् प्रत्ययार्थमात्रं गृह्येत। इष्टापत्तौ तु चित्रगुरित्येतत् षष्ठ्यर्थसंबन्धमात्रपरं स्यात्। तथा च देवदत्तादेः सामानाधिकरण्यं न स्यादिति। अत्रेदमवधेयम्—'सुपा–' इत्येतन्नानुवर्तते। तेनात्रानेकं प्रथमान्तं मिथः

ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । पीताम्बरो हरिः । वीरपुरुषको ग्रामः । प्रथमार्थे तु न । वृष्टे देवे गतः । व्यधिकरणानामपि न । पञ्चभिर्भुक्तमस्य । 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा १३३०) प्रपतितपर्णः प्रपर्णः 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः'

अत्र विग्रहवाक्ये ग्रामकर्मकप्राप्तिकर्तृ उदकमित्येवं ग्रामस्य विशेषणतया, विशेष्यत्वेन तु प्राप्तस्य उदकस्य बोधः । समासे तु एकार्थीभावमहिम्ना उदककर्तृकप्राप्तिकर्मीभूतो ग्राम इत्येवं ग्रामस्य विशेष्यतया, तद्विशेषणतया तु प्राप्तस्य उदकस्य बोधः । एवमुत्तरत्रापि विशेषणविशेष्यभावव्यत्यासो ज्ञेयः । अथ तृतीयार्थबहुव्रीहिमुदाहरति—**ऊढरथोऽनड्वानिति** । ऊढो रथो येनेति विग्रहः । अथ चतुर्थ्यर्थबहुव्रीहिमुदाहरति—**उपहृतपशू रुद्र इति** । उपहृतः पशुः यस्मै इति विग्रहः । अथ पञ्चम्यर्थबहुव्रीहिमुदाहरति—**उद्धृतौदना स्थालीति** । उद्धृत ओदनो यस्या इति बहुव्रीहिः । अथ षष्ठ्यर्थबहुव्रीहिमुदाहरति—**पीताम्बरो हरिरिति** । पीतमम्बरं यस्येति विग्रहः । अथ सप्तम्यर्थबहुव्रीहिमुदाहरति—**वीरपुरुषको ग्राम इति** । वीराः पुरुषा यस्मिन्निति विग्रहः । 'शेषाद्विभाषा' इति कप् । अत्र कर्मादीनां समासेनाभिहितत्वात् प्रथमैव । **प्रथमार्थे तु नेति** । अन्यपदार्थशब्देन प्रथमान्तातिरिक्तद्वितीयाद्यन्तार्थस्यैव विवक्षितत्वादिति भावः । **व्यधिकरणानामपि नेति** । अनेकं प्रथमान्तमित्युक्तेरिति भावः । **प्रादिभ्यः** । प्रादिभ्यः परं यद्धातुजप्रकृतिकप्रथमान्तं तस्य अन्येन प्रथमान्तेन बहुव्रीहिर्वाच्यः । तत्र बहुव्रीहौ प्रादिभ्यः परस्य उत्तरपदस्य धातुजस्य लोपश्च विकल्पेन वाच्य इत्यर्थः । अत्र बहुव्रीहिरित्यनुवादः, लोपस्यैव विधिः । **प्रपतितपर्ण इति** । प्रकृष्टं पतितं प्रपतितम् । 'प्रादयो गताद्यर्थे—' इति समासः । प्रपतितं पर्णं यस्मादिति विग्रहः । **प्रपर्ण इति** । प्रपतितेति पूर्वपदे धातुजस्य उत्तरपदस्य लोपे रूपम् । **नञोऽस्त्यर्थानां** । नञः परेषामस्त्यर्थवाचिनां सुबन्तानां बहुव्रीहिर्वाच्यः । तत्रास्त्यर्थवाचिनामुत्तरपदभूतानां लोपश्च वा वक्तव्य

समस्यत इति पर्यवसन्नोऽर्थः । एवं च द्विपदबहुव्रीहिरबाध एव । ये तु 'सुप्सुपा' इत्यनुवर्त्य 'अनेकं सुबन्तं सुपा सह' इति व्याचक्षते तेषां तु द्विपदबहुव्रीहिर्दुर्लभ एवेति । द्वितीयादिविभक्त्यर्थे क्रमेणोदाहरति—**प्राप्तमित्यादि** । ग्रामकर्मकप्राप्तिकर्तृ उदकमिति विग्रहार्थः । उदककर्तृकप्राप्तिकर्मेति समासार्थः । विग्रहवाक्ये स इति प्रयोगे तु तस्याप्ययमेवार्थः । अनडुत्कर्तृकोद्वहनकर्मीभूतो रथः । रथकर्मकोद्वहनकर्ता तु समासार्थः । रुद्रसंप्रदानकोपहरणकर्मीभूतः पशुः, पशुकर्मकोपहरणसंप्रदानं तु समासार्थः । स्थाल्यवधिकोद्धरणकर्म ओदनः । ओदनकर्मकोद्धरणावधिः स्थाली समासार्थ इत्यादि ।

(वा १३६१) अविद्यमानपुत्रः अपुत्रः । 'अव्ययानां च' उच्चैर्मुखः । 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' । सप्तम्यन्तम् उपमानं च पूर्वपदं यस्य तस्य पदान्तरेण समास उत्तरपदलोपश्च भवतीत्यर्थः । कण्ठेस्थः कालो यस्य स कण्ठेकालः ।

इत्यर्थः । **अविद्यमानपुत्र इति** । न विद्यमान इति नञ्समासः । नञो नलोपः । अविद्यमानः पुत्रो यस्येति विग्रहः । **अपुत्र इति** । अस्त्यर्थकविद्यमानशब्दस्य लोपे रूपम् । अत्रापि बहुव्रीहिरित्यनुवादः । **अव्ययानां चेति** । बहुव्रीहिर्वाच्य इति शेषः । **उच्चैर्मुख इति** । उच्चैरित्यस्याधिकरणशक्तिप्रधानतया सप्तम्यन्तत्वेन प्रथमान्तत्वाभावादप्राप्ते बहुव्रीहौ वचनम् । **सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्चेति** । सप्तम्यन्तोपमानसहिते पूर्वपदे यस्य तत् सप्तम्युपमानपूर्वपदम् , तस्य समस्तपदस्य पदान्तरेण बहुव्रीहिर्वाच्यः । समस्तपदात्मके पूर्वपदे यदुत्तरपदं तस्य लोपश्च वक्तव्य इत्यर्थः । तत्र सप्तम्यन्तसहितसमस्तपूर्वपदकं बहुव्रीहिमुदाहरति— **कण्ठेस्थः कालो यस्य स कण्ठेकाल इति** । 'सुपि स्थः' इति कः । कण्ठे

इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा । ननु वाक्ये धात्वर्थं प्रति क्तप्रत्ययार्थस्य कर्तुः कर्मणो वा विशेष्यत्वाद् वृत्तावपि तथैवोचितेति प्राप्तोदकोढरथादौ उदककर्तृकप्राप्त्यादिवर्णनं तु न युज्यत इति चेत् । उच्यते—एकार्थीभावादिभिर्वृत्तौ विशिष्टार्थविषयकं शक्त्यन्तरमेव स्वीक्रियते, न त्ववयवशक्तिः इति नानुपपत्तिः । व्यपेक्षावादिभिस्त्वगत्या भिन्नैव व्युत्पत्तिः स्वीकार्या । किं च कर्तृविशिष्टप्राप्तेः पदार्थत्वे तस्यैव नामार्थत्वादुदकस्य तदभेदो वाच्यः, स च बाधितः, न हि कर्तृविशिष्टा प्राप्तिरुदकमिति संभवति । अतएव 'बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवम्' इत्यादिना समर्थसूत्रे एकार्थीभावपक्ष एव प्रबल इत्यवोचाम । **प्रथमार्थे तु नेति** । शेषपदेन वा अन्यपदार्थ इत्यनेन वा अतिप्रसङ्गवारणाद् 'अप्रथमाविभक्त्यर्थे' इति वचनं न कर्तव्यमिति भावः । **व्यधिकरणानामित्यादि** । इह शेषपदेनैव वारितोऽतिप्रसङ्ग इति 'समानाधिकरणानां बहुव्रीहिः' इत्यपि न कर्तव्यमिति भावः । 'यत्रान्यसमासो नोक्तः स शेषः' इति वृत्तिकारादीनां मते तु 'प्रथमान्तानामेव बहुव्रीहिः' इत्यलाभात्कर्तव्यमेवेदं वचनमिति बोध्यम् । **प्रादिभ्य इति** । प्रादिभ्यः परं यद्धातुजं तदन्तस्य पदान्तरेण बहुव्रीहिर्व्याख्येय इति सूत्रसिद्धानुवादः । **वा चेति** । इदं तु वाचनिकम् । पूर्वपदान्तर्गतस्योत्तरपदस्य धातुजस्य लोपो वाच्य इत्यर्थः । एतच्च प्रादीनामेव वृत्तौ विशिष्टार्थवृत्तितामाश्रित्य सुत्यजम् । **नञोऽस्त्यर्थानामिति** । नञः परेषामस्त्यर्थवाचिनां पदान्तरेण बहुव्रीहिर्व्याख्येयः, अस्त्यर्थवाचिनां तु लोप

---

१ अव्ययानामित्यारभ्य अस्तिक्षीरादयश्चेत्येतत्पर्यन्तः पाठो बहुत्र नोपलभ्यते ।

उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः । 'सङ्घातविकारषष्ठ्याश्चोत्तरपदलोपश्च' । केशानां सङ्घातश्चूडा यस्य स केशचूडः, सुवर्णस्य विकारः अलङ्कारो यस्य स सुवर्णालङ्कारः । 'अस्तिक्षीरादयश्च' । अस्तीति विभक्तिप्रतिरूपकमव्ययम् । अस्तिक्षीरा गौः । ८३१ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । (६-३-३४) भाषितपुंस्कादनूङ् ऊङोऽभावो-

तिष्ठतीति कण्ठेस्थः । उपपदसमासः । 'अमूर्धमस्तकात्–' इति सप्तम्या अलुक् । कण्ठेस्थ इति समस्तपदम् । तस्य कालशब्देन बहुव्रीहिरित्यनुवादः । सुपो लुक् । तत्र कण्ठस्थेत्येतद्बहुव्रीहेः पूर्वपदं सप्तम्यन्तपदसहितं तस्मिन् यदुत्तरपदं स्थेत्येतत् तस्य लोपो वाचनिकः । कण्ठेकाल इति सप्तम्यन्तपदघटितसमासगर्भो बहुव्रीहिः । तदवयवभूतसप्तम्याः 'अमूर्धमस्तकात्–' इत्यलुक् । अथ उपमानसहितसमस्तपूर्वपदकं बहुव्रीहिमुदाहरति—**उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुख इति** । उष्ट्रस्य मुखमिवेति विग्रहे षष्ठीतत्पुरुषः । मुखशब्दो मुखसदृशे लाक्षणिक इति सूचयितुमिवशब्दः । उष्ट्रमुखमिव मुखं यस्येति विग्रहे बहुव्रीहिरित्यनुवादः । तत्र उष्ट्रमुखेत्येतद्बहुव्रीहेः पूर्वपदं तस्मिन् उत्तरपदस्य मुखशब्दस्य लोपो वाचनिकः । **संघातविकारषष्ठ्याश्चोत्तरपदलोपश्चेति** । षष्ठ्यन्तात्परस्य उत्तरपदस्य पदान्तरेण बहुव्रीहिर्वाच्यः । षष्ठ्यन्तादुत्तरपदस्य लोपश्च । **केशानां संघातश्चूडा यस्य स केशचूड इति** । संघातशब्दस्य लोपे रूपम् । **सुवर्णस्य विकारोऽलंकारो यस्य स सुवर्णालंकार इति** । अत्र विकारशब्दस्य उत्तरपदस्य लोपे रूपम् । **अस्तिक्षीरादयश्चेति** । अस्तिक्षीरादयो बहुव्रीहावुपसंख्येया इत्यर्थः । अस्तिक्षीरा गौरित्यत्र अस्तीत्यस्य तिङन्ततया प्रथमाविभक्त्यन्तत्वाभावादप्राप्ते बहुव्रीहाविदं वचनम् । वस्तुतस्तु वचनमिदं नारब्धव्यमित्याह—**अस्तीति विभक्तिप्रतिरूपकमव्ययमिति** । विभक्तिप्रतिरूपकत्वेन निपातितत्वादस्तीति 'स्वरादिनिपातमव्ययम्' इत्यव्ययं विद्यमानार्थकम् । ततः सोः 'अव्ययादाप्सुपः' इति लुकि प्रत्ययलक्षणेन प्रथमान्तत्वादेव सिद्धेरिदं वचनं न कर्तव्यमिति भावः । तदुक्तं भाष्ये—'अस्तिक्षीरादिवचनं न वाव्ययत्वात्' इति । **स्त्रियाः पुंवत्** । भाषितपुंस्कादनूङिति समस्तमेकपदं स्त्रिया इति षष्ठ्यन्तस्य विशेषणमित्यभिप्रेत्य व्याचष्टे—**भाषितपुंस्कादिति** । अनूङित्यस्य व्याख्यानम्—**ऊङोऽभाव इति** । अर्थाभावेऽव्ययीभावः, नञ्तत्पुरुषो वा । भाषितपुंस्कादिति दिग्योगे पञ्चमी । पर इति प्रथमान्तमध्याहार्यम् । तथा च भाषितपुंस्कात् परः अनूङ् यस्येति विग्रहे बहुव्रीहिरिति फलति । ननु समासे सति

इत्यर्थः । अस्त्यर्थानां किम् , अनुपनीतपुत्रः । नञः किम्, निर्विद्यमानपुत्रः ।

ऽस्यामिति बहुव्रीहिः। निपातनात्पञ्चम्या अलुक्, षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे, न तु पूरण्यां प्रियादौ

पञ्चम्या लुक्प्रसङ्गे इत्यत आह—**निपातनात् पञ्चम्या अलुगिति**। इदमुपलक्षणम्। निपातनाद् अप्रथमान्तस्यापि बहुव्रीहिः परशब्दलोपश्चेत्यपि बोध्यम्। यद्वा, अत एव निपातनादप्रयुज्यमानेऽपि परशब्दे तदर्थे गम्ये पञ्चमी। नन्वेवमपि स्त्रिया इति षष्ठ्यन्तस्य 'भाषितपुंस्कादनूङ्' इति यदि विशेषणं स्यात्, तर्हि भाषितपुंस्कादनूङ इति षष्ठी श्रूयेतेत्यत आह—**षष्ठ्याश्च लुगिति**। निपातनादित्यनुषज्यते। भाषितः पुमान् येन तद्भाषितपुंस्कम्, तदस्यास्तीति अर्शआद्यच्। पुंस्त्वे स्त्रीत्वे च एकप्रवृत्तिनिमित्तकमिति यावत्। 'तृतीयादिषु भाषितपुंस्कम्' इत्यत्र व्याख्यातमेतत्। तदाह—**तुल्ये प्रवृत्तिनिमित्त इति**। **स्त्रीवाचकस्य शब्दस्येति**। स्त्रीलिङ्गस्येत्यर्थः। स्त्रिया इति षष्ठ्यन्तं न स्त्रीप्रत्ययपरमिति भावः।

नन्विह 'सुपा' इत्यननुवृत्तावपि सुबित्येतदनुवर्तते। तथा चास्तिक्षीरेति प्रयोगो दुर्लभ इत्याशङ्क्य तं साधयति—**विभक्तिप्रतिरूपकमिति**। **स्त्रियाः पुंवत्**। **निपातनादिति**। एतच्च पूर्वत्रापि योज्यम्। अन्यथा व्यधिकरणानां बहुव्रीहिः स्वरसतो न सिध्येत्। **लुगिति**। अनूङिति प्रथमान्तम्। षष्ठ्यर्थे प्रथमेति हरदत्तः। एवं च सूत्रे केषांचिद् 'अनूङः समानाधिकरणे' इति षष्ठ्यन्तपाठोऽसांप्रदायिक इति भावः। **तुल्य इत्यादि**। 'भाषितः पुमान् यस्मिन्' इत्यादिव्याख्यानादयमर्थो लभ्यत इति 'तृतीयादिषु भाषितपुंस्कम्–' इत्यत्रोपपादितम्। यद्यत्र 'भाषितः पुमान्येन तद्भाषितपुंस्कम्' इत्युच्येत तर्हि कुटीभार्यः, द्रोणीभार्य इत्यादावतिप्रसङ्गः स्यात्। भवति हि कुटशब्दो घटे पुँल्लिङ्गो, गेहे तु स्त्रीलिङ्गः। द्रोणशब्दस्तु परिमाणविशेषे पुँल्लिङ्गो, गवादन्यां तु स्त्रीलिङ्ग इति। **ऊङोऽभावो यत्रेति**। यदि तु ऊङन्योऽनूङिति पर्युदासः स्यात् तर्हि टाबाद्यन्तमेव गृह्येत। ततः किमिति चेत्, दरदोऽपत्यं दारदः। 'द्व्यञ्मगध–' इत्यण्, तस्य स्त्रियाम् 'अतश्च' इति लुक्, दरद्। सा चासौ वृन्दारिका च दारदवृन्दारिकेत्यादि न सिध्येत्। न ह्यत्र दर्शनीया भार्या यस्य स दर्शनीयभार्य इत्यादाविव स्त्रीप्रत्ययः कश्चिदस्तीति भावः। ननु 'न कोपधाया ऊङश्च' इत्येव सूच्यतामिति चेत्, न। बाधकबाधनार्थेन 'पुंवत्कर्मधारय–' इत्यनेन वामोरूभार्येति कर्मधारये पुंवद्भावापत्तेः। पृथक्प्रतिषेधसामर्थ्यात्सिद्धान्ते तु न दोषः। स्त्रिया इत्यस्य स्त्रीप्रत्ययपरतां वारयति—**स्त्रीवाचकस्येति**। 'स्त्रीप्रत्ययस्य पुंवद्भावः' इत्युक्ते तु स्त्रीप्रत्ययलोप इत्येवार्थः पर्यवस्यतीति दारदवृन्दारिकेति न सिध्येत्। किं च पट्वार्य इत्यत्र

च परतः। 'गोस्त्रियोः–' (सू ६५६) इति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे 'चित्रा अस् गो अस्' इत्यलौकिकविग्रहे चित्रगुः। रूपवद्भार्यः। चित्रा

पुंवदिति रूपातिदेशः पुंस इव पुंवदिति षष्ठ्यन्ताद्वतिः। तदाह—**पुंवाचकस्येव रूपमिति**। स्त्रियामिति सप्तम्यन्तमपि न स्त्रीप्रत्ययपरं किन्तु स्त्रीलिङ्गपरम्। तच्च 'अलुगुत्तरपदे' इत्यधिकृते उत्तरपदेऽन्वेति। तदाह—**स्त्रीलिङ्गे उत्तरपद इति**। अपूरणीप्रियादिष्वित्येतद्व्याचष्टे—**न तु पूरण्यां प्रियादौ च परत इति**। पूरणीति स्त्रीलिङ्गनिर्देशात् स्त्रीलिङ्गः पूरणप्रत्ययान्तो विवक्षित इति ज्ञेयम्। तुल्ये प्रवृत्तिनिमित्ते इति किम्, कुटीभार्यः। अत्र पुंवत्त्वं न भवति, कुटीशब्दो घटे पुँल्लिङ्गः, गेहे तु स्त्रीलिङ्ग इति प्रवृत्तिनिमित्तभेदाद्। स्त्रीप्रत्ययः पुंवत्स्यादित्युक्ते तु स्त्रीप्रत्ययस्य लोपः पर्यवस्येत्। ततश्च पट्वी भार्या यस्य स पटुभार्य इत्यत्र उत्तरपदं परनिमित्तमाश्रित्य ङीषो लोपे तस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वादुकारस्य यण् स्यात्। **ह्रस्व इति**। चित्रा गावो यस्येति विग्रहे बहुव्रीहिसमासे सुब्लुकि सति अनेकमिति प्रथमान्तनिर्दिष्टतया, विग्रहे नियतविभक्तिकतया वा उपसर्जनत्वे सति चित्रगोशब्दे ओकारस्य 'गोस्त्रियोः–' इत्युकारो ह्रस्व इत्यर्थः। ननु चित्रा गाव इति लौकिकसमासाभ्युपगमे सुपो लुकः प्राक् चित्रा अस् इत्यत्र पूर्वसवर्णदीर्घे गो अस् इत्यत्र पूर्वरूप च एकादेशे कृते तस्य परादिवत्त्वेन आसो लुकि चित्रशब्दे अकारो न श्रूयेत चित्रगुरित्यत्र उकारश्च न श्रूयेत, पूर्वान्तवत्त्वे तु परिशिष्टस्य सकारमात्रस्य सुप्त्वाभावाल्लुक् न स्यादित्यत आह—**चित्रा अस् इति**। गोशब्दस्य स्त्रीलिङ्गत्वात् तद्विशेषणत्वाच्चित्रेति स्त्रीलिङ्गनिर्देशः। 'प्रत्ययोत्तरपदयोश्च' इति सूत्रभाष्यरीत्या 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति न्यायात् प्रागेव पूर्वसवर्णदीर्घात् सुब्लुगिति भावः। **चित्रगुरिति**। बहुव्रीहौ ह्रस्वत्वे चित्राशब्दस्य पुंवत्त्वमिति भावः। **रूपवद्भार्य इति**। रूपवती भार्या यस्येति विग्रहः। अत्र उपसर्जनह्रस्वः।

उत्तरपदनिमित्ताया ङीषो निवृत्तेः 'अचः परस्मिन्–' इति स्थानिवद्भावाद्यण् स्यात्। अपि च वतण्डस्यापत्यं स्त्री वतण्डी 'वतण्डाच्च' इति यञ्, 'लुक् स्त्रियाम्' इति तस्य लुक्, शार्ङ्गरवादित्वान् ङीन्, वतण्डी चासौ वृन्दारिका च वातण्ड्यवृन्दारिका। अत्र पुंवद्भावेन ङीनो निवृत्तावपि अर्थगतस्य स्त्रीत्वस्यानिवृत्तत्वाद् 'लुक् स्त्रियाम्' इति यञो लुक् प्रसज्येतेति भावः। **ह्रस्व इति**। अनेकमिति प्रथमानिर्दिष्टत्वात् 'प्रथमानिर्दिष्टम्–' इति 'एकविभक्ति च–' इति वा गोशब्दस्योपसर्जनत्वादिति भावः। **चित्रा असिति**। 'अन्तरङ्गानपि–' इति न्यायादिह पूर्वसवर्णदीर्घो न प्रवर्तते। अन्यथा एकादेशस्य परादित्वेन सुपो लुकि चित्रगुरित्यत्र अकारो न लभ्येतेति भावः।

जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनामपि बहुव्रीहिः । अत्र केचित्—चित्राजरतीगुः, जरतीचित्रागुर्वा । एवं दीर्घातन्वीजङ्घः, तन्वीदीर्घाजङ्घः । त्रिपदे बहुव्रीहौ प्रथमं न पुंवत् । उत्तरपदस्य मध्यमेन व्यवधानात् । द्वितीयमपि न पुंवत् पूर्वपदत्वाभावात् । उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः । पूर्वपदशब्दस्तु प्रथमावयवे रूढ इति वदन्ति । वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते । 'आनङ् ऋतः–' (सू ९२१) इत्यत्र यथा । तेनोपान्त्यस्य पुंवदेव । चित्राजरद्गुः

रूपवतीशब्दस्य पुंवत्त्वम् । ननु चित्रा जरती गौर्यस्येति विग्रहे कथं त्रिपदबहुव्रीहिः, 'सुप् सुपा' इत्येकत्वस्य विवक्षितत्वादित्यत आह—**अनेकोक्तेरिति** । शेषग्रहणात् प्रथमान्तमिति लब्धम् । एकस्य प्रथमान्तस्य समासो नोपपद्यते, समास इत्यन्वर्थसंज्ञाविज्ञानात् । ततश्चार्थादनेकं प्रथमान्तमिति सिद्धे पुनरनेकग्रहणाद् द्विबहूनां प्रथमान्तानां बहुव्रीहिरिति भाष्ये स्पष्टमिति भावः । **अत्रेति** । त्रिपदबहुव्रीहावित्यर्थः । **चित्राजरतीगुः, जरतीचित्रागुर्वेति** । गां प्रति चित्रात्वस्य जरतीत्वस्य च विशेषणत्वाविशेषाद् अन्यतरस्य 'सप्तमीविशेषणे बहुव्रीहौ' इति पूर्वनिपात इति भावः । **एवं दीर्घेति** । दीर्घे तन्व्यौ जङ्घे यस्येति विग्रहः । उभयत्रापि पूर्वमध्यपदयोः पुंवत्त्वमाशङ्क्याह—**त्रिपद इति** । **उत्तरपदस्येति** । समासचरमावयवपदस्य उत्तरपदत्वात् तृतीयमेव पदमत्रोत्तरपदं वाच्यम् । तत्परकत्वं च मध्यमपदस्यैव, न तु प्रथमपदस्यापि, तस्य मध्यमेन पदेन व्यवधानादित्यर्थः । ननु तर्हि मध्यमपदस्य पुंवत्त्वं दुर्वारम्, उत्तरपदपरकत्वसत्त्वादित्यत आह—**द्वितीयमपि न पुंवदिति** । **पूर्वपदत्वाभावादिति** । उत्तरपदेन पूर्वपदमाक्षेपाल्लभ्यते । समासप्रथमावयवपदमेव पूर्वपदम् । न तु मध्यमावयवपदमपीति भावः । ननु मध्यमपदापेक्षया प्रथमपदस्य पूर्वपदत्वमस्ति । मध्यमपदस्य च प्रथमपदापेक्षया उत्तरपदत्वमस्तीत्यत आह—**उत्तरपदशब्दो हीति** । **रूढ इति** । वैयाकरणसमयसिद्ध इत्यर्थः । **इति वदन्तीति** । एवप्रकारेण केचिद्वदन्तीत्यन्वयः । तत्र प्रथमपदस्य त्रिपदबहुव्रीहौ नास्ति पुंवत्त्वमिति युज्यते, उत्तरपदपरकत्वाभावात् । मध्यमपदस्य तु पूर्वपदत्वाभावेऽप्यस्त्येव पुंवत्त्वम्, 'स्त्रियाः पुंवत्' इत्यत्र तु पूर्वपदस्याश्रवणाद् अनुवृत्त्यभावाच्च, किन्तु उत्तरपदे इत्यनेन पूर्वपदस्य पुंवत्त्वमित्यर्थाद् गम्यत इति वक्तव्यम् । तदपि न सम्भवतीत्यत आह—**नेह पूर्वपदमाक्षिप्यत इति** । इह 'स्त्रियाः पुंवत्–' इत्यत्र उत्तरपदे इत्यनुवृत्तेन पूर्वपदं नाक्षिप्यते, नार्थाद्गम्यत इत्यर्थः । कुत इत्यत आह—

नेहेति । अत्रैव सूत्रे पट्वीमृद्वी भार्ये अस्येति द्वन्द्वगर्भबहुव्रीहौ पट्वीमृदुभार्य इति भाष्योदाहरणादिति भावः । **आनङिति** । तथा च 'समर्थ–' सूत्रे भाष्ये होतृपोतृ-

इत्यादि। अत एव 'चित्राजरत्यौ गावौ यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुः' इति भाष्यम्। कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे तु

आनङृत इत्यत्र यथेति। ऋदन्तानां द्वन्द्वे आनङ् स्यात् उत्तरपदे इति तदर्थः। तत्र चतुर्णां द्वन्द्वे 'होतृपोतृनेष्टोद्गातारः' इत्युपान्त्यस्य नेष्टुरानङुदाहृतः 'समर्थः पदविधिः' इत्यत्र भाष्ये। तत्रोत्तरपदेन पूर्वपदाक्षेपनियमे नेष्टुरुपान्त्यस्य पूर्वपदत्वाभावाद् आनङ् नोपपद्येत। तस्माद्वावश्यम् उत्तरपदे विहितं कार्यं पूर्वपदस्यैवेति नियम इत्यर्थः। **तेनेति।** पूर्वपदानाक्षेपेणेत्यर्थः। **उपान्त्यस्येति।** अन्त्यस्य समीपमुपान्त्यम्। चरमावयवसमीपवर्तिनो मध्यमस्येत्यर्थः। **पुंवदेवेति।** रूपमिति शेषः। तदेव दर्शयति—**चित्राजरद्गुरिति।** अत्र चित्राशब्दस्य न पुंवत्त्वम्। मध्यमेन व्यवधानाद् उत्तरपदपरकत्वाभावाच्चेति भावः। **इत्यादीति।** जरतीचित्रगुः, तन्वीदीर्घजङ्घः, दीर्घातनुजङ्घः। ननु 'आनङृतः–' इत्यत्र 'होतृपोतृनेष्टोद्गातारः' इति भाष्योदाहरणान्मास्तु पूर्वपदाक्षेपः। 'स्त्रियाः पुंवत्–' इति सूत्रे तदनाक्षेपे किं प्रमाणमित्यत आह—**अत एवेति।** 'स्त्रियाः पुंवत्–' इत्यत्रापि पूर्वपदानाक्षेपादित्यर्थः। द्वन्द्वगर्भेऽपीत्यनन्तरं बहुव्रीहाविति शेषः। **भाष्यमिति।** यद्यपि कृत्स्नभाष्यपरिशोधनायां चित्राजरद्गुरित्युदाहरणं भाष्ये क्वापि न दृश्यते, तथापि चित्राजरद्गुरितीत्यनन्तरं प्रयोगमिति शेषः। भाष्यमित्यस्य पट्वीमृदुभार्य इति प्रकृतसूत्रस्थभाष्यमित्यर्थः। सूचयतीति शेषः। 'स्त्रियाः पुंवत्–' इति प्रकृतसूत्रभाष्ये हि पट्व्यौ मृद्व्यौ भार्ये यस्येति द्वन्द्वगर्भबहुव्रीहौ पट्वीमृदुभार्य इत्युदाहृतम्। तत्र पट्वीमृदुशब्दात्मको द्वन्द्वः पूर्वपदं, न तस्य भाषितपुंस्कत्वमस्तीति न पुंवत्त्वम्, द्वन्द्वस्य परवल्लिङ्गतानियमात्। तत्र द्वन्द्वे पूर्वपदस्य पट्वीशब्दस्य तु न पुंवत्त्वम्। मध्यमपदेन व्यवधानादुत्तरपदपरकत्वाभावात्। मध्यमपदस्यानुत्तरपदत्वादसमानाधिकरणत्वाच्च न तस्मिन्परे पुंवत्त्वसंभवः। मृद्वीशब्दस्य तु केवलस्य भाषितपुंस्कत्वाद् उत्तरपदपरकत्वाच्च पुंवत्त्वमिति तदाशयः। 'स्त्रियाः पुंवत्–' इत्यत्र पूर्वपदाक्षेपे तु मृदुशब्दस्य पूर्वपदत्वाभावेन पुंवत्त्वाप्रवृत्तेः तदसंगतिः स्पष्टैव। ततश्च पट्वीमृदुभार्य इति भाष्यं चित्राजरद्गुरिति प्रयोगं गमयतीत्यर्थः। **कर्मधारयेति।** जरती चासौ चित्रा चेति कर्मधारयः। 'पुंवत्कर्मधारय–' इति जरतीशब्दस्य पुंवत्त्वाद् ङीपो निवृत्तिः। ततश्च जरच्चित्रा गौर्यस्येति कर्मधारयपूर्वपदत्वे बहुव्रीहौ पूर्वपदस्य जरच्चित्राशब्दस्य 'स्त्रियाः पुंवत्–' इति पुंवत्त्वात् टापो निवृत्तिरिति भावः। **कर्मधारयोत्तरेति।** जरती

नेष्टोद्गातार इत्यत्र चतुर्णां द्वन्द्वे तृतीयस्यानङ् उदाहृतः। पूर्वपदाक्षेपे तु स न सिध्येत्। न ह्यत्र नेष्टा पूर्वपदम्, होतुरेव पूर्वपदत्वादिति भावः। **अत एवेति।**

चित्रजरद्गवीकः। स्त्रियाः किम्—ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः। भाषितपुंस्कात् किम्—गङ्गाभार्यः। अनूङ् किम्—वामोरूभार्यः। समानाधिकरणे किम्—कल्याण्या माता कल्याणीमाता। स्त्रियां किम्—कल्याणी प्रधानं यस्य सः कल्याणीप्रधानः। पूरण्यां तु—**८३२ अप्पूरणीप्रमाण्योः।** (५-४-११६) पूरणार्थप्रत्ययान्तं

चासौ गौश्चेति कर्मधारये 'गोरतद्धितलुकि' इति टचि अवांशे 'पुंवत्कर्मधारय-' इति जरतीशब्दस्य पुंवत्त्वे ङीपो निवृत्तौ टित्वाद् ङीपि जरद्गवीशब्दः। ततश्चित्रा जरद्गवी यस्येति कर्मधारयोत्तरपदके बहुव्रीहौ 'नद्यृतश्च' इति कपि चित्राशब्दस्य 'स्त्रियाः पुंवत्-' इति पुंवत्त्वे चित्रजरद्गवीक इति रूपमित्यर्थः। **स्त्रियाः किमिति।** षष्ठ्यन्तस्य प्रश्नः। **ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिरिति।** ग्रामणी-शब्दस्य नपुंसकत्वे 'ह्रस्वो नपुंसके-' इति ह्रस्वे ग्रामणिशब्द इदन्तः। कुलशब्दो नपुंसकस्फोरणार्थः। दृष्टिशब्देन नेत्रस्थानापन्नं विवक्षितम्। ग्रामणि दृष्टिरस्येत्येव विग्रहः। 'स्त्रियाः' इत्यभावे ग्रामणीशब्दस्य पुंवत्त्वे नपुंसकह्रस्वनिवृत्तौ ग्रामणी-कुलमिति स्यादिति भावः। **गङ्गाभार्य इति।** अत्र गङ्गाशब्दस्य नित्यस्त्रीलिङ्गतया भाषितपुंस्कत्वाभावाद् न पुंवत्त्वमिति भावः। **वामोरूभार्य इति।** वामौ सुन्दरौ ऊरू यस्या इति बहुव्रीहिः। 'संहितशफलक्षणवामादेश्च' इत्यूङ्। तदन्तस्य पुंवत्त्वे ऊङो निवृत्तौ वामोरुभार्य इति पूर्वपदमुदन्तमेव स्यादिति भावः। **स्त्रियां किमिति।** सप्तम्यन्तस्य प्रश्नः। **कल्याणी प्रधानं यस्य स कल्याणीप्रधान इति।** अत्र प्रधानशब्दस्य नित्यनपुंसकत्वात् कल्याणीशब्देन सामानाधिकरण्येऽपि स्त्रीलिङ्ग-त्वाभावात्तस्मिन्परे पुंवत्त्वं नेति भावः। **पूरण्यां त्विति।** पुंवत्त्वनिषेधोदाहरणे विशेषो वक्ष्यत इति शेषः। **अप्पूरणी।** अबिति छेदः। 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यतो बहुव्रीहावित्यनुवृत्तं पूरणीप्रमाणीभ्यां विशेष्यते, तदन्तविधिः, स्त्रीलिङ्गनिर्दे-

---

पूर्वपदानाक्षेपादेवेत्यर्थः। **चित्राजरदिति।** द्वन्द्वान्तर्गतजरच्छब्दस्योत्तरपदत्वेऽप्य-सामानाधिकरण्यान्न टापो निवृत्तिः। न चैवमपि द्वन्द्वात्मकस्य पूर्वपदस्य समाना-धिकरणोत्तरपदपरत्वात्पुंवद्भावे टान्निवृत्तिर्दुर्वारेति वाच्यम्। द्वन्द्वान्तर्गतचित्रजर-च्छब्दयोः स्त्रीप्रत्ययप्रकृत्योः प्रत्येकं भाषितपुंस्कत्वेऽपि द्वन्द्वात्मकस्य पूर्वपदस्यातथा-त्वात्। **द्वयोरपीति।** पूर्वपदान्तर्गतमुत्तरपदमाश्रित्य प्रथमस्यापि पुंवद्भाव इति भावः। **जरच्चित्रेति।** 'पूर्वकालैक-' इति समासः। लिङ्गविशिष्टपरिभाषया जरद्ग्रहणेन जरतीशब्दस्यापि ग्रहणात्। **चित्रजरद्गवीक इति।** जरती चासौ गौश्च जरद्गवी, 'गोरतद्धित-' इति टचि टित्वान् ङीप्। चित्रा जरद्गवी यस्येति बहुव्रीहौ 'नद्यृतश्च' इति वक्ष्यमाणः कप्। **वामोरूभार्य इति।** 'संहितशफलक्षण-

यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात् । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः । 'पुंवद्भावप्रतिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव' (वा ५५२६-५११०)। रात्रिः

शात् पूरणप्रत्ययान्तं स्त्रीलिङ्गमिह गृह्यते । तदाह—**पूरणार्थेत्यादिना** । **अप् स्यादिति** । समासान्तस्तद्धित इत्यपि बोध्यम् । **पञ्चमीति** । पञ्चानां पूरणीत्यर्थः । 'तस्य पूरणे डट्' 'नान्तादसंख्यादेः—' इति तस्य मडागमः । टित्वाद् ङीप् । **कल्याणीपञ्चमा रात्रय इति** । इह बहुव्रीहौ कृते पञ्चमीशब्दे पूरणार्थप्रत्ययान्ते परे कल्याणीशब्दस्य पुंवत्त्वनिषेधः, अप् समासान्तस्तद्धितः, टाप्, 'यस्येति च' इतीकारलोपः । ननु पञ्चमी रात्रिरन्यपदार्थप्रविष्टा वा न वा । नाद्यः, तस्याः समस्यमानपदार्थत्वेन तदन्यत्वानुपपत्तेः । नान्त्यः, पञ्चम्या रात्रेरन्यपदार्थप्रवेशाभावे कल्याणीपञ्चमा इति समासात्पञ्चमीं रात्रिं विना चतुर्णामेव बोधनापत्तौ पञ्चमपदस्यासंगत्यापादनादिति चेत्, सत्यम्—पञ्चानां रात्रीणाम् उद्भूतावयवभेदः समुदाय एवान्यपदार्थः । तत्र पञ्चम्या रात्रेः प्रवेशेऽपि तद्घटितसमुदायस्यान्यपदार्थत्वं न विरुध्यते, समुदायस्यावयवापेक्षया अन्यत्वात् । रात्रय इति बहुवचनं तु अवयवबहुत्वापेक्षम् । यथा चैतत्तथा सर्वनामसंज्ञासूत्रे प्रपञ्चितम् । अथ प्रमाण्यन्तादब्विधेरुदाहरणमाह—**स्त्री प्रमाणी यस्य स स्त्रीप्रमाण इति** । प्रमाणशब्दोऽत्र करणल्युडन्तो विशेष्यनिघ्नः, टित्त्वाद् ङीप् । बहुव्रीहौ सति अप्प्रत्यये 'यस्येति च' इति ईकारलोपे स्त्रीप्रमाण इति रूपम् । पूर्वपदस्य तु नित्यस्त्रीलिङ्गत्वादभाषितपुंस्कत्वाच्च पुंवत्त्वप्रसक्तिः । **प्रधानपूरण्यामेवेति** । 'स्त्रियाः पुंवत्—' इति सूत्रे 'अप्पूरणी—' इति सूत्रे च प्रधानपूरणीग्रहणं कर्तव्यमिति भावः । ननु कल्याणीपञ्चमा रात्रय इत्यत्र पञ्चम्या रात्रेः समस्यमानपदार्थत्वात् कथं प्राधान्यम्, बहुव्रीहेरन्यपदार्थप्रधानत्वादित्यत आह—**रात्रिः पूरणी वाच्या चेत्युक्तोदाहरणे मुख्येति** । कल्याणीपञ्चमा रात्रय इत्युक्ते-

---

वामादेश' इत्यूङ् । **प्रधानमिति** । भावल्युडन्तं नित्यनपुंसकम् । **पञ्चमीति** । 'तस्य पूरणे' इति डट् 'नान्तादसंख्यादेः—' इति डटो मडागमः । 'टिड्ढा—' इति ङीप् । **प्रमाणीति** । करणे ल्युट्, तदन्तस्य विशेष्यनिघ्नत्वात् स्त्रियां ङीप् । कथं तर्हि 'प्रमाणायां स्मृतौ' इति शाबरभाष्यमिति चेत् । अत्र भट्टाः—'प्रमाणमयते याति मूलभूतां श्रुतिं यतः । क्विबन्तादयतेस्तस्मात्प्रमाणा स्मृतिरुच्यते' इत्याहुः । तत्रायतेः क्विपि 'ह्रस्वस्य पिति कृति—' इति तुकि टाब् दुर्लभः, तथाप्यागमशास्त्रस्यानित्यत्वात्तुक् नेति बोध्यम् । क्विबिवाचरति क्विप्—विजित्यर्थ इति वा व्याख्येयम् । अन्ये तु प्रमाणं वेदस्तद्वदाचरतीत्याचारक्विबन्तात्प्रमाणशब्दात्पचाद्यचि टाबित्याहुः ।

पूरणी वाच्या चेत्युक्तोदाहरणे मुख्या । अन्यत्र तु—८३३ नद्यृतश्च । (५-४-१५३) नद्युत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कप्स्यात् । पुंवद्भावः । ८३४ केऽणः । (७-४-१३) के परेऽणो ह्रस्वः स्यात् । इति प्राप्ते—८३५ न कपि । (७-४-१४) कपि परे अणो ह्रस्वो न स्यात् । कल्याणीपञ्चमीकः पक्षः । अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधानम् । बहुकर्तृकः । अप्रियादिषु किम्—कल्याणीप्रियः । प्रिया, मनोज्ञा, कल्याणी, सुभगा,

---

दाहरणे पञ्चानां पूरणी रात्रिः समस्यमानपञ्चमीपदार्थत्वेऽपि अन्यपदार्थसमुदायघटकतया बहुव्रीहिसमासवाच्यापि भवतीति कृत्वा मुख्या भवतीत्यर्थः । उद्भूतावयवस्य रात्रिसमुदायस्य प्रधानत्वेऽपि तद्घटकतया यथा प्रथमाद्याश्चतस्रो रात्रयः समासाभिधेयाः, एवं पञ्चम्यपि रात्रिः समासाभिधेया भवतीति समस्यमानपञ्चमीपदार्थस्य अन्यपदार्थानुप्रवेशात् प्राधान्यमिति भावः । **अन्यत्र त्विति** । कल्याणपञ्चमीकः पक्ष इत्यत्र पूरण्या रात्रेरन्यपदार्थप्रवेशाभावाद् अप्राधान्यादप्प्रत्ययाभावे सति विशेषो वक्ष्यत इत्यर्थः । **नद्यृतश्च** । नदी च ऋच्चेति समाहारद्वन्द्वात्पञ्चमी । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यतो बहुव्रीहावित्यनुवृत्तं पञ्चम्या विपरिणम्यते । तदाक्षिप्तमुत्तरपदं नद्यृद्भ्यां विशेष्यते । तदन्तविधिः । 'उरःप्रभृतिभ्यः—' इत्यतः कबित्यनुवर्तते । तदाह—**नद्युत्तरपदादिति** । नद्यन्तोत्तरपदादित्यर्थः । **कप् स्यादिति** । तद्धितः समासान्तश्चेत्यपि बोध्यम् । तथा च कल्याणी पञ्चमी यस्य पक्षस्येति विग्रहे बहुव्रीहौ सति व्यपदेशिवत्त्वेन पञ्चम्युत्तरपदस्य नद्यन्तत्वात्तदुत्तरपदकबहुव्रीहेः कबिति भावः । नद्यन्ताद् बहुव्रीहेरिति न व्याख्यातम् । बहुधीवरीति बहुव्रीहेः नद्यन्तत्वात् कबापत्तेः । नद्यन्तोत्तरपदादिति व्याख्याने तु न दोषः । धीवन्शब्दस्योत्तरपदस्य नकारान्तत्वेन नदीत्वाभावादिति शब्देन्दुशेखरे विस्तरः । **पुंवद्भाव इति** । पूरण्या रात्रेः समासवाच्यत्वाभावेन निषेधाभावादिति भावः । **केऽणः** । ह्रस्वः स्यादिति । 'शृद्प्राम्—' इत्यतस्तदनुवृत्तेरिति भावः । **न कपि** । **अणो ह्रस्व इति** । 'केऽणः' इत्यतः 'शृद्प्राम्—' इत्यतश्च तदनुवृत्तेरिति भावः । ननु कल्याणपञ्चमीकः पक्ष इत्यत्र पञ्चदशाहोरात्रात्मके पक्षे अन्यपदार्थे पञ्चम्या रात्रेः प्रवेशात् प्राधान्यं दुर्वारमित्यत आह—**अत्र तिरोहितेति** । रात्रेः तत्प्रवेशाभावाद् अप्राधान्यमिति भावः । भाष्ये एवमुदाहरणमेवात्र लिङ्गम् । ऋदन्तोत्तरपदात्कपमुदाहरति—**बहुकर्तृक इति** । बहवः कर्तारो यस्येति विग्रहः । तदेवमपूरणीप्रियादिष्वित्यत्र पूरणीविषयं प्रपञ्च्य

प्रधानपूरण्यामेवेति । प्रधाने कार्यसंप्रत्ययान्न्यायसिद्धमिदम् । **नद्यृतः** । तपरत्व स्पष्टार्थम् । **नद्युत्तरपदादिति** । नद्यन्तादिति नोक्तम्, कप्प्रत्ययेन सह समासे कृते

दुर्भगा, भक्तिः, सचिवा, स्वसा, कान्ता, क्षान्ता, समा, चपला, दुहिता, वामा, अबला, तनया । 'सामान्ये नपुंसकम्' दृढं भक्तिर्यस्य स दृढभक्तिः । स्त्रीत्वविवक्षायां तु दृढाभक्तिः । ८३६ **तसिलादिष्वाकृत्वसुचः** । (६-३-३५) तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत्स्यात् । परिगणनं कर्तव्यम्, अव्याप्त्यतिव्याप्ति-परिहाराय । 'त्रतसौ' (वा ३६१८) । 'तरसमपौ' (वा ३६१९) । 'चरट्-

---

प्रियादिषु परेषु पुंवद्भावनिषेधस्य प्रयोजनं पृच्छति—**अप्रियादिषु किमिति** । **कल्याणीप्रिय इति** । कल्याणी प्रिया यस्येति विग्रहः । प्रियादिगणं पठति—**प्रिया मनोज्ञेत्यादि** । ननु भक्तिशब्दस्य प्रियादिषु पाठे दृढा भक्तिर्यस्य स दृढभक्तिरित्यत्र कथं पुंवत्त्वमित्यत आह—**सामान्ये नपुंसकमिति** । आश्रित्येति शेषः । **दृढमिति** । पदसंस्कारपक्षे सामान्यपरत्वमाश्रित्य दृढशब्दो नपुंसकलिङ्गो व्युत्पाद्यः । ततस्तस्य भक्तिशब्देनान्वये पूर्वप्रवृत्तं नपुंसकत्वं नापैति, लिङ्गविशेषस्या-विवक्षितत्वात्, वेदाः प्रमाणमितिवत् । अत्र चार्थे पस्पशाह्निकभाष्ये 'शक्यं च अनेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्' इति प्रयोगो लिङ्गम् । नन्वेवं सति प्रियादिषु भक्तिशब्दपाठो व्यर्थ इत्यत आह—**स्त्रीत्वविवक्षायां त्विति** । वाक्यसंस्कारपक्षे विशेष्यानुसारेण स्त्रीत्वप्रतीतेर्नियमादिति भावः । **तसिलादिष्वाकृत्वसुचः** । 'स्त्रियाः पुंवत्–' इत्यनुवर्तते । आ कृत्वसुच इत्याङ् अभिविध्यर्थकः, तमभिव्याप्येत्यर्थः । तदाह—**तसिलादिषु कृत्वसुजन्तेष्विति** । 'पञ्चम्यास्तसिल्' इत्यारभ्य 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इत्येतत्पर्यन्तसूत्रविहितेष्वित्यर्थः । उत्तर-पदपरकत्वाभावात् स्त्रियाःपुंवदित्यप्राप्तौ वचनमिदम् । ननु तिल्थ्यन्शसां कृत्वसुचः परत्रैव पाठात् तसिलादिष्वनन्तर्भावात्तेषु परेषु वृकतिः अजथ्या बहुश इत्यत्र पुंवत्त्वं न स्यादित्यव्याप्तिः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति देश्यस्य 'षष्ठ्या रूप्य च' इति रूप्यस्य च तसिलादिष्वन्तर्भावात् तयोः परतः पट्वीदेश्येत्यत्र च शुभ्रा-रूप्येत्यत्र च पुंवत्त्वं स्यादित्यतिव्याप्तिरित्यत आह—**परिगणनमिति** । **अव्या-प्त्यतिव्याप्तीति** । इष्टस्थले अप्रवृत्तिरव्याप्तिः । अनिष्टस्थले प्रवृत्तिः अतिव्याप्तिः ।

बहुव्रीहेरनद्यन्तत्वात् । उत्तरपदं तु नद्यन्तं भवत्येव, 'समासे अन्तः समासान्तः' इति पक्षाश्रयणादिति बोध्यम् । **दृढमिति** । अदार्ढ्यनिवृत्तिमात्रपरत्वेनात्र दृढशब्द-प्रयोगाच्च लिङ्गविशेषविवक्षेति भावः । लिङ्गविशेषविवक्षायां तु दृढा भक्तिरित्यादिसिद्धये प्रियादिषु भक्तिशब्दपाठः । **तसिलादिषु कृत्वसुजन्तेष्विति** । 'पञ्चम्यास्तसिल्' इत्यारभ्य 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इत्येतत्पर्यन्तेष्वित्यर्थः । **अव्याप्त्यतिव्याप्तिपरिहारायेति** । वृकतिरजथ्या बहुश इत्यत्राव्याप्तिः, तसिलादि-

जातीयरौ' (वा ३३२०) । 'कल्पब्देशीयरौ' (वा ३३२१) । 'रूपप्पाशपौ' (वा ३३२२) । 'थाल्' (वा ३३२३) । 'तिलथ्यनौ' (वा ३३२४) । बह्वीषु बहुत्र । बहुतः । दर्शनीयतरा । दर्शनीयतमा । 'घरूप–' (सू ९८४) इति वक्ष्यमाणो ह्रस्वः परत्वात्पुंवद्भावं बाधते । पट्वितरा । पट्वितमा । पटुचरी । पटुजातीया । दर्शनीयकल्पा । दर्शनीयदेशीया । दर्शनीयरूपा । दर्शनीयपाशा ।

परिगणनप्रकारमाह—**त्रतसावित्यादिना** । **बह्वीषु बहुत्र इति** । बह्वीष्वित्यर्थे बह्वीशब्दात् 'सप्तम्यास्त्रल्' इति त्रलि पुंवत्त्वे ङीषो निवृत्तौ बहुत्रेति रूपमित्यर्थः । **बहुत इति** । 'पञ्चम्यास्तसिल्' इति बह्वीशब्दात् तसिल्, पुंवत्त्वाद् ङीषो निवृत्ति-रिति भावः । **दर्शनीयतरेति** । अनयोरियमतिशयेन दर्शनीयेत्यर्थे दर्शनीयाशब्दाद् 'द्विवचनविभज्योपपदे तरप्–' इति तरप् । पुंवत्त्वे टापो निवृत्तिरिति भावः । **दर्शनी-यतमेति** । आसामियमतिशयेन दर्शनीयेत्यर्थे दर्शनीयाशब्दाद् 'अतिशायने तम-बिष्ठनौ' इति तमप् । पुंवत्त्वे टापो निवृत्तिरिति भावः । ननु पट्वीशब्दात्तरपि तमपि च पट्वीतरा पट्वीतमा इत्यत्रापि पुंवत्त्वे ङीषो निवृत्तौ पटुतरा पटुतमेति स्यादित्यत आह—**घरूपेति** । तथा च ह्रस्वेन पुंवत्त्वे बाधिते सति ङीषो निवृत्त्यभावे तस्य ह्रस्वे सति पट्वितरा पट्वितमेति रूपमित्यर्थः । **पटुचरीति** । पट्वीशब्दाद् 'भूतपूर्वे चरट्' इति पुंवत्त्वे ङीषो निवृत्तिरिति भावः । पूर्वं पट्वीत्यर्थः । **पटुजा-तीयेति** । पट्वीशब्दात् 'प्रकारवचने जातीयर्' इति पुंवत्त्वे ङीषो निवृत्तिरिति भावः । पटुसदृशीत्यर्थः । **दर्शनीयकल्पेति** । 'ईषदसमाप्तौ–' इति दर्शनीयाशब्दात् कल्पप् । पुंवत्त्वे टापो निवृत्तिरिति भावः । प्रायेण दर्शनीयेत्यर्थः । **दर्शनीयदेशी-येति** । 'ईषदसमाप्तौ–' इति दर्शनीयाशब्दाद् देशीयर् । पुंवत्त्वे टापो निवृत्तिरिति भावः । प्रायेण दर्शनीयेत्यर्थः । **दर्शनीयरूपेति** । दर्शनीयाशब्दात् 'प्रशंसायां रूपप्' इति रूपपि पुंवत्त्वे टापो निवृत्तिरिति भावः । प्रशस्तत्वेन द्रष्टुं योग्येत्यर्थः । **दर्शनीयपाशेति** । दर्शनीयाशब्दाद् याप्ये पाशप् । पुंवत्त्वे टापो निवृत्तिरिति

त्रलादिसुप्पर्यन्तेषु तिलथ्यनशसां पाठाभावात् । पट्वीदेश्या शुभ्ररूप्य इत्यत्रातिव्याप्तिः, 'ईषदसमाप्तौ–' इति देश्यस्य 'षष्ठ्या रूप्य च' इति रूप्यस्य च तत्र पाठात्, अतस्तन्निवारणाय परिगणनमित्यर्थः । परिगणितान् त्रतसादीन् क्रमेणोदाहरति—**बह्वीष्विति** । यद्यपि बह्वादिषु ङीषो वैकल्पिकत्वात्तदभावे बहुत्रेत्यादि सिध्यति, तथापि पक्षे बह्वीत्रेत्याद्यनिष्टवारणायेदम् । ततस्त्रेति प्राचोक्तमुदाहरणमत्रोपेक्षितम् । 'सर्वनाम्नो वृत्तिमात्रे–' इत्यनेन गतार्थत्वादिति मनोरमायां स्थितम् । **पट्वितरेति** । प्राचा तु पटुतरेत्युदाहृतम्, तत्प्रामादिकमिति भावः । **पटुचरीति** । 'भूतपूर्वे चरट्' ।

बहुथा। प्रशस्ता वृकी वृकतिः। अजाभ्यो हिता अजथ्या। 'शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः' (वा ३३२६) बह्वीभ्यो देहि बहुशः, अल्पाभ्यो देहि अल्पशः। 'त्वतलोर्गुणवचनस्य' (वा ३३२७) शुक्लाया भावः शुक्लत्वम्, शुक्लता। गुणवचनस्य किम्-कर्त्र्या भावः कर्त्रीत्वम्। 'शरदः कृतार्थता'

भावः। कुत्सितत्वेन द्रष्टुं योग्येत्यर्थः। **बहुथेति**। बह्वीशब्दात् प्रकारवचने थाल्। पुंवत्त्वे ङीषो निवृत्तिरिति भावः। बहुप्रकारेत्यर्थः। **वृकतिरिति**। प्रशंसायामित्यनुवृत्तौ 'वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि' इति वृकीशब्दाद् जातिलक्षणङीषन्तात् तिल्। पुंवत्त्वे ङीषो निवृत्तिरिति भावः। **अजथ्येति**। 'तस्मै हितम्' इत्यधिकारे 'अजाविभ्यां थ्यन्' इत्यजाशब्दात् थ्यन्। पुंवत्त्वे टापो निवृत्तिरिति भावः। 'वृकतिरजथ्या' इत्यत्र 'जातेश्च' इति पुंवत्त्वनिषेधो न, परिगणनसामर्थ्यात्। **शसीति**। शसि परे बह्वर्थकस्य अल्पार्थकस्य पुंवत्त्वं वक्तव्यमित्यर्थः। त्रतसावित्यादिपरिगणितेष्वनन्तर्भावाद्वचनमिदम्। **बह्वीभ्य इति**। बह्वीभ्यो देहीत्यर्थे 'बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्' इति बह्वीशब्दात् शस्, पुंवत्त्वे ङीषो निवृत्तिरिति भावः। संप्रदानकारकत्वस्फोरणाय देहीति शब्दः। **अल्पश इति**। अल्पाभ्यो देहीत्यर्थः। पुंवत्त्वे टापो निवृत्तिरिति भावः। **त्वतलोरिति**। त्वप्रत्यये तल्प्रत्यये च परे गुणोपसर्जनद्रव्यवाचिनः पुंवत्त्वं वक्तव्यमित्यर्थः। **कर्त्रीत्वमिति**। कर्त्रीशब्दस्य क्रियानिमित्तत्वान्न गुणवचनत्वमिति भावः। 'आकडारात्-' इति सूत्रभाष्ये समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसंख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दरूपं गुणवचनसंज्ञकं भवतीति स्थितम्। प्रकृते च गुणवचनशब्देन एतदेव विवक्षितम्। 'वोतो गुणवचनात्' इति सूत्रभाष्यस्थं 'सत्त्वे निविशतेऽपैति-' इत्यादि गुणलक्षणं तु नात्र प्रवर्तते। अत एव 'एक तद्धिते च' इति सूत्रभाष्ये एकस्या भाव एकत्वमित्यत्र एकशब्दस्य गुणवचनत्वाभावात् 'त्वतलोर्गुणवचनस्य' इत्यप्राप्तं पुंवत्त्वमत्र विधीयत इत्युक्तं सङ्गच्छते। सखीत्वमित्यादि तु असाध्वेवेति शब्देन्दुशेखरे विस्तरः। ननु कृतः अर्थः कृत्यं यया सा कृतार्था, तस्या भावः कृतार्थतेत्यत्र कथं पुंवत्त्वम्। कृतार्थशब्दस्य

पटुजातीयेति। 'प्रकारवचने जातीयर्'। **दर्शनीयरूपेत्यादि**। 'प्रशंसायां रूपप्'। 'याप्ये पाशप्' **बहुथेति**। 'प्रकारवचने थाल्'। तत्र हि 'किंसर्वनामबहुभ्यः-' इत्यधिकृतम्। **वृकतिरिति**। 'वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि' इति तिल्। **अजथ्येति**। 'अजाविभ्यां थ्यन्'। **शसीति**। 'बह्वल्पार्थात्-' इति यः शस्, स तसिलादिषु ज्ञातव्य इत्यर्थः। त्रतसादिषु परिगणनं कर्तव्यमिति यावत्। **त्वतलोर्गुणवचनस्येति**। गुणस्येति वक्तव्ये वचनग्रहणं प्रसिद्धगुणपरिग्रहार्थम्।

इत्यादौ तु सामान्ये नपुंसकम् । 'भस्याढे तद्धिते' (वा ३१२८) । हस्तिनीनां समूहो हास्तिकम् । अढे किम्—रौहिणेयः । 'स्त्रीभ्यो ढक्' (सू ११२३) इति ढोऽत्र गृह्यते । 'अग्नेर्ढक्' (सू १२१६) इति ढकि तु पुंवदेव । अग्नायी देवता

समानाधिकरणेन उक्तगुणवचनत्वाभावादित्यत आह—**शरद इति** । दृढभक्तिरित्यत्रानुपदोक्तरीत्या कृतः अर्थः येन तत् कृतार्थमिति सामान्याभिप्रायं कृतार्थशब्दं प्रथमतो व्युत्पाद्य तस्मादविवक्षितलिङ्गात् तल्प्रत्ययो व्युत्पाद्य इति भावः । **भस्याढ इति** । ढभिन्ने तद्धिते परे स्त्रियाः पुंवत्त्वं वक्तव्यमित्यर्थः । परिगणितेष्वनन्तर्भावाद्वचनम् । **हास्तिकमिति** । 'तस्य समूहः' इत्यधिकारे 'अचित्तहस्तिधेनोः—' इति ठक् । ठस्येकः । पुंवत्त्वे सति नान्तलक्षणङीपो निवृत्तिः । 'नस्तद्धिते' इति टिलोप इति भावः । न च पुंवत्त्वाभावेऽपि 'यस्येति च' इति ईकारलोपे टिलोपे च हास्तिकमिति सिद्धमिति वाच्यम् । 'यस्य—' इति लोपस्याभीयत्वेनासिद्धतया स्थानिवत्त्वेन च तद्धितपरकत्वाभावेन टिलोपानापत्तेः । 'ठक्छसोश्च' इति पुंवत्त्वादेव सिद्धिस्त्वनाशङ्क्या । छसः साहचर्येण 'भवतष्ठक्छसौ' इति ठक एव तत्र ग्रहणात् । **रौहिणेय इति** । 'वर्णादनुदात्तात्—' इति रोहितशब्दाद् ङीप् तकारस्य नकारश्च । रोहिण्या अपत्यमित्यर्थे 'स्त्रीभ्यो ढक्', एयादेशः, 'भस्य—' इति पुंवत्त्वे ङीन्नकारयोः निवृत्तिः स्यादिति भावः । **गृह्यत इति** । व्याख्यानादिति भावः । **अग्नायीति** । अग्नेः स्त्री अग्नायी । 'वृषाकप्यग्नि—' इति ङीप् । अग्नेरिकारस्य ऐकारादेशः । अग्नायी

अतस्तथैवोदाहरति—**शुक्लत्वम् , शुक्लतेति** । नन्विह जातिसंज्ञाव्यतिरिक्तं धर्ममात्रं गुण इति यत्प्राचीनैरुक्तम्, तत्स्वीकर्तव्यम् । अन्यथा 'निरीक्ष्य मेने शरदः कृतार्थता' 'सा मुमोच रतिदुःखशीलताम्' इत्यादिषु पुंवद्भावाप्रवृत्त्या दीर्घश्रवणं स्यादित्यत आह—**सामान्ये नपुंसकमिति** । एवं च 'नेष्टं पुरो द्वारवतीत्वमासीत्' इत्यादिप्रयोगो निर्बाध इति भावः । **हास्तिकमिति** । 'अचित्तहस्तिधेनोः—' इति ठक् । न चात्र 'यस्येति—' लोपेन निर्वाहः, तस्य 'असिद्धवदत्रा—' इत्यसिद्धत्वाद् 'अचः परस्मिन्—' इति स्थानिवद्भावाच्च 'नस्तद्धिते' इति टिलोपानापत्तेः । न च 'ठक्छसोश्च' इत्यनेनैवात्र पुंवद्भावसिद्धिः शङ्क्या । छसा साहचर्यात् 'भवतष्ठक्छसौ' इत्यस्यैव ठकस्तत्र ग्रहणात् । नापि 'जातेश्च' इति पुंवद्भावनिषेधः शङ्क्यः । अस्मादेव भाष्योदाहरणात् 'सौत्रस्यैव निषेधो न त्वौपसंख्यानिकस्य' इति ज्ञापनात् । **रौहिणेय इति** । रोहितशब्दाद् 'वर्णादनुदात्तात्—' इति ङीन्नकारौ । सति तु पुंवद्भावे तयोर्निवृत्तौ रौहितेय इति स्यादिति भावः । **गृह्यत इति** । व्याख्यानादिति शेषः । **अग्नायीति** । अग्निशब्दाद् 'वृषाकप्यग्नि—' इति स्त्रियां ङीबैकारादेशौ ।

अस्य स्थालीपाकस्य आग्नेयः । सपत्नीशब्दस्त्रिधा । शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादित्वाद् ङीन्नेकः । समानः पतिर्यस्या इति विग्रहे विवाहनिबन्धनं पतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः । स्वामिपर्यायपतिशब्देन भाषितपुंस्कस्तृतीयः । आद्ययोः शिवाद्यण् । सपत्न्या अपत्यं सापत्नः । तृतीयात्तु लिङ्गविशिष्ट-

---

देवता अस्येत्यर्थे 'अग्नेर्ढक्' इति ढक् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् । ततो ढस्य एयादेशः, पुंवत्त्वे सति ङीबेत्वनिवृत्तौ अग्नि एय इति स्थिते 'यस्येति च' इति इकारलोपे आदिवृद्धौ आग्नेय इति रूपम् । पुंवत्त्वनिषेधे तु आग्नायेय इति स्यादिति भावः । वस्तुतस्तु अग्नित्वं पुंसि प्रवृत्तिनिमित्तम्, स्त्रियां तु अग्निसंबन्ध इति प्रवृत्तिनिमित्तभेदादेवात्र न पुंवत्त्वमिति बोध्यम् । **सपत्नीशब्दस्त्रिधेति** । व्युत्पादनभेदादिति शेषः । **शत्रुपर्यायादिति** । 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इति कोशादिति भावः । अयं भाषितपुंस्कः । **विवाहनिबन्धनमिति** । विवाहजनितसंस्कारविशेषनिमित्तकमित्यर्थः । 'पतित्वं सप्तमे पदे' इत्यादिस्मरणादिति भावः । आश्रित्येत्यनन्तरं प्रवृत्त इति शेषः । समानः पतिः यस्या इति बहुव्रीहिः । 'नित्यं सपत्न्यादिषु' इति निपातनात् सभावः, ङीब् नत्वं च । **नित्यस्त्रीलिङ्ग इति** । अन्यपदार्थस्य स्त्रीत्वे सत्येव विवाहनिबन्धनपतिशब्दस्य सभावादिविधानादिति भावः । 'पतिर्नाम धवः' इति कोशादिति भावः । **आद्ययोरिति** । शत्रुपर्यायं सपत्नशब्दं विवाहनिबन्धनं पतिशब्दं चाश्रित्य प्रवृत्तयोः सपत्नीशब्दयोरित्यर्थः । **सापत्न इति** । सपत्न्या अपत्यमित्यर्थे 'तस्यापत्यम्' इत्यणं बाधित्वा 'स्त्रीभ्यो ढक्' इति ढकि प्राप्ते 'शिवादिभ्योऽण्' इत्यणि आद्यस्य सपत्नीशब्दस्य भाषितपुंस्कतया पुंवत्त्वेन ङीपो निवृत्तौ सापत्न इति रूपम् । न तु नकारस्यापि निवृत्तिः, शत्रुपर्यायसपत्नशब्दस्य अव्युत्पन्नप्रातिपदिकतया तत्र नकारस्य स्त्रीत्वनिमित्तकत्वाभावात् । द्वितीयस्य तु सपत्नीशब्दस्य ङीन्नत्वाभ्याम् उत्पन्नस्य शिवाद्यणि कृते भाषितपुंस्कत्वाभावाद् न पुंवत्त्वम्, किंतु ङीपो 'यस्येति च' इति लोपे सापत्न इति रूपम् । सति तु पुंवत्त्वे ङीन्नकारयोः निवृत्तौ सापत इति स्यात् । **तृतीयात्त्विति** । स्वामिपर्यायं पतिशब्दमाश्रित्य प्रवृत्तात् सपत्नीशब्दात् पत्युत्तरपदलक्षणो ण्य एवेत्यन्वयः । सपत्न्या अपत्यमित्यर्थे 'तस्यापत्यम्' इत्यणं बाधित्वा 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः'

आग्नेय इति । पुंवद्भावाभावे तु आग्नायेय इति स्यादिति भावः । **शत्रुपर्यायादिति** । अत्र च 'व्यन् त्सपत्ने' इति निर्देशो लिङ्गम् । रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः । **विवाहनिबन्धनमिति** । तज्जन्यसंस्कारविशेषविशिष्टे रूढमित्यर्थः । **सापत्न इति** । अभाषितपुंस्कत्वाद् द्वितीयस्य पुंवद्भावो न भवति ।

परिभाषया पत्युत्तरपदलक्षणो यण एव, न त्वण्। शिवादौ रूढयोरेव ग्रहणात्। सापत्नः। 'ठक्छसोश्च' (वा ३९२१) भवत्याश्छात्रा भावत्काः, भवदीयाः। एतद्वार्तिकं 'एकतद्धिते च' (सू १०००) इति सूत्रं च न कर्तव्यम्, 'सर्वनाम्नो

इति यण एवेत्यन्वयः। ननु सपत्नीशब्दो न पत्युत्तरपद इत्यत आह—**लिङ्गविशिष्टपरिभाषयेति**। एवशब्दस्य व्यावर्त्यमाह—**न त्वणिति**। ननु यणप्रत्ययस्यापि शिवाद्यण् अपवाद इत्यत आह—**शिवादौ रूढयोरेवेति**। सपत्नशब्दः शत्रौ केवलरूढः। विवाहनिबन्धनं पतिशब्दमाश्रित्य प्रवृत्तस्तु योगरूढः, विव इकर्तरि पाति रक्षतीति योगस्यापि सत्त्वात्। स्वामिपर्यायं तु पतिशब्दमाश्रित्य प्रवृत्तः केवलयौगिकः। शिवादौ रूढयोरेव ग्रहणम्, न तु केवलयौगिकस्य, योगाद् रूढेर्बलवत्त्वादिति भावः। ततः किमित्यत आह—**सापत्न इति**। स्वामिपर्यायपतिशब्दघटितस्पत्नीशब्दस्य भाषितपुंस्कत्वात् पुंवत्त्वे सति ङीन्नत्वयोर्निवृत्तौ 'यस्येति च' इतीकारलोपः। सापत्न इति रूपमित्यर्थः। **ठक्छसोश्चेति**। वार्तिकमेतत्। एतयोः परतः पुंवत्त्वं वक्तव्यमिति शेषः। अभत्वादप्राप्तौ वचनम्। **भावत्काः, भवदीया इति**। 'तस्येदम्' इत्यधिकारे 'भवतष्ठक्छसौ' इति भवतीशब्दात् ठक्छसौ, लिङ्गविशिष्टस्यापि ग्रहणात्। तत्र ठकि इकादेशात्प्राक् ठावस्थायामेव पुंवत्त्वे इकादेशं बाधित्वा 'इसुसुक्तान्तात् कः' इति कादेशः। न च इकादेशे सति भत्वाद् 'भस्याढे तद्धिते' इति पुंवत्त्वे कृते इकस्य स्थानिवत्त्वेन ठत्त्वाद् 'इसुसुक्तान्तात्–' इति कादेशे भावत्क इति रूपसिद्धौ किं ठग्ग्रहणेनेति वाच्यम्, इकादेशे कृते हि मथितं पण्यमस्य माथितिक इत्यत्रेव अल्विधितया स्थानिवत्त्वाभावेन संनिपातपरिभाषया कादेशानापत्तेः, अतष्ठग्ग्रहणम्। भवतीशब्दाच्छसि तु 'सिति च' इति पदत्वेन भत्वस्य बाधाद् 'भस्याढे–' इत्यप्राप्ते पुंवत्त्वे अनेन पुंवत्त्वम्। **एतदिति**। 'ठक्छसोश्च' इति वार्तिकमित्यर्थः। **एकतद्धिते**

सति च पुंवद्भावे नकारादेशाभावात्सापत इति स्यात्। आद्यस्य तु पुंवद्भावेऽपि सापत्न इत्येव भवतीति भावः। **रूढयोरेवेति**। आद्यः शब्दो रूढः, द्वितीयस्तु योगरूढः, तेन 'समानः पतिर्यस्याः' इति विग्रहो न विरुध्यत इति दिक्। **ठक्छसोश्चेति**। अभत्वार्थ आरम्भः। **भावत्का इति**। 'भवतष्ठक्छसौ' ठावस्थायामेव पुंवद्भावे कृते 'ठस्येकः' इति इकादेशं बाधित्वा तान्तलक्षणः कादेशः। नन्विकादेशे भत्वाद् 'भस्याढे–' इति पुंवद्भावे सति कादेशप्रवृत्त्या रूपसिद्धौ किमत्र ठग्ग्रहणेन। मैवम्, मथितं पण्यमस्य माथितिक इत्यत्रवाल्विधित्वेन स्थानिवद्भावायोगात्सन्निपातपरिभाषया वा कादेशप्रवृत्तेर्दुर्लभत्वात्। अतः 'ठक्छसोः–' इति ठग्ग्रहणं कर्तव्यमेव। **भवदीया इति**। छसः सित्करणात् 'सिति च' इति पदसंज्ञा। तेनात्र

वृत्तिमात्रे पुंवद्भावः' इति भाष्यकारेष्ट्या गतार्थत्वात्। सर्वमयः। सर्वकाम्यति। सर्विका भार्या यस्य स सर्वकभार्यः। सर्वप्रिय इत्यादि। पूर्वस्यैवेदम्, 'भस्ये-

---

चेति। एकशब्दस्य तद्धिते उत्तरपदे च परे ह्रस्वः स्यादिति तदर्थः। एकस्या भाव एकत्वम्, एकता। एकस्याः शाटी एकशाटी। **वृत्तिमात्र इति**। कृत्तद्धितादयो वृत्तयः। मात्रशब्दः कार्त्स्न्ये। 'स्त्रियाः पुंवत्–' इत्यादिसूत्रगतनिमित्ताभावेऽपि भवति। **भाष्यकारेष्ट्येति**। भाष्यकारवचनेनेति यावत्। इदं च 'दक्षिणोत्तराभ्याम्–' इति सूत्रे भाष्ये स्पष्टम्। **गतार्थत्वादिति**। निवृत्तप्रयोजनकत्व इति भावः। एतत्प्रयोजनस्य 'सर्वनाम्नः–' इति वचनेनैव सिद्धत्वादिति यावत्। 'सर्वनाम्नो वृत्तिमात्रे–' इत्यस्य तद्धितवृत्तौ उदाहरति—**सर्वमय इति**। सर्वस्या आगत इत्यर्थः 'तत आगतः' इत्यधिकारे 'मयट् च' इति मयट्, 'सर्वनाम्नः–' इति पुंवत्त्वम्, चिन्मयमित्यादिवदत्यन्तस्वार्थिको वा मयट्। अथ सनाद्यन्तधातुवृत्तावुदाहरति—**सर्वकाम्यतीति**। सर्वामात्मन इच्छतीत्यर्थे 'काम्यच्च' इति सर्वाशब्दात् काम्यच्। सर्वनाम्नः–' इति पुंवत्त्वम्। 'सनाद्यन्ताः–' इति धातुत्वाल्लडादि। मयट्काम्यचोस्तत्रतसावित्यादिपरिगणितेष्वनन्तर्भावात्तसिलादिष्विति पुंवत्त्वमत्र न स्यादिति भाव। तद्धितवृत्तौ उदाहरणान्तरमाह—**सर्वकभार्य इति**। समासवृत्तिरेवैषा। **सर्वप्रिय इति**। सर्वा प्रिया यस्येति विग्रहः। समासवृत्तिरियम्। प्रियादिपर्युदासो रूपवतीप्रिय इत्यादौ उपयुज्यत इति भावः। वस्तुतस्तु एकशब्दे अकच्प्रत्यये 'प्रत्ययस्थात्–' इति इत्वे एकिका,

---

जश्त्वं भवति। एवं च पदसंज्ञया भसंज्ञाया बाधाद् 'भस्याढे–' इत्यस्याप्रवृत्त्या वार्तिके ढग्रहणं कृतम्। **भाष्यकारेष्ट्येति**। अनेन सूत्रवार्तिकयोरुक्तिसंभवो ध्वनितः। उत्तरं दृष्ट्वा पूर्वस्याप्रवृत्तत्वात्। निष्कर्षे तु व्यर्थमेवेत्याह—**गतार्थत्वादिति**। इष्टेरुदाहरणान्याह—**सर्वमय इत्यादिना**। 'तत आगतः' इत्यर्थे 'मयड्वा–' इति मयट्। तसिलादिषु मयडादेरपरिगणितत्वात्तेनेदं न सिध्यतीति भावः। **सर्वकभार्य इति**। न च 'के पुंवत्–' इति सूत्रेण गतार्थता, 'न कोपधायाः' इति निषेधात्। न चास्यापि तेन निषेधः शङ्क्यः। 'स्त्रियाः पुंवत्–' इत्यादिप्रकरणोक्तस्यैव तेन निषेधात्। अस्या इष्टेस्तु तस्मिन् प्रकरणे असमाविष्टत्वात्। न च वृत्त्यन्तर्गतस्य सर्वनामत्वाभावात्पुंवद्भावो न भवेदिति वाच्यम्। वचनारम्भसामर्थ्याद् मात्रग्रहणाद्वा कचित्सर्वनामत्वेन दृष्टानां संप्रति संज्ञाभावेऽपि पुंवद्भावाभ्युपगमात्। अतएवोत्तरपूर्वस्यै इत्यत्र संज्ञाभावेऽपि पुंवद्भावः। सर्वा नाम काचित्, तस्याः पुत्रः सर्वापुत्र इत्यत्र तु नातिप्रसङ्गः, संज्ञोपसर्जनयोः सर्वादिगणबहिर्भूतत्वेन वृत्तेः पूर्वमप्यसर्वनामत्वात्। **सर्वप्रिय इति**। 'स्त्रियाः पुंवत्–' इत्यत्र

षाजाशाद्वा–' (सू ४६६) इति लिङ्गात् । तेनाकच्येकशेषवृत्तौ च न । सर्विका। सर्वाः । 'कुक्कुट्यादीनामण्डादिषु' (वा ३६३४) कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । मृगक्षीरम् । काकशावः । ८३७ क्यङ्मानि-

तस्याभाव एकिकत्वम् । अत्र पुंवत्त्वे टाप इत्वस्य च निवृत्तौ एककत्वमिति स्यात्, इकारो न श्रूयेत, इत्वनिमित्तस्य टापो निवृत्तत्वात्, पाचिकाशब्दाज् जातीयरि पाचकजातीयेतिवत् । ह्रस्वे सति स्थानिवत्त्वे टापः सत्त्वात् प्राप्तजीविकवदित्वश्रवणमिति फलभेदसत्त्वाद् 'एकतद्धिते च' इति न गतार्थमित्याहुः । ननु तदितरा तदन्येत्यादावुत्तरपदस्य सर्वनामत्वात् पुंवत्त्वं स्यादित्यत आह—**पूर्वस्यैवेदमिति** । वृत्तिप्रविष्टानेकभागानां मध्ये किञ्चिदपेक्षया पूर्वस्यैवेदं सर्वनाम्नः पुंवत्त्वविधानमित्यर्थः । **भस्त्रैषाजाज्ञाद्वेति लिङ्गादिति** । 'भस्त्रैषा–' इति सूत्रेण एषा द्वा इत्येतयोः साकच्कयोरपि कात्पूर्वस्य इत्त्वविधानम् अन्यथा निर्विषयं स्यात् । तद्धितवृत्तौ तयोः सर्वनामतया पुंवत्त्वनियमादिति भावः । अकचि तद्धितवृत्तावुदाहरति—**सर्विकेति** । सर्वाशब्दात् साकच्काट्टापि 'प्रत्ययस्थात्–' इति इत्त्वे पुंवत्त्वे टाबित्त्वयोः निवृत्तिः स्यादिति भावः । एकशेषवृत्तावुदाहरति—**सर्वा इति** । टाबन्तस्य प्रथमाबहुवचनमिदम् । पुंवत्त्वे टापो निवृत्तिः स्यादिति भावः । **कुक्कुट्यादीनामण्डादिष्विति** । पुंवत्त्वं वक्तव्यमिति शेषः । असमानाधिकरणार्थमिदमिति सूचयन् षष्ठीसमासमुदाहरति—**कुक्कुट्या अण्डं कुक्कुटाण्डमिति** । पुंवत्त्वेन जातिलक्षणङीषो निवृत्तिरिति भावः । एवमग्रेऽपि । **मृगक्षीरमिति** । मृग्याः क्षीरमिति विग्रहः । **काकशाव इति** । काक्याः[1] शाव इति विग्रहः । 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः ।

प्रियादिपर्युदासो रूपवतीप्रिय इत्यादावुपयुज्यत इति भावः । तदितरा तदन्येत्यादावुत्तरपदेऽतिप्रसङ्गमाशङ्क्याह—**पूर्वस्यैवेति** । वृत्तिघटकानेकभागमध्ये किञ्चिदपेक्षया पूर्वस्येत्यर्थः । **लिङ्गादिति** । अन्यथा एषा द्वा एतयोः कात्पूर्वस्य आपि विधीयमानमित्वं निर्विषयं स्यादिति भावः । 'दक्षिणपूर्वा दिक्' इति भाष्योदाहरणमपीह लिङ्गमिति बोध्यम् । यत्तु प्राचा 'सर्वनाम्नः समासे पूर्वं[2] पुंवत्' इत्युक्तम्, यच्च व्याचख्युः 'वार्तिकार्थमनुवदति सर्वनाम्न इत्यादिना' इति, तत्प्रामादिकम् । 'वृत्तिमात्रे' इति पाठस्यैव भाष्यारूढत्वात् । सर्वमयः सर्वकाम्यतीत्युक्तोदाहरणासिद्धिप्रसङ्गाच्च । वार्तिकार्थमित्याद्यपि प्रामादिकमेव । वार्तिकग्रन्थे एतदभावात् । न च 'सर्वनाम्नो वृत्तिमात्रे–' इत्येतद्वार्तिकमेव, न तु भाष्यकारेष्टिरिति शङ्क्यम् । 'ठक्छसोः–' इति वार्तिकस्य निरालम्बनत्वापत्तेः । भाष्यकारेष्टित्वे तु वार्तिकस्योक्तिसंभव उक्त एव

१ 'काकयाः' इति क्वचित् पाठः । २ 'पूर्वम्' इति क्वचिन्नास्ति ।

नोश्च। (६-३-३६) एतयोः परतः पुंवत्। एनीवाचरति एतायते। श्येनीवाचरति श्येतायते। स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानिनी। दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः। **८३८ न कोपधायाः।** (६-३-३७) कोपधायाः स्त्रिया न पुंवत्। पाचिकाभार्यः। रसिकाभार्यः। मद्रिकायते।

क्यङ्मानिनोश्च। एतयोरिति। क्यङि मानिनि च उत्तरपदे परत इत्यर्थः। **एनीवेति।** एता चित्रवर्णा। 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे।' इत्यमरः। एतशब्दः श्वेतपर्याय इति याज्ञिकाः। 'वर्णादनुदात्ता–' इति ङीब् नकारश्च। 'उपमानादाचारे' इत्यनुवर्तमाने 'कर्तुः क्यङ् सलोपश्च' इति एनीशब्दात् क्यङि पुंवत्त्वे ङीप्नत्वयोर्निवृत्तौ, 'अकृत्सार्वधातुकयोः' इति दीर्घे एतायते इति रूपमिति भावः। **श्येनीवेति।** श्येतशब्दः श्वेतपर्यायः। 'शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः।' इत्यमरः। क्यङादि पूर्ववत्। ननु 'स्त्रियाः पुंवत्–' इत्येव मानिनीत्युत्तरपदे परतः पुंवत्त्वसिद्धेः मानिन्ग्रहणं किमर्थमित्याशङ्क्य मानिन्ग्रहणमसमानाधिकरणार्थम् अस्त्रीलिङ्गार्थं चेत्यभिप्रेत्य असमानाधिकरणे परे तावदुदाहरति—**स्वभिन्नामिति। दर्शनीयमानिनीति।** दर्शनीयामिति द्वितीयान्ते उपपदे सुप्यजातौ णिनिरित्यनुवृत्तौ 'मनः' इति णिनिप्रत्ययः, उपपदसमासः, सुब्लुक्, असमानाधिकरणेऽपि मानिन्शब्दे उत्तरपदे परे अनेन पुंवत्त्वे टापो निवृत्तौ 'ऋन्नेभ्यः–' इति ङीपि दर्शनीयमानिनीति रूपम्। या त्वात्मानमेव दर्शनीयां मन्यते तस्या दर्शनीयायाः 'स्त्रियाः पुंवत्–' इत्येव पुंवत्त्वं सिद्धमिति ध्वनयितुं स्वभिन्नामित्युक्तम्। एकस्या एव दर्शनीयाया मनधात्वर्थं प्रति कर्मत्वकर्तृत्वसंभवेऽपि वास्तवाभेदेन मानिनीशब्दसामानाधिकरण्यसत्त्वादिति भावः। अथास्त्रीलिङ्गे उत्तरपदे उदाहरति—**दर्शनीयामिति।** स्त्रियमित्यनन्तरमात्मानमिति शेषः। आत्मानं यो दर्शनीयां स्त्रियं मन्यते स दर्शनीयमानी चैत्र इत्यन्वयः। अत्र उत्तरपदवाच्यस्य मानिनो वस्तुतो दर्शनीयस्त्रीभेदेऽपि आरोपिततदभेदमादाय सामानाधिकरण्यं यद्यप्यस्ति, तथापि मानिन्शब्दस्य उत्तरपदस्य पुंल्लिङ्गत्वात् तस्मिन् परे पुंवत्त्वं न प्राप्तमित्यनेन तद्विधिरिति भावः। **न कोपधायाः।**

प्राक्। **क्यङ्मा—एतायत इत्यादि।** 'कर्तुः क्यङ् सलोपश्च' क्यङि पुंवद्भावे कृते एतश्येतयोः 'अकृत्सार्व–' इति दीर्घः। मानिन्ग्रहणमसमानाधिकरणार्थमस्त्र्यर्थं चेत्याशयेन यथाक्रममुदाहरति—**स्वभिन्नामित्यादिना। दर्शनीयमानिनीति।** 'मनः' इति णिनिः। नान्तत्वान् ङीप्। या त्वात्मानमेव दर्शनीयां मन्यते तत्र 'स्त्रियाः पुंवत्–' इत्येव सिद्धम्। एकस्या अपि ईप्सिततमत्वव्यापाराश्रयत्वविवक्षाभेदेन कर्मत्वकर्तृत्वयोः सत्त्वेऽपि वास्तवाभेदेन सामानाधिकरण्याविघातादिति भावः।

मद्रिकामानिनी। 'कोपधप्रतिषेधे तद्धितवुग्रहणम्' (वा ३९३१)। नेह – पाका भार्या यस्य स पाकभार्यः। ८३९ संज्ञापूरण्योश्च। (६-३-३८) अनयोर्न पुंवत्। दत्ताभार्यः। दत्तामानिनी। दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोऽयमिति भाषितपुंस्कत्वमस्ति। पञ्चमीभार्यः। पञ्चमीपाशा। ८४०

पाचिकाभार्य इति। पाचिका भार्या यस्येति विग्रहः। पचो ण्वुल्। अकादेशटाबित्वानि पुंवत्त्वनिषेधश्च। पुंवत्त्वे टाबित्त्वयोर्निवृत्तिः स्यात्। **रसिकेति**। रसोऽस्या अस्तीति रसिका,'अत इनिठनौ' इति ठन्। ठस्येकः,टाप्,पुंवत्त्वनिषेधः। पुंवत्त्वे तु टापो निवृत्तिः स्यात्। **मद्रिकायत इति**। मद्राख्ये देशविशेषे भवा मद्रिका 'मद्रव्रज्योः कन्' टाप्,इत्त्वम्,मद्रिकेवाचरतीत्यर्थः। 'क्यङ्मानिनोश्च' इति पुंवत्त्वं प्राप्तमिह निषिध्यते। **मद्रिकामानिनीति**। मद्रिकां मन्यत इत्यर्थे 'मनश्च' इति णिनिः, उपपदसमासः। इहापि 'क्यङ्मानिनोश्च' इति पुंवत्त्वं प्राप्तं निषिध्यते। उभयत्रापि पुंवत्त्वे टाबित्वयोः निवृत्तिः स्यात्। **तद्धितवुग्रहणमिति**। 'न तद्धितवुकोपधायाः' इति सूत्रं पठनीयमिति यावत्। तद्धितसबन्धी वुसंबन्धी च यः ककारः तदुपधायाः स्त्रिया न पुंवत्त्वमिति फलति। मद्रिकायते इति तद्धितकोपधोदाहरणम्। पचिकाभार्य इति तु वुसंबन्धिकोपधोदाहरणम्। तद्धितवुग्रहणस्य प्रयोजनमाह—**नेहेति**। **पाकेति**। 'अर्भकपृथुकपाका वयसि' इत्युणादिषु कप्रत्ययान्तो निपातितः। अयं तद्धितस्य वुप्रत्ययस्य वा न ककार इति नात्र पुंवत्त्वनिषेध इति भावः। ननु दत्ताशब्दस्य संज्ञात्वेन एकद्रव्यनिवेशितया भाषितपुंस्कत्वाभावात् 'स्त्रियाः पुंवत्–' इत्यस्य प्रसक्तेरेवाभावात् किं तन्निषेधेनेत्यत आह—**दानक्रियानिमित्त इति**। दत्तशब्दोऽयं डित्थादिशब्दवन्न, किंतु दानक्रियां पुरस्कृत्यैव स्त्रियां पुंसि च संज्ञाभूतः प्रवृत्तः, अतस्तस्य भाषितपुंस्कत्वात् पुंवत्त्वे प्राप्ते निषेधोऽयमित्यर्थः। पूरण्याः पुंवत्त्वनिषेध-

---

पाचिकाभार्य इति। पचतीति पाचिका ण्वुल्। 'युवोः–' इत्यकादेशे टापि 'प्रत्ययस्थात्–' इतीत्त्वम्। **रसिकाभार्य इति**। रसोऽस्त्यस्या इति रसिका। 'अत इनिठनौ' इति ठन्। **मद्रिकायत इति**। मद्रेषु भवा मद्रिका। 'मद्रवृज्योः कन्'। 'क्यङ्मानिनोश्च' इति पुंवत्त्वप्राप्तिः[1]। सति तु पुंवद्भावे इत्त्वं न श्रूयेतेति भावः। **तद्धितवुग्रहणमिति**। द्वन्द्वान्ते श्रूयमाणः शब्दः प्रत्येकं संबध्यते, तद्धितग्रहणं वुग्रहणं चेत्यर्थः। **पाकाभार्येति**। 'अर्भकपृथुकपाका वयसि' इति कप्रत्ययान्तोऽयमुणादिषु निपातितः। न चायं तद्धितस्य ककारो, नापि वोः। 'वयसि प्रथमे' इति ङीपं बाधित्वा अजादित्वाट्टाप्। **संज्ञापूरण्योश्च**। यत्तु दत्तायते इति क्यङन्तमपि

---

१ 'वुको वा' इति क्वचित् पाठः।

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे । (६-३-३९) वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत् । स्रौघ्नीभार्यः । माथुरीयते । माथुरीमानिनी । वृद्धिनिमित्तस्य किम्—मध्यमभार्यः । तद्धितस्य किम्—काण्डलावभार्यः । वृद्धिशब्देन किम्—तावद्भार्यः । रक्ते तु

मुदाहरति—**पञ्चमीभार्य इति** । पञ्चमी भार्या यस्येति विग्रहः । अत्र 'स्त्रियाः पुंवत्–' इति प्राप्तं निषिध्यते । **पञ्चमीपाशेति** । निन्दिता पञ्चमीत्यर्थः । 'याप्ये पाशप्' । अत्र 'तसिलादिषु–' इति प्राप्तं पुंवत्त्वं निषिध्यते । **वृद्धिनिमित्तस्य च** । वृद्धेर्निमित्तं हेतुरिति विग्रहः । रक्तं च विकारश्चेति समाहारद्वन्द्वः । ततो नञ्तत्पुरुषः । रक्तविकारभिन्नेऽर्थे विद्यमानस्येत्यर्थः । वृद्धिशब्देन विहितैव वृद्धिरिह विवक्षिता, व्याख्यानात् । तदाह—**वृद्धिशब्देनेत्यादिना** । **तदन्तेति** । प्रत्ययग्रहणपरिभाषालभ्यम् । **स्रौघ्नीति** । स्रुघ्नो देशः । तत्र भव इत्यण् । 'यस्येति च' इत्यकारलोपः । णित्वादादिवृद्धिः, 'टिड्ढाणञ्–' इति ङीप् । स्रौघ्नी भार्या यस्येति विग्रहः । 'स्त्रियाः पुंवत्–' इति प्राप्तमिह निषिध्यते । **माथुरीयते माथुरीमानिनीति** । मथुरायां भवा माथुरी, 'तत्र भवः' इत्यण्, 'यस्येति च' इत्याकारलोपः, आदिवृद्धिः, 'टिड्ढ–' इति ङीप् । माथुरीवाचरतीत्यर्थे 'कर्तुः क्यङ्–' इति क्यङ् । 'सनाद्यन्ताः–' इति धातुत्वाल्लडादि, माथुरीयते । माथुरीं मन्यते माथुरीमानिनी, 'मनः' इति णिनिः, उपधावृद्धिः । उपपदसमासः, सुब्लुक्, नान्तत्वान्ङीप् । इहोभयत्रापि 'क्यङ्मानिनोश्च' इति प्राप्तं पुंवत्त्वं निषिध्यते । **मध्यमभार्य इति** । मध्ये भवा मध्यमा, 'मध्यान्मः' इति मः । मध्यमा भार्या यस्येति विग्रहः । 'स्त्रियाः पुंवत्–' इति पुंवत्त्वम् । अत्र मप्रत्ययस्य तद्धितस्य वृद्धिनिमित्तत्वाभावान्न पुंवत्त्वनिषेधः । **काण्डलावभार्य इति** । काण्डं लुनातीति काण्डलावी, 'कर्मण्यण्' इत्यण्प्रत्ययः कृत्, 'अचो ञ्णिति' इति वृद्धिः, आवादेशः, उपपदसमासः, 'टिड्ढाणञ्–' इति ङीप् । काण्डलावी भार्या यस्येति विग्रहः, पुंवत्त्वाद् ङीपो निवृत्तिः । अत्राणः कृत्त्वात्तद्धितत्वाभावाद् न पुंवत्त्वनिषेधः । **तावद्भार्य इति** । तत् परिमाणमस्यास्तावती, 'यत्तदेतेभ्यः

वृत्त्यादिषूदाहृतम्, तत्तु विशेषाभावादिहोपेक्षितम् । **पञ्चमीपाशेति** । 'याप्ये पाशप्' 'तसिलादिषु–' इति प्राप्तिः । **वृद्धिनिमित्तस्य** । **स्रौघ्नीति** । स्रुघ्ने भवा । 'तत्र भवः' इत्यणि 'टिड्ढा–' इति ङीप् । **माथुरीयत इति** । मथुरायां भवा माथुरी । सेवाचरतीत्यर्थे 'कर्तुः क्यङ्–' इति क्यङ् । **मध्यमेति** । मध्ये भवा मध्यमा । 'मध्यान्मः' इति मः । **काण्डलावेति** । काण्डं लुनातीति काण्डलावी 'कर्मण्यण्' ।

---

1 क्वचित्तु माधुरीयते माधुरीमानिनीति पाठः ।

काषायी कन्था यस्य स काषायकन्थः । विकारे तु हैमी मुद्रिका यस्येति हैम-मुद्रिकः । वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावादिह पुंवत्–वैयाकरणभार्यः,

---

परिमाणे वतुप्' इति तच्छब्दाद्वतुप् तद्धितः, 'आ सर्वनाम्नः' इत्याकारः, उगित्त्वाद् ङीप् । तावती भार्या यस्येति विग्रहः । पुंवत्त्वाद् ङीपो निवृत्तिः, 'आ सर्वनाम्नः' इत्याकारात्मिकां वृद्धिं प्रति वतुपो निमित्तत्वेऽपि आकारस्य वृद्धिशब्देन विधानाभावात्तन्निमित्तवतुबन्तस्य न पुंवत्त्वनिषेधः । **रक्ते त्विति ।** रक्तेऽर्थे विद्यमानस्य तद्धितस्य न पुंवत्त्वनिषेध इत्यर्थः । **काषायीति ।** कषायो गैरिको[1] धातुविशेषः, तेन रक्ता काषायी, 'तेन रक्तं रागात्' इत्यणि 'यस्येति च' इति लोपः, आदिवृद्धिः, 'टिड्ढाणञ्–' इति ङीप् । **काषायकन्थ इति ।** पुंवत्त्वे ङीपो निवृत्तिः । अत्राणः तद्धितस्य रक्तार्थकत्वाद् न पुंवत्त्वनिषेधः । **विकारे त्विति ।** विकारार्थे विद्यमानस्य तद्धितस्य न पुंवत्त्वनिषेध इत्यर्थः । **हैमीति ।** हेम्नो विकारभूतेत्यर्थः । 'अनुदात्तादेश्च' इत्यञ् , टिलोपः, आदिवृद्धिः, 'टिड्ढ–' इति ङीप् , हैमीति रूपम् । हैमी मुद्रिका यस्येति विग्रहः । पुंवत्त्वे ङीपो निवृत्तिः । अत्राञस्तद्धितस्य विकारार्थकत्वान्न पुंवत्त्वनिषेधः । स्यादेतत् , व्याकरणमधीते वेत्ति वा स्त्री वैयाकरणी, 'तदधीते तद्वेद' इत्यण् तद्धितः । 'यस्येति च' इत्यकारलोपः । अणो णित्त्वात् तन्निमित्तिकाया यकाराकारस्य पर्जन्यवल्लक्षणप्रवृत्त्या प्राप्ताया वृद्धेः 'न य्वाभ्याम्–' इति निषेधः । यकारात् प्रागैकारागमश्च, 'टिड्ढाणञ्–' इति ङीप् । वैयाकरणी भार्या यस्येति बहुव्रीहौ पुंवत्त्वे ङीपो निवृत्तौ वैयाकरणभार्य इति रूपम् । तथा स्वश्वस्यापत्यं स्त्री 'अत इञ्' इति इञोऽपवादः शिवाद्यण्, 'यस्येति च' इति लोपः । प्रथमवकारात् परस्य अकारस्यादिवृद्धेर्न य्वाभ्यामिति निषेधः । प्रथमवकारात् प्रागौकारागमश्च, 'टिड्ढ–' इति ङीप् । सौवश्वी भार्या यस्येति बहुव्रीहौ पुंवत्त्वे ङीपो निवृत्तौ सौवश्वभार्य इति रूपमिति स्थितिः । अत्रोभयत्रापि आदिवृद्धेः 'न य्वाभ्याम्–' इति निषेधेऽपि अणः तद्धितस्य णित्त्वेन स्वरूपयोग्यवृद्धिनिमित्तत्वानपायात् पुंवत्त्वनिषेधो दुर्वार इत्यत आह—**वृद्धिं प्रति फलोपधानाभावादिह पुंवदिति ।** प्रतीत्यनन्तरं निमित्तस्य तद्धितस्येति शेषः । अणः वृद्धिनिमित्तस्य यत् फलं वृद्धिस्तेन उपधानं

कृदयम् । **तावदिति ।** तत्परिमाणमस्यास्तावती । 'यत्तदेतेभ्यः–' इति वतुपि 'आ सर्वनाम्नः' इत्याकारो न वृद्धिशब्देन विहित इति भावः । **काषायीति ।** कषायेण रक्तेत्यर्थे 'तेन रक्तं रागात्' इत्यणि ङीप् । **हैमीति ।** हेम्नो विकार इत्यर्थे 'अनुदात्तादेश्च–' इत्यञ् । **फलोपधानेति ।** निमित्तशब्दः फलोपहितपरः ।

---

१ 'गिरिजो' इति क्वचित् पाठः ।

सौवश्वभार्यः। ८४१ स्वाङ्गाच्चेतः। (६-३-४०) स्वाङ्गाद्य ईकारस्तदन्ता स्त्री न पुंवत्। सुकेशीभार्यः। स्वाङ्गात् किम्-पटुभार्यः। ईतः किम्-अकेशभार्यः। 'अमानिनीति वक्तव्यम्' (वा ३११२) सुकेशमानिनी। ८४२ जातेश्च।

तात्कालिकसाहित्यं तदभावादित्यर्थः। 'वृद्धेस्तद्धितस्य' इत्येतावत्युक्तेऽपि निमित्तत्वसंबन्धं वृद्धेरिति षष्ठीमाश्रित्य 'वृद्धिनिमित्ततद्धितस्य' इत्यर्थलाभे सति निमित्तग्रहणात् फलोपहितनिमित्तत्वं विवक्षितमिति विज्ञायत इति भावः। यद्यप्यैजागमसिद्धवृद्धिं प्रति अण्प्रत्ययः फलोपहितमेव निमित्तम्। तथापि वृद्धिशब्देन विहितां वृद्धिं प्रति फलोपहितं निमित्तं न भवत्येवेति न दोषः। वृद्धिशब्देन विहितैव वृद्धिरिह गृह्यत इत्यत्रापि इदमेव निमित्तग्रहणं लिङ्गम्। अन्यथा ऐजागमादत्र फलोपहितनिमित्तत्वस्यापि सत्त्वात् तन्निमित्तग्रहणं निष्फलं स्यात्। विस्तरस्तु शब्देन्दुशेखरे द्रष्टव्यः। **स्वाङ्गाच्चेतः**। ईत इति च्छेदः। तदाह—**स्वाङ्गाद्य ईकार इति**। **सुकेशीभार्य इति**। सुशोभनाः केशा यस्याः सा सुकेशी, 'स्वाङ्गाच्चोपसर्जनात्' इति ङीष्। 'स्त्रियाः पुंवत्–' इति प्राप्तस्य निषेधः। **पटुभार्य इति**। पट्वी भार्या यस्येति विग्रहः। पटुत्वस्य अस्वाङ्गत्वान्न पुंवत्त्वनिषेधः। किंतु पुंवत्त्वे 'वोतो गुणवचनात्' इति ङीषो निवृत्तिरिति भावः। **अकेशभार्य इति**। अविद्यमानाः केशा यस्याः सा अकेशा, 'नञोऽस्त्यर्थानाम्' इति बहुव्रीहिः, विद्यमानशब्दस्य लोपश्च। स्वाङ्गत्वेऽपि न ङीष्, 'सहनञ्विद्यमान–' इति निषेधात्। अतष्टाबेव। अकेशा भार्या यस्येति विग्रहः। स्वाङ्गत्वेऽपि ईकाराभावान्नपुंवत्त्वनिषेधः। किंतु पुंवत्त्वे टापो निवृत्तिरिति भावः। **अमानिनीति**। स्वाङ्गाच्चेति निषेधो मानिन्शब्दे परतो न भवतीति वक्तव्यमित्यर्थः। **सुकेशमानिनीति**। सुकेशीं मन्यत

स्वरूपयोग्यपरत्वे तु वैयाकरणभार्य इत्यत्र पुंवद्भावो न सिध्येदिति भावः। व्याकरणमधीते वेत्ति वा वैयाकरणी। 'तदधीते तद्वेद' इत्यण्। स्वश्वस्यापत्यं स्त्री सौवश्वी 'तस्यापत्यम्' इत्यण्, उभयत्र णित्त्वात्प्राप्ता आदिवृद्धिः 'न य्वाभ्याम्–' इत्यनेन प्रतिषिध्यत इति नायं वृद्धिं प्रति फलोपहितः, किं तु स्वरूपयोग्यः। यद्यप्यैजागमनिमित्तत्वाद् वृद्धिं प्रति फलोपहितोऽपि भवत्ययं तद्धितः, तथापि वृद्धिशब्देन विहितां वृद्धिं प्रति न भवतीति भावः। अत्र व्याचक्षते—सूत्रे निमित्तशब्दः फलोपहितपरः, अन्यथा निमित्तग्रहणमनर्थकं स्यात्। वृद्धेस्तद्धितस्येत्युक्तेऽपि निमित्तत्वमेव संबन्ध इति वृद्धिनिमित्तं यस्तद्धित इत्यर्थलाभात्। तेन वृद्धिशब्देन विहिता वृद्धिरित्ययमर्थो लभ्यते। अन्यथा फलोपहितपरत्वलाभो निष्फलः स्यादुक्तदोषतादवस्थ्यादिति। **सुकेशीति**। 'स्वाङ्गाच्चोपसर्जनात्–' इति ङीष्। **अकेशीति**। 'सहनञ्विद्यमान–'

(६-३-४१) जातेः परो यः स्त्रीप्रत्ययस्तदन्तं न पुंवत् । शूद्राभार्यः । ब्राह्मणीभार्यः । सौत्रस्यैवायं निषेधः । तेन हस्तिनीनां समूहो हास्तिकमित्यत्र 'भस्याढे—' (वा ३९२८) इति तु भवत्येव । **८४२ संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ।** (२-२-२५) संख्येयार्थया संख्यया अव्ययादयः समस्यन्ते स

इत्यर्थे 'मनश्च' इति णिनिः, उपधावृद्धिः, उपपदसमासः, सुब्लुक्, पुंवत्त्वे ङीषो निवृत्तिरिति भावः । **जातेश्च** । ईत इति अस्वरितत्वान्नानुवर्तत इत्यभिप्रेत्याह—**जातेः परो यः स्त्रीप्रत्यय इति । शूद्राभार्य इति ।** 'शूद्रा चामहत्पूर्वा—' इति जातिलक्षणङीषोऽपवादष्टाप् । पुंवत्त्वनिषेधान्न टापो निवृत्तिः । **ब्राह्मणीभार्य इति ।** पुंवत्त्वनिषेधाच्च शार्ङ्गरवादिङीनो निवृत्तिः । ननु हस्तिनीनां समूहो हास्तिकमित्यत्र 'अचित्तहस्ति—' इति ठकि हस्तिनीशब्दस्य 'भस्याढे—' इति कथं पुंवत्त्वम्, 'जातेश्च' इति निषेधादित्यत आह—**सौत्रस्यैवायं निषेध इति ।** सूत्रविहितस्येत्यर्थः । 'भस्याढे—' इति तु वार्तिकमिति भावः । एतच्च 'न कोपधायाः' इति सूत्रे भाष्ये स्पष्टम् । **संख्यया ।** शेषग्रहणम् 'अनेकमन्यपदार्थे' इति च निवृत्तम् । बहुव्रीहिरित्यनुवर्तते, 'सुप्सुपा' इति च । संख्येये इत्येतत्संख्ययेत्यत्रान्वेति । संख्यया परिच्छेद्यं संख्येयम्, तत्रार्थे विद्यमानया संख्ययेति लभ्यते । संख्याशब्दश्चायं न स्वरूपपरः, किंतु एकादिशतान्तशब्दपरः । तदाह—**संख्येयार्थया संख्ययेति ।** एकादिशब्देन सुबन्तेनेत्यर्थः । **अव्ययादय इति ।** अव्यय, आसन्न, अदूर, अधिक, संख्या एते सुबन्ता इत्यर्थः । अत्रापि संख्याशब्दो न स्वरूपपरः, किंतु एकादि-

---

इति निषेधान्ङीषभावः । **जातेश्च ।** यद्यत्र जातेरित्येवं विहित इति व्याख्यायेत तर्हि हास्तिकमित्युदाहरणे 'औपसंख्यानिकस्य नायं निषेधः' इति भाष्योक्तिर्न संगच्छेत, हस्तिन्शब्दे 'जातेः—' इति ङीष् न विहितः, अदन्तत्वाभावात्, किंतु 'ऋन्नेभ्यः—' इति ङीब्विहित इति पुंवद्भावनिषेधस्याप्रसक्तेरत आह—**जातेः पर इति ।** एवं च हस्तिनीभार्यः, शुनीभार्य इत्यादावपि निषेधः सिध्यतीति भावः । **यः स्त्रीप्रत्यय इति ।** टाबादिः । प्राचा तु ङीषेवोपात्तस्तदयुक्तमिति ध्वनयन्नुदाहरति—**शूद्राभार्य इति । ब्राह्मणीति ।** शार्ङ्गरवादित्वान्ङीन् । प्राचा तु ङीन्न पुंवदिति व्याख्याय ब्राह्मणीभार्य इत्युदाहृतम्, तद्भ्रमसात् । **सौत्रस्यैवेति ।** व्याख्यानादिति भावः । 'न कोपधायाः' इति निषेधस्तु 'भस्याढे—' इति प्राप्तस्यापि भवत्येव । तेन विलेपिकाया धर्म्यं वैलेपिकमिति सिद्धम् । यदि 'अण्महिष्यादिभ्यः' इत्यणि पुंवद्भावः स्यात्तर्हीकारोऽत्र न श्रूयेत । एतच्च 'न कोपधायाः' इति सूत्रे भाष्ये स्पष्टम् । प्रासङ्गिकं समाप्य प्रकृतमनुसरति—**संख्ययेति ।** सामानाधिकरण्यस्यान्यपदार्थवृत्तेश्च विरहात्

बहुव्रीहिः । दशानां समीपे ये सन्ति ते उपदशाः । नव एकादश वेत्यर्थः । 'बहुव्रीहौ संख्येये-' (सू ८२१) इति वक्ष्यमाणो डच् । ८४४ ति विंशतेर्डिति । (६-४-१४२) विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति । आसन्नविंशाः, विंशतेरासन्ना इत्यर्थः । अदूरत्रिंशाः । अधिकचत्वारिंशाः । द्वौ वा त्रयो वा

शब्दपर एव । अत्रेदमवधेयम्—विंशतेः प्रागेकादिशब्दाः संख्येयेषु वर्तन्ते विशेष्यलिङ्गाश्च । दशादयो नित्यबहुवचनान्ताः । विंशत्यादिशब्दास्तु नित्यमेकवचनान्ताः संख्यायां संख्येये च वर्तन्ते नवतिपर्यन्ता नित्यस्त्रीलिङ्गाश्च । यथा विंशतिर्ब्राह्मणाः, ब्राह्मणानां विंशतिरिति । यदा विंशत्यादिः संख्या, ततो द्वित्वबहुवचने स्तः । यथा गवां द्वे विंशती इति, चत्वारिंशदिति गम्यते । गवां तिस्रो विंशतय इति, षष्टिरिति गम्यते । 'विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः । संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ॥' इत्यमरः । अत्रान्यपदस्योदाहरति—**दशानां समीपे ये सन्ति त उपदशा इति** । उपशब्दस्य समीपार्थकस्याव्ययीभाव उक्तः । इह तु समीपवर्तिनि उपशब्दो वर्तते । दशसमीपवर्तिन इत्यर्थः । ततश्च अन्यपदार्थवृत्तित्वाभावादप्रथमान्तत्वाच्च 'अनेकमन्यपदार्थे' इत्यप्राप्ते वचनमिदम् । तस्य दशानां वृक्षादीनां समीपवर्तिनो गवादय इत्यर्थभ्रमं वारयति—**नवैकादश वेत्यर्थ इति** । सामीप्यमिह दशन्शब्दार्थगतदशत्वापेक्षम् , एकार्थीभावबलात् । तथा च दशत्वसमीपवर्तिसंख्यावत्सु उपशब्द इति फलति । ततश्च दशत्वसमीपवर्तिसंख्यावन्त इति बोधपर्यवसानं भवति । **डजिति** । उपदशन्शब्दात् डचि 'नस्तद्धिते' इति टिलोप इति भावः । आसन्नशब्दस्य विंशतिशब्देन षष्ठ्यन्तेन समासे डचि कृते 'टेः' इति इकारमात्रस्य लोपे प्राप्ते आह—**ति विंशतेर्डिति** । तीति लुप्तषष्ठीकम् । 'भस्य' इत्यधिकृतम् । 'अल्लोपोऽनः' इत्यस्माल्लोप इत्यनुवर्तते, तदाह—**विंशतेर्भस्येति** । 'अलोऽन्त्यस्य' इति न भवति, 'नानर्थकेऽलोऽन्त्यविधिः' इत्युक्तेः । **आसन्नविंशा इति** । विंशति-

---

पूर्वेणाप्राप्तौ वचनम् । **दशानामिति** । उपगता दश येषामिति न विगृहीतम् । पूर्वेणैव सिद्धेः । **उपदशा इति** । उपशब्दः समीपे समीपिनि च वर्तते । आद्ये अव्ययीभावः, द्वितीये तु बहुव्रीहिरिति विवेकः । **नव एकादश वेत्यर्थ इति** । संख्याद्वारकसबन्धस्यान्तरङ्गत्वादिति भावः । तेन दशानां वृक्षादीनां समीपे ये सन्ति गवादयस्ते उपदशा इति न प्रयुज्यन्ते । **तिविंश** । सूत्रे तीति लुप्तषष्ठीकमित्याशयेनाह—**तिशब्दस्येति** । **आसन्नविंशा इति** । इह तिलोपोत्तरम् 'अतो गुणे' इति पररूपमेव, न तु टिलोपः, टिलोपस्याभीयत्वेनासिद्धत्वात् । न चात्र पररूपमपि न स्याट्टिलोपस्य स्थानि-

द्वित्राः। द्विरावृत्ता दश द्विदशाः, विंशतिरित्यर्थः । ८४५ दिङ्नामान्यन्तराले । (२-२-२६) दिशो नामान्यन्तराले वाच्ये प्राग्वत् । दक्षिणस्याश्च

संख्यासन्नसंख्यावन्त इत्यर्थः । डचि कृते आसन्नविंशति-अ-इति स्थिते, तिलोपे सवर्णदीर्घं बाधित्वा 'अतो गुणे' इति पररूपे, आसन्नविंशशब्दः अदन्तः । 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' इति प्रत्ययलक्षणाभावेनापदत्वात् । अथादूरशब्दस्योदाहरति—**अदूरत्रिंशा इति** । त्रिंशतः अदूरा इति विग्रहः । त्रिंशत्संख्यायाः अदूरसंख्यावन्त इत्यर्थः । डचि टिलोपः । अधिकस्योदाहरति—**अधिकचत्वारिंशा इति** । चत्वारिंशतोऽधिका इति विग्रहः । चत्वारिंशत्संख्याया अधिकसंख्यावन्त इत्यर्थः । डचि टिलोपः। संख्यावाचकशब्दस्य संख्यावाचकशब्देन समासमुदाहरति—**द्वौ वा त्रयो वा द्वित्रा इति** । वार्थे बहुव्रीहिः, द्वित्र्यन्यतरा इत्यर्थः । डचि टिलोपः । ननु द्वित्रा आनीयन्तामित्युक्ते कदाचिद् द्वावानयति, तदा कथं बहुवचनमिति चेत् , अत्र भाष्ये 'अनिश्चये बहुवचनं प्रयोक्तव्यम्' इति वचनात् समाहितम् । तथा 'कार्यान्वये विकल्पः, शब्दात्तु नियमेन कोटिद्वयोपस्थितिः । तदुपस्थित्यनन्तरमन्यतरानयनमिच्छया । अतः 'शब्दान्नियमेन पञ्चानामुपस्थितिः' इत्यपि समाहितम् । न च वार्थप्राधान्याद् 'अनेकमन्यपदार्थे' इत्येवात्र सिद्धमिति वाच्यम् , 'शेषाद्विभाषा' इति कबभावार्थकत्वात् । स हि कप् 'अनेकमन्यपदार्थे' इति विहितबहुव्रीहावेव प्रवर्तत इति भाष्ये स्पष्टम् । अथ संख्यायाः संख्यया समासे उदाहरणान्तरमाह—**द्विरावृत्ता दश द्विदशा इति** । शब्दशक्तिस्वाभाव्यात्सुजर्थान्तर्भावेण पूर्वपदस्य वृत्त्याश्रयणात् समासे सुचो न श्रवणमिति भाष्ये स्पष्टम् । द्वित्वसंख्याकदशत्ववन्त इत्यर्थः । फलितमाह—**विंशतिरित्यर्थ इति** । **दिङ्नामानि** । नामानीत्यनन्तरं सुबन्तानि परस्परमिति शेषः । **प्राग्वदिति** । समस्यन्ते स च बहुव्रीहिरित्यर्थः । नामानीति बहुत्वमविवक्षितमित्यभिप्रेत्योदाहरति—

वत्त्वादिति शङ्क्यम् । अज्झलादेशोऽजादेशो न भवतीति 'अचः परस्मिन्–' इत्यस्याप्रवृत्तेः । 'स्थानिवदादेशः–' इति तु न प्रवर्तत एव, शास्त्रीये कार्ये हि कर्तव्ये तत्प्रवृत्तिः, न तु विघातार्थमिति सिद्धान्तात् । **विंशतेरिति** । इहापि आसन्ना विंशतिर्येषामिति न विगृहीतमुक्तयुक्तेः । **अदूरेत्यादि** । अदूरास्त्रिंशतः, अधिकाश्चत्वारिंशत इति विग्रहौ बोध्यौ । **द्वित्रा इति** । वार्थेऽयं बहुव्रीहिः । स च वार्थो न विकल्पः, पक्षे द्विवचनस्याप्यापत्तेः, किं तु संशयः । स चानियतसंख्यावमर्शी, तत्र च त्रयोऽपि सर्वदा भासन्त इति तदपेक्षं बहुवचनमेव । आनयनादिक्रियान्वयस्तु द्वयोस्त्रयाणां वेत्यनियत एवेत्याहुः । **द्विरावृत्ता इति** । सुजर्थे बहुव्रीहिरित्यर्थः ।

पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा । नामग्रहणाद्यौगिकानां न । ऐन्द्र्याश्च कौबेर्याश्चान्तरालं दिक् । ८४६ तत्र तेनेदमिति सरूपे । (२-२-२७) सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे द्योत्ये स बहुव्रीहिः । इतिशब्दादयं विषयविशेषो

दक्षिणस्याश्चेति । दक्षिणपूर्वेति । स्त्रीत्वं लोकात् । यद्वा अन्तरालमिह दिगेव गृह्यते । 'सर्वनाम्नो वृत्तिमात्रे पुंवत्त्वम्' इति भाष्यम् । यद्यप्युपसर्जनत्वान्न सर्वनामत्वम् । तथापि भूतपूर्वगत्या सर्वनामत्वमादाय पुंवत्त्वं भवति, अत एव भाष्यात् । ननु दिशोरन्तराले इत्येव सिद्धे नामग्रहणं किमर्थमित्यत आह— **नामग्रहणादिति ।** दिक्षु रूढाः शब्दा दिङ्नामानीत्यनेन विवक्षिताः । ऐन्द्रीशब्दः कौबेरीशब्दश्चेन्द्रसंबन्धात् कुबेरसंबन्धाच्च प्रवृत्तौ यौगिक एव न रूढ इति भावः । **तत्र तेन ।** समास इति, बहुव्रीहिरिति चाधिकृतम् । तत्र इत्यनेन सप्तम्यन्ते पदे विवक्षिते । ग्रहणविषये इति प्रथमाद्विवचनान्तं तद्विशेषणमध्याहार्यम् । तेन इत्यनेन तु तृतीयान्ते पदे विवक्षिते । प्रहरणविषये इति प्रथमाद्विवचनान्तं तद्विशेषणमध्याहार्यम् । सरूपे इति प्रथमाद्विवचनान्तं पदविशेषणम् । ग्रहणविषये इति प्रहरणविषये इति तु सप्तम्यन्तयोस्तृतीयान्तयोश्च यथासंख्यमन्वेति । इदम् इत्यर्थनिर्देशः । युद्धं प्रवृत्तमिति तद्विशेष्यमध्याहार्यम् । कर्मव्यतिहारे द्योत्ये इत्यप्यध्याहार्यम् । तदाह— **सप्तम्यन्त इति ।** प्रथमाद्विवचनमिदम् । **ग्रहणविषय इति ।** गृह्यते अस्मिन्निति ग्रहणम्, केशादि, अधिकरणे ल्युट्, तद् विषयः वाच्यं ययोस्ते, ग्रहणविषये, ग्रहणवाचके इति यावत् । **प्रहरणविषय इति ।** प्रह्रियते अनेनेति प्रहरणं दण्डादि तद् विषयः वाच्यं ययोस्ते प्रहरणविषये प्रहरणवाचके इति यावत् । अत्रापि सरूपे पदे इत्यन्वेति । **इदं युद्धं प्रवृत्तमित्यर्थे इति ।** इदमिति सामान्यार्थनिर्देशः । युद्धमिति विशेषनिर्देशः । अतः केशाकेशि युद्धमिति न पुनरुक्तिः । परस्परग्रहणं परस्परप्रहरणं च कर्मव्यतिहारः । ननु ग्रहणविषये प्रहरण-

---

वृत्तौ तु सुजर्थान्तर्भावेणैवैकार्थीभावाश्रयणात्सुचोऽप्रयोगः । संख्ययेति किम्, चत्वारो ब्राह्मणाः । अव्ययेत्यादि किम्, ब्राह्मणाः पञ्च । संख्येयेति किम्, अधिका विंशतिर्गवाम् । संख्यार्थेयं संख्येति न समासः । आदशतः संख्याः संख्येये वर्तन्ते न तु संख्यायाम् । विंशत्याद्याः संख्यास्तु संख्येयसंख्ययोर्वर्तन्ते । यदा तु संख्येये विंशतिशब्दस्तदा भवत्येव समासः अधिकविंशा इति । **तत्र तेनेदम् । ग्रहणविषय इति ।** गृह्यते इति ग्रहणं केशादि, तद्विषयो वाच्यो ययोस्ते सरूपे । प्रह्रियते अनेनेति प्रहरणं दण्डादि, तद्विषयो वाच्यो ययोरिति प्राग्वत् । कर्मव्यतिहारः परस्पर-

लभ्यते। 'अन्येषामपि दृश्यते' (सू ३५३९) दीर्घ इत्यनुवर्तते। इचि कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घः। इच्समासान्तो वक्ष्यते। तिष्ठद्गुप्रभृतिष्विच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वं च। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि। ८४७

विषये इत्यध्याहारे किं प्रमाणमित्यत आह—**इतिशब्दादिति**। इतिशब्दो लौकिकप्रसिद्धप्रकारवचनः। केशाकेशीत्यादिलौकिकप्रयोगे यावानर्थः प्रसिद्धस्तावत्यर्थेऽयं बहुव्रीहिर्भवतीत्यर्थः। **अन्येषामपि दृश्यते। अनुवर्तत इति**। 'ढ्रलोपे-' इत्यत इति शेषः। 'नहिवृतिवृषि-' इत्यादिपूर्वसूत्रोक्तादन्येषामपि दीर्घो दृश्यत इत्यर्थः। अतिप्रसङ्गमाशङ्क्याह—**कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घ इति**। बहुव्रीहौ चेत् कर्मव्यतिहारे एव पूर्वपदान्तस्यैव दीर्घ इत्यर्थ। तेन तुराषाडित्यादौ दीर्घो निर्बाधः। दृशिग्रहणादयमर्थो लभ्यते। **वक्ष्यत इति**। 'इच्कर्मव्यतिहारे' इति सूत्रेणेति शेषः। **तिष्ठद्गुप्रभृतिष्विति**। वृत्तिग्रन्थ एवात्र प्रमाणम्। **अव्ययीभावत्वमिति**। तत्र अव्ययीभाव इत्यनुवृत्तेरिति भाव। **अव्ययत्वमिति**। 'अव्ययीभावश्च' इत्यनेनेति शेषः। 'अव्ययादाप्सुपः' इति सुब्लुक् तत्फलमिति भावः। **गृहीत्वेति**। परस्परमिति शेषः। न च केशग्रहणस्य पुरुषकर्तृकत्वात् प्रवृत्तेश्च युद्धकर्तृकत्वात् समानकर्तृकत्वाभावात् कथमिह क्त्वाप्रत्यय इति वाच्यम्, गृहीत्वेत्यनन्तरं स्थितयोरित्यध्याहारात्। ततश्च अस्य केशेषु सः, तस्य केशेष्वयमित्येवं परस्परं गृहीत्वा स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहवाक्यं फलितम्। **केशाकेशीति**। केशेषु केशेष्वित्यनयोर्ग्रहणाद्यन्तर्भावेन वृत्तिघटकयोः समासे सति सुब्लुक् पूर्वपदस्य दीर्घः, इच्समासान्तः। 'यस्येति च' इत्यकारलोपः। अव्ययत्वात्सुब्लुगिति भावः। अन्यपदार्थवृत्तित्वेऽपि एकशेषापवादोऽयं बहुव्रीहिसमासः अप्रथमान्तार्थश्च। **दण्डैश्चेति**। अस्य दण्डैः सः, तस्य दण्डैरयमित्येवं परस्परं प्रहृत्य स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहार्थः। **दण्डादण्डीति**। दण्डैर्दण्डैरित्यनयोः प्रहरणाद्यन्तर्भावेन समासघटकयोः समासे सति सुब्लुक्, पूर्वपदस्य दीर्घः, इच्, 'यस्येति च' इति अकारलोपः। अव्ययत्वात् सुब्लुक्। **मुष्टीमुष्टीति**।

ग्रहणं परस्परप्रहरणं च। ननु 'ग्रहणविषये सप्तम्यन्ते समस्येते प्रहरणविषये तृतीयान्ते च' इत्यादिविषयविशेषः सूत्राक्षरैः कथं लभ्यते इत्यत आह—**इतिशब्दादिति**। स हि लौकिकीं विवक्षां दर्शयति। लोके केशाकेशीत्यादिप्रयोगे यावानर्थः प्रतीयते तावत्यर्थे बहुव्रीहिर्भवतीत्यर्थः। **अन्येषामपि दृश्यते**। अत्र प्राचा दृशिग्रहणात्कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घत्वम्, 'आत्वं वानचि' इत्युक्तम्। तत्र 'आत्वं वा'

ओर्गुणः । (६-४-१४६) उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते । अवादेशः । बाहूबाहवि । 'ओरोत्' इति वक्तव्ये गुणोक्तिः 'संज्ञापूर्वको विधिरनित्यः' (प १४) इति ज्ञापयितुम् । तेन स्वायम्भुव इत्यादि सिद्धम् । सरूपे इति किम्-दलेन

अस्य मुष्टिभिः सः, तस्य मुष्टिभिश्चायमित्येवं परस्परं प्रहृत्य स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहः । मुष्ट्या मुष्ट्या इत्यनयोः समासे सति सुब्लुगादि पूर्ववत् । मुष्टामुष्टीति पूर्वपदान्तस्य आत्वमपाणिनीयमेव । **ओर्गुणः** । ओः इत्युकारात् षष्ठ्येकवचनम् । तेन भस्येत्यधिकृतं विशेष्यते । तदन्तविधिः । 'नस्तद्धिते' इत्यनुवर्तते । तदाह—**उवर्णान्तस्येति** । **बाहूबाहवीति** । बाहौ बाहौ च परस्परं गृहीत्वा स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहः । समासः, सुब्लुक्, पूर्वपदस्य दीर्घः, इच् । 'यस्येति च' इति बाधित्वा ओर्गुणः, अवादेशः । अव्ययत्वात् सुपो लुक् । ननु गुण उकारस्थाने भवन् स्थानसाम्यादोकार एव भवति । ततश्च लाघवाद् 'ओरोत्' इत्येव सिद्धे गुण इति गुरुनिर्देशो व्यर्थ इत्यत आह—**ओरोत् इति** । न चैवमपीह तद्धितसंज्ञापूर्वकत्वं दुर्वारमिति वाच्यम्, विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वकविधिरित्यभ्युपगमात् । न च 'ओत्' इति 'तपरस्तत्कालस्य' संज्ञेति वाच्यम्, विधीयमानत्वादेव तत्कालत्वसिद्धया तकारस्य उच्चारणार्थत्वात् । **स्वायम्भुव इति** । स्वयम्भुवोऽपत्यमित्यर्थे अण्, स्वायंभुवः, संज्ञापूर्वकत्वेनानित्यत्वादोर्गुणाभावे उवङ्,

---

इत्यपाणिनीयम् । अतएव मुष्टामुष्टीत्युदाहरणमप्यप्रामाणिकमेव । एतच्च मनोरमायां स्पष्टम् । **ओर्गुणः** । तद्धिते किम्, पट्वी । बाभ्वोः । **गुणोक्तिरिति** । यद्यपि 'ओरोत्' इति सूत्रितेऽपि 'भस्य तद्धिते' इत्येवंरूपसंज्ञापूर्वकत्वमस्त्येव, तथापि विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वको विधिरिति भावः । यद्यपि ओदिति तपरस्तत्कालस्य संज्ञैव तथापि इह तकार उच्चारणार्थस्तपरत्वे फलाभावाद् 'ओरो' इत्येव वास्तु । 'स्वं रूपं शब्दस्य-' इति तु प्रत्याख्यातमिति भावः । स्यादेतत्—तपरस्तत्कालस्य संज्ञा भवतीति 'गुरोरनृतः-' इति प्लुतनिषेधस्यापि संज्ञापूर्वकत्वेनानित्यत्वात् क्लृ३प्तशिखेत्यत्र प्लुतसिद्धये 'ऋलृक्' सूत्रे ऋकारात्पृथक् लृकारोपदेशो व्यर्थः । सावर्ण्ये सत्यप्युक्तरीत्या लृकारस्य प्लुतसिद्धेरनित्यत्वज्ञापनस्य निष्फलत्वात् । न चैवमपि ऋदिताम् लृदित्कार्यम् लृदितामृदित्कार्यं च वारयितुमनित्यत्वज्ञापनमावश्यकमिति वाच्यम् । राजृभ्राजृगम्लृशक्लृ इति पृथगनुबन्धकरणसामर्थ्याद् 'नाग्लोपिशास्वृदिताम्', 'लृदितः परस्मैपदेषु' इति पृथगनुवादसामर्थ्याच्च तत्कार्याणामसांकर्यसिद्धेरिति चेत्—अत्राहुः—'गुरोरनृतः-' इत्यनेन ऋद्भिन्नस्य गुरोः प्लुतविधानाद् 'अनृतः' इत्येतदनूद्यमानगुरुविशेषणत्वेनानुवादरूपमेव, न तु विधेयसमर्पकसंज्ञारूपं

मुसलेन। ८४८ **तेन सहेति तुल्ययोगे।** (२-२-२८) तुल्ययोगे वर्तमानं सह इत्येतत्तृतीयान्तेन प्राग्वत्। ८४९ **वोपसर्जनस्य।** (६-३-८२) बहुव्रीहेरवयवस्य सहस्य सः स्याद्वा। पुत्रेण सह सपुत्रः, सहपुत्रो वा आगतः। तुल्ययोगवचनं प्रायिकम्। सकर्मकः। सलोमकः। ८५० **प्रकृत्याशिषि।**

आदिवृद्धिरिति भावः। स्वायम्भुवमिति पाठे तस्येदमित्यण्। **हलेन मुसलेनेति।** अत्र असरूपत्वाद् हलामुसलीति न भवतीति भावः। **तेन सहेति तुल्ययोगे। तुल्ययोग इति।** युगपत्कालिकक्रियायोग इत्यर्थः। **तृतीयान्तेनेति।** तेनेत्यनेन तल्लाभादिति भावः। **प्राग्वदिति।** समस्यते स बहुव्रीहिरित्यर्थः। असामानाधिकरण्यार्थं कबभावार्थं चेदम्। **वोपसर्जनस्य।** उत्तरपदे इत्यधिकृतम्। 'सहस्य सः संज्ञायाम्' इत्यतः सहस्य स इत्यनुवर्तते। उपसर्जनम् अस्यास्तीत्युपसर्जनः, मत्वर्थे अर्शआद्यच्। उत्तरपदाक्षिप्तसमासो विशेष्यम्। उपसर्जनवतः समासस्येत्यर्थः। यद्यपि सर्वेषामपि समासानां कश्चिदवयवः उपसर्जनमेव। तथापि सामर्थ्यादुपसर्जनसर्वावयवकस्येति लभ्यते। तथा च उपसर्जनस्येत्यनेन बहुव्रीहेरिति लब्धम्। अवयवषष्ठ्येषा तदाह—**बहुव्रीहेरवयवस्येत्यादिना।** बहुव्रीहेरिति किम्, सहयुद्ध्वा। 'राजनि युधिकृञः' 'सहे च' इति क्वनिप्। उपपदसमासः। अबहुव्रीह्यवयवस्य सहस्य सत्वं न। **सपुत्र इति।** सभावे रूपम्। पुत्रेण युगपदागत इत्यर्थः। **प्रायिकमिति।** इतिशब्दादिदं लभ्यते। 'विभाषा सपूर्वस्य' इत्यादिनिर्देशाच्चेति

पदमिति अस्थानिकप्लुतनिषेधस्यानित्यत्वासिद्ध्या क्लृ३प्तशिखेत्यत्र प्लुतो न सिध्यति, ततश्च तत्सिध्यर्थमुक्तज्ञापनायोभयोपदेश आवश्यक इति। अन्ये तु ऋकारात्पृथग् लृकार उपदेष्टव्य एव ऋकारोपदेशेन लृकारस्यालाभात्। न च 'ऋलृवर्णयोर्मिथः सावर्ण्यम्–' इति वचनात् तल्लाभः शङ्क्यः। वार्तिकं दृष्ट्वा सूत्रकृतोऽप्रवृत्तेरित्याहुः। **तेन सहेति।** तुल्ययोगे किम्, 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी'। इह सहशब्दो न तुल्ययोगवचनः। भारकर्मकवहनक्रियायां तु पुत्राणामनन्वयात्। किं तु विद्यमानवचनः। दशसु पुत्रेषु विद्यमानेष्वित्यर्थः। एतच्च सहशब्दस्य विद्यमानार्थत्वमप्यस्तीति वक्तुमुक्तम्। प्रत्युदाहरणशरीरं तु सह पुत्रैरित्येवेति बोध्यम्। तृतीया तु 'सह युक्ते–' इत्यनेनैव। **वोपसर्जनस्य।** उपसर्जनस्येति न सहस्य विशेषणम्, अव्यभिचारात्। किं तूत्तरपदेन संनिधापितस्य समासस्य। तच्चावयवद्वारकम्, उपसर्जनसर्वावयवकस्य समासस्येत्यर्थः। तदेतत्फलितमाह—**बहुव्रीहेरिति।** तेनेह न- सहयुध्वा, सहकृत्वा। 'राजनि युधि कृञः' 'सहे च' इति क्वनिपि उपपदसमासाविमौ। 'सहस्य सः संज्ञायाम्' इत्यतोऽनुवर्तनादाह—**सहस्य सः स्यादिति। प्रायिकमिति।**

(६-३-८३) सहशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपुत्राय, सहामात्याय। 'अगोवत्सहलेष्विति वाच्यम्' (वा ३९९०)। सगवे। सवत्साय। सहलाय।

८५१ बहुव्रीहौ संख्येये डजबहुगणात्। (५-४-७३) संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात्। उपदशाः। अबहुगणात् किम्-उपबहवः, उपगणाः। अत्र स्वरे विशेषः 'संख्यायास्तत्पुरुषस्य वाच्यः'। (वा ३३४८) निर्गतानि

भावः। **सकर्मक इति**। विद्यमानकर्मक इत्यर्थः। अत्र तुल्ययोगाभावेऽपि सहस्य सः। **प्रकृत्याशिषि**। 'सहस्य सः संज्ञायाम्' इत्यतः सहस्येत्यनुवृत्तं प्रथमया विपरिणम्यते। तदाह—**सहशब्द इति**। **प्रकृत्येति**। स्वभावेन स्थितः स्यादित्यर्थः। सभावो नेति यावत्। **स्वस्तीति**। भूयादिति शेषः। **सहपुत्रायेति**। तेन सहेति समासे कृते, आशीर्योगान्न सभावः। **सहामात्यायेति**। **अगोवत्सेति**। गोवत्सहलेषु परतः सहस्य प्रकृतिभावो नेत्यर्थः। **सगव इति**। राज्ञे स्वस्तीति शेषः। अथ बहुव्रीहावसाधारणसमासान्तानाह—**बहुव्रीहौ**। **संख्येये यो बहुव्रीहिरिति**। 'संख्ययाव्यय–' इति विहित इति शेषः। **तस्मादिति**। बहुव्रीहाविति पञ्चम्यर्थे सप्तमीति भावः। **डच्स्याद् इति**। समासान्तस्तद्धितश्चेति ज्ञेयम्। **उपदशा इति**। दशानां समीपे ये सन्तीति विग्रहः। 'संख्ययाव्यय–' इति बहुव्रीहिः। सुब्लुक्। उपदशन्शब्दाड्डचि 'नस्तद्धिते' इति टिलोपः। **उपबहवः**। **उपगणा इति**। बहूनां समीपे ये सन्तीति, गणस्य समीपे ये सन्तीति च विग्रहः। 'बहुगणवतुडति संख्या' इति संख्यात्वात् 'संख्ययाव्यय–' इति समासः। अबहुगणाद् इति निषेधान्न डच्। ननु उपगणा इत्यत्र डचि सति असति च रूपसाम्यात् किं तन्निषेधेनेत्यत आह—**अत्र स्वरे विशेष इति**। डचि सति चित इति अन्तोदात्तत्वं स्यादित्यर्थः। **संख्याया इति**। संख्यान्ततत्पुरुषस्य समासान्तो डच्

'विभाषा सपूर्वस्य' इत्यादिनिर्देशादिति भावः। **सकर्मक इति**। विद्यमानकर्मक इत्यर्थः। **प्रकृत्याशिषि**। कथं तर्हि 'यजमानस्य सपुत्रस्य सभ्रातृकस्य सपरिवारस्यायुरारोग्यैश्वर्याभिवृद्धिरस्तु' इत्यादिप्रयोगाः संगच्छन्त इति चेत्—उच्यते—'ऐश्वर्याभिवृद्धिरस्त्विति भवन्तोऽनुब्रुवन्तु' इत्येतत्प्रार्थनावाक्यम्, न त्वाशीर्वचनम्। यत्त्वाशीर्वचनम् 'तथास्तु' इति तत्र हि सपुत्रकेत्यादि न प्रयुज्यत एवेति न काप्यनुपपत्तिः। **बहुव्रीहौ संख्येये**। व्यत्ययेन पञ्चम्यर्थे सप्तमीत्याह—**यो बहुव्रीहिस्तस्मादिति**। उपगणा इत्यत्र डचि सत्यसति च रूपे विशेषो नास्तीत्याह—**स्वरे विशेष इति**। डचि सति 'चितः' इत्यन्तोदात्तत्वं स्यात्, असति तु पूर्वपदप्रकृतिस्वर इत्यर्थः। न च सत्यपि डचि परत्वात्पूर्वपदप्रकृतिस्वर एव स्यादिति शङ्क्यम्, 'चितः' इति

त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः ।

८५२ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । (५-४-११३) व्यत्ययेन षष्ठी । स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच्स्यात् । दीर्घे सक्थिनी यस्य स दीर्घसक्थः । जलजाक्षी । 'स्वाङ्गात्' किम्—दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः ।

वक्तव्य इत्यर्थः । **निस्त्रिंशानीति** । 'निरादयः क्रान्त–' इति तत्पुरुषः, डच्, 'टेः' इति टिलोपः । त्रिंशतोऽधिकानीति यावत् । **निस्त्रिंश इति** । समासादि पूर्ववत् । त्रिंशदधिकाङ्गुलिरित्यर्थः । न च गवां विंशतिर्गोविंशतिरित्यत्रातिप्रसङ्गः शङ्क्यः, 'अव्ययादेः' इति विशेषणादिति भाष्ये स्पष्टम् । न चैकाधिका विंशतिरेकविंशतिरित्यत्र 'संख्ययाऽव्यय–' इति समासे सति 'बहुव्रीहौ संख्येये–' इति डच् शङ्क्यः, अन्यत्राधिकलोपादिति वार्तिकादित्यास्तां तावत् । **बहुव्रीहौ । व्यत्ययेनेति ।** सक्थ्यक्ष्णोरिति षष्ठी पञ्चम्यर्थे, 'व्यत्ययो बहुलम्' इति छन्दसि वचनादित्यर्थः । 'छन्दोवत्सूत्राणि भवन्ति' इति भाष्यम् । 'बहुव्रीहौ' इति सप्तमी व्यत्ययेन पञ्चम्यर्थे । तदाह—**स्वाङ्गवाचीति । सक्थ्यक्ष्यन्तादिति ।** बहुव्रीहिविशेषणत्वात् तदन्तविधिरिति भावः । **षच् स्यादिति ।** समासान्तस्तद्धितश्चेति ज्ञेयम् । **दीर्घसक्थ इति ।** षच् 'यस्येति च' इति लोपः । **जलजाक्षीति ।** जलजे इव अक्षिणी यस्या इति विग्रहः । समासे षचि 'नस्तद्धिते' इति टिलोपः । षित्त्वाद् ङीष् । षित्त्वं ङीषर्थमिति भावः । **दीर्घसक्थि शकटमिति ।** दीर्घे सक्थिनी सक्थिसदृशाबीषादण्डौ यस्येति विग्रहः । अत्र सक्थिशब्दार्थयोरीषादण्डयोः 'अद्रवं मूर्तिमत्स्वाङ्गम्–' इत्यादिस्वाङ्गलक्षणाभावान्न षजिति भावः । अत्र 'स्वाङ्गात्' इत्यस्य प्रत्युदाहरणान्तरमाह—**स्थूलाक्षेति ।** स्थूलानि अक्षीणि पर्वग्रन्थयो यस्या इति बहुव्रीहिः । अस्वाङ्गत्वादिह न षजिति भावः । ननु षजभावेऽपि नान्तलक्षणङीपि स्थूलाक्षिणीति

स्वरस्य सतिशिष्टत्वात्, डचश्चित्करणस्य वैयर्थ्यापत्तेश्च । **संख्याया इति ।** संख्यान्तस्य तत्पुरुषस्य चरमावयवो डज्वक्तव्य इत्यर्थः । एकविंशतिरित्यादौ तु न भवति, 'अन्यत्राधिकलोपात्' इति वार्तिककारोक्तेः । **व्यत्ययेन षष्ठीति ।** एतच्चोपलक्षणम्, सप्तम्यपि व्यत्ययेनैव, तदाह—**स्वाङ्गवाचीत्यादि ।** 'अद्रवं मूर्तिमत्–' इत्यादिलक्षणलक्षितं स्वाङ्गं गृह्यते । तेन शोभनाक्षी प्रतिमेत्यादिप्रयोगो निर्बाध एवेत्याहुः । **षच् स्यादिति ।** षो ङीषर्थः । चस्तु 'चितः' इत्यन्तोदात्तार्थः । तेनात्र पूर्वपदप्रकृतिस्वरो न भवति । **स्थूलाक्षेति ।** स्थूलानि अक्षीणि पर्वाङ्कुराणि यस्याः सा । प्राचा तु

---

१ ग्रन्थोऽयमसङ्गत इव प्रतिभाति, अक्षिशब्दस्य नान्तत्वाभावात् ।

'अच्क्ष्णोऽदर्शनात्' (सू ८४४) इत्यच्। ८५३ अङ्गुलेर्दारुणि। (५-४-११४) अङ्गुल्यन्ताद्बहुव्रीहेः षच्स्याद्दार्वर्थे । पञ्च अङ्गुलयो यस्य तत्पञ्चाङ्गुलं दारु । अङ्गुलिसदृशावयवं धान्यादिविक्षेपणकाष्ठमुच्यते । बहुव्रीहेः किम्—द्वे अङ्गुली प्रमाणमस्या द्व्यङ्गुला यष्टिः । तद्धितार्थे तत्पुरुषे 'तत्पुरुषस्याङ्गुलेः—' (सू ७८६) इत्यच् । दारुणि किम्—पञ्चाङ्गुलिर्हस्तः । ८५४ द्वित्रिभ्यां ष मूर्ध्नः । (५-४-११५) आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ । द्विमूर्धः । त्रिमूर्धः । 'नेतुर्नक्षत्रे अब्वक्तव्यः' (वा ३३६०) । मृगो नेता यासां ता मृगनेत्रा रात्रयः । पुष्यनेत्राः । ८५५ अन्तर्बहिर्भ्यां च लोम्नः । (५-४-११७) आभ्यां

स्यादित्यत आह—**अक्ष्णोऽदर्शनादित्यजिति** । षचि तु षित्वलक्षणङीष् स्यादिति भावः। **अङ्गुलेर्दारुणि** । बहुव्रीहावित्यनुवृत्तस्य पञ्चम्यर्थे सप्तम्यन्तस्य अङ्गुल्या विशेषणात् तदन्तविधिरित्यभिप्रेत्याह—**अङ्गुल्यन्तादिति । पञ्चाङ्गुलं दार्विति** । षचि 'यस्येति च' इति इकारलोपः। ननु दारुणः कथं अङ्गुलय इत्यत आह—**अङ्गुलिसदृशावयवमिति** । अङ्गुलिसदृशा अवयवा यस्येति विग्रहः। **धान्येति** । कुसूलादिस्थितधान्याद्याकर्षकमिति यावत्। **उच्यत इति** । लक्षणयेति शेषः। **द्व्यङ्गुलेति** । 'प्रमाणे द्वयसच्—' इति विहितस्य मात्रचः 'द्विगोर्नित्यम्' इति लुक् । अबहुव्रीहित्वादत्र न षजिति भावः। तर्हि द्व्यङ्गुलिरिति स्यादित्यत आह—**तद्धितार्थ इति** । षचि तु ङीष् स्यादिति भावः। **द्वित्रिभ्याम्** । षेति लुप्तप्रथमाकं पदम्। **द्विमूर्ध इति** । द्वौ मूर्धानौ यस्येति विग्रहः। **त्रिमूर्ध इति** । त्रयो मूर्धानो यस्येति विग्रहः। समासान्तः। 'नस्तद्धिते' इति टिलोपः। षचि अनुवर्तमाने षग्रहणं चित्स्वरनिवृत्त्यर्थम्। **नेतुरिति** । नक्षत्रे विद्यमानो यो नेतृशब्दः तदन्ताद्बहुव्रीहेरप् वक्तव्य इत्यर्थः। नेता नायकः । **मृगो नेतेति** । मृगः मृगशीर्षम्। रात्रिनेता चन्द्रः। तद्योगान्नक्षत्रस्यापि नेतृत्वं बोध्यम् । **मृगनेत्रा इति** । मृगनेतृशब्दादप्, ऋकारस्य यण्, रेफः, टाप् । **पुष्यनेत्रा**

स्थूलाक्षिरिक्षुरिति प्रत्युदाहृतम् । तन्न, 'अक्ष्णोऽदर्शनात्' इत्यचो दुर्वारत्वात्। यदपि समासान्तविधेरनित्यत्वात्स न कृत इति कैश्चिद् व्याख्यातम्। तदसारम्, एवं हि षजपि तथैव न भविष्यतीति प्रत्युदाहरणस्यासङ्गतिप्रसङ्गात् । **द्व्यङ्गुलेति** । मात्रचो 'द्विगोर्नित्यम्' इति लुक्। **नेतुरिति** । नेता नायकः। नक्षत्रे यो नेतृशब्दस्तदन्ताद्बहुव्रीहेरित्यर्थः। **मृगनेत्रा इति** । मृगो मृगशीर्षनक्षत्रम् । चन्द्रो नेता यस्य मृगनक्षत्रस्य चन्द्रनेता मृग इत्यत्र तु न भवति। इह हि नेतृशब्दान्तो बहुव्रीहि-

णोऽप्यस्याद्बहुव्रीहौ। अन्तर्लोमः। बहिर्लोमः। ८५६ **अञ्नासिकायाः संज्ञायां नसं चास्थूलात्।** (५-४-११८) नासिकान्ताद्बहुव्रीहेरच्स्यान्नासिकाशब्दश्च नसं प्राप्नोति न तु स्थूलपूर्वात्। ८५७ **पूर्वपदात्संज्ञायामगः।** (८-४-३) पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने। द्रुरिव नासिका यस्य द्रुणसः। खरणसः। अगः किम्—ऋचामयनम् ऋगयनम्। 'अणृगयनादिभ्यः, (सू १४२२) इति निपातनाण्णत्वाभावमाश्रित्य अग इति प्रत्याख्यातं भाष्ये। अस्थूलात् किम्—स्थूलनासिकः। 'खुरखराभ्यां वा नस्' (वा ३३६३)। खुरणाः। खरणाः। 'पक्षेऽजपीष्यते'। खुरणसः।

इति। पुष्यो नेता यासामिति विग्रहः। **अन्तर्बहिर्भ्यां च लोम्नः। अन्तर्लोम इति।** अन्तः लोमानि यस्येति विग्रहः, अप्, टिलोपः। एवं बहिर्लोमः। **अञ्नासिकायाः।** अच् इति च्छेदः। नासिकाया इत्यस्य बहुव्रीहेर्विशेषणत्वात् तदन्तविधिमभिप्रेत्याह—**नासिकान्तादिति।** नसमित्यनन्तरं प्राप्नोतीत्यध्याहार्यम्। उपस्थितत्वान्नासिकाशब्द इति लभ्यते। तदाह—**नासिकाशब्दश्च नसं प्राप्नोतीति। पूर्वपदात्।** रषाभ्याम् इत्यनुवृत्तम्। पूर्वपदशब्देन पूर्वपदस्थं लक्ष्यते। 'रषाभ्याम्' इत्यनेन लब्धो रेफः षश्च प्रत्येकमन्वेति। तदाह—**पूर्वपदस्थान्निमित्तादिति।** रेफषकारात्मकादित्यर्थः। अग इति पञ्चम्यन्तम्। गकारभिन्नात्परस्येत्यर्थः। गकारात्परस्य नेति यावत्। तदाह—**न तु गकारव्यवधान इति।** अनेन 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनुवृत्तिः सूचिता। अन्यथा अग इत्यस्य वैयर्थ्यं स्यात्। खण्डपदत्वादप्राप्तौ वचनमिदम्। **द्रुरिवेति।** वृक्ष इवेत्यर्थः। **द्रुणस इति।** बहुव्रीहेरच्। नासिकाशब्दस्य नसादेशः। णत्वम्। **ऋगयनमिति।** 'ऋवर्णात्–' इति वार्तिकस्याप्यत्रानुवृत्त्या णत्वं प्राप्तं गकारेण व्यवधानान्न भवतीति भावः। अत्र ऋचामयनमिति विग्रहप्रदर्शनं चिन्त्यम्, वाक्येन संज्ञानवगमात्। न च रघुनाथ इत्यादौ संज्ञायां णत्वं शङ्क्यम्, णत्वेन चेत्संज्ञा गम्यत इत्यर्थात्। इह तु कृते णत्वे संज्ञात्वभङ्गापत्तेर्न णत्वम्। अत एव 'भृञोऽसंज्ञायाम्' इति सूत्रभाष्ये 'य एते संज्ञायामिति विधीयन्ते, तेषु नैवं विज्ञायते संज्ञायामभिधेयायामिति। किं तर्हि प्रत्ययान्तेन चेत्संज्ञा गम्यते' इत्युक्तम्। **खुरेति।** खुरखराभ्यां परस्य नासिकाशब्दस्य बहुव्रीहौ संज्ञायां नसादेशो वेति वक्तव्यमित्यर्थः। प्रकृतत्वादेव सिद्धे नसादेशवचनम् अच्प्रत्ययानुवृत्तिनिवृत्त्यर्थम्। **खुरणा इति।** खुराविव नासिके यस्येति

नक्षत्रे वर्तते न तु नेतृशब्द इति। **खुरखराभ्यामिति।** 'नासिकायाः–' इति वर्तते। केवलादेशवचनं प्रत्ययनिवृत्त्यर्थम्। **खुरणा इति।** 'अत्वसन्तस्य–' इति दीर्घः।

खरणसः। ८५८ उपसर्गाच्च। (५-४-११६) प्रादेर्यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासिकाया नसादेशश्च। असंज्ञार्थमिदं वचनम्। उन्नता नासिका यस्य स उन्नसः। ८५६ उपसर्गादनोत्परः। (८-४-२८) इति सूत्रम्। तद्भङ्क्त्वा भाष्यकार आह—उपसर्गाद्बहुलम्। उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलम्। प्रणसः। 'वेर्ग्रो वक्तव्यः' (वा ३३६५)। विगता नासिका यस्य विग्रः। 'ख्यश्च' (वा ३३६६)। विख्यः। कथं तर्हि

विग्रहः। नसादेशः। 'पूर्वपदात्संज्ञायाम्–' इति णत्वम्। 'अत्वसन्तस्य–' इति दीर्घः। **खरणा इति**। खररूपा नासिका यस्येति विग्रहः। पक्षे खुरनासिक इति खरनासिक इति च न भवतीत्याह—**पक्षे अजपीष्यत इति**। अच्प्रत्ययसहितो नसादेश इत्यर्थः। भाष्ये त्विदं न दृश्यते। **उपसर्गाच्च**। नन्वच्नासिकाया इत्येव सिद्धे किमर्थमिदमित्यत आह—**असंज्ञार्थमिति**। **उपसर्गादनोत्पर इति सूत्रमिति**। तत्र हि 'नश्च धातुस्थो–' इति सूत्रान्नसिति लुप्तषष्ठीकमनुवर्तते। 'रषाभ्यां नो णः' इत्यनुवर्तते। उपसर्गस्थाद्रेफषकारात्परस्य नसो नस्य णः स्यात्, ओत्परस्तु नकारो णत्वं न प्राप्नोतीत्यर्थः। खण्डपदस्थत्वादप्राप्ताविदं सूत्रम्। 'प्र ण आयूँषि तारिषत्' इत्याद्युदाहरणम्। अनोत्परः किम्? 'प्र नो मुञ्चतम्' अत्र ओत्परकत्वान्न णत्वमिति स्थितिः। **तद्भङ्क्त्वेति**। 'अनोत्परः' इत्यपनीय तत्स्थाने बहुलमिति च कृत्वा भाष्यकार आहेत्यर्थः। तथा च फलितं सूत्रमाह—**उपसर्गाद्बहुलम्**। **निमित्तादिति**। रेफषकारान्मकादित्यर्थः। 'उपसर्गादनोत्परः' इति यथाश्रुते तु 'प्रणो नय' इत्यादावव्याप्तिः, 'प्र नः पूषा' इत्यादावतिव्याप्तिश्चेति भावः। **प्रणस इति**। प्रगता नासिका यस्येति विग्रहः। 'उपसर्गाच्च' इत्यच्, नासिकाया नस्। 'उपसर्गाद्बहुलम्' इति णत्वमिति भावः। **वेरिति**। वेः परो यो नासिकाशब्दः स ग्रादेशं प्राप्नोतीति भावः। **विग्र इति**। विगता नासिका यस्येति विग्रहः। प्रकृतवार्तिकेन नासिकाशब्दस्य ग्रादेश इति भावः। विगता नासिका यस्येति विग्रहे अचि नसादेशं टापि च विनसेति भट्टिप्रयोगो न युज्यते। ग्रादेशस्यास्य नसादेशं

उपसर्गाच्च। उपसर्गग्रहणं प्रादीनामुपलक्षणम्, नासिकाशब्दस्याक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात्। न च क्रियायोगाभावेऽप्युपसर्गत्वमस्त्विति शङ्क्यम्। सावके अधिसावकमित्यव्ययीभावे 'उपसर्गात्सुनोति–' इति सस्य षत्वप्रसङ्गात्तदाह—**प्रादेरिति**। **उपसर्गादनोत्परः**। अनोत्परः किम्, प्रनो मुञ्चतमित्यत्र णत्वं मा भूत्। **तद्भङ्क्त्वेति**। 'अनोत्परः' इत्यपनीय बहुलग्रहणं च कृत्वेत्यर्थः। अन्यथा प्रणो नयेत्यादावव्याप्तिः, प्र नः पूषेत्यादौ त्वतिव्याप्तिः प्रसज्येतेति भावः। **प्रणस इति**।

'विनसा हतबान्धवा' इति भट्टिः। विगतया नासिकयोपलक्षितेति व्याख्येयम्। ८६० सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः। (५-४-१२०) एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते शोभनं प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः। शोभनं दिवा अस्य सुदिव। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या इव पादावस्यैणीपदः। अजपदः। प्रोष्ठो गौः, तस्येव पादावस्य प्रोष्ठपदः। ८६१ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्। (५-४-१२१) अच् स्यात् अहलः, अहलिः।

प्रत्ययवादत्वादित्याक्षिपति—**कथं तर्हीति**। समाधत्ते—**विगतयेति**। विगता नासिका विनासिका, प्रादिसमासः, अबहुव्रीहित्वाद् न प्रादेशः, किंतु टायां 'पद्दन्—' इति नसादेशे विनसेति तृतीयान्तं रूपम्। उपलक्षितेत्यध्याहार्यमिति भावः। **सुप्रात। सुप्रात इति**। अच्प्रत्ययः। 'अव्ययानां भमात्रे टिलोपः'। **सुश्व इति**। अच्, पूर्ववट्टिलोपः। **सुदिव इति**। शोभनं दिवा यस्येति विग्रहः। दिवेत्याकारान्तमव्ययम्। 'अव्ययानां भमात्रे टिलोपः' इति टिलोपः। **शारिकुक्ष इति**। शारिः पक्षिविशेषः। अचि 'यस्येति च' इति इकारलोपः। **चतस्रोऽश्रय इति**। कोणा इत्यर्थः। अचि 'यस्येति च' इति इकारलोपः। **एण्या एवेति**। एणी मृगी। **अजपद इति**। अजः छागः, तस्येव पादावस्येति विग्रहः। एणीपदादिषु अच्। निपातनात् पादः पत्। **नञ्दुस्सुभ्यः**। शेषपूरणेन सूत्रं व्याचष्टे—**अच् स्यादिति। अहलः, अहलिरिति**। अविद्यमानो हलिः यस्येति विग्रहः। हलिशब्द इदन्तो हलपर्यायः, तदन्तादचि 'यस्येति च' इति इकारलोपे तदभावे च रूपम्। यद्यपि हलशब्देन हलिशब्देन च रूपद्वयं सिद्धम्। तथापि अनुक्तसमासान्ततया शैषिकस्य कपः प्राप्तौ तन्निवृत्त्यर्थमिदं वचनम्। अस्य वैकल्पिकत्वेऽपि अनुक्त-

---

प्रगता नासिका अस्येति विग्रहः। **कथं तर्हीति**। प्रत्ययोरन्यतरेण भाव्यमिति प्रश्नः। **नासिकयेति**। तथा च विनसेति न प्रथमान्तम्, किं तु 'पद्दन्–' इति नसादेशे तृतीयान्तमिति भावः। **शोभनं प्रातरस्येति**। अधिकरणशक्तिप्रधानस्य सामानाधिकरण्यासंभवात्प्रातःशब्देन प्रातस्तनं कर्म लक्ष्यत इत्याहुः। प्रातःकल्पमित्यत्रेव प्रातःशब्दो वृत्तिविषये शक्तिमत्पर इति न सामानाधिकरण्यानुपपत्तिरित्यन्ये। एणीपदादिषु निपातनात्पद्भावः। **नञ्दुःसुभ्यो**। नन्वत्र हलिग्रहणं व्यर्थम्, हलशब्दमादायाहल इति प्रयोगसंभवात्। न च महद्धलं हलिः, तद्रहितोऽहलिस्तत्रैवार्थे हल इति प्रयोगार्थं तद्ग्रहणमिति वाच्यम्, अहल इत्यत्र महद्धलरहित इत्यर्थाप्रतीतेः। न चैवमप्यन्तोदात्तार्थमच्प्रत्ययविधानमावश्यकम्, अन्यथाऽहल इत्यत्र पूर्वपदप्रकृति-

असक्थः, असक्थिः। एवं दुःसुभ्याम्। शक्त्योः इति पाठान्तरम्। अशक्तः, अशक्तिः। **८६२ नित्यमसिच्प्रजामेधयोः। (५-४-१२२)** नञ्दुःसुभ्य इत्येव। अप्रजाः। दुष्प्रजाः। सुप्रजाः। अमेधाः। दुर्मेधाः। सुमेधाः। **८६३ धर्मादनिच्केवलात्। (५-४-१२४)** केवलात्पूर्वपदात्परो यो

समासान्तत्वाभावादत्र न कप्। **असक्थः, असक्थिरिति**। अविद्यमानं सक्थि यस्येति विग्रहः। **एवं दुस्सुभ्यामिति**। दुर्हलः, दुर्हलिः। दुस्सक्थः, दुस्सक्थिः। **शक्त्योरिति**। 'हलिशक्त्योः' इति केचित् पाणिनीयाः पठन्तीत्यर्थः। केचिच्छिष्याः पाणिनिना तथा पाठिता इति वदन्तीति भावः। **नित्यमसिच्**। **नञ्दुस्सुभ्य इत्येवेति**। पूर्वसूत्रादनुवर्तत इति भावः। एतेभ्यः पराभ्यां प्रजामेधाशब्दाभ्यां नित्यमसिच् समासान्तः स्यात्, स तद्धित इत्यर्थः। असिचः चकार इत्, इकार उच्चारणार्थः। अन्यतरस्यामित्यनुवृत्तिनिवृत्त्यर्थं नित्यग्रहणम्। अस्वरितत्वादेव तदनुवृत्त्यभावे सिद्धे स्पष्टार्थमिति तत्त्वम्। **अप्रजा इति**। अविद्यमाना प्रजा यस्येति विग्रहः। 'नञोऽस्त्यर्थानाम्–' इति समासः। असिचि 'यस्येति च' इत्याकारलोपादप्रजश्शब्दात् सुबुत्पत्तिः। सौ तु 'अत्वसन्तस्य–' इति दीर्घः। 'हल्ङ्याप्–' इति सुलोपः। यद्यप्यकारं विना सिचि विहितेऽपि सिद्धमिदम्। तथापि सिच्यभत्वेन आकारलोपाभावादप्रजास्शब्दात् सुबुत्पत्तौ, प्रथमैकवचने अप्रजाः इति रूपसिद्धावपि अप्रजसाविति न स्यात्। किंतु अप्रजासावित्यादि स्यात्। तस्मादकारोच्चारणं भत्वसंपादनार्थमावश्यकम्। **दुष्प्रजा इति**। दुर्गता प्रजा यस्येति विग्रहः। 'प्रादिभ्यो धातुजस्य–' इति समासः। असिजादि पूर्ववत्। 'इदुदुपधस्य–' इति षत्वम्। **सुप्रजा इति**। शोभना प्रजा यस्येति विग्रहः। असिजादि पूर्ववत्। **अमेधा इत्यादि**। अविद्यमाना मेधा यस्येति विग्रहः। असिजादि पूर्ववत्। केचित्तु नित्यग्रहणमन्यतो विधानार्थम्। तेनाल्पमेधस इत्यादि सिध्यतीत्यप्याहुः। **धर्मादनिच्केवलात्**।

स्वरः स्यादिति शङ्क्यम्, 'नञ्सुभ्याम्' इत्यनेनान्तोदात्तत्वविधानात्। अत्राहुः— शैषिकस्य कपो निवृत्त्यर्थम्, 'दुर्हलैः' इत्यत्रान्तोदात्तत्वार्थं च तदिति। **शक्त्योरिति**। आचार्येण केचिच्छात्रा हलिशक्त्योरिति पाठिता इति भावः। **नित्यमसिच्**। अकारोच्चारणं भत्वसंपादनार्थम्, तेन सुप्रजसावित्यादौ 'यस्येति च' इत्यकारलोपः सिध्यति। अस्वरितत्वादेव अन्यतरस्यांग्रहणाननुवृत्तिसिद्धौ नित्यग्रहणमन्यतो विधानार्थम्। तेन 'अल्पमेधसः' इति सिध्यतीति वृत्तिकारादयः। **धर्मादनिच्**। अनिचोऽकारश्चिन्त्यप्रयोजन इत्येके। अन्ये तु धर्मं करोत्याचष्टे वा 'तत्करोति–' इति णयन्तात् क्विपि धर्म्, परमो धर्म् यस्य स परमधर्मा। एकदेशविकृतस्यानन्यत्वाद्धर्म

धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्स्यात् । कल्याणधर्मा । केवलात् किम्-परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् । स्वशब्दो हीह न केवलं पूर्वपदम्, किं तु मध्यमत्वादापेक्षिकम् । 'सन्दिग्धसाध्यधर्मा इत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः । एवं च परमस्वधर्मा इत्यपि साध्वेव । निवृत्तिधर्मा, अनुच्छित्तिधर्मा

पूर्वपदादित्यध्याहृत्य केवलादित्यस्य तद्विशेषणत्वमाह—**केवलात्पूर्वपदादिति** । अनिचि चकार इत् । इकार उच्चारणार्थः । मध्यमपदत्वानाक्रान्तत्वं केवलपूर्वपदत्वम् । **कल्याणधर्मेति** । कल्याणो धर्मो यस्येति विग्रहः । अनिचि 'यस्येति च' इत्यकारलोपः । **परम इति** । परमः स्वो धर्मो यस्येति बहुव्रीहौ परमस्वधर्मशब्दे स्वशब्दस्य धर्मशब्दापेक्षया पूर्वपदत्वात् ततः परमस्वधर्मशब्दादप्यचः प्राप्तौ तन्निवृत्त्यर्थं केवलग्रहणमिति भावः । केवलग्रहणे कृते तु न दोष इत्याह—**स्वशब्दो हीह न केवलं पूर्वपदमिति । किं त्विति** । किं तु स्वशब्दो धर्मपदापेक्षया पूर्वत्वात्पूर्वपदम्, न तु केवलम्, मध्यमत्वात् । केवलशब्देन च पदान्तरराहित्यवाचिना मध्यमपदत्वानाक्रान्तत्वलाभादित्यर्थः । इदं च 'इजादेः-' इति सूत्रभाष्ये स्पष्टम् । एवं च त्रिपदबहुव्रीहौ परमस्वधर्म इत्येव भवति । नत्वनिच् । 'सर्वनामसंख्ययोरुपसंख्यानम्' इति स्वशब्दस्य पूर्वनिपातस्तु 'वाहिताग्न्यादिषु' इति पाक्षिकत्वान्न भवति । नन्वेवं सति संदिग्धः साध्यो धर्मो यस्य स संदिग्धसाध्यधर्मा इत्यत्र कथमनिच् । अत्र हि संदिग्धेति केवलं पूर्वपदम्, धर्मशब्दस्तस्मात् परो न भवति । यस्मात् साध्यशब्दात् परो धर्मशब्दः, तस्य तु न पूर्वपदत्वम्, मध्यमपदत्वादित्यत आह—**संदिग्धेति** । संदिग्धश्चासौ साध्यश्चेति कर्मधारयः, संदिग्धसाध्यो धर्मो यस्येति कर्मधारयगर्भो बहुव्रीहिः । एवं च संदिग्धसाध्यशब्दस्य केवलपूर्वपदत्वात् तत्रानिज् निर्बाध इति भावः । **एवं चेति** । उक्तरीत्या परमश्चासौ स्वश्च परमस्वः, परमस्वः धर्मो यस्येति कर्मधारयाश्रयणे तु

शब्दोऽयमित्यकारोच्चारणमिह सप्रयोजनमेवेत्याहुः । बहुव्रीहिणात्र पूर्वपदमाक्षिप्यत इत्यनुपदमेव वक्ष्यति । तच्च 'केवलात्' इत्यनेन विशेष्यत इत्याह—**केवलात्पूर्वपदादिति** । प्राचा तूत्तरपदमपि विशेषितम् । प्रसादकृतापि केवलादिति धर्मशब्दस्य पूर्वपदस्य च विशेषणमिति व्याख्यातम्, तदुभयमपि चिन्त्यम् । आवृत्तौ मानाभावात्, धर्मपदविशेषणे प्रयोजनाभावाच्च । न च धर्मशब्दान्तं यत्रोत्तरपदं तद्व्यावृत्तिः फलमिति वाच्यम्, तत्र बहुव्रीह्यवयवीभूतपूर्वपदात्परत्वस्य धर्मपदे असंभवादेवादोषत्वात् । **मध्यमत्वादिति** । न च 'सर्वनामसंख्ययोः-' इति स्वशब्दस्य पूर्वनिपातः शङ्क्यः, वाहिताग्न्यादेराकृतिगणत्वादिति हरदत्तादिभिः समाहितत्वात् । **आपेक्षिकमिति** । नन्वत एव केवलग्रहणं व्यर्थम्, पूर्वशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यमपद-

इत्यादिवत्। पूर्वपदं तु बहुव्रीहिणा आक्षिप्यते। **८६४ जम्भा सुहरिततृणसोमेभ्यः।** (५-४-१२५) जम्भा इति कृतसमासान्तं निपात्यते। जम्भो भक्ष्ये दन्ते च। शोभनो जम्भोऽस्य सुजम्भा। हरितजम्भा। तृणं भक्ष्यं यस्य, तृणमिव दन्ता यस्येति वा तृणजम्भा। सोमजम्भा। स्वादिभ्यः किम्—पतितजम्भः। **८६५ दक्षिणेर्मा लुब्धयोगे।** (५-४-१२६) दक्षिणे ईर्मं व्रणं यस्य दक्षिणेर्मा

केवलपूर्वपदत्वादनिच्। परमस्वधर्मेत्यपि साध्वेवेत्यर्थः। **निवृत्तीति**। निवृत्तिः धर्मो यस्येति, अनुच्छित्तिः धर्मो यस्येति च विग्रहः। अत्र समासे निवृत्तिशब्दस्य अनुच्छित्तिशब्दस्य च केवलपूर्वपदत्वाद् यथायोग्यमनिजिति भावः। नन्विह सूत्रे पूर्वपदशब्दस्य श्रवणादनुवृत्त्यभावाच्च कथं पूर्वपदादिति लभ्यत इत्यत आह— **पूर्वपदं त्विति। जम्भा सुहरित।** जम्भेति नकारान्तं पदम्। तदाह— **जम्भेति कृतसमासान्तमिति**। अनिजन्तमित्यर्थः। सु, हरित, तृण, सोम इत्येतेभ्यः परो यो जम्भशब्दः, तदन्ताद् बहुव्रीहेः अनिच्प्रत्ययो निपातित इति भावः। **जम्भो भक्ष्ये दन्ते चेति**। अत्र कोशो मृग्यः। **सुजम्भेति**। सुजम्भशब्दादनिचि 'यस्येति च' इत्यकारलोपः। **हरितजम्भेति**। हरितो जम्भो यस्येति विग्रहः। **तृणमिवेति**। तृणशब्दस्य दन्तवाचिना जम्भशब्देन सामानाधिकरण्यलाभाय तृणशब्दस्य तत्सदृशे लक्षणेति भावः। **सोमजम्भेति**। सोमः चन्द्रः स इव शुभ्रा जम्भा दन्ता यस्येति विग्रहः। सोमः सोमलता वा, सैव जम्भो भक्ष्यं यस्येति विग्रहः। **पतितजम्भ इति**। पतिता जम्भा दन्ता यस्येति विग्रहः। **दक्षिणेर्मा**। लुब्धो व्याधः, तद्योगे 'दक्षिणेर्मा–' इत्यनिच्प्रत्ययः, बहुव्रीहिश्च निपात्यते। दक्षिणे ईर्मं यस्येति विग्रहः। ईर्ममित्यस्य व्याख्यानं व्रणमिति। व्यधिकरणत्वेऽपि बहुव्रीहिर्निपातनात्। अनिचि 'यस्येति च' इत्यकारलोपे

व्यावृत्तिसंभवादिति चेत्। अत्राहुः—पूर्वपदात्लोपे तात्पर्यग्राहकत्वेन केवलपदस्य सार्थकत्वादिति। **कर्मधारयपूर्वपद इति**। नन्वत्रानिच् दुर्लभः, 'केवलात्' इत्यस्य समासानात्मकत्वादित्यर्थादिति चेत्। मैवम्, केवलग्रहणस्य समासानात्मकपूर्वपदपरत्वे मानाभावात्। निवृत्तिधर्मा हि स्थानी भवतीत्यादिप्रयोगविरोधाच्च। अस्मदुक्तार्थस्तु 'धृञ् धारणे' इति धातौ माधवग्रन्थे स्पष्टः। एतेन साध्यो धर्मोऽस्येति साध्यधर्मा संदिग्धश्चासौ साध्यधर्मा चेति विग्रहः। स च संदेहः साध्यधर्मद्वारक एव पर्यवस्यतीति केषांचिद्व्याख्यानं परास्तम्। उक्तरीत्यैव साध्यस्य साक्षात् संदिग्धत्वलाभे तत्समर्थनप्रयासस्य व्यर्थत्वात्। **साध्वेवेति**। परमश्चासौ स्वश्च परमस्वः, स धर्मो यस्येति यदा विगृह्यते तदेत्यर्थः। **दक्षिणेर्मा—**। लुब्धो व्याधः। तद्योगादेवेर्मनिष्पत्ताविदं

मृगः। व्याधेन कृतव्रण इत्यर्थः। ८६६ इच्कर्मव्यतिहारे। (५-४-१२७) कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच्स्यात्समासान्तः। केशाकेशि। मुसलामुसलि। ८६७ द्विदण्ड्यादिभ्यश्च। (५-४-१२८) तादर्थ्ये चतुर्थ्येषा। एषां सिद्ध्यर्थमिच्प्रत्ययः स्यात्। द्वौ दण्डौ यस्मिन्प्रहरणे तद् द्विदण्डि प्रहरणम्। द्विमुसलि। उभाहस्ति। उभयाहस्ति। ८६८ प्रसंभ्यां जानुनोर्ज्ञुः। (५-४-१२९) आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ। प्रगते जानुनी यस्य प्रज्ञुः। संज्ञुः।

दक्षिणेर्मेति रूपम्। लुब्धशब्दं विवृण्वन्नाह—व्याधेनेति रोगादिना व्रणे तु दक्षिणेर्म इत्येवेति भावः। इच्कर्मव्यतिहारे। समासान्त इति। तद्धित इत्यपि ज्ञेयम्। केशाकेशीति। अत्र प्रक्रिया प्रागेव प्रदर्शिता। द्विदण्ड्यादिभ्यश्च। द्विदण्ड्यादिषु इदन्तानामेव निपातनात् तेभ्यः परत्वेन इच्प्रत्ययविधिरनर्थक इत्याशङ्क्य नेयं पञ्चमीत्याह—तादर्थ्ये चतुर्थ्येषेति। द्वौ दण्डाविति। कर्मव्यतिहाराभावेऽपि वैरूप्येऽपि बहुव्रीहिः इच्प्रत्ययश्च निपात्यते। द्विदण्डीति। दण्डादण्डीतिवत् प्रक्रिया। कर्मव्यतिहाराभावात् पूर्वपदस्य न दीर्घ इति विशेषः। द्विमुसलीति। द्वे मुसले यस्मिन् प्रहरणे इति विग्रहः। उभाहस्ति। उभयाहस्तीति। उभौ हस्तौ यस्मिन् प्रहरण इति विग्रहः। उभयोऽन्यत्रेति नित्यमयचि प्राप्ते निपातनेन विकल्प्यते। कर्मव्यतिहाराभावेऽपि दीर्घश्च। प्रसंभ्याम् जानुशब्दयोरिति। प्र सम् इति पूर्वपदद्वित्वाद् उत्तरपदभूतजानुशब्दस्यापि द्वित्वं बोध्यम्। जानुन इत्युक्ते तु 'प्रत्ययः, परश्च' इत्यधिकारात् पञ्चम्यन्तत्वसंभवात् ज्ञोः प्रत्ययत्वं च सम्भाव्येत। तस्यादेशत्वसिद्धये षष्ठीद्विवचननिर्देशः। तदाह—

निपातनं नान्यदेत्यर्थस्तदेतदाह—व्याधेनेति। 'वाली हेमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणेर्मा' इति प्रयोगस्त्वौपचारिक इति कथंचिन्नेयः। केशाकेशीति। 'तत्र तेनेदम्–' इति कर्मव्यतिहारे बहुव्रीहिः। इच्प्रत्ययस्य तिष्ठद्गुप्रभृतिषु पाठादव्ययीभावत्वेऽव्ययत्वम्। नन्वेवमिचश्चित्करणं व्यर्थम्, अव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधात्समासस्वरेणान्तोदात्तत्वसिद्धेः। अत्राहुः—विशेषणार्थं तदावश्यकमेव। तिष्ठद्गुप्रभृतिषु इकारमात्रपाठे हि सुगन्धिरित्यादावतिव्याप्तिप्रसङ्गात्। किं चात्राव्ययीभावसंज्ञया बहुव्रीहिसंज्ञा न बाध्यते, किं तु द्वयोः समावेश एव, उपजीव्यविरोधस्यान्याय्यत्वात्। एवं च स्वरार्थमपि चित्त्वं कर्तव्यमेवेति। द्विदण्डीति। समुदायनिपातनस्य विषयविशेषपरिग्रहार्थत्वाद् द्विदण्डा शालेत्यत्र त्विज् न भवति। उभाहस्तीत्यादि। इह निपातनादेवायचः पाक्षिकत्वम्। प्रसंभ्याम्। जानुशब्दस्यैकत्वेऽप्युपपदनिबन्धनं द्वित्वमाश्रित्य जानुनोरिति

८६६ ऊर्ध्वाद्विभाषा । (५-४-१३०) ऊर्ध्वज्ञुः, ऊर्ध्वजानुः । **८७० धनुषश्च ।** (५-४-१३२) धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात् । द्विधन्वा । शार्ङ्गधन्वा । **८७१ वा संज्ञायाम् ।** (५-४-१३३) शतधन्वा, शतधनुः । **८७२ जायाया निङ् ।** (५-४-१३४) जायान्तस्य बहुव्रीहेर्निङादेशः स्यात् । **८७३ लोपो व्योर्वलि ।** (६-१-६६) वकारयकारयोर्लोपः स्याद्वलि । पुंवद्भावः । युवतिर्जाया अस्य युवजानिः । **८७४ गन्धस्येदुत्पूतिसु-**

ज्ञुरादेश इति । प्रज्ञुरिति । 'प्रादिभ्यो धातुजस्य–' इति समासः । **संज्ञुरिति ।** संगते जानुनी यस्येति विग्रहः । **ऊर्ध्वाद्विभाषा ।** ऊर्ध्वशब्दात् परो यो जानुशब्दः, तस्य ज्ञुरादेशो वा स्यात् । बहुव्रीहावित्यर्थः । **ऊर्ध्वज्ञुरिति ।** ऊर्ध्वे जानुनी यस्येति विग्रहः । **धनुषश्च ।** 'ऊधसोऽनङ्' इति पूर्वसूत्रं स्त्रीप्रत्ययाधिकारे व्याख्यातम् । तस्मादनङित्यनुवर्तते । तदाह—**अनङादेश इति ।** ङित्वादन्तादेशः । 'प्रत्ययः, परश्च' इत्यधिकारस्थत्वेऽपि ङित्त्वादन्तादेश इति भावः । **द्विधन्वेति ।** द्वे धनुषी यस्येति विग्रहः । समासे द्विधनुश्शब्दे सकारस्य अनङादेशः । ङकार इत् । अकार उच्चारणार्थः । उकारस्य यणिति भावः । **शार्ङ्गधन्वेति ।** शृङ्गस्येदं शार्ङ्गम्, 'तस्येदम्' इत्यण्, तद् धनुर्यस्येति विग्रहः । समासे शार्ङ्गधनुश्शब्दे सकारस्यानङ्, ङकार इत्, अकार उच्चारणार्थः, उकारस्य यणिति भावः । महिम्नस्स्तवे 'खलावण्याशंसाधृतधनुषम्' इति प्रयोगस्त्वार्षः । **वा संज्ञायाम् ।** 'धनुषश्च' इत्युक्तः अनङ् संज्ञायां वा स्यादित्यर्थः । **शतधन्वेति ।** शतधन्वा नाम राजविशेषः स्यमन्तकोपाख्याने प्रसिद्धः । **जायाया निङ् । आदेश इति ।** 'प्रत्ययः, परश्च' इत्यधिकारस्थत्वेऽपि ङित्वादन्तादेशोऽयमिति भावः । **लोपो व्योर्वलि ।** व् य् अनयोर्द्वन्द्वात् षष्ठीद्विवचनम् । तदाह—**वकारयकारयोरिति । पुंवद्भाव इति ।**

द्विवचननिर्देशः, तत्फलं तु स्थानषष्ठीत्वस्फुटीकरणम् । 'जानुनः' इत्युक्ते तु किमियं पञ्चमी प्रत्ययाधिकराज् ज्ञुरपि प्रत्यय इत्येवं संदेहः स्यात्, तदेतद् ध्वनयन्नाह—**जानुशब्दयोर्ज्ञुरादेश इति । शार्ङ्गधन्वेति ।** कथं तर्हि 'खलावण्याशंसाधृतधनुषमह्नाय तृणवत्' इति पुष्पदन्तप्रयोग इति चेत् । अत्राहुः—समासान्तविधेरनित्यत्वाभ्रान्त्रानुपपत्तिः । अनित्यत्वे प्रमाणं त्वश्वादिगणे राजन्शब्दपाठः । स हि 'प्रतेरंश्वादयस्तत्पुरुषे' इत्यन्तोदात्तार्थः । 'राजाहःसखि–' इति टचो नित्यत्वे तु किं तेनेति । **लोपो व्योर्वलि ।** व्योर्लोप इति वक्तव्ये 'वेरपृक्तलोपाद्वलिलोपः पूर्वविप्रतिषेधेन' इति ज्ञापयितुमादौ विधेयनिर्देशः कृतः । तेन सुखीयतेः क्विपि सुखीरिति

---

१ 'द्विधन्वा' इति बहुत्र नोपलभ्यते ।

सुरभिभ्यः । (५-४-१३५) एभ्यो गन्धस्येकारोऽन्तादेशः स्यात् । उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः । 'गन्धस्येत्वे तदेकान्तग्रहणम्' (वा ३३१८) । एकान्त एकदेश इवाविभागेन लक्ष्यमाण इत्यर्थः । सुगन्धि पुष्पं सलिलं च । सुगन्धिर्वायुः । नेह–सु शोभना गन्धा द्रव्याण्यस्य सुगन्ध

'स्त्रियाः पुंवत्–' इत्यनेनेति शेषः । **युवजानिरिति** । जायाशब्दे यकारादाकारस्य निङ् । ङकार इत्, 'लोपो व्योः–' इति यकारलोपः । युवतिशब्दस्य पुंवत्त्वात् तिप्रत्ययस्य निवृत्तिः । नलोप इति भावः । **गन्धस्येदुत्** । गन्धस्य इत् इति च्छेदः । **एभ्य इति** । उत्, पूति, सु, सुरभि एतेभ्य इत्यर्थः । **इकारोऽन्तादेश इति** । पूर्वोत्तरसाहचर्यादिकार आदेश एवेति भावः । समासान्ताधिकाराद् 'आदेः परस्य' इति न भवति । **उद्गन्धिरिति** । उद्गतो गन्धो यस्येति विग्रहः । **पूतिगन्धिरिति** । पूतिशब्दः असुरभौ । पूतिः गन्धो यस्येति विग्रहः । **सुगन्धिरिति** । शोभनो गन्धो यस्येति विग्रहः । **सुरभिगन्धिरिति** । सुरभिः गन्धो यस्येति विग्रहः । सर्वत्र 'वायुः' इति विशेष्यम् । **तदेकान्तेति** । तस्य विशेष्यभूतद्रव्यस्य एकान्त एकदेश इव प्रतीयमान इत्यर्थः । अत्र गन्धस्य गुणस्य द्रव्यैकदेशत्वं न युज्यत इत्याशङ्क्य एकान्तशब्द एकदेशवदविभक्ते लाक्षणिक इत्याह— **एकान्त एकदेश इवेति** । **सुगन्धि पुष्पं सलिलं चेति** । अत्र गन्धस्य पुष्पात् सलिलाच्च द्रव्यात् पृथगलक्ष्यमाणत्वादिति भावः । **सु शोभना इति** । सु इत्यस्य व्याख्यानं शोभना इति । **गन्धा इति** । गन्धवन्त इत्यर्थः । 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति लुक् । **द्रव्याणीति** । चन्दनादीनीत्यर्थः । गन्धा इत्यस्य विशेष्यमेतत् । गन्धशब्दस्य नपुंसकद्रव्यविशेषणत्वेऽपि नियतलिङ्गत्वात् पुंस्त्वं युज्यते । 'गन्धस्तु सौरभे नृत्ये गन्धके गर्वलेशयोः । स एव द्रव्यवचनो बहुत्वे पुंसि

सिद्धम् । **गन्धस्येत्** । तकार उच्चारणार्थ इत्याशयेनाह—**इकारोऽन्तादेश इति** । 'आदेः परस्य' इतीह न भवति 'समासान्ताः' इत्यधिकारात् । अत्र केचिदाहुः— इकारस्य प्रत्ययत्वेऽपि न क्षतिः, 'यस्येति च' इति लोपेनोद्गन्धिरित्यादिरूपसिद्धेः । न च 'तित्स्वरितम्' इत्यन्तस्वरितत्वापत्तिः शङ्क्या, तकारस्योच्चारणार्थत्वाभ्युपगमात् । नापि षष्ठीनिर्देशादादेशत्वमेव न प्रत्ययत्वमिति वाच्यम्, 'गापोष्टक्' इत्यादिप्रत्ययविधिष्वपि षष्ठीदर्शनादिति । **अविभागेनेति** । एवं च गुणवाचिन एव ग्रहणम्, न तु द्रव्यवाचिन इति फलितोऽर्थः । **द्रव्याणीति** । अस्ति च गन्धशब्दो द्रव्यवचनः, 'वहति जलमियं पिनष्टि गन्धान्' इति प्रयोगात् । 'गन्धस्तु सौरभे नृत्ये गन्धके गर्वलेशयोः । स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृतः ॥' इति कोशाच्च । केचित्तु—गन्ध-

आपणः। ८७५ **अल्पाख्यायाम्** । (५-४-१३६) सूपस्य गन्धो लेशो यस्मिंस्तत्सूपगन्धि भोजनम्। घृतगन्धि। 'गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः।' इति विश्वः। ८७६ **उपमानाच्च** । (५-४-१३७) पद्मस्येव गन्धोऽस्य पद्मगन्धिः। ८७७ **पादस्य लोपोऽहस्त्यादिभ्यः** । (५-४-१३८) हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यात् समासान्तो बहुव्रीहौ।

च स्मृतः॥' इति कोशात्। **सुगन्ध आपण इति** । अत्र गन्धशब्दवाच्यानां चन्दनादिद्रव्याणां विशेष्यभूतापणापेक्षया पृथग् लक्ष्यमाणत्वादित्त्वं नेति भावः। **अल्पाख्यायाम्** । अल्पवचने सति गन्धशब्दस्य इकारोऽन्तादेशः स्याद् बहुव्रीहाविल्यर्थः। लेश इति गन्धशब्दस्य विवरणम्। सूपस्य गन्धो यस्मिन्नित्येव विग्रहः। **सूपगन्धि भोजनमिति** । उत्पूतिसुसुरभिपूर्वकत्वाभावादेकान्तत्वाभावाच्चाप्राप्ते वचनमिदम्। व्यधिकरणपदानामपि क्वचिदस्ति बहुव्रीहिरिति मूल एवानुपदं वक्ष्यते। **घृतगन्धीति** । घृतस्य गन्धो लेशो यस्मिन्निति विग्रहः। गन्धशब्दस्याल्पवाचित्वे प्रमाणमाह—**गन्धो गन्धक इति** । **उपमानाच्च** । उपमानवाचिपूर्वपदात् परस्यापि गन्धशब्दस्य इकारोऽन्तादेशः स्याद् बहुव्रीहावित्यर्थः। **पद्मस्येवेति** । फलितार्थकथनमिदम्। पद्मगन्ध इव गन्धो यस्येति विग्रहः। पद्मपदं पद्मसंबन्धिगन्धसदृशे लाक्षणिकम्। 'सप्तम्युपमानपूर्वपदस्य—' इति समासः। **पादस्य लोपः** । अहस्त्यादिभ्य इति च्छेदः। उपमानादित्यनुवर्तते। तदाह—**हस्त्यादिवर्जितादिति** । 'आदेः परस्य' इत्यप्रवृत्तये आह—**समासान्तो बहुव्रीहाविति** । शैषिकस्य कपो निवृत्त्यर्थमपि लोपस्य समासान्तत्वम्। अन्यथा अनुक्तसमासान्तत्वात् कप् प्रसज्येत। नन्वभावात्मकस्य लोपस्य कथं समासान्तावयवत्वमित्यत आह—

स्येत्वे—' इति वार्तिके तदेकान्तशब्देन स्वाभाविकत्वं विवक्षितम्, तेनागन्तुकस्य नेत्याहुः। तथा च भट्टिः—'आघ्रायिवान् गन्धवहः सुगन्धः' इति। व्याख्यातं च जयमङ्गलायाम्— 'गन्धस्य—' इत्यादिनेकारः समासान्तो न, 'गन्धस्येत्वे तदेकान्तग्रहणम्' इति वचनात्। सुगन्ध आपणिक इति यथेति। अतएव 'भ्रमबालसहकारसुगन्धौ' इत्यादीनां प्रामादिकत्वं दुर्घटवृत्तिकृतोक्तम्। **अल्पाख्यायाम्** । अल्पवाचिनो गन्धस्येकारान्तादेशः स्याद् बहुव्रीहौ। **सूपस्य गन्ध इति** । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। यद्वा फलितार्थकथनमेतत्। सूपो गन्धो यस्मिन्नित्येव विग्रहः। गन्धशब्दस्य विशेषणत्वेऽप्यस्मादेव ज्ञापकात् परनिपातः। **पादस्य** । यद्ययं लोपः समासान्तो न स्यात् 'आदेः परस्य' इत्यादेः स्यात्। शैषिकः कप् च प्रसज्येत, 'शेषाद्विभाषा' इत्यत्र समासान्तापेक्षस्य शेषस्याश्रयणादत आह—**समासान्त इति** । कथं

स्थानिद्वारेणायं समासान्तः। व्याघ्रस्येव पादावस्य व्याघ्रपात्। अहस्त्यादिभ्यः किम्–हस्तिपादः। कुसूलपादः। **८७८ कुम्भपदीषु च।** (५-४-१३९) कुम्भपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियाम्। 'पादः पत्' (सू ४१४) कुम्भपदी। स्त्रियाम् किम्–कुम्भपादः। **८७९ संख्यासुपूर्वस्य।** (५-४-१४०) पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ। द्विपात्। सुपात्। **८८० वयसि दन्तस्य दतृ।** (५-४-१४१) संख्यासुपूर्वस्य दन्तस्य दतृ इत्यादेशः स्याद्वयसि। द्विदन्। चतुर्दन्। षड् दन्ता अस्य षोडन्। सुदन्, सुदती। वयसि किम्–द्विदन्तः करी। सुदन्तो (नटः)। **८८१ स्त्रियां संज्ञा-**

स्थानीति। व्याघ्रस्येवेति। फलितार्थकथनमिदम्। व्याघ्रपादाविव पादावस्येति विग्रहः। 'सप्तम्युपमानपूर्वपदस्य–' इति समासः। **कुम्भपदीषु च।** कुम्भपदीष्विति बहुवचननिर्देशाद् गणपाठाच्च कुम्भपद्यादिग्रहणमिति भावः। **ङीप् चेति।** 'पादोऽन्यतरस्याम्' इति विकल्पापवाद इति भावः। **स्त्रियामिति।** कुम्भपद्यादीनां स्त्रीलिङ्गानामेव गणे पाठादिति भावः। **कुम्भपदीति।** कुम्भस्येव पादावस्येति विग्रहः। 'पादस्य लोपोऽहस्त्यादिभ्यः' इति लोपे सिद्धे तदनुवादेन नित्यं ङीबर्थं वचनम्। **संख्यासुपूर्वस्य।** शेषपूरणेन सूत्रं व्याचष्टे—**पादस्येति।** उपमानात् परत्वाभावादप्राप्तौ वचनम्। **द्विपादिति।** द्वौ पादावस्येति विग्रहः। **सुपादिति।** शोभनौ पादावस्येति विग्रहः। **वयसि दन्तस्य दतृ। द्विदन्निति।** द्वौ दन्तौ यस्येति विग्रहः। शिशुत्वं गम्यते। दन्तस्य दत्रादेशः। ऋकार इत्। उगित्त्वान्नुम्। सुलोपः। संयोगान्तलोपः। तस्यासिद्धत्वादुपधादीर्घो न। **चतुर्दन्निति।** चत्वारो दन्ता यस्येति विग्रहः। दत्रादि पूर्ववत्। **षोडन्निति।** षड् दन्ता यस्येति विग्रहः। दत्रादि पूर्ववत्। 'षष उत्त्वम्–' इति ष्टुत्वोत्त्वे। **सुदन्निति।** सु शोभना दन्ताः समस्ता जाता यस्येति विग्रहः। वयोविशेषावगतये समस्तस्य निवेशः। **सुदतीति।**

पुनरभावो भावस्यावयवः स्यात्तत्राह—**स्थानिद्वारेणेति।** वचनबलादौपचारिकमवयवत्वं गृह्यत इति भावः। **कुम्भपदीषु च।** बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चाप्यर्थावगतिरित्यभिप्रेत्याह—**कुम्भपद्यादिष्विति।** इह गणे कुम्भपदी एकपदी जालपदीत्येवं समुदाया एव पठ्यन्ते, तस्य च प्रयोजनं विषयविशेषपरिग्रह इत्याशयेनाह—**स्त्रियामिति।** यच्चेहोपमानपूर्वं संख्यापूर्वं च पठ्यते तस्य सिद्धे लोपे नित्यङीबर्थं वचनम्, तेन 'पादोऽन्यतरस्याम्' इति विकल्पो न भवति। **द्विदन्निति।** द्वौ दन्तावस्य जातौ। शिशुत्वावस्था त्विह गम्यते। 'उगिदचाम्–' इति नुम्। संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। **षोडन्निति।** 'षष उत्वं दतृदशधा–' इत्यनेनोत्वष्टुत्वे।

याम्। (५-४-१४३) दन्तस्य दतृ स्यात्समासान्तो बहुव्रीहौ। अयोदती। फालदती। संज्ञायां किम्—समदन्ती। **८८२ विभाषा श्यावारोकाभ्याम्।** (५-४-१४४) दन्तस्य दतृ स्याद्बहुव्रीहौ। श्यावदन्, श्यावदन्तः। अरोकदन्, अरोकदन्तः। **८८३ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च।** (५-४-१४५) एभ्यो दन्तस्य दतृ वा। कुड्मलाग्रदन्, कुड्मलाग्रदन्तः। **८८४ ककुदस्यावस्थायां लोपः।** (५-४-१४६) अजातककुत्। पूर्णककुत्। **८८५ त्रिककुत्पर्वते।** (५-४-१४७) त्रीणि ककुदान्यस्य त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदोऽन्यः। **८८६ उद्विभ्यां काकुदस्य।** (५-४-१४८) लोपः स्यात्। उत्काकुत्। विकाकुत्। काकुदं तालु। **८८७ पूर्णाद्विभाषा।**

शोभना दन्ताः समस्ता यस्या इति विग्रहः। दत्रादेशः। 'उगितश्च' इति ङीप्। **द्विदन्तः करीति।** हस्तिनः सर्वदा द्विदन्तत्वेन वयोविशेषानवगतिरिति भावः। **स्त्रियां संज्ञायाम्।** शेषपूरणेन सूत्रं व्याचष्टे—**दन्तस्येति।** वयोविशेषानवगमेऽपि प्राप्त्यर्थमिदम्। **अयोदतीति।** **फालदतीति।** संज्ञाविशेषाविमौ। **समदन्तीति।** समा दन्ता यस्या इति विग्रहः। 'नासिकोदर—' इति ङीष्। **विभाषा श्यावारोकाभ्याम्।** शेषपूरणेन सूत्रं व्याचष्टे—**दन्तस्येति।** **श्यावदन्निति।** श्यावा धूम्रा दन्ता यस्येति विग्रहः। 'श्यावः स्यात् कपिशो धूम्र' इत्यमरः। **अरोकदन्निति।** अरोका अदीप्ताः अच्छिद्रा वा दन्ता यस्येति विग्रहः। **अग्रान्त।** अग्रः अग्रशब्दोऽन्तेऽवसाने यस्य स अग्रान्त इत्यभिप्रेत्योदाहरति—**कुड्मलाग्रदन्निति।** कुड्मलानां मुकुलानां अग्राणि तानीव दन्ता यस्येति विग्रहः। शुद्धदन्, शुद्धदन्तः। शुभ्रदन्, शुभ्रदन्तः। वृषदन्, वृषदन्तः। वराहदन्, वराहदन्तः। **ककुदस्य।** अवस्थायां गम्यमानायां ककुदस्य लोपः स्याद् बहुव्रीहावित्यर्थः। आहारकालादिकृतोऽवयवानामुपचयोऽपचयश्चावस्थेत्युच्यते। बलीवर्ददोर्मूलगतो बाह्ये उद्भूतोऽवयवः ककुदम्। **अजातककुदिति।** अजातं ककुदमस्येति विग्रहः। बाल इत्यर्थः। **पूर्णककुदिति।** पूर्णं ककुदमस्येति विग्रहः। युवेत्यर्थः। **त्रिककुत् पर्वते।** पर्वतविशेषे गम्य इत्यर्थः। त्रिककुदिति कृताकारलोपो निपात्यते। त्रीणि ककुदानि शृङ्गाणि यस्येत्यर्थः। **उद्विभ्यां काकुदस्य।** **लोप इति।**

सुदतीति। 'उगितश्च' इति ङीप्। **समदन्तीति।** 'नासिकोदर—' इत्यादिना ङीष्। **श्यावदान्निति।** 'श्यावः स्यात्कपिशः' इत्यमरः। **अरोदकन्निति।** अरोका अच्छिद्रा दन्ता यस्य सः। **अग्रान्त।** इहानुक्तसमुच्चयार्थश्चकारस्तेन मूषिकदन्निति सिद्ध्यतीत्याहुः। —**अजातेति।** अजातं ककुदमस्येति विग्रहः। इह हि बाल्या-

(५-४-१४९) पूर्णकाकुत्, पूर्णकाकुदः। ८८८ सुहृद्दुर्हृदौ मित्रामित्रयोः। (५-४-१५०) सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रम्। दुर्हृदमित्रः। अन्यत्र सुहृदयः, दुर्हृदयः। ८८९ उरःप्रभृतिभ्यः कप्। (५-४-१५१) व्यूढोरस्कः। प्रियसर्पिष्कः। इह पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीः इत्येकवचनान्तानि पठ्यन्ते। द्विवचनबहुवचनान्तेभ्यस्तु 'शेषाद्विभाषा' (सू ८९१) इति विकल्पेन कप्। द्विपुमान् द्विपुंस्कः। 'अर्थान्नञः' (ग १४९)। अनर्थकम्। नञः किम्—अपार्थम्, अपार्थकम्। ८९० इनः स्त्रियाम्।

उद्भ्यां परस्य काकुदस्य लोपः स्यात् बहुव्रीहावित्यर्थः। उत्काकुदिति। उन्नतं काकुदं यस्येति विग्रहः। काकुदशब्दं व्याचष्टे—काकुदं तात्विति। पूर्णाद्विभाषा। पूर्णात् परस्य काकुदस्य लोपो वा स्यादित्यर्थः। पूर्णं काकुदं यस्येति विग्रहः। सुहृद्दुर्हृदौ। यथासंख्यमभिप्रेत्योदाहरति—सुहृन्मित्रमिति। सु शोभनं हृदयं यस्येति विग्रहः। उरःप्रभृतिभ्यः कप्। बहुव्रीहौ समासान्तः तद्धित इति विशेषः। तद्धितत्वात् ककारस्य नेत्संज्ञा। व्यूढोरस्क इति। व्यूढं विशालम् उरो वक्षो यस्येति विग्रहः। कप्। 'सोऽपदादौ' इति सत्वम्। प्रियसर्पिष्क इति। प्रियं सर्पिः यस्येति विग्रहः। कप्। 'इणः षः' इति षत्वम्। ननु द्वौ पुमांसौ यस्य स द्विपुमानित्यनुपपन्नम्। उरःप्रभृतिषु पुमानिति पुंस्शब्दस्य पाठादित्यत आह—इहेति। गणे अविभक्तिकानामेव पाठः। इह तु केषांचिदेकवचनान्तानामेव पाठस्तद्विवक्षार्थ इति भावः। द्विपुंस्क इति। 'संपुंकानाम्—' इति सः। अर्थान्नञ इति। गण

वस्था गम्यते। उरःप्रभृतिभ्यः कप्। उरः प्रभृत्यन्ताद्बहुव्रीहेः कप् स्यात्। 'समासार्थोत्तरपदान्ताः समासान्ताः' इति पक्षे तु बहुव्रीहेश्चरमावयवेभ्य उरःप्रभृतिभ्यः कबिति व्याख्येयम्। तद्धितत्वात्कस्य नेत्वम्। व्यूढोरस्क इति। व्यूढं विशालमुरो यस्य सः। 'सोऽपदादौ' इति विसर्जनीयस्य सः। प्रियसर्पिष्क इति। 'इणः षः' इति विसर्गस्य षत्वम्। एकवचनान्तानीति। 'नद्यृतश्च' इति सिद्धे लक्ष्मीशब्दपाठस्त्विह एकवचनान्तलक्ष्मीशब्दावयवकबहुव्रीहेरेव नित्यं कप्। अन्यत्र 'शेषात्—' इति विकल्प एवेति नियमार्थः। तेन 'अकृशमकृशलक्ष्मीश्चेतसा शंसितं सः' इति भारविप्रयोगः सिद्धः। अकृशा लक्ष्म्यो यस्येति विग्रहः। यत्तु प्राचोक्तं—'नद्यृतश्च' इति कप् बहुलक्ष्मीक इति। तदयुक्तम्। संख्यावाचिबहुशब्दस्यैकवचनान्तत्वाभावात्प्रकृतनियमेन वारितत्वात्। बह्वी अधिका लक्ष्मी यस्येति विग्रहे वैपुल्यवाचिन एकवचनान्तत्वसंभवेऽपि विशेषविधेर्बलीयस्त्वेन 'उरःप्रभृतिभ्यः कप्' इत्येव वक्तुमुचितत्वात्। यदा तु 'नियमशास्त्राणां निषेधमुखेन प्रवृत्तिः' इत्याश्रीयते तदा प्राचो-

(५-४-१५२) बहुदण्डिका नगरी । 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (प १७) बहुवाग्मिका । स्त्रियां किम्—बहुदण्डी, बहुदण्डिको ग्रामः । ८६१ शेषाद्विभाषा । (५-४-१५४) अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुव्रीहेः कब्वा स्यात् । महायशस्कः, महायशाः । अनुक्त—इत्यादि किम्—व्याघ्रपात् । सुगन्धिः । प्रियपथः । शेषाधिकारस्थात् किम्—

सूत्रम् । नञ्परो योऽर्थशब्दस्तदन्ताद् बहुव्रीहेः कप् स्यादिति तदर्थः । **अनर्थकमिति** । अविद्यमानोऽर्थो यस्येति विग्रहः । **अपार्थम्, अपार्थकमिति** । अपगतोऽर्थो यस्मादिति विग्रहः । अत्र नञ्पूर्वकत्वाभावाद् न नित्यः कबिति भावः । **इनः स्त्रियाम्** । इन्नन्तात् कप् स्याद् बहुव्रीहावित्यर्थः । **बहुदण्डिका नगरीति** । दण्डः अस्यास्तीति दण्डी, 'अत इनिठनौ' इति इनिः । बहवो दण्डिनो यस्याम् इति विग्रहः । **बहुवाग्मिकेति** । वागस्यास्तीति वाग्मी । 'वाचो ग्मिनिः' इति ग्मिनिप्रत्ययः । नकारादिकार उच्चारणार्थः । तद्धितत्वाद् गकारस्य नेत्संज्ञा, चकारस्य कुत्वम्, जश्त्वम्, वाग्मीति रूपम् । बहवो वाग्मिनो यस्यामिति विग्रहः । अत्रेनः अनर्थकत्वेऽपि 'अनिनस्मन्—' इति वचनात्तदन्तस्याप्यत्र ग्रहणमिति भावः । **बहुदण्डी, बहुदण्डिको ग्राम इति** । बहवो दण्डिनो यस्मिन्निति विग्रहः । अत्र समासस्यास्त्रीलिङ्गत्वान्न नित्यः कबिति भावः । **शेषाद्विभाषा** । इतः पूर्वं येभ्यः समासान्ता विहिताः, तेभ्योऽन्यः शेषः । तदाह—**अनुक्तसमासान्तादिति । शेषाधिकारास्थादिति** । शेषादित्यनेन शेषाधिकारस्थादित्यपि विवक्षितमिति भावः । **महायशस्क इति** । महद् यशो यस्येति विग्रहः । 'आन्महतः—' इत्यात्त्वे, कपि, 'सोऽपदादौ' इति सत्वम् । **महायशा इति** । कबभावे 'अत्वसन्तस्य—' इति दीर्घः । **व्याघ्रपादिति** । 'पादस्य लोपोऽहस्त्यादिभ्यः' इत्युक्तसमासान्तोऽयम्, स्थानिद्वारा लोपस्यापि समासान्तत्वात् । **सुगन्धिरिति** ।

क्तमपि सम्यगेवेति ज्ञेयम् । **अर्थान्नञ इति** । गणसूत्रमिदम् । **अनर्थकेनापीति** । कथं तर्हि 'सुपथी नगरी' इति हलन्तेषूक्तम्, कपोऽत्र दुर्वारत्वात् । न च 'न पूजनात्' इत्यनेन 'ऋक्पूरब्धूः—'इत्यस्येव कपोऽपि निषेधः शङ्क्यः, षचः प्राचीनानामेव स निषेध इति वक्ष्यमाणत्वात् । कप्प्रत्ययस्य षच उत्तरत्वात् । सत्यम्, समासान्तविधेरनित्यत्वात्साधुरिति समाधेयम् । 'युवोरनाकौ' इति सूत्रे सुपथीति भाष्याच्चेत्युक्तम् । **बहुवाग्मिकेति** । 'वाचो ग्मिनिः' । **शेषाद्वि** । यद्यत्र प्रागुक्तकब्मात्रापेक्षः शेषः स्यात् तर्हि व्याघ्रपात्सुगन्धिरित्यादावपि स्यात् । अतः समासान्तापेक्षः शेष इह गृह्यत इत्याह—**अनुक्तसमासान्तादिति । व्याघ्रपादिति** । स्थानिद्वारा लोपोऽपि

उपबहवः । उत्तरपूर्वा । सपुत्रः । तन्त्रादिना शेषशब्दोऽर्थद्वयपरः ।
८६२ आपोऽन्यतरस्याम् । (७-४-१५) कप्यावन्तस्य ह्रस्वो वा स्यात् । बहुमालाकः, बहुमालकः । कबभावे बहुमालः । **८६३ न संज्ञायाम्** । (५-४-१५५) 'शेषात्-' (सू ८६१) इति प्राप्तः कप् न स्यात्संज्ञायाम् ।

'गन्धस्येदुत्पूति-' इति कृतसमासान्तोऽयम् । **प्रियपथ इति** । 'ऋक्पूः-' इति कृतसमासान्तोऽयम् । **उपबहव इति** । 'संख्ययाव्यय-' इति बहुव्रीहिरयम्, न शेषाधिकारस्थः । **उत्तरपूर्वेति** । अयमपि 'दिङ्नामान्यन्तराले' इति बहुव्रीहिः, न शेषाधिकारस्थः । **सपुत्र इति** । 'तेन सह-' इत्ययमपि बहुव्रीहिः, न शेषाधिकारस्थः । ननु सकृदुच्चारिताच्छेषशब्दात् कथमर्थद्वयलाभ इत्यत आह—**तन्त्रादिनेति** । आदिना आवृत्तिसंग्रहः । एकमनेकोपयोगि तन्त्रम् । उच्चारयित्रा तन्त्रेणोच्चारितात् शब्दाद् आवृत्त्या बोध इति बोध्यम् । 'श्वेतो धावति' इत्यादौ सकृदुच्चारणेऽपि 'श्वा इतो धावति, श्वेतगुणको धावति' इत्येवमनेकार्थबोधदर्शनादिति भावः । **आपोऽन्यतरस्याम्** । **कपीति** । 'न कपि' इत्यतस्तदनुवृत्तेरिति भावः । **आबन्तस्येति** । प्रत्ययग्रहणपरिभाषया लब्धमिदम् । **ह्रस्वो वेति** । 'शृदृप्रां ह्रस्वो वा' इत्यतः तदनुवृत्तेरिति भावः । 'न कपि' इति नित्यं निषेधे प्राप्ते विकल्पार्थमिदं वचनम् । **बहुमालाक इति** । बह्व्यो माला यस्येति विग्रहः । ह्रस्वपक्षे बहुमालक इति भवति । कपो वैकल्पिकत्वात् पक्षे बहुमालः । सर्वत्र 'स्त्रियाः पुंवत्-' इति पुंवत्वम् । **न संज्ञायाम्** । **शेषादिति प्राप्त इति** । 'अनन्तरस्य-' इति न्यायात् 'शेषाद्विभाषा' इति विहितस्य कप एवायं निषेधः, न तु व्यवहितस्य 'नद्यृ-

---

समासान्ता इत्युक्तम् । **सुगन्धिरिति** । 'गन्धस्येत्-' इत्यादिना इत्समासान्तः । **प्रियपथ इति** । 'ऋक्पूः-' इत्यप्प्रत्ययः समासान्तः । **उपबहव इति** । 'संख्ययाव्यया-' इत्यादिना समासः । **उत्तरपूर्वेति** । 'दिङ्नामा-' इत्यादिना समासः । **सपुत्र इति** । 'तेन सहेति-' इत्यादिना समासः । अयं भावः—'शेषो बहुव्रीहिः' इत्यतः शेषपदम् 'अनेकमन्यपदार्थे' इत्येतस्मिन्नेव सूत्रेऽनुवर्तते, 'संख्ययाव्ययासन्ना-' इत्यादिषु च निवर्तते । तथा च शेषाधिकारस्थत्वाभावादुपबहव इत्यादिषु कप्प्रत्ययो नेति । एवं च 'अनेकमन्यपदार्थे' इति सूत्रात्पृथक् 'संख्ययाव्ययासन्ना-' इत्यादीनामारम्भः कबभावार्थमप्यावश्यक इति स्थितम् । ननु सकृदुच्चरितस्य शेषशब्दस्यानुक्तसमासान्तपरत्वं शेषाधिकारस्थपरत्वं च कथमित्यत आह—**तन्त्रादिनेति** । 'अर्थभेदेन शब्दभेदः' 'सत्यप्यर्थभेदे शब्दस्याभेदः' इति मतद्वयम् । आद्ये आवृत्तिः । द्वितीये तन्त्रमिति विवेकः । यत्तु वदन्ति—'प्रतिपदोक्ताः समासान्ताः स्वविषये बाधका भवन्ति'

विश्वे देवा अस्य विश्वदेवः । ८६४ ईयसश्च । (५-४-१५६) ईयसन्तोत्तरपदान्न कप् । बहवः श्रेयांसोऽस्य बहुश्रेयान् । 'गोस्त्रियोः-' (सू ६५६) इति ह्रस्वत्वे प्राप्ते । 'ईयसो बहुव्रीहेर्नेति वाच्यम्' (वा ६६६) बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी । बहुव्रीहेः किम्-अतिश्रेयसिः । ८६५ वन्दिते भ्रातुः । (५-४-१५७) पूजितेऽर्थे यो भ्रातृशब्दस्तदन्तान्न कप् स्यात् । प्रशस्तो भ्राता यस्य प्रशस्तभ्राता, सुभ्राता । 'न पूजनात्' (सू ६९४) इति निषेधस्तु 'बहुव्रीहौ सक्थ्यक्ष्णोः-' (सू ८५२) इत्यतः प्रागेवेति वक्ष्यते । वन्दिते किम्-मूर्खभ्रातृकः । ८६६ नाडीतन्त्र्योः स्वाङ्गे । (५-४-१५६) स्वाङ्गे यौ

तश्च' इत्यादिकप इति भावः । **विश्वे देवा अस्येति** । अत्र संज्ञायां समासस्य नित्यत्वाल् लौकिकविग्रहप्रदर्शनं चिन्त्यमेव । **ईयसश्च** । बहुश्रेयसीशब्दे श्रेयसीशब्दस्यैव प्रत्ययग्रहणपरिभाषया ईयसन्तत्वादाह—**ईयसन्तोत्तरपदादिति** । बहुव्रीहिणा उत्तरपदादित्याक्षिप्यत इति भावः । **न कबिति** । 'न संज्ञेयसोः' इति वक्तव्ये पृथग्योगकरणाद् नित्यस्य वैकल्पिकस्य च कपोऽयं निषेध इति भावः । **श्रेयांस इति** । अतिशयेन प्रशस्ता इत्यर्थः । 'द्विवचनविभज्य-' इति ईयसुन् । 'प्रशस्यस्य श्रः' इति श्रः, 'आद्गुणः' इति गुणः । **बहुश्रेयानिति** । शैषिकः कब्निषिध्यते । **ह्रस्वत्वे प्राप्त इति** । बह्व्यः श्रेयस्यो यस्येति बहुव्रीहिः । तत्र श्रेयसीशब्दस्योपसर्जनस्त्रीप्रत्ययान्तत्वाद् 'गोस्त्रियोः-' इति ह्रस्वत्वे प्राप्ते इत्यर्थः । **ईयसो बहुव्रीहेरिति** । ईयसन्ताद् बहुव्रीहेः परस्य स्त्रीप्रत्ययस्य ह्रस्वो नेति वाच्यमित्यर्थः । **बहुश्रेयसीति** । 'नद्यृतश्च' इति नित्यः कबिह निषिध्यते, लिङ्गविशिष्टपरिभाषया ईयस्ग्रहणेन स्त्रीप्रत्ययान्तश्रेयसीशब्दस्यापि ग्रहणादिति भावः । **बहुव्रीहेः किमिति** । 'ईयसो बहुव्रीहेः-' इत्यत्रेति शेषः । **अतिश्रेयसिरिति** । श्रेयसीमतिक्रान्त इति तत्पुरुषोऽयमिति भावः । **वन्दिते भ्रातुः । पूजितेऽर्थ इति** । 'वदि अभिवादनस्तुत्योः' इत्युभयार्थकवदिधातोरिह उभयसाधारणपूजार्थकत्वमाश्रीयत इति भावः । **प्रशस्तभ्रातेति** । 'नद्यृतश्च' इति प्राप्तः कबिह निषिध्यते । **सुभ्रातेति** । सु शोभनो भ्राता यस्य स इति विग्रहः । अत्रापि 'नद्यृतश्च' इति प्राप्तस्य कपो निषेधः । ननु 'न पूजनात्' इत्येव निषेधे सिद्धे किमर्थमिदमित्यत आह—**न पूजनादिति । प्रागेवेति** । एवं च

तत्किमनुक्तसमासान्तपरेण शेषग्रहणेनेति । तन्न । 'ऋक्पूः-' इत्यादीनां समासान्तरे चरितार्थतया प्रियपथ इत्यादौ परेण कपा बाधापत्तेः । **ईयसश्च** । नित्यो वैकल्पिकश्च कप् सर्वोऽपि निषिध्यते । **बहुश्रेयानिति** । अतिशयेन प्रशस्यः श्रेयान् । 'द्विवचनविभज्योप-' इतीयसुन् । 'प्रशस्यस्य श्रः' । 'शेषाद्विभाषा' इति कप्प्राप्तः । **बहुश्रेय-**

नाडीतन्त्रीशब्दौ तदन्तात्कप् न स्यात् । बहुनाडिः कायः । बहुतन्त्रीर्ग्रीवा । बहुतन्त्रीर्धमनी । स्त्रीप्रत्ययान्तत्वाभावाद्ध्रस्वो न । स्वाङ्गे किम्–बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा । ८९७ **निष्प्रवाणिश्च** । (५-४-१६०) कबभावोऽत्र निपात्यते । प्रपूर्वाद्वयतेर्ल्युट् । प्रवाणी तन्तुवायशलाका । निर्गता प्रवाण्यस्य निष्प्रवाणिः पटः, समाप्तवानः, नव इत्यर्थः । ८९८ **सप्तमीविशेषणे बहुव्रीहौ** । (२-२-३५) सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् । कण्ठेकालः । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । चित्रगुः । 'सर्वनामसंख्ययो-

---

'नद्यृतश्च' इत्यादिकप: तेन निषेधाप्राप्तौ इदं वचनमिति भावः । **नाडीतन्त्र्योः स्वाङ्गे । बहुनाडिः काय इति** । प्राणिस्थत्वात् स्वाङ्गत्वसूचनाय काय इति विशेष्यम् । उपसर्जनह्रस्वः । 'नद्यृतश्च' इति प्राप्तः कब् न भवति । **बहुतन्त्रीर्ग्रीवेति** । बह्व्यस्तन्त्र्यो यस्या इति विग्रहः । वीणातन्तुषु तन्त्रीशब्दस्य प्रसिद्धत्वाद् आह— **बहुतन्त्रीर्धमनीति** । बहुतन्त्रीशब्दे 'गोस्त्रियोः-' इति ह्रस्वमाशङ्क्याह—**स्त्रीप्रत्ययान्तत्वाभावादिति** । 'अवितृस्तृतन्त्रीभ्य ईः' इत्यौणादिकस्य 'स्त्रियाम्' इत्यधिकारेऽविहितत्वादिति भावः । **निष्प्रवाणिश्च । प्रपूर्वादिति** । 'वेञ् तन्तुसंताने' इत्यस्मात् प्रपूर्वात् 'करणाधिकरणयोश्च' इत्यधिकरणे ल्युट् । प्रोयते अस्यामिति प्रवाणी । 'पूर्वपदात् संज्ञायाम्–' इति णत्वम् । **समाप्तवान इति** । समाप्तं वानं वानक्रिया यस्येति विग्रहः । अत्र शैषिककबभावो निपात्यते । **सप्तमीविशेषणे** । 'उपसर्जनं पूर्वम्' इत्यतः पूर्वमित्यनुवर्तते । प्रत्ययग्रहणपरिभाषया सप्तमीति तदन्तग्रहणम् । तदाह—**सप्तम्यन्तमिति । कण्ठेकाल इति** । कण्ठे तिष्ठतीति कण्ठेस्थः, स कालो यस्येति विग्रहः । सुपीति योगविभागात् कः । 'सप्तम्युपमानपूर्वपदस्य' इति बहुव्रीहिसमासः स्थशब्दलोपश्च' इति 'अनेकमन्यपदार्थे' इति सूत्रभाष्ये स्पष्टम् । 'अमूर्धमस्तकात्–' इति सप्तम्या अलुक् । **अत एवेति** । यद्यपि कण्ठेस्थशब्दः प्रथमान्त एवात्र बहुव्रीहौ पूर्वपदम्, तस्य कालशब्देन सामानाधिकरण्यमस्त्येवेति कथं सप्तमीग्रहणं व्यधिकरणपदबहुव्रीहिज्ञापकम् । किं च विशेषणत्वादेव सिद्धे किं वा सप्तमी ग्रहणेन । तथापि यदा स्थपदमनादृत्य कण्ठे इत्यस्याधिकरणत्वं तस्य च कालरूपे उत्तरपदार्थे उपसंक्रमः, तदा कण्ठे इत्यस्याप्रथमान्तत्वाद्

सीति । 'नद्यृतश्च' इति नित्यं प्राप्तः कब् लिङ्गविशिष्टपरिभाषया 'ईयसश्च' इति प्रतिषिध्यते । **बहुनाडिरिति** । उपसर्जनह्रस्वः । **स्त्रीप्रत्ययान्तत्वाभावादिति** । 'अवितृस्तृतन्त्रिभ्यः' इतीप्रत्ययस्य 'स्त्रियाम्' इत्यधिकारे अविहितत्वादिति भावः । **सप्तमीविशेषणे** । यदा कण्ठे किंचिदस्तीति ज्ञायते तस्य विशेषणं काल इति, तदेदं

रुपसंख्यानम्' (वा १४१६) सर्वश्वेतः । त्रिशुक्लः । 'मिथोऽनयोः समासे संख्या पूर्वं शब्दपरविप्रतिषेधात्' (वा २०४४) । अन्यः । संख्याया अल्पीयस्याः' (वा १४१७) द्वित्राः । द्वन्द्वेऽपि । द्वादश । 'वा प्रियस्य' (वा १४२०) ।

बहुव्रीहेरप्रसक्तेः तत्र सप्तम्यन्तस्य पूर्वनिपातविधिरभित्तिचित्रायितः स्यात् । ततश्च सप्तमीग्रहणाद् अप्रथमान्तोऽपि बहुव्रीहिः क्वचिदस्तीति विज्ञायत इति योज्यम् । तेन 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादि सिद्धम् । **चित्रगुरिति** । उभयोरपि प्रथमानिर्दिष्टत्वेन विग्रहे नियतविभक्तिकत्वेन चान्यतरस्य पूर्वनिपाते प्राप्ते उत्तरपदविशेषणस्यैव पूर्वनिपातार्थं विशेषणग्रहणमिति भावः। **सर्वनामसंख्ययोरिति**। बहुव्रीहौ पूर्वनिपातस्येति शेषः । **सर्वश्वेत इति** । सर्वः श्वेतो यस्येति विग्रहः । उभयोरपि गुणवचनत्वेन विशेषणविशेष्यभावे कामचराद् अन्यतरस्य पूर्वनिपाते प्राप्ते सर्वनामत्वात् सर्वशब्दस्यैव पूर्वनिपातः । उपसर्जनत्वेऽपि भूतपूर्वगत्या सर्वनामत्वम् । **त्रिशुक्ल इति** । त्रयः शुक्ला यस्येति विग्रहः । उभयोरपि कामचारेण पूर्वनिपाते प्राप्ते संख्यात्वात् त्रिशब्दस्यैव पूर्वनिपातः । द्विशुक्ल इत्यत्र तु सर्वनामत्वादेव सिद्धम् । ननु द्वौ अन्यौ यस्य द्व्यन्य इति बहुव्रीहौ सर्वनामसंख्ययोरन्यतरस्य पाक्षिकः पूर्वनिपातः स्यादित्यत आह—**मिथोऽनयोरिति** । सर्वनामसंख्ययोरित्यर्थः । **संख्या पूर्वमिति** । प्रयोज्येति शेषः । **शब्दपरेति** । एकस्मिन्नेव सूत्रे सर्वनामसंख्ययोः समासोपात्तत्वेऽपि सर्वनामसंख्याशब्दयोः संख्याशब्दस्य पाठतः परत्वमादाय विप्रतिषेधसूत्रप्रवृत्तेरित्यर्थः । **संख्याया अल्पीयस्या इति** । न्यूनाधिकसंख्यावाचकशब्दानां समासे न्यूनसंख्यायाःपूर्वं प्रयोग इति वक्तव्यमित्यर्थः । **द्वित्रा इति** । द्वौ

सप्तमीग्रहणम् । अन्यदा तु तेन विनापि विशेषणत्वादेव सिद्धम् । **चित्रगुरिति** । न च 'उपसर्जनं पूर्वम्' इत्येवेदं सिध्यतीति वाच्यम् , 'बहुव्रीहौ सप्तमी' इत्युक्ते तक्रकौण्डिन्यन्यायेनोपसर्जनपूर्वत्वस्य बाधापत्तेरतो विशेषणग्रहणं कृतम् । **सर्वनामेति** । कथं तर्हि 'तः परो यस्मात्स तपरः' इति कथं च 'जहत्स्वार्था वृत्तिः' इति । इह हि जहत्स्वं पदं यं स जहत्स्वः, **सोऽर्थो** यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिः। तथा च स्वपरशब्दयोः सर्वनामत्वात्पूर्वनिपातेन भाव्यमिति चेत्—अत्राहुः—सूत्रभाष्यप्रयोगात्स्वपरशब्दयोर्न पूर्वनिपातः, राजदन्तादित्वाद्वा सिद्धमिति । **द्विशुक्ल इति** । यद्यपि सर्वनामत्वेनैव द्विशब्दस्य पूर्वनिपातत्वं सिध्यति, तथापि त्रिशुक्ल इत्यादि सिद्धये वार्तिके संख्याग्रहणं कृतम् । ननु संख्याया अल्पाच्तरत्वेन 'संख्यासर्वनाम्नोः' इति वाच्ये विपरीतोच्चारणमयुक्तमित्याशङ्कयाह—**मिथोऽनयोरिति** । विपरीतोच्चारणमेवात्र

---

१ बहुत्र मूले 'द्विशुक्लः' इत्येव पाठः ।

गुडप्रियः, प्रियगुडः। 'गड्वादेः परा सप्तमी' (वा १४२१) गडुकण्ठः। क्वचिन्न। वहेगडुः। ८६६ निष्ठा। (२-२-३६) निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्। कृतकृत्यः। 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' (वा १४२२)। सारङ्गजग्धी। मासजाता। सुखजाता। प्रायिकं चेदम्। कृतकटः। पीतोदकः।

वा त्रयो वेति विग्रहे 'संख्ययाऽव्यय–' इति बहुव्रीहिः। ननु 'द्वन्द्वे घि' इत्यतो द्वन्द्वे इत्यनुवृत्तौ 'अल्पाच्तरम्' इति सूत्रभाष्येऽस्य वार्तिकस्य पाठाद् बहुव्रीहौ कथमस्य प्रवृत्तिरित्यत आह—**द्वन्द्वेऽपीति**। इदं च वार्तिकं द्वन्द्वेऽद्वन्द्वेऽपि प्रवर्तत इत्यर्थः। **द्वादशेति**। द्वौ च दश च इति द्वन्द्वः। तत्पुरुषे तु शतानां विंशतिः विंशतिशतमित्युदाहार्यम्। 'तदस्मिन्नधिकमिति दशान्ताड्डः' इति सूत्रभाष्ये सहस्राणां शतम् इत्यर्थे शतसहस्रमिति भाष्यकैयटयोः प्रयोगोऽत्र मानमिति शब्देन्दुशेखरे स्थितम्। **वा प्रियस्येति**। बहुव्रीहौ पूर्वं प्रयोगो वक्तव्य इत्यर्थः। **गड्वादेः परा सप्तमीति**। बहुव्रीहौ योज्येति वक्तव्यमिति शेषः। **गडुकण्ठ इति**। गडुः कण्ठे यस्येति विग्रहः। गडुर्नाम ग्रीवादिगतो दुर्मांसगोलः। असंज्ञात्वाद् 'हलदन्तात्–' इत्यलुङ् न। **क्वचिन्नेति**। व्याख्यानमेवात्र शरणम्। **वहेगडुरिति**। वहः स्कन्धः, तस्मिन् गडुर्यस्येति विग्रहः। **निष्ठा। निष्ठान्तमिति**। 'क्तक्तवतू निष्ठा' इति वक्ष्यति। तदन्तमित्यर्थः। **कृतकृत्य इति**। कृतं कृत्यं येनेति विग्रहः। उभयोरपि क्रियाशब्दत्वाद् विशेषणत्वे कामचाराद् अन्यतरस्य पूर्वनिपाते प्राप्ते निष्ठान्तस्य पूर्वनिपातः। **जातिकालेति**। 'जातिकालसुखादिभ्योऽनाच्छादनात् क्तः' इति स्वरविधिना ज्ञापितमिदमिति भाष्ये स्पष्टम्। जातिपूर्वस्योदाहरणमाह— **सारङ्गजग्धीति**। सारङ्गो जग्धो भक्षितो यया इति विग्रहः। 'अस्वाङ्गपूर्वपदाद्वा' इति ङीष्। कालपूर्वस्योदाहरति—**मासजातेति**। मासो जातो यस्या इति विग्रहः, टाप्। सुखपूर्वस्योदाहरति—**सुखजातेति**। सुखं जातं यस्या इति विग्रहः। **प्रायिकमिति**। व्याख्यानमेवात्र शरणम्। **कृतकट इति**। कृतः कटो येनेति विग्रहः। अत्र कटत्वस्य जातित्वेऽपि न कृतशब्दस्य परनिपातः। **पीतोदक इति**। पीतम् उदकं येनेति विग्रहः। उदकत्वस्य जातित्वेऽपि न पीतशब्दस्य परनिपातः।

लिङ्गमिति भावः। **अल्पीयस्या इति**। अल्पार्थवाचिकाया इत्यर्थः। **गड्वादेरिति**। आदिशब्दः प्रकारवाची। तेन पद्मं नाभौ यस्य पद्मनाभः। ऊर्णा नाभौ यस्य, 'ङ्यापोः–' इति ह्रस्वः, ऊर्णनाभ इति सिद्ध्यतीत्याहुः। **जातिकालेति**। एतच्च 'जातिकालसुखादिभ्योऽनाच्छादनात्' इत्यनेन ज्ञापितमिति भावः। **सारङ्गजग्धीति**। सारङ्गो जग्धो यया सा। 'अस्वाङ्गपूर्वपदाद्वा' इति ङीप्। कथं तर्हि

९०० वाऽऽहिताग्न्यादिषु । (२-२-३७) आहिताग्निः । अग्न्याहितः । आकृतिगणोऽयम् । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' (वा १४२५)। अस्युद्यतः। दण्डपाणिः । क्वचिन्न । विवृतासिः ।

इति बहुव्रीहिसमासप्रकरणम् ।

अथ द्वन्द्वसमासप्रकरणम् । २० ।

९०१ चार्थे द्वन्द्वः । (२-२-२९) अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । परस्परनिर-

---

वाऽऽहिताग्न्यादिषु । निष्ठायाः पूर्व प्रयोग इति शेषः । **आहिताग्निरिति** । आहिता आधानेन संस्कृता अग्नयो येनेति विग्रहः । **प्रहरणार्थेभ्य इति** । आयुधार्थेभ्य इत्यर्थः । निष्ठायामुदाहरति—**अस्युद्यत इति** । असिः उद्यतो येनेति विग्रहः । सप्तम्या उदाहरति—**दण्डपाणिरिति** । दण्डः पाणौ यस्येति विग्रहः । 'निष्ठा' इत्यस्य 'सप्तमीविशेषणे-' इत्यस्य चायमपवादः । **क्वचिन्नेति** । व्याख्यानमेवात्र शरणम् । **विवृतासिरिति** । विवृतः कोशान्निष्कासितः असिर्येनेति विग्रहः । एवंजातीयान्याहिताग्न्यादित्वकल्पनया समाधेयानीत्याहुः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां बहुव्रीहिसमासनिरूपणम् ।

अथ द्वन्द्वसमासनिरूपणम्—**चार्थे द्वन्द्वः** । 'सुबामन्त्रिते' इत्यतः सुबिति, 'अनेकमन्यपदार्थे' इत्यतः अनेकमिति चानुवर्तते । समास इति विभाषा इति चाधिकृतम् । तदाह—**अनेकमित्यादिना** । कश्चार्थ इत्यत आह—**समुच्चयेति** । 'चान्वाचयसमाहारेतरेतरसमुच्चये' इत्यमरः । तत्र समुच्चयं निर्वक्ति—**परस्परेति**।

'चारुस्मितश्चारुहसितः' इत्यादि । अत्राहुः—'नपुंसके भावे क्तः' इति क्तस्य न पूर्वनिपातः, निष्ठाशब्देन विहितस्यैवेह ग्रहणादिति । **क्वचिन्नेति** । आहिताग्न्यादित्वकल्पनादनभिधानाद्वेति भावः ।

इति तत्त्वबोधिनीव्याख्यायां बहुव्रीहिप्रकरणम् ।

चार्थे द्वन्द्वः । 'अनेकमन्यपदार्थे' इत्यतोऽनेकमित्यनुवर्तते 'सुबामन्त्रिते-' इत्यस्मात्सुबपि । 'समासः' इति 'विभाषा' इति चाधिक्रियत एव, तदाह—**अनेकं**

पेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्व इति समुच्चये, भिक्षामट गां चानय इत्यन्वाचये च न समासोऽसामर्थ्यात्। धवखदिरौ।

एकस्मिन्निति। एकस्मिन् क्रियापदे आवृत्ते एकस्य असमस्यमानपदस्य प्रथममन्वयः, तदनन्तरमन्यस्यान्वयो यत्र, तत्र समुच्चयः चार्थ इत्यर्थः। यथा—ईश्वरं गुरुं च भजस्व इति। तत्र हि चशब्दयोगाद् गुरोः ईश्वरसापेक्षत्वम्, न त्वीश्वरस्य गुरुसापेक्षत्वम्, तस्य चकारयोगाभावात्। अत एवात्र एक एव चशब्दः प्रयुज्यते। एवं च ईश्वरं च भजस्व गुरुं च भजस्व इति वाक्यद्वयं पर्यवस्यति। अथान्वाचयं लक्षयति—**अन्यतरस्येति**। यत्रान्यतरस्य पदस्यैकस्मिन् क्रियापदे आनुषङ्गिकत्वेन परार्थप्रवृत्तिविषयत्वेनान्वयः, इतरस्य तु पदस्यान्यस्मिन् क्रियापदे उद्देश्यत्वेनान्वयश्च तत्रान्वाचयश्चार्थ इत्यर्थः। यथा-भिक्षामट गां चानय इति। 'अट गतौ'। भिक्षामटनेन प्राप्नुहीत्यर्थः। भिक्षामट, तदा गौः संगता चेत् तामप्यानय, न तु गवानयने ऐदंपर्येण प्रयतितव्यमिति तात्पर्यार्थः। इतरेतरयोगं लक्षयति—**मिलितानामिति**। परस्परापेक्षितानां समुदितानामेकस्मिन् क्रियापदेऽन्वयो यत्र, तत्रेतरेतरयोगः परस्परसाहचर्यं चार्थः प्रत्येतव्य इत्यर्थः। यथा धवश्च खदिरश्च धवखदिराविति। अत्र परस्परसाहित्यसूचनाय चकारद्वयप्रयोगः। अथ समाहारं लक्षयति—**समूहः समाहार इति**। परस्परसाहित्यमित्यर्थः। यथा संज्ञापरिभाषयोः समूहः संज्ञापरिभाषमिति। तत्रेतरेतरयोगद्वन्द्वे साहित्यं द्रव्यविशेषणम्, यथा धवखदिरौ छिन्धीति, समुदिताविति गम्यते। समाहारद्वन्द्वे तु समूहो विशेष्यम्, यथा संज्ञापरिभाषमिति। तयोः समूह इति गम्यते। संज्ञापरिभाषमधीते इत्यादौ समूहस्य क्रियान्वयस्तु समूहिद्वारा बोध्य इत्यलम्। **तत्रेति**। तेषु चार्थेषु समुच्चयेऽन्वाचये च न द्वन्द्वसमास इत्यन्वयः। **ईश्वरं गुरुं च भजस्वेति**। समुच्चयोदाहरणमिदम्। भिक्षामट गां चानयेत्युदाहरणं चानुपदमेव व्याख्यातम्। **असामर्थ्यादिति**। ईश्वरं गुरुं च इत्यत्रोक्तरीत्या

सुबन्तमित्यादि। चार्था इति। चशब्दद्योत्या इत्यर्थः। **एकस्मिन्निति**। भजनादावित्यर्थः। **ईश्वरं गुरुं च भजस्वेति**। क्रियायां द्रव्ययोः समुच्चयोऽयम्। तथा राज्ञो गजश्चाश्वश्चेति द्रव्ये द्रव्ययोः समुच्चयः। पटः शुक्लो रक्तश्चेति द्रव्ये गुणयोः। रक्तः पटः कुण्डलं चेति गुणे द्रव्ययोरित्यूह्यम्। **भिक्षामट गां चानयेति**। अत्र त्वदर्शनाद्गामनानयन्नपि भिक्षामटत्येव। अनटंस्तु भिक्षां न गामानयति। तथा अटन्नपि नान्विष्य गामानयति। अतो भिक्षाटनस्यैव प्राधान्यं गवानयनस्य त्वानुषङ्गिकता। **असामर्थ्यादिति**। एकार्थीभावाभावादित्यर्थः। तथाहि बहुव्रीहिघटकपदानां कर्मा-

संज्ञापरिभाषम्। अनेकोक्तेर्होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः। **९०२ राजदन्तादिषु परम्। (२-२-३१)** एषु

ईश्वरगुरुशब्दयोः परस्परनिरपेक्षयोरावृत्ते भजस्वेति पदे क्रमेणान्वयात् परस्परमन्वयाभावादसामर्थ्यम्। भिक्षामट गां चानय इत्यत्र तु भिक्षागवोरटने आनयने च क्रमेण परस्परवार्तानभिज्ञयोरेवान्वयात् परस्परान्वयाभावादसामर्थ्यं स्पष्टमेव। ततश्च इतरेतरयोगसमाहारयोरेव चार्थयोः परस्परसाहित्यसत्त्वात् समर्थत्वेन द्वन्द्वसमासः। विस्तरस्तु मञ्जूषायां द्रष्टव्यः। इतरेतरयोगमुदाहरति—**धवखदिराविति**। धवश्च खदिरश्चेति द्वन्द्वः। धवो वृक्षविशेषः, खदिरः प्रसिद्धः, तौ समुदिताविति बोधः। समाहारे तूदाहरति—**संज्ञेति**। संज्ञा च परिभाषा च तयोः समाहार इति विग्रहः। समाहारस्यैकत्वादेकवचनम्। 'स नपुंसकम्' इति नपुंसकत्वम्। ननु 'चार्थे द्वन्द्वः' इत्यत्र 'सुप्सुपा' इत्यनुवृत्त्यैव धवखदिरावित्यादिसिद्धेरनेकग्रहणानुवृत्तिर्व्यर्थेत्यत आह—**अनेकोक्तेरिति**। **होतृपोत्रिति**। होता च पोता च नेष्टा च उद्गाता च इति विग्रहे बहूनामपि द्वन्द्वार्थमनेकग्रहणमिति भावः। 'आनङ्ऋतो द्वन्द्वे' इति नेष्टृशब्दस्यैव उत्तरपदपरकत्वाद् आनङ्; न तु होतृपोतृशब्दयोरपि, उत्तरपदस्य मध्यमपदव्यवहितत्वेन होतृपोतृशब्दयोरुत्तरपदपरकत्वाभावात्। ननु तर्हि होतापोतानेष्टोद्गातार इति कथमित्यत आह—**द्वयोरिति**। होता च पोता चेति द्वयोर्द्वन्द्वः। होतृशब्दस्य आनङ्। ततश्च नेष्टा च उद्गाता चेति द्वयोर्द्वन्द्वः। नेष्टृशब्दस्यानङ्। ततो होतापोतारौ च नेष्टोद्गातारौ चेति द्वन्द्वद्वयगर्भो द्वन्द्वः। तत्र नेष्टोद्गातृशब्दे उत्तरपदे होतापोतृशब्दस्य आनङित्यर्थः। आनङि ङकार इत्। ङित्त्वादन्तादेशः। अकार उच्चारणार्थः। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नस्य लोपः। नेष्टोद्गातृशब्दे

दन्तर्भावेणैव द्वन्द्वघटकपदानां चार्थान्तर्भावेण एकार्थीभाव आवश्यकः। 'समर्थः पदविधिः' इति परिभाषितत्वात् 'चार्थे द्वन्द्वः' इत्युक्तेश्च। न चेतरेतरान्वये परस्परनिरपेक्षाणामेकार्थीभावः संभवति, येन समुच्चयान्वाचययावेकार्थीभावान्तर्भूतौ स्याताम्। ततश्चेतरेतरयोगे समाहारे च परस्परसाहित्यसत्त्वात्समासो भवति, न तु समुच्चयान्वाचययोः। परं त्वितरेतरयोगे साहित्यं विशेषणं द्रव्यं तु विशेष्यम्, समाहारे तु साहित्यं प्रधानं द्रव्यं विशेषणमिति विवेक्तव्यम्। ननु नीलोत्पलमित्यादौ चशब्दान्तर्भावेण विग्रहदर्शनादेकार्थीभावसत्त्वाच्च द्वन्द्वो दुर्वारः स्यात्। मैवम्, 'विशेषणं विशेष्येण—' इति सामानाधिकरण्ये विहितया तत्पुरुषसंज्ञया द्वन्द्वसंज्ञाया बाधात्। तस्यास्त्वसामानाधिकरण्ये सावकाशत्वात्। सामानाधिकरण्याभावविवक्षायां तु 'प्रमाणप्रमेय' इत्यादाविव नीलोत्पलादावपि द्वन्द्वे इष्टापत्तिरेव। **होतृपोत्रिति**। उत्तरपदपरत्वा-

पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः। 'धर्मादिष्वनियमः' (वा १४१८) अर्थधर्मौ, धर्मार्थौ। दम्पती, जम्पती, जायापती। जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते। आकृतिगणोऽयम्। **९०३ द्वन्द्वे घि। (२-२-३२)** द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ। 'अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे' (वा १४१०) हरिगुरुहराः-हरिहरगुरवः। ९०४ अजाद्यदन्तम्।

आद्गुणश्च। **राजदन्तादिषु परम्।** 'उपसर्जनं पूर्वम्' इत्यनुवर्तते। तदाह— **पर्ष्विति।** राजदन्तादिष्वित्यर्थः। पूर्वप्रयोगार्हमित्यतः प्राग् उपसर्जनमिति शेषः। **राजदन्त इति।** दन्तशब्दस्य षष्ठीतत्पुरुषेऽप्रधानतयोपसर्जनत्वेऽपि परनिपातः। इह गणे राजदन्ताग्रेवणादिशब्दास्तत्पुरुषाः, विष्वक्सेनार्जुनादयो द्वन्द्वाश्च पठिताः, अतो द्वन्द्वप्रकरणे तदुपन्यासः। विष्वक्सेनार्जुनावित्यत्र 'अजाद्यदन्तम्' इत्यर्जुनशब्दस्य पूर्वनिपाते प्राप्ते परनिपातः। **धर्मादिष्वनियम इति।** गणसूत्रमिदम्। अन्यतरस्य पूर्वनिपात इत्यर्थः। **अर्थधर्माविति।** अजाद्यदन्तशब्दस्य पूर्वनिपातनियमे प्राप्ते तदनियमो वक्तव्य इत्यर्थः। **निपात्यत इति।** पाक्षिको राजदन्तादिगण इत्यर्थः। पत्युरभ्यर्हितत्वेऽपि परनिपातश्च। **आकृतिगणोऽयमिति।** वृत्तौ तु कृत्स्नोऽयं गणः पठितः। **द्वन्द्वे घि।** पूर्वमित्यनुवर्तते। तदाह—**पूर्वं स्यादिति। हरिहराविति।** हरिशब्दस्य घित्वात् पूर्वनिपातः। ननु हरिहरगुरव इत्यत्र गुरुशब्दस्यापि घित्वात् पूर्वनिपातः स्यादित्यत आह—**अनेकेति।** अनेकस्य घिसंज्ञकपदस्य द्वन्द्वप्राप्तौ सत्यामेकस्य घिसंज्ञकस्य पूर्वनिपातनियमः। शेषेऽन्यस्मिन् घिसंज्ञकपदविषये पूर्वनिपातस्य विकल्प इत्यर्थः। इदम् 'अल्पाच्तरम्' इति सूत्रे भाष्ये स्पष्टम्। जातिपक्षे तावद् आकृतिं पुरस्कृत्य सर्वासु व्यक्तिषु तत्तच्छास्त्राणि सकृदेव प्रवर्तन्ते, सकृच्छ्रुतत्वात्। न तु प्रतिव्यक्ति, तथा सति प्रतिव्यक्त्यावृत्तिप्रसङ्गात्। ततश्च अनेकघिसंज्ञकसमवाये एकस्य घिसंज्ञकस्य पूर्वनिपाते सति पुनः शास्त्रं न प्रवर्तते, सकृत्प्रवृत्त्यैव शास्त्रस्य शान्ताकाङ्क्षत्वात्। व्यक्तिपक्षस्तु नेहाश्रीयते, लक्ष्यानुरोधादित्याहुः। **हरिहरगुरव इति।** हरगुरुशब्दयोर्न नियम इति भावः।

भावादनयोरानङ् न। **राजदन्तादिषु।** इह द्वन्द्वतत्पुरुषयोः पाठेऽपि 'अर्थधर्मौ' इत्याद्यभिप्रायेणास्य द्वन्द्वेषूपन्यासः। **द्वन्द्वे घि।** 'अनेकम्-' इति सर्वेषामेव प्रथमानिर्दिष्टत्वेनोपसर्जनत्वाविशेषादनियमप्राप्तावयमारम्भः। यत्र त्वनेकं घ्यन्तं तत्र द्वयोरपि पूर्वनिपातनियमः स्यादत आह—**अनेकप्राप्तावेकत्रेति।** अत्र व्याचख्युः— आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते, न प्रतिव्यक्त्यावृत्त्या। तत्रैकस्य पूर्वनिपाते सति जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते। व्यक्तिपक्षस्त्विह नाश्रीयते लक्ष्या-

(२-२-३३) इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ । बहुष्वनियमः। अश्वरथेन्द्राः, इन्द्राश्वरथाः। 'घ्यन्तादजाद्यदन्तं विप्रतिषेधेन' (वा १४२६) इन्द्राग्नी। ९०५ अल्पाच्तरम्। (२-२-३४) शिवकेशवौ । 'ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण' (वा १४२१) हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ । समाक्षराणां किम्-ग्रीष्मवसन्तौ । 'लघ्वक्षरं पूर्वम्' (वा १४१३) कुशकाशम्। 'अभ्यर्हितं च' (वा १४१२) । तापसपर्वतौ । 'वर्णानामानुपूर्व्येण' (वा १४१९)

अजाद्यदन्तम्। इदमिति। अजादित्वे सत्यदन्तमित्यर्थः। **ईशकृष्णाविति**। अत्र कृष्णस्यादन्तत्वेऽप्यजादित्वाभावान्न पूर्वनिपातः। **बहुष्वनियम इति**। वक्तव्य इति शेषः। ननु इन्द्राग्नी इत्यत्र घित्वादग्निशब्दस्य पूर्वनिपातः किं न स्यादित्यत आह—**घ्यन्तादिति**। घ्यन्तशब्देन 'द्वन्द्वे घि' इति सूत्रं विवक्षितम्। ल्यब्लोपे पञ्चमी। विप्रतिषेधसूत्रेण 'द्वन्द्वे घि' इत्येतद् बाधित्वा 'अजाद्यदन्तम्' इति प्रवर्तत इत्यर्थः। **अल्पाच्तरम्**। अल्पः अल्पसंख्यः अच् यस्य तदल्पाच्, तदेवाल्पाच्तरम्। अत एव निपातनात् स्वार्थे तरप्, कुत्वाभावश्च। अल्पसंख्याच्कं पदं द्वन्द्वे पूर्वं प्रयोज्यमित्यर्थः। **शिवकेशवाविति**। हरिहरयोरन्यतरोत्कर्षवादस्य पाषण्डवादत्वादिति भावः। यदि तु 'द्विवचनविभज्य–' इत्यतिशयार्थे तरप् स्यात्, तदा धवखदिरपलाशा इत्यत्र बहुषु न स्यादिति प्राञ्चः। शब्देन्दुशेखरे तु प्रकर्षार्थक एवायं तरप् इति स्थितम्। **ऋतुनक्षत्राणामिति**। समानसंख्याच्कानाम् ऋतूनां नक्षत्राणां च द्वन्द्वे आनुपूर्व्येण क्रमेण निपातो वक्तव्य इत्यर्थः। **हेमन्तशिशिरवसन्ता इति**। त्रयाणामृतूनामानुपूर्व्यं लोकप्रसिद्धम्। एवं कृत्तिकादिनक्षत्राणामपि। **ग्रीष्मवसन्ताविति**। विषमाक्षरत्वान्न वसन्तस्य पूर्वनिपातः। किंतु अल्पाच्त्वाद् ग्रीष्मस्य पूर्वनिपातः। **लघ्वक्षरं पूर्वम्**। लघु अक्षरमच् यस्य तद् द्वन्द्वे पूर्वं प्रयोज्यमिति वक्तव्यमित्यर्थः। **कुशकाशमिति**। समाहारद्वन्द्वोऽयम्। **अभ्यर्हितं चेति**। श्रेष्ठः पूर्वः प्रयोज्य इति वक्तव्यमित्यर्थः। **तापसपर्वताविति**।

नुरोधादिति। **हरिहरगुरव इति**। हरगुरुशब्दयोर्न नियमः प्रवर्तत इति भावः। **अजाद्यदन्तम्**। 'समुद्राभ्राद्घः' 'लक्षणहेत्वोः क्रियायाः' इत्यादिनिर्देशादनित्यमिदं प्रकरणम्। तेन 'स सौष्ठवौदार्यविशेषशालिनीम्' इति भारविप्रयोगः संगच्छते। **अल्पाच्तरम्**। अतएव निपातनात् स्वार्थे तरप् कुत्वचुत्वयोरभावश्च। यदि तु प्रकर्षे तरप् स्यात् तदा द्वयोरेव नियमः स्यात्। द्विवचनान्तोपपदत्वविषय एव तरपो विधानात्। ततश्च धवखदिरपलाशा इत्यादौ बहुषु नियमो न स्यात्। **ऋतुनक्षत्राणामिति**। ऋतूनामानुपूर्व्यं प्रादुर्भावकृतं नक्षत्राणां तूदयकृतं च। **अभ्यर्हितं चेति**।

ब्राह्मणक्षत्रियविट्शूद्राः । 'भ्रातुर्ज्यायसः' (वा १३१६) युधिष्ठिरार्जुनौ ।
९०६ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । (२-४-२) एषां द्वन्द्व एकवत्स्यात् ।
पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । समाहारस्यैकत्वादेकत्वे

पर्वतस्य स्थावरजन्मतया तापसस्य तदपेक्षया अभ्यर्हितत्वं बोध्यम । भाष्ये तु मातापितराविस्युदाहृतम् । 'गर्भधारणपोषाभ्यां पितुर्माता गरीयसी' इत्यादिस्मृतेरिति तदाशयः । **वर्णानामानुपूर्व्येणेति** । एषां क्रमेण पूर्वनिपातः । 'ब्रह्मक्षत्रियविट्शूद्रा वर्णाः' इत्यमरः । तेषामानुपूर्व्यं तु 'प्रजापतिरकामयत प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत' इत्यादितैत्तिरीयब्राह्मणादिसिद्धम् । **भ्रातुर्ज्यायस इति** । ज्येष्ठभ्रातुः पूर्वनिपात इत्यर्थः । अत्र 'द्वन्द्वे घि' 'अजाद्यदन्तम्' इति विधिद्वयम् 'अल्पाच्तरम्' 'लघ्वक्षरं पूर्वम्' 'ऋतुनक्षत्राणाम्' 'अभ्यर्हितं च' 'भ्रातुर्ज्यायसः' इति विधिभिः परत्वाद् बाध्यते । भाष्ये तु सर्वत एवाभ्यर्हितं पूर्वनिपातमिति मतान्तरं स्थितम् । **द्वन्द्वश्च प्राणि** । प्राणितूर्यसेनाङ्गानीति द्वन्द्वगर्भषष्ठीसमासः । द्वन्द्वान्ते श्रूयमाणः अङ्गशब्दः प्रत्येकं संबध्यते इत्यभिप्रेत्य आह—**एषामिति** । प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां चेत्यर्थः । **द्वन्द्व इति** । समाहारद्वन्द्व इत्यर्थः । 'द्विगुरेकवचनम्' इति पूर्वसूत्रे 'समाहारग्रहणं कर्तव्यम्' इति वार्तिकस्यात्राप्यनुवृत्तेः । **एकवदिति** । एकवचनमित्यनुवर्तते । एकं वक्तीत्येकवचनम् । कर्तरि ल्युट् । सामान्याभिप्रायं नपुंसकम् । **पाणिपादमिति** । पाण्योः पादयोश्च समाहार इति विग्रहः । अत्र समाहारे एकवत्त्वं 'स नपुंसकम्' इति नपुंसकत्वं च । पाण्योः

'वासुदेवार्जुनाभ्यां वुन्' इति निर्देशेनेदं ज्ञाप्यत इति चतुर्थे भाष्यम् । 'अल्पाच्तरम्' 'अजाद्यदन्तम्' इति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकुर्वन् ज्ञापयति सर्वतोऽभ्यर्हितं पूर्वमिति तत्रैव सूत्रे वक्ष्यते । **युधिष्ठिरार्जुनाविति** । इन्द्रपुत्रत्वाद्विष्णोरंशत्वाच्छूरत्वाद्वा अभ्यर्हितत्वमर्जुनेऽप्यस्तीति न तेन नियमः सिध्यतीति भावः । **द्वन्द्वश्च प्राणि** । प्राणितूर्यसेनानामङ्गानीति बहुवचनान्तेनाङ्गशब्देन षष्ठीसमासः । अङ्गशब्दश्च प्रत्येकमन्वेति । तेन प्राण्यङ्गानां प्राण्यङ्गैरेव, तूर्याङ्गानां तूर्याङ्गैरेव, सेनाङ्गानां सेनाङ्गैरेव यो द्वन्द्वः स एकवद्भवति, न तु व्यतिरेकेण । तेनेह न–मार्दङ्गिकाश्वारोहौ । अत्र प्राणिसेनयोरङ्गं नामावयवः । तूर्यस्य त्वङ्गं नामोपकारकं बोध्यम् । **एषां द्वन्द्व इति** । प्राण्यङ्गानां द्वन्द्वः, तूर्याङ्गानां द्वन्द्वः, सेनाङ्गानां द्वन्द्वः, इत्यर्थः । 'द्विगुरेकवचनम्' इत्यत एकवचनं वर्तते । तत्रैकं वक्तीति व्युत्पत्त्या एकत्वविशिष्टः समाहाररूपो योऽर्थस्तत्प्रतिपादकः स्यादित्यर्थं मन्वानः फलितमाह—**एकवत्स्यादिति । पाणिपादमिति** । यद्यप्यत्र 'जातिरप्राणिनाम्' इत्येव सिद्धम्, तथापि

सिद्धे नियमार्थं प्रकरणम् । प्राण्यङ्गादीनां समाहार एव यथा स्यात् ।
६०७ अनुवादे चरणानाम् । (२-४-३) चरणानां द्वन्द्व एकवत्स्यात्सिद्धस्योपन्यासे । 'स्थेणोर्लुङीति वक्तव्यम्' (वा १५३२-१५३६) । उदगात्कठका-

---

पादयोश्च प्राण्यवयवत्वात् प्राण्यङ्गोदाहरणमिदम् । अथ तूर्याङ्गद्वन्द्वे उदाहरति— **मार्दङ्गिकपाणविकमिति** । मृदङ्गपणवशब्दौ वाद्यविशेषपरौ । इह तु तद्वादनेऽपि वर्तेते । मृदङ्गवादनं शिल्पमस्येत्यर्थे 'शिल्पम्' इति ठक् । मार्दङ्गिकपाणविकयोः समाहार इति विग्रहः । तूर्याङ्गत्वादेकवचनम् । तूर्याङ्गत्वं च तद्वादकतया बोध्यम् । 'स नपुंसकम्' इति नपुंसकत्वम् । सेनाङ्गद्वन्द्वे उदाहरति—**रथिकाश्वारोहमिति** । रथेन चरन्तीति रथिकाः । 'पर्पादिभ्यः ष्ठन्' । रथिकानामश्वारोहाणां च समाहार इति विग्रहः । सेनावयवत्वादेकवत्त्वम् । पूर्ववन्नपुंसकत्वम् । ननु समाहारद्वन्द्वे समाहारस्य विशेष्यत्वात् तस्य चैकत्वादिदं सूत्रं व्यर्थमित्यत आह—**समाहारस्यैकत्वादिति** । **समाहार एवेति** । न त्वितरेतरयोगः । एषां द्वन्द्वनियमार्थं सूत्रमित्यर्थः । एवमुत्तरसूत्राण्यपि समाहार एवेति नियमार्थानि । न चेतरेतरयोगद्वन्द्वे एषामेकवत्त्वविधानार्थमिदं सूत्रमस्तु । तथा च पाणिपाद इति पुँल्लिङ्गमेकवचनान्तं रूपं फलमिति वाच्यम्, 'समाहारग्रहणं कर्तव्यम्' इति पूर्वसूत्रस्थवार्तिकस्यात्रानुवृत्तेः, एकवद्भावप्रकरणेऽस्मिन् सर्वत्र समाहारद्वन्द्वानामेव भाष्ये उदाहृतत्वाच्च । न च रथिकमार्दङ्गिकावित्यादावतिप्रसङ्गः शङ्क्यः, प्राण्यङ्गानां परस्परद्वन्द्व एकवत्, तूर्याङ्गानां परस्परद्वन्द्व एकवत्, सेनाङ्गानां परस्परद्वन्द्व एकवदित्यभ्युपगमादिति भाष्ये स्पष्टम् । **अनुवादे चरणानाम्** । **चरणानां द्वन्द्व एकवदिति** । शाखाध्येतृविशेषाश्चरणाः । तद्वाचिनां परस्परद्वन्द्व एकवदित्यर्थः । अनुवाद इत्येतद्व्याचष्टे—**सिद्धस्योपन्यास इति** । अवगतार्थस्य

द्रव्यप्राधान्येऽपि भवत्विति प्राणिग्रहणमित्येके प्राणिपणवाविति व्यतिकरे मा भूदिति नियमार्थं वचनमित्यन्ये । **मार्दङ्गिकेति** । मृदङ्गवादनं शिल्पमस्येत्यर्थे 'तदस्य शिल्पम्' इति ठक् । एवं पाणविक इत्यपि । **रथिकाश्वारोहमिति** । रथेन चरन्तीति रथिकाः । 'पर्पादिभ्यः ष्ठन्' इति ष्ठन् । ते चाश्वारोहाश्च तेषां समाहारः । ननु 'चार्थे द्वन्द्वः' इत्यनेन समाहारद्वन्द्वः सिद्धः, तस्य चैकत्वादेकवचनमपि सिद्धमिति किमनेनेत्याशङ्क्याह—**नियमार्थमिति** । **समाहार एवेति** । समाहारे प्राण्यङ्गादीनामेवेति विपरीतनियमोऽत्र न भवति, 'तिष्यपुनर्वस्वोः—' इति सूत्रे बहुवचनग्रहणात् । तद्धि समाहारे एकवचनस्य द्विवचनं मा भूदिति कृतम् । अन्यथा तिष्यपुनर्वसूइति न स्यादिति । एवं च 'द्वन्द्वश्च प्राणितूर्य—' इति प्रकरणबहिर्भूतानामपि समाहारद्वन्द्वो भवत्येव, तेन 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति पठ्यमानं नापूर्वं वचनमिति ज्ञेयम् ।

लापम्, प्रत्यष्ठात्कठकौथुमम्। ६०८ अध्वर्युक्रतुरनपुंसकम्। (२-४-४) यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात्। अर्काश्वमेधम्। अध्वर्युक्रतुः किम्—इषुवज्रौ, सामवेदे विहितौ। अनपुंसकं किम्—राजसूयवाजपेये, अर्धर्चादी। ६०९ अध्ययनतोऽविप्रकृष्टाख्यानाम्।

प्रतिपादन इत्यर्थे। **स्थेणोरिति**। लुङीति प्रत्येकमन्वयाभिप्रायमेकवचनम्। लुङन्ते स्थाधातौ लुङन्ते इणधातौ च प्रयुज्यमान एव अनुवादे चरणानां द्वन्द्व एकवदिति वक्तव्यमित्यर्थः। **उदगादिति**। प्रादुरभूदित्यर्थः। इणधातोर्लुङि रूपम्। **कठकालापमिति**। कठेन प्रोक्तमधीयत इति कठाः। वैशम्पायनान्तेवासित्वाण्णिनिः। तस्य 'कठचरकात्' इति लुक्। ततोऽध्येतृप्रत्ययस्य 'प्रोक्ताल्लुक्' इति लुक्। कलापिना प्रोक्तमधीयते इति कालापाः। प्रोक्तार्थे 'कलापिनोऽण्'। 'सब्रह्मचारिपीठसर्पि ' इत्यादिना टिलोपः। ततोऽध्येत्रणः 'प्रोक्ताल्लुक्' इति लुक्। कठानां कालापानां च समाहार इति विग्रहः। **प्रत्यष्ठादिति**। प्रतिपूर्वात् स्थाधातोर्लुङि रूपम्। **कठकौथुममिति**। कठेन प्रोक्तमधीयत इति कठाः। कौथुमिना प्रोक्तमधीयत इति कौथुमाः। प्रोक्तेऽर्थे 'तेन प्रोक्तम्' इत्यण्। 'सब्रह्मचारि—' इत्यनेन टिलोपः। ततोऽध्येत्रणो लुक्। कठानां कौथुमानां च समाहार इति विग्रहः। यदा कठा कालापाश्च उदिताः, यदा कठाः कौथुमाश्च प्रतिष्ठिताः, तदा किञ्चिदिदं वक्तव्यमिति कृतसंकेतयोरिदं वाक्यद्वयम्। अत्रोदयप्रतिष्ठयोः पूर्वसिद्धयोरनुवादादेकवत्त्वम्। स्थेणोः किम्? अभूवन् कठकालापाः। लुङि किम्? अतिष्ठन् कठकालापाः। **अध्वर्युक्रतुः**। अध्वर्युशब्दोऽत्राध्वर्युकर्मविधायकयजुर्वेदपरः, तदाह—**यजुर्वेद इति**। **अर्काश्वमेधमिति**। अर्को महाक्रतुः। अश्वमेधो नाम प्रसिद्धः। उभौ यजुर्वेदविहितक्रतू। अर्कस्य चाश्वमेधस्य च समाहार इति विग्रहः। **इषुवज्राविति**। क्रतुविशेषावेतौ न यजुर्वेदविहिताविति भावः। तर्हि कस्मिन् वेदे विहितावित्यत आह—**सामेति**। **राजसूयवाजपेये इति**। एतयोर्यजुर्वेदविहितत्वेऽपि नपुंसकत्वान्नैकवत्त्वमिति भावः। राजसूयवाजपेययोः

चरणानामिति। शाखाध्येतृवाचिनामित्यर्थः। **स्थेणोरिति**। 'ष्ठा गतिनिवृत्तौ' 'इण् गतौ' स्थाप्रकृतिक इणप्रकृतिके लुङन्ते उपपदे सतीत्यर्थः। स्थेणोः किम्, अभूवन् कठकालापाः। लुङि किम्, तिष्ठन्तु कठकालापाः। **उदगादिति**। इह यदा कठेषु कालापेषु च प्रतिष्ठितेषु उदितेषु चावाभ्यां तत्र गन्तव्यमिति संकेतयित्वा तत्संकेतं विस्मृत्यासीनं प्रतीदमुच्यते। कठेन प्रोक्तमधीयते कठाः। वैशम्पायनान्तेवासित्वाण्णिनिः। तस्य 'कठचरकात्—' इति लुक्। अध्येत्रणस्तु 'प्रोक्ताल्लुक्' इति लुक्। 'कलापिनोऽण्' 'सब्रह्मचारी—' इत्याद्युपसंख्यानाट्टिलोपः। **यजुरिति**। सूत्रे

(२-४-५) अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्व एकवत्। पदकक्रमक ।

९१० **जातिरप्राणिनाम्** । (२-४-६) प्राणिवर्जजातिवाचिनां द्वन्द्व एकवत् । धानाशष्कुलि । प्राणिनां तु विट्शूद्राः । द्रव्यजातीयानामेव, नेह—रूपरसौ, गमनाकुञ्चने । जातिप्राधान्य एवायमेकवद्भावः । द्रव्यविशेषविवक्षायां तु बदरा-

---

पुँल्लिङ्गतया प्रसिद्धेराह—**अर्धर्चादी इति** । **अध्ययनतः** । अविप्रकृष्टाख्याना-मिति च्छेदः । अध्ययनत इति तृतीयार्थे तसिः । तदाह—**अध्ययनेन प्रत्यासन्नेति** । संनिकृष्टेत्यर्थः । **पदकक्रमकमिति** । पदान्यधीयते पदकाः । क्रमान् अधीयते क्रमकाः । 'क्रमादिभ्यो वुन्' । पदकानां क्रमकाणां च समाहार इति विग्रहः । पदाध्ययनानन्तरं क्रमाध्ययनमित्यध्ययनगता प्रत्यासत्तिरध्येतर्यारोप्यत इति भावः । पदक्रममिति नोदाहृतम्, 'जातिरप्राणिनाम्' इत्येव सिद्धेः । तदध्येतृत्वे तु न जातिरिति भावः । **जातिरप्राणिनाम्** । जातिरिति षष्ठीबहुवचनस्थाने व्यत्ययेन प्रथमा, जातिवाचिनामित्यर्थः । **धानाशष्कुलीति** । धानाश्च शष्कुल्यश्च तासां समाहार इति विग्रहः । जातिवाचित्वादेकवत्त्वम्, नपुंसकत्वाद्ध्रस्व इति भावः । **विट्शूद्रा इति** । विशश्च शूद्राश्चेति विग्रहः । **द्रव्यजातीयानामेवेति** । अप्राणिनामिति पर्युदासे सति नञिवयुक्तन्यायादिदं लभ्यत इति भावः । **रूपरसाविति** । गुणगतजातिवचनावेतौ । **गमनाकुञ्चने इति** । क्रियागतजातिविशेषवाचिनावेतौ । ननु बदर्याः फलानि बदराणि, आमलक्याः फलान्यामलकानि, 'फले लुक्' इति विकारप्रत्ययस्य लुकि 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक् । फलत्वव्याप्य-

---

अध्वर्युशब्दो यजुर्वेदलक्षक इति भावः । **पदकेति** । पदान्यधीते पदकः । 'क्रमादिभ्यो वुन्' । एवं क्रमकोऽपि । पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टा प्रत्यासत्तिः । अध्ययनतः किम्, पितापुत्रौ । अविप्रकृष्टेति किम्, याज्ञिकनैयायिकौ । **जातिर** । जातिवाच्यवयवकद्वन्द्वोऽपि जातिरित्युपचर्यत इत्याशयेनाह—**जातिवाचिनामिति** । **विट्शूद्रा इति** । जातिप्राधान्येऽपि बहुवचनमुपपद्यते 'जात्याख्यायामेकस्मिन्—' इति विधानात् । तेनात्र ध्रुवविकल्पं नेति भावः । **द्रव्यजातीयानामेवेति** । 'अप्राणिनाम्' इति पर्युदासात् 'नञिवयुक्त—' न्यायेन द्रव्यजातीयानामेकवद्भावो, न तु गुणक्रियाजातीयानामिति भावः । जातिः किम्, नन्दकपाञ्चजन्यौ । संज्ञाशब्दावेतौ । **जातिप्राधान्य एवेति** । एतच्च जातिग्रहणाल्लभ्यम् । अन्यथा पर्युदासेनैव जात्युपसर्जनद्रव्यवाचिनोऽपि ग्रहणोपपत्तौ किं तेनेति भावः । **द्रव्यविशेषेति** । नन्वेवं 'रञ्जिता नु विविधास्तरुशैलाः' इति भारविप्रयोगः संगच्छत एवेति किमिति तरुसहिताः शैला इति मनोरमायां समर्थितमिति चेत्—अत्राहुः—सकलतरुशैलरञ्जनं तत्र

मलकानि। ६११ **विशिष्टलिङ्गो नदीदेशोऽग्रामाः।** (२-४-७) ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्व एकवत्स्यात्। उद्ध्यश्च इरावती च

जातिविशेषवाचिनावेतौ। ततश्च बदराणि चामलकानि च बदरामलकं बदरामलकानीति कथं रूपद्वयम्, 'जातिरप्राणिनाम्' इत्येकवत्त्वस्य नित्यत्वादित्यत आह—**जातिप्राधान्य इति**। व्यक्तिविशेषानादरेण सकलतत्तद्व्यक्त्यनुस्यूतजातिविवक्षायामित्यर्थः। घटमानयेत्यादौ हि घटादिशब्दानामाकृत्यधिकरणन्यायेन घटत्वादिजातिरर्थः। जातेश्च निराश्रयाया उपस्थित्यसंभवाद् आश्रयभूतव्यक्त्याकाङ्क्षायामविशेषात् कृत्स्नाप्युपस्थिता। तत्र घटमानयेत्यादिप्रयोगेषु जातेरतीतानागतवर्तमानकृत्स्नव्यक्तीनां च क्रियान्वयासंभवाद् व्यक्तिविशेषमेव कश्चिदादाय क्रिया विश्राम्यति। इदमेव च जातेः प्राधान्यं तत्तज्जात्याश्रयसकलतत्तद्व्यक्तिबोधकत्वात्मकम्। घटाः शुक्ला इत्यादिप्रयोगेषु पदान्तरसमभिव्याहारादेवशाद्व्यक्तिविशेषानेव जातिरुपस्थापयतीति जातेरप्राधान्यम्, जात्याश्रयसकलव्यक्त्यनुपस्थापकत्वादिति 'तस्यादितः—' इति सूत्रे कैयटे स्पष्टम्। ततश्च फलत्वव्याप्यया बदरत्वजात्या आमलकत्वजात्या चाविशेषात्तदाश्रयसकलव्यक्त्युपस्थितौ बदरामलकमित्येकवद्भावः। **द्रव्यविशेषेति**। आरण्यानि बदरामलकानीत्यादौ फलत्वव्याप्यबदरत्वामलकत्वादिजातिभ्याम् आरण्यत्वादिविशेषितकतिपयव्यक्तीनामेवोपस्थितिः। ग्राम्याणां व्यक्तीनामनुपस्थितेः तयोर्जात्योरप्राधान्याद् नायमेकवद्भाव इत्यर्थः। क्षीरोदके संपृक्ते इत्यन्तादिवत्सूत्रभाष्यप्रयोगोऽत्र लिङ्गमित्याहुः। **विशिष्टलिङ्गो नदीदेशोऽग्रामाः।** अग्रामा इति च्छेदः। व्यत्ययेन बहुत्वे एकवचनम्। विपूर्वकशिषधातुः भेदे वर्तते—

विवक्षितम्, न तु केषांचित्तरुशैलविशेषाणामिति जातिप्राधान्यादेकवद्भावमाशङ्क्य तथोक्तमिति। **बदरामलकानीति**। 'फले लुक्' इति लुक्। 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्यापि लुकि फलत्वजात्युपसर्जनद्रव्यवचनावेतौ। 'विभाषा वृक्षमृग—' इति सूत्रे बदराणि चामलकानि च बदरामलकम्। 'जातिरप्राणिनाम्' इत्येकवद्भाव इति वक्ष्यति, तत्तु नानेन ग्रन्थेन विरुध्यते। फलत्वजातिवाचिनां बहुवचनान्तानामेव द्वन्द्व एकवद्भवति, न त्वेकवचनान्तानां द्वन्द्व इति 'फलसेनावनस्पति—' इति वार्तिकोक्तनियममुपेत्य तत्प्रवृत्तेः। **विशिष्टलिङ्गो**। सूत्रे चत्वारोऽपि शब्दा अवयवधर्मेणावयविद्वन्द्वे वर्तन्त इत्याशयेनाह—**ग्रामेत्यादि**। इह नदीवाचिनां द्वन्द्वः, देशवाचिनां द्वन्द्व इति वाक्यभेदेन व्याख्येयम्। तेन गङ्गाकुरुक्षेत्रे इत्यत्र न भवति। देशशब्देनात्र प्रसिद्ध एव जनपदो गृह्यते, नद्याः पृथग् ग्रहणात्। तेन पर्वतानां न, कैलासश्च गन्धमादनं च कैलासगन्धमादने। नदीदेश इति किम्, कुक्कुटमयूर्यौ। विशिष्टपदस्यार्थमाह—

उद्ध्येरावति । गङ्गा च शोणश्च गङ्गाशोणम् । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । भिन्नलिङ्गानां किम्—गङ्गायमुने, मद्रकेकयाः । अग्रामाः किम्-जाम्बवं नगरम्, शालूकिनी ग्रामः—जाम्बवशालूकिन्यौ । ९१२ क्षुद्रजन्तवः । (२-४-८) एषां समाहार एव द्वन्द्व एकवत्स्यात् । यूकालिक्षम् । आनकुलात्क्षुद्रजन्तवः । ९१३ येषां च विरोधः शाश्वतिकः । (२-४-९) एषां प्राग्वत् । अहिनकुलम् ।

विशेषणं विशेष्येणेत्यादौ यथा । विशिष्टं लिङ्गं येषामिति विग्रहः । तथा च ग्रामवाचकभिन्ना भिन्नलिङ्गका ये नदीवाचिनो ये देशवाचिनश्च तेषां द्वन्द्व एकवत् स्यादिति लभ्यते तदाह—**ग्रामवर्जेति । समाहारे द्वन्द्व इति ।** एकवत्वविधेः फलाभिप्रायमेतत्, अस्यैकवद्भावप्रकरणस्य समाहार एव द्वन्द्व इति नियमार्थताया अनुपदमेवोक्तत्वात् । **उद्ध्यश्चेति ।** उद्ध्यो नाम नदविशेषः, इरावती नाम काचिन्नदी । तयोर्नदीविशेषवाचकत्वादेकवत्त्वम् । नदीशब्देन नदस्यापि ग्रहणाद्, अन्यथा भिन्नलिङ्गत्वासम्भवादिति भावः । **जाम्बवशालूकिन्याविति ।** 'अग्रामाः' इत्यनेन ग्रामावयवकद्वन्द्वपर्युदासो विवक्षितः । अयं च द्वन्द्वो नगरग्रामोभयावयवकोऽपि ग्रामावयवक इति तस्य पर्युदास इति भावः । **क्षुद्रजन्तवः ।** एतेषां द्वन्द्व एकवदित्यर्थः । फलितमाह—**एषां समाहार एव द्वन्द्व इति । यूकालिक्षमिति ।** यूकाश्च लिक्षाश्चेति विग्रहः । केशबहुले शिरःप्रदेशे स्वेदजा जन्तुविशेषा यूका लिक्षाश्च प्रसिद्धाः । एकवत्त्वं नपुंसकह्रस्वत्वं च । **आ नकुलादिति ।** 'नकुलपर्यन्ताः क्षुद्रजन्तवः' इति भाष्यादिति भावः । **येषां च ।** शेषपूरणेन सूत्रं व्याचष्टे—**एषां प्राग्वदिति ।** समाहारद्वन्द्व एकवदित्यर्थः । शश्वदित्यव्ययं सदेत्यर्थे वर्तते ।

भिन्नलिङ्गानामिति । विपूर्वो हि शिषिर्भेदार्थः । अत एव 'विशेषणं विशेष्येण—' इति सूत्रे भेदकं भेद्येनेति व्याख्यातम् । **समाहारे द्वन्द्व एकवत्स्यादिति ।** निष्कर्षाभिप्रायेणेयमुक्तिः । यथाश्रुताभिप्रायेण तु 'द्वन्द्व एकवत्स्यात्' इति केषुचित्सूत्रेषु व्याख्यायत इति ज्ञेयम् । **उद्ध्येरावतीति ।** उद्ध्यो नदः सोऽपि नदीविशेषत्वान्नदीशब्देन गृहीतः, एवं शोणोऽपि । 'अग्रामा इत्यत्र नगरप्रतिषेधो वक्तव्यः । तेन मथुरापाटलिपुत्रम् इत्यत्र निषेधो न भवति, उभयोरपि नगरत्वात् । **क्षुद्र ।** अपचितपरिमाणत्वं क्षुद्रत्वम् । तच्चापेक्षिकत्वादनवस्थितम् । यत्र स्मर्यते—'क्षुद्रजन्तुरनस्थिः स्यादथ वा क्षुद्र एव यः । शतं वा प्रसृतौ येषां केचिदानकुलादपि' इति । तत्र सर्वपक्षसाधारण्येनोदाहरति—**यूकालिक्षमिति । आ नकुलादिति ।** नकुलपर्यन्ता इत्यर्थः । **येषां च विरोधः ।** विरोधो वैरम्, न तु सहानवस्थानम् । तेनेह न—छायातपौ । शश्वदित्यव्ययं त्रैकाल्ये वर्तते, तत्र भवः शाश्वतिकः, 'कालाट्ठञ्' ।

गोव्याघ्रम्, काकोलूकम् इत्यादौ परत्वाद् 'विभाषा वृक्षमृग–' (सू ९१६) इति प्राप्तं चकारेण बाध्यते। ९१४ **शूद्राणामनिरवसितानाम्** ।(२–४–१०) अबहिष्कृतानां शूद्राणां प्राग्वत्। तक्षायस्कारम्। पात्राद्बहिष्कृतानां तु चाण्डालमृतपाः। ९१५ **गवाश्वप्रभृतीनि च** । (२–४–११) यथोच्चारितानि साधूनि

ततो भवार्थे ठञ्। निपातनाद् 'अव्ययानां भमात्रे टिलोपः', 'इसुसुक्तान्तात्कः' इति कादेशश्च न भवति। स्वाभाविक इत्यर्थः। **अहिनकुलमिति**। अहयो नकुलाश्चेति विग्रहः। अनयोः स्वाभाविको विरोधः प्रसिद्धः। विरोधो वैरम्, न तु सहानवस्थितिः। तेन छायातपावित्यत्र न भवति। देवासुरा इत्यत्र तु नायमेकवद्भावः, तद्विरोधस्य कादाचित्कत्वात्। अमृतादिप्रयुक्तः कादाचित्क एव हि तेषां विरोधः, अमृतमथनादिकाले तेषां विरोधाभावात्। ननु 'विभाषा वृक्षमृग–' इति सूत्रे पशुशकुनिद्वन्द्वयोरेकवद्भावविकल्पो वक्ष्यते। तस्य तावद् गोमहिषं गोमहिषाः, हंसचक्रवाकं हंसचक्रवाकाः, इत्यत्रावकाशः। येषां चेत्यस्य अहिनकुलमित्यवकाशः। गोव्याघ्रं काकोलूकमित्यादौ तदुभय प्रसक्तम्। तत्र परत्वाद्वक्ष्यमाणविभाषा प्राप्नोतीत्याशङ्क्याह—**गोव्याघ्रमिति**। **चकारेणेति**। येषां चेति चकारेणेत्यर्थः। एतच्च भाष्ये स्पष्टम्। **शूद्राणाम्**। अनिरवसितशब्दं व्याचष्टे—**अबहिष्कृतानामिति**। 'यैर्भुक्तं पात्र क्षारोदकप्रक्षालनेन संस्कारेणापि न शुध्यति ते निरवसिताः चाण्डालादयः। यैस्तु भुक्तं पात्रं संस्कारेण शुध्यति तेऽनिरवसिताः' इति भाष्ये स्पष्टम्। **शूद्राणामिति**। त्रैवर्णिकेतरः शूद्रशब्देन विवक्षितः, अनिरवसितानामिति लिङ्गात्। **प्राग्वदिति**। समाहारद्वन्द्व एकवदित्यर्थः। **तक्षायस्कारमिति**। तक्षाणश्च अयस्काराश्चेति विग्रहः। अनिरवसितानामित्यस्य प्रयोजनमाह—**पात्रादिति**। **चाण्डालमृतपा इति**। एतद्भुक्तपात्रस्य संस्कारेणापि नास्ति शुद्धिरिति अत एव भाष्याद्विज्ञेयम्।

अतएव निपातनाद् 'इसुसुक्तान्तात्–' इति कादेशः, 'अव्ययानां भमात्रे–' इति टिलोपश्च न। शाश्वतिकः किम्, 'देवासुरैरमृतमम्बुनिधिर्ममन्थे'। तेषां ह्यमृतादिप्रयुक्तः कादाचित्को विरोधो न तु नित्यः, मन्थनप्रवृत्तिकाले तद्विरहात्। **परत्वादिति**। पशुशकुनिद्वन्द्वस्यावकाशो गोमहिषं गोमहिषाः, हंसचक्रवाकं हंसचक्रवाकाः। 'येषां च–' इत्यस्यावकाशो मार्जारमूषकं श्रमणब्राह्मणमित्यादौ ज्ञेयः। **चकारेण बाध्यत इति**। चकारः पुनर्विधायक इति भावः। **शूद्राणाम्**। त्रैवर्णिकेतरमनुष्यपरः शूद्रशब्दो न तु शूद्रत्वजातिपरः, 'अनिरवसितानाम्' इति निषेधात्। **पात्रादिति**। यैर्भुक्ते 'भस्मना शुध्यते कांस्यम्' इत्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुध्यति तेषामित्यर्थः। **गवाश्व**। **यथोच्चारितानीति**। गणपाठे पाणिनिना यथा पठितानि तथैव साधू-

स्युः । गवाश्वम् । दासीदासमित्यादि । ९१६ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् । (२-४-१२) वृक्षादीनां सप्तानां द्वन्द्वः, अश्ववडवेत्यादि द्वन्द्वत्रयं च प्राग्वद्वा । 'वृक्षादौ विशेषाणामेव ग्रहणम्' (वा ९१८) प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । रुरुपृषतम्, रुरुपृषताः । कुशकाशम्, कुशकाशाः । व्रीहियवम्, व्रीहियवाः । दधिघृतम्, दधिघृते । गोम-

धर्मशास्त्रेषु च प्रसिद्धमेतत् । **गवाश्वप्रभृतीनि च** । यथा गणे पठितानि तथैव साधूनीत्यर्थः । **गवाश्वमिति** । गावश्चाश्वाश्चेति विग्रहः । अत्र 'विभाषा वृक्ष–' इति पशुद्वन्द्वत्वाद् विकल्पे प्राप्ते नित्योऽयं विधिः । अत्र 'सर्वत्र विभाषा–' इति प्रकृतिभावे पूर्वरूपे च गो अश्वं गोऽश्वमिति नैकवत्त्वनियमः, यथोच्चारितानीत्युक्तेः, गणे च गवाश्वमित्येव निर्देशात् । गवाश्वादिषु 'यथोच्चारितं द्वन्द्ववृत्तम्' इति वार्तिकमत्र मानम् । **दासीदासमिति** । अत्रैकवत्त्वनियमः । 'पुमान् स्त्रिया' इत्येकशेषस्तु निपातनान्न । **इत्यादीति** । गवाविकं गवैडकमित्यादि वृत्तौ स्पष्टम् । **विभाषा वृक्ष** । द्वन्द्व इत्यनुवृत्तम् । एकापि षष्ठी विषयभेदाद् भिद्यते । वृक्षादिसप्तानामवयवत्वेनान्वयः—वृक्षादीनां द्वन्द्व इति । वृक्षाद्यवयवको द्वन्द्व इति लभ्यते । अश्ववडवादियुगलत्रयस्य त्वभेदेनान्वयः–अश्ववडव, पूर्वापर, अधरोत्तर इत्यात्मको द्वन्द्व इति, तदाह—**वृक्षादीनामिति** । **प्राग्वदिति** । विकल्पेन एकवदित्यर्थः । **वृक्षादाविति** । वृक्षविशेषवाचिनां तृणविशेषवाचिनां धान्यविशेषवाचिनां पशुविशेषवाचिनां चेत्यर्थः । '**स्वं रूपम्–**' इति सूत्रे भाष्यवार्तिकयोस्तथोक्तत्वादिति भावः । तथाच वृक्षाश्च धवाश्चेत्यादौ नायं विधिरिति फलितम् । किं तु 'जातिरप्राणिनाम्' इति नित्यमेवैकवत्त्वम् । तत्र वृक्षाद्यवयवकद्वन्द्वेषु सप्तसु वृक्षद्वन्द्वमुदाहरति—**प्लक्षेति** । प्लक्षाश्च न्यग्रोधाश्चेति विग्रहः । मृगद्वन्द्वमुदाहरति—**रुरुपृषतमिति** । रुरवश्च पृषताश्चेति विग्रहः । तृणद्वन्द्वमुदाहरति—**कुशेति** । कुशाश्च काशाश्चेति विग्रहः । धान्यद्वन्द्वमुदाहरति—**व्रीहीति** । व्रीहयश्च यवाश्चेति विग्रहः । व्यञ्जनद्वन्द्वमुदा-

नीत्यर्थः । तेनाबङः पाक्षिकत्वाद्यदा नावङ् तदा उत्तरसूत्रेण विकल्पो न भवति । गोअश्वम् । 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः' । **गवाश्वमिति** । इह पशुद्वन्द्वे विभाषा प्राप्ता । **दासीदासमिति** । अत्र 'पुमान्स्त्रिया' इत्येकशेषो बाध्यते । **विभाषा । विशेषाणामेवेति** । अयं भावः—वृक्षादिशब्दैः प्रत्येकं द्वन्द्वो विशेष्यते, न चैको वृक्षशब्दो द्वन्द्वः, न च द्वयोः सह प्रयोगः, 'सरूपाणाम्–' इत्येकशेषात् । नापि पर्यायाणां 'विरूपाणामपि समानार्थानाम्' इत्येकशेषात् । नापि

१ 'गवाविकम्' इति क्वचिन्नास्ति । २ क्वचिद् 'गवैलकम्' इति पाठः ।

हिषम्, गोमहिषाः। शुकबकम्, शुकबकाः। अश्ववडवम्, अश्ववडवौ। पूर्वापरम्, पूर्वापरे। अधरोत्तरम्, अधरोत्तरे। 'फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम्' (वा १२४०)। बदराणि चामलकानि च बदरामलकम्। 'जातिरप्राणिनाम्' (सू ९१०) इत्येकवद्भावः।

हरति—**दधीति**। दधि च घृतं चेति विग्रहः। पशुद्वन्द्वमुदाहरति—**गोमहिषमिति**। गावश्च महिषाश्चेति विग्रहः। शकुनिद्वन्द्वमुदाहरति—**शुकेति**। शुकाश्च बकाश्चेति विग्रहः। अश्ववडवादिद्वन्द्वमुदाहरति—**अश्ववडवमिति**। अश्वाश्च वडवाश्चेति विग्रहः। 'पूर्ववदश्ववडवौ' इति अश्ववडवावित्यत्र पूर्वपदवत् पुंलिङ्गता। **फलसेनेति**। एकवद्भावप्रकरणशेषभूतमिदं वार्तिकम्। 'द्वन्द्वश्च प्राणि–' इत्यादिसूत्रैः फलसेनादीनां द्वन्द्व एकवद्भवन् बहुवचनान्तावयवक एव एकवद् भवति, नत्वेकद्विवचनान्तावयवक इत्यर्थः। तत्र फलद्वन्द्वमुदाहरति—**बदराणि चेति**। बदरीफलानि आमलकीफलानि चेत्यर्थः। विकारतद्धितस्य फले लुक्। 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक्। **जातिरिति**। बहुवचनान्तावयवकद्वन्द्वत्वाद् 'जातिरप्राणिनाम्' इत्येकवत्त्वमित्यर्थः। बहुप्रकृतिरेवेत्यस्य प्रयोजनमाह—**नेहेति**। **बदरामलके इति**। बदरं चामलकं चेति विग्रहः। बहुवचनान्तावयवकद्वन्द्वत्वाभावान्न 'जातिरप्राणिनाम्' इत्येकवत्त्वम्। **रथिकाश्वारोहाविति**। अत्र सेनाङ्गत्वेऽपि नैकवत्त्वम्। **प्लक्षन्यग्रोधाविति**। इह वृक्षद्वन्द्वत्वेऽपि 'विभाषा वृक्ष–' इत्येकवत्त्वं न। **इत्यादीति**। रुरुपृषतौ, अत्र मृगद्वन्द्वत्वेऽपि नैकवत्त्वम्। हंसचक्रवाकौ, अत्र शकुनिद्वन्द्वत्वेऽपि नैकवत्त्वम्। यूकालिक्षे, अत्र क्षुद्रजन्तुद्वन्द्वत्वेऽपि नैकवत्त्वम्। व्रीहियवौ, अत्र धान्यद्वन्द्वत्वेऽपि नैकवत्त्वम्। कुशकाशौ, अत्र तृणद्वन्द्वत्वेऽपि नैकवत्त्वम्। ननु 'चार्थे द्वन्द्वः' इत्यनेनेतरेतरयोगसमाहारद्वन्द्वाभ्यामेव एकवत्त्वविकल्पस्य सिद्धत्वाद् 'विभाषा वृक्ष–' इति सूत्रं व्यर्थमित्याशङ्क्याह—**विभाषेत्यादि विकल्पार्थमित्यन्तम्**। वृक्षमृगतृणधान्यव्यञ्जनद्वन्द्वेषु प्लक्षन्यग्रोध रुरुपृषतं कुशकाश व्रीहियवं दधिघृतम् इत्येतेषु 'जातिरप्राणिनाम्' इति

वृक्षश्च भवश्चेत्यादिसामान्यविशेषयोः, अनभिधानात्तत्र द्वन्द्वस्यैवाभावादिति। सर्वप्रकरणशेषतया नियममाह—**फलसेनेत्यादि**। फलसेनादीनां द्वन्द्वो 'विभाषा वृक्षमृग–' इत्यनेन लक्षणान्तरेण वा एकवद्भवन्बहुप्रकृतिरेव एकवद्भवतीत्यर्थः। बहवो वर्तिपदार्थाः, बहुवचनान्ता वा प्रकृतिः कारणं यस्य स बहुप्रकृतिः। **बदराणि चामलकानि चेति**। 'जात्याख्यायामेकस्मिन्–' इति वैकल्पिकं बहुवचनम्। **बदरामलके इति**। जातिप्राधान्येऽप्येकवचनान्तयोर्द्वन्द्व इति नास्त्येकवद्भाव इति भावः।

नेह—बदरामलके, रथिकाश्वारोहौ, प्लक्षन्यग्रोधावित्यादि। 'विभाषा वृक्ष–' (सू ११६) इति सूत्रे येऽप्राणिनस्तेषां ग्रहणं 'जातिरप्राणिनाम्' (सू० ११०) इति नित्ये प्राप्ते विकल्पार्थम्। पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते 'मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वन्द्वः, अन्यैस्तु सहेतरेतरयोग एव' इति नियमार्थं मृगशकुनिग्रहणम्। एवं पूर्वापरम्, अधरोत्तरम् इत्यपि। अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थम्। अन्यथा परत्वात् 'पूर्ववदश्ववडवौ' (सू

नित्यविहितैकवत्त्वानित्यत्वार्थमप्राणिवृक्षादिग्रहणमित्यर्थः। नन्वेवमपि पशुग्रहणं व्यर्थम्, तदुदाहरणे गोमहिषमित्यत्र 'जातिरप्राणिनाम्' इति नित्यैकवत्त्वनियमस्याप्राप्त्या तन्निवृत्त्यर्थत्वायोगादित्यत आह—**पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वात् नित्ये प्राप्ते इति**। विकल्पार्थमित्यनुषज्यते। नन्वेवमपि मृगशकुनिग्रहणं व्यर्थम्, तदुदाहरणे रुरुपृषतं शुकबकमित्यादौ 'जातिरप्राणिनाम्' इति एकवत्त्वस्य सेनाङ्गनिबन्धनैकवत्त्वस्य च अप्राप्त्या तन्निवृत्त्यर्थत्वाभावेन 'चार्थे द्वन्द्वः' इत्येवेतरेतरयोगसमाहारद्वन्द्वाभ्यामकवत्त्वविकल्पसिद्धेरित्यत आह—**मृगाणां मृगैरेवेत्यादि मृगशकुनिग्रहणमित्यन्तम्**। मृगाणां मृगैरेव सह उभयत्र इतरेतरयोगे समाहारे च 'चार्थे–' इति द्वन्द्वः। यथा—रुरुपृषतं रुरुपृषतावित्यादि। तथा शकुनीनां शकुनिभिरेव उभयत्र इतरेतरयोगे समाहारे च 'चार्थे–' इति द्वन्द्वः। यथा शुकबकम्, शुकबकाविति। मृगाणां तदितरैः शकुनीनां तदन्यैश्च सह इतरेतरयोगद्वन्द्व एव भवति, न समाहारद्वन्द्वः। यथा—रुरुशुका इति। एतादृशनियमार्थं मृगशकुनिग्रहणमित्यर्थः। ननु पूर्वापरग्रहणम् अधरोत्तरग्रहणं च व्यर्थम्, 'चार्थे–' इत्येव सिद्धेः। 'जातिरप्राणिनाम्' इत्यादिनित्यैकवत्त्वस्य तत्र अप्रवृत्त्या तन्निवृत्त्यर्थत्वासंभवादित्यत आह—**एवं पूर्वापरम् अधरोत्तरम् इत्यपीति**। यथा मृगशकुनिग्रहणं मृगैरेव मृगाणां शकुनीनां तैरेव उभयत्र द्वन्द्वः, एवं पूर्वशब्दस्य अपरशब्देनैव, अधरशब्दस्य उत्तरशब्देनैव उभयत्र इतरेतरयोगे समाहारे च द्वन्द्वः। अन्येन तु सह पूर्वोत्तरावित्यादौ इतरेतरयोग एवेति नियमार्थं पूर्वापरग्रहणम् अधरोत्तरग्रहणं चेत्यर्थः। ननु अश्ववडवग्रहणं व्यर्थम्, सेनाङ्गत्वेऽपि पशुद्वन्द्वत्वादेव एकवद्भावविकल्पसिद्धेरित्यत आह—**अश्ववडवेति**। नपुंसकत्वविकल्पार्थमित्यर्थः। ननु समाहारस्य एकत्वादेव ऐकवत्त्वसिद्धेः इदम् एकवत्त्वप्रकरणं समाहार एव द्वन्द्व इति

पशुग्रहणमिति। विकल्पार्थमित्यनुषज्यते। 'चार्थे द्वन्द्वः' इत्यनेनैव सिद्धे मृगशकुनिग्रहणं व्यर्थमित्याशङ्क्याह—**मृगाणां मृगैरेवेत्यादि**। **नपुंसकत्वार्थमिति**। अयं भावः—पशुत्वाद्विकल्पे सिद्धे अश्ववडवग्रहणं प्रतिपदविधानार्थम्।

८१३) इति स्यात्। ६१७ **विप्रतिषिद्धं चानधिकरणवाचि। (२-४-१३)** विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात्। शीतोष्णम्, शीतोष्णे। वैकल्पिकः समाहारद्वन्द्वः 'चार्थे' (सू ९०१) इति सूत्रेण प्राप्तः, स विरुद्धार्थानां यदि भवति तर्ह्यद्रव्यवाचिनामेवेति नियमार्थमिदम्। तेन द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णे उदके स्तः। विप्रतिषिद्धं किम्। नन्दकपाञ्चजन्यौ। इह

नियमार्थमित्युक्तम्। तथा च पशुद्वन्द्वत्वाद् एकवत्त्वविकल्पे सति समाहारे वा इतरेतरयोगे वा द्वन्द्व इत्यनियमः पर्यवस्यति। एवं च समाहारद्वन्द्वपक्षे 'स नपुंसकम्' इति नपुंसकत्वम्, इतरेतरयोगे तु नेति नपुंसकत्वविकल्पस्य सिद्धत्वाद् अश्ववडवग्रहणं व्यर्थमेवेत्यत आह—**अन्यथेति**। इह नपुंसकत्वविध्यभावे समाहारद्वन्द्वपक्षेऽपि 'स नपुंसकम्' इति नपुंसकत्वं बाधित्वा परत्वात् 'पूर्ववदश्ववडवौ' इति पुंस्त्वं स्यात्। नपुंसकविधौ तु तत्सामर्थ्यात् समाहारद्वन्द्वपक्षे 'पूर्ववदश्ववडवौ' इत्येतद् बाधित्वा नपुंसकत्वं भवत्येव। अधिकारप्राप्तपूर्ववदश्वेत्येतत्तु इतरेतरयोगद्वन्द्वे सावकाशमिति भावः। **विप्रतिषिद्धं च**। विभाषा इत्यनुवर्तते। विप्रतिषेधो विरोधः सहानवस्थानलक्षणः। अधिकरणं द्रव्यम्। अद्रव्यवाचि विरुद्धार्थकं च यदनेकं सुबन्तं तदवयवको द्वन्द्वो विभाषैकवद्भावक इत्यर्थः। फलितमाह—**विरुद्धार्थानामिति**। गोत्वाश्वत्वं गोत्वाश्वत्वे, सुखदुःखं सुखदुःखे इत्याद्युदाहरणम्। ननु 'चार्थे–' इति इतरेतरयोगसमाहाराभ्यामेवात्र एकवत्त्वविकल्पसिद्धेः इदं व्यर्थम्। न च 'जातिरप्राणिनाम्' इति नित्यं प्राप्ते विकल्पार्थमिति वाच्यम्, जातिप्रवृत्तिनिमित्तकद्रव्यवाचिनां द्वन्द्व एव तत्प्रवृत्तेरित्यत आह—**वैकल्पिक इत्यादि नियमार्थमिदमित्यन्तम्। तेनेति**। उक्तनियमेनेत्यर्थः—**शीतोष्णे उदके स्त इति**। अत्र विरुद्धार्थकत्वेऽपि द्रव्यवाचित्वाद् न समाहारद्वन्द्व इति भावः। **नन्दकपाञ्चजन्याविति**। विष्णोः खड्गः नन्दकः, शङ्खस्तु पाञ्चजन्यः, तयोरेकत्र विष्णौ सहावस्थानाद् न विरुद्धत्वमिति स्थितिः। इह विप्रतिषिद्धग्रहणाभावे 'चार्थे–' इति समाहारद्वन्द्वः अद्रव्यवाचिनामेवेति नियमो लभ्येत। एवं सति नन्दकपाञ्चजन्यमिति पाक्षिकसमाहारद्वन्द्वो न स्यात्, समाहारद्वन्द्वस्य सर्वस्यापि अद्रव्यवाचिष्वेव नियमितत्वात्।

तेनाश्ववडवमित्येकवद्भावपक्षे 'पूर्ववदश्ववडवौ' इत्येतद्बाधित्वा 'स नपुंसकम्' इत्येतदेव भवति। स इति तच्छब्देन ह्येकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वमेकवद्भाववदेव प्रतिपदविहितं भवति। तथा च प्रतिपदोक्तस्य बलीयस्त्वान्नपुंसकत्वं सिध्यतीति। **विप्रतिषिद्धम्**। अधिकरणमिह द्रव्यम्। चकारो विभाषानुकर्षणार्थस्तदेतद्व्याचष्टे—**विरुद्धार्थानामित्यादि**। उदाहरणं तु शीतोष्णं शीतोष्णे, सुखदुःखं सुख-

पाक्षिकः समाहारद्वन्द्वो भवत्येव। ९१८ न दधिपयआदीनि। (२-४-१४) एतानि नैकवत्स्युः। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे। ९१९ अधिकरणैतावत्त्वे च। (२-४-१५) द्रव्यसङ्ख्यावगमे एकवदेवेति

विप्रतिषिद्धमित्युक्तौ तु विरुद्धार्थानां समाहारद्वन्द्वश्चेत् तर्हि अद्रव्यवाचिनामेवेति नियमो लभ्यते। नन्दकपाञ्चजन्ययोश्चाविरुद्धत्वादयं नियमो न प्रवर्तते। ततश्च द्रव्यवाचित्वेऽपि 'चार्थे-' इति कदाचित् समाहारद्वन्द्वः, कदाचित् इतरेतरयोगद्वन्द्वश्च भवत्येव। तदाह—**इह पाक्षिकः समाहारद्वन्द्वो भवत्येवेति**। **न दधिपयआदीनि। एतानि नैकवत् स्युरिति**। एषां समाहारद्वन्द्वो नास्तीत्यर्थः। **दधिपयसी इति**। दधि च पयश्चेति विग्रहः। 'जातिरप्राणिनाम्' इति नित्यमेकवत्त्वं प्राप्तं बाधित्वा व्यञ्जनद्वन्द्वत्वाद्विकल्पः प्राप्तः, सोऽपि न भवति। **इध्माबर्हिषी इति**। इध्मं च बर्हिश्चेति विग्रहः। **दीर्घ इति**। इध्मशब्दस्येति शेषः। **ऋक्सामे इति**। ऋक् च साम चेति विग्रहः। 'अचतुर' इत्यादिनाऽच्समासान्तः। **वाङ्मनसे इति**। वाक् च मनश्चेति विग्रहः। पूर्ववत्समासान्तः। अत्र गणे ब्रह्मप्रजापती इत्यादि पठितम्। समाहारद्वन्द्व एवेति नियमप्रक्रमेऽपि नानेन नियमस्यैव निषेधः, ब्रह्मप्रजापती इत्यादौ नियमस्याप्राप्तेः। किन्त्वेकवत्त्वस्यैव। तथाच 'चार्थे-' इति समाहारद्वन्द्वस्य निषेधः फलति। **अधिकरणैतावत्त्वे च**। अधिकरणं द्रव्यम्, तस्य एतावत्त्वमियत्ताविशेषः। तदाह—**द्रव्यसंख्यावगम इति**। समस्यमानपदार्थस्येयत्ताविशेषे पदान्तरसमभिव्याहार-

---

दुःखे इत्यादि। विरोधोऽत्र सहानवस्थानलक्षणः। **भवत्येवेति**। विप्रतिषिद्धग्रहणाभावे तु स न स्यात्, अद्रव्यवाचिनामेवेति नियमादिति भावः। अनधिकरणवाचीति किम्, शीतोष्णे उदके स्तः। इह पाक्षिकः समाहारद्वन्द्वोऽपि स्यादिति दिक्। **न दधिपय। दधिपयसी इति**। व्यञ्जनत्वाद्विकल्पः प्राप्तः। एवं 'मधुसर्पिषी, सर्पिर्मधुनी' इत्यत्रापि बोध्यम्। इह 'ब्रह्मप्रजापती' 'शिववैश्रवणौ' इत्यादौ समाहारद्वन्द्वनिषेधमुखेनेतरेतरयोगद्वन्द्वोऽनेन व्यवस्थाप्यते। तत्साहचर्याद्दधिपयसी इत्यादावपि तथैव। तेन तत्र व्यञ्जनत्वप्रयुक्तविकल्पे निषिद्धेऽपि जातिलक्षणो नित्यमेकवद्भावोऽस्त्विति न शङ्कनीयम्, किं च नेह लक्षणविशेष आग्रहः। 'एतानि नैकवत्स्युः' इत्येकवद्भावमात्रस्य निषेधात्, यथा 'न षट्स्वस्रादिभ्यः' इत्यत्र ङीप्टापोरुभयोरपि निषेधसिद्धये 'स्त्रियां यदुक्तं तन्न' इति सामान्यतो निषिध्यत इति दिक्। **ऋक्सामे, वाङ्मनसे इति**। 'अचतुर-' इत्यादिनात्र समासान्तोऽच् निपात्यते। **अधिकरणै**। समासार्थस्याश्रयोऽधिकरणं वर्तिपदार्थः, तस्यैतावत्त्वं परिगणननियमः, तस्मिन् गम्य-

नियमो न स्यात्। दश दन्तोष्ठाः। ९२० **विभाषा समीपे**। (२-४-१६) अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एव इत्येवंरूपो नियमो वा स्यात्। उपदशं दन्तोष्ठम्। उपदशा दन्तोष्ठाः। ९२१ **आनङृतो द्वन्द्वे**।

गम्ये इत्यर्थः। **नियमो नेति**। ब्रह्मप्रजापती इत्यादौ समाहार एव द्वन्द्व इति नियमस्य प्रकृतस्याप्रवृत्तेरेकवत्त्वनिषेधः पूर्वसूत्रे आश्रितः। इह तु बाधकाभावात् प्रकृतस्य नियमस्यैव निषेध आश्रित इति भावः। **दश दन्तोष्ठा इति**। दन्ताश्च ओष्ठाश्चेति विग्रहः। इतरेतरयोगद्वन्द्वोऽयम्, न तु समाहारद्वन्द्वः। समासार्थसमाहार-विशेषणीभूतसमस्यमानपदार्थानां पदान्तरलभ्यदशत्वसापेक्षत्वेनासामर्थ्यात्। इतरेतर-योगद्वन्द्वस्तु भवत्येव, तत्र समस्यमानपदार्थानामेव प्रधानत्वाद् 'उपमितं व्याघ्रादिभिः–' इति सूत्रभाष्ये प्रधानस्य सापेक्षत्वेऽपि समासाभ्युगमात्। ततश्चात्रैकवदेवेति नियमा-भावे सति असामर्थ्यात्समाहारत्वे निवृत्ते परिशेषादितरेतरयोगत्वमेवावतिष्ठते। यदि त्वेकवन्न स्यादित्येव व्याख्यायेत, तर्हि समाहारद्वन्द्वो नेत्यर्थः पर्यवस्येत्। तथा सति दश दन्तोष्ठा इतीतरेतरयोगद्वन्द्वो न स्यात्, 'द्वन्द्वश्च प्राणितूर्य–' इति तन्निषेधात्। तथाच वाक्यमेव स्यात्। किंच समाहारद्वन्द्वनिषेधोऽयं व्यर्थ एव, उक्तरीत्या सापेक्ष-त्वेनासामर्थ्यादेवाप्राप्तेः। अत एकवदिति नियमो न स्यादित्येव व्याख्येयम्। एवं च प्राण्यङ्गनिबन्धनस्य एकवदेव स्यादिति नियमस्य इतरेतरयोगद्वन्द्वनिवृत्तिफलस्यानेन निषेधे सति इतरेतरयोगद्वन्द्वस्यावस्थितिः फलतीति पदमञ्जर्यां स्पष्टम्। **विभाषा समीपे**। अधिकरणैतावत्त्वे इत्यनुवर्तते। समीपे इत्यस्य सामीप्येन परिच्छिद्य-

मान इति व्याचष्टे—**द्रव्यसंख्यावगम इति**। **नियमो न स्यादिति**। न चेह प्राण्यङ्गत्वात्प्राप्तस्य 'एकवदेव' इति नियमस्य प्रतिषेधेऽपि 'चार्थे द्वन्द्वः' इति समाहार-द्वन्द्वः स्यादिति वाच्यम्, 'सविशेषणानां वृत्तिर्न' इत्यभ्युपगमेन समाहारद्वन्द्वस्य प्राप्त्यभावात्। न चोक्तन्यायेनेतरेतरयोगद्वन्द्वोऽपि न स्यादिति वाच्यम्, सामान्याप्रयोगे इति लिङ्गात् प्रधानस्य सापेक्षत्वेऽपि तदभ्युपगमात्। उक्तं हि भाष्ये—'भवति वै प्रधानस्य सापेक्षस्यापि वृत्तिः' इति। स्यादेतत्—समाहारद्वन्द्वस्यात्र प्राप्त्यभावे 'द्वन्द्वश्च प्राणितूर्य–' इति नियमाप्रवृत्त्या इतरेतरयोगद्वन्द्वो निर्बाध एवेति सूत्रमिदमकिंचि-त्करमिति चेत्—अत्राहुः—'नियमसूत्राणां निषेधमुखेन प्रवृत्तिः' इति पक्षे 'द्वन्द्वश्च प्राणितूर्य–' इति सूत्रं केवलमितरेतरयोगद्वन्द्वनिषेधपरम्। तथा चेतरेतरयोगनिषेधस्य निषेधद्वारा इतरेतरयोगद्वन्द्वप्रापणार्थमिदमिति। एवं च निषेधमुखप्रवृत्तिपक्षस्य ज्ञापकमिदमिति फलितमिति दिक्। **विभाषा समीपे**। यद्यपीह 'समाहारद्वन्द्वः' एवेति व्याख्यानेऽपि न क्षतिः, तथापि पूर्वसूत्रे नियमनिषेधस्योक्तत्वात्तदनुरोधेनाह—

(६-३-२५) विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे । होतापोतारौ । होतृपोतृनेष्टोद्गातारः । मातापितरौ । 'पुत्रेऽन्यतरस्याम्' (सू १८०)

सतीत्यर्थः । फलितमाह—**अधिकरणेति** । **उपदशं दन्तोष्ठमिति** । दशानां समीपे इत्यर्थेऽव्ययीभावः । उक्तरीत्याऽसामर्थ्येऽपि वचनसामर्थ्यात्समाहारद्वन्द्वः । समानलिङ्गवचनत्वादव्ययभावस्यैवानुप्रयोग इति भाष्यम् । अत एवोपदशं दन्तौष्ठेनेत्यादि सिद्धम् । समीपसमीपिनोरभेदविवक्षायां सामानाधिकरण्यम् । नवत्वसंख्यदन्तोष्ठसमूह एकादशत्वसंख्यदन्तोष्ठसमूह इति वा बोधः । **उपदशा दन्तोष्ठा इति** । इतरेतरयोगद्वन्द्वोऽयम् । दशानां समीपे ये सन्ति ते उपदशा इति बहुव्रीहिः । नव एकादश वेत्यर्थः । बहुव्रीहेरेवात्रानुप्रयोगः समानलिङ्गवचनत्वाद् इति भाष्यम् । **आनङृतो द्वन्द्वे** । **विद्यायोनिसंबन्धवाचिनामिति** । विद्यासंबन्धवाचिनां योनिसंबन्धवाचिनां चेत्यर्थः । 'ऋतो विद्यायोनिसंबन्धेभ्यः' इत्यतस्तदनुवृत्तेरिति भावः । **ऋदन्तानामिति** । बहुत्वे व्यत्ययेन 'ऋतः' इत्येकवचनम् । ऋदन्तसर्वावयवकानामित्यर्थः । ऋत इत्यनुवर्तमाने पुनर् ऋत इत्युक्तिः एतदर्थेति भावः । **उत्तरपदे पर इति** । 'अलुगुत्तरपदे' इत्यधिकारादिति भावः । **होतापोतारावि‍ति** । होता च पोता चेति विग्रहः । विद्याद्वारकैकयज्ञर्त्विक्त्वकृतः सम्बन्धः । आनङि ङकार इत्, अकार उच्चारणार्थः, 'ङिच्च' इत्यन्तादेशः, नलोपः, नकारस्तु रपरत्वनिवृत्त्यर्थ इति भाष्ये स्पष्टम् । **होतृपोत्रिति** । अत्र होतृशब्दस्य

नियमो वा स्यादिति । **उपदशं दन्तोष्ठमिति** । एकवद्भावपक्षे अव्ययीभावस्यैवानुप्रयोगः । यदि तु बहुव्रीहेस्तदा 'उपदशस्य दन्तोष्ठस्य' इति षष्ठी स्यात्, 'उपदशं दन्तोष्ठस्य' इत्येवेष्यत इत्याकरः । दन्तोष्ठस्य दर्शनमित्यभिप्रायेण षष्ठ्यां कृतायामपि उपदशशब्दे षष्ठी नेष्यते । अतो बहुव्रीहेर्नानुप्रयोगः किं त्वव्ययीभावस्यैवेति तदाशयः । **आनङ्** । ऋत इति षष्ठ्यन्तं जातावेकवचनम् । 'ऋतो विद्यायोनिसंबन्धेभ्यः' इति त्वनुवर्तते, तच्चात्र षष्ठ्या विपरिणम्यते, तदाह—**विद्यायोनिसंबन्धवाचिनामिति** । ननु 'ऋतः' इत्यनुवर्तनादेव सिद्धे किमनेन ऋतोग्रहणेन । अत्राहुः—'ऋतः' इति श्रूयमाणद्वन्द्वविशेषणम् । अनुवृत्तं तूत्तरपदे परतो यत्पूर्वं तस्य विशेषणं पुत्रशब्दे पर आनङ् विधास्यते तत्र कार्यिनिर्देशार्थम् । अन्यथा तत्पुत्रावित्यत्रापि स्यादिति । **उत्तरपद इति** । एतच्च 'अलुगुत्तरपदे' इत्यधिकाराल्लभ्यते । उत्तरपदे परतः पूर्वं यदृदन्तं तस्यानङित्यर्थः । **होतापोतारावि‍ति** । आनङो ङित्वात्पूर्वान्त्यस्य ऋकारस्यादेशे सति नलोपः । न चाकारमात्रमेव विधीयतामिति वाच्यम्, 'उरण् रपरः' इति रपरप्रसङ्गात् । नन्विहोत्तरपदेन पूर्वपदं

इत्यतो मण्डूकप्लुत्या 'पुत्रे' इत्यनुवृत्तेः पितापुत्रौ । **९२२ देवताद्वन्द्वे च ।** (६-३-२६) इहोत्तरपदे परे आनङ् । मित्रावरुणौ । 'वायुशब्दप्रयोगे प्रतिषेधः' (वा ३९०७) अग्निवायू, वाय्वग्नी । पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थम् । तेन ब्रह्मप्रजापती इत्यादौ नानङ् । एतद्धि नैकहविर्भागित्वेन श्रुतम्, नापि लोके प्रसिद्धं साहचर्यम् । **९२३ ईदग्नेः सोमवरुणयोः ।** (६-३-२७) देव-

---

पोतृशब्दस्य च नानङ्, नेष्टृशब्देन व्यवधानाद् उत्तरपदपरकत्वाभावात् । तथाच नेष्टृशब्दस्यैवानङ् । उत्तरपदेन तु न पूर्वपदमाक्षिप्यते, समर्थसूत्रे नेष्टृशब्दस्याऽऽनङ्दर्शनात् । अथ योनिसंबन्धमुदाहरति—**मातापितराविति** । पितृपितामहा इत्यादौ तु नानङ् । ऋदन्तसर्वावयवकत्वाभावादिति भावः । तर्हि पितापुत्राविति कथमित्यत आह—**पुत्रेऽन्यतरस्यामिति** । 'ऋतो विद्यायोनिसंबन्धेभ्यः' इत्यत्र 'विभाषा स्वसृपत्योः' इत्यत्र च मध्येऽसंबन्धादाह—**मण्डूकेति** । **अनुवृत्तेरिति** । न च तातपुत्रावित्यत्रापि स्यादिति वाच्यम्, ऋदन्तस्य पुत्रे परे आनङ् स्यादिति वाक्यभेदेन व्याख्यानात् । **देवताद्वन्द्वे च** । **मित्रावरुणाविति** । इह ऋदन्तत्वाभावात् पूर्वेणाप्राप्ते विधिरयम् । **वायुशब्देति** । वायुशब्दस्य पूर्वपदत्वेनोत्तरपदत्वेन वा प्रयोगे सत्यानङः प्रतिषेधो वक्तव्य इत्यर्थः । ननु पूर्वसूत्राद् द्वन्द्वग्रहणे अनुवर्तमाने पुनः द्वन्द्वग्रहणं व्यर्थमित्यत आह—**पुनरिति** । निर्वापादौ प्रसिद्धसाहित्यकदेवतावाचकशब्दग्रहणार्थमित्यर्थः । **तेनेति** । प्रसिद्धसाहचर्यग्रहणेनेत्यर्थः । **एतदिति** । एतद् ब्रह्मप्रजापतियुगलं हविर्भागित्वेन न वेदे प्रसिद्धमित्यर्थः । **नापि लोक इति** । प्रौढिवादमात्रमेवेदम्, 'वेदे ये सहनिर्वापनिर्दिष्टाः, इत्येव भाष्ये दर्शनात्, लोकप्रसिद्ध-

---

नाक्षिप्यते । अन्यथा होतृपोतृनेष्टोद्गातार इत्यत्र मध्यमस्यानङ् न स्यात् । ततश्च विशेष्यासन्निधानाद् ऋत एव स्थाने आदेशेन भवितव्यम्, न तु ऋदन्तपदस्य स्थाने, इति किमनेनानङो ङित्करणेन, सत्यम्—ङित्करणाभावे मित्रावरुणावित्यादौ 'देवताद्वन्द्वे च' इत्युत्तरपदे परे विधीयमान आदेशः पूर्वस्योत्तरस्य पदस्य वा स्यात्, पूर्वस्यैव एवेत्यत्र नियामकाभावात् । एतेन 'ऋत इति कार्यिनिर्देशार्थम्' इत्युक्त्वाभिर्दिश्यमानस्य ऋकारस्यैवादेशः स्यादिति ङित्करणं व्यर्थमित्याशङ्कापि परास्ता । **नेष्टोद्गातार इति** । न ह्यत्र नेष्टा पूर्वपदम्, आद्यवयवस्यैव पूर्वपदत्वात् । **मातापितराविति** । पुत्रोत्पादने अनयोर्योनिकृतः संबन्धः । पूर्वत्र तु हौत्रादिरूपविद्याकृतः संबन्ध एकस्मिन्यज्ञे आर्त्विज्यरूप इति विवेकः । **मण्डूकप्लुत्येति** । तेन 'विभाषा स्वसृपत्योः' इत्यत्र न संबध्यत इति भावः । **पितापुत्राविति** । अनयोरपि योनिकृतः संबन्धो जन्यजनकभावलक्षणः । **देवता** । अनृकारान्तार्थमविद्यायोनिसंबन्धार्थं च वचनम् ।

ताद्वन्द्वे इत्येव। ६२४ अग्नेः स्तुत्स्तोमसोमाः। (८-३-८२) अग्नेः परेषामेषां सस्य षः स्यात्समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ। अग्नीवरुणौ। ६२५ इद्वृद्धौ। (६-३-२८) वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वन्द्वे। अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म। अग्नीवरुणौ देवते अस्य आग्निवारुणम्।

साहचर्यग्रहणे पार्वतीपरमेश्वरावित्यादावतिप्रसङ्गाच्च। **ईदग्नेः।** इत्येवेति। देवताद्वन्द्वे इत्यनुवर्तत एवेत्यर्थः। सोमशब्दे वरुणशब्दे च उत्तरपदे परे अग्नेरीदादेशः स्यात् देवताद्वन्द्वे इत्यर्थः। आनङोऽपवादः। **अग्नेः स्तुत्।** स्तुत्, स्तोम, सोम इति द्वन्द्वात् षष्ठ्यर्थे प्रथमा। 'सहेः साडः सः' इत्यतः स इति षष्ठ्येकवचनान्तमनुवर्तते। अग्नेरिति पञ्चमी। 'समासेऽङ्गुलेः–' इत्यतः समासे इत्यनुवर्तते। तदाह—**अग्नेः परेषामिति। षः स्यादिति।** 'अपदान्तस्य मूर्धन्य.' इत्यनुवृत्तेरिति भावः। 'सात्पदाद्योः' इति षत्वनिषेधापवादोऽयम्। **अग्निष्टुदिति।** क्रतुविशेषोऽयम्। **अग्निष्टोम इति।** स्तोत्रविशेषस्य संस्थाविशेषस्य च नाम। **अग्नीषोमाविति।** अग्निश्च सोमश्चेति विग्रहः। ईत्त्वषत्वे। **अग्नीवरुणाविति।** अग्निश्च वरुणश्चेति विग्रहः। ईत्त्वम्। देवताद्वन्द्वे किम्? अग्निर्नाम कश्चित्, सोमो नाम कश्चित्—अग्निसोमौ। अदेवताद्वन्द्वत्वादीत्त्वं न। अत एव च न षत्वम्, 'अग्नेर्दीर्घात् सोमस्य इष्यते' इति वार्तिकात्। **इद्वृद्धौ।** अग्नेरिति देवताद्वन्द्वे इति चानुवर्तते। वृद्धिशब्देन वृद्धिमल्लक्ष्यते, देवताद्वन्द्वे केवलवृद्धिरूपोत्तरपदासंभवात्। तदाह—**वृद्धिमतीति।** इदिति तकार उच्चारणार्थः। प्रयोजनाभावान्नेत्संज्ञा। नापि तपरकरणम्, विधीयमानत्वादेव सवर्णाग्राहकत्वात्। **अग्नामरुताविति।** अग्निश्च मरुच्चेति विग्रहः। 'देवताद्वन्द्वे च' इत्यानङ्। **आग्निमारुतं कर्मेति।** 'साऽस्य देवता' इत्यण्। तद्धितान्तप्रातिपदिकावयवत्वात् सुपो लुक्। **अग्नीवरुणाविति।** 'ईदग्नेः–' इतीत्त्वम्। **आग्निवारुणमिति।** साऽस्य देवता' इत्यण्। ननु

ईदग्नेः। आनङोऽपवादोऽयम्। **देवताद्वन्द्वे इत्येवेति।** इदं च वृत्तिग्रन्थे स्थितम्। ज्योतिर्लतयोरदेवताद्वन्द्वेऽपि 'अग्नीषोमौ प्रणेष्यामि' इत्याश्वलायनप्रयोगस्त्वार्षत्वात्साधुः। यद्वा—मास्तु तदनुवृत्तिः, अग्निसोमौ माणवकावित्यत्र 'अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः' इति न्यायेनादोषत्वात्। **अग्नेः।** 'सात्पदाद्योः' इति निषेधेऽयमारम्भः। **अग्निष्टुदिति।** अग्निः स्तूयतेऽस्मिन् स क्रतुविशेषः। संपदादित्वादधिकरणे क्विप्। **अग्निष्टोम इति।** अग्नीनां स्तोमोऽग्निष्टोमः। सोमयागस्य संस्थास्तासां संस्था उच्यते। **इद्वृद्धौ।** तकार उच्चारणार्थः। इकारस्येकारविधानं तु बाधकबाधनार्थम्। वृद्धिशब्देनात्र वृद्धिमद् गृह्यते, वृद्धिमात्रस्योत्तरपदस्या-

'देवताद्वन्द्वे च' (सू १२३१) इत्युभयपदवृद्धिः। अलौकिके विग्रहवाक्ये आनङीत्वं च बाधित्वा इत्। वृद्धौ किम्—आग्नेन्द्रः। 'नेन्द्रस्य परस्य' (सू १२४०) इत्युत्तरपदवृद्धिप्रतिषेधः। 'विष्णौ न' (वा ३६०६)। आग्नावैष्णवम्। ९२६ **दिवो द्यावा।** (६-३-२९) देवताद्वन्द्वे उत्तरपदे। द्यावाभूमी। द्यावाक्षामा।

'तद्धितेष्वचामादेः' इत्यादेरचो वृद्धिविधानात् कथमुत्तरपदस्यादिवृद्धिरित्यत आह—**देवताद्वन्द्वे चेत्युभयपदवृद्धिरिति**। नन्वग्नेरिकारस्य इकारविधिर्व्यर्थ इत्यत आह—**आनङीत्वं च बाधित्वेति**। आग्निमारुतमित्यत्रानङ आग्निवारुणमित्यत्र ईत्वस्य च बाधनार्थमग्नेरिकोरस्य पुनरिकारविधानमित्यर्थः। ननु 'समर्थानां प्रथमाद्वा' इत्यत्र 'परिनिष्ठितात् तद्धितोत्पत्तिः' इति वक्ष्यते। तथा च अग्नामरुतौ देवते अस्येति, अग्नीवरुणौ देवते अस्येति च विग्रहे अग्नामरुच्छब्दाद् अग्नीवरुणशब्दाच्च आनङीत्वाभ्यां परिनिष्ठिताद् देवताद्वन्द्वात् 'साऽस्य देवता' इत्यण् तद्धित उत्पद्यते। ततस्तन्निमित्तकोभयपदवृद्धिः। ततः 'इद्वृद्धौ' इत्यस्य प्रवृत्तिरिति क्रमः। ततश्च तद्धितोत्पत्तेः प्रागेव प्रवृत्तयोरानङीत्वयोः कथम् 'इद्वृद्धौ' इत्यनेन बाधः? युगपत्प्रवृत्तावेव बाध्यबाधकभावाभ्युपगमात्। उक्तं च भाष्ये—'भुक्तवन्तं प्रति मा भुङ्क्था इत्युक्ते, किं तेन कृतं स्यात्' इति। अत आह—**अलौकिके विग्रहवाक्य इति**। अग्निमरुत् औ देवते अस्येति, अग्निवरुण औ देवते अस्येति च तद्धितालौकिकविग्रहवाक्ये आनङीत्वे प्रवर्तमाने बाधित्वा इद्विधिः प्रवर्तत इत्यर्थः। यद्यपि तदानीम् उत्तरपदस्य वृद्धिमत्त्वं नास्ति, तद्धिताभावात्, तथाप्युत्तरपदस्य भाव्येव वृद्धिमत्त्वमिह विवक्षितमिति भावः। **आग्नेन्द्र इति**। अग्निश्च इन्द्रश्च अग्नेन्द्रौ। 'देवताद्वन्द्वे च' इत्यानङ्, आद्गुणः। अग्नेन्द्रौ देवते अस्येत्याग्नेन्द्रः। 'साऽस्य देवता' इत्यण्। आदिवृद्धिः। अत्रेन्द्रशब्दस्योत्तरपदस्य वृद्धिमत्त्वाभावाद् 'इद्वृद्धौ' इति नेति भावः। 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिमाशङ्क्याह—**नेन्द्रस्येति**। **विष्णौ नेति**। विष्णुशब्दे परे अग्नेरिकारो नेति वक्तव्यमित्यर्थः। **आग्नावैष्णवमिति**। अग्निश्च विष्णुश्च अग्नाविष्णू। 'देवताद्वन्द्वे च' इत्यानङ्। अग्नाविष्णू देवते अस्येत्यर्थे 'साऽस्य देवता' इत्यण्। आग्नावैष्णवं हविः। 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिः। इत्त्वाभावादानङेव। **दिवो द्यावा**। शेषपूरणेन सूत्रं व्याचष्टे—**देवताद्वन्द्व इति**। **द्यावाभूमी इति**। द्यौश्च भूमिश्चेति विग्रहः। **द्यावाक्षामा इति**।

संभवादतो व्याचष्टे—**वृद्धिमत्युत्तरपद इति**। **आनङीत्वं च बाधित्वेति**। यद्यपि वृद्धेः प्रागेव आनङीत्वयोरन्तरङ्गत्वात्प्रवृत्तिरस्ति, तथापि 'परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते' इति न्यायादानङीत्वे न भवत इति भावः। **आग्नावैष्णव-**

९२७ दिवसश्च पृथिव्याम् । (६-३-३०) दिव इत्येव, चाद् द्यावा । आदेशेऽकारोच्चारणं सकारस्य रुत्वं माभूदित्येतदर्थम् । द्यौश्च पृथिवी च दिवस्पृथिव्यौ, द्यावापृथिव्यौ । 'छन्दसि दृष्टानुविधिः' । 'द्यावा चिदस्मै पृथिवी' । 'दिवस्पृथिव्योररतिः' इत्यत्र पदकारा विसर्गं पठन्ति । ९२८ उषासोषसः । (६-३-३१) उषस्शब्दस्योषासादेशो देवताद्वन्द्वे । उषासासूर्यम् । ९२९ मातरपितरावुदीचाम् । (६-३-३२) मातरपितरौ । उदीचां किम्—मातापितरौ । ९३० द्वन्द्वाच्चुदषहान्तात्समाहारे । (५-४-१०६) चवर्गान्ताद्षहान्ताच्च

'द्यावाक्षामा रुक्मो अन्तर्विभाति' इति ऋचि पठितमिदम् । द्यावापृथिव्योरित्यर्थः । द्यौश्च क्षामा चेति विग्रहः । क्षामाशब्दो भूमिपर्यायो वेदे । तत्र द्वन्द्वे दिवो द्यावादेशः । षष्ठ्यास्तु 'सुपां सुलुक्—' इति डादेशः, 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोः प्रकृतिस्वर इति वेदभाष्ये स्पष्टम् । **दिवसश्च पृथिव्याम् । दिव इत्येवेति ।** दिव इत्यनुवर्तत एवेत्यर्थः, स्वरितत्वादिति भावः । तर्हि चकारो व्यर्थ इत्यत आह—**चादिति** । तथा च दिव्शब्दस्य दिवसादेशो द्यावादेशश्च स्यात् पृथिवीशब्दे उत्तरपदे परे देवताद्वन्द्वे इत्यर्थः । दिवस्पृथिव्या इत्यत्र सकारादकारस्याश्रवणाद्दिवसादेशस्य सकारान्तत्वावश्यंभावाद् आदेशे सकारादकारोच्चारणस्य किं प्रयोजनमित्यत आह—**आदेशेऽकारोच्चारणमिति** । सामर्थ्यात् 'ससजुषो रुः' इति रुत्वं नेति भावः । ननु 'द्यावा चिदस्मै पृथिवी सन्नमेते' इत्यत्र दिव्शब्दपृथिवीशब्दयोः कथं द्वन्द्वः ? कथं वा दिवो द्यावादेशः ? उत्तरपदस्य चिदस्मै इत्यनेन व्यवहितत्वादित्यत आह—**छन्दसि दृष्टानुविधिरिति** । भाष्यवाक्यमेतत् । वेदे दृष्टानुसरणमित्यर्थः । यथा दृष्टं तथा प्रक्रिया कल्पनीयेति भावः । **पदकारा इति** । 'दिवस्पृथिव्योः' इत्यवग्रहे विसर्गं पठन्तीत्यर्थः । पदकारा इत्यनेन पदपाठस्याधुनिकत्वं सूचितम् । तथा च विसर्गपाठः प्रामादिक इति सूचितम्, अकारोच्चारणेन रुत्वनिवृत्तेरुक्तत्वात् । **उषासोषसः । उषासासूर्यमिति ।** उषाश्च सूर्यश्चेति समाहारद्वन्द्वः । **मातरपितरावुदीचाम्** । उदीचां मते मातरपितराविति भवतीत्यर्थः । अत्र मातृशब्दस्यारङादेशो निपात्यते । **मातापितराविति** । अरङभावे 'आनङृतः—' इत्यानङ् । **द्वन्द्वाच्चुदष** । समासान्ताधिकारस्थं

मिति । इत्वाभावादानङेव भवति । **रुत्वं मा भूदिति** । अकारे सति सकारस्य श्रवणंभवति, तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः । **विसर्गमिति** । तथा च 'कश्चिद्विकारो न' इत्येवानुमेयं लक्ष्यानुरोधादिति भावः । **उषासासूर्यमिति** । उषाश्च सूर्यश्च तयोः समाहारः । **मातरपितरौ** । मातृशब्दस्या-

द्वन्द्वाट्टच् स्यात्समाहारे। वाक्च त्वक्च वाक्त्वचम्। त्वक्स्रजम्। शमीदृषदम्। वाक्त्विषम्। छत्रोपानहम्। समाहारे किम्-प्रावृट्शरदौ।

इति द्वन्द्वसमासप्रकरणम्।

अथैकशेषप्रकरणम्। २१।

अथैकशेषः। 'सरूपाणाम्-' (सू १८८)। रामौ रामाः। विरूपाणामपि समानार्थानाम्' (वा ७४७)। वक्रदण्डश्च कुटिलदण्डश्च—वक्रदण्डौ। कुटिल-

---

तद्धिताधिकारस्थं चेदं सूत्रम्। टजस्यादिति। 'राजाहस्सखिभ्यः–' इत्यतस्तदनुवृत्तेरिति भावः। वाक्त्वचमिति। वाक्च त्वक्च इति समाहारद्वन्द्वः। कुत्वस्यासिद्धत्वाच्चवर्गान्तत्वाट्टच्। एवं त्वक्स्रजमित्यत्रापि। त्वक्च स्रक्चेति विग्रहः। शमीदृषदमिति। शमी च दृषचेति विग्रहः। दकारान्तत्वाट्टच्। वाक्त्विषमिति। वाक्च त्विट् चेति विग्रहः। षान्तत्वाट्टच्, जश्त्वस्यासिद्धत्वादिति भावः। छत्रोपानहमिति। छत्रं च उपानच्चेति विग्रहः। हान्तत्वाट्टच्। प्रावृट्शरदाविति। प्रावृट् च शरच्चेति विग्रहः। इतरेतरयोगद्वन्द्वत्वान्न टजिति भावः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां द्वन्द्वसमासनिरूपणम्।

अथैकशेषो निरूप्यते—तदेवं द्वन्द्वे निरूपिते तदपवादमेकशेषप्रकरणमारभते—अथैकशेष इति। निरूप्यत इति शेषः। तत्रैकशेषसूत्राणि व्याचिख्यासुः पूर्वं व्याख्यातमपि सूत्रं सन्दर्भशुद्धये आह—सरूपाणामिति। तदुदाहरणमपि स्मारयति—रामौ रामा इति। विरूपाणामिति। 'सरूपाणाम्–' इत्यनेन सूत्रेणार्थभेदेऽपि शब्दैकरूप्ये एकशेष उक्तः, एकार्थकत्वे विरूपाणामप्येकशेषो वक्तव्य इत्यर्थः। वक्रदण्डश्चेति। अत्र शब्दवैरूप्येऽप्यर्थैक्याद् अन्यतरः शिष्यत

रुकादेशो निपात्यते। द्वन्द्वात्। अन्तग्रहणं विस्पष्टार्थम्। चु इति वर्गग्रहणस्य प्रयोजनं ध्वनयति—त्वक्स्रजमिति। बहूनां द्वन्द्वे तु वाक्त्वक्स्रजम्। द्वन्द्वगर्भे द्वन्द्वे तु वाक्त्वचस्रजम्।

इति तत्त्वबोधिनीव्याख्यायां द्वन्द्वप्रकरणम्।

द्वन्द्वापवादत्वेनाह—अथैकशेष इति। विरूपाणामिति। रूप्यते

दयडौ । **वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । (१-२-६५)** यूना सहोक्तौ गोत्रं शिष्यते, गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धः किम् । गर्गगार्ग्यायणौ । यूना किम् । गर्गगार्ग्यौ तल्लक्षणः किम् । भागवित्तिभागवित्तिकौ । कृत्स्नम् किम् । गार्ग्यवात्स्या-

इति भावः । **वृद्धो यूना** । रूपतोऽर्थतश्च भेदेऽपि प्राप्त्यर्थमिदम् । **यूनेति** । 'जीवति तु वंश्ये युवा' इति वक्ष्यमाणयुवप्रत्ययान्तेनेत्यर्थः। **सहोक्ताविति** । अध्याहारलब्धमेतत् । **गोत्रमिति** । वृद्धशब्देन 'अपत्यं पौत्रप्रभृति गोत्रम्' इति सूत्रोक्तं गोत्रं विवक्षितम् । अपत्यमन्तरितं वृद्धमिति पूर्वाचार्यपरिभाषितत्वादिति भावः । गोत्रप्रत्ययान्तमिति यावत् । न च 'गोत्रं यूना' इत्येव कुतो न सूत्रितमिति वाच्यम्, अपत्याधिकारादन्यत्र गोत्रग्रहणेन लौकिकं गोत्रं विवक्षितमिति सिद्धान्तज्ञापनार्थत्वात् । **शिष्यत इति** । शेष इति कर्मणि घञन्तमनुवर्तत इति भावः । **तल्लक्षण इति** । स गोत्रप्रत्ययो युवप्रत्ययश्च लक्षणं निमित्तं यस्येति विग्रहः । विशेषो वैलक्षण्यम् । तथाच गोत्रयुवप्रत्ययान्तयोर्विशेषो वैरूप्यम्, तल्लक्षणश्चेद् गोत्रयुवप्रत्ययनिमित्तकश्चेदित्यर्थः । अन्यनिमित्तको न चेदित्यर्थः सिद्धः, तदाह—**गोत्रयुवेति** । **कृत्स्नमिति** । एवकारलभ्यमिदम् । **गार्ग्यश्चेति** । गर्गस्य गोत्रापत्यं गार्ग्यः । गर्गादिभ्यो यञ् । **गार्ग्यायण इति** । गर्गस्य गोत्रापत्यं गार्ग्यः । तस्यापत्यं युवा गार्ग्यायणः । 'यञिञोश्च' इति फक् । **गार्ग्याविति** । अत्र गार्ग्यशब्दस्य गार्ग्यायणशब्दस्य च गोत्रयुवप्रत्ययकृतमेव वैरूप्यमिति गोत्रप्रत्ययान्तो गार्ग्यशब्दः शिष्यत इति भावः । **गर्गगार्ग्यायणाविति** । गर्गश्च गार्ग्यायणश्चेति विग्रहः । अत्र गर्गशब्दस्य गार्ग्यायणशब्दस्य च युवप्रत्ययमात्रकृतवैरूप्येऽपि गोत्रप्रत्ययान्तत्वाभावान्नैकशेष इति भावः । **गर्गगार्ग्याविति** । अत्र गर्गशब्दस्य गार्ग्यशब्दस्य च गोत्रप्रत्ययमात्रकृतवैरूप्येऽपि गोत्रप्रत्ययान्तो गार्ग्यशब्दो न शिष्यते, यूना सहोक्त्यभावादिति भावः । **भागवित्ति**-

बोध्यत इति व्युत्पत्त्या सौत्रस्य रूपशब्दस्यार्थपरतयापि व्याख्यानात्सूत्राक्षरैरेव लब्धुं शक्यत इति प्रागेव व्याख्यातम् । **वृद्धो यूना** ।'अपत्यमन्तर्हितं वृद्धम्' इति पूर्वाचार्यैः परिभाषितस्य पाणिन्युक्तगोत्रापरपर्यायस्येह ग्रहणम्, कृत्रिमेण यूना साहचर्यात्तदाह—**गोत्रं शिष्यत इति** । 'गोत्रं यूना' इत्येव तु न सूत्रितम् । 'अपत्याधिकारादन्यत्र लौकिकं गोत्रग्रहणम्' इति सिद्धान्तेन औपगवश्चानन्तरः, औपगविश्च युवेत्यत्र नैकशेषः । **भागवित्तीति** । भागवित्तस्य गोत्रापत्यं भागवित्तिरित्यस्माद्यूनि 'वृद्धाट्ठक् सौवीरेषु बहुलम्' इति कुत्सायां ठक् । इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते । न तु युवत्वमात्रकृतं वैरूप्यम् । **गार्ग्यवात्स्यायनाविति** । इह प्रकृत्यंशे वैरूप्यं न

वनो। ६३२ स्त्री पुंवच्च। (१-२-६६) यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च गर्गाः। 'अस्त्रियाम्' इत्यनुवर्तमाने 'यञञोश्च' (सू ११०८) इति लुक्। दाक्षी च दाक्षायणश्च दाक्षी। ६३३

भागवित्तिकाविति। भगवित्तस्य गोत्रापत्यं भागवित्तिः। अत इञ्। भागवित्तेः सौवीरस्यापत्यं युवा कुत्सितो भागवित्तिकः। 'वृद्धाट्ठक् सौवीरेषु–' इति ठक्। अत्र भागवित्तिशब्दस्य भागवित्तिकशब्दस्य च न गोत्रयुवप्रत्ययमात्रकृतं वैरूप्यम्, कुत्सासौवीरत्वकृतस्यापि वैरूप्यस्य सत्त्वात्। अतो गोत्रप्रत्ययान्तो भागवित्तिशब्दो न शिष्यत इति भावः। **गार्ग्यवात्स्यायनाविति।** गर्गस्य गोत्रापत्यं गार्ग्यः, वत्सस्य गोत्रापत्यं वात्स्यः, गर्गादित्वाद्यञ्। वत्सस्यापत्यं युवा वात्स्यायनः। 'यञिञोश्च' इति फक्। गार्ग्यश्च वात्स्यायनश्चेति विग्रहः। अत्र गार्ग्यशब्दस्य वात्स्यायनशब्दस्य च न गोत्रयुवप्रत्ययमात्रकृतं वैरूप्यम्, प्रकृतिवैरूप्यस्य गोत्रयुवप्रत्ययमात्रकृतत्वाभावात्। अतो गोत्रप्रत्ययान्तो गार्ग्यशब्दो न शिष्यत इति भावः। **स्त्री पुंवच्च।** वृद्धो यूनेत्यनुवर्तते। वृद्धेति स्त्रीलिङ्गेन विपरिणम्यते। तदाह—**यूना सहोक्तौ वृद्धा स्त्री शिष्यत इति।** गोत्रप्रत्ययान्तः स्त्रीवाचकः शब्दः शिष्यत इति भावः। स्त्रीत्वस्य वैरूप्यकारणस्याधिकस्य सत्त्वात् पूर्वेणाप्राप्ते वचनमिदम्। **तदर्थ इति।** तस्य शिष्यमाणस्य स्त्रीवाचकगोत्रप्रत्ययान्तस्यार्थः पुमानिव स्यादित्यर्थः। **गार्गी चेति।** गर्गस्यापत्यं स्त्रीत्यर्थः। गर्गादियञन्ताद् 'यञश्च' इति ङीप्। **गार्ग्यायणश्चेति।** गर्गाद्यञन्ताद् यून्यपत्ये 'यञिञोश्च' इति फक्। **गर्गा इति।** अत्र स्त्रीत्वकृतवैरूप्याधिक्येऽपि गोत्रप्रत्ययान्तः स्त्रीवाचको गार्गीशब्दः शिष्यते। स पुंवत्। तर्हि यञ् कुतो न श्रूयत इत्यत आह—**अस्त्रियामितीति।** उपलक्षणमिदम्। 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इत्यतः अस्त्रियामिति, तेनैवेति, बहुष्विति चानुवर्तमाने सतीत्यर्थः। एतेन पुंवदित्यस्य प्रयोजनमुक्तम्। गार्गी च गार्ग्यायणश्चेति विग्रहस्तु न दर्शितः। तथा सति अबहुत्वाद् यञो लुगभावे सति पुंस्त्वे स्त्रीत्वे च रूपं तुल्यम्—गार्ग्याविति, तत्र पुंवत्त्वं निरर्थकं स्यात्। उदाहरणान्तरमाह—**दाक्षी चेति।** दक्षस्य गोत्रापत्यं स्त्री दाक्षी। 'अत इञ्' इतीञन्ताद् 'इतो मनुष्यजातेः' इति ङीष्। **दाक्षायणश्चेति।** दक्षस्यापत्यं पुमान् दाक्षिः, तस्यापत्यं

गोत्रादिकृतम्। **स्त्री पुंवच्च। वृद्धा स्त्रीति।** गोत्रप्रत्ययान्तं स्त्रीवाचकमित्यर्थः। पुंवद्भावकृतवैलक्षण्यं स्फुटीकर्तुं द्विवचनान्तेन विग्रहमाह—**गर्गगार्ग्यायणाविति। अनुवर्तमान इति।** तद्राजस्य बहुषु–' इत्यतः 'पुंवत्' इत्यर्थातिदेशस्य फलमनेन दर्शितम्। अन्यथा स्त्रीत्वस्यानिवर्तनाल्लुङ् न स्यात्। 'गर्गान्पश्य' इत्यत्र नत्वं च

पुमान् स्त्रिया । (१-२-६७) स्त्रिया सहोक्तौ पुमाञ्छिष्यते, तल्लक्षण एव विशेषश्चेत् । हंसी च हंसश्च हंसौ । ९३७ **भ्रातृपुत्रौ स्वसृदुहितृभ्याम् । (१-२-६८)** भ्राता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ । ९३८

युवा दाक्षायणः । 'यञिञोश्चेति फक् । दाक्षी च दाक्षायणश्चेति विग्रहे दाक्षीशब्दः शिष्यते । तस्य पुंवत्त्वे सति ङीपो निवृत्तौ दाक्षिशब्दात् प्रथमाद्विवचने दाक्षी इति भवति । अत्र तल्लक्षणश्चेदेव विशेष इत्यप्यनुवर्तते । ततश्च भागवित्ती भागवित्तिकश्च, गार्गी च वात्स्यायनश्चेत्यत्र न भवति । **पुमान्स्त्रिया । तल्लक्षण एवेति ।** 'वृद्धो यूना–' इत्यतस्तदनुवृत्तेरिति भावः । **हंसी चेति ।** अत्र पुंस्त्वस्त्रीत्वमात्रकृतवैरूप्यात् पुंलिङ्गो हंसशब्दः शिष्यते । स्त्रीत्वपुंस्त्वकृतवैरूप्यादेव 'सरूपाणाम्–' इत्यस्याप्राप्तिः । मातृमातरावित्यत्र जननीवाचकपरिच्छेत्तृवाचकमातृशब्दयोस्तु नायमेकशेषः । एकविभक्तौ सरूपाणामित्यनुवर्त्य एकविभक्तौ सरूपाणां स्त्रीत्वपुंस्त्वेतरकृतवैरूप्यरहितानामित्याश्रयणात् । इह च मातरावित्यत्र 'अप्तृन्–' इति दीर्घतदभावाभ्यामपि वैरूप्यात् । अत एव हंसश्च वरटा चेत्यत्रापि नेत्यलम् । **भ्रातृपुत्रौ । स्वसृदुहि-**तृभ्यां सहोक्तौ क्रमाद् भ्रातृपुत्रौ शिष्येते । स्वरूपतोऽपि वैरूप्यादप्राप्तौ वचनम् ।

सिद्धम् । रूपातिदेशे तु नैतत्सिद्ध्येत्, सामान्यातिदेशे विशेषानतिदेशादित्याहुः । 'वृद्धो यूना' इत्याद्यनुवर्तनान्नेह—गार्गी च वात्स्यायनौ च । **पुमान्स्त्रिया ।** 'वृद्धो यूना–' इति निवृत्तम् । 'सरूपाणाम्' इति त्वनुवर्तते, 'भ्रातृपुत्रौ -' इत्युत्तरसूत्रारम्भात् । 'तेन हंसश्च वरटा च' इत्यत्र न भवति । अन्यथा स्यादेवातिप्रसङ्गः । हंसत्वजातिसाम्येन शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वात् । स्यादेतत्—गौरियं गौश्चायं तयोः सहोक्तौ 'एतौ गावौ' इति नियमतो न स्यात्, तल्लक्षणविशेषाभावात् । किं तु स्त्रीवाचकस्य पुंवाचकस्य वा 'सरूपाणाम्–' इत्येकशेषोऽनियमेन स्यात् । अत्राहुः—तदितरकृतविशेषाभावे तात्पर्यान्न दोष इति । 'इन्द्रेन्द्राण्यौ' इत्यादौ त्वेकशेषो न भवति । स्त्रीत्वपुंस्त्वेतरपुंयोगकृतविशेषस्य सद्भावात् । स्यादेतत्—'एतौ गावौ' इति नियमतो न स्यादिति मनोरमादौ यदुक्तं तत्कथं संगच्छताम् । 'त्यदादितः शेषे पुंनपुंसकतः–' इति नियमप्रवृत्त्या स्त्रीवाचिगोशब्दस्य शेषेऽपि 'एतौ गावौ' इति नियमतः प्रयोगः सिद्ध्यत्येवेति चेत्—अत्र केचित्—दिक्प्रदर्शनमात्रमिदम् । 'नीलौ गावौ' इति नियमतो न स्यादित्युदाहर्तव्यम् । अथवा, एतशब्दोऽत्रादन्तः कर्बुरवाची । एतश्च एता च एतौ गावौ—कर्बुरौ गावौ, 'सरूपाणाम्–' इत्यनेन स्त्रीलिङ्गशेषे तु एते गावौ' इत्यपि स्यादिति यथाश्रुतमेव समर्थनीयमित्याहुः, तदपरे न क्षमन्ते । 'त्यदादितः शेषे–' इति नियमाप्रवृत्तावपि 'पुमान्स्त्रिया' इति नियमप्रवृत्त्या 'नीलौ गावौ' 'एतौ गावौ' इति नियमतः

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् । (१-२-६९) अक्लीबेन सहोक्तौ क्लीबं शिष्यते, तच्च वा एकवत्स्यात्तल्लक्षण एव विशेषश्चेत् । शुक्लः पटः । शुक्ला शाटी । शुक्लं वस्त्रम् । तदिदं शुक्लम् । तानीमानि शुक्लानि । ९३६ **पित्रा माता । (१-२-७०)** मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च पितरौ—मातापितरौ वा । ९३७ **श्वशुरः श्वश्र्वा । (१-२-७१)**

नपुंसकम् । अन्यतरस्यांग्रहणम् एकवदित्यनेनैवान्वेति, आनन्तर्यात्, नत्वेकशेषेणेत्याह—**तच्चेति । तल्लक्षण एवेति ।** नपुंसकत्वानपुंसकत्वमात्रकृतवैरूप्यं चेदित्यर्थः । **शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रमिति ।** पटशब्दसमभिव्याहारात् शुक्लशब्दः पुंलिङ्गः, शाटीशब्दसमभिव्याहारात् स्त्रीलिङ्गः, वस्त्रशब्दसमभिव्याहारे तु नपुंसकलिङ्गः, 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्यमरोक्तेरिति भावः । तच्च सा च इदं च तत् । अयं च इयं च इदं च इदम् । शुक्लश्च शुक्ला च शुक्लं च शुक्लम् । अत्र नपुंसकान्येव शिष्यन्ते एकवच्च भवन्ति । **तानीमानि शुक्लानीति ।** नपुंसकत्वे एकशेषे सति एकवत्त्वाभावे रूपाणि । न चेतरेतरयोगविवक्षायां द्विबहुवचनान्तयोः, समाहारद्वन्द्वविवक्षायामेकवचनस्य च सिद्धत्वाद् एकवदिति व्यर्थमिति वाच्यम्, अत एवैकशेषप्रकरणस्य समाहारेऽप्रवृत्तिज्ञापनात् । तेन ओदनश्च ओदनं च तयोः समाहार ओदनमिति न भवति । ओदनशब्दो ह्यर्धर्चादिः । ओदनश्च ओदनं चेति इतरेतरयोगद्वन्द्वेऽपि ओदनमिति न भवति, अनभिधानात् । एवं च क्वचिदनभिधानस्यावश्याश्रयणीयतया द्वन्द्वमात्रस्यैकशेषविषयेऽनभिधानमाश्रित्य एकस्य शब्दस्यानेकार्थत्वं चाश्रित्य एकशेषप्रकरणं भाष्ये प्रत्याख्यातम् । **पिता मात्रा ।** 'पुमान् स्त्रिया' इत्यत्र सरूपाणामित्यनुवृत्तेरप्राप्ता-

---

सिद्धयत्येवेति । अत्र वदन्ति—'अद्वन्द्वतत्पुरुषविशेषणानाम्' इत्येतन्न्यायसिद्धमेव वचनम् । 'विशेष्ये यल्लिङ्गं तदेव विशेषणेष्वपि' इति सर्वसंमतत्वात्, एवं च द्वन्द्वतत्पुरुषविशेषणेष्विव एकशेषविशेषणेऽपि 'एतौ' इत्यत्र 'त्यदादितः शेषे—' इत्यादिनियमाप्रवृत्त्या विशेष्यगतमेव लिङ्गं भवतीति स्त्रीवाचिगोशब्दस्य शेषे 'एते' इति स्यादेवेति 'एतौ गावौ' इति नियमतो न स्यादित्याक्षेपः संगच्छत एवेति दिक् । **नपुंसकमन** । अन्यतरस्यांग्रहणम् 'एकवच्च' इत्यनेनैवानन्तर्यात्संबध्यते, न त्वेकशेषेणेत्याशयेनाह—**क्लीबं शिष्यते तच्च वा एकवदिति** । अनपुंसकेनेति किम्, शुक्लं च शुक्लं च शुक्ले । अत्र 'एकवच्च' इति न भवति । 'अस्य' ग्रहणम् 'अस्यैवैकशेषस्य एकवद्भावो यथा विज्ञायेत' इत्येवमर्थम् । अन्यथा उत्तरत्राप्येकवदित्यस्यानुवृत्तिः शङ्क्येत । **शुक्लः पट इत्यादि** । 'शुक्लः शुक्ला शुक्लम्' इत्येव विग्रहः, 'पटः पटी'

श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते, तल्लक्षण एव विशेषश्चेत् । श्वश्रूश्च श्वशुरश्च श्वशुरौ—श्वश्रूश्वशुरौ वा । **७३८ त्यदादीनि सर्वैर्नित्यम्** । (१-२-७२) सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते । स च देवदत्तश्च तौ । 'त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते' (वा ८०१) स च यश्च यौ, (सा च या च ये) । 'पूर्वशेषोऽपि दृश्यते' इति भाष्यम् । स च यश्चः तौ । 'त्यदादितः शेषे पुन्न-

---

विदं वचनं विकल्पार्थं च । **मातापितराविति** । 'पितुर्दशगुणं माता गौरवेणातिरिच्यते' इति स्मृत्या मातुरभ्यर्हितत्वात्पूर्वनिपातः । 'आनङृतः' इत्यानङ् । **श्वशुरः श्वश्र्वा** । **श्वश्रूश्वशुराविति** । श्वश्र्वा अपि मातृतुल्यत्वोक्तेरभ्यर्हितत्वम् । 'श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता' इति स्मृतेः । इह तल्लक्षणग्रहणानुवृत्तिः स्पष्टार्था, 'श्वशुरः श्वश्र्वा' इति शब्दग्रहणात् । **त्यदादीनि** । **सर्वैरिति** । त्यदादिभिरितरैश्चेत्यर्थः । **ताविति** । अत्र देवदत्तशब्दो निवर्तते । तच्छब्दस्तु शिष्यते । तद्देवदत्ताविति न भवति । सर्वैः किम् ? प्रत्यासत्त्या त्यदादिभिरेव सहोक्तावित्यर्थो मा भूदित्येतदर्थम् । **त्यदादीनां मिथ इति** । भाष्ये स्थितमेतत् । **यत् परमिति** । त्यदादिगणे यत् परं पठितं तच्छिष्यत इत्यर्थः, शब्दपरविप्रतिषेधाश्रयणादिति भावः । **स च यश्च यौ, सा च या च ये इति** । त्यदादिगणे यच्छब्दस्य तच्छब्दादूर्ध्वं पाठात् परत्वात् स एव शिष्यत इति भावः । **पूर्वशेषोऽपीति** । परशब्दस्येष्टवाचित्वात् क्वचित्पूर्वमपि शिष्यत इति भावः । अत्र 'द्विपर्यन्तानाम्' इति न भवति । अहं च भवांश्चावामिति भाष्योक्तेः । **त्यदादित इति** । आद्यादित्वात् षष्ठ्यर्थे तसिः । त्यदादीनां स्त्रीशेषेऽपि सहविवक्षितेषु यः पुमान्, यच्च नपुंसकं, तद्वशेन

इत्यादिप्रदर्शनं तु शुक्लशब्दस्य गुणिलिङ्गत्वस्फोरणाय । **पिता माता** । **श्वशुरः श्वश्र्वा** । नन्वेतत्सूत्रद्वयं व्यर्थम्, पितृशब्देन मातापित्रोः श्वशुरशब्देन श्वश्रूश्वशुरयोर्लक्षणया बोधसंभवात् । न च 'सरूपाणाम्' इत्यादिसूत्रसमूहवदिदमपि सूत्रद्वयं द्वन्द्वनिवृत्त्यर्थमावश्यकमिति वाच्यम्, पक्षे तस्यापीष्टत्वादिति चेत्—अत्राहुः—पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः केवलयोरुक्तविषये प्रयोगं वारयितुमारम्भणीयमेव सूत्रद्वयम्, अनभिधानमाश्रित्य प्रत्याख्यानस्यानुचितत्वादिति । **मातापितराविति** । 'पितुर्दशगुणं माता गौरवेणातिरिच्यते' इति स्मृतेर्मातुरभ्यर्हितत्वात्पूर्वनिपातः । 'आनङ्‌ॠतः—' इत्यानङ् । **श्वश्रूश्वशुराविति** । 'श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता' इति स्मृतेः श्वश्र्वा अभ्यर्हितत्वात्पूर्वनिपातः । **त्यदादीनि सर्वैः** । सर्वैः किम्, त्यदादिभिन्नैरपि सहोक्तौ यथा स्यात् । प्रत्यासत्त्या 'त्यदादिभिरेव सहोक्तौ' इत्यर्थो मा भूत् । **यत्परमिति** । शब्दपरविप्रतिषेधादिति भावः । **त्यदादित इति** ।

पुंसकतो लिङ्गवचनानि' (वा ७९६)। सा च देवदत्तश्च तौ। ता च देवदत्तश्च यज्ञदत्ता च तानि। पुन्नपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तच्च देवदत्तश्च ते। 'अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम्' (वा ८००)। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तच्च सा च अर्धपिप्पल्यौ ते। ९३१ ग्राम्यपशुसङ्घेष्व-

---

लिङ्गप्रतिपादकानि भवन्तीत्यर्थः। कानीत्याकाङ्क्षायामर्थात्त्यदादीन्येव सम्बध्यन्ते। **सा च देवदत्तश्च ताविति।** अत्र तच्छब्दः शिष्यते समभिव्याहृतदेवदत्त-शब्दलिङ्गश्च। देवदत्तशब्दस्तु निवर्तत एव। **पुन्नपुंसकयोरिति।** सहोक्ताविति शेषः। **परत्वादिति।** पुंनपुंसकतो लिङ्गवचनानीत्यत्र पुमपेक्षया नपुंसकस्य पाठतः परत्वावगमादित्यर्थः। **अद्वन्द्वेति।** द्वन्द्वतत्पुरुषविशेषणानां त्यदादीनां स्त्रीशेषे 'त्यदा-दितः शेषे पुंनपुंसकतो लिङ्गवचनानि' इत्येतन्न भवतीत्यर्थः। द्वन्द्व उदाहरति—**कु-क्कुटमयूर्याविमे इति।** अयं च इयं च इमे इत्यत्र 'त्यदादितः शेषे' इति पुंलिङ्ग-त्वं न भवति, किंतु विशेष्यनिघ्नतैव। यद्यपि द्वन्द्वे उभयपदार्थप्रधानत्वाद् उभयमपि विशेष्यम्, तथापि परवल्लिङ्गम्' इति परपदलिङ्गत्वात्तदधीनतैव विशेषणस्येति बोध्यम्। नच अयं च इयं च इत्यत्र स्त्रीशेष एव न भवति, 'पुमान् स्त्रिया' इत्युक्त-त्वात्। अतः पुंनपुंसकतः लिङ्गविधेः प्रसक्तिः कथमिति वाच्यम्, 'परवल्लिङ्गम्' इति हि द्वन्द्वतत्पुरुषयोः परवल्लिङ्गविधिः। अतः द्वन्द्वविशेषणस्य तत्पुरुषविशेषणस्य चानु-प्रयोगे तदेव लिङ्गमिति भाष्यकैयटयोः स्थितम्। ततश्च 'कुक्कुटमयूर्याविमे' इति उदाहरणे अयं च इयं च इति विग्रहे 'पुमान् स्त्रिया' इति पुंशेषेऽपि 'परवल्लिङ्गम्' इति विशेषणत्वात् स्त्रीलिङ्गत्वे सति तस्य 'त्यदादितः' इति पुंस्त्वं प्राप्तमनेन निषिध्यत इति नानुपपत्तिः। क्वचिन्मूलपुस्तकेषु तु मयूरीकुक्कुटाविमावित्यपि दृश्यते। तत्तु प्रकृतानुपयुक्तम्, अत्र मयूरीकुक्कुटाविति द्वन्द्वार्थस्य पुंलिङ्गतया इयं चायं च इमाविति तद्विशेषणस्यानुप्रयुज्यमानस्यापि 'पुमान् स्त्रिया' इति परिशिष्टस्य पुंलिङ्गस्य इदम्शब्दस्य

आद्यादित्वात्तसिः। 'त्यदादीनां शेषे सह विवक्षिते यः पुमान्, यच्च नपुंसकम्, तद्वशेन लिङ्गप्रतिपादकानि भवन्ति' इति वाच्यमित्यर्थः। कानीत्याकाङ्क्षायामर्थात्त्यदादीन्येव। अस्यापवादमाह—**अद्वन्द्वेति।** द्वन्द्वादिविशेषणानां पूर्वोक्तं नास्ति, किं तु विशेष्य-निघ्नतैवेत्यर्थः। नन्वेवं 'कुक्कुटमयूर्यौ' इत्यत्र उभयपदार्थप्रधानत्वेन उभयोरपि विशेष्य-त्वाद् विशेष्यनिघ्नतायामपि 'कुक्कुटमयूर्याविमे' इति नियमतो न स्यादिति चेत्—अत्र नव्याः—'परवल्लिङ्गम्–' इत्यनेन द्वन्द्वतत्पुरुषयोरुत्तरपदलिङ्गवत्त्वादुत्तरपदलिङ्ग-स्यैव द्वन्द्वतत्पुरुषप्रतिपाद्यत्वेन तल्लिङ्गाधीनतैवानुप्रयोगस्येति न काचिदनुपपत्तिरिति। **मयूरीकुक्कुटाविमाविति।** प्रकृतानुपयुक्तमप्येतत्प्रसङ्गादुक्तम्। **तच्चेति।**

तरुणेषु स्त्री। (१-२-७३) एषु सहविवक्षायां स्त्री शिष्यते। 'पुमान् स्त्रिया' (सू ९३३) इत्यस्यापवादः। गाव इमाः। ग्राम्य इति किम्। रुरव इमे। पशुग्रहणं किम्। ब्राह्मणा इमे। सङ्घेषु किम्। एतौ गावौ। अतरुणेषु किम्।

स्त्रीत्वाप्रसक्त्या तत्र 'त्यदादितः शेषे' इति पुंस्त्वविधेरप्रवृत्तत्वेन 'अद्वन्द्वतत्पुरुषविशेषणानाम्' इति निषेधस्यानुपयोगात्। तत्पुरुषे उदाहरति—**तच्चेति।** पिप्पल्या अर्धम् अर्धपिप्पली। 'अर्धं नपुंसकम्' इति तत्पुरुषः। अर्धपिप्पली च पिप्पल्यर्धं च अर्धपिप्पल्यौ। तच्च सा च ते। तत्र पिप्पल्यर्धशब्दविशेष्याभिप्रायं तदिति नपुंसकत्वम्। सेति स्त्रीत्वं तु अर्धपिप्पलीति विशेष्याभिप्रायम्। अत्र 'पुमान् स्त्रिया' इत्यस्य नैव प्रसक्तिः। किंतु 'नपुंसकमनपुंसकेनैकवत्' इति नपुंसकं शिष्टम्। तत्र 'परवल्लिङ्गम्' इति स्त्रीत्वम्। तस्य स्त्रीलिङ्गतया तद्विशेषणस्यापि 'परवल्लिङ्गम्' इति स्त्रीत्वम्। तस्य 'त्यदादितः शेषे' इति नपुंसकत्वं प्राप्तं निषिध्यते। एवं च ते इति स्त्रीलिङ्गमेव सिध्यति। यद्यपि स्त्रीत्वे नपुंसकत्वे वा ते इति द्विवचनस्य न कोऽपि विशेषः तथाप्यर्धपिप्पल्यस्ताः इत्युदाहार्यम्। तच्च तच्च सा चेति विग्रहः। **ग्राम्यपशु। एष्विति।** तरुणभिन्नेषु ग्राम्याणां पशूनां संघेष्वित्यर्थः। इह अनपुंसकेनेत्यनुवर्तनादाह—**पुमान् स्त्रियेत्यस्यापवाद इति।** गौश्च गौश्च गौश्च इति पुंलिङ्गस्त्रीलिङ्गेषु गोशब्देषु सहविवक्षितेषु 'पुमान् स्त्रिया' इत्येतद्बाधित्वा स्त्री शिष्यत इति भावः। ननु स्त्रीशेषे पुंशेषे वा न कोऽपि रूपभेद इत्यत आह—**इमा इति।** अनुप्रयोगे रूपभेदः फलमिति भावः। 'त्यदादितः शेषे' इति न भवति, 'गाव इमाः' इति भाष्यप्रयोगादित्याहुः। **रुरव इमे इति।** रुरुः कृष्णाख्यो मृगः। अग्राम्यपशुत्वान्न स्त्री शिष्यते। किंतु 'पुमान् स्त्रिया' इत्येकशेषः। ततश्चानुप्रयोगे इमे इति पुंलिङ्गत्वमेव। **ब्राह्मणा इमे इति।** ब्राह्मणी च ब्राह्मणाश्चेति विग्रहः। अपशुत्वान्न स्त्री शिष्यते। किंतु 'पुमान् स्त्रिया' इत्येकशेषः। अन्यथा ब्राह्मण्य इमा इति स्यात्। **एतौ गावाविति।** स्त्रीलिङ्ग-

---

पिप्पल्यर्धम्। **सा चेति।** अर्धपिप्पली। तत्पुरुषविशेषणमुदाहरति—**अर्धपिप्पल्यौ ते इति।** यद्यपि स्त्रीनपुंसकसाधारणतः 'ते' इति प्रयोगः, तथापि 'तच्च तच्च सा च अर्धपिप्पल्यस्ताः' इत्याद्युदाहरणमूह्यम्। **ग्राम्य।** ग्रामे भवा ग्राम्याः। 'ग्रामाद्यखञौ' इति यः। लिङ्गद्वयेऽपि 'गवः' इति रूपस्य समानत्वान् स्त्रीलिङ्गशेषस्य फलमाह—**इमा इति।** एवं च 'इमे च इमाश्च इमाः' इति स्त्रीलिङ्गशेष एव भवति, न त्वत्र 'त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि' इति पुंलिङ्गशेषः। 'गाव इमाः' इति भाष्योदाहरणादित्येके। अन्ये तु ग्राम्यपशुसङ्घविषयत्वाविशेषाद् 'गावः' इतिवत् 'इमाः' इति च स्त्रीलिङ्गशेष एव स्यादिति नास्ति शङ्कावकाश इत्याहुः। **एतौ गावा-**

वत्सा इमे। 'अनेकशफेष्विति वाच्यम्' (वा ८०४)। अश्वा इमे। इह सर्वत्रैकशेषे कृतेऽनेकसुबन्ताभावाद् द्वन्द्वो न। तेन शिरसी शिरांसि इत्यादौ समासस्येत्यन्तोदात्तः प्राण्यङ्गत्वादेकवद्भावश्च न। पन्थानौ पन्थानः इत्यादौ समासान्तो न।

इत्येकशेषप्रकरणम्।

पुंलिङ्गयोः सहोक्तौ असंघत्वान्न स्त्री शिष्यते। संघशब्दो हि बहूनां समुदाये वर्तते, अन्यथा एकशेषस्यानेकविषयत्वादेवानेकपरिग्रहे सिद्धे किं तेनेति भावः। स्त्रीशेषे तु एते इति अनुप्रयोगे रूपं स्यात्। **वत्सा इमे इति**। वत्साश्च वत्साश्च इति विग्रहः। तरुणत्वान्न स्त्री शिष्यते। अन्यथा वत्सा इमा इत्यनुप्रयोगः स्यात्। **अनेकशफेष्विति वाच्यम्**। वार्तिकमिदम्। एकशफा अश्वादयः, तेषां सहोक्तौ ग्राम्यपशुविति न भवति। **अश्वा इमे इति**। एकशफत्वान्न स्त्री शिष्यते। ततश्चानुप्रयोगे पुंलिङ्गत्वमिति भावः। ननु 'सरूपाणाम्' इति सूत्रे 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे' इत्यतः द्वन्द्वग्रहणानुवृत्त्या द्वन्द्वे एकशेष इति भाष्यात् कृते द्वन्द्वे एकशेषः स्यादित्यत आह—**इहेति**। इहोदाहृतेषु एकशेषविषयेषु सर्वत्र प्रसक्तं द्वन्द्वमनवकाशत्वादेकशेषो बाधते। कृते त्वेकशेषेऽनेकाभावाद् द्वन्द्वो नेत्यर्थः। द्वन्द्वसमासे एकशेष इति भाष्यं तु द्वन्द्वे प्रसक्ते सहविवक्षायामेकशेष इति व्याख्येयम्। ननु कृत एव द्वन्द्वे एकशेषो भवतु, का हानिरित्यत आह—**तेनेति**। द्वन्द्वात् प्रागेवैकशेषाश्रयणेनेत्यर्थः। कृते द्वन्द्वे एकशेषाभ्युपगमे शिरसी इति द्विवचने शिरांसीति बहुवचने च समासस्येत्यन्तोदात्तः स्यात्, प्राण्यङ्गत्वात् 'द्वन्द्वश्च प्राणि' इत्यादिना एकवद्भावश्च स्यादित्यर्थः। आदिना शिरोभ्यां शिरोभिरित्यादिसंग्रहः। **पन्थानाविति**। द्वन्द्वे कृते एकशेषाभ्युपगमे पन्थानौ पन्थानः, पथिभ्याम् पथिभिः इत्यादौ 'ऋक्पूः' इत्यप्रत्ययः समासान्तः स्यादिति भावः। नचात्र 'इतोऽत्सर्वनाम' इति सर्वनामस्थाने परेऽकार-

---

विति। एकशेषस्यानेकविषयत्वादेवानेकपरिग्रहे सिद्धे सङ्घग्रहणसामर्थ्याद्बहूनां समुदायोऽत्र गृह्यत इति भावः। **एकशेषे कृत इति**। विभक्त्युत्पत्त्यनपेक्षत्वेनान्तरङ्गत्वादिति भावः। नन्वेवं विषयभेदाद् 'द्वन्द्वापवाद एकशेषः' इत्युद्घोषः कथं प्रवर्तत इति चेत्—अत्राहुः—यद्येकशेषो न स्यात्, तर्हि विभक्तावुत्पद्यमानायां द्वन्द्वः स्यात्, कृते त्वेकशेषे स न भवतीति तार्किकीं प्राप्तिमादायापवादोद्घोष इति। **द्वन्द्वो नेति**। एतेन 'कृतद्वन्द्वानामेकशेषः' इति भ्रमो निरस्तः। न च तथैवास्तु, फले विशेषाभावादिति वाच्यमित्याह—**तेनेति**। **पन्थानाविति**। न चात्र 'इतोऽत्सर्वनामस्थाने' इति लिङ्गात्समासान्तः सुपरिहरः, 'इतोऽत्' इत्युक्तेऽपि 'सौ' इत्यनुवृत्त्या

अथ सर्वसमासशेषप्रकरणम् । २२ ।

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स द्विविधः । लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्होऽसाधुरलौकिकः । यथा राज्ञः पुरुषः,

---

विधानाल्लिङ्गात् समासान्तः सुपरिहरः । 'इतोऽत्' इत्युक्तेऽपि सावित्यनुवर्त्य पन्था इति सिद्धेरिति वाच्यम्, 'पथो विभाषा' इति समासान्ताभावे अपन्थानावित्यादौ 'इतोऽत्' इति सूत्रस्य सावकाशत्वात् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायाम् एकशेषप्रकरणं समाप्तम् ।

अथ प्रसङ्गात् सर्वसमासोपयुक्तं प्रकीर्णकं प्रकरणमारभते—**कृत्तद्धितेति** । कृदन्ताः तद्धितघटिताः समासा एकशेषाः सनादिप्रत्ययान्तधातवश्चेति वृत्तयः पञ्चविधा इत्यर्थः । वृत्तिसामान्यलक्षणमाह—**परार्थाभिधानं वृत्तिरिति** । 'समर्थः पदविधिः' इति सूत्रे भाष्ये स्थितमेतत् । अभिधानमिति करणे ल्युट् । सामान्ये नपुंसकम् । विग्रहवाक्यावयवपदार्थेभ्यः परः अन्यः योऽयं विशिष्टैकार्थः तत्प्रतिपादिका वृत्तिरित्यर्थः । प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन प्रथमविगृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादिका वृत्तिरिति यावत् । समुदायशक्तिश्च 'समर्थः पदविधिः' इति परिभाषया लभ्या । तत्र समासतद्धितयोः पदविधित्वं स्पष्टमेव, सुप्सुपा' इत्यनुवर्त्य समासविधानात्, सुबन्तात्तद्धितोत्पत्तेः वक्ष्यमाणत्वात् । कृतामपि केषांचित् 'कर्मण्यण्' इति उपपदनिमित्तकानां पदविधित्वमस्त्येव । 'सुप आत्मनः क्यच्' इत्यादीनामपि पदविधित्वमस्त्येव । एकशेषविधावपि द्वन्द्व इत्यनुवृत्तेः द्वन्द्वविषये तद्विधानाद् एकार्थीभावोऽस्त्येव इति मञ्जूषादौ विस्तरः । **वृत्त्यर्थावबोधक-**

'पन्थाः' इति सिद्धेरिति वाच्यम् । 'पथो विभाषा' इति समासान्ताभावे 'अपन्थानौ' इत्यादौ इतोऽत्–' इति सूत्रस्य सावकाशत्वात् । इत्येकशेषः । प्रसङ्गादाह— **कृत्तद्धितेत्यादि । पञ्च वृत्तय इति** । पञ्चानां 'वृत्तिः' इति पूर्वाचार्याणां संज्ञा इहाप्याश्रीयत इति भावः । तल्लक्षणमाह—**परार्थेति** । प्रत्ययान्तर्भावेनापरपदार्थान्तर्भावेन वा यो विशिष्टोऽर्थः स परार्थः । स चाभिधीयते येन तत्परार्थाभिधानम् । अत एव तिङन्तं वृत्तिर्न भवति । तत्रैकार्थीभावानभ्युपगमात् । अन्यथा 'मृदु पचति' इत्यादौ फले मृदुत्वान्वयो न स्यात् 'सविशेषणानां वृत्तिर्न भवति, वृत्तस्य

राजन् अस् पुरुष सु इति। अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा। समासश्चतुर्विध इति तु प्रायोवादः। अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि 'सह सुपा' (सू ६४९) इति समासविधानात्। पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः, इत्यपि प्राचां वादः प्रायोऽभिप्रायः। सूपप्रति उन्मत्तगङ्गम् इत्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे, द्वित्राः इत्यादिबहुव्रीहौ,

---

मिति। यद्यपि वृत्तावेव समुदायशक्त्या विशिष्टैकार्थप्रतिपादकता, नतु वाक्ये इति समर्थसूत्रे भाष्ये प्रपञ्चितम्। तथापि समासवृत्तियोग्यविभक्त्यन्तपदानां पृथक्प्रयुज्यमानानां समूहो विग्रहवाक्यमिति बोध्यम्। **परिनिष्ठितत्वादिति**। व्याकरणसंस्कृतत्वादित्यर्थः। **प्रयोगानर्ह इति**। व्याकरणसंस्कृतत्वाभावादित्यर्थः। यथेत्युदाहरणप्रदर्शने। **राज्ञः पुरुष इति**। लौकिकविग्रहवाक्यमिति शेषः। **राजन् अस् पुरुष सु इति**। अलौकिकविग्रहवाक्यमिति शेषः। **अविग्रहो नित्यसमास इति**। लौकिकविग्रहवाक्यरहित इत्यर्थः, समासस्य नित्यत्वादिति भावः। **अस्वपदेति**। समस्यमानपदसमानार्थकपदान्तरकृतविग्रहो वा नित्यसमास इत्यर्थः। संज्ञाविषयसमासे तु वाक्येन संज्ञानवगमेऽपि वृत्तिघटकपदज्ञापनाय समस्यमानपदार्थबोधकवाक्यप्रयोगो भवत्येव। तत्र समासनित्यत्ववादस्तु वाक्यस्य वृत्तिसमानार्थकत्वाभावाद् गौण इत्याहुः। **चतुर्विध इति**। अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वश्चेति चतुर्विध इत्यर्थः। **प्रायोवाद इति** प्रायस् इत्यव्ययं बाहुल्ये। बाहुल्याभिप्रायकश्च तस्य चातुर्विध्यप्रवाद इत्यर्थः। कुत इत्यत आह— **अव्ययीभावेति**। **बहिर्भूतानामपीति**। समासानामिति शेषः। **प्रायोऽभिप्राय इति**। बाहुल्यतात्पर्यक इत्यर्थः। **सूपप्रतीति**। इह द्वन्द्वे चेत्यनन्तरं व्युतमभावादिति पदम् अव्ययीभावे इत्यनन्तरं, तत्पुरुषे इत्यनन्तरं, बहुव्रीहाविस्यनन्तरं चान्वेति। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्रधानतया, उन्मत्तगङ्गं देशः, लोहितगङ्गं देशः, इत्यव्ययीभावेऽन्यपदार्थप्रधानतया पूर्वपदार्थप्राधान्याभावादित्यर्थः। अतिमालादौ तत्पुरुषे पूर्वपदार्थप्रधानतया उत्तरपदार्थप्राधान्याभावादित्यर्थः। द्वित्रा इति बहुव्रीहौ उभयपदार्थप्रधानतयाऽन्यपदार्थप्राधान्याभावादित्यर्थः। दन्तोष्ठमित्यादिद्वन्द्वे समाहार-

---

च विशेषणयोगो न' इत्यभ्युपगमादित्येके। समर्थसूत्रे कैयटस्त्वाह--'परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः। यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते' इति। **अविग्रह इति**। लौकिकविग्रहरहित इत्यर्थः। **अस्वपदेति**। समस्यमानयावत्पदाघटित इत्यर्थः।

दन्तोष्ठम् इत्यादिद्वन्द्वे चाभावात्। तत्पुरुषविशेषः कर्मधारयः। तद्विशेषो द्विगुः। अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव। तत्पुरुषस्य क्वचिदेवेत्युक्तम्। किं च।

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥

सुपां सुपा, राजपुरुषः। तिङा, पर्यभूषयत्। नाम्ना, कुम्भकारः। धातुना, कटप्रूः, अजस्रम्। तिङां तिङा, पिबतखादता। खादतमोदता। तिङां सुपा।

स्यैव प्रधानतया उभयपदार्थप्राधान्याभावादित्यर्थः। **तत्पुरुषविशेषः कर्मधारय इति**। 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इत्युक्तेरिति भावः। **तद्विशेषो द्विगुरिति**। कर्मधारयविशेष इत्यर्थः। 'संख्यापूर्वो द्विगुः' इत्यादेरिति भावः। **अनेकपदत्वमिति**। द्वित्रिचतुरादिपदकत्वमित्यर्थः। 'अनेकमन्यपदार्थे' इति बहुव्रीहिगतस्यानेकग्रहणस्य द्वन्द्वविधावप्यनुवृत्तेरिति भावः। **क्वचिदेवेति**। द्व्यह-जात इत्यादावित्यर्थः। **इत्युक्तमिति**। भाष्यादाविति शेषः। **किंचेति**। अव्ययमिदं विशेषान्तरप्रदर्शने। **सुपां सुपेति**। सुबन्तानां सुबन्तेन तिङन्तेन प्रातिपदिकेन धातुना च समासः। अथेति पूर्ववाक्यव्यवच्छेदे। **तिङामिति**। तिङन्तानां तिङन्तेन सुबन्तेन च समास इत्येवं षड्विधः समासो ज्ञेय इत्यर्थः। **सुपेति**। सुपेत्यस्योदाहरणं वक्ष्यत इत्यर्थः। **राजपुरुष इति**। राज्ञ इत्यस्य षष्ठ्यन्तस्य पुरुष इति सुबन्तेन समासः। **तिङेति**। सुपां तिङेत्यस्योदाहरणं वक्ष्यत इत्यर्थः। **पर्यभूषयदिति**। 'सह सुपा' इत्यत्र सहेति योगविभागात् परीति सुबन्तस्य तिङन्तेन समासः। **नाम्नेति**। सुपां प्रातिपदिकेन समास उदाहरणं वक्ष्यत इत्यर्थः। **कुम्भकार इति**। 'उपपदमतिङ्' इति कुम्भस्येति षष्ठ्यन्तस्य कारेति प्रातिपदिकेन समासः, 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इत्युक्तेरिति भावः। **धातुनेति**। सुपां धातुना समासे उदाहरणं वक्ष्यत इत्यर्थः। **कटप्रूरिति**। 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' इति वार्तिकेन 'प्रु गतौ' इति धातुना समासो निपातितः, नतु तिङन्तेनोपपदसमास इति भ्रमितव्यम्, क्विब्विधाविह सप्तमीनिर्देशाभावेन उपपदत्वाभावात्। अथ सुपां धातुनोदाहरणान्तरमाह—**अजस्रमिति**। 'नमिकम्पिस्म्यजसकमिहिंस-

---

द्वन्द्वबहुव्रीह्योरेवेति। अनेकग्रहणतदनुवृत्तिभ्यां तद्विधानाद्बहुपदसमासत्वं तयोरेव संभवतीति भावः। **क्वचिदेवेति**। द्व्यहजात इत्यादौ। **नाम्नेति**। प्रातिपदिकेनेत्यर्थः। **कुम्भकार इति**। अत्र हि सुबुत्पत्तेः प्रागेवोपपदसमासः। **कटप्रूः**। **अजस्र-**

कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा । एहीडादयोऽन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः ।

इति सर्वसमासशेषप्रकरणम् ।

अथ सर्वसमासान्तप्रकरणम् । २३ ।

९४० ऋक्पूरब्धूःपथामानक्षे । (५-४-७४) अ अनक्षे इति च्छेदः । ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवः स्यात्, अक्षे या धूस्तदन्तस्य तु न ।

दीपो रः' इति सूत्रे रप्रत्ययविधौ जसधातुना सह नञ्समासो निपातितः । **तिङां तिङेति** । समासे उदाहरणं वक्ष्यत इत्यर्थः । **पिबतखादतेति** । मयूरव्यंसकादित्वात् तिङन्तस्य तिङन्तेन समासः । **तिङां सुपेति** । समासे उदाहरणं वक्ष्यत इत्यर्थः । **कृन्तविचक्षणेति** । हे विचक्षण कृन्त छिन्धीत्यर्थः । इह तिङन्तस्य सुबन्तेन समासः कथमित्यत आह—**एहीडादय इति** । अत्र सुपां तिङेत्यनेनैव तिङां सुबन्तेनेत्यस्यापि ग्रहणात् समासस्य षड्विधत्वं चिन्त्यम् । पञ्चविधत्वमेव युक्तम्, उभयत्रापि सुप्तिङ्घटितत्वाविशेषादित्याहुः । अन्ये तु सुपां तिङेत्यनेन सुबन्तपूर्वपदकतिङन्तोत्तरपदकसमासस्य ग्रहणम् । तिङां सुबन्तेनेत्यनेन तु तिङन्तपूर्वपदकसुबन्तोत्तरपदकसमासस्य ग्रहणमित्याहुः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां सर्वसमासशेषप्रकरणं समाप्तम् ।

अथ सर्वसमाससाधारणसमासान्ता निरूप्यन्ते—**ऋक्पूरब्धूः । छेद इति ।** सूत्रे अ इति लुप्तप्रथमान्तनिर्देश इति भावः । समासान्ता इत्यधिकृतम् । ऋगादिभिः समासो विशेष्यते । तदन्तविधिः । तदाह—**ऋगाद्यन्तस्येति** । ऋक्, पुर्, अप्,

मिति । 'क्विब्वचिप्रच्छि–' इति वार्तिके 'नमिकम्पि–' इति सूत्रे च 'कटप्रूः' 'अजस्रम्' इति निपातनाद्धातुना समासः । **पिबतखादतेति** । 'आख्यातमाख्यातेन–' इति मयूरव्यंसकादौ पाठात्समासः ।

इति तत्त्वबोधिन्यां सर्वसमासशेषप्रकरणम् ।

ऋक्पूरब्धूः । 'अ' इति लुप्तप्रथमैकवचनान्तं, 'समासान्ताः' इति त्वधिक्रियते तदाह—**समासस्याप्रत्ययोऽन्तावयव इति** । 'अनक्षे' इत्येतत् सामान्यतः

अर्धर्चः । अनृचबह्वृचावध्येतर्येव । नेह, अनृक्साम । बह्वृक्सूक्तम् । विष्णोः पूर्विष्णुपुरम् । क्लीबत्वं लोकात् । विमलापं सरः । ९४१ द्व्यन्तरुपसर्गेभ्योऽप ईत् । (६-३-९७) अप इति कृतसमासान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्योऽपस्य ईत्स्यात् । द्वयोर्गता आपो यस्मिन्निति द्वीपम् । अन्तरीपम् ।

धुर्, पथिन् एतदन्तस्येत्यर्थः । **अप्रत्यय इति** । अकारात्मकप्रत्यय इत्यर्थः । **अक्षे या धूरिति** । अक्षसंबन्धिनी या धूरित्यर्थः । सूत्रे संबन्धिनोऽधिकरणत्वविवक्षया अनक्षे इति सप्तमी । अनक्षे इति च धूर्शब्देनैव संबध्यते, अन्यैरसंभवादिति भावः । **अर्धर्च इति** । ऋचोऽर्धमिति विग्रहः । 'अर्धं नपुंसकम्' इति समासः । अकारः समासान्तः । 'अर्धर्चाः पुंसि च' इति पुंस्त्वम् । **अनृचबह्वृचावध्येतर्येवेति** । अविद्यमानाः ऋचः यस्येति विग्रहः । अनृचः केवलयजुरध्येता । बह्वः ऋचः यस्येति बह्वृचः ऋक्शाखी इत्युदाहरणम् । अध्येतर्येवेति नियमस्य प्रयोजनमाह—**नेहेति । अनृक्सामेति** । अविद्यमानाः ऋचः यस्मिन्निति विग्रहः । ऋच्यनध्यूढं प्रजापतेर्हृदयं साम । **बह्वृक्सूक्तमिति** । बहवः ऋचः यस्मिन्निति विग्रहः । अथ पूर्शब्दान्तस्योदाहरति—**विष्णोरिति** । ननु पूर्शब्दस्य स्त्रीत्वात् 'परवल्लिङ्गम्' इति विष्णुपुरशब्दस्य स्त्रीत्वं युक्तमित्यत आह—**क्लीबत्वं लोकादिति** । अथाप्शब्दान्तस्योदाहरति—**विमलापं सर इति** । विमलाः आपः यस्मिन्निति विग्रहः । **द्व्यन्तरुप । कृतसमासान्तस्येति** । अकारप्रत्ययान्तस्येत्यर्थः । **एभ्य इति** । द्वि अन्तर् उपसर्ग एतेभ्य इत्यर्थः । **अपस्येति** । अकारप्रत्ययान्तस्याप्शब्दस्येत्यर्थः । **ईत्स्यादिति** । 'आदेः परस्य' इति परिभाषया आदेरकारस्येत्यर्थः । **द्वयोर्गता इति** । द्वयोः पार्श्वयोर्गता आपो यस्मिन्निति विग्रहः । व्यधिकरणपदो

श्रुतमपि धुरैव संबध्यते सामर्थ्यात्, नान्यैरित्याशयेन व्याचष्टे—**अक्षे या धूरिति । तदन्तस्य तु नेति** । सूत्रे संबन्धिनोऽधिकरणत्वविवक्षया सप्तमी । तेन अक्षसंबन्धिनी या धूस्तदन्तस्य नेत्यर्थः । यद्यत्र 'अक्षे पूर्वपदे न' इति व्याख्यायेत, तर्हि 'दृढधूरक्षः' इत्यत्र निषेधो न स्यात् । यदि तु 'अक्षे समासार्थे न' इति व्याख्यायेत, तदा 'अक्षधूः' इत्यत्र न स्यात् । तस्मादुभयसंग्रहार्थमुक्तव्याख्यानमेव ज्यायः । **अर्धर्च इति** । अर्धं नपुंसकम्' इति समासः । 'अर्धर्चाः पुंसि च' इति पुंस्त्वम् । **अनृगित्यादि** । अनुक्तसमासान्तत्वात् 'शेषाद्विभाषा' इति कप्प्रत्यये 'अनृचकम्' 'बह्वृचकम्' इत्यपि बोध्यम् । **विष्णुपुरमिति** । यद्यपि पुरशब्देन समासेऽप्येतत्सिध्यति, तथापि 'विष्णुपूः' इत्यनिष्टवारणाय सूत्रे पूर्ग्रहणम् । **कृतसमासान्तस्येति** । 'येन विधिः-' इति सूत्रे 'आपस्तिष्ठन्ति स्वापस्तिष्ठन्ति' इति भाष्यादिति भावः । **अन्तरीप-**

प्रतीपम् । **समीपम्** । 'समापो देवयजन'मिति तु समा आपो यस्मिन्निति बोध्यम्। कृतसमासान्तग्रहणान्नेह, स्वप् स्वपी । 'अवर्णान्ताद्वा' (वा २०४५) । प्रेपम् । परेपम् । प्रापम् । परापम् । ९४२ **ऊदनोर्देशे** । (६-३-९८) अनोः परस्यापस्य ऊत्स्याद्देशे । अनूपो देशः । राजधुरा । अक्षे तु अक्षधूः । दृढधूरक्षः । सखिपथः,

---

बहुव्रीहिः । अकारप्रत्ययः, ईत्त्वं, सवर्णदीर्घश्च । **अन्तरीपमिति** । अन्तर्गता आपो यस्मिन्निति विग्रहः । **प्रतीपमिति** । प्रतिकूला आपो यस्मिन्निति विग्रहः । उपसर्गात् परत्वाद् ईत्त्वम् । **समीपमिति** । संगता आपो यस्मिन्निति विग्रहः । उपसर्गात् परस्योदाहरणान्तरमिदम् । **समापो देवयजनमिति** । श्रुतिरेषा । अत्र उपसर्गात् परत्वाभावाद् ईत्त्वं नेति भावः । देवा इज्यन्ते अस्मिन्निति देवयजनं यज्ञभूमिः । समाप इति पुंस्त्वं छान्दसम् । भाष्ये तु समाप ईत्त्वं नेत्युक्त्वा समापं नाम देवयजनमित्युदाहृतम् । तत्र समापशब्दो देवयजनविशेषवाच्येव विवक्षितः, 'समीपसमृद्धि' इति निर्देशात्, समीपमिति भाष्ये उदाहरणाच्च । **स्वबिति** । शोभना आपो यस्येति विग्रहः । 'न पूजनात्' इति समासान्तनिषेधः । अकृतसमासान्तत्वादीत्त्वं न । **स्वपी इति** । प्रथमाद्विवचनमिदम् । **अवर्णान्ताद्वेति** । अवर्णान्तादुपसर्गात् परस्यापस्य ईत्त्वं वा वक्तव्यमित्यर्थः । **प्रेपम्, प्रापमिति** । प्रगता आपो यस्येति विग्रहः । **परेपम्, परापमिति** । परागता आपो यस्येति विग्रहः । **ऊदनोर्देशे** । ईत्त्वस्यापवादः । **ऊत् स्यादिति** । 'आदेः परस्य' इति ज्ञेयम् । **अनूपो देश इति** । अनुकूला आपो यस्मिन्निति विग्रहः । अप्रत्ययः, ऊत्त्वं सवर्णदीर्घश्च । अनूप इत्यत्र ऊपोऽवग्रहणार्थं दीर्घोच्चारणमिति भाष्यम् । बह्वृचास्तु अनूपो गोमान् गोभिरित्यत्र नावगृह्णन्ति । तदेवम् 'ऋक्पूः'

मित्यादि । अन्तर्गताः, प्रतिकूलाः, संगताश्चापोऽस्मिन्निति विग्रहः । उपसर्गग्रहणं प्रादेरुपलक्षणार्थम् । **समाप इति** । अनुपसर्गत्वान्नेत्वमिति भावः । भाष्ये तु 'समाप ईत्वप्रतिषेधो वक्तव्यः' इत्युक्तम् । स च देवयजनरूपविशेषार्थपरः 'समीपसमृद्धि–' इति निर्देशात्, 'समीपम्' इति भाष्योदाहरणाच्चेति ज्ञेयम् । **देवयजनमिति** । देवा इज्यन्ते अस्मिन्निति व्युत्पत्त्या यज्ञभूमिः । **स्वबिति** । 'न पूजनात्' इति समासान्ताभावः । **अवर्णान्ताद्वेति** । 'द्व्यन्तर्–' इति सूत्रे 'ईत्वमनवर्णात्' इति वक्तव्यम् । इह माभूत् 'प्रापं परापम्' इति भाष्योक्तेः, 'गतिश्च' इति सूत्रे 'प्रेपं परेपम्' इति भाष्योक्तेश्चेति भावः । **ऊदनोः** । दीर्घोच्चारणं कस्मिंश्चिच्छाखायामवग्रहार्थम् । बह्वृचास्तु 'अनूपे गोमान् गोभिः' इत्यत्रानूपशब्दं नावगृह्णन्ति । **अनूप इति** । अनुगता आपोऽस्मिन्नित्यनूपो देशः । 'जलप्रायमनूपं स्यात्' इत्यमरः ।

रम्यपथो देशः। ९४३ अच्प्रत्यन्ववपूर्वात्सामलोम्नः। (५-४-७५) एतत्पूर्वात्सामलोमान्तात्समासादच्स्यात्। प्रतिसामम्। अनुसामम्। अवसामम्। प्रतिलोमम्। अनुलोमम्। अवलोमम्। 'कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते' (वा ५०४६) कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः प्रासादः। 'संख्याया नदीगोदावरीभ्यां च' (वा ५०४७)। पञ्चनदम्। सप्तगोदावरम्। अच् इति

इति सूत्रगतः अप्शब्दः प्रपञ्चितः। अथ धूर्शब्दान्तस्योदाहरति—**राजधुरेति।** राज्ञो धूरिति विग्रहः। धूर्शब्दोऽत्र राज्ये लाक्षणिकः। अकारप्रत्ययः। 'परवल्लिङ्गम्' इति स्त्रीत्वम्। टाप्। **अक्षे त्विति।** अक्षसंबन्धिनी या धूस्तदन्ताद् अकारप्रत्ययो न। **अक्षधूरिति।** अक्षो नाम रथावयवदण्डविशेषः, यदग्रयोश्चक्रे आसज्येते तस्याक्षस्याग्रं धूः। अनेन 'अक्षे समासार्थे धुरो नाकारप्रत्ययः' इति व्याख्यानेऽत्र निषेधो न स्यादिति सूचितम्। **दृढधूरक्ष इति।** दृढा धूर्यस्येति विग्रहः। एतेनाक्षे पूर्वपदे धुरो नाकारप्रत्यय इति व्याख्याने अत्र निषेधो न स्यादिति सूचितम्। तदेवम् 'ऋक्पूः' इति सूत्रे धूर्शब्दः प्रपञ्चितः। अथ पथिन्शब्दस्योदाहरति—**सखिपथाविति।** सखा च पन्थाश्चेति द्वन्द्वः। अकारप्रत्ययः। 'नस्तद्धिते' इति टिलोपः। सखिपथ इति पाठे तु सख्युः पन्थाः इति तत्पुरुषः। **रम्यपथ इति।** रम्यः पन्था यस्येति विग्रहः। **अच्प्रत्यन्वव। एतत्पूर्वादिति।** प्रति, अनु, अव एतत्पूर्वकादित्यर्थः। **प्रतिसाममिति।** प्रतिगतं सामेति विग्रहः। अच्, 'नस्तद्धिते' इति टिलोपः। **अनुसाममिति।** अनुगतं सामेति विग्रहः। अच्, टिलोपः। **अवसाममिति।** अवकृष्टं सामेति विग्रहः। अच्, टिलोपः। **प्रतिलोममिति।** प्रतिगतं लोमेति विग्रहः। **अनुलोममिति।** अनुगतं लोमेति विग्रहः। **अवलोममिति।** अवगतं लोमेति विग्रहः। सर्वत्राच्, टिलोपः। **कृष्णोदगिति।** नेदं वार्तिकम्। किंत्वच्प्रत्येत्यत्र अजिति योगविभागमूलाभियुक्तोक्तिरेषा। **कृष्णेति।** कृष्णा भूमिः यस्य, उदीची भूमिः यस्य, पाण्डुः भूमिः यस्य, द्वे भूमी यस्य, तिस्रो भूमयः यस्येति च विग्रहः। प्रासादः सर्वत्र विशेष्यः। **संख्याया इति।** इदमप्यजिति योगविभागमूलकमेव। संख्यायाः परो यो नदीशब्दः गोदावरीशब्दश्च ताभ्यामजिष्यत इत्यर्थः। **पञ्चनदमिति।** पञ्चानां नदीनां समाहार इति विग्रहः। **सप्तगोदावरमिति।** सप्तानां गोदावरीणां समाहार इति विग्रहः। 'नदीभिश्च' इत्यव्ययीभावः। अचि 'यस्येति च' इति लोपः।

प्रतिसाममिति। अव्ययीभावः प्रादिसमासो बहुव्रीहिर्वा। एवमनुसामादावप्यूह्यम्। **कृष्णोदगिति।** 'अच्' इति योगविभागेन गतार्थमिदम्। एवमुत्तरवार्तिकमपि।

योगविभागादन्यत्रापि। पद्मनाभः। ९४४ अक्ष्णोऽदर्शनात्। (५-४-७६) अचक्षुःपर्यायादक्ष्णोऽच्स्यात्समासान्तः। गवामक्षीव गवाक्षः। ९४५ **अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः।** (५-४-७७) एते पञ्चविंशतिरजन्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वारि यस्य अचतुरः। विचतुरः। सुचतुरः। 'त्र्युपाभ्यां चतुरोऽजिष्यते' (वा ३३२१)। त्रिचतुराः। चतुर्णां समीपे उपचतुराः। तत एकादश द्वन्द्वाः।

'नाव्ययीभावात्' इत्यम्। **अन्यत्रापीति**। अजिति शेषः। **पद्मनाभ इति**। पद्मं नाभौ यस्येति विग्रहः। वस्तुतस्तु योगविभागस्य भाष्येऽदर्शनात् पृषोदरादित्वमेवोचितम्। **अक्ष्णोऽदर्शनात्**। अदर्शनादिति च्छेदः। दृश्यतेऽनेनेति दर्शनं चक्षुः। करणे ल्युट्। अचक्षुर्वाचिन इति फलितम्। तदाह—**अचक्षुःपर्यायादिति। गवामक्षीवेति**। अक्षिशब्दस्तत्सदृशे लाक्षणिक इति सूचयितुमिवशब्दः प्रयुज्यते। मुख्यवृत्त्या चक्षुर्वाचकत्वाभावादच्। पुंस्त्वं लोकात्। **अचतुर। आद्यास्त्रयो बहुव्रीहय इति**। बहुव्रीहय एवेत्यर्थः। भाष्यवाक्यमिदम्। **अचतुर इति**। 'नञोऽस्त्यर्थानाम्' इति विद्यमानपदलोपः। **विचतुर इति**। विगतानि चत्वारि यस्येति विग्रहः **सुचतुर इति**। सु शोभनानि चत्वारि यस्येति विग्रहः। 'न पूजनात्' इति निषेधो बाध्यते। **त्र्युपाभ्यामिति**। वार्तिकमिदम्। त्रि उप आभ्यां परो यश्चतुर्शब्दस्तस्मादजिष्यते। **त्रिचतुरा इति**। त्रयो वा चत्वारो वेति विग्रहः। 'संख्ययाव्ययासन्न' इति बहुव्रीहिः। 'बहुव्रीहौ संख्येये डच्' इति डचं बाधित्वाऽच्। डचि तु टिलोपः स्यात्। **उपचतुरा इति**। त्रयः पञ्च

कृष्णाभूम इत्यादयो बहुव्रीहयः। **पद्मनाभ इति**। 'पद्मं नाभावस्य' इति विग्रहः। गड्वादित्वात्सप्तम्यन्तस्य परनिपातः। 'पद्माकारा नाभिरस्य' इति वा। एवमूर्णनाभोऽपि ज्ञेयः। तत्र तु 'ङ्यापोः संज्ञाछन्दसोः' इति ह्रस्वो विशेषः। **अक्ष्णो**। दृश्यतेऽनेनेति दर्शनं चक्षुः, तद्वाचिनोऽक्षिशब्दस्य पर्युदासादमुख्यस्य ग्रहणमित्याशयेनाह — **अचक्षुःपर्यायादिति। गवाक्ष इति**। गावः किरणाः। अक्षिशब्दो रन्ध्रवाची, षष्ठीसमासः। **अचतुर। निपात्यन्त इति**। निपातनफलं तु समासविशेषनियमः, टिलोपादिकं च तदाह—**आद्या इति। बहुव्रीहय इति**। बहुव्रीहय एवेत्यर्थः। तेन तत्पुरुषे अचत्वारो विचत्वार इत्येव भवतीति भावः। एवमुत्तरत्राप्यवधारणमूह्यम्। **त्रिचतुरा इति**। त्रयश्चत्वारो वेति विग्रहः। 'संख्ययाव्ययासन्ना–' इति

स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिणी च भ्रुवौ च अक्षिभ्रुवम्। दाराश्च गावश्च दारगवम्। ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम्। निपातनाट्टिलोपः। पदष्ठीवम्। निपातनात्पादशब्दस्य पद्भावः। नक्तं च दिवा च नक्तन्दिवम्। रात्रौ च दिवा च रात्रिन्दिवम्। रात्रेर्मान्तत्वं निपात्यते। अहनि च दिवा चाहर्दिवम्। वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थः। सरजसमिति साकल्येऽव्ययीभावः।

वेत्यर्थः। 'संख्ययाव्यय' इति बहुव्रीहिः। अच्। **तत एकादश द्वन्द्वा इति।** द्वन्द्वा एवेत्यर्थः। इदमपि भाष्यवाक्यम्। **स्त्रीपुंसाविति।** स्त्री च पुमांश्चेति विग्रहः। अच्। स्त्रीपुमांसाविति न भवति। **धेन्वनडुहाविति।** धेनुश्च अनड्वांश्चेति विग्रहः। अच्। धेन्वनड्वाहाविति न भवति। समाहारद्वन्द्वे तु 'द्वन्द्वाच्चुदषहान्तात्' इत्येव सिद्धम्। **ऋक्सामे इति।** ऋक्च साम चेति विग्रहः। अच्, टिलोपः। ऋक्सामनी इति न भवति। **वाङ्मनसे इति।** वाक् च मनश्चेति विग्रहः। अच्। वाङ्मनसी इति न भवति। **अक्षिभ्रुवमिति।** अच् 'प्राण्यङ्गत्वादेकवत्त्वम्। अक्षिभ्रु इति न भवति। **दारगवमिति।** समाहारद्वन्द्वादच्। दारगु इति न भवति। इतरेतरयोगद्वन्द्वे तु दारगावः। **ऊर्वष्ठीवमिति।** प्राण्यङ्गत्वादेकवत्त्वम्। ऊरू सक्थिनी। अष्ठीवन्तौ जानुनी। 'सक्थि क्लीबे पुमानूरुः' इति, 'जानूरुपर्वाष्ठीवदस्त्रियाम्' इति चामरः। नन्वडित्त्वादनन्तत्वाच्च कथं टिलोप इत्यत आह—**निपातनाट्टिलोप इति। पदष्ठीवमिति।** पादौ चाष्ठीवन्तौ चेति द्वन्द्वादच्। प्राण्यङ्गत्वादेकवत्त्वम्। नन्वभत्वात् कथमिह पादशब्दस्य पद्भाव इत्यत आह—**निपातनादिति।** नक्तमिति मान्तमव्ययम्। दिवेत्याकारान्तमव्ययम्। नक्तंदिवेति द्वन्द्वादच्। 'यस्येति च' इत्याकारलोपः, 'अव्ययीभावश्च' इत्यव्ययत्वम्, नपुंसकत्वं च। 'नाव्ययीभावात्' इत्यम्भावः। **मान्तत्वमिति।** रात्रौ च दिवा चेति द्वन्द्वे कृते सुब्लुकि कृते रात्रेर्मान्तत्वं निपात्यत इत्यर्थः। 'यस्येति च' इति आकारलोपः, अम्भावश्च। **अहर्दिवमिति।** द्वन्द्वे कृते सुब्लुकि, लुका लुप्ते प्रत्ययलक्षणं नेति प्रत्ययलक्षणाभावाद् 'रोऽसुपि' इति रत्वम्, अच्, 'यस्येति च' इत्याकारलोपः, अम्भावश्च। नन्वहन्शब्दार्थस्य दिवाशब्दार्थस्य च एकत्वात् साहित्याभावात् कथमिह द्वन्द्वः। अहर्व्यक्तिभेदमादाय द्वन्द्वप्रसक्तावपि 'विरूपाणामपि समानार्थकानाम्' इत्येकशेषो दुर्वार इत्यत आह—**वीप्सायां द्वन्द्वो निपात्यत इति।** 'नित्यवीप्सयोः'

बहुव्रीहिः। 'बहुव्रीहौ संख्येये' इति डचोऽपवादोऽच्। **अक्षिभ्रुवमिति।** प्राण्यङ्गत्वादेकवत्। **ऊरू चाष्ठीवन्तौ चेति।** 'सक्थि क्लीबे पुमानूरुः' इत्यमरः। 'जानूरुपर्वाष्ठीवदस्त्रियाम्' इति च। **ऊर्वष्ठीवम्। पदष्ठीवमिति।** प्राण्यङ्गत्वादेकवद्भावः।

बहुव्रीहौ तु सरजः पङ्कजम्। निश्चितं श्रेयो निःश्रेयसम्। तत्पुरुष एव। नेह। निःश्रेयान्पुरुषः। पुरुषस्यायुः पुरुषायुषम्। ततो द्विगुः। द्व्यायुषम्। त्र्यायुषम्। ततो द्वन्द्वः। ऋग्यजुषम्। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः समीपमुपशुनम्। टिलोपाभावः सम्प्रसारणं च निपात्यते। गोष्ठे श्वा गोष्ठश्वः।

इति वीप्सायां द्विर्वचने कृते एकशेषं बाधित्वा द्वन्द्वो निपात्यत इत्यर्थः। **सरजसमिति**। रजोऽप्यपरित्यज्य इत्यस्वपदविग्रहः। रजः धूलिः। साकल्ये सहशब्दस्य रजश्शब्देनाव्ययीभावः। 'अव्ययीभावे चाकाले' इति सहशब्दस्य सभावः। अच्। **अव्ययीभाव इति**। भाष्ये तथा वचनाद् अव्ययीभावस्य ग्रहणमिति भावः। **सरजः पङ्कजमिति**। रजोभिः परागैः सहेति विग्रहे 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। 'वोपसर्जनस्य' इति सहस्य सः। बहुव्रीहित्वाद् नाच्। **निःश्रेयसमिति**। कर्मधारयादच्। **तत्पुरुष एवेति**। तथा भाष्यादिति भावः। **निःश्रेयानिति**। निश्चितं श्रेयो यस्येति बहुव्रीहित्वान्नाच् इति भावः। 'ईयसश्च' इति निषेधान्न कप्। **पुरुषायुषमिति**। षष्ठीसमासाद् अजिति भाष्यम्। **ततो द्विगुरिति**। भाष्यवाक्यमिदम्। **द्व्यायुषम्, त्र्यायुषमिति**। द्वयोरायुषोः समाहार इति, त्रयाणामायुषां समाहार इति च विग्रहः। 'तद्धितार्थे' इति द्विगोरच्। **ततो द्वन्द्व इति**। भाष्यवाक्यमिदम्। **ऋग्यजुषमिति**। ऋचश्च यजूंषि च एषां समाहार इति समाहारद्वन्द्वः। **ततस्त्रयः कर्मधारया इति**। तथा भाष्यादिति भावः। **जातोक्ष इति**। जातश्चासावुक्षा चेति विग्रहः। अचि सत्युक्षन् शब्दे टिलोपः। **महोक्ष इति**। महांश्चासावुक्षा चेति विग्रहः। 'आन्महतः' इत्यात्त्वम्। अचि टिलोपः। **वृद्धोक्ष इति**। वृद्धश्चासावुक्षा चेति विग्रहः। अचि टिलोपः। **उपशुनमिति**। अव्ययीभावादच्, तथा भाष्यात्। नन्वत्र 'नस्तद्धिते' इति टिलोपः कुतो न स्यात्। 'अतद्धिते' इति पर्युदासात् 'श्वयुवमघोनामतद्धिते' इति कथं वा संप्रसारणं स्यादित्यत आह—**टिलोपाभावः संप्रसारणं च निपात्यत इति**। **गोष्ठश्व इति**। सप्तमीसमासादजिति भाष्यम्। अत एव भाष्यात् सप्तमीसमासः। टिलोपः। 'अतद्धिते' इति निषेधान्न संप्रसारणम्। षष्ठीतत्पुरुषे तु गोष्ठश्वा।

द्वन्द्वो निपात्यत इति। 'विरूपाणामपि–' इत्येकशेषं बाधित्वेति शेषः। **सरजसमिति**। 'अव्ययीभावे चाकाले' इति सहस्य सभावः। **सरजः पङ्कजमिति**। 'सरजसमकरन्दनिर्भरासु' इति माघप्रयोगस्तु चिन्त्य इति भावः। **निश्श्रेयानिति**। 'निश्चितं श्रेयो येन' इति विग्रहः। 'निश्श्रेयस्कः' इति केषांचित्प्रत्युदाहरणमशुद्धम्। 'ईयसश्च' इति कपो निषेधात्। **गोष्ठे श्वेति**। एतेन 'सप्तमीतत्पुरुष एव' इति

९४६ ब्रह्महस्तिभ्यां वर्चसः । (५-४-७८) अच्स्यात् । **ब्रह्मवर्चसम् ।** हस्तिवर्चसम् । 'पल्यराजभ्यां चेति वक्तव्यम्' (वा ३३५२) । **पल्यवर्चसम् ।** राजवर्चसम् । **९४७ अवसमन्धेभ्यस्तमसः । (५-४-७९)** **अवतमसम् ।** सन्तमसम् । अन्धयतीत्यन्धम्, पचाद्यच्, अन्धं तमोऽन्धतमसम् । **९४८ श्वसो वसीयःश्रेयसः । (५-४-८०)** वसुशब्दः प्रशस्तवाची, तत ईयसुनि वसीयः । श्वस्शब्द उत्तरपदार्थप्रशंसामाशीर्विषयमाह । मयूरव्यंसकादित्वात्समा-

---

ब्रह्म । शेषपूरणेन सूत्रं व्याचष्टे—**अच्स्यादिति । ब्रह्मवर्चसमिति ।** ब्रह्मणो वर्च इति विग्रहः । **हस्तिवर्चसमिति ।** हस्तिनो वर्च इति विग्रहः । **पल्यराजभ्यामिति ।** आभ्यां परो यो वर्चश्शब्दः तस्मादपि अजिति वक्तव्यमित्यर्थः । **पल्यवर्चसमिति ।** पलं मांसम् , तदर्हति पल्यः, मांसभोजीत्यर्थः, तस्य वर्च इति विग्रहः । **राजवर्चसमिति ।** राज्ञा वर्च इति विग्रहः । **अवसमन्धेभ्यस्तमसः ।** अव सम् अन्ध एभ्यः परो यस्तमश्शब्दस्तस्मादच्स्यादित्यर्थः । **अवतमसमिति ।** अवहीनं तम इति विग्रहः । प्रादिसमासः । **संतमसमिति ।** संततं तम इति विग्रहः । प्रादिसमासः । **अन्धयतीत्यन्धमिति ।** 'अन्ध दृष्ट्युपघाते' चुरादिः, दृष्टिं प्रतिबध्नातीत्यर्थः । **पचाद्यजिति ।** 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति पचादित्वप्रयुक्तोऽच्प्रत्यय इत्यर्थः । अचि णिलोपेऽन्धमिति रूपम् । गाढमित्यर्थः फलति । गाढस्यैव तमसो दर्शनप्रतिबन्धकत्वात् । **अन्धतमसमिति ।** कर्मधारयादच् । **श्वसः ।** श्वस् इत्यव्ययात् परो यो वसीयश्शब्दः श्रेयश्शब्दश्च तस्मादच् स्यादित्यर्थः **वसुशब्दः प्रशस्तवाचीति ।** 'यं कामयेत वसीयान् स्यात्' इत्यादौ तथा दर्शनादिति भावः । **तत इति ।** अतिशयेन वसुरिति विग्रहे 'द्विवचनविभज्योपपदे–' इतीयसुनि, 'तुरिष्ठेमेयस्सु' इत्यनुवृत्तौ टेरिति टिलोपे वसीयश्शब्द इत्यर्थः । **श्वस्शब्द इति ।** यद्यपि श्वस्शब्दः कालविशेषवाची, तथापि प्रकृते शब्दशक्तिस्वभावादुत्तरपदार्थभूतां प्रशंसाम् आशीर्विषयं द्योतयतीत्यर्थः । आशिषो विषय आशीर्विषयः, तमिति

नियमो दर्शितः, तेन षष्ठीतत्पुरुषे 'गोष्ठश्वा' इत्येव । **ब्रह्मवर्चसमिति ।** षष्ठीतत्पुरुषः । एवं हस्तिवर्चसमपि । **पल्येति ।** 'पलं मांसमर्हति' इति पल्यो मांसभोजी, तदीयं वर्चः पल्यवर्चसम् । **अवतमसमित्यादि ।** अवहीनं संततं च तमः इति विग्रहः । **अन्धयतीति ।** 'अन्ध दृष्ट्युपघाते' चुरादिः । **अन्धमिति ।** गाढमित्यर्थः । **श्वसो ।** 'वसुशब्दात्प्रशस्तवचनादीयसुन्' इत्याकरविरुद्धं व्याचक्षाणा उपेक्ष्या इति ध्वनयति—**वसुशब्द इति । वसीय इति ।** 'यः कामयेत वसीयान् स्याम्' इति श्रौतप्रयोगोऽप्यत्रानुकूल इति भावः । **श्वस्शब्द इति ।** कालवाच्यप्ययम्,

सः। श्वोवसीयसम्। श्वःश्रेयसं ते भूयात्। ६४६ अन्ववतप्ताद्रहसः (५-४-८१) अनुरहसम्। अवरहसम्। तप्तरहसम्। ६५० प्रतेरुरसः सप्तमीस्थात्। (५-४-८२) उरसि प्रति प्रत्युरसम्। विभक्त्यर्थेऽव्ययीभावः। ६५१ अनुगवमायामे। (५-४-८३) एतन्निपात्यते दीर्घत्वे। अनुगवं यानम्। 'यस्य चायामः' (सू ६७०) इति समासः। ६५२ द्विस्तावा त्रिस्तावा वेदिः।

षष्ठीसमासः। प्रशंसाविशेषणम्। विषयशब्दस्य नित्यपुंलिङ्गत्वाद् न स्त्रीलिङ्गता। एवं च श्वस्शब्द उत्तरपदार्थगतप्राशस्त्यद्योतक इति फलितोऽर्थः। ननु तर्हि श्वस्शब्दस्योत्तरपदार्थगतप्राशस्त्यद्योतकत्वेऽप्युत्तरपदसामानाधिकरण्याभावा कथं विशेषणसमास इत्यत आह—**मयूरेति**। तथाचाशीर्लिङादिप्रयोग एव अस्य साधुत्वमित्यभिप्रेत्योदाहरति—**श्वोवसीयसमिति**। अतिशयेन प्रशस्तमित्यर्थः। **श्वःश्रेयसमिति**। अतिशयेन प्रशस्तमिति विग्रहे प्रशस्तशब्दादीयसुन्, प्रशस्यस्य श्रः, 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः, आद्गुणः, श्रेयस् इति रूपम्। श्वस्शब्दस्तु उत्तरपदार्थगतप्रशंसाद्योतकः। 'श्वःश्रेयसं शिवं भद्रम्' इत्यमरः। ते भूयादिति तु उभयत्रापि संबध्यते—श्वोवसीयसं ते भूयात्, श्वःश्रेयसं ते भूयादिति। **अन्ववतप्ताद्रहसः**। अनु अव तप्त एतेषां समाहारद्वन्द्वः। एभ्यः परो यो रहःशब्दः तस्मादच्स्यादित्यर्थः। रहः अप्रकाशप्रदेशः। **अनुरहसमिति**। अनुगतं रह इति विग्रहः। **अवरहसमिति**। अवहीनं रह इति विग्रहः। उभयत्र प्रादिसमासः। **तप्तरहसमिति**। तप्तं रह इति विग्रहः। **प्रतेरुरसः**। सप्तम्यर्थे द्योतकतया वर्तत इति सप्तमीस्थम्। सप्तम्यर्थद्योतकात् प्रतेः परो य उरश्शब्दः तस्मादच् स्यादित्यर्थः। **उरसीति**। अनेन यदुच्यते तदेव प्रत्युरसमित्यनेनोच्यत इत्यर्थः। सप्तम्यर्थद्योतकः प्रति। तस्य विभक्त्यर्थे विद्यमानस्य 'अव्ययं विभक्ति' इत्यादिनाऽव्ययीभाव इति भावः। **अनुगवमायामे। एतदिति**। अनुगवमित्येतदित्यर्थः। अनुना दीर्घत्वे द्योत्येऽच्प्रत्ययान्तो निपात्यत इत्यर्थः। आयामशब्दो दीर्घपर इति भावः। **अनुगवं यानमिति**। अनुगोशब्दादचि अवादेश इति भावः। **यस्य**

प्रकृते त्वर्थविशेषपरः। शक्तिस्वाभाव्यात्तमेवाह—**उत्तरपदार्थप्रशंसामिति**। 'उत्तरपदार्थभूतां प्रशंसामित्यर्थः'। **आशीर्विषयमिति**। षष्ठीसमासः। विषयशब्दस्याजहल्लिङ्गत्वात्पुंलिङ्गनिर्देशः। 'उत्तरपदार्थप्रशंसाया आशीर्विषयतामाह' इति पाठान्तरं क्वचिदस्ति। उभयथापि आशीर्विषयताया द्योतकोऽयमिति फलितोऽर्थः। **अन्वव**। इह 'रहः' इत्यप्रकाशमुच्यते। 'अनुगतमवहीनं च रहः' इति प्रादिसमासः। 'अनुगतं रहोऽस्मिन्' इत्यादिबहुव्रीहिर्वा। **तप्तरहसमिति**। 'तप्तं च तद्रहश्च' इति

(५-४-८४) अच्प्रत्ययष्टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ तत्रेदं निपातनम्। वेदिरिति किम्—द्विस्तावती त्रिस्तावती रज्जुः। ९५३ **उपसर्गादध्वनः**। (५-४-८५) प्रगतोऽध्वानं प्राध्वो रथः। ९५४ **न पूजनात्**। (५-४-६९) पूजनार्थात्परेभ्यः समासान्ता न स्युः। सुराजा। अतिराजा। 'स्वतिभ्यामेव' (वा ३३४६) नेह—परमराजः।

चेति। 'यस्य चायामः' इत्यव्ययीभावसमासः। तथा च गोदैर्घ्यसदृशदैर्घ्यकं यानमित्यर्थः फलतीति भावः। **द्विस्तावा**। **यावती प्रकृताविति**। यतः अङ्गकलापस्यातिदेशः सा प्रकृतिः। अश्वमेधस्य प्रकृतिरग्निष्टोमः, तत्राम्नाताङ्गकलापानामश्वमेधेऽतिदेशात्। तदुक्तं कल्पसूत्रेषु 'सर्वसोमक्रतूनामग्निष्टोमः प्रकृतिः' इति। तस्मिन् अग्निष्टोमे वेदिपरिमाणं श्रुतम्। तत्र च 'त्रिंशत्पदानि प्रक्रमा वा पश्चात्तिरश्ची षट्त्रिंशत् प्राची चतुर्विंशतिः पुरस्तात्तिरश्ची' इति प्रकृतौ वेदिपरिमाणमुक्तम्। अस्यां तु वेद्यां ततो द्विगुणितं त्रिगुणितं च क्षेत्रपरिमाणमुक्तं कल्पसूत्रेषु 'अष्टाविंशत्यूनं पदसहस्रं महावेदिः' इति। पदग्रहणमत्र प्रक्रमस्याप्युपलक्षणम्। तथा च प्रकृतौ अग्निष्टोमे यावती वेदिः तदपेक्षया द्विगुणा त्रिगुणा वा अश्वमेधादौ वेदिरस्ति, तत्र आश्वमेधिकवेद्यामभिधेयायां द्विस्तावेति त्रिस्तावेति च भवतीत्यर्थः। 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' 'द्वित्रिचतुर्भ्यः सुच्' इति द्विशब्दात् क्रियाभ्यावृत्तौ सुचि कृते द्विरिति त्रिरिति च रूपम्। तत् प्राकृतं परिमाणम् अस्या अस्तीति तावती। प्राकृतपरिमाणेति यावत्। द्विरिति तच्छब्दार्थे प्रकृतिपरिमाणेऽन्वेति। द्विः तावतीति विग्रहः। द्विरावृत्तं प्राकृतं यत् परिमाणं तद्वत्याश्वमेधिकी वेदिरित्यर्थः। अत एव निपातनात् समासः, अच्प्रत्ययः, तावतीशब्दस्य 'भस्याढे—' इति पुंवत्त्वे ङीपो निवृत्तौ प्रत्ययस्याङित्त्वेऽपि प्रकृतेर्नान्तत्वाभावेऽपि टिलोपः। **द्विस्तावती त्रिस्तावती रज्जुरिति**। अत्र वेद्यामप्रवृत्तेः अच्प्रत्ययटिलोपसमासा न भवन्तीत्यर्थः। तथा च प्रत्युदाहरणे द्विरिति भिन्नं पदम्। **उपसर्गादध्वनः**। उपसर्गात् परो योऽध्वन् शब्दः तस्मादच् स्यादित्यर्थः। **प्राध्वो रथ इति**। 'अत्यादयः—' इति समासादच्। 'नस्तद्धिते' इति टिलोपः। **न पूजनात्**। परेभ्य इत्यध्याहार्यम्। समासान्ता इति पूर्वसूत्रमनुवर्तते। तदाह—**पूजनार्थादिति**। 'पूजायां स्वतिग्रहणं कर्तव्यम्' इति वार्तिकमभिप्रेत्योदाहरति—**सुराजेति**। सु शोभनो राजेति प्रादिसमासः। **अतिराजेति**। पूज्यो राजेत्यर्थः। उभयत्रापि 'राजाहस्सखिभ्यः—' इति टच् न भवति। **स्वतिभ्यामेवेति**। स्वतिभ्यां परो यो राजन् शब्दः तस्मादेवेत्यर्थः, तथा वार्तिका-

---

विग्रहः। परेणानधिगम्यमित्यर्थः। **इत्यतः प्रागिति**। 'प्राग्बहुव्रीहिग्रहणं कर्तव्यम्

पूजनात् किम्–गामतिक्रान्तोऽतिगवः। 'बहुव्रीहौ सक्थ्यक्ष्णोः–' (सू ८४२) इत्यतः प्रागेवायं निषेधः। नेह—सुसक्थः, स्वक्षः। ९५५ किमः क्षेपे। (५-४-७०) क्षेपे यः किंशब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः। कुत्सितो राजा किंराजा। किंसखा। किंगौः। क्षेपे किम्–किंराजः, किंसखः, किंगवः। ९५६ नञस्तत्पुरुषात्। (५-४-७१) समासान्तो न। अराजा। असखा। तत्पुरुषात् किम्–अधुरं शकटम्। ९५७ पथो विभाषा। (५-४-७२) नञ्पूर्वात्पथो वा समासान्तः। अपथम्, अपन्थाः। तत्पुरुषाद् इत्येव, अपथो देशः, अपथं वर्तते।

इति सर्वसमासान्तप्रकरणम्।

दिति भावः। **नेहेति**। निषेध इति शेषः। **परमराज इति**। परमश्चासौ राजा चेति विग्रहः। **अतिगव इति**। 'अत्यादयः–' इति समासः। अतेः पूजनार्थकत्वाभावाद् न टचो निषेधः। एवं परमराज इत्यत्रापि। **इत्यतः प्रागिति**। 'प्राग्बहुव्रीहिग्रहणं कर्तव्यम्' इति वार्तिकार्थसंग्रहोऽयम्। **सुसक्थः स्वक्ष इति**। सु शोभने सक्थिनी यस्य, सु शोभने अक्षिणी यस्येति च विग्रहः। 'बहुव्रीहौ सक्थ्यक्ष्णोः–' इति षच्। **किमः क्षेपे**। **किंराजा**। **किं सखेति**। इह 'राजाहस्सखिभ्यः' इति टच् न भवति। 'किं क्षेपे' इति समासः। **किंराजः किंसख इति**। किंशब्दोऽत्र प्रश्ने। कस्य राजा, को राजेति वा विग्रहः। निन्दानवगमाद् न टचो निषेधः। **नञस्तत्पुरुषात्**। शेषपूरणेन सूत्रं व्याचष्टे— **समासान्तो नेति**। नञ्पूर्वपदात्तत्पुरुषात् समासान्तो नेति फलितम्। **अधुरं शकटमिति**। अविद्यमाना धूर्यस्येति विग्रहः। नञ्पूर्वपदत्वेऽप्यतत्पुरुषत्वात् 'ऋक्पूः-' इति समासान्तस्य न निषेधः। **पथो विभाषा। पथ इति**। पथिन्शब्दादित्यर्थः। **अपथमिति**। न पन्था इति विग्रहे नञ्तत्पुरुषः। 'ऋक्पूः–' इत्यप्रत्यये सति 'नस्तद्धिते' इति टिलोपः। 'पथः संख्याव्ययादेः' इति नपुंसकत्वम्। **अपन्था इति**। अप्रत्ययाभावे रूपम्। **तत्पुरुषादित्येवेति**। अनुवर्तत एवेत्यर्थः। **अपथो देश इति**। अविद्यमानः पन्था यस्येति विग्रहः। बहुव्रीहित्वाद् 'ऋक्पूः–' इत्यप्रत्ययस्य पाक्षिको

इति वार्तिकोक्तेरिति भावः। **किमः क्षेपे**। क्षेपग्रहणमिह शक्यमवक्तुम्, प्रतिपदोक्तपरिभाषया 'किं क्षेपे' इति विहितसमासस्यैव ग्रहणात्। **किंराज इत्यादि**। किमत्र प्रश्ने। षष्ठीसमासः कर्मधारयो वा। **नञस्तत्पुरुषात्**। 'नञः' इति षष्ठी, नञः संबन्धी यस्तत्पुरुषो नञवयवकस्तस्मादित्यर्थः। **अपथमिति**। 'नस्तद्धिते' इति

अथालुक्समासप्रकरणम् । २४ ।

९५८ अलुगुत्तरपदे । (६-३-१) अलुगधिकारः प्रागानङः, उत्तरपदाधिकारस्त्वापादसमाप्तेः । ९५९ पञ्चम्याः स्तोकादिभ्यः । (६-३-२) एभ्यः पञ्चम्या अलुक्स्यादुत्तरपदे । स्तोकान्मुक्तः । एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः । उत्तर-

---

न निषेधः । अपथं वर्तत इति । अर्थाभावेऽव्ययीभावः । अतत्पुरुषत्वाद् 'ऋक्पूः–' इत्यप्रत्ययस्य न पाक्षिको निषेधः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां सर्वसमासान्तप्रकरणं समाप्तम् ।

अथालुक्समासो निरूप्यते—अलगुत्तरपदे । नायं विधिः, राजपुरुष इत्यादावतिप्रसङ्गात्, 'पञ्चम्याः स्तोकादिभ्यः' इत्याद्यारम्भाच्च । किंतु पदद्वयमधिक्रियते । अस्य कियत्पर्यन्तमनुवृत्तिरित्यत आह—अलुगधिकारः प्रागानङ इति । 'आनङृतः–' इत्यतः प्रागित्यर्थः । उत्तरपदेति । षष्ठस्य तृतीये पादे आद्यमिदं सूत्रम् । इत उत्तरमेतत्पादपरिसमाप्तिपर्यन्तमुत्तरपदाधिकार इत्यर्थः । अत्रोत्तरपदाधिकारनियमे भाष्यमेव प्रमाणम् । पञ्चम्याः स्तोकादिभ्यः । एभ्य इति । स्तोकादिभ्यः परा या पञ्चमी तस्याः 'सुपो धातु–' इति लुङ् न स्यादित्यर्थः । उत्तरपद इति । उत्तरशब्दः समासचरमावयवे रूढः, पदे इत्येव सिद्धे उत्तरग्रहणात् । स्तोकान्मुक्त इति । एवमल्पान्मुक्तः । 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन'

टिलोपः । 'अपथं नपुंसकम्' इति क्लीबत्वम् । अपथं वर्तत इति । अर्थाभावेऽव्ययीभावः ।

इति तत्त्वबोधिन्यां सकलसमाससाधारणसमासान्तप्रकरणम् ।

अलुक् स्यादिति । प्रसज्यप्रतिषेधोऽयम् । 'सुपो धातु–' इत्यादिना प्राप्तो लुङ् न भवतीत्यर्थः । स्तोकान्मुक्त इति । समासप्रयोजनमैकपद्यमैकस्वर्यं विशेषणयोगाभावश्च । किंच 'स्तोकान्मुक्तस्यापत्यं स्तौकान्मुक्तिः' 'स्तोकान्मुक्तायाः स्तौकान्मुक्तेयः' इति समुदायात्तद्धितोत्पत्तिरपि प्रयोजनम् । न च प्राथमिकसामासिकलुको निषेधेन चरितार्थत्वाद्द्वाद्यस्तद्धितनिमित्तो लुग् दुर्वार इति शङ्क्यम्, 'सुपो धातु–' इति शास्त्रस्यैकत्वादविशेषेण लुग्द्वयस्यापि निषेधाभ्युपगमात् । इह 'स्तोकान्तिक–' इति समासशास्त्रपठिता एव स्तोकादयो गृह्यन्ते न तु 'करणे च स्तोकाल्पकृच्छ्र–'

पदे किम्-निष्क्रान्तः स्तोकान्निस्स्तोकः । 'ब्राह्मणाच्छंसिन उपसंख्यानम्' (वा ३८७८) ब्राह्मणे विहितानि शस्त्राण्युपचाराद् ब्राह्मणानि, तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः । द्वितीयार्थे पञ्चमी उपसंख्यानादेव । ९६० ओजःसहोऽम्भस्तमसस्तृतीयायाः । (६-३-३) ओजसाकृतमित्यादि । 'अञ्जस

इति समासः । अत्र पञ्चम्या अलुक् । **एवमिति** । आदिपदेन समासविधौ गृहीतानामन्तिकादीनां ग्रहणादिति भावः । अन्तिकादागतः, अभ्याशादागतः, दूरादागतः विप्रकृष्टादागतः, कृच्छ्रादागतः । **निस्स्तोक इति** । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासः । अत्र स्तोकशब्दस्य उत्तरपदपरकत्वाभावात् पञ्चम्या अलुङ् न । स्तोकान्मुक्त इत्यादौ समासप्रयोजनं तु समासस्वरः, सर्वस्मात् स्तोकान्मुक्त इति विशेषणयोगाभावश्च । किंच, स्तोकान्मुक्तस्यापत्यं स्तौकान्मुक्तिरित्यादौ समुदायात्तद्धितोत्पत्तिश्च । स्तोकान्मुक्तौ स्तोकान्मुक्ता इति द्विबहुवचनान्तैः न समासः, अनभिधानादिति भाष्ये स्पष्टम् । **ब्राह्मणाच्छंसिन उपसंख्यानमिति** । पञ्चम्या अलुग् इति शेषः । ननु ब्राह्मणानि शंसतीत्यर्थे कथं पञ्चमी ? विधायकवाक्यानि हि ब्राह्मणशब्देनोच्यन्ते, 'कर्मचोदना ब्राह्मणानि' इति कल्पसूत्रात्, 'शेषे ब्राह्मणशब्दः' इति मन्त्रभिन्नवेदभागे ब्राह्मणशब्दस्य जैमिनिना संकेतितत्वाच्च । एतादृशब्राह्मणभागस्य न क्वापि शंसनं विहितम्—'ऋचः शंसति निविदः शंसति' इति श्रुतिष्वित्यत आह—**ब्राह्मण इति** । **शस्त्राणीति** । ऋचां निविदां च संघः शस्त्रम् । **उपचारादिति** । लक्षणयेत्यर्थः । **द्वितीयार्थ इति** । पञ्चम्या अलुगुपसंख्यानबलादेव द्वितीयार्थे पञ्चमीत्यर्थः । **ओजस्** । ओजस्, सहस्, अम्भस्, तमस् एषां समाहारद्वन्द्वः । एभ्यः परस्यास्तृतीयाया अलुक् स्यादुत्तरपद इत्यर्थः । **ओजसाकृतमिति** । 'कर्तृकरणे कृता बहुलम्' इति समासः । 'ओजो दीप्तौ बले' इत्यमरः । **इत्यादीति** । सहसाकृतम्, अम्भसाकृतम् । तमसावृतम् । तमोवृत-

---

इति सूत्रपठिताः । समासे सुपो लुकि प्रसक्ते विधीयमानेनालुक्शास्त्रेण समासशास्त्रपठितानामविलम्बेनोपस्थितेर्व्याप्तिन्यायाच्च । 'स्तोकान्तिक-' इत्यत्र त्र्यर्थग्रहणादन्यान्यपि बहूनि गृह्यन्ते तदेतन्मनसि निधायाह—**एवमिति** । द्विवचनबहुवचनान्तानां तु समासो नेष्यते, अनभिधानात् । तेन 'स्तोकाभ्यां मुक्तः' इत्यादौ वाक्यमेव । **शस्त्राणीति** । 'प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम्' इति याज्ञिकानां व्यवहारः । **ओजःस** । **ओजसाकृतमिति** । 'कर्तृकरणे कृता-' इति समासः । कथं तर्हि 'सततनैशतमोवृतमन्यतः' इति भारविः । अत्राहुः—'वृतु वर्तने' इत्यस्माद् 'घनर्थे कविधानम्' इति भावे

उपसङ्ख्यानम्' (वा ३८८०)। अञ्जसाकृतम्। आर्जवेन कृतमित्यर्थः। 'पुंसानुजो जनुषान्ध इति च' (वा ३८८१) । यस्याग्रजः पुमान्स पुंसानुजः। जनुषान्धो जात्यन्धः। ९६१ **मनसः संज्ञायाम्** । (६-३-४) मनसागुप्ता। ९६२ **आज्ञायिनि च** । (६-३-५) मनस इत्येव। मनसा ज्ञातुं शीलमस्य मनसाज्ञायी । ९६३ **आत्मनश्च** । (६-३-६) आत्मनस्तृतीयाया अलुक्स्यात् । 'पूरण इति वक्तव्यम्' (वा ३८८२) पूरणप्रत्ययान्ते उत्तरपद इत्यर्थः । आत्मनापञ्चमः । 'जनार्दनस्त्वात्मचतुर्थ एव इति बहुव्रीहिर्बोध्यः।

मिति तु असाध्वेव । शेषषष्ठ्या वा समासः । **अञ्जस उपसंख्यानमिति** । अञ्जश्शब्दात् तृतीयाया अलुक उपसंख्यानमित्यर्थः अ**ञ्जसाकृतमिति** । अञ्जश्शब्द आर्जवे वर्तते, यथा क्षेत्रज्ञोऽञ्जसा नयतीत्यादौ तथा दर्शनात् । तदाह—**आर्जवेनेति** । **पुंसानुजः** । तृतीयाया अलुकि साधुरिति शेषः । **यस्येति** । यस्य पुमान् पूर्वजः स पुंसा हेतुना अनुजः कनीयान् इत्यर्थः । **जनुषेति** । 'जनुर्जननजन्मानि' इत्यमरः। जनुषा जन्मना[1] अन्ध इत्यर्थः । फलितमाह—**जात्यन्ध इति** । ब्राह्मण्यादिजातितुल्यान्ध्यवानित्यर्थः । उत्पत्तिप्रभृत्यन्ध इति यावत् । **मनसः संज्ञायाम्** । मनसस्तृतीयाया अलुक् स्यादुत्तरपद इत्यर्थः । **मनसागुप्तेति** । कस्याश्चित् संज्ञेयम् । असंज्ञायां तु मनोगुप्ता । **आज्ञायिनि च** । **मनस इत्येवेति** । अनुवर्तत एवेत्यर्थः । मनसस्तृतीयाया अलुक् स्याद् आज्ञायिनि पर इत्यर्थः। असंज्ञार्थमिदम्। **ज्ञातुमिति** । प्रेरयितुमित्यर्थः । **मनसाज्ञायीति**। 'सुप्यजातौ–' इति णिनिः । 'आतो युक्चिण्कृतोः' इति युक्। अत्र सूत्रभाष्ये 'आत्मनश्च पूरण उपसंख्यानम्' इति वार्तिकं पठितम् । तत्रात्मनश्चेत्यंशं व्याख्यातुं पृथगुपादत्ते—**आत्मनश्चेति**। चकारात्तृतीयाया अलुगिति व्यानुकृष्यत इत्याह—**आत्मनस्तृतीयाया अलुगिति** । उत्तरपदे पर इति शेषः। **पूरण इति वक्तव्यमिति**। नात्र पूरणशब्दो गृह्यते। किंतु स्वरितत्वबलेन पूरणाधिकारविहितप्रत्ययग्रहणात् 'प्रत्ययग्रहणे–' इति तदन्तविधिरित्यभिप्रेत्याह—**पूरणप्रत्ययान्त**

कप्रत्यये तदन्तेन षष्ठीसमासाश्रयणान्न दोष इति। यत्तु केवलपदाधिकार एव तदन्तविधिर्न तूत्तरपदाधिकारे, तथा च 'नैशतमसा' इति तृतीयाया अलुङ् न भवतीति दुर्घटवृत्त्यादावुक्तम्। तन्न। 'पदाङ्गाधिकारे–' इत्यत्र 'इष्टकचितं, पक्वेष्टकचितम्' इति भाष्योदाहरणादुत्तरपदाधिकारेऽपि तदन्तविधिप्रवृत्तेः । **जनुषेति** । 'जनुर्जननजन्मानि' इत्यमरः। **आत्मनापञ्चम इति**। 'तृतीया' इति योगविभागात् समासः।

---

[1] 'जन्मना' इत्यस्याग्रे 'हेतुना' इत्यपि क्वचित् पाठः।

पूरणे किम्-आत्मकृतम्। ९६४ **वैयाकरणाख्यायां चतुर्थ्याः। (६-३-७)** आत्मन इत्येव, आत्मनेपदम्, आत्मनेभाषाः। तादर्थ्ये चतुर्थी। चतुर्थी इति योगविभागात्समासः। ९६५ **परस्य च। (६-३-८)** परस्मैपदम्। परस्मै-

---

इति। आत्मनापञ्चम इति। आत्मा पञ्चम इत्यर्थः। प्रकृत्यादित्वात् प्रथमार्थे तृतीया। यद्वा आत्मकृतपञ्चमत्ववानित्यर्थः। करणे तृतीया। करोतिक्रियान्तर्भावेण तस्याः 'तृतीया तत्कृता-' इति समासः। पक्षद्वयमपीदं भाष्ये स्थितम्। ननु संकर्षणप्रद्युम्नानिरुद्धास्त्रयो विष्णुव्यूहाः। जनार्दनस्तु एषां नियन्तेति विष्णुपुराणादौ स्थितम्। तत्रेदमाहुः पौराणिकाः—जनार्दनस्त्वात्मचतुर्थ एवेति। तत्र तृतीयायाः अलुकि आत्मनाचतुर्थ इति भवितव्यमित्यत आह—**जनार्दनस्त्विति। बहुव्रीहिरिति।** आत्मा चतुर्थो यस्येति विग्रहे बहुव्रीहिरित्यर्थः। एकस्याप्यौपाधिकभेदं परिकल्प्य वृत्तिपदार्थत्वमन्यपदार्थत्वं च विवक्षणीयमिति भावः। तदिदं भाष्ये स्पष्टम्। **वैयाकरणाख्यायाम्। आत्मन इत्येवेति।** अनुवर्तत एवेत्यर्थः। न च 'आत्मनश्च' इत्यस्य वार्तिकत्वे कथमिह सूत्रे एतदनुवृत्तिरिति वाच्यम्, 'सोऽपदादौ' इति सूत्रे पठितस्य 'काम्ये रोरेवेति वाच्यम्' इति वार्तिकस्य 'इणः षः' इति सूत्रेऽनुवृत्तिवदुपपत्तेः। व्याकरणे भवा वैयाकरणी, सा चासावाख्या च वैयाकरणाख्या, तस्यां या चतुर्थी तस्या अलुगित्यर्थः। **आत्मनेभाषेति।** पूर्वाचार्यकृतमात्मनेपदस्य संज्ञान्तरमिदं धातुपाठे प्रसिद्धम्। **तादर्थ्ये चतुर्थीति।** तथा चात्मने इत्यस्यात्मार्थमित्यर्थः। आत्मगामिनि फले प्रायेण तद्विधानादिति भावः। ननु प्रकृतिविकाराभावात् कथमिह तादर्थ्ये चतुर्थ्याः समास इत्यत आह—**चतुर्थीति। योगविभागादिति।** पस्पशाह्निकभाष्ये धर्माय नियमो धर्मनियम इति भाष्यमिह लिङ्गम्। **परस्य च।** वैयाकरणाख्यायां परशब्दस्यापि चतुर्थ्या

इह प्रकृत्यादित्वात्प्रथमार्थे तृतीयेत्येके। 'आत्मना कृतः पञ्चमः' इति करोतिक्रियापेक्षेत्यन्ये। **बहुव्रीहिर्बोध्य इति।** एकस्याप्यौपाधिकभेदं परिकल्प्य वर्तिपदार्थत्वमन्यपदार्थत्वं च विवक्षणीयमिति भावः। **वैयाकरण।** व्याकरणे भवा वैयाकरणी। 'अणृगयनादिभ्यः' इत्यण्। सा चासावाख्या चेति कर्मधारयः। **आत्मन इत्येवेति।** इह 'आत्मनः' इत्यननुवर्त्य 'वैयाकरणाख्यायां चतुर्थ्या अलुक्' इति व्याख्याने तु 'परस्य च' इत्युत्तरसूत्रं त्यक्तुं शक्यमित्याहुः। **आत्मनेभाषा इति।** यद्यपीयमाख्या अष्टाध्याय्यां नास्ति, तथापि धातुपाठेऽस्तीति भावः। प्रकृतिविकृतिभावविरहाद् 'रन्धनाय स्थाली' इतिवत्समासाभावमाशङ्क्याह—**योगविभागादिति।** इहालुग्विधिसामर्थ्यादपि समासः सुवचः। **परस्य च।** परशब्दस्य च या चतुर्थी तस्या

भाषाः। **९६६ हलदन्तात्सप्तम्याः संज्ञायाम्** । (६-३-९) हलन्ताद-दन्ताच्च सप्तम्या अलुक्संज्ञायाम्। त्वचिसारः। **९६७ गवियुधिभ्यां स्थिरः।** (८-३-९५) आभ्यां स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । अत्र गवीति वचनादेवालुक्। युधिष्ठिरः। अरण्येतिलकाः । अत्र 'संज्ञायाम्' (सू ७२१) इति सप्तमीसमासः। 'हृद्द्युभ्यां च' (वा ३८८२)। हृदिस्पृक्। दिविस्पृक्। **९६८ कारनाम्नि च प्राचां हलादौ** । (६-३-१०) प्राचां देशे यत्कारनाम

अलुगित्यर्थः। **हलदन्तात्**। **त्वचिसार इति** । अत एव ज्ञापकाद्व्यधिकरण-पदो बहुव्रीहिः । 'वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः' इत्यमरः । अथ हलन्तस्योदाहरणान्तरं वक्ष्यति—युधिष्ठिर इति । अत्र 'अजिरशिशिरस्थिर—' इत्युणादिसूत्रेण स्थाधातोः किरचि स्थिरशब्दो व्युत्पादितः । तत्र 'आदेशप्रत्यय-योः' इति षत्वस्य 'सात्पदाद्योः' इति निषेधे प्राप्ते इदमारभ्यते—**गवियुधि-भ्यां स्थिरः** । गवीति युधीति च सप्तम्या अनुकरणम् । स्थिर इति प्रथमा षष्ठ्यर्थे। 'सहेः साडः सः' इत्यस्मात् स इति षष्ठ्यन्तमनुवर्तते । 'अपदान्तस्य मूर्ध-न्यः' इत्यधिकृतम्, तदाह—**आभ्यामिति** । ननु 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषया अवादेशात् पूर्वमेव ङेर्लुकि प्रवृत्ते हलन्तत्वाभावात् कथ-मिहालुगित्यत आह—**अत्र गवीति । युधिष्ठिर इति ।** युध्धातोर्भावे क्विपि युध्शब्दात् सप्तम्येकवचनम् । हलन्तत्वादलुक्, षत्वं च । पाण्डवस्य धर्मपुत्रस्य नामेदम् । तदेवं हलन्तादलुकं प्रपञ्च्य अदन्तादलुकमुदाहरति—**अरण्येतिलका इति**। ननु तिलकशब्दस्य शौण्डादिगणेऽभावात् कथं तेन सप्तमीसमास इत्यत आह—**अत्र संज्ञायामिति**। **हृद्द्युभ्यां चेति**। हृच्छब्दाद् दिव्शब्दाच्च सप्तम्या अलुग्वक्तव्य इत्यर्थः। असंज्ञार्थमिदम्। **हृदिस्पृगिति** । 'पद्दन्—' इति ङौ हृदय-स्य हृदादेशः, हृदयं स्पृशतीत्यर्थः। **दिविस्पृगिति** । दिवं स्पृशतीत्यर्थः । इहो-भयत्रापि सप्तम्या अलुग्विधानबलादेव कर्मणि सप्तमीति भाष्यम्। 'अमूर्धमस्तकात्—' इत्यनेन त्वलुग् न सिध्यति, तत्र संज्ञायामित्यनुवृत्तेः । **कारनाम्नि । यत् कार-**

अलुक् स्याद्वैयाकरणाख्यायाम्। **गवियुधि** । स्थिरशब्दोऽयम् 'अजिरशिशिर—' इत्यौणादिकः किरच्प्रत्ययान्तस्तिष्ठतेर्निष्पन्नः । 'सात्पदाद्योः' इति निषेधे प्राप्ते वचनारम्भः। **गवीति वचनादेवेति**। न च लुकं बाधित्वा परत्वादन्तरङ्गत्वाच्चा-वादेशो 'हलदन्तात्सप्तम्याः—' इत्येवालुक् सिध्यतीति वाच्यम्, 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इति लुको बलीयस्त्वादिति भावः । **हृदिस्पृक दिविस्पृगिति**। हृदयं दिवं च स्पृशतीति विग्रहः । अलुग्विधिसामर्थ्यात्कर्मणि

तत्र हलादावुत्तरपदे हलदन्तात्सप्तम्या अलुक्। मुकुटेकार्षापणम्। दृषदिमाषकः। पूर्वेण सिद्धे नियमार्थम्, कारनाम्न्येव प्राचामेव हलादावेवेति। कारनाम्नि किम्। अभ्याहितपशुः। कारादन्यस्यैतद्देशस्य नाम। प्राचां किम्-यूथपशुः। हलादौ किम्-अविकटोरणः। हलदन्तात् किम्-नद्यां दोहो नदीदोहः। ९६९ **मध्याद् गुरौ।** (६-३-११) मध्येगुरुः। 'अन्ताच्च' (वा ३८९४) अन्तेगुरुः। ९७० **अमूर्धमस्तकात्स्वाङ्गादकामे।** (६-३-१२) कण्ठेकालः। उरसिलोमा। अमूर्धमस्तकात् किम्-मूर्धशिखः, मस्तकशिखः। अकामे किम्-मुखे कामोऽस्य मुखकामः। ९७१ **बन्धे च विभाषा।** (६-३-१३) हलदन्तात्सप्तम्या अलुक्। हस्तेबन्धः, हस्तबन्धः। हलदन्त इति किम्-गुप्तिबन्धः। ९७२ **तत्पुरुषे कृति बहुलम्।** (६-३-१४) स्तम्बेरमः, स्तम्बरमः कर्णेजपः, कर्णजपः। क्वचिन्न—कुरुचरः। ९७३ **प्रावृट्शरत्कालदिवां जे।**

नामेति। राजग्राह्यो भागः करः, स एव कारः, तद्विशेषवाचक इत्यर्थः। **नियमार्थमिति।** प्राचां देशे हलादौ यदि भवति कारनाम्न्येव, कारनाम्नि हलादौ चेत् प्राचामेव, प्राचां कारनाम्नि चेद् हलादावेवेति नियमत्रयार्थमित्यर्थः। **अविकटोरण इति।** अविशब्दात् संघाते कटच्, उरणो मेषः। **नद्यामिति।** नद्युत्तारणे तात्कालिको दोहः करः। **मध्याद् गुरौ।** गुरुशब्दे परे मध्यशब्दात् सप्तम्या अलुक् स्यादित्यर्थः। असंज्ञार्थमिदम्। **अन्ताच्चेति।** सप्तम्या अलुक् स्याद् गुरौ पर इत्यर्थः। **अमूर्धमस्तकात्।** मूर्धमस्तकशब्दवर्जितात् स्वाङ्गवाचकात् सप्तम्या अलुक् स्यात्, नतु कामशब्दे उत्तरपद इत्यर्थः। अत्र संज्ञायामित्यनुवर्तते। अत एव 'हृद्द्युभ्यां च' इत्यत्र हृद्ग्रहणमर्थवत्। **कण्ठेकाल इति।** शिवस्य नाम। **उरसिलोमेति।** कस्यचिन्नाम। अत एव ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः। **बन्धे च विभाषा।** शेषपूरणेन सूत्रं व्याचष्टे—**हलदन्तादिति।** **हस्तेबन्ध इति।** संज्ञायामिति सप्तमीतत्पुरुषोऽयम्। इह तत्पुरुष इति संबध्यते, बन्ध इति घञन्तम्, अन्यत्र तु 'नेन्सिद्ध-' इति निषेध इति स्पष्टं भाष्ये। **तत्पुरुषे कृति।** तत्पुरुषे सप्तम्या बहुलमलुक् स्यात् कृदन्त उत्तरपदे संज्ञायामित्यर्थः। **स्तम्बेरम इति।** तृणसमूहः स्तम्बः, तस्मिन् रमत इति स्तम्बेरमो हस्ती। **कर्णेजप इति।** कर्णे जपति परदोषमुपांश्वाविष्करोतीति कर्णेजपः पिशुनः। 'स्तम्बकर्णयो रमिजपोः'

सप्तमी, कर्मणोऽधिकरणत्वविवक्षया वा। **अविकटोरण इति।** 'संघाते कटच्' इति कटच्प्रत्ययान्तः। उरणो मेषः। **बन्धे च विभाषा।** बन्ध इति घञन्तः। **हस्तेबन्ध इति।** बहुव्रीहिरयम्। तत्पुरुषे तु 'नेन्सिद्धबध्नातिषु च' इति वक्ष्य-

(६-३-१५) प्रावृषिजः। शरदिजः। कालेजः। दिविजः। पूर्वस्यायं प्रपञ्चः। ९७४ विभाषा वर्षक्षरशरवरात्। (६-३-१६) एभ्यः सप्तम्या अलुग्जे। वर्षेजः, वर्षजः। क्षरेजः, क्षरजः। शरेजः, शरजः। वरेजः, वरजः। ९७५ घकालतनेषु कालनाम्नः। (६-३-१७) सप्तम्या विभाषया लुक्स्यात्। घ—पूर्वाह्णेतरे, पूर्वाह्णतरे। पूर्वाह्णेतमे, पूर्वाह्णतमे। काल—पूर्वाह्णेकाले, पूर्वाह्णकाले। तन—पूर्वाह्णेतने, पूर्वाह्णतने। ९७६ शयवासवासिष्वकालात्। (६-३-१८) खेशयः, खशयः। ग्रामेवासः, ग्रामवासः। ग्रामेवासी, ग्रामवासी। 'हलदन्तात्' इत्येव, भूमिशयः। 'अपो योनियन्मतुषु' (वा ३८७६)। अप्सु योनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः। अप्सु भवः अप्सव्यः। अप्सुमन्ता-

---

इत्यच्। उपपदसमासः। **क्वचिन्नेति**। बहुलग्रहणादिति भावः। **कुरुचर इति**। 'चरेष्टः' इत्यधिकरण उपपदे चरेष्टः। उपपदसमासः। यद्यपि हलदन्तादित्यनुवृत्त्यैव सिद्धमिदम्, तथापि बहुलग्रहणादेव सिद्धे 'हलदन्ताद्' इति नानुवर्तनीयमिति भावः। **प्रावृट्शरत्**। प्रावृट्, शरत्, काल, दिव्, एषां सप्तम्या अलुक् स्याद् जशब्दे परे संज्ञायामित्यर्थः। ननु 'हलदन्तात्–' इत्येव सिद्धे किमर्थमिदमित्यत आह—**पूर्वस्यैवायं प्रपञ्च इति**। विस्तर इत्यर्थः। **विभाषा वर्ष**। शेषपूरणेन सूत्रं व्याचष्टे—**एभ्यस्सप्तम्या इति**। **घकालतनेषु**। शेषपूरणेन सूत्रं व्याचष्टे—**सप्तम्या इति**। **घेति**। घे पर उदाहरणसूचनमिदम्। 'तरप्तमपौ घः'। **पूर्वाह्णेतर इति**। अतिशायने सप्तम्यन्तात् तरप्तमपौ। अत एव तत्तद्विभक्त्यन्तात् तरप्तमपाविति विज्ञायते। **कालेति**। उदाहरणसूचनमिदम्। **पूर्वाह्णेकाल इति**। अत एव विशेषणादिसमासोऽपि तत्तद्विभक्त्यन्तानामेव। **तनेति**। उदाहरणसूचनमिदम्। **पूर्वाह्णेतन इति**। 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इति ट्युट्युलौ तुट् च। **शयवास**। शय, वास, वासिन् एतेषु परेषु कालभिन्नात् सप्तम्या अलुक् स्यादित्यर्थः। **अपो योनि**। योनिशब्दे यत्प्रत्यये मतुपि च परेऽप्शब्दात् सप्तम्या अलुक् स्यादित्यर्थः। **अप्सव्य इति**। दिगादित्वाद्यत्। 'ओर्गुणः'। 'वान्तो यि–'इत्यवादेशः। **अप्सुमन्ताविति**। अप्सु इति पदं यदीयमन्त्रयोरस्ति तावप्सुमन्तौ, आज्यभागा-

---

मारोन निषेध एवेत्याहुः। **अप्सव्य इति** दिगादित्वाद्यति ओर्गुणे वान्तादेशः। प्राचा तु यतः स्थाने जं पठित्वा 'अप्सुजः' इत्युदाहृतम्, तदाकरविरुद्धम्। 'जे चरे च नक्कम् अप्सुजः अप्सुचरः' इति भाष्ये वचनान्तरदर्शनाच्च। केचित्तु 'अप्सुजः' इत्युक्तोदाहरणद्वयेऽपि 'हलदन्तात्–' इत्यलुकमाहुः। **अप्सुमन्ताविति**। कारीर्याम् 'अप्स्वग्ने सधिष्टव', 'अप्सु मे सोमो अब्रवीत्' इत्याज्यभाग-

वाज्यभागौ । ६७७ नेन्सिद्धबध्नातिषु च । (६-३-१९) इकन्तादिषु सप्तम्या अलुग्न । स्थण्डिलशायी । सांकाश्यसिद्धः । चक्रबद्धः । ९७८ स्थे च भाषायाम् । (६-३-२०) सप्तम्या अलुग्न । समस्थः । भाषायां किम्-कृष्णोऽस्याः खरेष्ठः । ९७९ षष्ठ्या आक्रोशे । (६-३-२१) चौरस्यकुलम् । आक्रोशे किम्-ब्राह्मणकुलम् । 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' (वा ३८९७) वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः । 'आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च' (वा ३८९८-३८९९) अमुष्यापत्यमामुष्यायणः । नडादित्वात्फक् ।

विति कर्मविशेषौ । **नेन्सिद्धबध्नातिषु च । चक्रबद्ध इति ।** साधनं कृता इति क्तान्तेन सप्तम्यन्तस्य समासः । **स्थे च भाषायाम् ।** 'अनन्तरस्य-' इति न्यायात् । 'तत्पुरुषे कृति' इत्यस्यैवायं निषेधः । अत एव 'अनेकमन्यपदार्थे' इति सूत्रभाष्ये 'सप्तम्युपमानपूर्वपदस्य-' इति वार्तिकव्याख्यावसरे कण्ठेस्थः कालो यस्येति विग्रहे कण्ठेस्थशब्दस्य समासत्वमभ्युपगम्य उत्तरपदलोप उपन्यस्तः संगच्छते । यदा तु अमूर्धमस्तकात्-' इत्यस्याप्ययं निषेधः स्यात्तर्हि तदसंगतिः स्यात्, लुक्प्रसङ्गात् । **षष्ठ्या आक्रोशे ।** अलुगुत्तरपद इति शेषः । आक्रोशो निन्दा । **वाग्दिक् ।** वाक्, दिक्, पश्यत्-एतेभ्यः परस्याः षष्ठ्या अलुक् स्याद् युक्ति, दण्ड, हर एतेषु क्रमादुत्तरपदेषु परेष्वित्यर्थः । **वाचोयुक्तिरिति ।** शब्दप्रयोग इत्यर्थः । **दिशोदण्ड इति** अधिकरणस्य शेषत्वविवक्षायां षष्ठी । **पश्यतोहर इति ।** पश्यन्तमनादृत्य हरतीत्यर्थः । 'षष्ठी चानादरे' इति षष्ठी । **आमुष्यायणेति ।** वार्तिकमिदम् । एते निपात्यन्ते । **अमुष्येति ।** अमुष्यापत्यमित्यर्थे 'नडादिभ्यः फक्' इति फकि आयन्नादेशे आदिवृद्धौ तद्धितान्तत्वात् प्रातिपदिकतया तदवयवत्वात्

मन्त्रौ स्तः । तत्र ह्यप्सुशब्दोऽस्तीति तद्द्वारा आज्यभागयोरप्यप्सुमत्त्वम् । प्राचा तु 'मतिषु' इति पठित्वा 'अप्सुमतिः' इत्युदाहृतम् । अत्र केचित्—अप्स्वित्येतदनुकरणशब्दः, सप्तम्यन्तो वा । आद्ये सप्तम्यन्तात्प्रथमाया अभावेन मतुबेव दुर्लभः । अन्त्ये तु लुकः प्राप्तिरेव नास्ति सप्तम्यभावात् । तथा च 'मतिषु' इति प्राचोक्तः पाठ एव युक्तः । न च स पाठो भाष्यादौ न दृष्ट इति वाच्यम् , 'मतिषु' इति पाठस्य 'अप्सुमतिः' इत्युदाहरणस्य च भाष्यवृत्त्यादिपुस्तकेषु दृश्यमानत्वेन मतुब्विति पाठस्यैव क्वाप्यदर्शनाद् व्यर्थत्वाच्च । 'अस्यवामीयम्' 'कथाशुभीयम्', इत्यादाविव लुक्किर्तव्ये 'प्रकृतिवदनुकरणम्' इत्यतिदेशाप्रवृत्त्यैवेष्टसिद्धेरित्याहुः । **नेन्सिद्धब । चक्रबन्ध इति ।** 'तत्पुरुषे' इत्यनुवृत्तेस्तत्पुरुष एवायं निषेधः । बहुव्रीहौ तु 'बन्धे च विभाषा' इति विकल्प एव । **पश्यतोहर इति ।** 'पश्यन्तमनादृत्य हरति'

अमुष्यपुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका। 'देवानांप्रिय इति च मूर्खे' (वा ३१००)। अन्यत्र देवप्रियः। 'शेपपुच्छलाङ्गूलेषु शुनः' (वा ३१०१)। शुनःशेपः। शुनःपुच्छः। शुनोलाङ्गूलः। 'दिवसश्च दासे' (वा ३१०२) दिवोदासः। ९८० **पुत्रेऽन्यतरस्याम्**। (६-३-२२) षष्ठ्याः पुत्रे परेऽलुग्वा निन्दायाम्। दास्याः पुत्रो दासीपुत्रः। निन्दायां किम्। ब्राह्मणीपुत्रः। ९८१ **ऋतो विद्यायोनिसम्बन्धेभ्यः**। (६-३-२३) विद्यासंबन्धयोनिसंबन्धवाचिन ऋदन्तात्षष्ठ्या अलुक्। होतुरन्तेवासी। होतुःपुत्रः। पितु-

---

प्राप्तस्य सुब्लुको निषेधे नस्य णत्वे आमुष्यायण इति रूपमित्यर्थः। अमुष्य पुत्र इति विग्रहे षष्ठीसमासे षष्ठ्या अलुकि अमुष्यपुत्रशब्दः। अमुष्यपुत्रस्य भाव इत्यर्थे 'द्वन्द्वमनोज्ञादिभ्यश्च' इति वुञि अकादेशे पुत्रशब्दात् सुपो लुकि आदिवृद्धौ स्त्रीत्वाट्टापि 'प्रत्ययस्थात्—' इतीत्वे आमुष्यपुत्रिकाशब्द इत्यर्थः। **एवमिति**। अमुष्य कुलमिति षष्ठीसमासे षष्ठ्या अलुकि अमुष्यकुलशब्दाद्वुञादिः पूर्ववदित्यर्थः।

देवानामिति। वार्तिकमिदम्। मूर्खः अज्ञः। दिवु क्रीडायाम्। देवाः क्रीडासक्ता मूर्खाः, तेषां प्रियोऽपि मूर्ख एव, मूर्खप्रियस्यावश्यं मूर्खत्वादिति 'अजेर्वी—' इत्यत्र कैयटः। **शेपपुच्छेति**। वार्तिकमिदम्। षष्ठ्या अलुगिति शेषः। संज्ञायामिति भाष्यम्। **शुनश्शेप इति**। शुनः शेप इव शेपो यस्येति विग्रहः। 'मेढ्रो मेहनशेफसी' इत्यमरः। शेफशब्दोऽप्यस्ति, 'शेफाय स्वाहा' इति दर्शनात्। **शुनःपुच्छ इति**। शुनः पुच्छमिव पुच्छं यस्येति विग्रहः। एवं शुनोलाङ्गल इत्यपि। ऋषिविशेषाणां संज्ञा एताः। **दिवश्च दास इति**। वार्तिकम्। षष्ठ्या अलुगिति शेषः **दिवोदास इति**। कश्चिद्राजर्षिरयम्। **पुत्रेऽन्यतरस्याम्**। **निन्दायामिति**। आक्रोशे इत्यनुवृत्तिलभ्यमिदम्। स्पष्टं चेदम् 'आनङृतः—' इत्यत्र भाष्ये **ऋतो विद्या**। एकत्वे बहुवचनम्। तदाह — **विद्यासंबन्धयोनिसंबन्ध-**

इत्यर्थः। 'षष्ठी चानादरे' इति षष्ठी। **देवानामिति**। मूर्खा हि देवानां प्रीतिं जनयन्ति देवपशुत्वादिति मनोरमा। अयं भावः—ब्रह्मज्ञानरहितत्वात्संसारिणो मूर्खाः। ते तु यागादिकर्माण्यनुतिष्ठन्तः पुरोडाशादिप्रदानद्वारा देवानामत्यन्तं प्रीतिं जनयन्ति। ब्रह्मज्ञानिनस्तु न तथा, तेषां यागाद्यनुष्ठानाभावात्। अतो गवादिस्थानापन्नत्वान्मूर्खा एव देवपशव इति। **शेपपुच्छेति**। शुन इव शेपमस्य शुनःशेपः।

---

१ 'शेफ' इति क्वचित् पाठः। २ अमरकोशे तु—'शिश्नो मेढ्रं मेहनशेफसी—' इति पाठ उपलभ्यते।

रन्तेवासी। पितुःपुत्रः। 'विद्यायोनिसंबन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम्' (वा ३६०३) नेह—होतृधनम्। ९८२ **विभाषा स्वसृपत्योः** । (६-३-२४) ऋदन्तात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः । ९८३ **मातुःपितुर्भ्यामन्यतरस्याम्** । (८-३-८५) आभ्यां स्वसुः सस्य षो वा स्यात्समासे । मातुःष्वसा, मातुःस्वसा । पितुःष्वसा, पितुःस्वसा । लुक्पक्षे तु—९८४ **मातृपितृभ्यां स्वसा** । (८-३-८४) आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे । मातृष्वसा । पितृ-

---

वाचिन ऋदन्तादिति । **अलुक् स्यादिति** । उत्तरपदे परत इति शेषः । विद्यासंबन्धवाचिनमुदाहरति—**होतुरन्तेवासीति** । ऋग्वेदविहितकर्मविशेषकर्ता होता । अतो होतृशब्दो विद्यासंबन्धप्रवृत्तिनिमित्तक इति भावः । **होतुःपुत्र इति** । विद्यासंबन्धवाचिन उदाहरणान्तरमिदम् । अथ योनिसंबन्धवाचिनमुदाहरति—**पितुरन्तेवासीति, पितुःपुत्र इति च** । ननु होतृधनं पितृधनमित्यत्राप्यलुक् स्यादित्यत आह—**विद्यायोनिसंबन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणमिति** । विद्यायोनिसंबन्धेभ्य इत्यत्र विद्यासंबन्धयोनिसंबन्धवाचिनोः पूर्वोत्तरपदयोर्ग्रहणमित्यर्थः । पूर्वोत्तरपदयोरुभयोरपि विद्यासंबन्धयोनिसंबन्धान्यतरवाचित्वं विवक्षितमिति भावः । होतृधनं पितृधनमित्यत्र उत्तरपदस्य विद्यासंबन्धयोनिसंबन्धान्यतरवाचित्वाभावाद् न षष्ठ्या अलुगिति भावः । अन्यतरसंबन्धवाचित्वस्य विवक्षितत्वादेव होतुःपुत्र इत्यादि सिद्धम् । **विभाषा स्वसृपत्योः** । **ऋदन्तादिति** । विद्यासंबन्धयोनिसबन्धान्यतरवाचिन इति शेषः । ततश्च भोक्तृस्वसेत्यत्र नातिव्याप्तिः । पूर्वेण नित्ये प्राप्ते विकल्पोऽयम् । अलुक्पक्षे विशेषमाह—**मातुःपितुर्भ्यामन्यतरस्याम्** । 'मातृपितृभ्यां स्वसा' इति पूर्वसूत्रात् स्वसेत्यनुवर्तते । षष्ठ्यर्थे प्रथमा । 'सहेः साडस्सः' इति सूत्रात् स इति षष्ठ्यन्तं पदमनुवर्तते । 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् । तदाह—**आभ्यामिति** । मातुः पितुरिति षष्ठ्यन्ताभ्यामित्यर्थः । **समास इति** । 'समासेऽङ्गुलेः सङ्गः' इत्यतस्तदनुवृत्तेरिति भावः । मातुःष्वसा पितुःष्वसेति अलुकि षत्वे रूपम् । *मातुः स्वसा पितुः स्वसेत्यलुकि षत्वाभावे रूपम्* । ***लुक्पक्षे त्विति*** । विशेषो वक्ष्यत इति शेषः । **मातृपितृभ्यां स्वसा** । **स्वसुरिति** । सूत्रे षष्ठ्यर्थे

यद्यपि शेपस्शब्दः सकारान्तः 'गौर्लिङ्गं चिह्नशेपसोः' इत्यमरप्रयोगात् । तथापि शीङो निपातनादौणादिके पप्रत्यये अकारान्तोऽप्यस्त्येव । तथा च मन्त्रः 'यस्यामुशन्तः प्रहराम शेपम्' इति । 'चिह्नशेफयोः' इति पाठे तु शेफशब्दस्य सकारान्तत्वशङ्कैव नास्तीति बोध्यम् । शुनःपुच्छ इत्यादावपि बहुव्रीहिः, त्रयोऽप्यमी ऋषिविशेषाणां संज्ञाः । 'मातुःपितुर्भ्याम्—' इति सूत्रे 'समासेऽङ्गुलेः सङ्गः' इत्यतः समास इत्यनुवर्ति-

ष्वसा। असमासे तु—मातुःस्वसा, पितुःस्वसा।

इत्यलुक्समासप्रकरणम्।

अथ समासाश्रयविधिप्रकरणम्।२५।

६८५ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः। (६-३-४३) भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः स्याद्घरूपकल्पप्प्रत्ययेषु परेषु, चेलडादिषु चोत्तरपदेषु। ब्राह्मणितरा। ब्राह्मणितमा। ब्राह्मणिरूपा।

प्रथमेति भावः। **मातृष्वसा, पितृष्वसेति**। लुक्पक्षे नित्यमेव षत्वम्। आदेशप्रत्ययसकारत्वाभावादप्राप्ते षत्वविधिरयम्। षत्वविधौ समासग्रहणानुवृत्तेः फलं दर्शयति—**असमासे त्विति**। वाक्ये वैकल्पिकं षत्वमपि नास्तीत्यर्थः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायाम् अलुक्समासप्रकरणं समाप्तम्।

अथ समासाश्रयविधिर्निरूप्यते—**घरूप**। उत्तरपदे इत्यधिकृतं चेलडादिष्वन्वेति, नतु घरूपकल्पेषु, घशब्दवाच्यतरप्तमपो रूपप्कल्पपोश्च प्रत्ययत्वात्। नच तदन्तग्रहणे सति तेषूत्तरपदत्वं संभवतीति वाच्यम्, 'हृदयस्य हृल्लेख–' इत्यत्र उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणाभाव इति भाष्य उक्तत्वात्। 'स्त्रियाः पुंवत्–' इत्यतो भाषितपुंस्कादित्यनुवृत्तम्। ङ्य इति तदन्तग्रहणम्, केवलस्यानेकाच्त्वाभावात्। तदाह—**भाषितपुंस्काद्यो ङी इति**। एतदर्थमेव 'स्त्रियाः पुंवत्–' इत्यत्र भाषितपुंस्कादिति पञ्चम्यन्तमुपात्तम्। तत्र भाषितपुंस्काया इति षष्ठ्यन्तोपादाने तु इह तदनुवृत्तिर्न स्यात्, असंभवात्। नहि ङीप्प्रत्ययस्य तदन्तस्य भाषितपुंस्कत्वमस्ति। न च तत्रापि नार्थवत्स्याद् अनूङिति पर्युदासात् स्त्रीप्रत्ययलाभेन तदन्तस्य भाषितपुंस्कत्वाभावादिति वाच्यम्, तत्र स्त्रिया इत्यस्वरितत्वात् स्त्रीप्रत्ययग्रहणं नेत्युक्तत्वात्। **ब्राह्मणितरा। ब्राह्मणितमेति**। अतिशायने तरप्तमपौ। नच 'तसिलादिषु–'

तम्, तत्फलं दर्शयति—**असमासे त्विति**। वाक्ये वैकल्पिकमपि षत्वं नेत्यर्थः।

इत्यलुक्समासप्रकरणम्

घरूपकल्प–। 'तरप्तमपौ घः–'। 'प्रशंसायां रूपप्'। 'चिल वसने'। 'चेलट्' इति पचादौ टित्पठ्यते ङीबर्थम्। **प्रत्ययेष्विति**। लेखग्रहणेन 'उत्तर-

ब्राह्मणिकल्पा। ब्राह्मणिचेली। ब्राह्मणिब्रुवा। ब्राह्मणिगोत्रा इत्यादि। ब्रूञः पचाद्यचि वच्यादेशगुणयोरभावोऽपि निपात्यते। चेलडादीनि वृत्तिविषये कुत्सनवाचीनि। तैः 'कुत्सितानि कुत्सनैः' (सू ७३२) इति समासः। कथः किम्—दत्तातरा। भाषितपुंस्कात् किम्—आमलकीतरा, कुवलीतरा। ९८६ **नद्याः शेषस्यान्यतरस्याम्** । (६-३-४४) अङ्‌यन्तनद्या ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा स्यात्। ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा। स्त्रितरा, स्त्रीतरा। 'कृन्नद्या न' (वा ३९३८)। लक्ष्मीतरा। ९८७ **उगितश्च** । (६-३-४५) उगितः परा या

इति पुंवत्त्वेन ङीपो निवृत्तिः शङ्क्या, 'जातेश्च' इति निषेधात्। **ब्राह्मणिरूपेति** । प्रशंसायां रूपप्। **ब्राह्मणिकल्पेति** । 'ईषदसमाप्तौ-' इति कल्पप्। **ब्राह्मणिचेलीति** । 'चिल वसने' तस्मादचि चेलडिति पचादौ पठितम्। टित्वाद् ङीप्। **इत्यादीति** । ब्राह्मणिमता। ब्राह्मणिहता। **ब्रूञ इति** । ब्रूञ्धातोरचि कृते 'ब्रुवो वचिः' इति वच्यादेशस्य लघूपधगुणस्य च अभावो निपात्यत इत्यर्थः। **चेलडादीनीति** । समासवृत्तिविषये चेलड्ब्रुवगोत्रमतहता इत्युत्तरपदानि कुत्सनवाचीनीति कृत्वा 'कुत्सितानि कुत्सनैः' इति कर्मधारय इत्यर्थः। **आमलकीतरेति** । आमलकीशब्दस्य वृक्षवाचित्वे नित्यस्त्रीलिङ्गत्वाद् भाषितपुंस्कत्वाभावेन न ह्रस्व इति भावः। ननु 'न पदान्त-' इति सूत्रे भाष्ये बिम्बबदर्यामलकशब्दानां भाषितपुंस्कत्वावगमात् कथमामलकीशब्दस्य वृक्षविशेषे नित्यस्त्रीलिङ्गत्वमित्यरुचेराह—**कुवलीतरेति** । वृक्षविशेषे नित्यस्त्रीलिङ्गोऽयमिति भावः। अमरस्तु 'कर्कन्धूर्बदरी कोली घोण्टा कुवलफेनिले' इति नपुंसकत्वमाह। **नद्याः शेषस्यान्यतरस्याम्** । उक्तादन्यः शेषः। ङ्यन्तस्यानेकाच इति पूर्वसूत्रे स्थितम्, तदन्यत्वं च अनेकाचो ङ्यन्तत्वाभावे ङ्यन्तस्यानेकाच्त्वाभावेऽपि संभवति। तदाह—**अङ्‌यन्तनद्या ङ्यन्तस्यैकाचश्चेति** । 'ऊङुतः' इति ब्रह्मबन्धुशब्द ऊङन्तः। भाषितपुंस्कस्येति तु नेहानुवर्तत इत्यभिप्रेत्योदाहरति—**स्त्रितरेति** । **कृन्नद्या नेति** । कृदन्ता या नदी तस्या ह्रस्वो नेति वाच्यमित्यर्थः। **लक्ष्मीतरेति** । 'लक्षेर्मुट् च' इति औणादिके ईप्रत्यये मुडागमे

पदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति ज्ञापयिष्यत इति भावः। **ब्राह्मणितरेति** । 'जातेश्च' इति निषेधात् 'तसिलादिषु ' इति न पुंवद्भावः। **चेलीति** । पचादौ 'चेलट्' इति पाठात् टिड्ढा-' इति ङीप्। **आमलकीति** । आमलकीकुवलीशब्दौ वृक्षे नित्यस्त्रिलिङ्गौ। **नद्याः** । उक्तादन्यः शेषः, स च द्विधेत्याह—**अङ्यन्तेति** । उपलक्षणमेतत्। 'भाषितपुंसक' इत्यपि नेह संबध्यत इत्याशयेनाह—

नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात्। विदुषितरा। ह्रस्वाभावपक्षे तु 'तसिलादिषु-' (सू ८३६) इति पुंवत्। विद्वत्तरा। वृत्त्यादिषु विदुषीतरा इत्यप्युदाहृतम्, तन्निर्मूलम्। ६८८ हृदयस्य हृल्लेखयदण्लासेषु। (६-३-५०) हृदयं लिखतीति हृल्लेखः। हृदयस्य प्रियं हृद्यम्। हृदयस्येदं हार्दम्। हृल्लासः। लेख इत्यणन्तस्य ग्रहणम्। घञि तु हृदयलेखः। लेखग्रहणं ज्ञापकम् 'उत्तरपदाधिकारे तदन्तविधिर्नास्ति' (प २६) इति। ६८९ वा शोकष्यञ्रोगेषु। (६-३-५१) हृच्छोकः, हृदयशोकः। सौहार्द्यम्, सौहृदय्यम्। हृद्रोगः, हृदयरोगः। हृदयशब्दपर्यायो हृच्छब्दोऽप्यस्ति, तेन सिद्धे प्रपञ्चार्थमिदम्। ६९० पादस्य पदाज्यातिगोपहतेषु। (६-३-५२) एषूत्तरपदेषु पादस्य

च लक्ष्मीशब्दः कृदन्त इति भावः। **उगितश्च। विदुषितरेति।** 'विदेः शतुर्वसुः, इति वसुप्रत्ययः। उगिदन्तमिदम्। अनेकाच्त्वाद् 'नद्याः शेषस्य-' इत्यस्याप्राप्तेरिदमिति भावः। **विद्वत्तरेति।** पुंवत्त्वे ङीपो निवृत्तौ विद्वत्तरेति रूपमित्यर्थः। **तन्निर्मूलमिति।** पुंवत्त्वस्य दुर्वारत्वादित्यर्थः। 'विद्वच्छ्रेयसोः पुंवत्त्वं न वक्तव्यम्' इति वृत्तिः। परन्तु वचनमिदं भाष्यादृष्टत्वादुपेक्ष्यमिति भावः। अत्रोगितः परा या नदीति मूलं वर्णयोरेव नदीसंज्ञेति मताभिप्रायकम्। **हृदयस्य।** लेख, यत्, अण्, लास एषु परेषु हृदयस्य हृदादेश इत्यर्थः। हृदयं लिखतीति हृल्लेखः। कर्मण्यण्। **हृदयस्य प्रियं हृद्यमिति।** 'हृदयस्य प्रियः' इति यत्प्रत्ययः। **हार्दमिति।** 'तस्येदम्' इत्यण्, हृदादेशः। **हृल्लास इति।** घञन्तोऽयमिति भावः। **लेखेत्यणन्तस्य ग्रहणमिति।** अण्प्रत्ययसाहचर्यादिति प्राञ्चः। व्याख्यानादिति तत्त्वम्। तर्हि लेखग्रहणमेव व्यर्थम्, अणैव सिद्धेरित्यत आह—**ज्ञापकमिति।** ज्ञाप्यांशमाह—**उत्तरपदाधिकारे तदन्तविधिर्नास्तीति।** तत्फलं तु घरूपकल्पब्ग्रहणे तदन्तविध्यभावः। **वा शोक। सौहार्द्यमिति।** ब्राह्मणादित्वाद् भावे ष्यञि 'हृद्भगसिन्ध्वन्ते-' इत्युभयपदवृद्धिः। **सौहृदय्यमिति।** भावे ष्यञि हृच्छब्दत्वाभावाद् आदिवृद्धौ 'यस्येति च' इति लोपे रूपमिति भावः। **पादस्य**

स्त्रीतरेति। उगितः परा या नदीति। ईदूतोः केवलयोरपि नदीसंज्ञेत्याश्रित्येदमुक्तम्। **विदुषितरेति।** 'उगितश्च' इति ङीपि 'वसोः संप्रसारणम्'। **वृत्त्यादिष्विति।** प्रक्रियातद्व्याख्यानानि चादिशब्दग्राह्याणि। **अणन्तस्य ग्रहणमिति।** अण्प्रत्ययसाहचर्याल्लेखशब्दोऽणन्त एव निर्दिष्ट इति भावः। नन्वेवं लेखग्रहणमेव व्यर्थं स्यादण्ग्रहणेनैव सिद्धेरत आह—**ज्ञापकमिति।** अत एव 'घरूपकल्पेषु तदन्तग्रहणं न' इति व्याख्यातम्। **सौहार्द्यमिति।** ब्राह्मणादित्वात् ष्यञ्, हृद्भग-

पद इत्यदन्त आदेशः स्यात् । पादाभ्यामजतीति पदाजिः । पदातिः । 'अज्यतिभ्यां पादे च' (उ ४७०—४७१) इतीप्रत्ययः । अजेर्व्यभावो निपातनात् । पदगः । पदोपहतः । ९९१ **पद्यत्यतदर्थे** । (६-३-५३) पादस्य पत्स्यादतदर्थे यति परे । पादौ विध्यन्ति पद्याः शर्कराः । अतदर्थे किम्—पादार्थमुदकं पाद्यम् । 'पादार्घाभ्यां च' (सू २०९३) इति यत् । 'इके चरतावुपसंख्यानम्' (वा ३९४८) । पादाभ्यां चरति पदिकः । पर्पादित्वात् ष्ठन् । ९९२ **हिमकाषिहतिषु च** । (६-३-५४) पद्धिमम् । पत्काषी । पद्धतिः । ९९३ **ऋचः**

पद । पद इति लुप्तप्रथमाकं पृथक्पदम् । **एष्विति** । आजि, आति, ग उपहत इत्येतेष्वित्यर्थः । **अदन्त इति** । उत्तरसूत्रे पदिति हलन्तस्य ग्रहणादिति भावः । **अजतीति** । 'अज गतिक्षेपणयोः' । **पदातिरिति** । पादाभ्यामततीति विग्रहः । 'अत गतौ' । **अज्यतिभ्यामिति** । पादे उपपदे अजधातोरतधातोश्च इण् स्यादिति तदर्थः । अजीत्यस्य 'अजेर्व्यघञपोः' इति वीभावमाशङ्क्याह—**अजेर्व्यभावो निपातनादिति** । आजीति निर्देशादित्यर्थः । **पदग इति** । पादाभ्यां गच्छतीत्यर्थः । 'गमश्च, अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः' इति सूत्रस्थेन 'अन्येभ्योऽपि दृश्यते' इति वार्तिकेन गमधातोः डः । तदन्ते गशब्दे परे पादस्यादन्तः पदादेशः । दकारान्तादेशे तु पद्ग इति स्यात् । **पदोपहत इति** । पादाभ्यामुपहत इति विग्रहः । अत्रापि दकारान्तादेशे पदुपहत इति स्यात् । **पद्यत्यतदर्थे** । पद्, यति, अतदर्थे, इति छेदः । **पद्या इति** । 'विध्यत्यधनुषा' इति यत् प्रत्ययः । **पाद्यमिति** । 'पादार्घाभ्यां च' इति तादर्थ्ये यत्प्रत्ययः । **इके चरताविति** । चरत्यर्थे विहितस्य ष्ठनो य इकादेशः तस्मिन् परे पादस्य पत्स्यादित्युपसंख्यानमित्यर्थः । **हिमकाषि** । एषु परेषु पादस्य पत्स्यादित्यर्थः । **पद्धिममिति** । पादस्य हिममिति विग्रहः । **पत्काषीति** । पादौ पादाभ्यां वा कषतीत्यर्थः । 'सुप्यजातौ—' इति णिनिः । **पद्धतिरिति** । हन्यते इति हतिः । कर्मणि क्तिन् । पादाभ्यां हतिरिति विग्रहः ।

सिन्ध्वन्ते-' इत्युभयपदवृद्धिः । **पादस्य पदा** । उत्तरसूत्रे पद्ग्रहणात्पदेत्ययमदन्तः, सौत्रो विभक्तिलुक् । तदाह—**अदन्त आदेश इति** । तेन 'पदगः' इत्यादि सिद्धम् । **पद्या इति** । 'विध्यत्यधनुषा' इति यत् । **पाद्यमिति** । 'पादार्घाभ्यां च' इति यत् । पूर्वसूत्रे आज्यात्यादिषु प्राण्यङ्गस्यैव करणत्वसंभवादिहापि तद्वचन एव पादशब्दो गृह्यते, न परिमाणवचनः । तेन 'द्वाभ्यां पादाभ्यां क्रीतं द्विपाद्यम्, त्रिपाद्यम्' इत्यत्र 'पणपादमाष—' इति यति पदादेशो न भवति । एतच्च वृत्तिहरदत्तग्रन्थयोः स्पष्टम् । **पत्काषीति** । 'सुप्यजातौ—' इति णिनिः । **पद्धतिरिति** । कर्मणि क्तिन् ।

शे। (६-३-५५) ऋचः पादस्य पत्स्याच्छे परे। गायत्रीं पच्छः शंसति। पादं पादमित्यर्थः। ऋचः किम्-पादशः कार्षापणं ददाति। ६६४ वा घोषमिश्रशब्देषु। (६-३-५६) पादस्य पत्। पद्घोषः, पादघोषः। पन्मिश्रः, पादमिश्रः। पच्छब्दः, पादशब्दः। 'निष्के चेति वाच्यम्' (वा ३६६१)। पन्निष्कः, पादनिष्कः। ६६५ उदकस्योदः संज्ञायाम्। (६-३-५७) उदमेघः। 'उत्तरपदस्य चेति वक्तव्यम्' (वा ३६६६)। क्षीरोदः। ६६६ पेषंवासवाहनधिषु च। (६-३-५८) उदपेषं पिनष्टि। उदवासः। उदवाहनः। उदधिर्घटः। समुद्रे तु पूर्वेण सिद्धम्। ६६७ एकहलादौ पूरयितव्येऽन्यतरस्याम्। (६-३-५९) उदकुम्भः, उदककुम्भः। एक इति

'कर्तृकरणे कृता–' इति समासः। ऋचः शे। शस्य शस्प्रत्ययैकदेशस्यानुकरणात् सप्तमीत्यभिप्रेत्योदाहरति—पच्छ इति। 'संख्यैकवचनाच्च वीप्सायाम्' इति पादशब्दात् शस्। 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वम्, नत्विह लोमादिशस्य ग्रहणम्, लोमादौ पादशब्दस्य पाठाभावात्। पादशः कार्षापणं ददातीति। कार्षापणाख्यपरिमाणविशेषं सुवर्णादिकं पादं पादं ददातीत्यर्थः। वा घोष। शेषपूरणेन सूत्रं व्याचष्टे—पादस्य पदिति। निष्के चेति। पादस्य पदिति शेषः। उदकस्योदः। उदकशब्दस्य उद इत्यादेशः स्याद् उत्तरपदे संज्ञायामित्यर्थः। उदमेघ इति। उदकपूर्णमेघसादृश्यात् कस्यचिदियं संज्ञा। उत्तरपदस्य चेति। उत्तरपदस्य उदकशब्दस्य उद इत्यादेशः स्यात् संज्ञायामित्यर्थः। क्षीरोद इति। क्षीरम् उदकस्थानीयं यस्येति विग्रहः। क्षीरोदं सर इति त्वसाध्वेव, असंज्ञात्वात्। पेषंवास। पेषमिति णमुलन्तमव्ययम्। तस्मिन्वासवाहनधिषु च परत उदकशब्दस्य उदः स्यादित्यर्थः। असंज्ञार्थं वचनम्। उदपेषं पिनष्टीति। उदकेन पिनष्टीत्यर्थः। 'स्नेहने पिषः' इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः'। उदवास इति। उदकस्य वास इति विग्रहः। उदवाहन इति। करणे ल्युट्। उदकस्य वाहक इत्यर्थः। उदधिर्घट इति। उदकं धीयतेऽस्मिन्निति विग्रहः। 'कर्मण्यधिकरणे च' इति किप्रत्ययः। असंज्ञात्वस्फोरणाय घट इति विशेष्यम्। समुद्रे त्विति। तत्र उदधिशब्दस्य संज्ञात्वेन 'उदकस्योद–' इति पूर्वसूत्रेण सिद्धमित्यर्थः। एकहलादौ।

ऋचः शे। 'शे' इति शस्प्रत्ययस्येदमनुकरणम्, लोमादिषु पादशब्दस्य पाठाभावान्मत्वर्थे शो न संभवतीति भावः। पच्छब्द इति। 'संख्यैकवचनाच्च वीप्सायाम्' इति शस्। उदमेघ इति। सादृश्यात्पुरुषस्येयं संज्ञा। उदपेषमिति। 'स्नेहने पिषः' इति णमुल्। उदधिरिति। उदकं धीयतेऽस्मिन्निति विग्रहः। 'कर्म-

किम्-उदकस्थाली। पूरयितव्ये इति किम्-उदकपर्वतः। ९९८ मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च। (६-३-६०) उदमन्थः, उदकमन्थः। उदौदनः, उदकौदन इत्यादि। ९९९ इको ह्रस्वोऽङ्यो गालवस्य। (६-३-६१) इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे। ग्रामणिपुत्रः, ग्रामणीपुत्रः। इकः किम्-रमापतिः। अङ्य इति किम्-गौरीपतिः। गालवग्रहणं पूजार्थम्, अन्यतरस्याम् इत्यनुवृत्तेः। 'इयङुवङ्भाविनामव्ययानां च नेति वाच्यम्' (वा ३९९३) श्रीमदः। भ्रूभङ्गः। शुक्लीभावः। 'अभ्रुकुंसादीनामिति वक्तव्यम्' (वा ३९९४) भ्रुकुंसः, भ्रूकुंसः। भ्रुकुटिः, भ्रूकुटिः। 'अकारोऽनेन विधीयते' इति व्याख्यान्तरम्। भ्रकुंसः। भ्रकुटिः। भ्रुवा कुंसो

हल्त्वस्य एकैकवर्णधर्मत्वादेव सिद्धे एकग्रहणादसंयुक्तत्वं लभ्यते। पूरयितव्यं पूरणार्हं कुम्भादि। असंयुक्तहलादौ पूरयितव्यवाचके उत्तरपदे परे उदकस्य उद इत्यादेशः स्यादित्यर्थः। **मन्थौदन**। उदकस्य उदादेशो वेति शेषः। अपूरयितव्यार्थं वचनम्। **उदमन्थः, उदकमन्थ इति**। उदकमिश्रो मन्थ इति विग्रहः। द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः। भर्जितयवपिष्टानि सक्तवः। **उदौदनः, उदकौदन इति**। उदकमिश्र इत्यर्थः। **इत्यादीति**। उदसक्तवः, उदकसक्तवः। उदबिन्दवः, उदकबिन्दवः। उदवज्रःउदकवज्रः। उदभारः, उदकभारः। उदहारः, उदकहारः। उदवीवधः, उदकवीवधः। उदगाहः, उदकगाहः। वीवधस्तु जलाद्याहरणयोग्य उभयतःशिक्यः स्कन्धवाह्यः काष्ठविशेषः। **इको ह्रस्वः**। अङ्य इति च्छेदः। **ग्रामणीपुत्र इति**। कर्मधारयः षष्ठीसमासो वा। नीधातोरीकारोऽयम्, न तु ङीप्प्रत्यय इति भावः। ननु गालवग्रहणस्य विकल्पार्थकत्वं किं न स्यादित्यत आह—**अन्यतरस्यामित्यनुवृत्तेरिति**। **इयङुवङ्भाविनामिति**। तदर्हाणामित्यर्थः। **श्रीमदः। भ्रूभङ्ग इति**। श्रीभ्रूशब्दौ अजादिप्रत्यये परे इयङुवङर्हाविति भावः। **शुक्लीभाव इति**। अभूततद्भावे च्विप्रत्यये 'अस्य च्वौ' इति ईत्वम्। 'च्वौ' इति दीर्घः। 'ऊर्यादिच्विडाचश्च' इति निपातत्वादव्ययत्वमिति भावः। **अभ्रूकुंसादीनामिति**। भ्रूशब्दस्य उवङ्भावितया ह्रस्वनिषेधो यः प्राप्तः स नेत्यर्थः। **अकारोऽनेनेति**।

ण्यधिकरणे च' इति किप्रत्ययः। **उदमन्थ इति**। द्रवद्रव्यसंस्कृताः सक्तवो मन्थः। 'उदकेन मन्थः' इति विग्रहे 'तृतीया' इति योगविभागात्समास इति हरदत्तः। **शुक्लीभाव इति**। 'ऊर्यादिच्विडाचश्च' इति च्व्यन्तत्वान्निपातत्वेऽव्ययत्वम्। **भ्रुकुंस इत्यादि**। 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः' इत्यमरः। 'तन्द्री प्रमीला

भाषणं शोभा वा यस्य स स्त्रीवेषधारी नर्तकः । भ्रुवः कुटिः कौटिल्यम् । १००० एक तद्धिते च । (६-३-६२) एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च । एकस्या आगतमेकरूप्यम् । एकक्षीरम् । १००१ ङ्यापोः संज्ञाछन्दसोर्बहुलम् । (६-३-६३) रेवतिपुत्रः । अजक्षीरम् । १००२ त्वे च । (६-३-६४) त्वप्रत्यये ङ्यापोर्वा ह्रस्वः । अजत्वम्, अजात्वम् । रोहिणित्वम्, रोहिणीत्वम् । १००३ ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे । (६-१-१३) ष्यङन्तस्य पूर्वपदस्य सम्प्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे । १००४ सम्प्रसारणस्य । (६-३-१३९) सम्प्रसारणस्य दीर्घः स्यादुत्तरपदे ।

'अभ्रकुंसादीनाम्–' इति वार्तिके भ्र इति लुप्तप्रथमाकं पृथक्पदम् । तथा च भ्रुकुंसादीनामवयवो यो भ्रूशब्दः तस्य अकारः अन्तादेशः स्यादिति व्याख्यानान्तरमित्यर्थः । **भ्रुवा कुंसो भाषणमिति** । तत्तदर्थज्ञापनमित्यर्थः । 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः' इत्यमरः, 'भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्' इति च । **एकतद्धिते च** । एकेति लुप्तषष्ठीकम् । तदाह—**एकशब्दस्येति** । स्त्रीप्रत्ययान्तस्येति शेषः, अन्यथा ह्रस्वविधिवैयर्थ्यात् । **उत्तरपदे चेति** । चकारात्तदनुकर्ष इति भावः । **एकस्या आगतम् एकरूप्यमिति** । 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' । **एकक्षीरमिति** । एकस्याः क्षीरमिति विग्रहः । **ङ्यापोः** । उत्तरपदे ह्रस्वः स्यादिति शेषः । **रेवतिपुत्र इति** । कस्यचित्संज्ञेयम् । अथ छन्दस्युदाहरति—**अजक्षीरमिति** । अजायाः क्षीरमिति विग्रहः । 'परमं वा एतत्पयो यदजक्षीरम्' इति तैत्तिरीये । **त्वे च** । शेषपूरणेन सूत्रं व्याचष्टे—**त्वप्रत्यये ङ्यापोर्वा ह्रस्व इति** । **अजत्वं रोहिणीत्वमिति** । संज्ञात्वाभावात् छन्दस्येवायमिति वृत्तिः, अनुत्तरपदार्थं वचनम् । ष्यङः **संप्रसारणम्** । प्रत्ययग्रहणपरिभाषया ष्यङ इति तदन्तग्रहणम् । तदाह—**ष्यङन्तस्य पूर्वपदस्येति** । तस्य सूत्रस्य उत्तरपदाधिकारस्थत्वेऽपि तत्पुरुषग्रहणेन पूर्वपदलाभ इति भावः । **उत्तरपदयोरिति** । इदमपि तत्पुरुषपदलभ्यम् । यद्वा उत्तरपदाधिकारेण पूर्वपदमाक्षिप्यते । **संप्रसारणस्य** ।

भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्' इति च । **एकतद्धिते च** । 'एक' इति लुप्तषष्ठीकम्, तदाह—**एकशब्दस्येति** । ह्रस्वविधानमस्य टाबन्त एवोपयुज्यते न तु केवले, स्वभावत एव ह्रस्वत्वादतो व्याचष्टे—**एकस्या आगतमित्यादि** । **ष्यङः** । इह तत्पुरुषपदेन पूर्वपदमुत्तरपदं चाक्षिप्यते, तत्र ष्यङा पूर्वपदस्य विशेषणात्तदन्तं गृह्यत इत्याह—**ष्यङन्तस्येति** । **पुत्रपत्योरुत्तरपदयोरिति** । 'पुत्रपत्यन्तयोः' इति

कौमुदगन्ध्यायाः पुत्रः कौमुदगन्धीपुत्रः। कौमुदगन्धीपतिः। व्यवस्थितविभाषया ह्रस्वो न। 'स्त्रीप्रत्यये चानुपसर्जने न' (प २७) इति तदादिनियमप्रतिषेधात्

दीर्घ इति। 'ढ्रलोपे–' इत्यतस्तदनुवृत्तेरिति भावः। **उत्तरपद इति**। 'अलुगुत्तरपदे' इति तदधिकारादिति भावः। **कौमुदगन्ध्यायाः पुत्र इति**। विग्रहवाक्यमिदम्। कुमुदगन्ध इव गन्धो यस्य स कुमुदगन्धिः। 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वा चोत्तरपदलोपः' इति बहुव्रीहिः, कुमुदगन्धशब्दे पूर्वखण्डे उत्तरस्य गन्धशब्दस्य लोपश्च। 'उपमानाच्च' इति इत्वम्। कुमुदगन्धेरपत्यं स्त्री इत्यर्थे तस्यापत्यमित्यण्। 'अणिञोरनार्षयोः–' इति तस्य ष्यङादेशः। 'यस्येति च' इति इकारलोपः। आदिवृद्धिः। यङश्चाप्। कौमुदगन्ध्याशब्द इति भावः। कौमुदगन्ध्यायाः पुत्र इति षष्ठीसमासः। सुब्लुकि कौमुदगन्ध्यापुत्र इति स्थिते ष्यङः संप्रसारणेन यकारस्य इकारः। तस्य तदुत्तराकारस्य च 'संप्रसारणाच्च' इति पूर्वरूपेण इकारे 'संप्रसारणस्य' इति दीर्घे कौमुदगन्धीपुत्र इति रूपमिति भावः। 'हलः' इति दीर्घस्य तु नात्र प्रसक्तिः, संप्रसारणात् पूर्वस्य हलः संप्रसारणनिरूपिताङ्गावयवत्वाभावात्। **कौमुदगन्धीपतिरिति**। कौमुदगन्ध्यायाः पतिरिति विग्रहः। पूर्ववत्प्रक्रिया। 'इको ह्रस्वोऽङ्यो गालवस्य' इति पाक्षिकं ह्रस्वमाशङ्क्याह—**व्यवस्थितविभाषया ह्रस्वो नेति**। अत्र तु व्याख्यानमेव शरणम्। स्यादेतत्। करीषं गोमहिषादिपुरीषम्, करीषगन्ध इव गन्धो यस्य स करीषगन्धिः, तस्यापत्यं स्त्री कारीषगन्ध्या, परमा चासौ कारीषगन्ध्या च परमकारीषगन्ध्या, तस्याः पुत्रः परमकारीषगन्धीपुत्र इत्यत्रापि ष्यङः संप्रसारणं तस्य दीर्घश्चेति स्थितिः। अत्र संप्रसारणं दुर्लभम्। ष्यङः करीषगन्धिशब्दादेव विहितत्वेन परमकारीषगन्ध्याशब्दस्य पूर्वपदस्य ष्यङन्तत्वाभावात्प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणादित्यत आह—**स्त्रीप्रत्यये चेति**। ष्यङः स्त्रियां विहितत्वात् स स्त्रीप्रत्ययः। ततश्च 'स्त्रीप्रत्यये चानुपसर्जने न' इति परिभाषया तदादिनियमाभावात्परमकारीषगन्ध्याशब्दोऽपि

व्याख्याने तु 'कारीषगन्ध्यापरमपुत्रः' इत्यादावतिप्रसङ्गः स्यादिति भावः। **संप्रसारणस्य**। 'उत्तरपदे' इत्यधिक्रियते। 'ढ्रलोपे–' इत्यतो दीर्घ इत्यनुवर्तते, तदाह—**दीर्घः स्यादुत्तरपद इति**। 'हलः' इति दीर्घोऽत्र न प्रवर्तते, प्रत्ययस्य लुका लुप्तत्वेनाङ्गसंज्ञाया अप्रवृत्तेः। **कौमुदगन्ध्याया इति**। कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या। 'तस्यापत्यम्' इत्यणि कृते 'अणिञोः' इति ष्यङादेशः, 'यङश्चाप्'। ननु 'कौमुदगन्धीपुत्रः' इत्यादौ 'इको ह्रस्वोऽङ्यो गालवस्य' इति ह्रस्वेन भाव्यम्

---

१ क्वचित्तु 'संप्रसारणनिमित्तनिरूपिते' इति पाठः। २ 'च सा' इति क्वचित्।

परमकारीषगन्धीपुत्रः । उपसर्जने तु तदादिनियमाभावः—अतिकारीषगन्ध्यपुत्रः ।

१००५ बन्धुनि बहुव्रीहौ । (६-१-१४) बन्धुशब्द उत्तरपदे ष्यङः सम्प्रसारणं स्याद्बहुव्रीहौ । कारीषगन्ध्या बन्धुरस्येति कारीषगन्धीबन्धुः । बहुव्रीहौ इति किम्–कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । क्लीबनिर्देशस्तु शब्दस्वरूपापेक्षया 'मातच्मातृकमातृषु वा' (वा ३४४६) कारीषगन्धीमातः, कारीषगन्ध्यामातः । कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः । कारीषगन्धीमाता, कारीषगन्ध्यामाता । अत एव निपातनान्मातृशब्दस्य मातजादेशः, 'नद्यृतश्च' (सू ८३३) इति कब्विकल्पश्च । बहुव्रीहावेवेदम्, नेह—कारीषगन्ध्याया माता कारीषगन्ध्यामाता । चित्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते ।

१००६ इष्टकेषीकामालानां चिततूलभारिषु । (६-३-६५) इष्टकादीनां

ष्यङन्त एवेति तत्र संप्रसारणे दीर्घे च परमकारीषगन्धीपुत्र इति रूपमिति भावः । इयं परिभाषा 'ष्यङः संप्रसारणम् ' इति प्रकृतसूत्रे भाष्ये पठिता । तत्रानुपसर्जनग्रहणस्य प्रयोजनमाह––**उपसर्जने त्विति** । कारीषगन्ध्यामतिक्रान्तः अतिकारीषगन्ध्यः, 'अत्यादयः–' इति समासे, उपसर्जनह्रस्वः । तस्य पुत्रः अतिकारीषगन्ध्यपुत्रः । अत्र 'स्त्रीप्रत्यये तदादिनियमो न' इति निषेधो न भवति, अनुपसर्जन एव स्त्रीप्रत्यये तस्य निषेधस्य प्रवृत्तेः । ष्यङ् त्वयं स्त्रीप्रत्ययोऽत्र उपसर्जन एव । अतस्तत्र तदादिनियमसत्त्वाद् अतिकारीषगन्ध्यशब्दो नैव ष्यङन्त इति न संप्रसारणमिति भावः । **बन्धुनि बहुव्रीहौ । कारीषगन्धीबन्धुरिति** । अत्र पत्युत्तरपदत्वाभावात् तत्पुरुषत्वाभावाच्च पूर्वेण न प्राप्तिः । **मातच्मातृकमातृषु वेति** । वार्तिकमिदम् । मातच्, मातृक, मातृ एषु परेषु ष्यङः संप्रसारणं वा वक्तव्यमित्यर्थः । मातचि उदाहरति—**कारीषगन्धीमातः, कारीषगन्ध्यामात इति** । मातृशब्दस्य मातजादेशः, अदन्तमेतत् । मातृके उदाहरति—**कारीषगन्धीमातृकः, कारीषगन्ध्यामातृक इति** । 'नद्यृतश्च' इति कप् । मातृशब्दे उदाहरति—**कारीषगन्धीमाता, कारीषगन्ध्यामातेति** । शैषिककबभावे रूपम् । ननु मातृशब्दस्य मातजादेशे किं प्रमाणम् ? 'नद्यृतश्च' इति नित्यविधानात् पाक्षिककप् च दुर्लभ इत्यत आह—**अत एवेति । बहुव्रीहावेवेदमिति** । 'बन्धुनि बहुव्रीहौ' इति सूत्रे अस्य वार्तिकस्य पठितत्वादिति भावः । मातजिति चित्करणं स्वरार्थमित्याह—**चित्वसामर्थ्यादिति । इष्टकेषीका** । उत्तरपदे इत्यधिकृतम् । तत्कथं

दीर्घविधानं तु पक्षे सावकाशमित्यत आह—**व्यवस्थितविभाषयेति । नेहेति** । संप्रसारणमिह नेत्यर्थः । **अतिकारीषेति** । कारीषगन्ध्यामतिक्रान्तोऽतिकारीष-

तदन्तानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात् । इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी ।

१००७ कारे सत्यागदस्य । (६-३-७०) मुम् स्यात् । सत्यङ्कारः । अगदङ्कारः । 'अस्तोश्चेति वक्तव्यम्' (वा ३९७३) । अस्तुङ्कारः । 'धेनोर्भव्यायाम्' (वा ३९७५) । धेनुम्भव्या । 'लोकस्य पृणे' (वा ३९७६) । लोकंपृणः ।

पूर्वपदमिष्टकादिभिर्विशेष्यते । तदन्तविधिः । व्यपदेशिवद्भावात् तेषामपि ग्रहणम् । उत्तरपदाधिकारस्यापि पदाधिकाराभ्युपगमात् 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति वचनेन वा तेषां ग्रहणम् । 'इको ह्रस्वः–' इत्यतो ह्रस्व इत्यनुवर्तते । तदाह— **इष्टकादीनां तदन्तानां चेति । इष्टकचितमिति ।** इष्टकादिभिश्चितमिति विग्रहः । 'कर्तृकरणे कृता–' इति समासः । तदन्तविधेः प्रयोजनमाह—**पक्वेष्टकचितमिति । इषीकतूलमिति ।** इषीकायास्तूलमिति विग्रहः । तूलमग्रम्, शष्पमित्यन्ये । **मुञ्जेषीकतूलमिति ।** मुञ्जेषीकायास्तूलमिति विग्रहः । **मालभारीति ।** 'सुप्यजातौ–' इति णिनिः । हारिष्विति पाठान्तरम् । **कारे सत्यागदस्य ।** शेषपूरणेन सूत्रं व्याचष्टे—**मुम् स्यादिति ।** 'अरुर्द्विषत्–' इत्यतस्तदनुवृत्तेरिति भावः । सत्यस्य अगदस्य च कारे परे मुम् स्यादिति फलितम् । मुमि मकार इत् । उकार उच्चारणार्थः । मित्त्वादन्त्यादचः परः । **सत्यंकार इति ।** भावे घञ् । सत्यस्य कार इति विग्रहः । शपथकरणमित्यर्थः । **अगदंकार इति ।** गदो रोगः, तस्याभावः अगदः । अर्थाभावेऽव्ययीभावेन सह तत्पुरुषस्य विकल्पोक्तेः । अगदस्य कार इत्यर्थः । **अस्तोश्चेति ।** कारे मुमिति शेषः । **अस्तुंकार इति ।** अस्त्विति तिङन्तप्रतिरूपकमव्ययमभ्युपगमे वर्तते । **धेनोरिति ।** मुम् वक्तव्य इति शेषः । **धेनुंभव्येति ।** नवप्रसवात् प्रागियमुक्तिः । भविष्यन्ती धेनुरित्यर्थः । 'भव्यगेय–' इति कर्तरि निपातनात् कृत्यप्रत्ययः । धेनुश्चासौ भव्या चेति विग्रहः । मयूरव्यंसका-

---

गन्ध्यः, तस्य पुत्रः । **इष्टकचितमिति ।** 'कर्तृकरणे कृता–' इति तृतीयासमासः । **पक्वेष्टकचितमिति ।** पदाधिकारात्तदन्तविधिः प्रवर्तत इति भावः । **मालभारीति ।** 'मालां बिभर्ति' इत्यर्थः । 'सुप्यजातौ–' इति णिनिः । 'हारिषु' इति पाठान्तरम् । **कारे सत्या ।** 'अरुर्द्विषत्–' इत्यतोऽनुवर्तनादाह—**मुम् स्यादिति ।** सत्यंकारः शपथकरणम् । अशपथेऽपि 'सत्यादशपथे' इति डाचं बाधित्वा परत्वान्मुमेव । अगदंकारो वैद्यः । अस्तुंकारोऽभ्युपगमः । अस्त्विति तिङन्तप्रतिरूपकमव्ययम् । **धेनुम्भव्येति ।** भविष्यन्ती धेनुरित्यर्थः । 'भव्यगेय–' इति निपातनात्कर्तरि कृत्यः । धेनुश्चासौ भव्या चेति विग्रहः । गौतमस्मृतौ तु 'अधेनुभव्या'

पृण इति मूलविभुजादित्वात्कः । 'इत्येऽनभ्याशस्य' (वा ३६७७) । अनभ्याशमित्यः । दूरतः परिहर्तव्य इत्यर्थः । 'भ्राष्ट्राग्न्योरिन्धे' (वा ३६७८) भ्राष्ट्रमिन्धः । अग्निमिन्धः । 'गिलेऽगिलस्य' (वा ३६७६) । तिमिङ्गिलः । अगिलस्य किम्–गिलगिलः । 'गिलगिले च' (वा ३६८०) । तिमिङ्गिलगिलः । 'उष्णभद्रयोः करणे' (वा ३६८१) । उष्णङ्करणम् । भद्रङ्करणम् ।

१००८ रात्रेः कृति विभाषा । (६-३-७२) कृदन्ते परे । रात्रिञ्चरः,

दित्वाद् भ्याशब्दस्य परनिपातः । **लोकस्य पृण इति** । मुम्वक्तव्य इति शेषः । ननु लोकं पृणातीति विग्रहे कर्मण्यणि लघूपधगुणे रपरत्वे पर्ण इति स्यादित्यत आह—**पृण इति मूलविभुजादित्वात् क इति । इत्येऽनभ्याशस्येति** । मुम् वक्तव्य इति शेषः । **अनभ्याशमित्य इति** । अभ्याशः समीपम्, अनभ्याशं दूरम्, द्वितीयान्तमिदम् । इणधातोः प्रापणार्थकाद् 'एतिस्तुशास्–' इत्यादिना क्यप् । 'गम्यादीनामुपसंख्यानम्' इति द्वितीयासमासः । सुब्लुकि मुम् । दूरं प्रापयितव्यः, न तु समीपमित्यर्थं मनसि निधायाह—**दूरतः परिहर्तव्य इति** । **भ्राष्ट्राग्न्योरिन्ध इति** । मुम् वक्तव्य इति शेषः । **भ्राष्ट्रमिन्ध इति** । भ्राष्ट्रं धानादिभर्जनार्हं पात्रम्, तद् इन्धे तापयतीति भ्राष्ट्रमिन्धः, कर्मण्यणि उपपदसमासः । सुब्लुकि, मुम् । **अग्निमिन्ध इति** । अग्निं प्रज्वलयतीत्यर्थः । **गिलेऽगिलस्येति** । अगिलस्येति च्छेदः । गिले परे गिलभिन्नस्य मुम् वाच्य इत्यर्थः । **तिमिङ्गिल इति** । 'गॄ निगरणे' । तिमिर्मत्स्यविशेषः । तं गिलतीति मूलविभुजादित्वात् कः । 'ऋत इद्धातोः' इति इत्त्वे रपरत्वे 'अचि विभाषा' इति लत्वम्, उपपदसमासः, सुब्लुकि मुम् । **गिलगिल इति** । अयमपि मत्स्यविशेषः । **गिलगिले चेति** । अगिलस्य मुम् वाच्य इत्यर्थः । **तिमिङ्गिलगिल इति** । गिलं गिलतीति गिलगिलः, तिमीनां गिलगिल इति विग्रहः । संबन्धसामान्ये षष्ठी । तिमिषु गिलगिल इति निर्धारणसप्तमी वा । 'संज्ञायाम्' इति सप्तमीसमासः । **उष्णभद्रयोः करण इति** । मुम् वाच्य इत्यर्थः । उष्णङ्करणम्, भद्रङ्करणमिति षष्ठीसमासः । **रात्रेः कृति विभाषा** । अस्य उत्तरपदाधिकारस्थत्वेन 'प्रत्ययग्रहणे

इत्यत्र 'आर्षत्वान्मुन्न' इति बोध्यम् । **लोकम्पृण इति** । पृणधातुः प्रीणनार्थः । 'पृणातिः पूरणकर्मा' इति तु हरदत्तः । **अनभ्याशमित्य इति** । अभ्याशं समीपं तद्भिन्नमनभ्याशम् । 'एतिस्तुशास्वृदृजुषः' इति इणः क्यप् । **भ्राष्ट्रमिन्ध इति** । कर्मण्यणि उपपदसमासः । एवमग्निमिन्धोऽपि । **गिलेऽगिलस्येति** । 'गिलशब्दे उत्तरपदे अगिलस्य मुम्' इत्यर्थः । **तिमिंगिल इति** । मत्स्यविशेषः । गिरतेर्मूलविभुजादित्वात्कः । 'अचि विभाषा' इति लत्वम् । **गिलगिले चेति** । 'गिलं

रात्रिंचरः। रात्रिमटः, रात्र्यटः। अखिदर्थमिदं सूत्रम्। खिति तु 'अरुर्द्विषत्–' (सू २९४२) इति नित्यमेव वक्ष्यते। रात्रिम्मन्यः। **१००९ सहस्य सः संज्ञायाम्।** (६–३–७८) उत्तरपदे। सपलाशम्। संज्ञायां किम्–सहयुध्वा। **१०१० ग्रन्थान्ताधिके च।** (६–३–७९) अनयोरर्थयोः सहस्य सः स्यादुत्तरपदे। समुहूर्तं ज्योतिषमधीते। सद्रोणा खारी। **१०११ द्वितीये चानुपाख्ये।**

तदन्तग्रहणम्' इति तु इह न भवति। कृती धातुप्रकृतिकत्वेन रात्रेः कृतः असंभवात् तदन्तविधिरित्यभिप्रेत्य आह—**कृदन्ते पर इति**। रात्रेर्मुम् वा स्यादित्यर्थः। **रात्रिंचरः, रात्रिचर इति**। सुप्युपपदे चरेष्टः, उपपदसमासः, सुब्लुकि पक्षे मुम्। **रात्रिमटः, रात्र्यट इति**। सुप्युपपदे मूलविभुजादित्वात् कः। उपपदसमासः। सुब्लुक्पक्षे मुम्। ननु रात्रिम्मन्य इत्यत्रापि मुम्विकल्पः स्यादित्यत आह—**अखिदर्थमिदं सूत्रमिति। खिति त्विति**। खिति तु इमं मुम्विकल्पं बाधित्वा पूर्वविप्रतिषेधेन 'अरुर्द्विषदजन्तस्य–' इति नित्यमेव मुमो विधानं कृदधिकारे वक्ष्यत इत्यर्थः। **रात्रिम्मन्य इति**। 'आत्ममाने खश्च' इति खश्। खशः शित्त्वेन सार्वधातुकत्वात् तस्मिन् परे 'दिवादिभ्यः श्यन्' इति श्यनि खित्त्वान्नित्यं मुमिति भावः। **सहस्य सः। उत्तरपद इति**। शेषपूरणेनोक्तमिदम्। सह इत्यस्य स इत्यादेशः स्यादुत्तरपदे इत्यर्थः। 'वोपसर्जनस्य' इत्यस्यापवादः। **सपलाशमिति**। 'तेन सह–' इति बहुव्रीहिः। वनविशेषस्य संज्ञेयम्। **सहयुध्वेति**। 'सहे च' इति क्वनिप्। असंज्ञात्वान्न सभावः। **ग्रन्थान्ताधिके च**। ग्रन्थान्तश्च अधिकश्चेति समाहारद्वन्द्वः। **अनयोरर्थयोरिति**। विद्यमानस्येति शेषः। **समुहूर्तमिति**। मुहूर्तविधिपरग्रन्थपर्यन्तं ज्योतिःशास्त्रमधीत इत्यर्थः। अन्तवचने अव्ययीभावः 'अव्ययीभावे चाकाले' इत्यत्र कालपर्युदासादप्राप्ते सभावे ग्रन्थान्तग्रहणम्। **सद्रोणा खारीति**। द्रोणपरिमाणादधिकेत्यर्थः। मयूरव्यंसकादित्वात् सहशब्दस्याधिकवाचिनः समासः सभावश्च।

गिलति इति गिलगिलः, तिमीनां गिलगिलः' इति विग्रहे इदमारब्धम्। **रात्रेः कृति**। उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणाभावेऽपि रात्रिशब्दात्परत्र कृतोऽसंभवात्कृदन्त उत्तरपदे अयं विधिरित्याशयेनोदाहरति—**रात्रिंचर इति**। यद्यप्याचारक्विबन्तात् ण्वुलादिः संभवति, तथापि विलम्बितोपस्थितिकत्वात्स न गृह्यत इति भावः। **नित्यमेवेति**। पूर्वविप्रतिषेधेनेति भावः। **रात्रिम्मन्य इति**। 'आत्ममाने खश्च' इति खश् सार्वधातुकत्वत्तस्मिन्परे श्यन्। **सहयुध्वेति**। 'सहे च' इति क्वनिप। स्त्रियामपि 'वनो न हशः' इति निषेधात् ङीब्रौ न। **समुहूर्तमिति**। अन्तवचनेऽव्ययीभावः। 'अव्ययीभावे चाकाले' इत्यत्र कालपर्युदासादप्राप्ते सभावे

(६-३-८०) अनुमेये द्वितीये सहस्य सः स्यात्। सराक्षसीका निशा। राक्षसी साक्षादनुपलभ्यमाना निशयानुमीयते। १०१२ **समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु**। (६-३-८४) समानस्य सः स्यादुत्तरपदे, न तु मूर्धादिषु। 'अनु भ्राता सगर्भ्यः। अनु सखा सयूथ्यः। यो नः सनुत्यः।' 'तत्र भवः' इत्यर्थे 'सगर्भसयूथसनुताद्यत्' (सू ३४६०)। अमूर्धादिषु किम्-समानमूर्धा। समानमूर्धा। समानप्रभृतयः। समानोदर्काः। समानस्य इति योगो विभज्यते। तेन सपक्षः साधर्म्यं सजातीयमित्यादि सिद्धमिति काशिका। अथवा सहशब्दः

द्वितीये चानुपाख्ये। अप्रधानेऽसहाये द्वितीयशब्दो लाक्षणिकः। उपाख्यायते प्रतीयते उपलभ्यते इत्युपाख्यम्, तदन्यदनुपाख्यम्, अनुमेयमिति यावत्। तदाह—**अनुमेय इति**। सहायवाचिन्युत्तरपदे परत इत्यर्थः। **सराक्षसीका निशेति**। 'तेन सह-' इति बहुव्रीहिः। 'नद्यृतश्च' इति कप्। अनुमेयराक्षसीसहिता निशेत्यर्थः। तदाह—**राक्षसी साक्षादिति**। **समानस्य**। **नतु मूर्धादिष्विति**। मूर्धन्, प्रभृति, उदर्क एषु परेषु नेत्यर्थः। **सगर्भ्य इति**। समाने गर्भे भव इत्यर्थः। **सयूथ्य इति**। समाने यूथे भव इत्यर्थः। **सनुत्य इति**। समाने नुते भव इत्यर्थः। सर्वत्र 'तद्धितार्थ-' इति समासे समानस्य सभावः। **समानमूर्धेति**। समानो मूर्धा यस्येति विग्रहः। **समानप्रभृतय इति**। समानः प्रभृतिराद्यवयवो येषामिति विग्रहः। **समानोदर्का इति**। समान उदर्को येषामिति विग्रहः। तैत्तिरीये 'सजूर्ऋतुभिः सजूर्विधाभिः, सजूर्वसुभिः सजूर्देवैः, सजूरुद्रैः, सजूरादित्यैः, सजूर्विश्वैर्देवैः, सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यु सादयतामिह त्वा' इति मन्त्राः संसृष्टाः पञ्च पठिताः। पञ्चस्वपि मन्त्रेषु सजूर्ऋतुभिः सजूर्विधाभिरित्ययमाद्यवयवः, सजूर्देवैर्वयोनाधैरित्यन्तावयवश्च समानः, सजूर्वसुभिः इत्यादिपञ्चानाम् एकैकस्य क्रमेण एकैकस्मिन् मन्त्रे मध्ये निवेश इति याज्ञिकमर्यादा। ननु लोके सपक्षादिशब्देषु कथं समानस्य सभाव इत्यत आह—**समानस्येति योगो विभज्यत इति**। तथा च समानस्य सः स्यादिति वाक्यान्तरं संपद्यते। तत्र छन्दसीत्यभावाल्लोकेऽपि क्वचिद्भवतीति लभ्यत इति भावः। **सपक्ष इति**। समानः पक्षो यस्येति विग्रहः। **साधर्म्यमिति**। समानो धर्मो यस्य स सधर्मा, समानस्य सभावः। तस्य भावः साधर्म्यम्। ब्राह्मणादित्वात् ष्यञ्। **सजातीयमिति**। समाना जातिर्यस्य इति विग्रहः।

ग्रन्थान्तग्रहणम्। **द्वितीये**। 'अप्रधानो यः स द्वितीयः' इति लोकप्रसिद्धम्, उपाख्यं प्रत्यक्षं तद्भिन्नमनुमेयं तदाह—**अनुमेय इति**। **सराक्षसीकेति**। 'नद्यृतश्च' इति कप्। **योगो विभज्यत इति**। एतदर्थमेव छान्दसमपि 'समानस्य

सदृशवचनोऽस्ति, सदृशः सख्या ससखीति यथा । तेनायमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षोऽस्येत्यादि । १०१३ **ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु।** (६-३-८५) एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्। सज्योतिः। सजनपद इत्यादि । १०१४ **चरणे ब्रह्मचारिणि।** (६-३-८६) ब्रह्मचारिण्युत्तरपदे समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने। चरणः शाखा। ब्रह्म वेदः, तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी, समानस्य सः, सब्रह्मचारी। १०१५ **तीर्थे ये।** (६-३-८७)

समानस्य सभावः। 'जात्यन्ताच्छ बन्धुनि' इति छः। **इत्यादीति**। संग्राम इत्यादिसंग्रहः। योगविभागस्य भाष्यादृष्टत्वाद् युक्त्यन्तरमाह—**अथवेति । तेनेति**। तेन सदृशवचनेन सहशब्देन बहुव्रीहिरित्यन्वयः तथा च 'वोपसर्जनस्य' इति सहस्य सभाव इति भावः। ननु तर्हि समानः पक्षो यस्य इति कथं विग्रहः। सहशब्दस्यैव विग्रहे प्रवेशौचित्यादित्यत आह—**अस्वपद इति**। वृत्तावेव सहशब्दः सदृशवचन इति भावः। **ज्योतिर्जनपद** । अच्छन्दोऽर्थं वचनमिदम् । **सज्योतिरिति**। समानं ज्योतिर्यस्येति विग्रहः। **एवं सजनपद इत्यादीति** । सरात्रिः, सनाभिः, सनामा, सगोत्रः, सरूपः, सस्थानः, सवर्णः, सवयाः, सवचनः, सबन्धुः । **चरणे ब्रह्मचारिणि**। समानस्येति स इति चानुवर्तते । उत्तरपद इत्यधिकृतम्, तदाह—**ब्रह्मचारिण्युत्तरपदे समानस्य सः स्यादिति** । चरणे इति सप्तमी समानस्येत्यत्रान्वेति । चरणे विद्यमानस्येत्यर्थः। फलितमाह—**चरणे समानत्वेन गम्यमान इति**। तत्र चरणपदं व्याचष्टे—**चरणः शाखेति** । वैदिकप्रसिद्धिरेवात्र मूलम् । ब्रह्मचारिपदं निर्वक्तुमाह—**ब्रह्म वेद इति** । 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः । **तच्चरणार्थमिति**। तस्य वेदस्य चरणम् अध्ययनं तच्चरणम्, व्रतमपि ब्रह्मशब्देन विवक्षितमित्यर्थः । गौण्या वृत्त्येति शेषः । **तच्चरतीति** । तद् व्रतं चरति अनुतिष्ठतीत्यर्थे ब्रह्मचारिशब्द इत्यर्थः। 'सुप्यजातौ–' इति णिनिः। **समानस्य स इति** । समानो ब्रह्मचारीति कर्मधारये सति प्रकृतसूत्रेण समानस्य सभावे

च्छन्दसि' इति सूत्रमिहोपन्यस्तमिति भावः। **बहुव्रीहिरिति**। तेन 'वोपसर्जनस्य' इति सहस्य सभावः प्राप्नोतीति भावः । **सज्योतिरिति** । समानं ज्योतिरस्येति बहुव्रीहिः। यस्मिन् ज्योतिषि आदित्ये नक्षत्रे वा संजातं तदस्तमयपर्यन्तमनुवर्तमानमाशौचं सज्योतिः इत्युच्यते। इह 'समानमध्यमध्यमवीराश्च' इति प्रतिपदोक्त एव समासो न गृह्यते, 'सरूपाणामेकशेषः–' इति लिङ्गात् । किंतु बहुव्रीहिरपि इति हरदत्तः। **ब्रह्मचारीति**। 'व्रते' इति णिनिः **सब्रह्मचारीति** । समानो ब्रह्मचारी

तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। सतीर्थ्यः-एकगुरुकः। 'समानतीर्थे वासी' (सू १६५८) इति यत्प्रत्ययः। १०१६ विभाषोदरे। (६-३-८८) यादौ प्रत्यये विवक्षित इत्येव। सोदर्यः, समानोदर्यः। १०१७ दृग्दृशवतुषु। (६-३-८९) सदृक्। सदृशः। 'दृक्षे चेति वक्तव्यम्' (वा ३६६२) सदृक्षः। वतुरुत्तरार्थः। १०१८ इदंकिमोरीश्की। (६-३-९०) दृग्दृशवतुषु

सति सब्रह्मचारीति रूपमित्यर्थः। समानत्वं च वेदद्वारा बोध्यम्। तथाच समानवेदाध्ययनार्थं व्रतचारीति फलितोऽर्थः। भाष्ये तु समाने ब्रह्मणि व्रतं चरतीत्यर्थे चरेर्णिनिः व्रतशब्दस्य लोपश्च अत्र निपात्यत इत्युक्तम्। **तीर्थे ये।** यशब्दाद् अकारान्तात्सप्तम्येकवचनम्, अकारो न विवक्षितः, प्रत्यय इति विशेष्यमध्याहार्यम्। 'यस्मिन् विधिः-' इति तदादिविधिः। तदाह—**यादौ प्रत्यय इति।** नात्र यप्रत्ययान्ते तीर्थशब्दे परे इति व्याख्यातुं शक्यते, 'समानतीर्थे वासी' इति समानतीर्थशब्दात् कृतसमासादेव (वासीति तद्धितार्थे) यप्रत्ययविधानात्। स च यप्रत्ययः अन्तरङ्गे सभावे कृत एव भवति। 'समर्थानां प्रथमाद्वा' इति सूत्रेण परिनिष्ठितादेव तद्धितोत्पत्तेर्वक्ष्यमाणत्वात् कृतेऽपि सभावे एकदेशविकृतन्यायेन भूतपूर्वगत्या वा समानतीर्थशब्दसत्त्वात्। अतो यप्रत्ययपरकत्वं समानशब्दस्य कथमित्यत आह—**विवक्षित इति।** **सतीर्थ्य इति।** समाने तीर्थे वासीत्यर्थः। अत्र सामीप्ये सप्तमी। समानशब्दस्त्वेकपर्यायः। तीर्थशब्दो गुरौ, तदाह—**एकगुरुक इति।** तद्धितार्थे समासप्रवृत्तये तद्धितं दर्शयति—**समानेति।** 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः। **विभाषोदरे।** उदरशब्दे परे समानस्य सभावो वा स्यादित्यर्थः। **इत्येवेति।** अनुवर्तत एवेत्यर्थः। **दृग्दृशवतुषु।** समानस्य स इति शेषः। **सदृक्, सदृश इति।** समानो दृश्यत इत्यर्थे 'समानान्ययोश्च' इति दृशेः क्विन् कञ् च। **दृक्षे चेति।**

इत्यर्थः। ब्रह्मचारिणश्च समानत्वं ब्रह्मणः समानत्वात्। ततश्च 'समाने ब्रह्मणि व्रतचारी' इति फलितोऽर्थः। **तीर्थे ये।** अकारो न विवक्षितः। प्रत्यय इति विशेष्यं तु व्याख्यानाल्लभ्यते। तेन 'यस्मिन्विधिः-' इति तदादिविधिरित्याह—**यादौ प्रत्यय इति। विवक्षित इति।** उत्तरपदमात्रनिमित्तः समासोऽन्तरङ्गः, समासप्रकृतिकसुबन्तात्तु यत्प्रत्ययः, अतस्तस्य परत्वं न संभवतीत्याशयेनेदमुक्तम्। **सोदर्य इति।** 'समानोदरे शयितः' इत्यर्थे प्रत्ययात्प्राक् समानस्य सभावे कृते 'सोदराद्यः' इति यः। सभावाभावपक्षे तु 'समानोदरे शयित ओ चोदात्तः' इति यति समानोदर्यः। **सदृक्। सदृश इति।** 'समानान्ययोश्चेति वक्तव्यम्' इति दृशेः क्विन्कञौ।

१ 'कृतसमासादेव' इत्यस्यादौ क्वचित् 'तद्धितार्थे-' इति इति पाठः।
२ अयं कोष्ठान्तर्गतः पाठः क्वचिन्नास्ति।

इदम ईश् किमः की स्यात् । ईदृक् । ईदृशः । कीदृक् । कीदृशः । वतूदाहरणं वक्ष्यते । 'दृक्षे चेति वक्तव्यम्' (वा ३११२) ईदृक्षः । कीदृक्षः । 'आ सर्वनाम्नः' (सू ४३०) । 'दृक्षे च' (वा ३११२) तादृक् । तादृशः । तावान् । तादृक्षः । दीर्घः, मत्वोत्वे । अमूदृशः । अमूदृक् । अमूदृक्षः । **१०१९ समासेऽङ्गुलेः सङ्गः ।** (८-३-८०) अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्धन्यः स्यात्समासे । अङ्गुलिषङ्गः । समासे किम्—अङ्गुलेः सङ्गः । **१०२० भीरोः स्थानम् ।** (८-३-८१) भीरुशब्दात्स्थानस्य सस्य मूर्धन्यः स्यात्समासे । भीरुष्ठानम् । असमासे तु भीरोः स्थानम् । **१०२१ ज्योतिरायुषः स्तोमः ।** (८-३-८३) आभ्यां स्तोमस्य सस्य मूर्धन्यः समासे ज्योतिष्टोमः । आयुष्टोमः । समासे किम्-ज्योतिषः स्तोमः । **१०२२ सुषामादिषु च ।** (८-३-९८) सस्य मूर्धन्यः । शोभनं साम यस्य सुषामा । सुषन्धिः । **१०२३ एति संज्ञायामगात् ।** (८-३-९९) (ग १८२) सस्य मूर्धन्यः । हरिषेणः । एति किम्–

समानस्य सत्वमिति शेषः । **सदृक्ष इति** । 'क्सोऽपि वाच्यः' इति दृशेः क्सः । **वतुरुत्तरार्थ इति** । यत्तदेतेभ्यः परिमाणे वतुपः समानशब्दादसंभवादिति भावः । **इदंकिमोरीश्की** । ईश् की इति द्वे पदे । **ईदृक्, ईदृश इति** । इदमिव दृश्यते इत्यर्थे त्यदादिषु दृशेः क्विन्कञौ । ईशः शित्वं सर्वादेशत्वाय । **वक्ष्यत इति** । तद्धितप्रकरणे इयान् इत्युदाहरणं वक्ष्यत इत्यर्थः । **दृक्षे चेति** । इदंकिमोः ईश्की वक्तव्यौ इति शेषः । **आ सर्वनाम्न इति** । आ इति लुप्तप्रथमाकम् । **तादृक्, तादृश इति** । तदिव दृश्यत इत्यर्थे 'त्यदादिषु दृशः–' इति क्विन्कञौ । तदो दकारस्य आत्वे सवर्णदीर्घः । **तावानिति** । तत् परिमाणमस्येति विग्रहे 'यत्तदेतेभ्यः–' इति वतुप् । **तादृक्ष इति** । तदिव दृश्यत इति विग्रहः । अमूदृगित्यत्र प्रक्रियां दर्शयति—**दीर्घ इति** । अदस आत्वे कृते सवर्णदीर्घः । तत ऊत्वमत्वे इत्यर्थः । अः सेरिति व्याख्यानेऽपि अकारेण आकारस्यापि ग्रहणाद् ऊत्वमत्वे । **समासेऽङ्गुलेः सङ्गः । भीरोः स्थानम् । ज्योतिरायुषः स्तोमः** । अत्र त्रिसूत्र्याम् अङ्गुलेः सङ्गः, भीरोः स्थानम्, ज्योतिषः स्तोमः, आयुषः स्तोम इत्याद्यर्थे प्रत्यासत्त्या तयोः पदयोः समासे सति उत्तरपदस्थस्य सस्य ष इत्यर्थः । तद् ध्वनयन् प्रत्युदाहरति—**अङ्गुलेः सङ्ग इत्यादि** । नेह 'इणकोः' इत्यनुवर्तते, व्याख्यानात् । **सुषामादिषु च** । स्पष्टम् । **एति संज्ञायामगात्** । एकारे परे सस्य षः

दीर्घ इति । अदस आत्वे कृते सवर्णदीर्घ इत्यर्थः । एतच्च पूर्वोत्तरोदाहरणान्वयि । **भीरोः स्थानमिति** । विसर्जनीयव्यवधानेऽपि षत्वप्राप्तिरस्ति । **ज्योतिषः स्तोम**

हरिसक्थम्। संज्ञायां किम्–पृथुसेनः। अगकारात् किम्–विष्वक्सेनः। इणकोः इत्येव। सर्वसेनः। १०२४ नक्षत्राद्वा। (८–३–१००) (ग १८३)। षति सस्य संज्ञायामगकारान्मूर्धन्यो वा। रोहिणीषेणः, रोहिणीसेनः। अगकारात् किम्–शतभिषक्सेनः। आकृतिगणोऽयम्। १०२५ अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु। (६–३–९९) अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः। अन्यदीयः। अषष्ठीत्यादि किम्– अन्यस्यान्येन वाशीरन्याशीः। 'कारके छे च नायं निषेधः' (वा ४०४८)। अन्यस्य कारकोऽन्यत्कारः। अन्यस्यायमन्यदीयः। गहादेराकृतिगणत्वाच्छः। १०२६ अर्थे विभाषा। (६–३–१००) अन्यदर्थः। अन्यार्थः। १०२७ कोः कत्तत्पुरुषेऽचि। (६–३–१०१) अजादावुत्तरपदे। कुत्सितोऽश्वः कदश्वः। कदन्नम्। तत्पुरुषे किम्–कूष्ट्रो राजा। 'त्रौ च' (वा ३९९८) कुत्सितास्त्रयः कत्त्रयः। १०२८ रथवदयोश्च। (६–३–१०२) कद्रथः। कद्वदः। १०२९ तृणे च जातौ। (६–३–१०३) कत्तृणम्।

स्यादित्यर्थः। नक्षत्राद्वा। स्पष्टम्। अषष्ठ्यतृतीयास्थस्य। अषष्ठ्याम् अतृतीयायां च परतस्तिष्ठतीति अषष्ठ्यतृतीयास्थः, तस्य अषष्ठीतृतीयान्तस्येत्यर्थः। अषष्ठीतृतीयास्थस्येत्येव सिद्धे नञ्द्वयोपादानं स्पष्टार्थम्। आशीरादिष्विति। आशीः, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक, राग, छ इत्येतेषु इत्यर्थः। दुकि ककार इत्। उकार उच्चारणार्थः। कित्त्वादन्तावयवः। अन्यदाशीरित्यादयः कर्मधारयाः। नायं निषेध इति। 'अषष्ठ्यतृतीयास्थस्य' इति निषेधः कारकच्छयोर्नास्तीत्यर्थः। भाष्योक्तमिदम्। अर्थे विभाषा। अन्यस्य दुगिति शेषः। कोः कत्तत्पुरुषेऽचि। कत् इति च्छेदः। शेषपूरणेन सूत्रं व्याचष्टे—अजादावुत्तरपद इति। कदश्वः, कदन्नमिति। 'कुगति–' इति समासः। कूष्ट्रो राजेति। कुत्सित उष्ट्रो यस्येति बहुव्रीहित्वाद् न कदादेशः। त्रौ चेति। त्रिशब्दे परे कदादेशो वक्तव्य इत्यर्थः। उत्तरपदस्याजादित्वाभावाद् वचनम्। रथवदयोश्च। 'कोः कत्तत्पुरुषे–'

इति। इह 'ज्योतिःस्तोमोऽयम्' इति प्रत्युदाहर्तुमुचितम्। षति संज्ञायामिति। सुषामाद्यन्तर्गणसूत्रमेतत्। एवं 'नक्षत्राद्वा' इत्यपि। विष्वक्सेन इति। चर्त्वस्यासिद्धत्वाद्ककारेण व्यवधानमस्तीति भावः। अषष्ठ्य। अन्यदाशीरित्यादयः कर्मधारयाः। नायं निषेध इति। एतच्च 'अषष्ठीतृतीयास्थस्य–' इत्येव सिद्धे निषेधानित्यत्वज्ञापनार्थाद् द्विर्नञ उपादानाल्लभ्यत इत्याहुः। त्रौ चेति। अनजाद्यर्थमिदं वार्तिकम्,

१०३० **का पथ्यक्षयोः ।** (६-३-१०४) कापथम् । काक्षः । अक्षशब्देन तत्पुरुषः, अक्षिशब्देन बहुव्रीहिर्वा । १०३१ **ईषदर्थे ।** (६-३-१०५) ईषज्जलं काजलम् । अजादावपि परत्वात्कादेशः–काम्लः । १०३२ **विभाषा पुरुषे ।** (६-३-१०६) कापुरुषः, कुपुरुषः । अप्राप्तविभाषेयम् । ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव । ईषत्पुरुषः कापुरुषः । १०३३ **कवं चोष्णे ।** (६-३-१०७) उष्णशब्दे उत्तरपदे कवं का च वा स्यात् । कवोष्णम्, कोष्णम्, कदुष्णम् । १०३४ **पृषोदरादीनि यथोपदिष्टम् ।** (६-३-१०९) पृषोदरप्रकाराणि

इति शेषः । **कद्रथः, कद्वद इति** । 'कुगति-' इति समासः । वदतीति वदः । कुत्सितो वदः कद्वदः । **तृणे च जातौ ।** तृणशब्दे कोः कत्स्याद् जातौ वाच्यायाम् । **कत्तृणमिति ।** तृणजातिविशेषोऽयम् । 'अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम्' इत्यमरः । **का पथ्यक्षयोः ।** पथिन्, अक्ष अनयोः परतः कोः का इत्यादेशः स्यादित्यर्थः । **कापथमिति ।** कुत्सितः पन्था इति विग्रहः । 'कुगति-' इति समासः । 'ऋक्पूः-' इत्यप्रत्ययः । 'पथः संख्याव्ययादेः' इति नपुंसकत्वम् । कापथ इति पाठे तु बहुव्रीहिः । काक्षशब्दे समासं दर्शयति—**अक्षशब्देन तत्पुरुष इति ।** कुत्सितमक्षमिन्द्रियमिति विग्रहे 'कुगति-' इति समास इत्यर्थः । **अक्षिशब्देनेति ।** कुत्सिते अक्षिणी यस्येति विग्रहे 'बहुव्रीहौ सक्थ्यक्ष्णोः-' इति षजित्यर्थः[1] । **ईषदर्थे ।** ईषदर्थे विद्यमानस्य कोः का इत्यादेशः स्यादित्यर्थः । **ईषज्जलं काजलमिति ।** ईषद् जलमिति विग्रहे 'कुगति-' इति समासः । नित्यसमासत्वाद् अस्वपदविग्रहप्रदर्शनम् । कुत्सित आम्लः काम्ल इत्यत्र 'कोः कत्तत्पुरुषेऽचि' इति कदादेशमाशङ्कयाह—**अजादावपीति । विभाषा पुरुषे ।** कोः का इत्यादेश इति शेषः । **अप्राप्तविभाषेति ।** ननु कोः ईषदर्थकत्वे सति 'ईषदर्थे' इति नित्ये कादेशे प्राप्ते विकल्पसंभव इत्यत आह—**ईषदर्थे हीति ।** वृत्त्यनुसारेणेदमुक्तम्, पूर्वविप्रतिषेधस्य भाष्यानुक्तत्वात् । **कवं चोष्णे । कवं का च वेति ।** विभाषेत्यनुवृत्तेरिति भावः । उभयाभावे कदादेशः । तथाच रूपत्रयम् । तदाह—**कोष्णम्, कवोष्णम्, कदुष्णम् इति । पृषोदरादीनि यथोपदिष्टम् ।** आदिशब्दो न प्रभृतिवाची, गणपाठे पृषोदरादिपाठस्यादर्शनाद् यथोपदिष्टपदस्य वैयर्थ्याच्च । किंतु प्रकारवाची,

---

'कन्यादिभ्यो ढकञ्' इति निर्देशेनैव सिद्धम् । **कापथमिति ।** कुत्सितः पन्थाः । 'ऋक्पूरब्धूः-' इति समासान्तः । 'पथः संख्याव्ययादेः' इति नपुंसकत्वम् । **अप्राप्तविभाषेति ।** 'ईषदर्थे' इत्यस्यानुवृत्तेरिति भावः । **पृषोदरप्रकाराणीति ।**

---

१ 'इत्यजित्यर्थः' इत्यन्यत्र पाठः ।

शिष्टैर्यथोच्चरितानि तथैव साधूनि स्युः। पृषदुदरं पृषोदरम्, तलोपः। वारिवाहको बलाहकः, पूर्वपदस्य बः, उत्तरपदादेश्च लत्वम्।

'भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।
गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्।'

'दिक्छब्देभ्यस्तीरस्य तारभावो वा' (वा ३३३३) दक्षिणतारम्, दक्षिण-

---

तदाह—**पृषोदरप्रकाराणीति**। प्रकारः सादृश्यम्, तच्च शास्त्रोक्तलोपागमादेशादिरहितत्वेन बोध्यम्। व्याकरणशास्त्राग्रहीतानीति यावत्। उपपूर्वको दिशिरुच्चारणार्थः। भावे क्तः। उपदिष्टमुपदेशः, उच्चारणम्, तदनतिक्रम्य यथोपदिष्टम्। पदार्थानतिवृत्तावव्ययीभावः। शिष्टैरित्यध्याहार्यम्। तथाच फलितमाह—**शिष्टैर्यथोच्चारितानि तथैव साधूनीति**। शिष्टास्तु शब्दतत्त्वसाक्षात्कारवन्तो योगिन इति भाष्यकैयटयोः स्पष्टम्। **तलोप इति**। षष्ठीसमासे सुब्लुकि तलोपे 'आद्गुणः' इति भावः। **पूर्वपदस्येति**। वारिवाहकशब्दे वारिशब्दस्य पूर्वपदस्य बकारः सर्वादेशः। वाहकशब्द उत्तरपदं तदादेर्वकारस्य लकारादेश इत्यर्थः। **भवेद्वर्णागमाद्धंस इति**। हसधातोः पचाद्यचि अनुस्वारागमे हंस इति रूपमित्यर्थः। हनधातोरचि सगागमे 'नश्चापदान्तस्य—' इति अनुस्वार इत्यन्ये। **सिंहो वर्णविपर्ययादिति**। 'हिसि हिंसायाम्' इत्यतः पचाद्यचि इदित्वान्नुम्। 'नश्च—' इत्यनुस्वारः। हकारस्य सकारः, सकारस्य हकारश्च। सिंह इति रूपमित्यर्थः। यद्यपि हंससिंहयोरुणादौ व्युत्पत्तिरुक्ता, तथाप्युणादिसूत्राणां शाकटायनप्रणीतत्वेन शास्त्रान्तरत्वादिह व्युत्पादनं न दोष इत्याहुः। **गूढोत्मा वर्णविकृतेरिति**। गूढ आत्मा यस्येति बहुव्रीहौ उत्तरपदादेराकारस्य उकारे आद्गुणे रूपमिति भावः। **वर्णनाशात्पृषोदरमिति**। पृषद् उदरमित्यत्र तकारलोपे सति आद्गुणे पृषोदरमिति

आदिशब्दो हि न व्यवस्थावचनः, यथोपदिष्टपदानर्थक्यादिति भावः। **शिष्टैरिति**। अध्याहारलभ्यमिदम्। 'यथोपदिष्टम्' इत्यत्र यथार्थेऽव्ययीभावः। उपदिशिश्चोच्चारणक्रियः। 'यानि यानि शिष्टैरुपदिष्टानि' इत्यर्थः। एवं स्थिते फलितमाह—**यथोच्चारितानि तथैवेति**। समासपदविषयकमिदम्। उत्तरपदाधिकारात्। निरुक्तादिशास्त्रसिद्धानामसमासपदानाम् 'उणादयो बहुलम्' इत्येव सिद्धेश्च। यद्यपि समासविषयकमेवेति नियमो न युज्यते, हंससिंहशब्दयोरपि प्राचां कारिकायामुदाहृतत्वात्, तथापि तत्कारिकायां यथाशब्दाध्याहारेण दृष्टान्तप्रदर्शनार्थं तयोरुपन्यासः कृतो न तु प्रकृतसूत्रोदाहरणत्वेनेति नियमोक्तिः सम्यगेवेत्याहुः। **वर्णागमादिति**। हन्तेः पचाद्यचि समागमः। **विपर्ययादिति**। हिंसेस्तु पचाद्यचि हकारसकारयोः स्थानव्यत्ययः।

तीरम्। उत्तरतारम्, उत्तरतीरम्। 'दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च' (वा ४००१) दुःखेन दाश्यते दूडाशः। दुःखेन नाश्यते दूणाशः। दुःखेन दभ्यते दूडभः। खल् त्रिभ्यः। दम्भेर्नलोपो निपात्यते। दुःखेन ध्यायतीति दूढ्यः। 'आतश्च—' (सू २८९८) इति कः। बुवन्तोऽस्यां सीदन्तीति बृसी। बुवच्छब्दस्य बृ आदेशः। सदेरधिकरणे डट्। आकृतिगणोऽयम्। १०३५ संहितायाम्। (६-३-११४) अधिकारोऽयम्। १०३६ कर्णे लक्षणस्या-

भवतीत्यर्थः। दिक्छब्देभ्यस्तीरस्येति। वार्तिकमिदम्। दुरो दाशेति। इदमपि वार्तिकम्। दुर् इत्यस्य दाश, नाश, दभ, ध्य इत्येतेषु परेषु उत्वम् उत्तरपदादेः ष्टुत्वं च वक्तव्यमित्यर्थः। दूडाश इति। दुर् दाश इति स्थिते रेफस्योत्वे सवर्णदीर्घः, दाशेर्दकारस्य ष्टुत्वेन डकारः। दूणाश इति। दुर् नाश इति स्थिते रेफस्य उत्वं सवर्णदीर्घः। नाशेर्नकारस्य ष्टुत्वेन णत्वम्। दूडभ इति। दुर् दभ इति स्थिते रेफस्य उत्वं सवर्णदीर्घः। दभेर्दकारस्य ष्टुत्वेन डकारः। खल् त्रिभ्य इति। 'दाश्ट दाने' 'णश अदर्शने' णयन्तः, 'दभ् हिंसायाम्' इति त्रिभ्यो धातुभ्यः 'ईषद्दुस्सुषु-' इति खल्प्रत्यय इत्यर्थः। ननु क्ङित्परकत्वाभावात् कथमिह 'अनिदिताम्-' इति नलोप इत्यत आह—दम्भेर्नलोपो निपात्यत इति। दूढ्य इति। दुर् ध्य इति स्थिते रेफस्य उत्वं सवर्णदीर्घः, धस्य ष्टुत्वेन ढत्वम्। आतश्चेति। 'ध्यै चिन्तायाम्' 'आतश्चोपसर्गे' इति कप्रत्यये 'आदेच उपदेशे-' इति आत्त्वे 'आतो लोप इटि च' इत्याल्लोपे ध्यशब्द इत्यर्थः। सदेरिति। सद्धातोः अधिकरणेऽर्थे डटि डित्त्वसामर्थ्यादभस्यापि टेर्लोपे स इति रूपम्। बुवत् स इति स्थिते उपपदसमासे सुब्लुकि बुवच्छब्दस्य बृ इत्यादेशे बृसशब्दात् 'टिड्ढ-' इति ङीपि बृसीति रूपमिति भावः। दिक्छब्देभ्य इत्यारभ्य एतदन्तः सन्दर्भः पृषोदरादीनीत्यस्यैव प्रपञ्चः। आकृतिगणोऽयमिति। पृषोदरादिरित्यर्थः। तेन कर्तुकामः, कर्तुमना

दिक्शब्देभ्य इति। वार्तिकमिदम्। 'दुरो दाशनाश-' इत्यप्येवम्। खल् त्रिभ्य इति। दाशनाशदभेति त्रयोऽपि 'ईषद्दुःसुषु-' इति खल्प्रत्ययान्ता इत्यर्थः। बृसीति। 'मुनीनामासनं बृसी'। आकृतिगणोऽयमिति। तेन-'लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि। समो वा हिततयोर्मांसस्य पचि युड्घञोः'। इत्यपि संगृहीतम्। कृत्यान्ते उत्तरपदे अवश्यमः अन्तं पुमान् लुम्पेत्। अवश्यगन्तव्यः, अवश्यसेव्यः। तथा तुमः काममनसोः परतः अन्तं लुम्पेत्। गन्तुकामः, गन्तुमनाः। समो हिततयोः अन्तं वा लुम्पेत्। सहितः संहितः। सततः संततः। युट् घञ् च एतयोः परो यः पच् धातुः तस्मिन्परे मांसस्यान्तं लुम्पेत्। मांस्पचनी। मांस्पाकः। इह

विष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । (६-३-११५) कर्णशब्दे परे लक्षणवाचकस्य दीर्घः । द्विगुणाकर्णः । लक्षणस्य किम्– शोभनकर्णः । अविष्टादीनां किम्–विष्टकर्णः, अष्टकर्णः, पञ्चकर्णः, मणिकर्णः । भिन्नकर्णः, छिन्नकर्णः, छिद्रकर्णः, स्रुवकर्णः, स्वस्तिककर्णः । १०३७

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । (६-३-११६) क्विबन्तेषु एषु परेषु पूर्वपदस्य दीर्घः । उपानत् । नीवृत् । प्रावृट् । मर्मावित् । नीरुक् । अभीरुक् । ऋतीषट् । परीतत् । क्वौ इति किम्–परिणहनम् । 'विभाषा पुरुषे'

इत्यादिसंग्रहः । **संहितायाम्** । सुगमम् । **कर्णे लक्षणस्य** । दीर्घविधिः, 'ढ्लोपे–' इत्यतस्तदनुवृत्तेः । यत्पशूनां स्वामिविशेषसंबन्धज्ञानार्थं दात्रशूलचक्राद्याकारचिह्नं क्रियते तल्लक्षणशब्देन विवक्षितम् । तेन लम्बकर्णे इत्यादौ नातिप्रसङ्गः । **द्विगुणाकर्ण इति** । द्विगुणरेखौ कर्णौ यस्येति विग्रहः । अष्टकर्ण इत्यादेरष्टसंख्यालिपिचिह्नकर्ण इत्यादिरर्थः । अष्टसंख्याकरेखाचिह्नकर्ण इति वा । **नहिवृति** । **उपानदिति** । 'णह् बन्धने' 'णो नः' सम्पदादित्वात्कर्मणि क्विप् । उपनह्यत इत्युपानत् । पूर्वपदस्य दीर्घः । 'नहो धः' । निवर्तते इति नीवृत् । 'वृतु वर्तने' कर्तरि क्विप्, दीर्घः । प्रवर्षतीति प्रावृट् । 'वृष् सेचने' क्विप्, दीर्घः । मर्माणि विध्यतीति मर्मावित् । क्विप्, 'ग्रहिज्या–' इति संप्रसारणम्, उपपदसमासः, सुब्लुक्, नलोपः, दीर्घः । निरोचत इति नीरुक्, 'रुच् दीप्तौ' क्विप्, दीर्घः । ऋतिं सहत इति ऋतीषट् । 'सह् मर्षणे' क्विप्, दीर्घः । 'हो ढः', 'सात्पदाद्योः' इति षत्वनिषेधे प्राप्ते 'पूर्वपदात्–' इति षत्वमिति हरदत्तः, सुषामादित्वादित्यपरे । परितनोतीति परीतत् । 'तनु विस्तारे' क्विप्, 'गमः क्वौ' इत्यत्र गमादीनामित्युपसंख्यानाद् अनुनासिकलोपः, तुक्, दीर्घः । अथ पटुरुक्, तिग्मरुगित्यादौ दीर्घमाशङ्क्याह—

संयोगान्तलोपोऽपि शिष्टोच्चारणान्नेति बोध्यम् । **संहितायाम्** । तेन 'द्विगुणाकर्णः' इत्यादौ अवग्रहे दीर्घो न भवतीति सूत्राशयमुत्प्रेक्षयन्ति—**अधिकारोऽयमिति** । तेन 'विद्मा हि त्वा' इत्यादौ पदकाले 'द्व्यचोतस्तिङः' इति दीर्घो नेत्यादिप्रयोजनान्यूह्यानीति । **नहिवृति** । 'णह बन्धने', 'वृतु वर्तने', 'वृषु सेचने', 'व्यध ताडने', 'रुच दीप्तौ', 'षह मर्षणे', 'तनु विस्तारे' । **क्विबन्तेष्विति** । उत्तरपदेषु इति शेषः । तेन 'दिवसेषु रुक्' इत्यादौ नातिप्रसङ्गः । **उपानदिति** । संपदादित्वात्कर्मणि क्विप् । निवर्तते इति नीवृत् । प्रवर्षति इति प्रावृट् । मर्माणि विध्यति इति मर्मवित् । व्यधेः 'ग्रहिज्या–' इति संप्रसारणम् । निरोचते इति नीरुक् । ऋतिं सहते ऋतीषट् । 'पूर्वपदात्–' इति षत्वमिति हरदत्तः । 'सहेः पृतनर्ताभ्यां च' इत्यत्र 'सहेः' इति योग-

(सू १०३२) इत्यतो मण्डूकप्लुत्या विभाषा अनुवर्तते, सा च व्यवस्थिता, तेन गतिकारकयोरेव। नेह—पटुरुक्, तिग्मरुक्। **१०३८ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्।** (६-३-११७) कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे च दीर्घः स्यात्संज्ञायाम्। **१०३९ वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः।** (८-४-४) वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः। इह कोटरान्ताः पञ्च दीर्घविधौ कोटरादयो बोध्याः। तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः। अग्रेशब्दस्य तु विध्यर्थः। पुरगावणम्।

विभाषेति। पटुरुगिति। पटु रोचत इति विग्रहः। उभयत्र कर्तरि क्विप्, पूर्वपदयोर्गतिकारकान्यतरत्वाभावान्न दीर्घः। व्यवस्थितविभाषाश्रयणे व्याख्यानमेव शरणम्। **वनगिर्योः।** वनगिर्योरिति सप्तमी। कोटरश्च किंशुलुकश्च कोटरकिंशुलुकौ, तावादी येषामिति विग्रहः। कोटरादीनां किंशुलुकादीनां चेति लभ्यते। यथासंख्यमन्वयः। तदाह—**कोटरादीनामित्यादिना।** पुरगावणमित्युदाहरणानि वक्ष्यन्ते। तत्र णत्वविधिं दर्शयति—**वनं पुरगा।** वनमिति षष्ठ्यर्थे प्रथमा इत्यभिप्रेत्याह—**वनशब्दस्येति। एभ्य इति।** पुरगा, मिश्रका, सिध्रका, सारिका, कोटर, अग्रे इत्येतेभ्य एव परस्य उत्तरपदस्य वनशब्दस्य यो नकारस्तस्य णत्वमित्यन्वयः, 'रषाभ्याम्–' इत्यतो णो न इत्यनुवृत्तेः। सूत्रे अग्रे इति सप्तम्यन्तस्यानुकरणम्। नन्विह भिन्नपदत्वाद् 'अट्कुप्वाङ्–' इति णत्वस्याप्राप्तेः अपूर्वविध्यर्थकत्वावश्यकत्वाद् एभ्य एवेति कथं नियमलाभ इत्यत आह—**इह कोटरान्ता इति।** इह णत्वविधौ उपात्ताः पुरगा मिश्रका सिध्रका सारिका कोटर इत्येवं पञ्च शब्दाः, त एव वनगिर्योरिति दीर्घविधौ कोटरादिशब्देन विवक्षिता इत्यर्थः। ततः किमित्यत आह—**तेषामिति।** णत्वविधौ तावत्पुरगादिशब्दाः पञ्च दीर्घान्ता एव निर्दिष्टाः। दीर्घस्तु तेषां संज्ञाया-

---

विभागाचकारस्यानुक्तसमुच्चयार्थत्वेत्यन्ये। सुषामादेराकृतिगणत्वादित्यपरे। परितनोति इति परीतत्। 'गमः क्वौ' इत्यत्र 'गमादीनामिति वाच्यम्' इत्युक्तनलोपः। **वनं पुरगा।** व्यत्ययेन षष्ठ्यर्थे प्रथमा इत्याह—**वनशब्दस्येति। एभ्य एवेति।** कृतदीर्घेभ्यः पुरगादिभ्य एव परस्य णत्वमित्यर्थः। एभ्यो वनस्यैव णत्वं नान्येषाम्' इति विपरीतनियमशङ्का तु न भवति, वनादन्यस्मिन्नुत्तरपदे पुरगादीनां दीर्घान्तत्वासंभवात्। **नियमार्थ इति।** अयं भावः—'पुरगामिश्रका–' इति दीर्घनिर्देशादसंज्ञायां दीर्घाभावेन संज्ञायामेव णत्वमिति फलितम्। एवं च 'पूर्वपदात् संज्ञायाम्' इत्यनेनैव वनस्य णत्वे सिद्धे पुनरपि कृतदीर्घस्य पुरगादिपञ्चकस्य णत्वविधौ निर्देशो नियमार्थ एवेति। **विध्यर्थ इति।** असंज्ञात्वेन 'पूर्वपदात्संज्ञायाम्' इत्यस्या-

मिश्रकावणम्। सिध्रकावणम्। सारिकावणम्। कोटरावणम्। एभ्य एव इति किम्-असिपत्रवनम्। वनस्याग्रे अग्रेवणम्। राजदन्तादिषु निपातनात्सप्तम्या अलुक्। प्रातिपदिकार्थमात्रे प्रथमा। किंशुलुकागिरिः। १०४० वले। (६-३-११८) वलप्रत्यये परे दीर्घः स्यात्संज्ञायाम्। कृषीवलः। १०४१

मेव वनगिर्योरिति विहितः। एवं च एतेषामसंज्ञायां दीर्घाभावात् संज्ञायामेव 'वनं पुरगा-' इति णत्वविधिरिति पर्यवस्यति। ततश्च तेषु वनशब्दनकारस्य 'पूर्वपदात्संज्ञायामगः' इत्येव णत्वे सिद्धे पुनरपि कृतदीर्घस्य पुरगादिपञ्चकस्य णत्वविधौ निर्देशो नियमार्थः संपद्यत इत्यर्थः। **अग्रेशब्दस्य त्विति**। णत्वविधौ अग्रेशब्दस्य निर्देशस्तु अग्रेवणशब्दे अपूर्वणत्वविध्यर्थ एव, न तु नियमार्थः। अग्रेवणशब्दस्यासंज्ञात्वादिति भावः। न च पुरगावणशब्दे गकारव्यवधानात् 'पूर्वपदात्संज्ञायाम्-' इत्यस्य प्राप्त्यसंभवाद् अत्र अपूर्वणत्वविध्यर्थमेव पुरगाग्रहणमिति वाच्यम्, अग इति हि पञ्चमी। गकारान्तात्पूर्वपदात्परस्य णत्वं नेति लभ्यते। पुरगाशब्दस्त्वयम् आकारान्त एव, न तु गकारान्त इति, तत्र अग इति निषेधाप्रात्तया 'पूर्वपदात्संज्ञायाम्-' इत्येव सिद्धे, पुरगाग्रहणमपि नियमार्थमेवेति भावः। पुरगावणमित्यादयो नरकविशेषाणां संज्ञाः। **असिपत्रवनमिति**। नरकविशेषोऽयम्। अत्र संज्ञात्वेऽपि 'पूर्वपदात्संज्ञायाम्-' इति णत्वं न भवति, एभ्य एवेति नियमादिति भावः। **अग्रेवणमिति**। वनशब्दस्य षष्ठ्यन्तस्य अग्रेशब्देन सह षष्ठीसमास इति भावः। ननु तर्हि 'सुपो धातु-' इति सप्तम्या अपि लुक् स्यादित्यत आह—**राजदन्तादिष्विति**। अनेन वनशब्दस्य परनिपातोऽपि सूचितः। ननु सप्तम्यर्थप्राधान्यात्सप्तमी स्यादित्यत आह—**प्रातिपदिकेति**। सप्तम्यर्थस्य प्रातिपदिकेऽन्तर्भावादिति भावः। किंशुलुकादीनामुदाहरणमाह—**किंशुलुकागिरिरिति**। अञ्जनागिरिरित्यप्युदाहार्यम्। **वले**। **कृषीवल इति**। कृषिरस्यास्तीति विग्रहे 'रजःकृष्यासुति-' इत्यादिना वलच्।

प्रवृत्तेरिति भावः। न च पुरगाग्रहणमपि विध्यर्थमेव, गकारव्यवधानेन 'पूर्वपदात्संज्ञायाम्' इत्यस्य प्राप्त्यभावादिति वाच्यम्। 'अगः' इत्यस्य पञ्चम्यन्तत्वं स्वीकृत्य 'गान्तात्पूर्वपदात्परस्य णत्वं न' इति व्याख्यानात्। पुरगाशब्दस्य त्वकारान्तत्वाद् 'अगः' इति निषेधस्याप्रवृत्तेः। अतएव 'अगः' इत्यस्य 'ऋगयनम्' इत्येकमेवोदाहरणमिति 'अणृगयनादिभ्यः' इति निर्देशाश्रयेण तत्प्रत्याख्यातमाकरे। **पुरगावणमित्यादि**। नरकविशेषस्य संज्ञा। **असिपत्रवनमिति**। 'एभ्यो वनस्यैव' इति विपरीतनियमे तु णत्वमत्र दुर्वारमिति भावः। सप्तम्यर्थस्य प्रातिपदिकार्थे अन्तर्भावादाह—**प्रथमेति**। किंशुलुकादीनामुदाहरणमाह—**किंशुलुकागिरिरिति**। आदि-

मतौ बह्वचोऽनजिरादीनाम्। (६-३-११९) अमरावती। अनजिरादीनां किम्—अजिरवती। बह्वचः किम्—व्रीहिमती। संज्ञायाम् इत्येव, नेह—वलयवती। १०४२ शरादीनां च। (६-३-१२०) शरावती। १०४३ इको वहेऽपीलोः। (६-३-१२१) इगन्तस्य दीर्घः स्याद्वहे। ऋषीवहम्। कपीवहम्। इकः किम्—पिण्डवहम्। अपीलोः किम्—पीलुवहम्। 'अपीत्वादीनामिति वाच्यम्' (वा ४००५) दारुवहम्। १०४४ उपसर्गस्य घञ्यमनुष्ये बहुलम्। (६-३-१२२) उपसर्गस्य बहुलं दीर्घः स्याद्घञन्ते परे, न तु मनुष्ये। परीपाकः, परिपाकः। अमनुष्ये किम्—निषादः। १०४५ इकः काशे। (६-३-१२३) इगन्तस्योपसर्गस्य दीर्घः स्यात्काशे। नीकाशः। इकः किम्—प्रकाशः। १०४६ अष्टनः संज्ञायाम्। (६-३-१२५) उत्तरपदे दीर्घः। अष्टापदम्। संज्ञायां किम्—अष्टपुत्रः। १०४७ चितेः कपि। (६-३-१२७)

मतौ। मतुप्प्रत्यये परे बह्वचो दीर्घः स्यात्संज्ञायाम्, न त्वजिरादीनामित्यर्थः। **अमरावतीति।** इन्द्रनगर्याः संज्ञेयम्। अमरा अस्यां सन्तीति विग्रहः। 'मादुपधायाश्च-' इति 'संज्ञायाम्' इति वा मस्य वः। **अजिरवतीति।** नदीविशेषस्य संज्ञेयम्। **वलयवतीति।** अनजिरादित्वेऽप्यसंज्ञात्वान्न दीर्घ इति भावः। **शरादीनां च।** मतौ दीर्घः संज्ञायामिति शेषः। अबह्वच्कत्वात्पूर्वेण न प्राप्तिः। **शरावतीति।** शरा अस्यां सन्तीति विग्रहः। नदीविशेषस्य नाम। **इको वहेऽपीलोः।** अपीलोरिति च्छेदः। **इगन्तस्येति।** पूर्वपदस्येति शेषः। **उपसर्गस्य। परीपाक इति।** पचेर्भावे घञ्, उपधावृद्धिः। 'चजोः कु घिण्ण्यतोः' इति कुत्वम्। **निषाद इति।** पुलिन्दो नाम मनुष्यजातिविशेषः। निषीदत्यस्मिन् पापमिति निषादः। 'हलश्च' इत्यधिकरणे घञ्। दौवारिके प्रतीहारशब्दे दीर्घस्त्वप्रामाणिकः। यद्वा प्रतीहारो द्वारम्, तत्स्थत्वाद् मनुष्ये गौणः। **इकः काशे। नीकाश इति।** पचाद्यजन्तत्वात् पूर्वेण न प्राप्तिः। **अष्टनः संज्ञायाम्।** शेषपूरणेन सूत्रं व्याचष्टे—**उत्तरपदे दीर्घ इति।** **अष्टापदमिति।**

शब्दग्राह्यास्तु 'अञ्जनागिरिः' इत्यादयः। किंशुलुकेति किम्, कृष्णगिरिः, रामगिरिः। **कृषीवल इति।** 'रजःकृष्यासुति-' इत्यादिना मत्वर्थे वलच्। **अमरावतीति।** 'मादुपधायाश्च-' इति, 'संज्ञायाम्' इति वा मतोर्मस्य वः। घञ्मात्रस्योत्तरपदत्वासंभवादाह—**घञन्त इति। निषाद इति।** पुलिन्दो मनुष्यजातिः। 'निषीदत्यस्मिन् पापम्' इति निषादः, 'हलश्च' इत्यधिकरणे घञ्। कथं तर्हि दौवारिके प्रतीहारशब्दप्रयोग इति चेत्। अत्राहुः—प्रतीहारो द्वारम्। तात्स्थ्यात्ताच्छब्द्यमिति।

एकाचितीकः। द्विचितीकः। **१०४८ नरे संज्ञायाम्।** (६-३-१२९) विश्वानरः। **१०४९ मित्रे चर्षौ।** (६-३-१३०) विश्वामित्रः। ऋषौ किम्-विश्वमित्रो माणवकः। 'शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः' (वा ४०४९) श्वादन्त इत्यादि। **१०५० प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि।** (८-४-५) एभ्यो वनस्य णत्वं स्यात्। प्रवणम्। कार्ष्यवणम्। इह षात्परत्वाण्णत्वम्। **१०५१ विभाषौषधिवनस्पतिभ्यः।** (८-४-६) एभ्यो वनस्य णत्वं वा स्यात्। दूर्वावणम्, दूर्वावनम्। शिरीषवणम्, शिरीषवनम्। 'द्व्यच्त्र्यज्भ्यामेव' (वा ४९८४)। नेह—

संज्ञात्वमन्वेषणीयम्। **चितेः कपि।** दीर्घ इति शेषः। **एकचितीक इति।** अग्न्याख्यस्थण्डिलविशेष इति शेषः। एका चितिर्यस्येति विग्रहः। शैषिकः कप्। **द्विचितीक इति।** द्वे चिती यस्येति विग्रहः। **नरे संज्ञायाम्।** विश्वस्य दीर्घ इति शेषः। 'विश्वस्य वसुराटोः' इति पूर्वसूत्राद् विश्वस्येत्यनुवर्तते। **मित्रे चर्षौ।** मित्रशब्दे परे विश्वस्य दीर्घः स्यात्। ऋषौ वाच्य इत्यर्थः। **शुनो दन्तेति।** श्वन्शब्दस्य दन्तादिषु परतो दीर्घ इत्यर्थः। **श्वादन्त इति।** शुनो दन्त इति विग्रहः। श्वादंष्ट्रा, षष्ठीसमासः। दीर्घान्त एव दंष्ट्राशब्दो वार्तिके पठ्यत इति केचित्। ह्रस्वान्त इत्यन्ये। श्वादंष्ट्रः। बहुव्रीहिरयम्। श्वाकर्णः, श्वाकुन्दः, श्वावराहः, श्वापुच्छम्, श्वापदः। श्वपुच्छमवनामितमित्यसाध्वेव। **प्रनिरन्तः। एभ्य इति।** प्र, निर्, अन्तर्, शर, इक्षु, प्लक्ष, आम्र, कार्ष्य, खदिर, पीयूक्षा इत्येतेभ्य इत्यर्थः। **वनस्येति।** 'वनं पुरगा-' इत्यतस्तदनुवृत्तेरिति भावः। **प्रवणमिति।** प्रकृष्टं वनमिति विग्रहः। प्रादिसमासः। **इहेति।** कार्ष्यवणमित्यत्र षकारात्परत्वेन णत्वम्, नतु रेफात् परत्वमादाय, अडादिभिन्नषकारेण व्यवधानादिति भावः। एतेन कार्श्येति तालव्यशकारमध्यपाठोऽप्रामाणिक इति सूचितम्, तथा सति निमित्ताभावाद् णत्वासंभवात्, अट्कुप्वाङ्भिन्नेन शकारेण व्यवहिततया रेफस्य तन्निमित्तत्वासंभवात्। निर्वणम्, अन्तर्वणम्, शरवणम्, इक्षुवणम्, प्लक्षवणम्, आम्रवणम्, खदिरवणम्, पीयूक्षावणम्। **विभाषौषधि। वनस्य णत्वमिति।** ओषधिवनस्पतिभ्यः परस्य वनस्य यो नकारस्तस्य णत्वं वेत्यर्थः। ओषधिभ्य उदाहरति—**दूर्वावणमिति।** 'ओषध्यः फलपाकान्ताः' इत्यमरः। अथ वनस्पतिभ्य उदाहरति—**शिरी-**

एकचितीक इति। 'शेषाद्विभाषा' इति कप्। 'दंष्ट्रा' इति वार्तिके दीर्घान्तः पठ्यते। केचित्तु ह्रस्वान्तं पठित्वा 'श्वादंष्ट्रः' इति बहुव्रीहौ दीर्घमाहुः, न तु तत्पुरुषे। **इह षादिति।** 'कार्श्य' इति तालव्यपाठस्त्वनार्ष इति भावः। वनस्पतिभ्यो वनस्य णत्व-

देवदारुवनम्। 'इरिकादिभ्यः प्रतिषेधो वक्तव्यः' (वा ४१८१)। इरिकावनम्। मिरिकावनम्। तिमिरावनम्। १०५२ वाहनमाहितात्। (८-४-८) आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणम्। आहितात् किम्—इन्द्रवाहनम्। इन्द्रस्वामिकं वाहनमित्यर्थः। वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात्। १०५३ पानं देशे। (८-४-९) पूर्वपदस्थान्निमि-

षवणमिति। यद्यपि यः पुष्पैर्विना फलति स एव उदुम्बरादिर्वनस्पतिः, 'वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः' इत्युक्तेः। शिरीषवृक्षश्चायं पुष्पफलवानेव, न वनस्पतिः। तथापि वनस्पतिशब्देनात्र वृक्षसामान्यं विवक्षितम्। अत एव 'लुपि युक्तवद्व्यक्तिवचने' इति सूत्रे भाष्ये शिरीषवणमित्यत्र शिरीषे वनस्पतित्वं व्यवहृतमिति दिक्। **द्व्यच्त्र्यच्भ्यामेवेति**। परस्य वनस्य णत्वं वाच्यमिति शेषः। **देवदारुवनमिति**। प्रत्युदाहरणम्। **इरिकादिभ्य इति**। एभ्यः परस्य वनस्य णत्वप्रतिषेध इत्यर्थः। **वाहनमाहितात्**। वाहने आधीयते वहनाय यत्, नतु स्वयमेवारोढुं शक्नोति तदाहितम्। तदाह—**आरोप्येति**। **निमित्तादिति**। रेफषकारान्यतरस्मादित्यर्थः। **वाहननकारस्येति**। वाहनस्य यो नकारस्तस्येत्यर्थः। अनेन सूत्रे वाहनमिति षष्ठ्यर्थे प्रथमेति सूचितम्। **इक्षुवाहणमिति**। इक्षवो वाहनाय परैरारोप्यन्ते, नतु स्वयमेवारोढुं शक्नुवन्ति इति तेषामाहितत्वं बोध्यम्। आरोपितेक्षुयुक्तं शकटादि वाहनमिति यावत्। **इन्द्रवाहनमिति**। ऐरावतादाविन्द्रस्य स्वयमेवारोहणान्नाहितत्वमिति भावः। यदि कदाचिद् अन्येन वाहने आरोप्यते तदा आहितत्वमिन्द्रस्याप्यस्त्येव। यदा इन्द्रः स्वयमेवारोहति वाहनं तदा प्रत्युदाहरणमिति मनसि निधायाह—**इन्द्रस्वामिकमिति**। ननु वहेः करणे ल्युटि कथमुपधादीर्घः, ञ्णित्प्रत्ययपरकत्वाभावादित्यत आह—**वहेर्ल्युटीति**। **पानं देशे**।

मुदाहरति—**शिरीषवणमिति**। ननु 'वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः' इत्यमरकोशाद्यस्य पुष्पं विनैव फलप्रादुर्भावः स वनस्पतिः, स चोदुम्बरादिः। शिरीषस्तु न तथा, तस्य पुष्पफलोभयसत्त्वादतो णत्वमिह कथमिति चेत्। अत्राहुः—वनस्पतिशब्देनात्र वृक्षमात्रमुपलक्ष्यते। अत्र च 'लुपि युक्तवत्–' इति सूत्रस्थं भाष्यं लिङ्गम्। तत्र हि व्यक्तिवचने किम्। शिरीषाणामदूरभवो ग्रामः शिरीषाः, तेषां वनं शिरीषवणमित्यत्र णत्वे कर्तव्ये वनस्पतित्वमप्यतिदिश्येत इत्युक्तम्। तच्च शिरीषाणां वनस्पतित्वे संगच्छते नान्यथेति दिक्। **द्व्यच्त्र्यच्भ्यामेवेति**। व्यवस्थितविभाषाश्रयणादिति भावः। ओषधित्वात्प्राप्ते प्रतिषेधमाह—**इरिकादिभ्य इति**। एतदपि

१ 'तिमिरावनम्' इति क्वचिन्नास्ति।

त्तात्परस्य पानस्य नस्य णत्वं स्याद्देशे गम्ये । क्षीरं पानं येषां ते क्षीरपाणाः उशीनराः । सुरापाणाः प्राच्याः । पीयत इति पानम्, कर्मणि ल्युट् । **१०५४ वा भावकरणयोः । (८-४-१०)** पानस्य इत्येव । क्षीरपानम्, क्षीरपाणम् । 'गिरिनद्यादीनां वा' (वा ४९८१) गिरिनदी, गिरिणदी । चक्रनितम्बा, चक्रणितम्बा । **१०५५ प्रातिपदिकान्तनुंविभक्तिषु च । (८-४-११)** पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात् । प्रातिपदिकान्ते—माषवापिणौ ।

पानमिति षष्ठ्यर्थे प्रथमेत्यभिप्रेत्याह —**पानस्येति** । **उशीनरा इति** । देशविशेषे बहुवचनान्तोऽयम् । ननु पानशब्दस्य भावल्युडन्तत्वे क्षीरम्पानमिति कथं सामानाधिकरण्यमित्यत आह— **पीयत इति** । **वा भावकरणयोः** । **इत्येवेति** । अनुवर्तत एवेत्यर्थः । भावे करणे च यः पानशब्दः तस्य उक्तविषये णो वा स्यादित्यर्थः । आदेशार्थं वचनम् । **क्षीरपानम्, क्षीरपाणमिति** । क्षीरस्य पानमिति विग्रहः । भावे करणे वा ल्युट् । पानक्रिया पानपात्रं वेत्यर्थः । **गिरिनद्यादीनामिति** । पूर्वपदस्थान्निमित्तात्परस्य उत्तरपदस्थस्य नस्य णो वेत्युपसंख्यानमित्यर्थः । गिरेर्नदीति विग्रहः । **चक्रनितम्बेति** । चक्रमिव नितम्बो यस्याः सा इति विग्रहः । **प्रातिपदिकान्त इति** । **पूर्वपदस्थादिति** । 'पूर्वपदात्संज्ञायाम्–' इत्यतस्तदनुवृत्तेरिति भावः । **एषु स्थितस्येति** । प्रातिपदिकान्ते नुमि विभक्तौ च विद्यमानस्येत्यर्थः । **वा स्यादिति** । 'वा भावकरणयोः' इत्यतस्तदनुवृत्तेरिति भावः । **प्रातिपदिकान्त इति** । उदाहरणं वक्ष्यत इति शेषः । **माषवापिणाविति** । माषान् वपत इति विग्रहः । 'बहुलमाभीक्ष्ण्ये' इति जातावपि सुप्युपपदे णिनिः । उपपदसमासः । वापिन्शब्दस्य कृदन्तत्वेन प्रातिपदिकत्वात् तदन्तनस्य णत्वमिति भावः । **नुमीति** । उदाह्रियत इति शेषः । **व्रीहिवापाणीति** । कृषीवलकुलानीति शेषः । व्रीहीन्वपन्ति इति विग्रहः । कर्मण्यण् । व्रीहिवापशब्दान्नपुंसकाद् 'जश्शसोश्शिः' 'नपुंसकस्य झलचः' इति नुमि 'सर्वनामस्थाने च–' इति दीर्घः । नुमो नस्य णत्वमिति भावः । **विभक्ताविति** । उदाह्रियत इति शेषः । **माषवापेणेति** । तृतीयाविभक्तिस्थत्वा-

---

व्यवस्थितविभाषाज्ञानादेव सिद्धम् । **उशीनरा इति** । इह उशीनरशब्दस्तद्देशवासिषु भाक्तः । **कर्मणि ल्युडिति** । 'कृत्यल्युटो बहुलम्' इत्यनेन । **वा भाव** । आदेशार्थं आरम्भ इत्यप्राप्तविभाषा । **क्षीरपाणमिति** । पीतिः पानम्, 'ल्युट् च' इति नपुंसके भावे ल्युट् । पीयते अनेनेति पानम्, करणे ल्युट् । क्षीरस्य पानं क्षीरपाणम् । **गिरिनद्यादीनां वेति** । वक्तव्यमिति शेषः । संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेत्याहुः । **माषवापिणाविति** । 'बहुलमाभीक्ष्ण्ये' इति णिनिः ।

नुमि–व्रीहिवापाणि । विभक्तौ–माषवापेण । पक्षे माषवापिनावित्यादि । 'उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम्' (वा ४९९०) नेह—गर्गाणां भगिनी गर्गभगिनी । अत एव नुंग्रहणं कृतम् । अङ्गस्य नुंविधानात्तद्भक्तो हि नुम्, न तूत्तरपदस्य । किं च 'प्रह्विण्वन्' इत्यादौ हिवेर्नुमो णत्वार्थमपि नुंग्रहणम् ।

नस्य णत्वम् । इत्यादीति । णत्वाभावपक्षे माषवापिनौ, माषवापानि, माषवापेन इत्युदाहार्यमिति भावः । ननु गर्गाणां भगिनी गर्गभगिनीत्यत्र ङी'प्रत्ययप्रकृतिभूतभगिन्शब्दात्मकप्रातिपदिकान्तत्वाद् नकारस्य णत्वविकल्पः कुतो न स्यादित्यत आह—**उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वमिति** । पूर्वपदेन उत्तरपदमाक्षिप्तम्, तच्च प्रातिपदिकस्यैव विशेषणम्, नतु तदन्तस्य, नापि नुंविभक्त्योः, असंभवादिति भावः । **नेहेति** । गर्गाणां भगिनी गर्गभगिनीति षष्ठीसमासे भगिनीशब्द उत्तरपदम्, नतु तत्प्रातिपदिकम्, प्रत्ययान्तत्वात् । लिङ्गविशिष्टपरिभाषया प्रातिपदिकग्रहणेन भगिनीशब्दस्य ग्रहणेऽपि तदन्तम् ईकार एव, नतु नकारः, अतो न तस्येदं पाक्षिकं णत्वमिति भावः । प्रातिपदिकस्योत्तरपदत्वविशेषणं सूत्रकारस्य संमतमित्याह—**अत एवेति** । प्रातिपदिकस्य उत्तरपदत्वविशेषणादेव सूत्रकारेण कृतं नुंग्रहणमर्थवत्, अन्यथा तदनर्थकमित्यर्थः । कुत इत्यत आह—**अङ्गस्येति** । 'नपुंसकस्य झलचः' इति नुंविधौ अङ्गस्येत्यनुवृत्तम् । तथा च झलन्तस्याजन्तस्य चाङ्गस्य क्लीबस्य नुम् स्यात् सर्वनामस्थाने इत्यर्थो लभ्यते । माषवापाणीत्यत्र तु सर्वनामस्थानं प्रति माषवापशब्दोऽङ्गम् । तस्य माषवापशब्दस्य विहितो नुमागमस्तदवयव एव भवति, न तु उत्तरपदभूतवापशब्दस्यैवावयवः । तथा च उत्तरपदभूतप्रातिपदिकान्तत्वाभावात् 'प्रातिपदिकान्त–' इत्यनेन णत्वविकल्पस्याप्राप्तौ नुंग्रहणम् । प्रातिपदिकस्य उत्तरपदत्वविशेषणाभावे तु माषवापशब्दान्तावयवस्य नुमो माषवापेतिप्रातिपदिकान्तावयवत्वस्य सत्त्वात् 'प्रातिपदिकान्त–' इत्येव सिद्धे नुंग्रहणं व्यर्थं स्यादित्यर्थः । तदेवं प्रातिपदिकस्य उत्तरपदत्वविशेषणे नुंग्रहणं लिङ्गमिति स्थितम् । वस्तुतस्तु नेदं लिङ्गमित्याह—**किं च प्रह्विण्वन्नित्यादौ हिवेर्नुमो णत्वार्थमपि नुंग्रहणमिति** । किं चेति विशेषप्रदर्शने । 'हिवि प्रीणने' भ्वादिः, इदित्त्वाद् नुम्, लटः शत्रादेशः । माषवापाणीत्यत्र नुमो नस्य प्रातिपदिकान्तत्वेऽपि प्रहिण्वन्शब्दे नुमो नस्य प्रातिपदिकान्तत्वाभावात् 'प्रातिपदिकान्त–' इत्यनेन णत्वविकल्पस्याप्राप्तेस्तदर्थं नुंग्रहणमावश्यकम् ।

व्रीहिवापाणीति । कर्मण्यण् । **उत्तरपदं यदिति** । इष्टानुरोधेन तथा व्याख्यायत इति भावः । **गर्गभगिनीति** । इह भगिनीशब्द उत्तरपदम्, न तु भगिन्शब्दः । अत्र च व्याख्याने नुम्ग्रहणमेव ज्ञापकमिति भावः । प्राचां मतमाह—**अतएवेति** ।

प्रेन्वनम् इत्यादौ तु क्षुम्नादित्वात् । 'युवादेर्न' (वा ४९९९) । रम्ययूना । परिपक्वानि । 'एकाजुत्तरपदे णः' (सू ३०७) । नित्यम् इत्युक्तम् । वृत्रहणौ । हरिं मानयतीति क्विपि हरिमाणी । नुमि-क्षीरपाणि । विभक्तौ-क्षीरपेण, रम्यविणा । १०५६ **कुमति च** । (८-४-१३) कवर्गवत्युत्तरपदे प्राग्वत् ।

अत उत्तरपदत्वस्य प्रातिपदिकविशेषणत्वे कथं नुंग्रहणं लिङ्गं स्यात् । तस्मादुत्तरपदविशेषणे भाष्यमेव शरणमिति भावः । ननु माषवापिणावित्यत्र वापिन् इति प्रातिपदिकस्य कथमुत्तरपदत्वम्, 'गतिकारकोपपदानां कृद्भिः सह समासवचनम्–' इति सुबुत्पत्तेः प्रागेव समासप्रवृत्तेरिति चेत्, न—उत्तरपदशब्दस्य समासचरमावयवे रूढत्वादित्यलम् । ननु 'इवि व्याप्तौ' इदित्त्वान्नुम् । ल्युटि अनादेशः । प्रकृष्टमिन्वनमिति प्रादिसमासे नुमो नकारस्य णत्वविकल्पः स्यादित्यत आह—**प्रेन्वनमिति** । **युवादेर्नेति** । उक्तणत्वविकल्प इति शेषः । वार्तिकमिदम् । **रम्ययूनेति** । रम्यश्चासौ युवा चेति विग्रहः । प्रातिपदिकान्तनकारत्वात्प्राप्तिः । **परिपक्वानीति** । इह नुमो नकारस्य 'प्रातिपदिकान्त-' इति विकल्पं बाधित्वा 'कुमति च' इति नित्यं णत्वं प्राप्तम् । तदिह युवादित्वान्निषिध्यते । **एकाजुत्तरपदे णः** । अजन्तस्त्रीलिङ्गे पुनर्भूशब्दनिरूपणे व्याख्यातमपि प्रकरणानुरोधात् स्मर्यते **नित्यमित्युक्तमिति** । आरम्भसामर्थ्यान्नित्यमिदं णत्वमिति तत्रैवोक्तमित्यर्थः । **हरिमाणीति** । मनेर्ण्यन्तात् 'क्विप् च' इति क्विपि 'गतिकारकोपपदानाम्–' इति सुबुत्पत्तेः प्राक् समासः । नान्तत्वाद् ङीप् । अत्र मान् इति प्रातिपदिकमुत्तरपदं तदन्तत्वाद् नकारस्य णत्वविकल्पे प्राप्ते नित्यं णत्वम् । **नुमीति** । उदाह्रियत इति शेषः । **क्षीरपाणीति** । कर्मण्युपपदे पा धातोः 'आतोऽनुपसर्गे कः' इति कः, 'आतो लोप इटि च' इत्याल्लोपः । क्षीरपशब्दाद् 'जश्शसोश्शिः', अजन्तलक्षणो नुम्, दीर्घः । तस्य नित्यं णत्वम् । **विभक्ताविति** । उदाह्रियत इति शेषः । **क्षीरपेणेति** । विभक्तिस्थत्वान्नस्य नित्यं णत्वम् । विभक्तावुदाहरणान्तरमाह—**रम्यविणेति** । विः पक्षी, रम्यश्चासौ विश्च तेनेति विग्रहः । न चात्र 'पदव्यवायेऽपि' इति निषेधः शङ्क्यः' किमिह प्रत्ययलक्षणेन

तदुक्तं ज्ञापकं विघटयति—**किंचेति** । **परिपक्वानीति** । 'कुमति च' इति नित्यं णत्वं प्राप्तम् । **एकाजुत्तर–**। प्राग् व्याख्यातमपि प्रकरणानुरोधेन स्मार्यते । **वृत्रहणाविति** । वृत्रं हतवन्तौ 'ब्रह्मभ्रूण–' इति क्विप् । **हरिमाणीति** । मनेर्ण्यन्तात् 'क्विप् च' इति क्विप् । 'गतिकारकोपपदानाम्–' इत्यादिना सुबुत्पत्तेः प्राक् समासान्नकारान्तमुत्तरपदम्, नान्तत्वान्ङीप् । **क्षीरपाणीति** । पिबतेः कर्मण्युपपदे 'आतोऽनुपसर्गे–' इति कः । 'आतो लोप इटि च' इत्यालोपः । **रम्यविणेति** । रम्य-

हरिकामिणौ । हरिकामाणि । हरिकामेण । १०५७ पदव्यवायेऽपि । (८-४-३८) पदेन व्यवधानेऽपि णत्वं न स्यात् । माषकुम्भवापेन । चतुरङ्गयोगेन ।

अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'सुप्तिङन्तम्–' इति पदत्वमभिमतम्, उत तृतीया-विभक्तौ परतः 'स्वादिषु–' इति पदत्वम् ? नाद्यः, उत्तरपदत्वे चापदादिविधौ–' इति प्रत्ययलक्षणप्रतिषेधात् । न द्वितीयः, 'स्वादिषु–' इत्यनेन हि रम्यविशब्दस्यैव पदत्वं लभ्यते, न तु विशब्दस्य, तृतीयाविभक्तेः समुदायादेव विधानात् । अत एव पुनर्भूणा-मित्यत्र नामि भूशब्दमात्रस्य पदत्वाभावात् 'पदव्यवायेऽपि' इति निषेधाभावाण्णत्व-मिति प्राञ्चः । अत्र यद्वक्तव्यं तत् 'पदव्यवायेऽपि' इत्यत्रानुपदमेव वक्ष्यते । **कुमति च । प्राग्वदिति** । प्रातिपदिकान्तनुंविभक्तिस्थस्य नस्य नित्यं णत्वं स्यादित्यर्थः । अनेकाजुत्तरपदार्थमिदम् । **हरिकामिणाविति** । 'बहुलमाभीक्ष्ण्ये' इति णिनिः । प्रातिपदिकान्तत्वाण्णत्वम् । **हरिकामाणीति** । अजन्तलक्षणनुमो नित्यं णत्वम् । **हरिकामेणेति** । विभक्तिस्थस्योदाहरणम् । **पदव्यवायेऽपि । पदेन व्यवधान इति** । पदेनेत्यनन्तरं निमित्तकार्यिणोरिति शेषः । **न स्यादिति** । 'न भाभूपूकमि-गमि–' इत्यतस्तदनुवृत्तेरिति भावः । **माषकुम्भवापेनेति** । माषाणां कुम्भो माष-कुम्भः, तस्य वाप इति षष्ठीसमासः । अत्र निमित्तकार्यिणोः षकारनकारयोः कुम्भ-पदेन व्यवधानाद् न णत्वम् । **चतुरङ्गयोगेनेति** । चत्वारि अङ्गानि रथगज-तुरगपदातिरूपाणि यस्य तत् चतुरङ्गं सैन्यम्, तेन योग इति विग्रहः । अत्र निमित्तकार्यिणोरङ्गपदेन व्यवधानान्न णत्वम् । उभयत्रापि कुम्भशब्दस्य

श्चासौ विश्चेति विग्रहः । तत 'आङो नाऽस्त्रियाम्' । ननु अन्तर्वर्तिनीं विभक्तिमाश्रित्य विशब्दस्य पदत्वात् 'पदव्यवायेऽपि' इति णत्वनिषेधः स्यात् । मैवम् । 'उत्तरपदत्वे चापदादिविधौ–' इति प्रत्ययलक्षणप्रतिषेधेन विशब्दस्य पदत्वाभावात् । 'स्वादिषु–' इत्यनेन तु रम्यविशब्दस्यैव पदत्वं न तु विशब्दस्य । यस्मात्स्वादिविधिस्तस्यैव पद-त्वाभ्युपगमात् । एवं च पुनर्भूणामित्यत्र णत्वं निर्बाधमेव, नामि परतो भूशब्दस्य पदत्वाभावात् । **कुमति च** । अनेकाजुत्तरपदार्थ आरम्भः । 'कौ' इत्येव तु न सूत्रि-तम् । 'यस्मिन्विधिः–' इति तदादिविधौ कवर्गाद्युत्तरपद एव हरिकामाणीत्यादावयं विधिः स्यात् न तु वक्रयुगेणेत्यादौ, तथा च मतुबन्तनिर्देश आवश्यक इत्याह— **कवर्गवतीति । पदेन व्यवधान इति** । निमित्तनिमित्तिनोर्मध्ये पदे सति णत्वं नेत्यर्थः । **माषकुम्भवापेनेति** । माषकुम्भं वपतीति 'कर्मण्यण्' उपपदसमासः । **चतुरङ्गयोगेनेति** । 'चत्वार्यङ्गान्यस्य, तेन योगः' इति मनोरमायां विगृहीतम् । तदयुक्तम् । 'उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणप्रतिषेधादङ्गशब्दस्यापद-

'अतद्धित इति वाच्यम्' (वा २०१५) । आर्द्रगोमयेण । शुष्कगोमयेण ।

अङ्गशब्दस्य च प्रत्ययलक्षणेन अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वं बोध्यम् । 'उत्तरपदे चापदादिविधौ प्रतिषेधः' इति निषेधस्तु नात्र प्रवर्तते, उत्तरखण्डस्य कार्यभाक्त्वे सत्येव तत्प्रवृत्तेः। अत एव 'न लुमताङ्गस्य' इत्यत्र परमवाचेत्येव तस्याः परिभाषाया उदाहरणमुक्तं भाष्ये । अत्र हि वाक्छब्दस्य उत्तरपदस्य कुत्वरूपकार्यभाक्त्वमस्तीति तस्य अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाभावात् कुत्वं न भवति । अत एव च 'कुमति च' इति सूत्रे भाष्ये माषाणां कुम्भो माषकुम्भः, माषकुम्भस्य वापो माषकुम्भवापः, तेन माषकुम्भवापेनेत्यत्र 'पदव्यवायेऽपि' इति निषेधप्रवृत्तये 'प्रातिपदिकान्त–' इति णत्वप्रवृत्तिरुपन्यस्ता सङ्गच्छते। न चैवं सति रम्यविणा इत्यत्र वि इत्युत्तरखण्डस्य कार्यभाक्त्वाभावाद् 'उत्तरपदत्वे चापदादिविधौ–' इति प्रत्ययलक्षणनिषेधस्याप्रवृत्तौ अन्तर्वर्तिविभक्त्याश्रयणेन पदत्वात् 'पदव्यवायेऽपि' इति णत्वनिषेधः स्यादिति वाच्यम्, पदे परे यत्पदं तेन व्यवाये णत्वं नेत्यर्थस्यैव भाष्यसंमतत्वात् । तच्च अनुपदमेव स्पष्टीभविष्यति । रम्यविणेत्यत्र च विशब्दस्यान्तर्वर्तिविभक्त्या पदत्वेऽपि तस्य पदपरकत्वाभावान्न णत्वनिषेधः । एतेन पुनर्भूणामित्यत्रापि णत्वं निर्बाधम् । **अतद्धित इति** । अतद्धिते परे यत्पदं तेन व्यवधाने

त्वात् । तस्माद् 'अङ्गानां योगोऽङ्गयोगश्चतुर्णामङ्गयोगः' इत्येव विग्रहीतव्यम् । न च 'चतुरङ्गेन योगः' इति विग्रहेऽप्यङ्गशब्द उत्तरपदं नेति प्रत्ययलक्षणप्रतिषेधो न प्रवर्तत इति शङ्क्यम्, तस्य पूर्वसमासस्योत्तरपदत्वात्, 'उत्तरपदत्वे च–' इति प्रतिषेधवचनस्यापि 'उत्तरस्य समासचरमावयवस्य पदत्वे कर्तव्ये पदादिविधिभिन्ने प्रत्ययलक्षणं न प्रवर्तते' इत्यर्थाभ्युपगमाच्च । 'शाकपार्थिवादीनामुत्तरपदलोपः', 'प्रादिभ्यो धातुजस्य–' इत्यादौ तूत्तरपदशब्देन समासचरमावयवमात्रं गृह्यत इति तत्र प्रत्ययलक्षणाप्रवृत्त्यभावेऽपि न क्षतिः । इह तु पदत्वलाभाय प्रत्ययलक्षणप्रवृत्तिरपेक्षिता । एवं च 'माषकुम्भवापेन' इत्यत्रापि कुम्भस्य वापः कुम्भवापः । कुम्भशब्दः कुम्भपरिमितधान्ये भाक्तः । 'माषाणां कुम्भवापः' इति विग्रहीतव्यमिति नव्याः । केचित्तु– 'अपदादिविधौ' इत्यत्र 'पदान्तविधौ' इत्यर्थं परिकल्प्य 'पदव्यवायेऽपि' इत्यस्य पदान्तविधित्वाभावान्नास्त्यत्र प्रत्ययलक्षणनिषेध इत्याहुः । तदपरे न क्षमन्ते । तथा हि सति लाघवात् 'पदान्तविधौ' इत्येव ब्रूयात्, न तु 'अपदादिविधौ' इति दिक् । किंचोत्तरपदत्वे इति वचनस्य पदान्तविधौ कर्तव्ये प्रतिषेध इत्यर्थाभ्युपगमे परमदण्डिनाविति 'ङमो ह्रस्वादचि–' इति सूत्रस्थमनोरमाग्रन्थेनैव विरोध इत्यलमियता । **अतद्धित इति** । 'व्यवधायकपदस्य तद्धितश्चेत्परो न भवति तदा

१०५८ कुस्तुम्बुरूणि जातिः । (६-१-१४३) अत्र सुडिनपात्यते । कुस्तुम्बुरुर्धान्याकम् । क्लीबत्वमतन्त्रम् । जातिः किम्-कुतुम्बुरूणि, कुत्सितानि तिन्दुकीफलानीत्यर्थः । **१०५९ अपरस्पराः क्रियासातत्ये ।** (६-१-१४४) सुडिनपात्यते । अपरस्पराः सार्था गच्छन्ति, सततमविच्छेदेन गच्छन्तीत्यर्थः । क्रिया इति किम्-अपरपरा गच्छन्ति, अपरे च परे च सकृदेव गच्छन्तीत्यर्थः । **१०६० गोष्पदं सेवितासेवितप्रमाणेषु ।** (६-१-१४५) सुट् सस्य षत्वं च निपात्यते । गावः पद्यन्तेऽस्मिन्देशे स गोभिः सेवितो गोष्पदः । असेविते—अगोष्पदान्यरण्यानि । प्रमाणे—गोष्पदमात्रं क्षेत्रम् । सेवित इत्यादि किम्-गोः पदं गोपदम् । **१०६१ आस्पदं प्रतिष्ठायाम् ।** (६-१-१४६) आत्मया-

---

अयं निषेधः, न तु तद्धितपरकपदेनेत्यर्थः । **आर्द्रगोमयेणेति** । गोः पुरीषं गोमयम्, 'गोश्च पुरीषे' इति गोशब्दात् षष्ठ्यन्ताद् मयट् तद्धितः, तद्धितान्तप्रातिपदिकावयवत्वात् सुपो लुक्, आर्द्रं गोमयमिति कर्मधारयः । यद्यपि प्रत्ययलक्षणेन अन्तर्वर्तिनीं विभक्तिमाश्रित्य गोशब्दो मयटि पदम्, तथापि तस्य तद्धितपरकतया तेन व्यवधानेऽपि रेफात्परस्य णत्वं भवत्येव, अस्मिन् प्रकरणे अट्कुप्वाङ्नुंव्यवायस्य अबाधकत्वात् । **शुष्कगोमयेणेति** । षात्परस्योदाहरणम् । भाष्ये तु 'पदान्तस्य' इति पूर्वसूत्रात्पदग्रहणानुवृत्तिमभिप्रेत्य पदे परतः पदेन व्यवाये णत्वं नेत्याश्रित्य वार्तिकमिदं प्रत्याख्यातम् । अथ 'सुट् कात्पूर्वः' इत्यतः सुडित्यनुवृत्तौ कतिचित्सूत्राणि व्याख्यातुमुपक्रमते । **कुस्तुम्बुरूणि । अत्रेति** । जातिविशेषे वाच्ये कुस्तुम्बुरुशब्दः ससुट्को निपात्यत इत्यर्थः । **कुस्तुम्बुरुर्धान्याकमिति** । गुल्मविशेषे प्रसिद्धः । **क्लीबत्वमतन्त्रमिति** । अविवक्षितमित्यर्थः । वचनमप्यतन्त्रमिति बोध्यम् । **कुतुम्बुरूणीति** । धान्याकजातिवाचकत्वाभावाद् न सुडिति भावः । तदाह—**कुत्सितानि तिन्दुकीफलानीत्यर्थ इति** । तुम्बुरुशब्दस्य तिन्दुकवाचकत्वे कोशो मृग्यः । **अपरस्पराः क्रियासातत्ये** । स्पष्टम् । **गोष्पदम्** । असेविते गोष्पदशब्दस्य वृत्त्यसंभवाद् नञ्पूर्वकमुदाहरति—**अगोष्पदानीति** । गवां सञ्चारो यत्र नैव संभवति तत्रापि सुडिति भावः । **गोष्पदमात्रं क्षेत्रमिति** । क्षेत्रस्याल्पप्रमाणत्वमनेन ज्ञाप्यते । अतो गोष्पदात् क्षेत्रस्याधिक्येऽपि न क्षतिः । **आस्पदं**

निषेधः' इत्यर्थः । **आर्द्रगोमयेणेति** । इह गोशब्दः पदम् । 'उत्तरपदत्वे च–' इति निषेधोऽत्र न शङ्क्यः, गोमयशब्दस्योत्तरपदत्वात् । गोशब्दस्य च 'स्वादिषु–' इति पदत्वात् । **गोष्पदम्** । असेविते गोष्पदशब्दस्य वृत्त्यसंभवान्नञ्पूर्वकमुदाहरति—**अगोष्पदानीति** । गवां संचारो यत्र नैव संभवति तत्रापि सुडागमा-

पनाय स्थाने सुट् निपात्यते। आस्पदम्। प्रतिष्ठायाम् इति किम्—आ पदाद् आपदम्। १०६२ आश्चर्यमनित्ये। (६-१-१४७) अद्भुते सुट्। आश्चर्यं यदि स भुञ्जीत। अनित्ये किम्—आचर्यं कर्म शोभनम्। १०६३ वर्चस्केऽवस्करः। (६-१-१४८) कुत्सितं वर्चो वर्चस्कमन्नमलम्। तस्मिन् सुट्। अवकीर्यत इत्यवस्करः। वर्चस्के किम्—अवकरः। १०६४ अपस्करो रथाङ्गम्। (६-१-१४९) अपकरोऽन्यः। १०६५ विष्किरः शकुनौ वा। (६-१-१५०) पक्षे विकिरः। 'वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा भूत्' इति वृत्तिः। तन्न, भाष्यविरोधात्।

प्रतिष्ठायाम्। आत्मेति। आत्मयापनं शरीरसंरक्षणम्, तदर्थं यत् स्थानं तस्मिन् गम्ये सुडित्यर्थः। **आपदादापदमिति।** आ पदादिति विग्रहे अव्ययीभावे आपदमिति भवतीत्यर्थः। आपदापदमिति पाठे तु आपदमित्यस्य आपदित्यर्थः। **आश्चर्यमनित्ये।** अद्भुते गम्ये आङ्पूर्वकस्य चरेः सुट्। 'चरेराङि चागुरौ' इति यत्। अनित्यग्रहणमपनीय अद्भुत इति वक्तव्यमिति वार्तिकमभिप्रेत्याह—**अद्भुते सुडिति।** तेन आश्चर्यं नीला द्यौः, आश्चर्यमन्तरिक्षे यदबन्धनानि नक्षत्राणि न पतन्तीत्यादिसंग्रहः। अनित्ये इत्यनेन कादाचित्कतया अद्भुतं लक्ष्यत इत्युक्ते तु एतन्न सिध्येत्। **वर्चस्केऽवस्करः।** 'मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत्। गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियाम्॥' इत्यमरः। **अपस्करो।** 'स्याद्रथाङ्गमपस्करः' इत्यमरः। 'चक्रं रथाङ्गम्' इति च। **विष्किरः।** विकिरतीति विकिरः। 'कॄ विक्षेपे' 'इगुपधज्ञा—' इति कः। शकुनौ गम्ये सुड् वा, 'परिनिविभ्यः—' इति षत्वम्। 'नगौकोवाजिविकिरविविष्किरपतत्त्रयः' इत्यमरः। **वा वचनेनैवेति।** वृत्तिग्रन्थे 'विष्किरः शकुनौ विकिरो वा' इति सूत्रपाठः। तत्र वाग्रहणादेव सुड्विकल्पे सिद्धे विकिरग्रहणं विष्किरः विकिर इति शकुनावेवेति नियमार्थम्। अतः शकुनेरन्यत्र उभयोरपि शब्दयोः प्रयोगो नास्तीति लभ्यत इत्यर्थः। भाष्ये हि 'विष्किरः शकुनौ वा' इति सूत्रं पठित्वा वाग्रहणेन सुड्विकल्पः, न तु शकुनेरन्यत्र विकिरशब्दस्य प्रयोगो नेति स्थितम्। अन्यत्रापि 'विकिरं वैश्वदेविकम्' इत्यत्र दर्शनादिति भावः।

र्थमसेवितग्रहणमित्याहुः। **आत्मयापनायेति।** कालक्षेपाय शरीरक्षेपणाय वेत्यर्थः। **आश्चर्यमिति।** आङः परस्य चरेः सुट्। 'चरेराङि चागुरौ' इति यत्। **विष्किरः।** 'कॄ विक्षेपे' इत्यस्माद् 'इगुपध—' इत्यादिना कप्रत्यये सुडागमोऽनेन निपात्यते। षत्वं तु 'परिनिविभ्यः—' इत्यनेन। **विकिरग्रहणमिति।** 'विष्किरः शकुनौ विकिरो वा' इति वृत्तिग्रन्थे पाठः, सूत्रपाठे तु विकिरग्रहणं नास्त्येवेति

१०६६ प्रतिष्कशश्च कशेः। (६-१-१५२) 'कश गतिशासनयोः' इत्यस्य प्रतिपूर्वस्य पचाद्यचि सुट् निपात्यते षत्वं च। सहायः पुरोयायी वा प्रतिष्कश इत्युच्यते। कशेः किम्-प्रतिगतः कशां प्रतिकशोऽश्वः। यद्यपि कशेरेव कशा, तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थम्। तेन धात्वन्तरोपसर्गान्न। **१०६७ प्रस्कण्वहरिश्चन्द्रावृषी।** (६-१-१५३) हरिश्चन्द्रग्रहणममन्त्रार्थम्। ऋषी इति किम्-प्रकण्वो देशः, हरिचन्द्रो माणवकः। **१०६८ मस्करमस्करिणौ वेणुपरिव्राजकयोः।** (६-१-१५४) मकरशब्दोऽव्युत्पन्नः, तस्य सुडिनिश्च निपात्यते। वेणु इति किम्-मकरो ग्राहः, मकरी समुद्रः। **१०६९ कास्तीराजस्तुन्दे नगरे।** (६-१-१५५) ईषत्तीरमस्यास्तीति कास्तीरं नाम नगरम्। अजस्येव तुन्दमस्येति अजस्तुन्दं नाम नगरम्। नगरे किम्-कातीरम्, अजतुन्दम्। **१०७० कारस्करो वृक्षः।** (६-१-१५६) (ग १५३) कारं करोतीति कारस्करो वृक्षः। अन्यत्र कारकरः। केचित्तु कस्कादिष्विदं पठन्ति, न सूत्रेषु। **१०७१ पारस्करप्रभृतीनि च संज्ञायाम्।** (६-१-१५७) एतानि ससुट्कानि निपात्यन्ते नाम्नि। पारस्करः। किष्किन्धा। 'तद्बृहतोः

प्रतिष्कशश्च कशेः। कशेरिति कश इत्यस्मान्वेति। तथा च कशधातोर्निष्पन्नस्य कशशब्दस्य प्रतेः परस्य सुट् स्यादित्यर्थः। **कशेरेवेति।** कशधातोरेव कशाशब्दो निष्पन्न इत्यर्थः। **धात्वन्तरेति।** प्रतिगतः कशां प्रतिकश इत्यत्र गमिं प्रत्येव प्रतिरुपसर्गः, न तु कशिं प्रति, 'यत्क्रियायुक्ताः प्रादयः–' इति नियमादित्यर्थः। **प्रस्कण्वहरिश्चन्द्रावृषी। अमन्त्रार्थमिति।** मन्त्रे तु 'हस्वाचन्द्रोत्तरपदे मन्त्रे' इति सूत्रेणैव सिद्धमिति भावः। तत्सूत्रं वैदिकप्रक्रियायां व्याख्यास्यते। **मस्करमस्करिणौ।** यथासंख्यमन्वयः। मस्करिग्रहणात्परिव्राजक एव मस्करिशब्दः। अन्यत्र तु मकरीत्येवेत्याहुः। **कास्तीराजस्तुन्दे।** कास्तीरशब्दः अजस्तुन्दशब्दश्च नगरे निपात्येते इत्यर्थः। **कारस्करो वृक्षः।** कारं करोतीति विग्रहः। 'कृञो हेतुताच्छील्ये–' इति टः। **पारस्करप्रभृतीनि च। पारस्कर इति।** पारं करोतीति

बोध्यम्। **तस्यापीति।** विकिरशब्दस्यापीत्यर्थः। **कशेरेव कशेति।** कशधातोरेव कशाशब्दो निष्पन्न इत्यर्थः। **धात्वन्तरेति।** 'प्रतिकशः' इत्यत्र प्रतिर्गमेरुपसर्गो, न तु कशेः। 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव–' इति न्यायादिति भावः। **अमन्त्रार्थमिति।** मन्त्रे तु 'हस्वाचन्द्रोत्तरपदे मन्त्रे' इत्यनेनैव सिद्ध्यतीति भावः। **मस्कर।** मस्करशब्दादिनिना मत्वर्थीयेनेष्टसिद्धौ मस्करिग्रहणं 'परिव्राजक एवायं प्रयोगो यथा स्यात्' इत्येवमर्थमित्याहुः। **कातीरमिति।** 'ईषदर्थे' इति कोः

करपत्योश्चोरदेवतयोः सुट् तलोपश्च' (वा ३७१३) तात्पूर्वं चर्त्वेन दकारो बोध्यः। तद्बृहतोर्दकारतकारौ लुप्येते। करपत्योस्तु सुट्। चोरदेवतयोरिति समुदायोपाधिः। तस्करः। बृहस्पतिः। 'प्रायस्य चित्तिचित्तयोः' (वा ३७१४)। प्रायश्चित्तिः, प्रायश्चित्तम्। वनस्पतिरित्यादि। आकृतिगणोऽयम्।

इति समासाश्रयविधिप्रकरणम्।

विग्रहः। पूर्ववट्टः। **किष्किन्धेति**। किं किमपि वानरसैन्यं धत्त इति किष्किन्धा। 'आतोऽनुपसर्गे कः'। टाप्, निपातनात् किमो द्वित्वम्, मलोपः, सुट्, षत्वं च। रूढशब्दा एते कथञ्चिद् व्युत्पाद्यन्ते। एषामवयवार्थो न विचारणीयः। **तद्बृहतोरिति**। पारस्करादिगणसूत्रमेतत्। तद्शब्दे तकारस्यान्त्यस्याभावादाह—**तात्पूर्वमपि**। तलोपश्चेत्यत्र तकारात्पूर्वमित्यर्थः। तत् चौर्यं करोतीति विग्रहः। 'कृञो हेतुताच्छील्ये-' इति टः। **बृहस्पतिरिति**। बृहती वाक्, तस्याः पतिरिति विग्रहः। कुक्कुटयादीनामण्डादिष्विति[1] पुंवत्त्वम्, तलोपः, सुट्। 'वाग्वै बृहती तस्या एष पतिः' इति च्छन्दोगब्राह्मणम्। **प्रायस्य चित्तिचित्तयोरिति**। गणसूत्रमिदम्। प्रायस्य चित्तिः चित्तं वेति विग्रहः। 'प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनम्।' इति स्मृतिः। **वनस्पतिरिति**। वनस्य पतिरिति विग्रहः **आकृतिगणोऽयमिति**। तेन शतात्पराणि परश्शतानीत्यादि सिद्धम्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां समासाश्रयविधिप्रकरणं समाप्तम्।

कादेशः। **पारस्कर इति**। 'पारं करोति' इति विग्रहः। 'कृञो हेतुताच्छील्या-' इति टः। **किष्किन्धेति**। 'किमपि धत्ते' इति विग्रहे 'आतोऽनुपसर्गे कः'। टाप्, निपातनात् किमो द्वित्वं पूर्वस्य मलोपः सुट् षत्वं च। 'किं किं दधाति' इति विग्रहतां तु मते वीप्सायां द्वित्वं सिद्धम्। अन्यत्र तु निपातनादेव। वस्तुतस्तु रूढिशब्दा एते कथंचिद्व्युत्पाद्यन्त इत्यवयवार्थे नाग्रहः कार्यः। **तद्बृहतोरिति**। गणसूत्रमेतत्। **तादिति**। 'तलोपश्च' इत्यत्रेति शेषः। **प्रायस्येति**। गणसूत्रमेतदपि। 'प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनम्' इति स्मृतिः। **आकृतिगणोऽयमिति**। तेन शतात्पराणि परश्शतानि कार्याणीत्यादि सिद्धम्। 'सुप्सुपा' इति वा 'पञ्चमी' इति योगविभागाद्वा समासः। राजदन्तादित्वाच्छतशब्दस्य परनिपातः, पारस्करादित्वात्सुट्।

इति तत्त्वबोधिन्यां समासाश्रयविधिप्रकरणम्।

---

१ 'कुक्कुट्यादीनामण्डादिष्विति' इति क्वचिन्नास्ति।

अथ तद्धिताधिकारप्रकरणम् । २६ ।

अथापत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः ।

१०७२ **समर्थानां प्रथमाद्वा** । (४-१-८२) इदं पदत्रयमधिक्रियते । 'प्राग्दिशः-' (सू १६५७) इति यावत् । सामर्थ्यं परिनिष्ठितत्वम् । कृतसन्धिकार्यत्वमिति यावत् । १०७३ **प्राग्दीव्यतोऽण्** । (४-१-८३) 'तेन

तदेवं समासप्रपञ्चं निरूप्य तद्धितप्रकरणमारभते । **समर्थानां प्रथमाद्वा** । विधेयस्यादर्शनान्नायं स्वतन्त्रविधिरिति मत्वाह—**इदं पदत्रयमधिक्रियत इति** । स्वरितत्वप्रतिज्ञाबलादिति भावः । अधिकारस्योत्तरावधिमाह—**प्राग्दिश इति यावदिति** । 'प्राग्दिशो विभक्तिः' इति सूत्रम् उत्तरावधिरित्यर्थः । 'समर्थानाम्' इति निर्धारणषष्ठी । प्राथम्यं च 'तस्यापत्यम्' इत्यादितत्तत्सूत्रेषु प्रथमोच्चारितत्वम् । समर्थानां मध्ये प्रथमोच्चारितादित्यर्थः । 'समर्थात्प्रथमाद्वा' इति सुवचम् । केचित्तु बहुवचनबलादनेकसमर्थसमवाय एवास्य प्रवृत्तिः । एवं च 'प्राग्दिशः-' इत्यादिषु स्वार्थिकप्रत्ययविधिषु नास्य प्रवृत्तिरिति लभ्यत इत्याहुः । ननु सुबन्तात्तद्धितोत्पत्तेर्वक्ष्यमाणत्वेन तद्धितविधीनां पदविधितया 'समर्थः पदविधि' इति परिभाषयैव एकार्थीभावरूपसामर्थ्यलाभादिह समर्थग्रहणं व्यर्थमित्यत आह—**सामर्थ्यं परिनिष्ठितत्वमिति** । समर्थः पटुः शक्त इति पर्यायाः । शक्तत्वं च कार्योत्पादनयोग्यत्वम् । शब्दस्य च कार्यमर्थप्रतिपादनमेव । तच्छक्तत्वं च कृतेष्वेव संधिकार्येषु संभवति । तथा च कृतसन्धिकार्यत्वमेव सामर्थ्यमिह पर्यवस्यति । तदाह—**कृत-**

अपवादसंगत्या तद्धितान्विवक्षुस्तदीयमधिकारसूत्रमाह—**समर्थानामिति** । 'अन्यतरस्यांग्रहणानुवृत्तेः समासोऽपि' इति वक्ष्यमाणमूलग्रन्थेन समासापवादत्वं सूचितम् । विधेयानिर्देशादुत्तरत्र प्रकृतिविशेषाकांक्षासत्त्वाच्च नायं स्वतन्त्रो विधिरित्याह—**अधिक्रियत इति** । 'पदत्रयम्' इत्यनेन प्रत्येकं स्वरितत्वप्रतिज्ञा सूचिता । तत्प्रयोजनं तु कस्यचिन्निवृत्तावप्यपरस्यानिवृत्तिः, तथा च 'प्राग्दिशः-' इति सूत्रे—'समर्थानां प्रथमात्' इति निवृत्तम्, 'वा' इति त्वनुवर्तत एव—इति वक्ष्यमाणमूलग्रन्थः संगच्छते ॥ **प्राग्दिश इतीति** । तत उत्तरेषां प्रत्ययानां स्वार्थिकत्वेन 'समर्थानाम्' 'प्रथमात्' इति पदयोः प्रयोजनं नेति भावः । ननु 'समर्थः पदविधिः' इति परिभाषया गतार्थत्वात् 'समर्थानाम्' इत्येतद् व्यर्थम् । न च पदविधित्वं नेति शङ्क्यम्, 'घकालतनेषु-' इत्यलुग्विधानात् 'सुबन्तात्तद्धितोत्पत्तिः' इति सिद्धान्तस्य सकलसम्मतत्वादत आह—**सामर्थ्यमिति** । **कृतसन्धिकार्यत्वमिति** । अस्य

दीव्यति-' (सू १२२०) इत्यतः प्रागणधिक्रियते । **१०७४ अश्वपत्यादिभ्यश्च । (४-१-८४)** एभ्योऽण् स्यात्प्राग्दीव्यतीयेष्वर्थेषु । वक्ष्यमाणस्य ण्यस्यापवादः । **१०७५ तद्धितेष्वचामादेः । (७-२-११७)** ञिति णिति च

सन्धिकार्यत्वमिति यावदिति । प्राग्दीव्यतोऽण् । 'तेन दीव्यति खनति जयति जितम्' इति सूत्रस्थदीव्यतिशब्दैकदेशस्यानुकरणमिह दीव्यच्छब्दः । तेन च तद्घटितं तत्सूत्रं लक्ष्यते । तदाह—**तेन दीव्यतीत्यतः प्रागणधिक्रियत इति ।** तथा च तस्यापत्यमित्याद्युत्तरसूत्रेषु केवलमर्थनिर्देशपरेषु विधेयप्रत्ययविशेषासंयुक्तेषु किं भवतीत्याकाङ्क्षायामणित्युपतिष्ठत इति लभ्यते । कस्माद्भवतीत्याकाङ्क्षायां 'समर्थात्प्रथमात्' इति प्रकृतिविशेषो लभ्यते । यत्र तु विधेयः प्रत्ययविशेषः श्रूयते तत्राणिति नोपतिष्ठते, अणित्यस्यौत्सर्गिकतया वैशेषिकेण इञादिना बाधात् । **अश्वपत्यादिभ्यश्च ।** चकारात् 'प्राग्दीव्यतोऽण्' इत्यनुकृष्यते । तदाह—**एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेष्विति ।** दीव्यतः प्राक् प्राग्दीव्यत्, 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावः । 'झयः' इति टच् तु न, तस्य पाक्षिकत्वात् । प्राग्दीव्यतो भवाः प्राग्दीव्यतीयाः, 'वृद्धाच्छः' । 'अव्ययात्त्यप्' इति तु न अव्ययीभावस्याव्ययत्वे 'लुङ्मुखस्वरोपचारः प्रयोजनम्' इति परिगणनात् । अत एव 'अव्ययानां भमात्रे टिलोपः' इत्यपि न भवति । ननु 'प्राग्दीव्यतोऽण्' इत्येव सिद्धे किमर्थमिदं सूत्रमित्यत आह—**वक्ष्यमाणस्येति ।** 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति वक्ष्यमाणस्य पत्युत्तरपदत्वप्रयुक्तण्यप्रत्ययस्य बाधनार्थमित्यर्थः ।

फलं तु 'तस्यापत्यम्' इति सूत्रे मूल एव स्फुटीभविष्यति । इह 'समर्थात्प्रथमाद्वा' इति वक्तुं युक्तम् । मध्येोत्सर्गमाह—**प्राग्दीव्यत इत्यादिना ।** सूत्रे 'दीव्यत्' इत्येकदेशोऽनर्थकोऽप्यवधित्वेनोपात्तः 'प्राग्रीश्वरात्–' इतिवदित्येके । अन्ये त्वाहुः—'दीव्यत्' इति शत्रन्तम् । तेन देवनकर्ता अर्थ एवावधिरिति । **प्राग्दीव्यतीयेष्विति ।** दीव्यतः प्राक् प्राग्दीव्यत् । 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभाव इति प्राञ्चः । 'प्राग्दीव्यतम्' इति तूचितम्, 'झयः' इति टच्प्रवृत्तेरिति केचित् । तन्न, 'झयः' इति टचः पाक्षिकत्वात् । अन्यथा 'उपसमिधमुपसमित्' इति तत्सूत्रस्थमूलोदाहरणस्यासंगत्यापत्तेः । न चात्र टचोऽभावे 'अव्ययानां भमात्रे' इति टिलोपे 'प्राग्दीव्यतीय' इति रूपं न स्यादिति शङ्क्यम् । अव्ययीभावस्याव्ययत्वे प्रयोजनं 'लुङ्मुखस्वरोपचारः' इति परिगणनात् । प्राग्दीव्यति भवः प्राग्दीव्यतीयः, 'वृद्धाच्छः' । त्यप् तु न शङ्कनीय एव, 'अमेहक्कतसित्रेभ्य एव' इति परिगणनात् । लुङ्मुखस्वर इत्यादिपरिगणनया अनव्ययत्वाच्च । **वक्ष्यमाणस्येति ।** 'पत्युत्तरपदाण्ण्यः' इति वक्ष्य-

तद्धिते परेऽचामादेरचो वृद्धिः स्यात् । १०७६ किति च । (७-२-११८) किति तद्धिते च तथा । अश्वपतेरपत्यादाश्वपतम् । गाणपतम् । 'गाणपत्यो मन्त्रः' इति तु प्रामादिकमेव । १०७७ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । (४-१-८५) दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणोऽपवादः । दैत्यः । अदितेरादित्यस्य वा आदित्यः । प्राजापत्यः । 'यमाच्च' इति

तद्धितेष्वचामादेः। 'अचो ञ्णिति' इत्यनुवर्तते। 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति च। अचामिति निर्धारणषष्ठी। तदाह—**ञितीति**। **किति च**। **तथेति**। अचामादेरचो वृद्धिरित्यर्थः। इदं सूत्रं प्रकृतानुपयुक्तमपि व्याख्यासौकर्याय इहोपन्यस्तम्। **अपत्यादीति**। आदिना समूहाद्यर्थसंग्रहः। **आश्वपतमिति**। अश्वपतेरणि आदिवृद्धौ 'यस्येति च' इति इकारलोपः। **गाणपतमिति**। अश्वपत्यादिषु गणपतिशब्दः पठित इति भावः। **गाणपत्य इति**। गणपतिर्देवता अस्य मन्त्रस्येति विग्रहः। **प्रामादिकमेवेति**। प्रमादादायातमित्यर्थः। गणपतिक्षेत्रपत्यादीनामश्वपत्यादिगणे पाठस्य वृत्तौ दर्शनादिति भावः। **दित्यदित्यादित्य**। **दित्यादिभ्य इति**। दिति, अदिति, आदित्य एतेभ्य इत्यर्थः। **पत्युत्तरपदादिति**। पतिः उत्तरपदं यस्य तस्मादिति विग्रहः। **प्राग्दीव्यतीयेष्वर्थेष्विति**। प्राग्दीव्यत इत्यनुवृत्तेरिति भावः। **अणोऽपवाद इति**। विशेषविहितत्वादिति भावः। **दैत्य इति**। दितेरपत्यमिति विग्रहः। दितेर्ण्यप्रत्ययः। 'चुटू' इति णकार इत्, आदिवृद्धिः, 'यस्येति च' इति इकारलोपः। **अदितेरादित्यस्य चेति**। अपत्यादीति शेषः। **आदित्य इति**। जाताद्यर्थे ण्ये आदिवृद्धौ 'यस्येति

माणस्य। **तद्धितेष्व**। अचां मध्य आदिरजेवेति 'अचोऽञ्णिति' इति सूत्रादच इत्यनुवर्तत इत्याशयेन व्याचष्टे—**अच इति**। **वृद्धिः स्यादिति**। 'मृजेर्वृद्धिः' इत्यतोऽनुवर्तत इति भावः। **किति च**। 'वाहीकः' इत्याद्यर्थमपीदं सुगमव्याख्यानायात्रैवोपन्यस्तम्। 'अचामादेः' इति निर्दिष्टस्थानिकत्वादिकपरिभाषात्र नोपतिष्ठत इत्याशयेनोदाहरति—**आश्वपतमित्यादि**। **प्रामादिकमेवेति**। एतच्च हरदत्तग्रन्थे स्थितम्। यदि तु देवतार्थकारणान्ताच्चातुर्वर्ण्यादिराकृतिगणत्वात् ष्यञिति व्याख्यायते तदा निर्दुष्ट एवायं प्रयोगः। अश्वपति गणपति राष्ट्रपति कुलपति गृहपति पशुपति क्षेत्रपतीत्यश्वपत्यादिः। **दित्यदित्या**। पतिशब्दस्योत्तरपदशब्देन बहुव्रीहिं कृत्वा पश्चाद् द्वन्द्वः कार्यः, न तु द्वन्द्वोत्तरं बहुव्रीहिरित्याह—**पत्युत्तरपदाच्चेति**। 'पत्यन्तात्' इत्युच्यमाने बह्वच्पूर्वादपि स्यादित्युत्तरपदग्रहणं कृतम्। **दैत्य इति**। ननु दितेर्देवताद्यर्थे ण्यः सावकाशः, 'इतश्चानिञः' इत्यपत्ये ढक् दैतेय इत्यादौ

काशिकायाम् । याम्यः । 'पृथिव्या ञाञौ' (वा २२२४) । पार्थिवा, पार्थिवी । 'देवाद्यञञौ' (वा २२२५) । दैव्यम्, दैवम् । 'बहिषष्टिलोपो यञ् च' (वा २२२६)

च' इति लोप आदित्य इति रूपम् । आदित्यशब्दाद् ण्ये आदिवृद्धौ 'यस्येति च' इति 'यणो मयः–' इति पूर्वयकारस्य द्वित्वे सति 'हलो यमाम्–' इत्याद्ययकारस्य लोपे द्वियकारं रूपम् । द्वित्वाभावं लोपे चासति द्वियकारमेव । असति द्वित्वे यकारलोपे च सत्येकयकारं रूपम् । अनपत्यत्वाद् 'आपत्यस्य च–' इति यलोपो न । अदितेरपत्ये ण्ये आदित्यशब्दात्पुनरपत्ये ण्ये 'आपत्यस्य च–' इति यलोपः । **प्राजापत्य इति ।** पत्युत्तरपदात् प्रजापतिशब्दाद् ण्ये आदिवृद्धौ 'यस्येति च' इति लोपः । दैतेया इति त्वसाध्वेव । साधुत्वश्रद्धाजाड्ये तु पृषोदरादित्वात् समाधेयम् । **काशिकायामिति ।** भाष्ये त्विदं न दृश्यत इति भावः । **याम्य इति ।** यमस्यापत्यादीति विग्रहः । **पृथिव्या ञाञाविति ।** ञश्च, अञ् च वक्तव्यावित्यर्थः । **पार्थिवेति ।** पृथिव्या अपत्यादीति विग्रहः । ञप्रत्यये 'चुटू' इति ञकार इत्, आदिवृद्धिः, 'यस्येति च' इति लोपः । स्त्रियामदन्तत्वाट्टाप् । **पार्थिवीति ।** अञि 'टिड्ढाणञ्–' इति ङीप् । ञप्रत्ययस्यैव विधौ ङीब् न स्यात् । अञ एव विधौ टाब् न स्यात् । तस्मादुभयविधिः । एतत्सूचनाय स्त्रीलिङ्गोदाहरणमिति बोध्यम् । **देवादिति ।** देवशब्दाद् यञ् अञ् च प्रत्ययौ प्राग्दीव्यतीयेष्वर्थेषु वक्तव्यावित्यर्थः । **दैव्यम्, दैवमिति ।** देवस्यापत्यादीति विग्रहः । यञि अञि च आदिवृद्धौ 'यस्येति च' इति लोपः । **बहिष इति ।**

सावकाशः, तथा च दितेरपत्यमित्यत्रोभयप्रसङ्गे परत्वाल्लुक् स्यात्, मैवम् । 'ण्यादयोऽर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषिद्धम्' इति भाष्ये पूर्वविप्रतिषेधाश्रयणात् । अर्थविशेषे इति किम्, औष्ट्रपतम् । उष्ट्रपतिर्नाम पत्रम् । 'तस्येदम्' 'पत्राध्वर्युपरिषदश्च' इत्यञ् । इह पूर्वविप्रतिषेधेन 'तस्येदम्' इत्यर्थे ण्यो न भवति, इदमित्यस्य सामान्यार्थत्वात् । कथं तर्हि 'दैतेयः' इति । अत्राहुः—'कृदिकारात्–' इति ङीषन्तात् 'स्त्रीभ्यो ढक्' । ण्यस्तु न भवति । लिङ्गविशिष्टपरिभाषाया अनित्यत्वात् । न च 'अन्तादिवच्च' इति पूर्वस्यान्तवद्भावेन स्यादेव ण्य इति भ्रमितव्यम् । दितिशब्दान्ङीषि कृते 'यस्येति च' इति लोपेन सवर्णदीर्घाभावादिति । आदित्यशब्दाण्ण्यप्रत्यये 'यस्य–' इति लोपे 'हलो यमां–' इति पाक्षिको यलोपः । न चाल्लोपस्य स्थानिवत्त्वम्, यलोपे 'न पदान्त–' इति तन्निषेधात्, 'पूर्वत्रासिद्धे न स्थानिवत्' इत्युक्तेश्च । **काशिकायामिति ।** भाष्ये तु न दृष्टमिति भावः । अरण्यन्तात् स्वार्थिकेन ष्यञा प्रयोगः सूपपादः । स्त्रियां ङीष् न भवति, षितां ङीषोऽनित्यत्वात् । ञाञोः फलभेदज्ञापनाय स्त्रीलिङ्गमुदाहरति— **पार्थिवा, पार्थिवीति । बहिष इति ।** टिलोपवचनम् 'अव्ययानां भमात्रे–'

बाह्यः। 'ईकक्च' (वा २२२७) बाहीकः। 'स्थाम्नोऽकारः' (वा २२२१) अश्वत्थामः। पृषोदरादित्वात्सस्य तः। 'भवार्थे तु लुग्वाच्यः' (वा २८८२)। अश्वत्थामा। 'लोम्नोऽपत्येषु बहुष्वकारः–' (वा २२६०)। बाह्वादीञोऽपवादः। उडुलोमाः। उडुलोमान्। बहुषु किम्–औडुलोमिः। 'सर्वत्र गोरजादिप्रसङ्गे यत्'। (वा

बहिस् इति सकारान्तमव्ययम्। तस्मात् प्राग्दीव्यतीयष्वर्थेषु यञ्, प्रकृतेष्टिलोपश्चेति वक्तव्यमित्यर्थः। **बाह्य इति**। बहिर्भव इत्यादिविग्रहः। यञि टिलोपे आदिवृद्धिः। अव्ययानां भमात्रे टिलोप इत्यस्यानित्यत्वज्ञापनार्थमिह टिलोपविधानम्। तेन आराद्भव आरातीय इत्यादि सिध्यति। **ईकक् चेति**। बहिष ईकक् च स्यात् प्रकृतेष्टिलोपश्चेति वक्तव्यमित्यर्थः। **बाहीक इति**। बहिष ईककि टिलोपे 'किति च' इत्यादिवृद्धिः। **स्थाम्न इति**। स्थामन्शब्दाद् अकारप्रत्ययः प्राग्दीव्यतीयेष्वर्थेषु वाच्य इत्यर्थः। अणोऽपवादः। **अश्वत्थाम इति**। अश्वस्येव स्थामा स्थितिर्यस्येति विग्रहः। अश्वत्थाम्नोऽपत्यम्, तत्र[1] जात इत्यादिविग्रहः। प्रत्ययविधित्वेऽपि भाष्य उदाहरणात् तदन्तविधिः। अश्वत्थामन्शब्दादकारप्रत्यये 'नस्तद्धिते' इति टिलोपः। अणि तु आदिवृद्धिः स्यात्। ननु उरः परत्वाभावात्कथमिह सकारस्य थकार इत्यत आह—**पृषोदरादित्वादिति**। **भवार्थे तु लुग्वाच्य इति**। अकारप्रत्ययस्येति शेषः। **लोम्न इति**। लोमन्शब्दाद्बहुषु अपत्येषु वाच्येषु अकारप्रत्ययो वक्तव्य इत्यर्थः। **बाह्वादीञ इति**। बाह्वादित्वप्रयुक्तस्य इञोऽपवाद इत्यर्थः। **उडुलोमा इति**। उडूनि नक्षत्राणीव लोमानि यस्य स उडुलोमा, तस्यापत्यमिति विग्रहः। केवलस्य लोम्नः अपत्ययोगासंभवात्प्रत्ययविधित्वेऽपि तदन्तविधिः। अकारप्रत्यये सति 'नस्तद्धिते' इति टिलोपः। **औडुलोमिरिति**। उडुलोम्नोऽपत्यमिति विग्रहः। अत्रापत्यबहुत्वभावादकारप्रत्ययो न। किंतु बाह्वादित्वादिञि टिलोप इति भावः। **सर्वत्र गोरिति**। लोम्नोऽपत्येष्विति पूर्ववार्तिकादपत्यग्रहणानुवृत्तिनिवृत्त्यर्थं सर्वत्रग्रहणम्। अपत्ये तदन्येषु च प्राग्दीव्यतीयेष्वर्थेषु

इत्यस्यानित्यतां ज्ञापयितुम्। तेन आरातीय इति सिद्धम्। **अश्वत्थामा इति**। भाष्योदाहरणात्तदन्तविधिः। न च बलवाचिनः स्थामन्शब्दस्यापत्येन योगासम्भवाद्वचनारम्भसामर्थ्यात्तदन्तविधिः स्यादिति वाच्यम्, जाताद्यर्थे तत्सम्भवेन सामर्थ्योपक्षयात्। अश्वस्येव स्थाम यस्येति बहुव्रीहिः। **उडुलोमा इति**। उडूनि नक्षत्राणीव लोमान्यस्येति विग्रहः। केवलस्यापत्येन योगासम्भवात्तदन्तविधिस्ततोऽकारष्टिलोपः। **गोरिति**। न केवलमपत्य एवायम्, किं तु प्राग्दीव्यतीयेषु सर्वेष्वर्थेष्विति ज्ञेयम्।

1 'तत्र' इति क्वचिन्नास्ति।

२५६१) गव्यम् । अजादिप्रसङ्गे किम्–गोभ्यो हेतुभ्य आगतं गोरूप्यम्, गोमयम् । १०७८ उत्सादिभ्योऽञ् । (४-१-८६) औत्सः । अग्निकलिभ्यां ढग्वक्तव्यः' (वा २६८१) । अग्नेरपत्यादि आग्नेयम् । कालेयम् ।

इत्यपत्यादिविकारार्थसाधारणाः प्रत्ययाः ।

गोशब्दादजादिप्रत्ययप्रसङ्गे सति यत्प्रत्ययो वाच्य इत्यर्थः । **गव्यमिति** । गवि भवं गोरागतमित्यादि विग्रहः । अणपवादो यत् । **गोरूप्यम्, गोमयमिति** । 'हेतुमनुष्येभ्योऽन्यतरस्याम्–' इति रूप्य इत्यर्थः । 'मयड्वैतयोः–' इति रूप्यमयटौ । हलादित्वान्नैतयोर्यत्प्रत्ययो बाधक इति भावः । **उत्सादिभ्योऽञ्** । प्राग्दीव्यतीयेष्वर्थेष्विति शेषः । अणाद्यपवादः । 'दृष्टं साम' इति सूत्रभाष्ये 'सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः' इति वार्तिकं पठितम् । दृष्टं सामेत्यर्थे ततोऽन्येष्वप्यर्थेषु ढग्वक्तव्य इत्यर्थः । तत्र सर्वत्रेति त्यक्त्वा लाघवात्प्राग्दीव्यतीयेष्वेवेदं वार्तिकं पठति–**अग्निकलिभ्यामिति । अपत्यादीति** । अग्निर्देवता अस्य इत्यादिविग्रहः । **आग्नेयम् । कालेयमिति** । ढकि एयादेशे कित्त्वादादिवृद्धौ 'यस्येति च' इति लोपः ।

इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः ।

गव्यमिति । गवि भवम्, गौर्देवता अस्य, गोरिदमित्यादिरर्थः । केचित्तु भाष्ये सर्वत्र ग्रहणात्प्राग्दीव्यतीयेभ्योऽन्यस्मिन्नर्थेऽप्ययं यत् । तेन गवा चरति गव्य इत्याद्यपि भवतीत्याहुः । **गोरूप्यमित्यादि** । 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' 'मयट् च' रूप्यमयटौ । **उत्सादिभ्योऽञ्** । अणस्तदपवादानामिञादीनां चायमपवादः । इह 'बष्कयासे–' इति गणसूत्रे, असे असमासे, पूर्वाचार्यसंज्ञेयम् । बष्कयस्यापत्यादि वाष्कयः । असे किम्, गौबष्कयिः । 'असे' इति निषेधाल्लिङ्गादिह तदन्तविधिः, तेन धेनुशब्दस्येह पाठादधेनूनां समूह आधेनवमिति सिद्धम् । नन्वेवं धेनुकं गौधेनुकमित्यत्राञ् प्रवर्तेत, 'अचित्तहस्तिधेनोः–' इति सूत्रे धेनुशब्दग्रहणाद्धैनुकमिति सिद्धावपि गौधेनुकं न सिद्ध्येदिति चेत् । न । 'धेनुरनञ् इकमुत्पादयति' इति विशेषवचनस्य भाष्ये स्थितत्वात् । इकं ठकमित्यर्थः । **अग्निकलिभ्यामिति** । अयं भावः 'सास्य देवता' इत्यधिकारे 'अग्नेर्ढक्' इति सूत्रम्, 'दृष्टं साम' इत्यधिकारे 'कलेर्ढक्' इति वार्तिकं चापनीय प्राग्दीव्यतीयेष्विदमेव पठनीयम् । तेनाग्नेरपत्यम्, अग्निना दृष्टं साम, अग्नेरिदम्, अग्नौ भवम्, अग्नेरागतमाग्नेयमिति सिध्यति । तथा कलेरपत्यमित्याद्यर्थे कालेयमपि सिध्यतीति । एतेन 'यदकालयत्तत्कालेयस्य कालेयत्वम्' इति श्रुतावर्था-

अथापत्याधिकारप्रकरणम्।

१०७६ **स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।** (४-१-८७) **'धान्यानां भवने-' (सू १८०२) इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रैणः। पौंस्नः। वत्यर्थे न, 'स्त्री पुंवच्च' (सू ९३२) इति ज्ञापकात्। स्त्रीवत्। पुंवत्।**

अथापत्याधिकारो निरूप्यते। **स्त्रीपुंसाभ्याम्।** भवनशब्देन 'धान्यानां भवने क्षेत्रे खञ्' इति सूत्रं विवक्षितम्। प्राग्दीव्यत इत्यतः प्रागित्यनुवृत्तम्। तदाह—**धान्यानामिति। स्त्रीपुंसाभ्यामिति।** 'अचतुर-' इत्यच्। स्त्रीशब्दात् पुंस्शब्दाच्चेत्यर्थः। **स्त्रैण इति।** स्त्रिया अपत्यम्, स्त्रीषु भवः, स्त्रीणां समूह इत्यादिविग्रहः। नञ्, वृद्धिः, णत्वम्। **पौंस्न इति।** पुंसोऽपत्यम्, पुंसि भवः, पुंसां समूह इत्यादिविग्रहः। पुंस्शब्दात् स्नञि 'स्वादिषु-' इति पदत्वात्संयोगान्तलोपः, आदिवृद्धिः। प्रत्ययसकारस्तु श्रूयते, उभाभ्यामपि नञ्प्रत्ययस्यैव विधौ

न्तरेऽपि ढको दर्शनात् 'कलेर्ढक्' इति सूत्रमपार्थकमिति मीमांसकोक्तिः परास्ता। वार्तिके सूत्रत्वोक्तिरप्यवैयाकरणमीमांसकप्रतारणार्थेति दिक्।

इत्यापत्यादिविकारान्तार्थसाधारणप्रत्ययप्रकरणम्।

स्त्रीपुंसाभ्याम्। प्रागित्यनुवर्तते तदाह—**प्रागर्थेष्विति। पौंस्न इति।** इह 'स्वादिषु-' इति पदत्वात्संयोगान्तलोपेन पुंसः सस्य निवृत्तावपि प्रत्ययसकारः श्रूयत एव। अतएवोभाभ्यां परतो नञेव न विहितः, पौंनमिति रूपासिद्धिप्रसङ्गात्। स्यादेतत्—उभाभ्यामपि प्रकृतोऽञेवास्तु तत्संनियोगेन 'स्त्रीपुंसयोर्नुक् च' इति नुगेव विधीयताम्। न चैवं 'स्त्रैणः, पौंस्नः' इत्यत्र 'यञञोश्च' इति लुक्प्रसङ्गः। स्त्रैणानां संघ इत्यादौ 'सङ्घाङ्कलक्षणेषु' इत्यण्प्रसङ्गश्च स्यादिति वाच्यम्, उभयत्रापि 'गोत्रे' इत्यनुवृत्तेः, प्रवराध्यायप्रसिद्धं हि तत्र गोत्रम्। अन्यथा 'पौत्राः, दौहित्राः' इत्यत्राप्यञो लुक् स्यात्। एवं च 'नञ्स्नञीकक्ख्युन्-' इति वार्तिके नञ्स्नञ्ग्रहणं विना अञन्तत्वादेव ङीप् सिध्यतीत्यपरमप्यनुकूलमिति चेत्। अत्राहुः—नुकि 'नस्तद्धिते' इति टिलोपः स्यात्। न चैवं नुगानर्थक्यम्। टिलोपप्रवृत्त्यैव नुकः सार्थकत्वात्। यद्यपि स्त्रीशब्दे तस्य सार्थक्यं नास्ति, 'यस्येति च' इत्यनेनापीकारलोपसम्भवात्। तथापि 'श्रीर्देवतास्य श्रायं हविः' इत्यत्रेव लोपात्परत्वाद् वृद्धिः स्यात्, नुकि तु टिलोपः प्रवर्तेत इति स्त्रीशब्देऽपि नुकः सार्थक्यमस्तु। तस्मान्नञ्स्नञाविति

---

१ भवनशब्देनैकदेशेन, इति क. ख.

१०८० **द्विगोर्लुगनपत्ये । (४-१-८८)** द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक्स्यात् । पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः । द्विगोर्निमित्तम् इति किम्–पञ्चकपालस्येदं खण्डं पाञ्चकपालम् । अजादिः किम्–पञ्चगर्गरूप्यम् । अनपत्ये किम्–द्वयोर्मित्रयोरपत्यं द्वैमित्रिः ।

तु पुंसः सकारस्य संयोगान्तलोपे पुम इति स्यादिति भावः । **वत्यर्थे नेति ।** 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययो वक्ष्यते । तस्यार्थे स्त्रीपुंसाभ्यां नञ्स्नञौ न भवत इत्यर्थः । कुत इत्यत आह—**स्त्री पुंवच्चेति ज्ञापकादिति ।** अन्यथा पुंवदिति निर्देशोऽनुपपन्नः स्यादिति भावः । न च पुंवदिति निर्देशः पुंस्शब्दाद्वत्यर्थे स्नञभावं ज्ञापयेत्, नतु स्त्रीशब्दान्नञभावमपीति वाच्यम्, नञ्स्नञोरेकसूत्रोपात्ततया वत्यर्थे स्नञभावे ज्ञापिते सति स्त्रीशब्दान्नञभावस्यापि लाभाद् ज्ञापकस्य सामान्यापेक्षत्वात् । तदुक्तं भाष्ये 'योगापेक्षं ज्ञापकम्' इति । **द्विगोर्लुगनपत्ये ।** द्विगोरिति हेतुत्वसंबन्धे षष्ठी । लुक्श्रवणात् प्रत्ययस्येत्युपस्थितम्, प्रत्ययादर्शनस्यैव लुक्त्वात् । तथा च द्विगुनिमित्तस्य प्रत्ययस्य लुगिति लभ्यते । द्विगुनिमित्तश्च प्रत्ययस्तद्धित एव भवति, तद्धितार्थे विषये तद्विधानात् । ततश्च द्विगुनिमित्तस्य तद्धितस्येति लभ्यते । प्राग्दीव्यत इत्यनुवृत्तेः प्राग्दीव्यतीयत्वं तद्धितविशेषणम् । 'गोत्रेऽलुगचि' इत्युत्तरसूत्रे अचीति सप्तम्यन्तस्य गोत्रविशेषणतया तदादिविधिः । अजादावित्यर्थकमचीति पदमिहापकृष्यते । तच्च षष्ठ्या विपरिणतं तद्धितविशेषणम्, तदाह—**द्विगोर्निमित्तमित्यादिना । पञ्चकपाल इति ।** 'संस्कृतं भक्षाः' इत्यण्, तद्धितार्थे द्विगुः, अणो लुक् । प्रत्ययलक्षणाभावान्नादिवृद्धिः । **पञ्चकपालस्येदमिति ।** पञ्चसु कपालेषु संस्कृतः पुरोडाश इत्यर्थे अणि विवक्षिते द्विगुसमासे अणो लुकि निष्पन्नात् पञ्चकपालशब्दात् 'तस्येदम्' इत्यणि आदिवृद्धौ पाञ्चकपालमित्यत्राणो लुङ् न भवति, अणो द्विगुनिमित्तत्वाभावादिति भावः । **पञ्चगर्गरूप्यमिति ।** पञ्चभ्यो गर्गेभ्य आगत-

---

यथान्यासमेव स्वीकर्तव्यमिति । अन्ये तु 'स्त्रीपुंसयोर्नुक् च' इत्यस्तु, आगमे अकारो विवक्षितः । तस्य च 'यस्येति च' इति लोपे कृतेऽपि स्थानिवत्त्वाट्टिलोपो न भविष्यति । एवं च 'टिड्ढाणञ्–' इति सूत्रेणैव ङीप्सिद्धौ नञ्स्नञोरुपसंख्यानं मास्त्विति महदेव लाघवमित्याहुः । **वत्यर्थ इति ।** 'स्त्रीपुंसाभ्यां नञ्स्नञौ वत्यर्थे न प्रवर्तेते' सामान्यापेक्षं ज्ञापकमिति भावः । अतएवोदाहरति—**स्त्रीवदिति ।** 'आ च त्वात्' इति चकारो नञ्स्नञ्भ्यां त्वतलोः समावेशार्थ इति वक्ष्यति । तेन स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्तेति सिद्धम् । **द्विगोर्लुगनपत्ये ।** द्विगोरिति षष्ठी, तदर्थश्च हेतुत्वम्, तच्च भाविनोऽप्युपपद्यते, बुद्ध्याध्यवसायादित्याशयेनाह—**द्विगोर्निमित्तमिति । अजादि-**

१०८१ गोत्रेऽलुगचि । (४-१-८९) अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुक्स्यात्। गर्गाणां छात्राः, 'वृद्धाच्छः' (सू १३३७)। **१०८२ आपत्यस्य च तद्धितेऽनाति । (६-४-१५१)** हलः परस्यापत्ययकारस्य

मित्यर्थे 'हेतुमनुष्येभ्यः–' इति रूप्यप्रत्ययः। 'तद्धितार्थ–' इति द्विगुसमासनिमित्तत्वेऽपि अजादित्वाभावाद् न लुगिति भावः। **द्वैमित्रिरिति**। अत्र 'अत इञ्' इति इञोऽपत्यार्थकत्वान्न लुगिति भावः। न च तिस्रो विद्या अधीयानस्त्रैविद्य इत्यत्राप्यणो लुक् स्यादिति वाच्यम्, त्र्यवयवा विद्या त्रिविद्या, शाकपार्थिवादिः। त्रिविद्यामधीते त्रैविद्य इति विग्रहे त्रिविद्याशब्दादणो द्विगुनिमित्तत्वाभावात्। प्राग्दीव्यतीयग्रेति किम्? पञ्चभ्यः कपालेभ्यो हितं पञ्चकपालीयम्। **गोत्रेऽलुगचि**। अलुगिति च्छेदः। प्राग्दीव्यत इत्यनुवृत्तेः प्रत्ययाधिकाराच्च प्राग्दीव्यतीये प्रत्यय इति लब्धम्। अचीति तद्विशेषणम्, तदादिविधिः। विषयसप्तम्येषा, नतु परसप्तमी। तदाह—**अजादावित्यादिना**। **गोत्रप्रत्ययस्येति**। गोत्रार्थकप्रत्ययस्येत्यर्थः। लुकः प्रत्ययादर्शनत्वात् प्रत्ययस्येति लब्धम्। **गर्गाणां छात्रा इति**। वक्ष्यमाणोदाहरणविग्रहप्रदर्शनमिदम्। गर्गस्य गोत्रापत्यं गार्ग्यः, 'गर्गादिभ्यो यञ्'। गर्गस्य गोत्रापत्यानीति बहुत्वविवक्षायां यञि कृते तस्य 'यञञोश्च' इति लुकि गर्गा इति भवति। **वृद्धाच्छ इति**। गार्ग्यशब्दादुक्तेऽर्थे छप्रत्यय इत्यर्थः। छस्य ईयादेशः, तस्मिन्भविष्यति अजादौ परे 'यञञोश्च' इति प्राप्तो लुङ् न भवति। तथा च गार्ग्य ईय इति स्थिते 'यस्येति च' इति यञोऽकारस्य लोपे गार्ग्य् ईय इति स्थिते परिशिष्टस्य यञो यकारस्य लोपमाह—**आपत्यस्य च**। अनातीति च्छेदः। 'ढे लोपोऽकद्र्वाः–' इत्यतो लोप इत्यनुवर्तते। 'सूर्यतिष्य–' इत्यतो य इति षष्ठ्यन्तमनुवर्तते। 'हलस्तद्धितस्य' इत्यतो हल इति पञ्चम्यन्तमनुवर्तते।

रिति। एतच्चोत्तरसूत्राद् 'अचि' इत्यपकर्षाल्लभ्यते, वाग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणेन वा। प्राग्दीव्यतीयः किम्, पञ्चभ्यः कपालेभ्यो हितं पञ्चकपालीयम्। **गोत्रे लुगचि**। गोत्रे किम्, गोत्रार्थकप्रत्ययस्यैवालुग्यथा स्यात्। नेह—कुवलस्येदं कौवलम्, बदरस्येदं बादरम्। कुवलीबदरीशब्दौ हि गौरादिङीषन्तौ, ताभ्यां फलरूपे विकारे 'अनुदात्तादेश्च' इत्यञ्। तस्य 'फले लुक्' इति लुक्, तत इदमर्थे अजादिप्राग्दीव्यतीये विवक्षितेऽनेनालुङ्न भवतीति वृद्धत्वाभावाच्छो नेति भावः। **विवक्षित इति**। अचीति विषयसप्तमी। परसप्तमीत्वे तु अवृद्धत्वाच्छस्याप्राप्तौ अणेव स्यादिति भावः। **गर्गाणामिति**। अपत्यबहुत्वविवक्षायां 'यञञोश्च' इति लुक्, स चाजादिप्रत्यये चिकीर्षिते अनेन प्रतिषिद्ध इति गार्ग्यशब्दाच्छे कृते तस्य ईयादेशः। 'यस्येति च' इत्यकारलोपे यलोपार्थमाह—**आपत्यस्य इति**। 'ढे लोपो

लोपः स्यात्तद्धिते परे, न त्वाकारे। गार्गीयाः। प्राग्दीव्यतीये किम्–गर्गेभ्यो हितं गर्गीयम्। अचि किम्–गर्गेभ्य आगतं गर्गरूप्यम्। १०८३ यूनि लुक्। (४–१–९०) अजादौ प्राग्दीव्यतीये प्रत्यये विवक्षिते युवप्रत्ययस्य लुक्स्यात्। ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः। वक्ष्यमाणः फिन्। ततो यून्यण्, ग्लौचु-

---

तदाह—**हलः परस्यापत्ययकारस्येति**। अपत्यार्थकयकारस्येत्यर्थः। यञो लुकि तु आदिवृद्धिर्न स्यादिति भावः। अल्लोपस्याभीयत्वेऽपि नासिद्धत्वम्, आरम्भसामर्थ्यात्। 'हलस्तद्धितस्य' इति यलोपस्यात्र प्रसक्तावपि न्याय्यत्वादिदमेव भवति। **गर्गीयमिति**। 'तस्मै हितम्' इति गार्ग्यशब्दाच्छः। तस्य प्राग्दीव्यतीयत्वाभावात् तस्मिन्परे 'यञञोश्च' इति यञो लुग्भवत्येवेति नादिवृद्धिरिति भावः। **गर्गरूप्यमिति**। 'हेतुमनुष्येभ्यः–' इति रूप्यप्रत्ययः, तस्य प्राग्दीव्यतीयत्वेऽप्यजादित्वाभावात्तस्मिन्परे यञः अलुङ् न। यदि तु 'अजादौ प्राग्दीव्यतीये प्रत्यये परे' इति व्याख्यायेत, तर्हि गार्ग्यशब्दाच्छे तस्य ईयादेशे कृते अलुग्विधिः प्रवर्तेत, नतु ततः प्राक्। एवं च छप्रवृत्तेः प्राग् 'यञञोश्च' इति यञो लुकि कृते आदिवृद्धेर्निवृत्तौ गर्गशब्दस्य वृद्धत्वाभावात् ततश्छो न स्यात्। अणि सति गार्गाश्छात्रा इत्येव स्यात्। अजादौ प्रत्यये विवक्षिते इति व्याख्याने तु छप्रत्यये विवक्षिते तत्प्रवृत्तेः प्रागेव यञि अलुग्विधेः प्रवृत्तौ यञन्तस्य वृद्धत्वाच्छो निर्बाधः। यलोपविधौ आपत्यस्येति किम्? सङ्काशेन निर्वृत्तं नगरं साङ्काश्यम्, 'सङ्काशादिभ्यो ण्यः' ततो भवार्थे 'धन्वयोपधात्–' इति वुञ्, सांकाश्यकः। तद्धिते किम्? गार्ग्ये, गार्ग्ययोः। अनातीति किम्? गार्ग्यायणः। **यूनि लुक्**। प्राग्दीव्यत इत्यनुवृत्तेः प्रत्ययाधिकाराच्च प्राग्दीव्यतीये प्रत्यये इति लभ्यते। अचीति प्रत्ययविशेषणम्, तदादिविधिः। विषयसप्तम्येषा, नतु परसप्तमी। तदाह—**अजादौ प्राग्दीव्यतीये विवक्षित इति। युवप्रत्ययस्येति**। युवार्थकप्रत्ययस्येत्यर्थः।

कद्वाः' इत्यतो लोप इत्यनुवर्तते, 'सूर्यतिष्य–' इत्यतो य इति, 'हलस्तद्धितस्य' इत्यतो हल इति च तदाह—**हलः परस्येत्यादि**। आभीयत्वेऽप्यल्लोपो नासिद्धः, आरम्भसामर्थ्यात्। अतएवोपधाया इति नानुवर्तितमिति व्याचष्टे—**यकारस्येति**। आपत्यस्येति किम्, सांकाश्यकः। काम्पिल्यकः। 'संकाशादिभ्यो ण्यः' ततो 'धन्वयोपधात्–' इति वुञ्। तद्धिते इति किम्, गार्ग्यौ। गार्ग्ययोः। अनातीति किम्, गार्ग्यायणः। **गार्गीयमिति**। 'तस्मै हितम्' इति छः। **यूनि लुक्**। प्राग्दीव्यतीय इति वर्तते, अचीति च, प्रत्ययाधिकाराच्च प्रत्यय इति लभ्यते, तदेतदाह—**प्राग्दीव्यतीयेऽजादौ प्रत्यय इति**। 'प्रत्ययस्य लुक्' इति संज्ञाकरणाल्लब्धो यः प्रत्ययः, स 'यूनि' इत्यनेन विशेष्यते। तथा च 'यूनि यः प्रत्ययस्तस्य लुक्'

कायनः । तस्य च्छात्रोऽपि ग्लौचुकायनः । अणो लुकि वृद्धत्वाभावाच्छो न ।
१०८४ पैलादिभ्यश्च । (२-४-५९) एभ्यो युवप्रत्ययस्य लुक् । 'पीलाया वा' (सू ११२१) इत्यण् । तस्माद् 'अणो द्व्यचः' (सू ११८०) इति फिञ् । तस्य लुक् । पैलः पिता पुत्रश्च । 'तद्राजाचाणः' (ग २१) 'अङ्गमगध-' इत्यण्-

---

लुकः प्रत्ययादर्शनत्वात् प्रत्ययस्येति लभ्यत इति भावः । ननु ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिरिति कथम्, 'अत इञ्' इति इञः प्राप्तेः ? इत्यत आह—**वक्ष्यमाण इति** । 'प्राचामवृद्धात् फिन् बहुलम्' इत्यनेनेति शेषः । आयन्नादेशे ग्लुचुकायनिरिति रूपमिति भावः । **तत इति** । ग्लुचुकायनेरपत्यार्थे 'तस्यापत्यम्' इत्यणि आदिवृद्धौ 'यस्येति च' इति लोपे ग्लौचुकायन इति रूपमित्यर्थः । **तस्येति** । ग्लौचुकायनस्य छात्र इत्यर्थे तस्येदमित्यणि युवापत्याणो लुकि ग्लौचुकायन इत्येव रूपमित्यर्थः । ननु युवापत्याणः 'यस्येति च' इति लोपेनैव छात्रार्थे ग्लौचुकायन इति रूपसिद्धेस्तस्य लुग्विधिरनर्थक इत्यत आह—**अणो लुकीति** । छात्रार्थकछप्रवृत्तेः प्रागेव युवप्रत्ययस्याणो लुकि आदिवृद्धेर्निवृत्तौ ग्लुचुकायनिशब्दस्य वृद्धत्वाभावाच् छो न भवति । युवप्रत्ययस्य लुगभावे तु वृद्धत्वात् छः स्यात् । एतदर्थमेव युवप्रत्ययस्य लुग्विधानमित्यर्थः । स्थितश्चातुर्थिको युवप्रत्ययलुक् । तत्प्रसङ्गाद् द्वैतीयीको युवप्रत्ययलुगनुक्रम्यते । **पैलादिभ्यश्च** । 'ण्यक्षत्रियार्ष-' इत्यतो यूनि लुक् इत्यनुवर्तते । तदाह—**एभ्यो युवप्रत्ययस्य लुगिति** । अजादिप्रत्यये अविवक्षितेऽपि प्राप्त्यर्थमिदम् । **पीलाया इति** । पीलाया गोत्रापत्यमित्यर्थे 'स्त्रीभ्यो ढक्' इति ढकं बाधित्वा 'पीलाया वा' इत्यणित्यर्थः । **तस्मादिति** । पैलस्यापत्यं युवेत्यर्थे 'पैलादिभ्यश्च' इति लुक् 'अणो द्व्यचः' इति फिञ् इत्यर्थः । पीलाया गोत्रापत्यस्यापत्यं पीलाया युवापत्यमिति पर्यवस्यति । **तस्येति** । तस्य युवार्थकफिञ्प्रत्ययस्य अनेन लुगित्यर्थः । पीलाया गोत्रापत्ये

इत्यर्थस्तदाह—**युवप्रत्ययस्येति । वक्ष्यमाण इति** । 'प्राचामवृद्धात्फिन्बहुलम्' इति वक्ष्यमाणः । अजादौ किम्, ग्लौचुकायनरूप्यम् । प्राग्दीव्यतीये किम्, ग्लौचुकायनीयम् । 'तस्मै हितम्' इति छः । इह 'द्विगोर्लुगनपत्येऽचि' 'यूनि गोत्रे न' इत्येव सूत्रयितव्यम् । तथा च 'लुगलुग्ग्रहणं शक्यमकर्तुम्' इति मनोरमायां स्थितम् । तत्र 'फक्फिञोः-' इति सूत्रे 'यूनि' इत्यस्य मण्डूकप्लुतिराश्रयणीयेति क्लेशोऽयं लाघवानुरोधेन सोढव्य इति भावः । **पैलादिभ्यश्च** । 'ण्यक्षत्रियार्ष-' इत्यतो 'यूनि लुक्' इति वर्तते तदाह—**युवप्रत्ययस्य लुगिति । पीलाया वेत्यादि** । 'अपत्येऽणि विहिते गोत्रापत्येऽप्यसौ' 'एको गोत्रे' इति वक्ष्यमाणत्वात् । ततोऽण्णन्तात्पैलशब्दादपत्येऽपि विधीयमानः फिञ् युवापत्ये पर्यवस्यति । तस्य च

न्तादाङ्गशब्दाद् 'अणो द्व्यचः–' (सू ११८०) इति फिञो लुक् । आङ्गः पिता पुत्रश्च । **१०८५ इञः प्राचाम्** । (२–४–६०) गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक्स्यात् तच्चेद्गोत्रं प्राचां भवति । पन्नागारस्य अपत्यम्, 'अत इञ्' (सू १०९२), 'यञिञोश्च' (सू ११०३) इति फक्, पान्नागारिः पिता पुत्रश्च । प्राचां किम्–दाक्षिः पिता, दाक्षायणः पुत्रः । **१०८६ न तौल्वलिभ्यः** । (२–४–६१) तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुङ् न स्यात् । पूर्वेण प्राप्तः ।

युवापत्ये च पैलशब्द इत्याह—**पैलः पिता पुत्रश्चेति** । यूनः पिता युवा चेत्यर्थः । 'तद्राजाच्चाणः' इति पैलादिगणसूत्रम् । तद्राजप्रत्ययात्परस्य युवप्रत्ययस्याणो लुगित्यर्थः । **व्यङ्गमगधेति** । अङ्गशब्दो देशविशेषे । तस्य राजा आङ्गः । 'तस्य गोत्रापत्यमप्याङ्गः । 'द्व्यञ्मगध–' इत्यण् । तस्यापत्यं युवाप्याङ्ग एव । 'अणो द्व्यचः' इति फिञ्, तस्यानेन लुक् । **इञः प्राचाम्** । इञ इति पञ्चमी । प्रत्ययत्वात्तदन्तग्रहणम् । 'ण्यक्षत्रिय–' इत्यतो यूनि लुगित्यनुवर्तते । इञन्तात्परस्य युवप्रत्ययस्य लुगित्यर्थः । अर्थादिञो गोत्रार्थकत्वं लभ्यते । तदाह—**गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुगिति** । प्राचाम् इति गोत्रविशेषणम्, न तु विकल्पार्थम्, व्याख्यानात् । तदाह—**तच्चेद्गोत्रं प्राचां भवतीति** । प्राग्देशीयमित्यर्थः । **पन्नागारस्येति** । प्राग्देशे पन्नागारो नाम कश्चित्, तस्य गोत्रापत्यमित्यर्थे 'अत इञ्' इति इञि पान्नागारिः । पान्नागारेरपत्यं युवेत्यर्थे पान्नागारिशब्दाद् 'यञिञोश्च' इति फक्, तस्यानेन लुक् । एवं च पन्नागारस्य गोत्रापत्ये युवापत्ये च पान्नागारिरित्येव रूपमित्यर्थः । **प्राचां किमिति** । गोत्रविशेषणं किमर्थमित्यर्थः । **दाक्षिः पिता, दाक्षायणः पुत्र इति** । दक्षस्य गोत्रापत्यं दाक्षिः, अत इञ् । तस्यापत्यं युवा दाक्षायणः । 'यञिञोश्च' इति फक् । तस्य लुग् न भवति , दाक्षिशब्दस्य प्राग्देशीयगोत्रप्रत्ययान्तत्वाभावेन न युवप्रत्ययस्य फकः प्राग्देशीयगोत्रार्थकादिञः परत्वम् ।

फिञोऽनेन लुगित्यर्थः । एवं च पीलाया अपत्ये गोत्रापत्ये युवापत्ये चावैरूप्येण पैलशब्दः प्रयुज्यत इत्याह—**पैलः पिता पुत्रश्चेति** । पैलादिषु ये इञन्ताः शालङ्किसात्यकिऔदमेयिपैङ्गलिप्रभृतयस्तेभ्यः 'इञः प्राचाम्' इति लुकि सिद्धे अप्राचामर्थः पाठ इति ज्ञेयम् । **तद्राजाच्चाणः** । गणसूत्रमिदम् । तद्राजसंज्ञकात्परस्य युवप्रत्ययस्य लुगित्यर्थः । **तच्चेद्गोत्रं प्राचां भवतीति** । इह प्राचांग्रहणं गोत्रविशेषणम्, न तु 'प्राचामवृद्धात्–' इत्यादिवद्विकल्पार्थमित्यत्र व्याख्यानं शरणम् । **दाक्षिः पितेत्यादि** । दक्षस्यापत्यं गोत्रापत्यं च पुमान्दाक्षिः । युवापत्यं तु दाक्षायण इति भावः । **न तौल्वलिभ्यः** । बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चाद्यर्थावगतिरित्यभिप्रेत्याह—

तुल्वलः, तत इञि फक्-तौल्वलिः पिता, तौल्वलायनः पुत्रः। १०८७

फक्फिञोरन्यतरस्याम्। (४-१-९१) 'यूनि लुक्' (सू १०८३) इति नित्ये लुकि प्राप्ते विकल्पार्थं सूत्रम्। कात्यायनस्य छात्राः कातीयाः, कात्यायनीयाः। यस्कस्यापत्यं यास्कः, शिवाद्यण्, तस्यापत्यं युवा यास्कायनिः। 'अणो द्व्यचः' (सू ११८०) इति फिञ्। तस्य छात्रा यास्कीया यास्कायनीयाः। १०८८

तस्यापत्यम्। (४-१-९२) षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमा-

---

न तौल्वलिभ्यः। बहुवचनात्तौल्वल्यादीनां ग्रहणमित्याह---**तौल्वल्यादिभ्यः परस्येति। पूर्वेणेति।** 'इञः प्राचाम्' इत्यनेन प्राप्तो लुगनेन प्रतिषिध्यत इत्यर्थः। **तुल्वल इति।** तुल्वलो नाम प्राच्यः कश्चित्। तस्य गोत्रापत्यं तौल्वलिः। अत इञ्। तस्यापत्यं युवा तौल्वलायनः। 'यञिञोश्च' इति फक्। 'इञः प्राचाम्' इति लुङ् नेत्यर्थः। अथ प्रकृतं चातुर्थिकं लुग्विधिमनुसरति। **फक्फिञोरन्यतरस्याम्। यूनीत्येवेति।** 'यूनि लुक्' इति पूर्वसूत्रमनुवर्तत इत्यर्थः। 'यूनि लुक्' इत्युक्तो लुक् फक्फिञोर्वा स्यादित्यर्थः। तदाह—**पूर्वेणेति। कात्यायनस्येति।** कतस्य गोत्रापत्यं कात्यः। गर्गादित्वाद्यञ्। तस्यापत्यं युवा कात्यायनः। 'यञिञोश्च' इति फक्। कात्यायनस्य छात्रा इत्यर्थे 'तस्येदम्' इत्यनुवृत्तौ 'वृद्धाच्छः' इति छः, ईयादेशः। अत्र छात्रार्थकच्छप्रत्यये विवक्षिते युवार्थकफको लुकि सति कात्य ईय इति स्थिते 'यस्येति च' इत्यकारलोपे 'आपत्यस्य च–' इति यलोपे कातीया इति रूपम्। फको लुगभावे तु कात्यायनीया इति रूपमित्यर्थः। **यस्कस्येति।** यस्कस्य गोत्रापत्यमित्यर्थे 'अत इञ्' इति इञपवादः शिवाद्यणित्यर्थः। **तस्येति।** यास्कस्यापत्यं युवेत्यर्थे 'अणो द्व्यचः' इति फिञि आयन्नादेशे यास्कायनिरिति रूपमित्यर्थः। **तस्य छात्रा इति।** यास्कायनेश्छात्रा इत्यर्थे 'तस्येदम्' इत्यनुवृत्तौ 'वृद्धाच्छः' इति छः, तस्य ईयादेशः, यास्कायनीया इति रूपम्। अत्र छात्रार्थकच्छप्रत्यये विवक्षिते युवार्थकफिञो लुकि 'यस्येति च' इति अकारलोपे यास्कीया इति रूपमित्यर्थः। **तस्यापत्यम्।** तद्धिता इति, प्रत्ययः, परश्च इति चाधिकृतम्। तच्छब्दः सर्वनामतया बुद्धिस्थपरामर्शित्वादुपग्वादिसर्वविशेषबोधकः, तस्य उपग्वा-

---

तौल्वल्यादिभ्य इति। दैवमित्रि, दैवयज्ञि, श्वाफल्कि, आसुरि, नैमेषि, पौष्करसादि, वैकर्णीत्यादितौल्वल्यादिः। **कात्यायनस्येति।** कतस्य गोत्रापत्य कात्यः। गर्गादित्वाद्यञ्। ततो यूनि 'यञिञोश्च' इति फक्। **कातीया इति।** 'आपत्यस्य च–' इति यलोपः। **तस्यापत्यम्।** 'तस्य' इति न स्वरूपग्रहणम्, किं

---

१ क्वचिद् 'यूनि' इत्येव पाठः। २ 'इत्येव पूर्वेण' इति क्वचित् पाठः।

चारश्च प्रत्यया वा स्युः । उपगोरपत्यमौपगवः । आदिवृद्धिरन्त्योपधावृद्धी बाधते ।

देरपत्यमित्यर्थे तद्धिताः प्रत्ययाः परे भवन्तीति लभ्यते । कस्मात्परे प्रत्यया भवन्तीत्याकाङ्क्षायां 'समर्थानां प्रथमाद्वा' इत्यधिकारात् प्रथमोच्चारितात्समर्थात्तच्छब्दलभ्योपग्वादेरिति लभ्यते । प्रातिपदिकादित्यधिकृतम् । 'घकालतनेषु कालनाम्नः' इति तरप्तमप्तनेषु तद्धितेषु परतः सप्तम्या अलुग्विधानात्सुपस्तद्धितोत्पत्तिज्ञापितत्वात् सुप्शिरस्कात्प्रातिपदिकादिति लभ्यते । सुप् चेह तस्येति प्रथमोच्चारिते पदे उपस्थितत्वात् षष्ठ्येव गृह्यते ततश्च षष्ठ्यन्तादिति फलति । सामर्थ्यं कृतसन्धिकार्यत्वमित्युक्तमेव, तदाह—**षष्ठ्यन्तात्कृतसन्धेरिति** । 'समर्थः पदविधिः' इति परिभाषया लब्धमाह—**समर्थादिति** । विशिष्टैकार्थप्रातिपदिकादित्यर्थः । सुबन्तात्तद्धितोत्पत्त्या तद्धितविधीनां पदविधित्वादिति भावः । **उक्ता इति** । 'प्राग्दीव्यतोऽण्' इत्याद्या औत्सर्गिका इत्यर्थः । **वक्ष्यमाणाश्चेति** । 'अत इञ्' इत्याद्या वैशेषिका इत्यर्थः । **वा स्युरिति** । 'समर्थानां प्रथमाद्वा' इत्यधिकृतत्वादिति भावः । 'अपत्यं पौत्रप्रभृति गोत्रम्' इति उत्तरसूत्रव्याख्यावसरे अपत्यशब्दो व्याख्यास्यते । **औपगव इति** । उपगोरणि आदिवृद्धिः, ओर्गुणः, अवादेशः । अत्र प्रकृत्यैव उपगोर्लाभाद् अपत्यमेव प्रत्ययार्थ इति स्थितिः । ननु उपगु अ इति स्थिते ओर्गुणात्परत्वाद् 'अचो ञ्णिति' इति वृद्धिः स्यात्, ओर्गुणस्य पशव्य इत्यादौ चरितार्थत्वात् । कृते च गुणे अवादेशे सति 'अत उपधायाः' इति वृद्धिर्दुर्निवारा । त्वष्टुरपत्यं त्वाष्ट्रः, मघवतोऽपत्यं माघवत इत्यादौ गुणाप्रसक्त्या अन्त्योपधावृद्ध्योर्निर्बाधत्वाच्च । न च परत्वादादिवृद्धौ अन्त्योपधावृद्धी बाध्येते इति वाच्यम्, विप्रतिषेधे हि परस्य पूर्वबाधकता, न चेह विप्रतिषेधोऽस्ति, देशभेदेनोभयसम्भवात् । नाप्यन्त्योपधावृद्ध्योरपवाद आदिवृद्धिरिति वक्तुं शक्यम्, सुश्रुतोऽपत्यं सौश्रुत इत्यादौ अन्त्योपधावृद्ध्योरप्राप्तयोरप्यादिवृद्धेः प्रवृत्तेः, तस्मादादिवृद्धिस्थले अन्त्योपधावृद्धी स्यातामित्यत आह—**आदिवृद्धिरिति** । 'अचो ञ्णिति' इत्यन्त्यवृद्धिम् 'अत उपधायाः' इत्युपधावृद्धिं च आदिवृद्धिर्बाधत इत्यर्थः । पुष्करसदोऽपत्यमित्यर्थे बाह्वादित्वादिञ्, 'अनुशतिकादीनां च' इत्युभयोः पदयोरादिवृद्धिः । पुष्करसद्शब्दस्य अनुशतिकादौ

तु षष्ठ्यन्तमात्रोपलक्षणमित्याशयेनाह—**षष्ठ्यन्तादिति** । पञ्चम्यर्थोऽध्याहारलभ्यः । अनुकरणात्पञ्चम्याः सौत्रो लुग्वा । **उक्ता इति** । अणणयादय उक्ताः । **वक्ष्यमाणा इति** । इञादयः । ननु 'उपगु अ' इति स्थिते ओर्गुणात्परत्वाद् 'अचो ञ्णिति' इति वृद्ध्या भाव्यम् । गुणस्तु पिचव्यादौ सावकाशः । कृते च गुणे अवादेशे च 'अत उपधायाः' इति वृद्धया भाव्यमत आह—**आदिवृद्धिरिति** । परत्वादिति भावः ।

तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।

पाठात् । तत्र यद्यादिवृद्धिरन्त्योपधावृद्धी न बाधेत, तदा आदिवृद्धया उपधावृद्धया च पौष्करसादेः सिद्धत्वाद् अनुशतिकादौ पुष्करसच्छब्दपाठोऽनर्थकः स्यात् । अतस्तक्रकौण्डिन्यन्यायात् सत्यपि सम्भवे बाधनं भवति इति विज्ञायत इति भाष्ये स्पष्टम् । **तस्येदमित्यपत्येऽपीत्यादि** । श्लोकवार्तिकमिदम् । तत्र प्रथमचरणस्यायमर्थः—तस्येदमिति विहितः अण् अपत्येऽर्थेऽपि भवति, इदमर्थे तस्याप्यन्तर्भावात् । अतस्तस्यापत्यमित्यणिवधानं व्यर्थमित्याक्षेपः । नच 'अत इञ्' इत्याद्युत्तरसूत्रार्थं 'तस्यापत्यम्' इत्यावश्यकमिति वाच्यम्, एवं हि सति 'तस्यापत्यमत इञ्' इत्येकमेव सूत्रमस्तु । तथा च 'तस्यापत्यम्' इति पृथक्सूत्रकरणं व्यर्थमित्याक्षेपः पर्यवस्यति । अत्र समाधत्ते—**बाधनार्थं कृतं भवेदिति** । 'तस्येदम्' इत्यणं बाधित्वा 'वृद्धाच्छः' इति छः अपत्ये प्राप्तः, तद्बाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रं कृतमि-

---

अन्त्योपधावृद्धयोरवकाशः—गौः, पाचकः । आदिवृद्धेस्तु सुश्रुत् सौश्रुतः । 'त्वाष्ट्रो जागतः' इत्यादौ तूभयप्रसङ्गे परत्वादादिवृद्धिरेव भवति । लक्ष्यानुरोधेनात्र सकृद्गतिन्यायस्यैवाश्रयणात् । अनुशतिकादिषु पुष्करसच्छब्दपाठोऽप्यत्र लिङ्गम् । अन्यथा आद्युपधावृद्धिभ्यां पौष्करसादेः सिद्धत्वात्तेषु पाठोऽनर्थकः स्यात् । न च 'पुष्करसदा चरति' इत्यर्थे ठकि 'पौष्करसादिक' इत्येतदर्थमनुशतिकादिपाठ आवश्यकः, ञिति णित्येव उपधावृद्धेः स्वीकारान्न तु कितीति वाच्यम्, अनभिधानाट्ठगत्र न भवतीत्यादिसमाधानस्य कैयटे स्थितत्वात् । एतेन भिन्नविषये बाध्यबाधकभावो नोपपद्यत इति शङ्का निरस्ता । उक्तज्ञापकेन 'सत्यपि संभवे बाधनं भवति' इत्यवश्याश्रयणीयत्वात् । नन्वेवमपि 'जागतः' इत्यादावुपधावृद्धिर्बाध्यताम्, औपगव इत्यत्र त्वादिवृद्धिप्रवृत्तिवेलायामुपधावृद्धेरप्राप्त्या कथं बाधः स्यादिति चेत् । अत्राहुः—जागत इत्यादावुपधावृद्धेर्बाध्यत्वे निर्णीते क्वचित्कालान्तरप्राप्तया अपि तस्या बाध्यत्वौचित्यादिति । स्यादेतत्—यत्रादिवृद्धिर्न जाता तत्रान्त्योपधालक्षणा वृद्धिः कस्मान्न भवति । व्यसोर्भवो वैयसवम् । 'इगन्ताच्च' इत्यण् । व्यापदि भवं वैयापदम् । 'तत्र भवः' इत्यण् । अत्र कैयटः—तत्राप्यैचौ परत्वात्तद्बाधकाविति सर्वेष्टसिद्धिरिति । शाब्दबोधवैलक्षण्यसत्त्वेऽपि तदनादरेणाक्षिपति—**तस्येदमित्यपत्येऽपीति** । इदमर्थे अपत्यसमूहविकारादीनामन्तर्भावादपत्येऽपि 'तस्येदम्' इत्यण् प्रवर्तत इति किमनेन 'तस्यापत्यम्' इति सूत्रेणेत्यर्थः । यद्यपि 'अत इञ्' इत्याद्यर्थं 'तस्यापत्यम्' इत्येतद्वक्तव्यम् । तथापि योगविभागः किमर्थं इत्याक्षेपोऽत्र बोध्यः । समाधत्ते—**बाधनार्थमिति** । 'तस्येदम्' इत्यस्य यद्बाधकं 'वृद्धाच्छः' इति तद्बाधनार्थं पृथक् सूत्रं कृतं भवेदित्यर्थः । ननु

उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥

(वा २५८१—२५८४) योगविभागस्तु—भानोरपत्यं भानवः। कृतसन्धेः किम्—सौस्थितिः, अकृतव्यूहपरिभाषया सानुस्थितिर्मा भूत्। समर्थपरि-

---

त्यर्थः। ननु 'वृद्धाच्छः' इति सूत्रं शेषाधिकारस्थम्' अपत्यादिचतुरर्थ्यन्तेभ्योऽन्यः शेषः। तथा च अपत्यार्थस्य शेषाधिकारस्थत्वाभावात् तस्मात्तत्र छप्रत्ययस्याप्रसक्तेस्तद्बाधनार्थत्वं 'तस्यापत्यम्' इत्यस्य कथमित्यत आह—**उत्सर्गः शेष एवासाविति**। उत्सृज्यते अदन्त-बाह्वादिप्रकृतिभ्यो वियुज्यत इत्युत्सर्गः। कर्मणि घञ्। अदन्त-बाह्वादिभिन्नप्रकृतिसम्बद्धः अपत्यार्थोऽसौ शेषो भवत्येवेत्यर्थः। आक्षेप्तुर्हि 'तस्यापत्यमत इञ्' इत्येकसूत्रमभिमतम्। विनियुक्तादन्यः शेषः। अदन्त-बाह्वादिप्रकृतिसंयुक्तापत्यार्थ एव विनियुक्तः। न तु तद्भिन्नप्रकृतिसंयुक्तापत्यार्थोऽपि। ततश्च तस्य शेषत्वात्तस्मिन्नपत्ये छस्य प्रसक्तत्वात् तद्बाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रम्। सति चास्मिन् पृथक्सूत्रे प्रकृतिसामान्यसंयुक्तापत्यार्थस्योपयुक्तत्वादशेषत्वाच्छस्य न प्राप्तिरित्यप्राप्तिसम्पादनद्वारा छबाधकत्वं 'तस्यापत्यम्' इति पृथक्सूत्रस्य सिद्धम्। अयमप्राप्तबाध इत्युच्यते। नन्वेवमपि उपगोरपत्यमित्यत्र उपगोरवृद्धत्वाच् छस्य नैव प्रसक्तिरिति किं पृथक्सूत्रेणेत्यत आह—**वृद्धान्यस्य प्रयोजनमिति**। भानोरपत्यं भानव इत्यादौ यानि भान्वादिप्रातिपदिकानि वृद्धानि, यानि उपग्वादिप्रातिपदिकानि नामधेयत्वाद् वृद्धानि, तेभ्यश्छप्रत्ययबाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रमित्यर्थः। ननु 'तस्येदम्' इत्यणि इदन्त्वेन बोधः। 'तस्यापत्यम्' इत्यणि तु अपत्यत्वेन बोध इति शाब्दबोधे वैलक्षण्यसत्त्वात्, 'तस्येदमित्यपत्येऽपि' इत्याक्षेप एवायमनुपपन्न इति चेद् न—एतद्वार्तिकभाष्यप्रामाण्येन 'तस्येदम्' इति इदंशब्देन अपत्यस्य इदंत्वेन ग्रहणाभावविज्ञानात्। 'प्रदीयतां दाशरथाय मैथिली' इति त्वार्षत्वान्न दुष्यतीत्यास्तां तावत्। **कृतसन्धेः किमिति**। 'समर्थानां प्रथमाद्वा' इत्यधिकारसूत्रस्थ-

---

'तस्येदम्' इत्यणस्तदपवादस्य वृद्धाच्छस्य च शैषिकत्वादपत्यार्थे प्रसक्तिरेव नास्ति, 'अपत्यादिचतुरर्थीपर्यन्तेभ्यो योऽन्योऽर्थः स शेषः' इत्यभ्युपगमादत आह—**उत्सर्गः शेष एवासाविति**। असौ अपत्यार्थः। अयं भावः—असति योगविभागे अदन्तबाह्वादिप्रकृतिसंबद्धस्यैवापत्यार्थस्योपयोगादुपग्वादिप्रकृतिसंबद्धोऽपत्यार्थः शेष एव स्यात्। तथा चाणं बाधित्वा भान्वादिभ्यो वृद्धाच्छः प्रसज्येत। योगविभागे तु कृते प्रकृतिसामान्यसंबन्धस्याप्यपत्यार्थस्योपयोगाच्छेषत्वाभावेन छस्य प्राप्तिरेव नास्तीति। ननु उपग्वादेरवृद्धत्वेन छस्य प्रसक्त्यभावान्निष्फलो योगविभाग इत्यत

---

१ 'अदन्तबाह्वादिप्रकृति–' इति क।

भाषया नेह—वस्त्रमुपगोरपत्यं चैत्रस्य । प्रथमात् किम्–अपत्यवाचकात्षष्ठ्यर्थे

समर्थग्रहणलब्धं कृतसन्धेरित्येतत् किमर्थमिति प्रश्नः । **सौत्थितिरिति** । सु शोभन उत्थितः सूत्थितः। प्रादिसमासे सवर्णदीर्घः सूत्थितस्यापत्यं सौत्थितिः, अत इञ्, सुप्लुक्, आदिवृद्धिः, 'यस्येति च' इत्यकारलोपः। कृतसन्धेरित्यभावे तु सु उत्थित इत्यस्यामेव दशायां सवर्णदीर्घात्परत्वादादिवृद्धौ कृतायामावादेशे सावुत्थिति-रिति स्यादिति भावः। नन्वन्तरङ्गत्वात्सवर्णदीर्घे कृते तदुत्तरमेव इञ्प्रत्यय उचितः, परादन्तरङ्गस्य बलवत्त्वात् । ततश्च सन्धेः प्राक् तद्धितोत्पत्तेरप्रसक्तेः कृतसन्धेरिति व्यर्थमेवेत्यत आह—**अकृतेति** । अन्तरङ्गपरिभाषाया अप्यपवादभूतया अकृतव्यूह-परिभाषया सन्धेः प्रागेव प्रत्ययः स्यात् । ततश्च आदिवृद्ध्यपेक्षया अन्तरङ्गोऽपि सवर्णदीर्घः अकृतव्यूहपरिभाषया आदिवृद्धेः प्राङ् न प्रवर्तते । एवं च सवर्णदीर्घा-त्प्रागेवादिवृद्धौ आवादेशे सावुत्थितिरिति स्यादित्यर्थः । नच इञि सति कृते सवर्णदीर्घे ऊकारस्य जायमानया वृद्ध्या सवर्णदीर्घनिमित्तस्य कस्यचिद्विनाशाभावादकृतव्यूह-परिभाषायाः कथमिह प्रवृत्तिरिति वाच्यम्, यदि सवर्णदीर्घो न स्यात्तदा सु उत्थित इत्यवस्थायां सकारादुकारस्य वृद्ध्या औकारे सति सवर्णदीर्घनिमित्तस्य अको विनाशः स्यादिति सम्भावनया अकृतव्यूहपरिभाषायाः प्रवृत्तेरिति कथञ्चिद्योज्यम् । वस्तुतस्तु अकृतव्यूहपरिभाषा नास्त्येव, भाष्ये क्वाप्यव्यवहृतत्वात्, प्रत्युत भाष्यविरुद्धत्वाच्च । 'विप्रतिषेधे परं कार्यम्' इति सूत्रभाष्ये हि परादन्तरङ्गं बलीयः इत्युक्त्वा सौत्थितिरित्यत्र परामप्यादिवृद्धिं बाधित्वा अन्तरङ्ग एकादेश इत्युक्तम् । पदस्य विभज्यान्वाख्याने सु उत्थित इति स्थिते परत्वाद् वृद्धिः प्राप्ता, अन्तरङ्गत्वादेकादेश इति कैयटः। अकृतव्यूहपरिभाषासत्त्वे तदसंगतिः स्पष्टैव । सेदुष इत्यादौ अकृतव्यूह-परिभाषाफलस्यान्यथासिद्धिस्तु तत्र तत्र प्रपञ्चितैवेत्यास्तां तावत् । विस्तरस्तु शब्देन्दु-शेखरे ज्ञेयः । **वस्त्रमुपगोरपत्यं चैत्रस्येति** । अत्र उपगुशब्दादपत्ये अण् न

आह—**वृद्धानीति** । प्रातिपदिकानीति शेषः । **कृतसंधेः किमिति** । अन्तर-ङ्गत्वात् संधौ कृतायां तदुत्तरमेव प्रत्ययो भविष्यतीत्यधिकारसूत्रस्थं समर्थपदग्रहणं किमर्थमिति प्रश्नः । **अकृतेति** । इयं च परिभाषा समर्थग्रहणेन ज्ञापितेति हरदत्ता-दयः, लोकतः सिद्धेत्यन्ये । **सावुत्थितिर्माभूदिति** । अन्तरङ्गपरिभाषाया अप-वादभूतया 'अकृत–' इत्यनया अकृतसंधेरेव प्रत्ययः स्यात् । तन्निवारणाय समर्थ-ग्रहणमधिकारसूत्रस्थमावश्यकमिति भावः । यद्यपि तत्र 'सामर्थ्यं परिनिष्ठितत्वम्' इत्यविशेषेणोक्तम्, तथापि ङ्याप्प्रातिपदिकांशे एव परिनिष्ठितत्वं न तु सुब्विशिष्टे इत्य-वधेयम् । तेन औपगवः दरिद्रमानित्यादि सिद्धम् । अन्यथा 'औपगवदरिद्रमान्'

मा भूत् । वाग्रहणाद्वाक्यमपि । 'दैवयज्ञि-' (सू० १२०१) इति सूत्राद् 'अन्यतरस्यां' ग्रहणानुवृत्तेः समासोऽपि। उपग्वपत्यम्। जातित्वान्ङीष्–औपगवी।

भवति, उपगोर्वस्त्रेणैवान्वयात्। यद्यपि तत्सम्बन्ध्यपत्ये प्रत्ययविधानाद् इह च अपत्यस्य तच्छब्दवाच्योपगुसम्बन्धाभावादेव अत्र प्रत्ययस्य न प्रसक्तिः । तथापि ऋद्धस्य औपगवमित्यादिवारणाय सामर्थ्यमेकार्थीभावलक्षणमाश्रयणीयमिति भावः । **अपत्यवाचकादिति** । उपगुरपत्यमस्य देवदत्तस्येत्यर्थे औपगवो देवदत्त इति माभूदित्यर्थः । प्रथमादित्युक्तौ तु 'तस्यापत्यम्' इति सूत्रे षष्ठ्यन्तस्यैव प्रथमोच्चारितत्वादुपगुरिति प्रथमान्ताद् न भवतीत्यर्थः । **वाग्रहणाद्वाक्यमपीति** । वाग्रहणाभावे हि तद्धितस्य नित्यत्वादुपगोरपत्यमिति वाक्यं न स्यादिति भावः । ननु उपग्वपत्यमिति कथं षष्ठीसमासः, तद्धितानां समासापवादत्वात् । न च तद्धितानां पाक्षिकत्वात्तदभावपक्षे षष्ठीसमासो निर्बाध इति वाच्यम्, 'अपवादेन मुक्ते उत्सर्गो न प्रवर्तते' इति 'पारे मध्ये षष्ठ्या वा' इति वाग्रहणेन ज्ञापितत्वादित्यत आह—**दैवयज्ञीति** ।

इत्यादि स्यात् 'अश्विमानण्' इत्यादिनिर्देशश्चेह लिङ्गम्। यदि तु पामादिगणे 'विष्वगित्युत्तरपदलोपश्च' इत्यत्राकृतसंधिग्रहणेन 'परिनिष्ठितात्तद्धितोत्पत्तिः' इत्यभ्युपगम्यते तर्हि व्यर्थमेव समर्थग्रहणमित्याहुः। **प्रथमात्किमिति** । 'तस्यापत्यम्' इत्यत्र निर्दिष्टपदद्वयमध्ये प्राथमिकमेव प्रकृतिसमर्थकम्, न त्वपत्यम् । तथा च प्रकृत्याकाङ्क्षायां तदेव ग्रहीष्यत इति किं तेन 'प्रथमात्' इत्यनेनेति प्रश्नः । **अपत्यवाचकादिति** । 'तस्यापत्यम्' इत्यादिना विहितः प्रत्ययो यथा षष्ठ्यन्तोपग्वादिशब्दादभ्युपगम्यते, तथा अपत्यवाचकदेवदत्तादिशब्दात्प्रत्ययो भवत्विति शङ्का स्यात्, तद्वारणार्थं प्रथमाद्ग्रहणमावश्यकमिति भावः । ननु 'उपगोरपत्यम्' इति विग्रहवाक्येऽपत्यवाचकस्याप्राथम्येऽपि 'अपत्यमुपगोः' इति वाक्ये प्राथम्यात्स्यादेवापत्यवाचकात्प्रत्यय इति चेत्। मैवम्। लक्षणापेक्षं प्राथम्यं नियतत्वादत्राश्रीयते, न तु विग्रहापेक्षमनियतम्। अन्यथा 'प्रथमात्' इत्येतन्निरर्थकं स्यादिति। **षष्ठ्यर्थे माभूदिति** । अयमर्थः—यथा इन्द्रो देवता अस्य हविष इति ऐन्द्रं हविरिति प्रथमान्तात्प्रत्ययो भवति तथा उपगुरपत्यमस्य देवदत्तस्य 'औपगवो देवदत्तः' देवदत्तोऽपत्यमस्योपगोः दैवदत्तिरुपगुः' इति माभूदिति। एतच्च कैयटे स्पष्टम्। नन्वपवादत्वात्तद्धितः समासं नित्यं बाधेत । न च तद्धितस्य वैकल्पिकत्वात्पक्षे सोऽपि भविष्यतीति वाच्यम्। 'यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते, तत्रापवादेन विनिर्मुक्ते उत्सर्गो न प्रवर्तते' इति 'पारेमध्ये-' इत्यत्र वाग्रहणेन ज्ञापितत्वादित्याशङ्क्याह— **अन्यतरस्यांग्रहणानुवृत्तेरिति । जातित्वादिति** । 'गोत्रं च चरणैः सह'

आश्वपतः। दैत्यः। औत्सः। स्त्रैणः। पौंस्नः। १०८६ **अपत्यं पौत्रप्रभृति गोत्रम्।** (४-१-१६२) अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्।

सूत्रादिति। **जातित्वादिति।** अपत्यार्थकाणन्तस्य औपगवशब्दस्य 'गोत्रं च चरणैः सह' इति जातित्वाद् ङीषित्यर्थः। **आश्वपत इति।** अश्वपतेरपत्यमिति विग्रहः। पत्युत्तरपदलक्षणं ण्यं बाधित्वा 'अश्वपत्यादिभ्यश्च' इत्यणिति भावः। **दैत्य इति।** दितेरपत्यमिति विग्रहः। 'दित्यदिति-' इति ण्यः अणपवादः। **औत्स इति।** उत्सः कश्चित्, तस्यापत्यमिति विग्रहः। 'उत्सादिभ्योऽञ्' इत्यञ् इञाद्यपवादः। स्वरे विशेषः। **स्त्रैणः पौंस्न इति।** स्त्रिया अपत्यम्, पुंसोऽपत्यमिति विग्रहः। 'स्त्रीपुंसाभ्याम्-' इति नञ्स्नञौ अणोऽपवादः। **अपत्यम्।** अपत्याधिकारात् सिद्धे पुनरपत्यग्रहणं व्यर्थमित्यत आह—**अपत्यत्वेन विवक्षितमिति।** एवं च पौत्रत्वादिना विवक्षितानां पौत्रादीनां न गोत्रसंज्ञेति भावः। 'सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ।' इति कोशतः गोत्रशब्दस्य सन्ततिवाचकत्वात् पुत्रस्यापि गोत्रत्वे प्राप्ते पौत्रादिग्रहणादिह शास्त्रे पुत्रस्य न गोत्रत्वम्। ननु आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे।' इत्यादिकोशाद् अपत्यशब्दस्य पुत्र एव रूढत्वात् कथम् 'अपत्यं पौत्रप्रभृति-' इति सामानाधिकरण्यमिति चेत्, मैवम्—अपत्यशब्दो हि नात्मजपर्यायः, किंतु पुत्रपौत्रादिसंततिपर्यायः, न पतन्ति नरके पितरो येन तदपत्यमिति 'पङ्क्तिविंशति-'

इत्यनेनेति शेषः। प्राचा तु 'अणन्तत्वान्ङीप्' इत्युक्तम्। तद्व्याख्यातृभिश्च 'टिड्ढाणञ्-' इत्यनेनेत्युक्तम्। तदुभयमपि 'गोत्राद्यून्यस्त्रियाम्' इति सूत्रस्थभाष्यानुरोधेन। गोत्रं च चरणैः-' इत्यत्र कृत्रिमं गोत्रमेव गृह्यते न त्वपत्यमात्रमित्याशयेन प्रवृत्तमिति बोध्यमित्याहुः। सूत्रस्थान्महोत्सर्गान्क्रमेणोदाहरति—**आश्वपत इत्यादि।** **औत्स इति।** 'उत्सः प्रस्रवणं वारि प्रवाहो निर्झरो झरः' इत्यमरः। तस्य चापत्येन योगस्तु 'गाङ्गेयो भीष्मः' इतिवत्। **अपत्यं पौत्र।** नन्वपत्यग्रहणं व्यर्थं पौत्रादेरपत्यत्वाव्यभिचारादित्यत आह—**अपत्यत्वेन विवक्षितमिति।** विवक्षितमिति किम्, वस्तुतः पौत्रप्रभृत्येव यदा शेषत्वेन विवक्ष्यते 'गर्गस्येदम्' इति, तदा मा भूदित्याहुः। अन्ये तु वस्तुतः पौत्रादीनामेव तत्त्वेन विवक्षायां संज्ञा मा भूत्, **अपत्यत्वेन** विवक्षायामेव यथा स्यादित्येवमर्थं तत्। तेन औपगव इत्यादावप्यणर्थस्य गोत्रसंज्ञा सिद्ध्यति। नह्यणः पौत्रत्वादिकं शक्यतावच्छेदकं किं त्वपत्यत्वमेव। अन्यथा गोत्राधिकारस्थयञाद्यर्थस्यैव गोत्रसंज्ञा स्यादिति। नन्वपत्याधिकारे गोत्रयुवसंज्ञाकरणसामर्थ्यादपत्यमिति लभ्यत एवेति तेनैवोक्तप्रयोजनसिद्धौ किमनेनात्रापत्यग्रहणेनेति

१०६० जीवति तु वंश्ये युवा । (४-१-६३) वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव, न तु गोत्रसंज्ञम् । १०६१ भ्रातरि च

इति सूत्रे भाष्ये व्युत्पादितत्वात् । तथा च पौत्रादयोऽपि पितामहादीनां नरकादुद्धर्तार इति तेषामप्यपत्यत्वमस्त्येवेति 'एको गोत्रे' इति सूत्रभाष्ये स्पष्टम् । एतच्च महाभारतादौ जरत्कार्वाद्युपाख्यानेषु प्रसिद्धमेव । कोशस्तु सूत्रभाष्यादिविरुद्धत्वाद् उपेक्ष्य एव । न चैवमपि गर्गस्य पुत्रोऽपि अङ्गिरसः पौत्रत्वाद्गोत्रं स्यादिति वाच्यम्, यस्य यः पौत्रादिः तस्य तद्गोत्रमिति व्याख्यानादित्यलम् । **जीवति** । वंश उत्पादकपित्रादिपरम्परा, तत्र भवो वंश्यः, दिगादित्वाद्यत्, तदाह—**वंश्ये पित्रादौ जीवतीति** । जीवतीति सप्तम्यन्तम् । **पौत्रादेरिति** । पूर्वसूत्रात्पौत्रप्रभृति इत्यनुवृत्तं षष्ठ्या विपरिणम्यत इति भावः । **यदपत्यमिति** । 'तस्यापत्यम्' इत्यतस्तदनुवृत्तेरिति भावः । तुरवधारणे युवेत्यनन्तरं द्रष्टव्यः, तदाह—**युवसंज्ञमेवेति** । तेन एकसंज्ञाधिकारबहिर्भावेऽपि गोत्रसंज्ञाया अपि अस्मिन् न समावेश इति भावः । युवसंज्ञया सह गोत्रसंज्ञायाः समावेशे तु शालङ्का इति पैलीया इति च न स्यात् । शलङ्कुः कश्चित्, तस्य गोत्रापत्यं शालङ्किः, इञ् । पैलादिगणे शालङ्कीति पाठात् प्रकृतेः शलङ्कादेशश्च । शालङ्केरपत्यं युवापि शालङ्किरेव । 'यञिञोश्च' इति फक् । 'पैलादिभ्यश्च' इति तस्य

चेत् । अत्राहुः—'ते तद्राजाः' इत्यत्र तच्छब्देन 'जनपदशब्दात् क्षत्रियादञ्' इत्यादिना विहिता ये अञादयस्त एव गृह्यन्ते न तु ततः प्राक्तनप्रत्ययाः, गोत्रयुवसंज्ञाकाण्डेन विच्छिन्नत्वादिति वक्ष्यते । तथा चापत्याधिकारपठनसामर्थ्यस्योपक्षयादपत्यस्यासम्बन्धशङ्कानिराकरणाय पुनरपत्यग्रहणमिह कृतमिति । पौत्रप्रभृतीति किम्, अनन्तरापत्ये मा भूत् । कौञ्जिः, गार्गिः । न चैवमप्यङ्गिरसः पौत्रे गर्गस्यानन्तरे अतिप्रसङ्ग इति वाच्यम् । 'यस्य पौत्रादि तं प्रत्येव गोत्रसंज्ञा' इति स्वीकारात् । एवं च गार्गिं प्रत्यनन्तरापत्यत्वेन विवक्षायामपि गर्गं प्रति गोत्रत्वं निष्प्रत्यूहमिति स्यादेव गर्गाद्यञिति दिक् । **जीवति तु वंश्ये** । पितृपितामहाद्युत्पादकप्रबन्धो वंशः, तत्र भवो वंश्यः । दिगादित्वाद्यत् । 'पौत्रप्रभृति' इत्यनुवृत्तं षष्ठ्या विपरिणम्यते व्याख्यानात्, 'गोत्राद्यून्यस्त्रियाम्' इति लिङ्गाच्चेत्याह—**पौत्रादेरिति** । तुशब्दो भिन्नक्रमो युवेत्यस्मात्परो बोध्यः । स च एवकारार्थ इति व्याचष्टे—**युवसंज्ञमेवेति** । तेन एकसंज्ञाधिकारबहिर्भूतयोरपि गोत्रयुवसंज्ञयोर्न समावेश इति भावः । नन्वस्तु संज्ञाद्वयस्य समावेशः को दोष इति चेत् । मैवम् । शालङ्काः पैलीया इत्यसिद्धिप्रसङ्गात् । तथा हि । शलङ्कोरपत्यं शलङ्किः । पैलादिषु पाठादिञ्शलङ्कादेशौ । शालङ्केरपत्यम् । शालङ्केर्युवापत्यं 'यञिञोश्च' इति फक्, तस्य 'पैलादिभ्यश्च' इति लुक्, ततः शाल-

ज्यायसि। (४-१-१६४) ज्येष्ठे भ्रातरि जीवति कनीयांश्चतुर्थादिर्युवसंज्ञश्च स्यात्। १०६२ **वान्यस्मिन्सपिण्डे स्थविरतरे जीवति।** (४-१-१६५) भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा स्यात्। एकं जीवतिग्रहणमपत्यस्य विशेषणम्, द्वितीयं सपिण्डस्य। तरब्निर्देश

लुक्। शालङ्केर्यूनश्छात्रा इत्यर्थे 'इञश्च' इत्यणि शालङ्का इति रूपम्। तथा पीलाया गोत्रापत्यं पैलः। 'पीलाया वा' इत्यण्। पैलस्यापत्यं युवापि पैल एव। 'अणो द्व्यचः' इति फिञ्, 'पैलादिभ्यश्च' इति तस्य लुक्। पैलस्य यूनश्छात्रा इत्यर्थे वृद्धाच्छः। पैलीया इति रूपम्। युवगोत्रसंज्ञयोः समावेशे तु 'गोत्रेऽलुगचि' इति फक्फिञोरलुक् प्रसज्येतेत्यलम्। **भ्रातरि च ज्यायसि।** जीवतीत्यनुवर्तते। तदाह—**ज्येष्ठे भ्रातरि जीवति कनीयानिति।** अनुज इत्यर्थः। पौत्रप्रभृतीत्यनुवृत्तं षष्ठ्या विपरिणम्यते। अपत्यमित्यधिकृतम्। पौत्रादिरपत्यमित्यर्थः। फलितमाह—**चतुर्थादिरिति।** मृतेष्वपि पित्रादिषु ज्येष्ठे भ्रातरि जीवति युवसंज्ञार्थमिदम्। **वाऽन्यस्मिन्।** शेषपूरणेन सूत्रं व्याचष्टे—**पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा स्यादिति।** सपिण्डास्तु स्वयम्, पिता, पितामहः प्रपितामहः, तस्य पितृपितामहप्रपितामहाश्चेति सप्त पुरुषाः। एवं मातृवंशेऽपीत्यादि धर्मशास्त्रेषु प्रसिद्धम्। स्थविरतरः अतिवृद्धः। जीवतीति सप्तम्यन्तमनुवृत्तं सपिण्डे इति सप्तम्यन्तेऽन्वेति। अत्रत्यं तु

ङ्केर्यूनश्छात्रा इत्यर्थविवक्षायाम् 'इञश्च' इत्यणि शालङ्का इति भवति। तथा पीलाया अपत्यं गोत्रापत्यं वा 'पीलाया वा' इत्यणि पैलः। तस्यापत्यं युवा 'अणो द्व्यचः' इति फिञ्। तस्य 'पैलादिभ्यश्च' इति लुक्। ततः पैलस्य यूनश्छात्राः पैलीया इति भवति। तत्र गोत्रयूनोः समावेशे तु 'गोत्रे लुगचि' इति फक्फिञोरलुक् प्रसज्येत। न च परत्वाद्यूनि लुग्भविष्यतीति सिद्धमिष्टमिति वाच्यम्। ततोऽपि परत्वात् 'फक्फिञोरन्यतरस्याम्' इति विकल्पापत्तेः। न च सिद्धान्तेऽपि विकल्पः शङ्क्यः, 'फक्फिञोः' इत्ययं हि यूनि लुक एवापवादः, न तु 'पैलादिभ्यश्च' इत्यस्य, 'अनन्तरस्य–' इति न्यायात्। यद्यपि यूनि लुगपवादोऽपि 'फक्फिञोः–' इति विकल्पः परत्वात् 'पैलादिभ्यश्च' इति लुकमपि बाधेतेति वक्तुं शक्यम्, तथापि परादप्यन्तरङ्गस्य बलीयस्त्वात् 'पैलादिभ्यश्च' इति नित्य एव लुगित्याहुः। **भ्रातरि च।** अवंश्यार्थोऽयमारम्भः। भ्राता तु न वंश्यः 'उत्पादकप्रबन्धो वंशः' इत्यभ्युपगमात्। 'अपत्यं पौत्रप्रभृति–' इत्यनुवर्त्य 'पौत्रप्रभृतेः' इति षष्ठ्या विपरिणम्य व्याख्यानात्फलितमाह—**चतुर्थादिरिति।** अत्रायमर्थः—गर्गादिषु मृतेष्वपि जीवत्यग्रजे अनुजो युवसंज्ञक इति। **वान्यस्मिन्।** इहत्यं जीवतिपदं तिङन्तम्, न तु सप्तम्यन्तमिति व्याचष्टे—**जीवदे**

उभयोरुत्कर्षार्थः। १स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति। गार्ग्यस्यापत्यं गार्ग्यायणः गार्ग्यो वा। स्थविर इति किम्-स्थानवयोन्यूने गार्ग्य एव। जीवति इति किम्-मृते मृतो वा गार्ग्य एव। 'वृद्धस्य च पूजायामिति वाच्यम्' (वा २६५४) गोत्रस्यैव वृद्धसंज्ञा प्राचाम्। गोत्रस्य युवसंज्ञा पूजायां गम्यमानायाम्। तत्रभवान्गार्ग्यायणः। पूजा इति किम्-गार्ग्यः। 'यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम्' (वा २६५१)। गार्ग्यो जाल्मः। कुत्सा

जीवतिपदं तिङन्तम् अपत्येऽन्वेति—यदपत्यं जीवति तद्युवसंज्ञकमिति। ततश्च भ्रातुरन्यस्मिन्वृद्धतमे सपिण्डे जीवति सति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा स्यादिति फलितम्। **एकमिति**। अन्यतमित्यर्थः। **द्वितीयमिति**। अनुवर्तमानमित्यर्थः। **उभयोरिति**। हेतुत्वसम्बन्धे षष्ठी। उभयहेतुकोत्कर्षवाचकस्तरबित्यर्थः। तदेव विवृणोति—**स्थानेन वयसा चेति**। स्थानत उत्कृष्टः पितृव्यः, तस्य पितृस्थानीयत्वात्। वयसा उत्कृष्टो मातामहः। भ्रातरीति संनिहितत्वान्मातामहभ्रातरीत्यर्थ इति केचित्। *पितृव्यपुत्र इत्यन्ये*। ***जीवतीति किमिति***। *जीवतिद्वयस्य* किं प्रयोजनमिति प्रश्नः। **मृते मृतो वा गार्ग्य एवेति**। मृते सपिण्डे चतुर्थो गार्ग्य एव। मृतश्च चतुर्थो गार्ग्य एवेत्यर्थः। **वृद्धस्य चेति**। वार्तिकमिदम्। तत्र वृद्धपदं विवृणोति--**गोत्रस्यैव वृद्धसंज्ञा प्राचामिति**। गोत्रमेव वृद्धमिति प्राचीनाचार्या व्यवहरन्तीत्यर्थः। तथाच वार्तिकस्य फलितमर्थमाह—**गोत्रस्य युवसंज्ञा पूजायां गम्यमानायामिति**। उदाहरति—**तत्रभवान् गार्ग्यायण इति**। तत्रभवानिति पूज्यवाची, युवसंज्ञकानामल्पवयस्कत्वेन वृद्धाधीनत्वेन सुखितया च पूजा। तां गोत्रप्रभृतिस्तृतीयोऽपि मन्यते। अत्र युवसंज्ञाविधिसामर्थ्यात्स्वार्थे युवप्रत्ययो बोध्यः। **गार्ग्यो जाल्म इति**। यो वृद्धाननादृत्य स्वातन्त्र्यं भजते तद्वि-

---

वेति। यो जीवति स युवसंज्ञकः, मृतस्तु स्थविरतरे जीवत्यपि गार्ग्य एव भवति, न तु गार्ग्यायण इति भावः। **एकमिति**। इहत्यमित्यर्थः। **द्वितीयमिति**। अनुवर्तमानं सप्तम्यन्तमित्यर्थः। यदुक्तमुभयोरिति तदेव विवृणोति—**स्थानेन वयसा चेति**। **मातामहे भ्रातरि वेति**। संनिहितत्वात् 'भ्रातरि' इत्यस्य 'मातामहभ्रातरि' इत्येवार्थ इत्येके। 'पितृव्यपुत्रे' इत्यन्ये। वृत्तौ तु 'पितृव्ये पितामहे भ्रातरि वा' इति पाठः। **जीवतीति किमिति**। जीवतिद्वयं किमर्थमिति प्रश्नः। अतएव 'मृते मृतो वा' इत्युत्तरं संगच्छते। अन्यस्मिन् किम्, भ्रातरि जीवति जीवतो विकल्पो मा भूत्। पूर्वसूत्रं तु भ्रातरि जीवति मृतस्य कनीयसो युवसंज्ञार्थमिति सावकाशम्। **वृद्धस्य चेति**। वार्तिकमिदम्। तथा 'यूनश्च' इत्यग्रिममपि।

इति किम्—गार्ग्यायणः। **१०६३ एको गोत्रे। (४-१-९३)** गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यमौपगवः। गार्ग्यः। नाडायनः।

षयमिदम्। **एको गोत्रे**। संख्याविशेषोपादाने तदितरसंख्याव्यवच्छेदस्य स्वभावसिद्धत्वाद् एक एवेति गम्यते। अपत्याधिकारात्प्रत्ययाधिकाराच्च अपत्यप्रत्यय इति तद्विशेष्यलाभः। तदाह—**गोत्रे एक एवापत्यप्रत्ययः स्यादिति। औपगव इति**। उपगोर्गोत्रापत्ये 'तस्यापत्यम्' इत्यण्। **गार्ग्य इति**। गर्गस्य गोत्रापत्ये गर्गादिभ्य इति यञ्। **नाडायन इति**। नडस्य गोत्रापत्ये 'नडादिभ्यः—' इति फक्। गोत्र एक एव प्रत्ययः स्यादित्येवोक्तौ तु अनन्तरापत्यप्रत्ययान्तादौपगवशब्दादिञ्प्रत्ययो न निवार्येत। नियमस्य सजातीयविषयतया गोत्रप्रत्ययान्तादेव गोत्रप्रत्ययो वार्येत। अतोऽपत्यग्रहणमित्याहुः। नन्वेकस्मिन्गोत्रे युगपदनेकप्रत्ययाप्रसक्तेर्व्यर्थमिदं सूत्रमिति चेत्, मैवम्—अपत्यशब्दो हि पुत्र एव रूढ इत्येकः पक्षः। पुत्रादिसाधारण इत्यन्यः पक्ष इति प्रकृतसूत्रभाष्ये स्थितम्। तदेतद् 'अपत्यं पौत्रप्रभृति—' इति सूत्रव्याख्यावसरे प्रपञ्चितं चास्माभिः। तत्र प्रथमपक्षे उपगोः पौत्रे अपत्यप्रत्ययेन बुबोधयिषिते सति तस्य उपगुपुत्रापत्यस्य उपगुं प्रत्यपत्यत्वाभावात् 'तस्यापत्यम्' इत्यण् न संभवति। ततश्च उपगुपुत्रे वाच्ये 'तस्यापत्यम्' इत्यणा

एको गोत्रे। 'गोत्रे' इति जात्यपेक्षया एकवचनम्। एकशब्दः संख्यावाची। 'गोत्रेऽभिधित्सिते अपत्यत्वबोधकप्रत्यय एक एव स्यात्' इत्युक्तेः। गोत्रापत्ये प्रथम एव शब्दः प्रत्ययं लभते नान्यः। यदि त्वनन्तरापत्यप्रत्ययान्तादपि प्रत्ययः स्यात्, तर्हि गोत्रापत्ये एक एव प्रत्ययो न कृतः स्यात्। इत्थं च 'अपत्यप्रत्ययान्तात्प्रतिषेधो वाच्यः' इति वार्तिकार्थोऽप्यनेन संगृहीत इत्याशयेन व्याचष्टे—**गोत्रे एक एवेति। अपत्यप्रत्यय इति**। एतच्चाधिकाराल्लब्धम्। अन्ये तु एकशब्दः प्रथमपर्यायः प्रथमश्चापत्यप्रत्ययशून्यः, तथा च 'प्रथमा प्रकृतिर्गोत्रे अपत्यप्रत्ययं लभते' इति सूत्रार्थं व्याचक्षते। तत्क्लिष्टम्। अस्यां पङ्क्तावेकमानय इत्युक्ते 'प्रथमम्' इति प्राथम्यार्थस्याप्रतीतेः। वस्तुतस्तु 'प्रथमादित्यधिकाराद्गोत्रे प्रथमादेव प्रातिपदिकादपत्यप्रत्ययः' इति व्याख्यायैकग्रहणमिह त्यक्तुं शक्यमित्याहुः। **औपगव इति**। 'उपगुशब्द एव प्रत्ययं लभते, न त्वौपगवशब्दः' इति गोत्रापत्येऽप्यनन्तरापत्य इवाणेव भवति, न त्विञ्। **गार्ग्य इति**। गोत्रापत्ये 'गर्गादिभ्यो यञ्' इति विशिष्य विधानादनन्तरापत्य इवात्र 'अत इञ्' न भवति किं तु यञेव। स च गार्ग्यस्यापत्येऽपि भवति, न त्वत्र यञन्तात्फक् 'एको गोत्रे' इति नियमात्। **नाडायन इति**। 'नडादिभ्यः फक्' इति गोत्रापत्ये विधानादत्रापि 'अत इञ्' न भवति, किंतु

औपगवशब्दे व्युत्पादिते सति औपगवस्यापत्ये वस्तुत उपगोस्तृतीये गोत्रे विवक्षिते औपगवशब्दाद् 'अत इञ्' इति इञि औपगविरित्यनेनैव उपगोस्तृतीयो बोधनीयः स्यात्। एवं च उपगोस्तृतीये विवक्षिते उपगोरण् औपगवादिञिति प्रकृतिद्वयात्प्रत्ययद्वयमनिष्टं स्यात्। तत्र यद्यपि उपगोरणिष्टः, तथापि उपगोस्तृतीये विवक्षिते अनिष्टमिञ्प्रत्ययमणप्रत्ययो जनयतीति सोऽप्यनिष्ट एव। तथा च तत्रानिष्टप्रत्ययद्वयनिवृत्तये एको गोत्रे अपत्यप्रत्ययः स्यादित्यनपत्येऽपि उपगोस्तृतीये अपत्यप्रत्ययो विधीयते। स च वस्तुतः अणेव, न त्विञ्, अदन्तत्वाभावात्, विहिते च तस्मिन् औपगवादिञपि निवर्तते, गोत्रे बुबोधयिषिते एकस्यैवापत्यप्रत्ययस्य विधेः। अतः प्रत्ययद्वयमाला निवर्तते। एवमुपगोश्चतुर्थे विवक्षिते तस्य उपगुं तत्पुत्रं च प्रत्यपत्यत्वाभावात् पौत्रं प्रत्येवापत्यत्वादौपगविशब्दाद् 'यञिञोश्च' इति फकि प्रकृतित्रयादनिष्टा औपगवायन इति प्रत्ययत्रयमाला स्यात्। उपगोः पञ्चमे विवक्षिते तु औपगवायनशब्दादिञि औपगवायनिरित्येवं प्रकृतिचतुष्टयात् प्रत्ययचतुष्टयमाला स्यात्। षष्ठे तु औपगवायनिशब्दात् फकि औपगवायनायन इत्येवं प्रकृतिपञ्चकात् पञ्च प्रत्ययाः स्युः। तदेवं फगिञोः परम्परायां मूलप्रकृतेरुपगोः शततमे गोत्रे विवक्षिते एकोनशतात्प्रकृतिभ्य एकोनशतमनिष्टप्रत्ययाः स्युः। अत्र तृतीयप्रभृति कस्मिंश्चिद्गोत्रे विवक्षिते उपगुं प्रत्यनपत्येऽपि तस्मिन् 'एको गोत्रे' इत्यणेव भवति, नतु इञादि। यदा त्वपत्यशब्दः पुत्रपौत्रादिसाधारणः तदा यद्यपि उपगोरनन्तरापत्ये पुत्रे इव पौत्रादिष्वपि 'तस्यापत्यम्' इत्यणि औपगव इतीष्टं सिध्यति। तथापि उपगोरनन्तरापत्ये अणि सति औपगवस्यानन्तरापत्ये उपगोस्तृतीये विवक्षिते प्रत्ययः अनिष्टः प्रसज्येत। एवमुपगोश्चतुर्थे विवक्षिते सिद्धेऽपि उपगोरणि औपगवे, तस्मादिञि औपगविः, तस्मात्फकि औपगवायनः, इत्येवं प्रत्ययत्रयमपि कदाचित्प्रसज्येत। तत्रापि उपगोर्मूलप्रकृतेरणिष्ट एव। इञ्फकौ तु प्रत्ययावनिष्टौ। तथा उपगोश्चतुर्थे विवक्षिते द्वितीयस्मादेकः अनिष्टप्रत्ययः, तृतीयस्मादन्य इत्येवं प्रकृतिद्वयादनिष्टौ द्वौ प्रत्ययाविति पर्यवस्यति। एवं पञ्चमे प्रकृतित्रयात् त्रयः प्रत्ययाः। षष्ठे प्रकृतिचतुष्टयात् चत्वारः प्रत्यया इत्येवं मूलाच्छततमे गोत्रे अष्टनवतेरष्टनवतिरनिष्टप्रत्ययाः स्युः। तत्र 'एको गोत्रे' इति नियमविधिः। गोत्रे एक एव प्रत्ययः स्यादिति। तत्रापि प्रथमातिक्रमे कारणाभावान्मूलप्रकृतेर्यः प्रत्ययः प्राप्तुं योग्यः स एवेति फलति। सूत्रे एकशब्दः प्रथमपर्यायः। 'एके मुख्यान्यकेवलाः' इत्यमरः।

फगेव, स च नाडायनस्यापत्येऽपि भवति न तु फगन्तादिञ्, उक्तनियमात्। नन्वे-

१ इञ्प्रत्ययः इति युक्तं भाति।

'गोत्रे स्वैकोनसंख्यानां प्रत्ययानां परम्परा।
यद्वा स्वद्व्यूनसंख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते॥
अपत्यं पितुरेव स्यात्ततः प्राचामपीति च।

मुखे भवो मुख्यः प्रथमः। 'एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा।' इति कोशान्तरम्। तथा च मूलप्रकृतेरेव गोत्रे विवक्षिते स्वयोग्यप्रत्ययलाभ इति व्याख्यान्तरम्। गोत्रे एकः प्रथम एवशब्दः प्रत्ययोत्पादक इति। तदेतत्सर्वं श्लोकद्वयेन संगृह्णाति—**गोत्रे स्वैकोनेति**। अत्र प्रथमश्लोकान्ते श्रुतं 'प्रसज्यते' इत्येतत्पदं पूर्वार्धे परम्परेत्यनन्तरमपि संबध्यते। अत्र स्वं गोत्रं मूलपुरुषोपगवपेक्षया यत्संख्याकं तदपेक्षया एकोनसंख्याकानाम् अनिष्टप्रत्ययानां परम्परैवोक्तरीत्या प्रसज्येत। ननु कदाचिदपि गोत्रे औपगव इत्यणन्तमिष्टं सिध्यतीत्यर्थः। **यद्वेति**। स्वं गोत्रं तद् मूलपुरुषोपगवपेक्षया यत्संख्याकं तदपेक्षया द्व्यूनसंख्याकप्रकृतिभ्यः तावतां प्रत्ययानामनिष्टानामुत्पत्तिरुक्तरीत्या प्रसज्यत इत्यर्थः। ननु कथमिदं पक्षद्वयमित्यत आह—**अपत्यमित्यादि मतभेदेनेत्यन्तम्**। पुत्र एवापत्यमिति पक्षे प्रथमः पक्ष उन्मिषति। पुत्रपौत्रादिसाधारणोऽपत्यशब्द इति पक्षे तु द्वितीयः पक्ष उन्मिषतीति भावः।

कस्मिन् गोत्रे युगपदनेकप्रत्ययाप्रसक्तेर्व्यर्थमिदं सूत्रमित्याशङ्क्य सूत्रारम्भफलं मतभेदेन व्यवस्थापयति—**गोत्रे स्वैकोनेति**। 'स्वं गोत्रं तदपेक्षया एकोनसंख्यानां, तृतीये द्वयोः परम्परा, चतुर्थे त्रयाणां, पञ्चमे तु चतुर्णाम्' इत्यादिपरम्परा प्रसज्यत इत्यर्थः। तथाहि—उपगोस्तृतीये अणिञोः परम्परा, चतुर्थे त्वणिञ्फकाम्, पञ्चमे त्वणिञ्फगिञाम्। यद्यप्यत्र 'यस्येति च' इति लोपेनाणादेरसत्त्वात् 'अणिञादीनां परम्परा' इत्युक्तिर्न संगच्छते तथापि 'अणन्तादिञुत्पद्यते इञन्तात्फक्' इत्युत्पत्तिमात्राभिप्रायेण प्रत्ययपरम्पराभिधानं बोध्यम्। **स्वद्व्यूनसंख्येभ्य इति**। स्वं गोत्रं तदपेक्षया द्व्यूनसंख्येभ्यः प्रातिपदिकेभ्यः तृतीये एकस्मादनिष्टोत्पत्तिः, चतुर्थे द्वाभ्यां, पञ्चमे त्रिभ्यः, इत्यादीत्यर्थः। **अपत्यं पितुरेवेति**। तथा चामरः—'आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे' इति। मुख्यमतमाह—**ततः प्राचामिति**। पित्रपेक्षया ये प्राञ्चः पितामहप्रपितामहादयस्तेषामपीत्यर्थः। अत्रायमाशयः—अपत्यशब्दः क्रियानिमित्तो न त्वात्मजपर्यायः। 'न पतन्त्यनेनेत्यपत्यम्' इति व्युत्पत्तेः 'पङ्क्तिविंशति–' इति सूत्रे भाष्यकृता दर्शितत्वात्, बाहुलकात्करणे यत्प्रत्ययः। 'यन्निमित्तं यस्यापतनं तत्तस्यापत्यम्' इति फलितोऽर्थः। तथा च 'पौत्रादिरपि पितामहादीनामपतनहेतुः' इति तेषामपत्यत्वं भवति। प्रसिद्धं च व्यवहितोऽपि पितामहादीनामुद्धर्तेति जरत्कार्वाद्युपाख्यानेषु।

मतभेदेन तद्धान्यै सूत्रमेतत्तथोत्तरम् ॥'

पितुरेवापत्यमिति पक्षे ह्युपगोस्तृतीये वाच्ये औपगवादिञ्स्यात् । चतुर्थे स्वजीवज्ज्येष्ठे मृतवंश्ये वा औपगवेः फक् । इत्थं फगिञोः परम्परायां मूलाच्छततमे गोत्रे एकोनशतं प्रत्ययाः स्युः । पितामहादीनामपीति मुख्यपक्षे तु तृतीये वाच्य उपगोरणा इष्टे सिद्धेऽप्यपत्यणन्तादिञपि स्यात् । ततश्चतुर्थे फगिति फगिञोः

तद्धान्यै इति । तस्य उक्तप्रकाराभ्याम् अनिष्टोत्पादनस्य हानिः निवृत्तिः, तदर्थमिदमित्यर्थः । **तथोत्तरमिति ।** 'गोत्राद्यून्यस्त्रियाम्' इत्युत्तरसूत्रमपि तथा योज्यमित्यर्थः । तत्रापत्यशब्दः पुत्र एव रूढ इति पक्षे अनिष्टं प्रपञ्चयति—**पितुरेवेत्यादिना । औपगवादिञ् स्यादिति ।** 'अत इञ्' इत्यनेनेति शेषः । औपगवादेव इञ् स्यात्, न तु उपगोरणित्यर्थः, तृतीयस्य उपगुं प्रत्यपत्यत्वाभावादिति भावः । चतुर्थे त्वित्यतः पूर्वम् उपगोरिति शेषः । **अजीवज्ज्येष्ठ इति ।** जीवन् ज्येष्ठो यस्येति विग्रहः । जीवति तु ज्येष्ठे चतुर्थस्य 'भ्रातरि च ज्यायसि' इति युवसंज्ञया गोत्रत्वं बाध्येतेति भावः । **मृतवंश्य इति ।** मृतो वंश्यो यस्येति विग्रहः । वंश्ये जीवति तु 'जीवति तु वंश्ये युवा' इति युवसंज्ञया गोत्रत्वं बाध्येतेति भावः । **औपगवेः फगिति ।** 'यञिञोश्च' इत्यनेनेति शेषः । **एकोनेति ।** एकोनशतात्प्रकृतिभ्यः एकोनशतं प्रत्यया अनिष्टाः स्युरित्यर्थः । अथापत्यशब्दः पुत्रपौत्रादिसाधारण इति पक्षे अनिष्टं प्रपञ्चयति—**पितामहादीनामपीति ।** मुख्यपक्षत्वं त्वस्य भाष्ये पूर्वपक्षस्य निराकरणाद् 'अपत्यं पौत्रप्रभृति—' इति सूत्रस्वरसाच्च बोध्यम् । **इष्टे सिद्धेऽपीति ।** तृतीयादीनामप्यपत्यत्वेन तत्र 'तस्यापत्यम्' इत्यणो निर्बाधत्वादिति भावः । **तत इति ।** इञन्तादित्यर्थः । **अष्टनवतेरिति ।** प्रकृतिभ्य

'अपत्यं पौत्रप्रभृति—' इति सूत्रमप्यत्रानुगुणम् । आद्यपक्षे हि 'अपत्यमिवापत्यम्' इति गौणी वृत्तिराश्रयणीया स्यात् । अमरस्तु सूत्रभाष्यादिविरोधादुपेक्ष्य इति । **तद्धान्यै इति ।** आद्यपक्षे प्रत्ययमालानिवृत्तये, अन्त्ये तु स्वन्यूनसंख्येभ्योऽनिष्टोत्पत्तिनिवृत्तये इत्यर्थः । **औपगवादिञ् स्यादिति ।** तृतीयस्य उपगुं प्रति अनपत्यत्वादिति भावः । एवं चासति सूत्रे अस्मिन् पक्षे औपगविरित्यनिष्टमेव स्यात्, औपगव इतीष्टं तु न सिध्यतीति बोध्यम् । **अजीवज्ज्येष्ठे इति ।** जीवज्ज्येष्ठे जीवद्वंश्ये वा युवसंज्ञायां सत्यां गोत्रसंज्ञा नेति भावः । **इष्टे सिद्धेऽपीति ।** अस्मिंश्च पक्षे औपगवस्य यदपत्यं तदुपगोरप्यपत्यमिति उपगोर्यदा प्रत्ययः तदा 'औपगवः' इतीष्टं यद्यपि सिध्यति, तथाप्यौपगविरित्यनिष्टं प्राप्नोतीत्यर्थः । **तत इति ।** इञन्तादित्यर्थः । **फगिञोरिति ।** फगन्तादिञ्, इञन्तात्फक्, तदन्तात्पुनरिञ

परम्परायां शततमे गोत्रेऽष्टनवतेरनिष्टप्रत्ययाः स्युः, अतो नियमार्थमिदं सूत्रम्। एवमुत्तरसूत्रेऽप्यूह्यम्। १०९४ गोत्राद्यून्यस्त्रियाम्। (४-१-९४) यून्य-

---

इति शेषः। **अनिष्टप्रत्ययाः स्युरिति**। अष्टनवतिरिति शेषः। **नियमार्थमिति**। यद्यप्युपगोस्तृतीयादिषु अपत्यप्रत्ययविध्यर्थत्वमेव प्रथमपक्षे, तथापि गर्गात्तृतीयादिषु विवक्षितेषु गोत्रविहितगर्गादियञा गार्ग्यशब्दस्येष्टस्य सिद्धावपि गर्गादिञि ततः फिञित्येवं प्रत्ययपरम्पराप्यनिष्टा प्राप्नोतीति नियमार्थत्वमपि प्रथमपक्षेऽप्यस्य सूत्रस्येति भावः। **एवमुत्तरसूत्रेऽप्यूह्यमिति**। तत्प्रकारस्तु उत्तरसूत्रे एव वक्ष्यते। **गोत्राद्यून्यस्त्रियाम्**। गर्गस्य गोत्रं गार्ग्यः, गर्गस्य तृतीयः। 'गर्गा-

---

इत्यादिपरम्परायां सत्यामित्यर्थः। **नियमार्थमिति**। नन्वाद्यपक्षे तत्तत्पितृवाचकादेव प्रत्ययः, न तु मूलभूतात्स्यात्, अनन्तरापत्ये मुख्यसंबन्धे चरितार्थस्याणादेर्गौणसंबन्धेऽपि प्रवृत्तेरन्याय्यत्वात्। तथा चौपगवापत्येन उपगोर्मुख्यसंबन्धाभावादत्राप्राप्ते विध्यर्थमेवेदं सूत्रम्, न तु नियमार्थमिति औपगवशब्दादपि प्रत्ययो दुर्वार इति चेत्। अत्राहुः—गोत्रे बोधनीये क्रमेणानेकप्रत्ययप्रसङ्गे एक एवापत्यप्रत्ययः स्यादिति सूत्रार्थे कृते औपगवशब्दस्यापत्यप्रत्ययान्तत्वात्पुनरपत्यप्रत्ययस्ततो नोपपद्यते इत्यगत्या परम्परासंबन्धाभ्युपगमेनोपगोरेव तदुत्पत्तिः, न त्वौपगवशब्दादिति सिद्धमिष्टमिति। अत्र केचिद्व्याचक्षते--आद्यपक्षे प्रत्ययपरम्परायां प्राप्तायाम् 'एको गोत्रे' इत्यनेनैकः प्रत्ययो विधीयते। तथा चैको नामैकजातीय इत्यर्थपर्यवसानान्मूलप्रकृतेर्योऽपत्यप्रत्ययोऽणादिस्तज्जातीय एव गोत्रे बोधनीये तत्तत्पितृवाचकाद्भवति 'अणन्तादण्, इञन्तादिञ्, यञन्ताद्यञ्' इति। न चैवमणिञोः परम्परायां निवर्तितायामप्यौपगव इत्यत्राणप्रत्ययपरम्परा स्यात्। तथा गार्ग्य इत्यादौ यञादिपरम्परेति वाच्यम्। सत्यामपि तस्यामनिष्टाभावादिति। तच्चिन्त्यम्। फगन्तात्फकि नाडायन इत्यादावनिष्टप्रसङ्गादिति दिक्। **ऊह्यमिति**। 'अपत्यं पितुरेव' इति पक्षे चतुर्थापत्यरूपे यूनि विवक्षिते 'गोत्राद्यूनि—' इति नियमसूत्रे सत्यसति च गोत्रप्रत्ययान्तादेव युवप्रत्यय इति द्वयोः परम्परा, सा चेष्टत्वान्न नियमेन व्यावर्त्यते। पञ्चमे तु यूनि नियमाभावे त्रयाणां परम्परा प्रसज्यते। षष्ठे तु चतुर्णामित्यादि। 'ततः प्राचामपि' इति द्वितीयपक्षे तु गर्गाच्चतुर्थे यूनि मूलप्रकृत्यनन्तराभ्यामनिष्टोत्पत्तिः प्रसज्यते। पञ्चमे तु मूलप्रकृत्यनन्तरयुवभ्यः। तथा नडाच्चतुर्थे यूनि पूर्ववद्द्वाभ्यामनिष्टोत्पत्तिः, पञ्चमे तु त्रिभ्यः। उपगोश्चतुर्थे वाच्ये तु मूलप्रकृतेरेकस्मादेवानिष्टोत्पत्तिः। न त्वनन्तरापत्यवाचकात्। ततो जातेऽप्यत इञि रूपानिष्टाभावादित्यादि यथासंभवं तत्रोह्यमित्यर्थः। **गोत्राद्यूनि**। असत्यस्मिन् सूत्रे मुख्यमते पञ्चमादौ यूनि विवक्षिते

पत्ये गोत्रप्रत्ययान्तादेवापत्यप्रत्ययः स्यात्, स्त्रियां तु न युवसंज्ञा । गर्गस्य युवा-

दिभ्यः-' इति गोत्रे यञ् । गार्ग्यस्य तृतीयः, स गर्गस्य पञ्चमो युवापत्यम्, तस्मिन्नुबोधयिषिते गार्ग्यशब्दाद् गोत्रप्रत्ययान्ताद् 'यञिञोश्च' इति फकि गार्ग्यायण इति रूपमिष्यते । तथा षष्ठादिष्वपि युवापत्येषु गार्ग्यायण इत्येवेष्यते । तदिदमपत्यशब्दः पुत्रपौत्रादिसाधारण इति पक्षे यद्यपि सुलभमेव, गर्गात्तृतीयं गार्ग्यं प्रति पञ्चमादीनामप्यपत्यत्वात् । तथापि गर्गस्य पञ्चमाद्यपत्ये यूनि विवक्षिते गर्गान्मूलप्रकृतेरपि इञ् स्यात । तथा गर्गस्य अनन्तरापत्ये इञि गार्गिः, तदपत्यत्वेन विवक्षिते गर्गस्य पञ्चमादौ यूनि गार्गेः फकि गार्गायण इत्यपि स्यात् । तथा गर्गस्य चतुर्थे यूनि गोत्रत्वाभावाद् यञभावे इञि गार्गिः । तदपत्यत्वेन विवक्षिते गर्गस्य पञ्चमादौ यूनि गार्गेः फकि गार्गायण इति स्यात् । गोत्रप्रत्ययान्तादेव गार्ग्यशब्दाद् गर्गस्य पञ्चमाद्यपत्ये यूनि फकि गार्ग्यायण इत्येवेष्यते । तदर्थं गोत्रप्रत्ययान्तादेव यूनि प्रत्यय इति नियमः क्रियते--गोत्राद्यूनीति । तदाह—**यून्यपत्ये गोत्रप्रत्ययान्तादेवेति** । ननु मूलप्रकृतेस्तदनन्तरापत्यप्रत्ययान्ताद् युवप्रत्ययान्ताच्चेति भावः । नचापत्यशब्दः पुत्र एव रूढ इति पक्षे पञ्चमादौ यूनि चतुर्थाद्यपत्यप्रत्ययान्तादेव प्रत्ययः स्यात्, नतु तृतीयवाचिगोत्रप्रत्ययान्तादिति, तत्र विध्यर्थमेवेदं स्यात्, नतु नियमार्थमिति वाच्यम्, पुत्रपौत्रादिसाधारणोऽपत्यशब्द इत्येव भाष्ये सिद्धान्तितत्वादिति भावः ।

गोत्रप्रत्ययान्तात् युवप्रत्ययोत्पत्ताविष्टे सिद्धेऽपि मूलप्रकृत्यनन्तरयुवभ्योऽपि स्यादिति पाक्षिकानिष्टे प्राप्ते नियमार्थमिदमित्याशयेनाह—**गोत्रप्रत्ययान्तादेवेति** । नतु मूलप्रकृत्यनन्तरयुवभ्य इत्यर्थः । मनोरमायां तु युवप्रत्ययान्तादिति प्रथमपक्षेऽर्थ इत्यपि स्थितम् । अत्र वदन्ति—-पञ्चमादौ यूनि विवक्षिते तस्य पुनस्तृतीयं प्रत्यनपत्यत्वादप्राप्तौ विध्यर्थमेवेदं स्यात्, नतु नियमार्थमिति युवप्रत्ययान्तात्प्रत्ययो दुर्वारः स्यात् । तस्मादिह 'पितुरेवापत्यम्' इति पक्षो नाश्रयणीय इति । अन्ये त्वाहुः—आद्यपक्षे 'गोत्राद्यूनि-' इत्यावर्त्य एकेनाप्राप्तप्रत्ययं विधाय द्वितीयेन नियम्यते 'यूनि गोत्रादेव' इति । एवं च 'ततः प्राचामपि' इति पक्षेण सहास्यैकरूपता भवतीति । 'गोत्राच्चेद्यून्येव' इति विपरीतनियमस्त्विह न कृतः, व्यावर्त्यालाभात् । नच शैषिकाच्छादयो व्यावर्त्या इति वाच्यम् । 'गोत्रेऽलुगचि' इति लिङ्गात् । **स्त्रियां त्विति** । यद्यत्र 'अस्त्रियाम्' इत्यस्यैकवाक्यतया 'स्त्रीभिन्ने यूनि गोत्रादेव' इत्यर्थः क्रियते, तर्हि स्त्रीषु युवसंज्ञाया अनिषेधात् युवतिषु प्रत्ययानां परम्परा प्रसज्येत । नच 'एको गोत्रे' इत्यनेन निस्तारः । युवसंज्ञया गोत्रसंज्ञाया बाधात् । अथ 'स्त्रियां न युवप्रत्ययः' इति वाक्यभेदेनार्थः क्रियते, तदा गोत्रप्रत्ययेन युवतिर्नाभिधीयेत । किं

पत्यं गार्ग्यायणः । स्त्रियां गोत्रत्वादेक एव प्रत्ययः । १०६५ अत इञ् । (४-१-९५) अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात्षष्ठ्यन्तादिञ्स्यादपत्येऽर्थे ।

स्त्रियां तु न युवसंज्ञेति। इह अस्त्रियामिति योगो विभज्यते। यूनीत्यनुवर्तते। उभयमपि प्रथमया विपरिणम्यते। तथा च स्त्री उक्तयुवसंज्ञिका नेति फलितमिति भावः। न च स्त्रीभिन्ने यूनि गोत्रादेवेत्यर्थः कुतो नाश्रीयते, एवं सत्येकवाक्यत्वलाभादिति वाच्यम्, पञ्चमादिषु युवतिषु प्रत्ययमालाप्रसङ्गात्। न च 'एको गोत्रे' इति नियमात्तन्निवृत्तिः सम्भवतीति वाच्यम्, युवसंज्ञया गोत्रसंज्ञाया बाधात्। नच सत्यपि योगविभागे स्त्रियां न युवप्रत्यय इति व्याख्यायतामिति वाच्यम्, गोत्रप्रत्ययेन युवत्यभिधानानापत्तेरित्यलम्। **गर्गस्येति**। गर्गस्य पञ्चमादौ यूनि गार्ग्यशब्दाद् गोत्रे यञन्तात्फकि गार्ग्यायण इति रूपमित्यर्थ। स्त्रियां युवसंज्ञानिषेधस्य प्रयोजनं दर्शयति—**स्त्रियामिति**। पञ्चमादियुवतीनां युवसंज्ञाविरहेण गोत्रत्वाद् 'एको गोत्रे' इति नियमाद्गार्गीत्येव भवति, न तु गार्ग्यायणीति रूपमित्यर्थः। स्त्रीभिन्ने यूनि गोत्रादेवेत्यर्थाश्रयणे तु युवसंज्ञया गोत्रसंज्ञाया बाधाद् 'एको गोत्रे' इत्यस्याप्रवृत्तेः प्रत्ययमाला स्यादिति भावः। **अत इञ्**। प्रातिपदिकादित्यधिकृतम् अता विशेष्यते, तदन्तविधिः, तदाह—**अदन्तं यत्प्रातिपदिकमिति**। 'तस्यापत्यम्' इत्यनुवृत्तं 'समर्थानां प्रथमाद्वा' इति च। ततश्च प्रथमोच्चारिततच्छब्दबोधितात्प्रातिपदिकादिति लब्धम्। सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात् सुबन्तादिति लभ्यते। सुप्चेद्धोपस्थितत्वात् षष्ठ्येव विवक्षिता। तथा च षष्ठ्यन्तात्प्रातिपदिकादिति लभ्यते। यद्यपि प्रातिपदिकं न षष्ठ्यन्तम्, प्रत्ययग्रहणपरिभाषया प्रकृतिप्रत्ययसमुदायस्यैव लाभात्। तथापि प्रातिपदिकप्रकृतिकषष्ठ्यन्तादित्यर्थो विवक्षितः।

तु वाक्यमेव स्यात्। ततश्च गार्ग्यस्यापत्यं स्त्री गार्गी न स्यात्। अतो 'युवसंज्ञानिषेधपरमेवेदम्' इत्याशयेन व्याचष्टे—**न युवसंज्ञेति**। अत्रायमाशयः—'अस्त्रियाम्' इति योगो विभज्यते। 'यूनि' इति शब्दस्वरूपमनुवर्तते। परिभाषा चेयम्। यत्र युवसंज्ञाविधानं तत्र 'अस्त्रियाम्' इत्युपतिष्ठत इति सिद्धस्य गतिरियम्। 'जीवति तु वंश्ये युवाऽस्त्रियाम्' इत्येव सूत्रयितुं युक्तम्। **अत इञ्**। 'घकालतनेषु–' इति ज्ञापकात्सुबन्तादेव तद्धितोत्पत्तिरित्यभ्युपगमेऽप्यधिकृतप्रातिपदिकस्य न वैयर्थ्यम्, किं तु प्रयोजनमस्तीति ध्वनयति—**अदन्तं यत्प्रातिपदिकमिति**। अत इत्यस्य सुबन्तविशेषणत्वे तु दक्षयोरपत्यमित्यादिविवक्षायां दाक्षिरित्यादि न सिध्येदिति भावः। तपरः किम्, विश्वपः अपत्यं वैश्वपः। 'प्रदीयतां दाशरथाय–' इत्यत्र तु 'तस्येदम्'

---

१ 'स्त्रियो' इति क्वचित्।

दाक्षिः । १०९६ बाह्वादिभ्यश्च । (४-१-९६) बाहविः । औडुलोमिः । आकृतिगणोऽयम् । १०९५ सुधातुरकङ् च । (४-१-९७) चादिञ् । सुधातुरपत्यं सौधातकिः । 'व्यासवरुडनिषादचण्डालबिम्बानां चेति वक्तव्यम्' (वा

तदाह—**तत्प्रकृतिकात्षष्ठ्यन्तादिति** । **दाक्षिरिति** । दक्षस्यापत्यमिति विग्रहः । इञ्, आदिवृद्धिः, 'यस्येति च' इत्यकारलोपः । 'प्रदीयतां दाशरथाय मैथिली' इति त्वार्षमिति 'तस्यापत्यम्' इत्यत्र निरूपितम् । प्रातिपदिकग्रहणाननुवृत्तौ तु अदन्तात्षष्ठ्यन्तादिति लभ्येत । तथा च दक्षयोरपत्यं दाक्षिरिति न सिध्येदिति भावः । **बाह्वादिभ्यश्च** । अपत्य इञिति शेषः । **बाहविरिति** । बाहुर्नाम कश्चिदृषिः, अथ 'ऋषयः' इत्यधिकृत्य बाहविगार्ग्यगौतमौ' इत्याश्वलायनसूत्रे दर्शनात् । बाहोरपत्यमिति विग्रहः । इञि, ओर्गुणः । **औडुलोमिरिति** । उडुलोम्नोऽपत्यमिति विग्रहः । इञि 'नस्तद्धिते' इति टिलोपः । आदिवृद्धिः, अदन्तत्वाभावादप्राप्तिः । **सुधातुरकङ् च** । **चादिञिति** । सुधातृशब्दात्षष्ठ्यन्तादपत्येऽर्थे इञ्प्रत्ययः, प्रकृतेरकङादेशश्चेत्यर्थः । अकङो ङकार इत्, अकार उच्चारणार्थः । ङिच्चेत्यन्तादेशः, तदाह—**सौधातकिरिति** । **व्यासेति** । व्यास, वरुड, निषाद, चण्डाल, बिम्ब

इत्यण् । अपत्यत्वविवक्षायां त्विञेव । **बाह्वादिभ्यश्च** । 'बाधृ लोडने' इति धातौ 'केवलस्य बाहोरपत्ययोगासम्भवात्सामर्थ्यात्तदन्तविधौ सौबाहविः' इति माधवोक्तं चिन्त्यमिति ध्वनयन्नाह—**बाहविरिति** । 'जानन्ति बाहविगार्ग्यगौतम–' इत्याश्वलायनसूत्रप्रयोगाद्भाष्यवृत्त्याद्युदाहरणाच्च बाहुशब्दः संज्ञारूपोऽस्तीति भावः । **औडुलोमिरिति** । यद्यपि गणे बाहु कृष्ण युधिष्ठिर अर्जुन प्रद्युम्नेत्यादिषु केवलो लोमन्शब्दः पठितः, तथापि सामर्थ्यात्तदन्तग्रहणम् । 'तारकाप्युडु वा स्त्रियाम्' इत्यमरोक्त्या नक्षत्रवाच्युडुशब्दः । उडूनीव लोमानि यस्य तस्यापत्यमौडुलोमिः । शरा इव लोमानि यस्य तस्यापत्यं शारलोमिः । बहुत्वे तु इञपवादोऽकारः प्रागेवाजन्तेषूक्तः । उडुलोमाः । शरलोमाः । इह प्रतिपदविधानेषु पुराणसिद्धाः संज्ञाशब्दा एव गृह्यन्ते, शीघ्रोपस्थितिकत्वात् । तेन इदानींतनो यो बाहुस्तस्यापत्ये बाहव इत्यणेव, न त्विञ् । उक्तं च हरिणा—'अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥' अनर्थकं संदिग्धार्थकमप्रयुक्तं च क्रमेण विशेषणत्रयव्यावर्त्यम् । तदुक्तिषु—तत्सदृशेष्वित्यर्थः । अत एव संज्ञा श्वशुरस्यापत्यं श्वाशुरिरित्यत्र 'राजश्वशुरात्–' इति यन्न । मिमीते माता, तस्याः स्वसा मातृस्वसा । इह 'मातृपितृभ्यां स्वसा' इति षत्वं न । नन्वेवं बाहवः श्वाशुरिरिति पूर्वोक्तौ न

---

१ 'चाण्डाल' इति क्वचित्पाठः ।

२६११) । १०१८ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । (७-३-३) पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः। किं तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः । वैयासकिः। वारुडकिरित्यादि। १०१९ गोत्रे

एभ्यश्च इञ् प्रकृतेरकङादेश इत्यर्थः । **न य्वाभ्याम्** । य् च वश्च य्वाविति विग्रहः । वकारादकार उच्चारणार्थः । तदाह—**यकारवकाराभ्यामिति** । परस्ये-त्यध्याहारलभ्यम् । **न वृद्धिरिति** । मृजेर्वृद्धिरित्यतस्तदनुवृत्तेरिति भावः । तुशब्दो विशेषप्रदर्शनार्थ इत्याह—**किंत्विति** । **ताभ्यामिति** । यकारवकाराभ्यामित्यर्थः। **पूर्वाविति**। पूर्वावयवावित्यर्थः। तेन आगमत्वं लभ्यते। तदाह—**ऐचावागमाविति**। ऐच् प्रत्याहारः । यथासंख्यं यकारात्पूर्व ऐकारः, वकारात्पूर्व औकारः । **वैयासकि-रिति** । वेदान्व्यस्यति विविधमस्यति शाखाभेदेन विभजतीति वेदव्यासः, कर्मण्यण्। अत्र नामैकदेशग्रहणम् । व्यासस्यापत्यमिति विग्रहः । इञ्प्रत्ययः प्रकृतेरकङादेशः । अत्र यकारः पदान्तः । तस्मात्परस्य आकारस्य पर्जन्यवल्लक्षणप्रवृत्त्या आदिवृद्धिः प्राप्ता न भवति । किंतु यकारात्पूर्व ऐकार आगमः, वैयासकिरिति रूपम् । स्वश्व-स्यापत्यं सौवश्विरित्यत्र वकारात्परस्य न वृद्धिः, ततः पूर्व औकारः। नच ऐचो वृद्ध्यपवादत्वादेव वृद्ध्याभावसिद्धेस्तन्निषेधो व्यर्थ इति वाच्यम्, यत्र य्वाभ्यां परस्य प्रसक्ताया वृद्धेः निषेधः तत्रैव ऐजागमाविति विषयनिर्देशार्थत्वात्। तेन दाध्यश्वि-रित्यादौ न । वृद्धिनिषेधोऽयं येन नाप्राप्तिन्यायेन आदिवृद्धेरेव। तेन द्वे अशीती भृतो द्व्याशीतिक इत्यत्र 'संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिर्भवत्येव।

सिद्ध्यत इति चेत् । मैवम्, अशिष्णोर्विधौ शब्दविशेषानुपादानादप्रतिषिद्धेष्वपि तत्प्रवृत्तेः । **व्यासेति** । वेदान् व्यस्यतीति वेदव्यासः, 'कर्मण्यण्' भीमो भीमसेन इतिवदेकदेशग्रहणम् । **न य्वाभ्याम्** । य्वाभ्याम् किम् । न अर्थो यस्य नार्थः, तस्यापत्यं नार्थिः । पदान्ताभ्यां किम्, याज्ञिकः । ऐचो विषयप्रदर्शनाय नेति निषेधोक्तिः । तेनेह न—दाध्यश्विर्माध्वश्विः । न ह्यत्र य्वाभ्यां परस्य वृद्धिप्रस-क्तिरस्ति । क्वचित्तु वृद्धिप्रसक्तिसत्त्वेऽपि नेष्यते। द्वे अशीती भृतो भूतो भावी वा द्व्याशीतिकः । **वारुडकिरिति** । वरुडादयो जातिविशेषाः । वकारस्यापदान्तत्वात् 'न य्वाभ्याम्-' इत्यैज् न । **इत्यादीति** । नैषादकिः, चाण्डालकिः, बैम्बकिः । **गोत्रे कुञ्जा** । इतः प्राक् 'एको गोत्रे' इत्यादि सूत्रद्वयं चेत्पठ्यते तर्ह्यत्रत्यं गोत्रग्रहणं त्यक्तुं शक्यमित्याहुः । च्फञो ञकारो वृद्ध्यर्थः। कौञ्जायन्यः । चकारस्तु 'व्रातच्फञोः-' इत्यत्र विशेषणार्थः । तेन 'अश्वादिभ्यः फञ्' आश्वायन इत्यत्र ञ्यो न भवति । अत्रेदमवधेयम्—कौञ्जायन्य इत्यादावेकवचने द्विवचने च ञ्यस्य ञित्त्वादाद्युदात्तत्वमेव।

कुञ्जादिभ्यश्च्फञ् । (४-१-९८) ११०० व्रातच्फञोरस्त्रियाम् । (५-३-११३) व्रातवाचिभ्यः च्फञन्तेभ्यश्च स्वार्थे ञ्यः स्यात्, न तु स्त्रियाम्। कौञ्जायन्यः । बहुत्वे तद्राजत्वाल्लुग्वक्ष्यते । ब्राध्नायन्यः । स्त्रियां कौञ्जायनी। गोत्रत्वेन जातित्वान्ङीष् । अनन्तरापत्ये कौञ्जिः । ११०१ नडादिभ्यः फक् । (४-१-९९) गोत्र इत्येव । नाडायनः । चारायणः । अनन्तरो नाडिः ।

वरुडादयो जातिविशेषाः । वारुडकिः, नैषादकिः, चाण्डालकिः, बैम्बकिः । गोत्रे कुञ्ज । स्पष्टम् । इञोऽपवादः । च्फञि चञावितौ । व्रातच्फञोः । व्रातश्च च्फञ्च इति द्वन्द्वाद्व्यत्ययेन पञ्चम्यर्थे षष्ठी । तदाह—व्रातवाचिभ्य इति । स्वार्थे ञ्यः स्यादिति । 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' इत्यतो ञ्य इत्यनुवर्तते । स च स्वार्थिकः, 'ञ्यादयः प्राग्वुनः' इति स्वार्थिकेषु परिगणनादिति भावः । कौञ्जायन्य इति । कुञ्जस्य गोत्रापत्यमिति विग्रहः । च्फञि चञावितौ आयन्नादेशः, आदिवृद्धिः, ततो ञ्यः, ञकार इत्, 'यस्येति च' इत्यकारलोपः । तद्राजत्वादिति । 'ञ्यादयस्तद्राजाः' इति वचनादिति भावः । लुग्वक्ष्यत इति । 'तद्राजस्य बहुषु–' इत्यनेनेति शेषः । ब्राध्नायन्य इति । ब्रध्नस्य गोत्रापत्यमिति विग्रहः । च्फञादि पूर्ववत् । ञ्यविधावस्त्रियामित्यस्य प्रयोजनमाह—स्त्रियां कौञ्जायनीति । कुञ्जस्यापत्यं स्त्री इति विग्रहः । स्त्रीत्वादिह न ञ्यप्रत्यय इति भावः । अदन्तत्वादिह टापमाशङ्क्याह—गोत्रत्वेनेति । कृते तु ञ्यप्रत्यये योपधत्वाज्जातिलक्षणङीषभावे टाप् स्यादिति भावः । च्फञ्विधौ गोत्रग्रहणस्य प्रयोजनमाह—अनन्तरापत्ये कौञ्जिरिति । नडादिभ्यः फक् । इञोऽपवादः । अनन्तरो नाडिरिति । अनन्तरापत्यस्य गोत्रत्वाभावात् फगभावे इञेवेत्यर्थः । 'हरितादिभ्योऽञः' इत्यादि

बहुत्वे तु ञ्यस्य लुकि च्फञश्चकारञकारयोस्तुल्यबलयोर्विरोधे सति परत्वाद् ञित्स्वरेणाद्युदात्तत्वे प्राप्ते भाष्यादौ 'तद्धितस्य कितः' इत्यत्र योगं विभज्य 'चितः' इत्यनुवर्त्य 'तद्धितस्य चितोऽन्तोदात्तत्वम्' इति व्याख्यानात् 'कौञ्जायनाः' इत्यत्रान्तोदात्ततैव भवति । न चैवं हि फगेवात्रास्तु किमनेन गुरुनिर्देशेनेति वाच्यम्, तथा हि सति 'व्राच्फकोरस्त्रियाम्' इति सूत्रप्रणयनापत्त्या नाडायनादिभ्योऽपि ञ्यः स्यादिति । कुञ्ज, ब्रध्न, शङ्ख, शकटेत्यादि । व्रातच्फञो । 'पूगाञ्ञ्योऽग्रामणी–' इत्यतोऽनुवर्तनादाह—ञ्यः स्यादिति । व्रातवाचिभ्यः 'कापोतपाक्यः' इत्युदाहरिष्यति । अस्त्रियां किम्, कपोतपाका स्त्री । तद्राजत्वादिति । 'ञ्यादयस्तद्राजाः' इति सूत्रेणेति शेषः । लुग्वक्ष्यत इति । 'तद्राजस्य बहुषु–' इत्यनेनेति शेषः । कौञ्जायनीति । इह सति ञ्यप्रत्यये योपधत्वाद् 'जातेः' इति ङीषभावे टापि रूपे

११०२ हरितादिभ्योऽञः । (४-१-१००) एभ्योऽञन्तेभ्यो यूनि फक् । हारितायनः । इह गोत्राधिकारेऽपि सामर्थ्याद्यून्ययम् । न हि गोत्रादपरो गोत्रप्रत्ययः । बिदाद्यन्तर्गणो हरितादिः । **११०३ यञिञोश्च । (४-१-१०१)** गोत्रे यौ यञिञौ तदन्तात्फक्स्यात् । 'अनाति' इत्युक्तेः 'आपत्यस्य-' (सू १०८२) इति यलोपो न । गार्ग्यायणः । दाक्षायणः । **११०४ शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु । (४-१-१०२)** गोत्रे फक् । अञिञोरपवादः । आद्यौ बिदादी । शारद्वतायनो भार्गवश्चेत्, शारद्वतोऽन्यः । शौनकायनो वात्स्यश्चेत्, शौनकोऽन्यः । दार्भायण आग्रायणश्चेत्, दार्भिरन्यः । **११०५ द्रोणपर्वतजीवन्तादन्यतरस्याम् । (४-१-१०३)** एभ्यो गोत्रे फग्वा । द्रौणायनः, द्रौणिः । पार्वतायनः, पार्वतिः । जैवन्तायनः, जैवन्तिः । अनादिरिह द्रोणः । अश्वत्थाम्न्य-

---

स्पष्टम् । **यञिञोश्च** । गोत्रे इत्यधिकृतं यञिञोर्विशेषणम्, नतु विधेयस्य फकः, व्याख्यानात् । तदाह—**गोत्रे यौ यञिञाविति** । सामर्थ्याद्यून्ययम् । न हि गोत्रप्रत्ययाद् गोत्रप्रत्ययोऽस्ति, 'एको गोत्रे' इति नियमात् । **अनातीति** । गर्गस्य गोत्रं गार्ग्यः । गर्गादित्वाद्यञ् । गार्ग्यस्यापत्यं युवेत्यर्थे यञन्तात् फकि आयन्नादेशे अनातीति पर्युदासाद् 'आपत्यस्य च-' इति यलोपाभावे णत्वे गार्ग्यायण इति रूपमित्यर्थः । **दाक्षायण इति** । दक्षस्य गोत्रापत्यं दाक्षिः, अत इञ्, दाक्षेरपत्यं युवा दाक्षायणः, इञन्तात्फक् । गोत्रे किम् ? सुतङ्गमस्यादूरभवः इत्यर्थे 'सुतङ्गमादिभ्य इञ्' इति इञि सौतङ्गमेरपत्ये न फक् । **शरद्वच्छुनक** । शेषपूरणेन सूत्रं व्याचष्टे—**गोत्रे फगिति । आद्यौ बिदादी इति** । शरद्वच्छुनकशब्दौ बिदादी । अतस्तदुभयविषये अञपवाद इत्यर्थः । दर्भविषये त्विञोऽपवाद इति स्पष्टमेव । दर्भः कश्चिदृषिः । ऋष्यणं बाधित्वा बाह्वादित्वादिञ् । **आग्रायणश्चेति** । अग्रो

स्वरे च विशेषो बोध्य इत्याहुः । **यञिञोश्च** । अधिकारप्राप्ते गोत्रग्रहणं यञिञोर्विशेषणं न तु विधेयस्य फकः, व्याख्यानात्तदेतदाह—**गोत्रे याविति** । गोत्रे किम्, 'द्वीपादनुसमुद्रं यञ्' द्वीपे भवो द्वैप्यः । सुतंगमादिभ्यश्चातुरर्थिक इञ् । सौतंगमिः । तदपत्ये फक् मा भूत् । **फक् स्यादिति** । सामर्थ्याद्यून्ययम् । **शरद्वच्छुनक** । भृगुः शरद्वतोऽपत्यं न भवति, पूर्वभावित्वात् । एवं शुनकस्यापत्यं न भवति वत्सः । अतोऽत्र भार्गवश्च वात्स्यश्चाग्रायणश्चेति द्वन्द्वे 'अत्रिभृगु-' इति 'यञिञोश्च' इति च यथासम्भवं लुग् बोध्यः । यद्यप्यत्र बहुत्वाभावाद् 'अत्रिभृगु-' इत्यादिना लुग् दुर्लभः, तथापि युगपदधिकरणवचनतायां वर्तिपदानां बह्वर्थत्वात्सौत्रत्वाद्वा स्यादेव लुक् । अतो व्याचष्टे—**भार्गवश्चेदिति । वात्स्यश्चेदिति च** ।

नन्तरे तूपचारात्। ११०६ अनृष्यानन्तर्ये बिदादिभ्योऽञ्। (४-१-१०४) एभ्योऽञ् गोत्रे, ये त्वत्रानृषयः पुत्रादयस्तेभ्य अनन्तरे। सूत्रे स्वार्थे ष्यञ्। बिदस्य गोत्रापत्यं बैदः। अनन्तरो बैदिः, बाह्वादेराकृतिगणत्वादिञ्। पुत्रस्यापत्यं पौत्रः। दौहित्रः। ११०७ गर्गादिभ्यो यञ्। (४-१-१०५) गोत्र इत्येव।

नाम कश्चिदृषिः। नडादिफगन्तोऽयम्। द्रोणपर्वत। अनादिरिति। अश्वत्थाम्नः पिता यो महाभारते कलेरादौ प्रसिद्धः, तदपेक्षया अन्य एवायं अनादिर्द्रोण इत्यर्थः। अश्वत्थाम्नीति। द्रोणाचार्यस्यानन्तरापत्ये अश्वत्थाम्नि द्रौणायन इति प्रयोग इत्यर्थः। तदिदं 'बाह्वादिभ्यश्च' इति सूत्रे भाष्ये स्पष्टम्। अनृष्यानन्तर्ये। अनृषि इति लुप्तपञ्चमीकम्। बिदादिभ्योऽञ् इति द्विरावर्तते। तथा च 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' इति कृत्स्नमेकं वाक्यम्। 'बिदादिभ्योऽञ् इति वाक्यान्तरम्। तत्र द्वितीयं वाक्यं व्याचष्टे—एभ्योऽञ् गोत्र इति। गोत्रे विवक्षिते बिदादिभ्यः अञ् स्यादित्यर्थः। अत्र प्रथमं वाक्यं कृत्स्नसूत्रं व्याचष्टे—ये त्विति। अनृषिभ्यो बिदादिभ्यः अनन्तरापत्ये अञ् स्यादित्यक्षरार्थः। बिदादौ हि ऋषयः अनृषयश्च पठिताः। तत्र ये अनृषयः तेभ्योऽनन्तरापत्ये अञिति फलितमिति भावः। ननु आनन्तर्ये इति श्रवणादनन्तर इति कथमित्यत आह—सूत्रे स्वार्थे ष्यञिति। अनन्तरशब्दादिति शेषः। चतुर्वर्णादित्वादिति भावः। बिदस्य गोत्रापत्यं बैद इति। बिदस्य ऋषित्वात्ततो गोत्र एवाञिति भावः। ऋष्यणोऽपवादः। स्वरे विशेषः। ननु अनन्तरापत्ये अञभाव इञपवाद ऋष्यणेवोचित इति कथमनन्तरो बैदिरित्यत आह— बाह्वादेरिति। बिदादिगणस्थादनृषेरनन्तरापत्ये अञमुदाहरति—पौत्रः। दौहित्र इति। पुत्रस्यानन्तरापत्यमिति दुहितुरनन्तरापत्यमिति च विग्रहः। यथायथम-

अनादिरिति। अश्वत्थाम्नः पिता यो महाभारते प्रसिद्धः, तदपेक्षयाऽन्य एवायं द्रोण इत्यर्थः। अश्वत्थाम्नीत्यादि। द्रोणाचार्यस्यानन्तरापत्ये अश्वत्थाम्नि द्रौणायन इति प्रयोगो भाक्त इत्यर्थः। अनृष्या। 'अनृषि' इति पञ्चम्याः सौत्रो लुक्। अनृषिभ्य इत्यर्थः। सूत्र इति। आनन्तर्य इत्यत्रेत्यर्थः। स्वार्थ इति। चातुर्वर्ण्यादेराकृतिगणत्वादिति भावः। बैदिरित्यत्र ऋष्यणमाशङ्क्याह—बाह्वादेरिति। बिद, उर्व, कश्यप, कुशिक, भरद्वाज, उपमन्यु, विश्वानर, 'परस्त्री परशुं च' इत्यादि। गर्गादिभ्यो। गर्ग, वत्स, व्याघ्रपाद्, पुलस्ति, बभ्रु, मण्डु, वतण्ड, कपि, कत, शकल, कण्व, अगस्ति, कुण्डिन, यज्ञवल्क, पराशर, जमदग्नि इत्यादि।

१ 'आनन्तर्ये' इति क्वचित्पाठः। २ क्वचित् 'कुण्डिनी' इति पाठः। गणपाठे तु 'कण्डिनी' इति लभ्यते।

गार्ग्यः। वात्स्यः। **११०८ यञञोश्च।** (२-४-६४) गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम्। गर्गाः। वत्साः। बिदाः। उर्वाः। तत्कृते इति किम्–प्रियगार्ग्याः। स्त्रियां तु गार्ग्यः स्त्रियः। गोत्रे किम्–द्वैप्याः, औत्साः। प्रवराध्यायप्रसिद्धमिह गोत्रम्, तेनेह न—पौत्राः,

---

शिवेरपवादः अञ्। **गार्गादिभ्यो यञ। गार्ग्यः। वात्स्य इति।** गर्गस्य गोत्रापत्यमिति वत्सस्य गोत्रापत्यमिति च विग्रहः। रामो जामदग्न्यः, पाराशर्यो व्यास इत्यादौ तु अनन्तरापत्ये गोत्रत्वारोपादित्याहुः। **यञञोश्च।** द्वितीयचतुर्थ-पादे इदं सूत्रम्। न त्विदं चातुर्थिकमपत्याधिकारस्थम्। तत्र प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम्। 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति सूत्रं तद्राजस्येतिवर्जमनुवर्तते। 'एयत्क्षत्रिय–' इत्यतो 'लुक्' इति 'यस्कादिभ्यो गोत्रे' इत्यतो गोत्रे इति च। तदाह— **गोत्रे यदिति। एतयोरिति।** यञञोरित्यर्थः। प्रत्ययादर्शनस्यैव लुक्त्वादिति भावः। **तत्कृत इति।** यञञ्प्रत्ययार्थगतबहुत्वे इति यावत्। **गर्गा इति।** गर्ग-स्यापत्यानीत्यादिविग्रहः। **प्रियगार्ग्या इति।** प्रियो गार्ग्यो येषामिति विग्रहः। अत्र यञर्थगतबहुत्वाभावान्न लुगिति भावः। **द्वैप्या इति।** द्वीपे भवा इत्यर्थः। 'द्वीपादनुसमुद्रम्–' इति यञ्। **औत्सा इति।** उत्से भवा इत्यर्थः। 'उत्सादि-भ्योऽञ्' इहोभयत्रापि यञञोर्गोत्रवाचित्वाभावान्न लुगिति भावः। ननु पौत्रा दौहित्रा इत्यत्राप्यनृषिबिदादिलक्षणाञो लुक् स्यात्। नच तस्यानन्तरापत्यवाचित्वा-द्गोत्रवाचित्वाभावान्न लुगिति वाच्यम्, 'यूनि लुक्' इति सूत्रभाष्ये अपत्याधिकारा-दन्यत्र लौकिकमेव गोत्रं गृह्यते इति सिद्धान्तितत्वादित्यत आह—**प्रवरेति।** 'कश्य-पोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः। 'तेषां यदपत्यं तद्गोत्रमित्याचक्षते' इति बोधायनीयादिप्रवराध्यायप्रसिद्धा भार्गवादय एवेह गोत्रत्वेन विवक्षिता इत्यर्थः। कैयटेन लौकिकस्य गोत्रस्य ग्रहणमिति भाष्य-

---

कथं तर्हि 'रामो जामदग्न्यः' इति। अनन्तरापत्ये ह्ययम्। सत्यम्। अनन्तरेऽपि गोत्रत्वारोपाद्बोध्यः। **यञञोश्च।** 'एयत्क्षत्रियार्ष–' इत्यतो लुगिति, 'तद्राजस्य–' इति सूत्राद्बहुषु तेनैवास्त्रियामिति चानुवर्तते, 'यस्कादिभ्यो गोत्रे' इत्यतो गोत्र इति च तदाह—**गोत्रे यद्यञन्तमित्यादि।** प्रवराध्यायप्रसिद्धगोत्रवाचिनौ केवलौ यञञौ न भवत इति 'गोत्र' इत्यनेन तदन्तं विशेषितम्। **तदवयवयोरिति।** 'निर्दिश्यमानस्यादेशा भवन्ति' इति भावः। **प्रवराध्यायेति।** एतच्च 'स्त्रीपुंसा-भ्याम्–' इति सूत्रे 'लौकिकस्य गोत्रस्य ग्रहणम्' इति भाष्यमुपादाय कैयटेनोक्तमिति भावः। **तेनेह नेति।** यद्यलौकिकं गोत्रमपत्यमात्रं गृह्येत, तदास्यादेवातिप्रसङ्ग

दौहित्राः। ११०६ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः। (४-१-१०६) गोत्रे यञ्। माधव्यो ब्राह्मणः, माधवोऽन्यः। बाभ्रव्यः कौशिकर्षिः, बाभ्रवोऽन्यः। बभ्रुशब्दस्य गर्गादिपाठात्सिद्धेऽपि नियमार्थमिदम्। गर्गादिपाठफलं तु लोहितादिकार्यम्। बाभ्रव्यायणी। १११० कपिबोधादाङ्गिरसे। (४-१-१०७) गोत्रे यञ्स्यात्। काप्यः। बौध्यः। आङ्गिरसे किम्-कापेयः। बौधिः। ११११ वतण्डाच्च। (४-१-१०८) आङ्गिरस इत्येव। वातण्ड्यः। अनाङ्गिरसे तु गर्गादौ शिवादौ च पाठाद्यञणौ। वातण्ड्यः, वातण्डः। १११२ लुक् स्त्रियाम्। (४-१-१०६) 'वतण्डाच्च' (सू १११२) इति विहितस्य लुक्स्यात्स्त्रियाम्।

मुपादाय तथैव व्याख्यातत्वादिति भावः। एवं च पौत्रा दौहित्रा इत्यादौ पौत्रदौहित्रयोः तथाविधगोत्रवाचित्वाभावान्न लुगिति स्थितम्। विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः। **मधुबभ्र्वोर्ब्राह्मणकौशिकयोः**। शेषपूरणेन सूत्रं व्याचष्टे—**गोत्रे यञिति**। मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ् स्याद् ब्राह्मणे कौशिके च यथासंख्यं वाच्ये इत्यर्थः। **लोहितादिकार्यमिति**। ष्फ इत्यर्थः। लोहितादिर्गर्गाद्यन्तर्गण इति भावः। **बाभ्रव्यायणीति**। बभ्रोर्गोत्रापत्यं स्त्रीति विग्रहः। गर्गादियञि बाभ्रव्यशब्दात् 'सर्वत्र लोहितादिकतन्तेभ्यः' इति ष्फः। आयन्नादेशः, षित्त्वाद् ङीषिति भावः। **कपिबोधादाङ्गिरसे। गोत्रे यञ् स्यादिति**। शेषपूरणमिदम्। कपिशब्दाद्बोधशब्दाच्च आङ्गिरसात्मके गोत्रे गम्ये यञ् स्यादित्यर्थः। **कापेय इति**। अत्र गोत्रस्य अनाङ्गिरसत्वाद् यञभावे 'इतश्चानिञः' इति ढक्। **बौधिरिति**। अत्राप्यनाङ्गिरसत्वाद् यञभावे ऋष्यणं बाधित्वा बाह्वादित्वादिञिति भावः। कपेर्गर्गादौ पाठेऽपि आङ्गिरस एवेति नियमार्थं ग्रहणम्। तस्य गर्गादौ पाठस्तु लोहितादिकार्यार्थः। काप्यायनी। बोधशब्दात्तु अप्राप्ते विधिः। **वतण्डाच्च**। वतण्डस्य गर्गादौ शिवादौ च पाठाद् यञणोः प्राप्तयोराङ्गिरसे यञेवेति नियमार्थमिदम्। **लुक् स्त्रियाम्**।

इति भावः। **लोहितादीति**। 'सर्वत्र लोहितादि—' इत्यादिना ष्फः। ष्फेणोक्तेऽपि स्त्रीत्वे षित्वसामर्थ्याद् ङीषित्याशयेनाह—**बाभ्रव्यायणीति**। गर्गादिगण एव 'बभ्रुः कौशिक' इति पाठ्यम्। एवं हि द्विर्बभ्रुग्रहणं न कर्तव्यं भवतीति हरदत्तादयः। **कापेय इति**। 'इतश्चानिञः' इति ढक्। कपेर्गर्गादिगणपाठो लोहितादिकार्यार्थः। तेन काप्यायनीति सिध्यति। **बौधिरिति**। अनृषित्वादिञ् बाह्वादित्वाद्वा। **वतण्डाच्च**। यञणोः प्राप्तयोराङ्गिरसे यञेवेति नियमार्थं सूत्रम्। **लुक् स्त्रियाम्**। **विहितस्येति**। 'परिशेषितस्य वा' इति बोध्यम्। एतच्च 'आङ्गिरसे' इत्यनुवृत्त्या लभ्यते। यद्यपि 'वतण्डाल्लुक् स्त्रियाम्' इत्येकसूत्रकरणेऽपि 'आङ्गिरसे' इत्यनुवृत्त्या

शार्ङ्गरवादित्वान्ङीन्। वतण्डी। अनाङ्गिरसे तु वातण्ड्यायनी। लोहितादित्वात्ष्फः। अणि तु वातण्डी। ऋषित्वाद्वक्ष्यमाणः ष्यङ् न। **१११३ अश्वादिभ्यः फञ्।** (४-१-११०) गोत्रे। आश्वायनः। 'पुंसि जाते' (ग सू ६६) पुंसीति तु प्रकृतिविशेषणम्। जातस्य गोत्रापत्यं जातायनः। पुंसि इति किम्—जाताया अपत्यं जातेयः। **१११४ भर्गात्त्रैगर्ते।** (४-१-१११) गोत्रे फञ्। भार्गायणस्त्रैगर्तः, भार्गिरन्यः। **१११५ शिवादिभ्योऽण्।** (४-१-११२)

वतण्डाच्चेति विहितस्येति। यञ इति शेषः। **वतण्डीति**। वतण्डस्य गोत्रापत्यं स्त्री आङ्गिरसीति विग्रहः। यञो लुकि आदिवृद्धिनिवृत्तौ ङीनिति भावः। **वातण्ड्यायनीति**। यञि आदिवृद्धौ लोहितादिलक्षणः ष्फः, षित्वाद् ङीषिति भावः। 'वतण्डाच्च' इति विहितस्येत्यस्य प्रयोजनमाह—**अणि तु वातण्डीति**। शिवादित्वादणि गोत्रत्वेन जातित्वाज्जातिलक्षणे ङीषि तस्याणो वतण्डाद्विहितत्वेऽपि 'वतण्डाच्च' इति विहितत्वाभावान्न लुगिति भावः। ननु वतण्डादणि तस्य 'अणिञोरनार्षयोः—' इति वक्ष्यमाणः ष्यङ् स्यादित्यत आह—**ऋषित्वादिति**। **अश्वादिभ्यः। गोत्र इति।** शेषपूरणमिदम्। आङ्गिरसे इति निवृत्तम्। **आश्वायन इति**। अश्वस्य गोत्रापत्यमिति विग्रहः। इञपवादः फञ्। **पुंसि जात इति**। गणसूत्रम्। **प्रकृतिविशेषणमिति**। पुंसि विद्यमानो यो जातशब्दः तस्माद्गोत्रे फञित्यर्थः। **जातेय इति**। 'स्त्रीभ्यो ढक्'। **भर्गात्त्रैगर्ते**। इदमपि गणसूत्रम्। त्रिगर्तो नाम भर्गस्य पुत्रः। तस्यापत्यं त्रैगर्तः। ऋष्यण्। तस्मिन्गोत्रे

अनाङ्गिरसे यञणोर्लुगभावात् स्त्रियामिष्टं सिद्ध्यति, तथापि पुंस्याङ्गिरसे यञणोरुभयोः प्राप्तिरनिष्टेति तद्वारणाय पृथक् सूत्रं कृतम्। **ऋषित्वादिति**। न चैवं 'ऋष्यन्धक—' इत्यणि सिद्धे शिवादिगणे वतण्डपाठो व्यर्थ इति शङ्क्यम्। गर्गादिपाठेन यञा बाधात्तन्निवृत्तये तत्पाठस्यावश्यकत्वात्। **ष्यङ् नेति**। 'अणिञोरनर्षयोः—' इति सूत्रेणेति भावः। **अश्वादिभ्यः। गोत्र इति**। इह गणे बैल्य, आनडुह्य, आत्रेय, इति गोत्रप्रत्ययान्तास्त्रयः पठ्यन्ते, तेभ्यस्तु यून्येव। 'एको गोत्रे' 'गोत्राद्यूनि—' इति वचनात्। तत्र बिलिर्नाम राजर्षिस्ततो 'वृद्धेत्कोसला—' इति ञ्यङ्। आनडुह्य-शब्दो गर्गादियञन्तः। आत्रेयशब्दो ढगन्त इति ज्ञेयः। **पुंसि जात इति**। गणसूत्रमिदम्। जातशब्दे पुंसि विद्यमाने फञ् इत्यर्थः। कस्मादित्याकाङ्क्षाया-मर्थाज्जातशब्दादिति लभ्यते। **जाताया इति**। लिङ्गविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा प्राप्तिः। **शिवादिभ्योऽण्**। ननु विशेषविहितानिञादीन् बाधित्वा अणेवारम्भसामर्थ्याद्भविष्यति किमनेनाण्ग्रहणेन। अत्राहुः—ऋष्टिषेण-

गोत्रे इति निवृत्तम् । शिवस्यापत्यं शैवः । गाङ्गः । पक्षे तिकादित्वात्फिञ् । गाङ्गायनिः । शुभ्रादित्वाड्ढक्, गाङ्गेयः । **१११६ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः । (४-१-११३)** अवृद्धेभ्यो नदीमानुषीनामभ्योऽपत्याण् । ढकोऽपवादः । यामुनः । नार्मदः । चिन्तिताया अपत्यं चैन्तितः । अवृद्धाभ्यः किम्—वासवदत्तेयः । नदीत्यादि किम्—वैनतेयः । तन्नामिकाभ्यः किम्—शोभनाया अपत्यं शौभनेयः । **१११७ ऋष्यन्धकवृष्णिकुरुभ्यश्च । (४-१-११४)**

भर्गात् फञ् । **शिवादिभ्योऽण् । निवृत्तमिति** । वृत्तिकैयटयोस्तथोक्तत्वादिति भावः । 'यूनि लुक्' इति सूत्रस्य भाष्यकैयटयोस्तु गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकार इति लभ्यते । तत्तु मतान्तरमित्येके । तदेव युक्तमिति शब्देन्दुशेखरे प्रपञ्चितम् । **अवृद्धाभ्यो नदी** । नदीमानुषीशब्दापेक्षमवृद्धाभ्य इति स्त्रीत्वम् । वस्तुतस्तु अवृद्धेभ्यो नदीमानुषीनामभ्य इत्येव सूत्रयितुमुचितमिति व्याचष्टे—**अवृद्धेभ्य इत्यादि** । ननु 'तस्यापत्यम्' इत्येव सिद्धे किमर्थमिदमित्यत आह—**ढकोऽपवाद इति** । चिन्तिता नाम काचिन्मानुषी । **वासवदत्तेय इति** । वासवदत्ता नाम काचिन्मनुष्यस्त्री, तस्या अपत्यमिति विग्रहः । वृद्धसंज्ञकत्वादणभावे ढगिति भावः । **वैनतेय इति** । विनताया अपत्यमिति विग्रहः । विनता नाम गरुडमाता, सा न मानुषी, नापि नदीति भावः । **शौभनेय इति** । शोभनाशब्दोऽयं न नदीमानु-

---

शब्दोऽत्र गणे पठ्यते, ततः प्राप्तमिञं बाधित्वा परत्वात् 'सेनान्तलक्षण—' इति ण्ये प्राप्ते इह पाठसामर्थ्याद्यथाप्राप्तप्रत्यय इञेव स्यान्न त्वण् । तथा चात्राण्ग्रहणमावश्यकमित्येके । अणधिकारादणेव स्यान्नान्य इत्यण्ग्रहणं स्पष्टप्रतिपत्त्यर्थमित्यन्ये । शिव, ककुत्स्थ, वतण्ड, जरत्कारु, विपाट्, तक्षन्, विश्रवण, रवण, ऋष्टिषेण, विरूपाक्षेत्यादि । **गोत्र इति निवृत्तमिति** । एतच्च वृत्तौ कैयटे च स्पष्टम् । यद्यपि 'गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकारः' इति 'यूनि लुक्' इति सूत्रस्थभाष्यकैयटाभ्यां लभ्यते, तथापि तन्मतान्तरमिति भावः । एवं चेतःप्रभृत्यपत्यसामान्ये प्रत्यया भवन्तीति स्थितम् । शुभ्रादित्वान्नित्यढकि प्राप्ते जरत्कारुशब्दोऽत्राणर्थं पठ्यते । जारत्कारवः । ढकि तु 'ढे लोपोऽकद्र्वाः' इत्युलोपः । जारत्कारेयः । कुञ्जादित्वाद् 'गोत्रे कुञ्जादिभ्यः—' इति नित्यं च्फञि प्राप्ते विपाट्शब्दोऽत्राणर्थं पठ्यते । वैपाशः वैपाशायन्यः । 'सेनान्तलक्षण—' इति ण्यप्रत्यये 'उदीचाम्—' इतीञि च प्राप्ते तक्षन्शब्दोऽत्राणर्थं पठ्यते, ण्यप्रत्ययेन समावेशोऽत्रेष्यते, न त्विञा । ताक्ष्णः, ताक्ष्ण्यः । विश्रवणरवणशब्दावत्र पठ्येते, तौ च विश्रवःशब्दस्यादेशौ । विश्रवसोऽपत्यं वैश्रवणः, रावणः । **अवृद्धाभ्यो**— अवृद्धेभ्यो नदीमानुषीनामभ्यः' इत्येव सूत्रयितुं युक्तमित्याशयेन

ऋषयो मन्त्रद्रष्टारः । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः—श्वाफल्कः । वृष्णिभ्यः—वासुदेवः, आनिरुद्धः । 'शौरिः' इति तु बाह्वादित्वात् । कुरुभ्यः—नाकुलः, साहदेवः । इञ एवायमपवादः, मध्येऽपवादन्यायात् । अत्रिशब्दात्तु परत्वाड्ढक्, आत्रेयः । **१११८ मातुरुत्संख्यासंभद्रपूर्वायाः** ।(४-१-११५) संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण्प्रत्ययश्च । द्वैमातुरः । षाण्मातुरः । साम्मातुरः । भाद्रमातुरः । आदेशार्थं वचनम् । प्रत्ययस्तूत्सर्गेण सिद्धः । स्त्रीलिङ्ग-

---

षीनामेति भावः । **ऋष्यन्धक** । प्रलीना वेदास्तपोबलवशाद् यान् अर्षन्ति प्राप्नुवन्ति ते ऋषयः । तथा च तैत्तिरीये श्रुतम्—'अजान्ह वै पृश्नींस्तपस्यमानान्ब्रह्म स्वयम्भ्वभ्यानर्षत्, त ऋषयोऽभवन्, तदृषीणामृषित्वम्' इति । अजा नित्याः, पृश्नयः शुक्लाः शुद्धा इति यावत् । तान् तपस्यमानान्—तपश्चरत, स्वयम्भु-अनादि, ब्रह्म-वेदः, अभ्यानर्षत् । 'ऋष गतौ' आभिमुख्येन प्राप्नोत् । ते वेदस्य अर्षणाद् ऋषिशब्दवाच्या अभवन्निति वेदभाष्यम् ।

'सर्गादिसमये वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥'

इति पुराणेषु प्रसिद्धम् । कात्यायनप्रणीतसर्वानुक्रमणिकाख्यग्रन्थे स्पष्टमेतत्, तदाह—**ऋषयो मन्त्रद्रष्टार इति** । अन्धकशब्देन वृष्णिशब्देन कुरुशब्देन च अन्धकादिवंश्या विवक्षिताः । ऋषिविशेषवाचिभ्यः अन्धकादिवंश्यवाचिभ्यश्चापत्ये अण् स्यादित्यर्थः । इञोऽपवादः । ऋषिभ्य उदाहरति—**वासिष्ठः । वैश्वामित्र इति । अन्धकेभ्य इति** । अन्धकवंश्यवाचिभ्य उदाहियत इत्यर्थः । **श्वाफल्क इति** । श्वफल्कस्यापत्यमिति विग्रहः । **वृष्णिभ्य इति** । वृष्णिवंश्यवाचिभ्य उदाहियत इत्यर्थः । **वासुदेव इति** । वसुदेवस्यापत्यमिति विग्रहः । **आनिरुद्ध इति** । अनिरुद्धस्यापत्यमिति विग्रहः । ननु शूरो नाम कश्चिद् वृष्णिवंश्यः । तस्यापत्यं शौरिः कथम्? अण्प्रसङ्गादित्यत आह—**शौरिरिति त्विति** । बाह्वादित्वादित्यनन्तरम् इञ् समाधेयमिति शेषः । **कुरुभ्य इति** । कुरुवंश्यवाचिभ्य उदाहियत इत्यर्थः । नकुलसहदेवौ प्रसिद्धौ । ननु अत्रेरपत्यमित्यर्थे 'इतश्चानिञः' इति ढकि आत्रेय इति कथम्? ऋष्यण इञ इव ढकोऽपि बाधौचित्यादित्यत आह—**इञ एवेति** । न तु ढक इत्यर्थः । **मातुरुत्संख्यासंभद्रपूर्वायाः । द्वैमातुर इति** । द्वयोर्मात्रोरपत्यमिति विग्रहः । 'तद्धितार्थ–' इति समासः । अण्, ऋकारस्योकारः, रपरत्वम् । **एवं षाण्मातुर । सांमातुर इति** । समीचीना माता समाता,

---

प्राप्तवष्टे—**अवृद्धेभ्य इत्यादिना । आत्रेय इति** । परत्वादयमृष्यणं बाधत

निर्देशोऽर्थापेक्षः, तेन धान्यमातुर्न । संख्या इति किम्–सौमात्रः । शुभ्रादित्वाद् द्वैमात्रेयः । **११९६ कन्यायाः कनीन च** । (४-१-११६) ढकोऽपवादोऽण्, तत्संनियोगेन कनीनादेशश्च । कानीनो व्यासः कर्णश्च । अनूढाया एवापत्यमित्यर्थः । **विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ।** (४-१-११७) अपत्येऽण् । वैकर्णो वात्स्यः, वैकर्णिरन्यः । शौङ्गो भारद्वाजः, शौङ्गिरन्यः । छागल आत्रेयः,

संमातुरपत्यं सांमातुरः । अण्, उत्, रपरत्वम् । **भाद्रमातुर इति** । भद्रा चासौ माता चेति विग्रहः । अणादि पूर्ववत् । ननु 'तस्यापत्यम्' इत्येव सिद्धे अणिवधिर्व्यर्थ एवेत्यत आह—**आदेशार्थं वचनमिति ।** उदादेशस्य अण्संनियोगेन विध्यर्थमित्यर्थः । ननु धान्यं यो मिमीते तस्यापि मातुर्ग्रहणं कुतो न स्यात् । तथा च तत्रापि द्वैमातुरादिकं प्राप्नोतीत्यत आह—**स्त्रीलिङ्गनिर्देशोऽर्थापेक्ष इति** । मातृगतं स्त्रीत्वं शब्दे आरोप्य संख्यासंभद्रपूर्वाया इति निर्दिश्यते। अतः स्त्रीलिङ्गस्य मातृशब्दस्य जननीवाचकस्य ग्रहणमित्यर्थः । **तेन धान्यमातुर्नेति** । अत्र मातृशब्दस्य परिच्छेत्तृवाचिनः पुँल्लिङ्गत्वादिति भावः । **सौमात्र इति** । सुमातुरपत्यमित्यर्थे 'तस्यापत्यम्' इत्यण् । संख्यासंभद्रपूर्वत्वाभावाद् नायमण्, उत्त्वमपि तत्संनियोगशिष्टत्वान्नेति भावः । ननु द्वैमात्रेय इति कथम्, संख्यापूर्वकतया अण् उत्त्वस्य च दुर्वारत्वादित्यत आह—**शुभ्रादित्वादिति** । 'शुभ्रादिभ्यश्च' इति ढकि रूपमित्यर्थः । **कन्यायाः कनीन च** । कनीनेति लुप्तप्रथमाकम् । **ढक इति** । 'स्त्रीभ्यो ढक्' इति विहितस्येत्यर्थः । **कनीनादेशश्चेति** । प्रकृतेरिति शेषः । भारते व्यासः कर्णश्च कन्यायाः पुत्रौ इति प्रसिद्धम् । ननु कन्याया अप्रादुर्भूतयौवनत्वात् पुंसंयोगाभावात् कथमपत्यसंबन्ध इत्यत आह—**अनूढाया इति** । अलब्धविवाहाया इत्यर्थः । एतच्च भाष्ये स्पष्टम् । **विकर्ण** । वत्सादिशब्दैस्तद्वंश्या विवक्षिताः । विकर्ण, शुङ्ग, छगल एभ्योऽण् स्यात्, वत्सवंश्ये भरद्वाजवंश्ये अत्रिवंश्ये चापत्ये इत्यर्थः । एतेन वत्सादीनां मूलपुरुष-

इति भावः । **द्वैमातुर इति** । 'तद्धितार्थ' इत्यादिना समासः । अत्र 'द्वयोर्मात्रोरपत्यम्' इति विग्रहः, न तु द्विमात्रोरपत्यम्' इति । 'दिक्संख्ये संज्ञायाम्' इति नियमेनासंज्ञायां समासासंभवात् । **धान्यमातुर्नेति** । 'अभिव्यक्तपदार्थाः–' इत्यनेन जननीवाचिन एव ग्रहणे सिद्धेऽपि तस्य स्पष्टप्रतिपत्त्यर्थः स्त्रीलिङ्गनिर्देश इति भावः । 'अभिव्यक्त–' इत्यस्यानित्यताया ज्ञापनार्थं इति त्वन्ये । **कन्यायाः** । ननु कन्या ह्यक्षतयोनिः, तस्याश्चापत्यसम्भव एव नास्तीत्याशङ्क्याह—**अनूढाया इति** । अविवाहिताया इत्यर्थः । **विकर्ण** । वात्स्यादीनामपत्यप्रत्ययान्तानां द्वन्द्वे 'यञञोश्च'

१ 'वैमात्रेयः' इति बहुत्र पाठः ।

छागलिरन्यः । केचित्तु 'शुङ्गा' इत्याबन्तं पठन्ति, तेषां ढक्प्रत्युदाहरणम्, शौङ्गेयः । ११२१ पीलाया वा । (४-१-११८) तन्नामिकाणं बाधित्वा 'द्व्यचः' (सू ११२४) इति ढकि प्राप्ते पक्षेऽण् विधीयते । पीलाया अपत्यं पैलः, पैलेयः । ११२२ ढक्च मण्डूकात् । (४-१-११९) चादण् । पक्षे इञ् । माण्डूकेयः, माण्डूकः, माण्डूकिः । ११२३ स्त्रीभ्यो ढक् । (४-१-१२०) स्त्रीप्रत्ययान्तेभ्यो ढक्स्यात् । वैनतेयः । बाह्वादित्वात्सौमित्रिः । शिवादित्वात्सा-

---

त्वाद् विकर्णादीन्प्रत्यपत्यत्वासंभव इति निरस्तम्। विकर्णादिभ्यो वात्स्यादिष्वेव ऋष्यण् इति नियमार्थं सूत्रम्। **पीलाया वा**। अपत्येऽणिति शेषः। पीला नाम काचिन्मानुषी। **तन्नामिकाणमिति**। वाग्रहणाभावे तु अनेनाणा नित्यमेव ढको बाधः स्यात्। नच महाविभाषया अणः पाक्षिकत्वात्तदभावे ढग् भवत्येवेति वाच्यम्, महाविभाषया अपवादे निषिद्धे उत्सर्गो न प्रवर्तत इति ज्ञापनात्। अन्यथा शैवः शैविरित्यादिः स्यात्। **ढक् च मण्डूकात्**। मण्डूको नाम ऋषिः। **पक्ष इञिति**। पूर्वसूत्राद्वा-ग्रहणानुवृत्तेरिति भावः। **स्त्रीभ्यो ढक्**। स्त्रीशब्देन टाबादय स्त्रीप्रत्ययाश्चातु-र्थिका गृह्यन्ते, न त्वन्येऽपि स्त्रीवाचकाः, व्याख्यानादित्याह—**स्त्रीप्रत्ययान्तेभ्य इति**। विनता नाम गरुडमाता, तस्या अपत्यमिति विग्रहः। प्रत्ययग्रहणं किम्? दरत् कश्चित्क्षत्रियः, तस्यापत्यं स्त्री दरत्। 'द्व्यञ्मगध-' इत्यण्। 'अतश्च' इति तस्य लुक्। तस्या अपत्यं दारदः। अत्र दरच्छब्दस्य स्त्रीलिङ्गत्वेऽपि स्त्रीप्रत्ययान्त-त्वाभावान्न ढक्। ननु सुमित्राया अपत्यं सौमित्रिः, सपत्न्या अपत्यं सापत्न इति कथम्, ढक्प्रसङ्गादित्यत आह—**बाह्वादित्वादित्यादि**। सापत्नशब्दे पुंवत्त्वं नेति

'अत्रिभृगुकुत्स-' इति सूत्राभ्यामपत्यप्रत्ययस्य लुक्। न चात्र वत्सादीनामेव द्वन्द्वोऽस्त्विति शङ्क्यम्। मूलभूतानां तेषां विकर्णादीन् प्रत्यपत्यत्वाभावादतो व्याचष्टे—**वात्स्य इत्यादि**। 'युगपदधिकरणवचनताया बहुत्वमस्ति' इति 'शरद्वच्छुनक-' सूत्र एवोक्तम्। **पक्षे इञिति**। पूर्वसूत्राद्वाग्रहणानुवृत्तेरिति भावः। **स्त्रीभ्यो ढक्**। बहुवचननिर्देशान्न स्वरूपस्य ग्रहणम्, नाप्यर्थस्य। ढगर्थतया शुभ्रादिषु विमातृशब्द-पाठात्। किं तु स्त्र्यधिकारोक्तटाबादेर्ग्रहणम्। न तु विप्रकृष्टक्तिन्नादेरित्याशयेनाह—**स्त्रीप्रत्ययान्तेभ्य इति**। तेन 'दरदोऽपत्यं दारदः' इत्यत्र ढक् न भवति। स्त्र्यर्थग्रहणे तु स्यादेवात्र ढक्। दरच्छब्दो हि जनपदक्षत्रियवाचीति ततोऽपत्यार्थे 'द्व्यञ्मगध-' इत्यणि तस्य स्त्रियाम् 'अतश्च' इति लुकि दरच्छब्दस्य स्त्र्यर्थवाचित्वात्। 'ढक् च-' इति वर्तमाने पुनरिह ढग्ग्रहणमणसम्बद्धस्य ढको नित्यर्थम्। यद्यपि 'चानुकृष्टं नोत्तरत्र' इति परिभाषया अणिह न प्रवर्तते तथापि तस्या अनित्यत्वज्ञाप-

पत्नः। **११२४ द्व्यचः।** (४-१-१२१) द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक्। तन्नामिकाणोऽपवादः। दात्तेयः। पार्थ इत्यत्र तु 'तस्येदम्' (सू १२००) इत्यण्। **११२५ इतश्चानिञः।** (४-१-१२२) इकारान्ताद् द्व्यचोऽपत्ये ढक्स्यात्, न त्विञन्ताद्। दौलेयः। नैधेयः। आत्रेयः। **११२६ शुभ्रादिभ्यश्च।** (४-१-१२३) ढक्स्यात्। शुभ्रस्यापत्यं शौभ्रेयः। **११२७ विकर्णकुषीतकात्काश्यपे।** (४-१-१२४) अपत्ये ढक्। वैकर्णेयः। कौषीतकेयः। अन्यो वैकर्णिः। कौषीतकिः। **११२८ भ्रुवो वुक्च।** (४-१-१२५) चाड्ढक्। भ्रौवेयः। **११२९ प्रवाहणस्य ढे।** (७-३-२८) प्रवाहणशब्दस्योत्तरपदस्या-

---

प्रागेवोक्तम्। **द्व्यचः।** ननु 'स्त्रीभ्यो ढक्' इत्येव सिद्धे किमर्थमिदमित्यत आह—**तन्नामिकेति। दात्तेय इति।** दत्ता नाम काचिन्मानुषी, तस्या अपत्यमिति विग्रहः। ननु पृथाया अपत्यं पार्थ इति कथम्, तन्नामिकाणं बाधित्वा 'द्व्यचः' इति ढक्प्रसङ्गादित्यत आह—**पार्थ इत्यत्रेति।** शिवादित्वादपत्य एवाणित्यन्ये। **इतश्चानिञः।** अस्त्रीप्रत्ययान्तार्थमिदम्। दुलिः निधिश्च कश्चित्। **आत्रेय इति।** अत्रिः प्रसिद्धः। परत्वादयमृष्यणमपि बाधत इति भावः। **शुभ्रादिभ्यश्च। ढक् स्यादिति।** शेषपूरणम्। इञाद्यपवादः। **शुभ्रस्यापत्यमिति।** अस्त्रीत्वादप्राप्तौ ढगिति भावः। **विकर्णकुषीतकात्काश्यपे। अपत्ये ढगिति।** शेषपूरणम्। काश्यप एवेति नियमार्थं शुभ्रादिभ्यः पृथक् पाठः। **भ्रुवो वुक् च। चाड्ढगिति।** भ्रूशब्दादपत्ये ढक् स्यात् प्रकृतेर्वुगागमश्च। वुकि ककार इत्। उकार उच्चारणार्थः। कित्त्वादन्तावयवः। **भ्रौवेय इति।** भ्रूर्नाम काचित्, तस्या अपत्यमिति विग्रहः। ढकि एयादेशे प्रकृतेर्वुकि आदिवृद्धिः। वुगभावे तु ऊकारस्य वृद्धौ

नाय ढग्ग्रहणमित्याहुः। **तस्येदमिति।** शिवादित्वादपत्य एवाणित्यन्ये। **इतश्च।** इतः किम्, दात्तिः। अनिञः किम्, दाक्षायणिः। द्व्यचः किम्, उदधेरपत्यमौदधः। काशिकायां तु 'मरीचेर्मारीचः' इत्युदाहृतम्। तदसत्। बाह्वादित्वेनेञ्प्रवृत्तेः। न चास्य बाह्वादित्वमनिर्वाचितम्, 'मरीचिशब्दो बाह्वादिषु पठ्यते' इति मिदचोऽन्त्यात्परः इति सूत्रे भाष्ये स्थितत्वात्। **आत्रेय इति।** परत्वादयमृष्यणं बाधत इति भावः। **शुभ्रादिभ्यश्च।** चकारस्त्वाकृतिगणत्वद्योतनार्थ इत्याहुः। मृकण्डशब्दोऽत्र पठ्यते। मार्कण्डेयः। शुभ्र, मृकण्ड, अश्व, विमातृ, विधवा, गोधा, प्रवाहणेत्यादि। आकृतिगणोऽयम्। तेन पाण्डवेय इत्यादि सिद्धम्। इहादन्तेषु इञ् प्राप्तः, विधवाशब्दात्तूदात्तलक्षणो ढक्, चतुष्पाज्जातिवाचिषु ढञ्, गोधाशब्दाद् द्व्यचनात्सोऽपि व्रति, क्वचिदौत्सर्गिकोऽण् प्राप्त इति बोध्यम्।

चामादेरचो वृद्धिः, पूर्वपदस्य तु वा ढे परे। प्रवाहणस्यापत्यं प्रावाहणेयः, प्रवाहणेयः। ११३० तत्प्रत्ययस्य च। (७-३-२९) ढप्रत्ययान्तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा। प्रवाहणेयस्यापत्यं प्रावाहणेयिः, प्रवाहणेयिः। बाह्यतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुं न शक्यत इति सूत्रारम्भः। ११३१ कल्याण्यादीनामिनङ्। (४-१-१२६) एषा-

आवादेशे आवेय इति स्यात्। **प्रवाहणस्य ढे**। उत्तरपदस्येत्यधिकृतम्। 'तद्धितेष्वचामादेः' इत्यतः अचामादेरित्यनुवर्तते 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'अर्धात्परिमाणस्य पूर्वस्य तु वा' इत्यतः पूर्वस्य वेति च। तदाह—**प्रवाहणशब्दस्येति। प्रावाहणेयः, प्रवाहणेय इति**। शुभ्रादित्वाद् ढकि पूर्वपदस्य पाक्षिकी आदिवृद्धिः। उत्तरपदस्य नित्यम्। उत्तरपदे आकारस्य वृद्धेः फलं तु प्रवाहणेयीभार्य इत्यत्र 'वृद्धिनिमित्तस्य च-' इति पुंवत्त्वप्रतिषेध एव। **तत्प्रत्ययस्य च**। पूर्वसूत्रे यदनुवृत्तं तत्सर्वमिहाप्यनुवर्तते। तच्छब्देन ढप्रत्ययः परामृश्यते। तदाह—**ढप्रत्ययान्तस्येति। प्रावाहणेयिः, प्रवाहणेयिरिति**। शुभ्रादिढगन्तादिञ्। ननु पूर्वसूत्रेणैव सिद्धत्वादिदं व्यर्थमित्यत आह—**बाह्येति**। ढक्प्रत्ययान्ताद् बहिर्भूतो य इञ् तन्निमित्ता 'तद्धितेष्वचामादेः' इति नित्या आदिवृद्धिः। **ढाश्रयेणेति**। ढप्रत्यये परे विहितेनेति यावत्। तथाविधेन वृद्धिविकल्पेन पूर्वसूत्रविहितेन बाधितुं न शक्यते, भिन्ननिमित्तकत्वादित्यर्थः। पूर्वसूत्रं हि केवलढप्रत्ययान्ते ढप्रत्ययं परनिमित्तत्वेनाश्रित्य प्रवृत्तम्, ढङ्निमित्तामादिवृद्धिं बाधत इति युक्तम्, न त्विञ्प्रत्ययनिमित्तामपि नित्यामादिवृद्धिम्। अतस्तस्या अपि बाधनार्थमिदं सूत्रमित्यर्थः। इदं वृद्धिविधिद्वयमपि 'शुभ्रादिभ्यश्च' इत्यत्रैव वक्तुं युक्तम्। **कल्याण्यादीनामिनङ्**।

प्रवाहणस्य ढे। उत्तरपदस्येत्यधिक्रियते। 'अर्धात्परिमाण-' इत्यतः 'पूर्वस्य तु वा' इति अनुवर्तते तदाह—**उत्तरपदस्याचामादेरित्यादि**। नित्यमुत्तरपदवृद्धेः फलं तु 'प्रवाहणेयीभार्यः' इत्यत्र 'वृद्धिनिमित्तस्य-' इति पुंवद्भावप्रतिषेधः। **तत्प्रत्ययस्य च**। 'प्रवाहणस्य' इत्यनुवर्तते, तच्छब्देन ढप्रत्ययः परामृश्यते तदाह—**ढान्तस्येत्यादि। बाह्यतद्धितनिमित्तेति**। ढक्प्रत्ययान्ताद्बहिर्भूतो य इञ् तन्निमित्तेत्यर्थः। **कल्याण्यादीनाम्**। इह परस्त्रीशब्दः पठ्यते। 'परस्य स्त्री परस्त्री' इति षष्ठीसमासः। पारस्त्रैणेयः। परभार्यायामुत्पन्न इत्यर्थः। अनुशतिकादि-

१ 'कल्याण्यादीनामिनङ् च' इति क, ख पाठः। क्वचिदष्टाध्यायीपुस्तकेष्वपि चकारो दृश्यते, अथापि बहुषु कौमुद्यष्टाध्यायीपुस्तकेष्वदर्शनाद् व्याख्यातृभिरव्याख्यातत्वात्, पूर्वसूत्रे चकारदर्शनाच्चेहोपेक्षितः।

मिनङादेशः स्यात्, ढक्च। काल्याणिनेयः, बान्धकिनेयः। **११३२ कुलटाया वा। (४-१-१२७)** इनङ्मात्रं विकल्प्यते। ढक्तु नित्यः पूर्वेणैव। कौलटिनेयः, कौलटेयः। सती भिक्षुक्यत्र कुलटा। या तु व्यभिचारार्थं कुलान्यटति तस्याः 'क्षुद्राभ्यो वा' (सू ११३७) इति पक्षे ढ्रक्। कौलटेरः। **११३३ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च। (७-३-१९)** हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेरचो वृद्धिर्ञिति णिति किति च। सुहृदोऽपत्यं सौहार्दः। सुभगाया अपत्यं सौभागिनेयः। सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः, तेषु भवः साक्तुसैन्धवः।

इनङि ङकार इत्। **काल्याणिनेय इति।** कल्याण्या अपत्यमिति विग्रहः। **बान्धकिनेय इति।** बन्धक्या अपत्यमिति विग्रहः। अत्र गणे स्त्रीप्रत्ययान्ता एव पठ्यन्ते, तेभ्यो ढक् सिद्ध एव। इनङेव तु विधीयते। **कुलटाया वा इनङ्मात्रमिति।** व्याख्यानादिति भावः। **पूर्वेणैवेति।** 'स्त्रीभ्यो ढक्' इत्यनेनेत्यर्थः। कुलानि गृहाणि अटतीति कुलटा। शकन्ध्वादित्वात्पररूपम्। **अत्रेति।** 'कुलटाया वा' इति सूत्र इत्यर्थः। **पक्षे ढ्रगिति।** ढ्रगपि कदाचिद्भवतीत्यर्थः। **कौलटेर इति।** कुलटाया ढ्रकि ढकारस्य एयादेशे 'लोपो व्योः–' इति यकारलोप इति भावः। **हृद्भग। हृदाद्यन्त इति।** हृत्, भग, सिन्धु एतदन्तेषु समासेष्वित्यर्थः। चकारादुत्तरपदस्येत्यनुकृष्यते, तदाह—**पूर्वोत्तरपदयोरिति सौहार्द इति।** अणि उभयपदादिवृद्धिः। ऋकारस्य तु आकारो रपरः। **सौभागिनेय इति।** कल्याण्यादित्वाद् ढकि इनङि उभयपदादिवृद्धिरिति भावः। एतत्प्रसङ्गादेव इदं

त्वादुभयपदवृद्धिः। बिदादिगणे तु 'परस्त्री परशुं च' इति पठ्यते। प्राप्नोतीति शेषः। तत्र परा चासौ स्त्री चेति कर्मधारयः। परस्त्रिया अपत्यं पारशवः। ब्राह्मणाच्छूद्रायां तेनैवोढायामुत्पन्नः। सा च जात्यन्तरयोगात्परस्त्री। न च परश्वादेशस्य स्थानिवद्भावात्पारशवेऽपि 'अनुशतिकादीनां च' इत्युभयपदवृद्धिः स्यादिति वाच्यम्, सत्यादेशे पूर्वोत्तरपदसंप्रमोहात्तदप्रवृत्तेः। इह गणे स्त्रीप्रत्ययान्तानां ढकः सिद्धत्वादिनङर्थं ग्रहणम्। अन्येषां तूभयार्थम्। कल्याणी, सुभगा, दुर्भगा, बन्धकी, परस्त्रीत्यादि। **कुलटाया वा।** शकन्ध्वादित्वात्पररूपमत एव निपातनाद्वा। **सती भिक्षुक्यत्रेति।** अत्र इनङ्विधौ। तथा चोक्तममरेण—'अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः। कौलटेरः कौलटेयो भिक्षुकी तु सती यदि। तदा कौलटिनेयः स्यात्कौलटेयोऽपि चात्मजः' इति। केचित्तु क्षुद्राया अपि इनङा तृतीयं रूपं कौलटिनेय इतीच्छन्ति। **पक्षे ढगिति।** ढगपि पक्षे भवत्येवेति भावः। **हृद्भग।** 'पूर्वपदस्य च' इति चकारेण 'उत्तरपदस्य' इत्यनुकृष्यते तदाह—**पूर्वोत्तरपदयोरिति।** 'महते

११३४ चटकाया ऐरक् । (४-१-१२८) 'चटकादिति वाच्यम्' (वा २६२४) लिङ्गविशिष्टपरिभाषया स्त्रिया अपि । चटकस्य चटकाया वा अपत्यं चाटकैरः । 'स्त्रियामपत्ये लुगवक्तव्यः' (वा २६२५)। तयोरेव स्त्र्यपत्यं चटका। अजादित्वाट्टाप्। **११३५ गोधाया ढ्रक्**।(४-१-१२९) गौधेरः। शुभ्रादित्वादपत्ये ढक्। गौधेयः । **११३६ आरगुदीचाम्**। (४-१-१३०) गौधारः। रका सिद्धे आकारोच्चारणमन्यतो विधानार्थम् । जडस्यापत्यं जाडारः। पण्डस्यापत्यं पाण्डारः। **११३७ क्षुद्राभ्यो वा**। (४-१-१३१) अङ्गहीनाः शीलहीनाश्च

सूत्रमत्रोपन्यस्तम् । 'महते सौभगाय' इत्यत्र तु उद्गात्रादित्वाद्भावे अञ्। उत्तरपदादिवृद्ध्यभावश्छान्दसः। **सिन्धव इति**। अश्वा इत्यर्थः। **चटकाया ऐरक्**। चटकाशब्दादपत्ये ऐरक्प्रत्ययः स्यादित्यर्थः। ननु स्त्रीलिङ्गनिर्देशात् पुँल्लिङ्गान्न स्यादित्यत आह—**चटकादिति**। सूत्रे चटकाया इत्यपनीय चटकादिति वाच्यमित्यर्थः। तर्हि स्त्रीलिङ्गान्न स्यादत आह—**लिङ्गेति**। **स्त्रिया अपीति**। स्त्रीलिङ्गादप्यैरगित्यर्थः। **तयोरिति**। चटकस्य चटकायाश्चेत्यर्थः। ननु चटकेति कथम्, जातित्वान् ङीष्प्रसङ्गादित्यत आह—**अजादित्वादिति**। **गोधाया ढ्रक्**। **गौधेर इति**। गोधाया अपत्यमिति विग्रहः। ढ्रकि ढकारस्य एयादेशे 'लोपो व्योः–' इति यलोपः, कित्वादादिवृद्धिरिति भावः। **आरगुदीचाम्**। गोधाया आरग्वा स्यादित्यर्थः। **अन्यत इति**। आकारान्तादन्यद् अदन्तम्, तस्मादपि क्वचिद्विधानार्थमित्यर्थः। **जाडार इति**। रग्विधौ आकारो न श्रूयेतेति भावः। पण्डो नपुंसकः, तस्यापत्यं क्षेत्रजातत्वादिना। **क्षुद्राभ्यो वा**। **अङ्गहीना इति**। चक्षुरादिकतिपयावयवविकला इत्यर्थः। **शीलहीना इति**। सद्वृत्तहीना इत्यर्थः।

सौभगाय' इत्यत्र तूद्गात्रादित्वादञ् छान्दसत्वान्नोत्तरपदवृद्धिरित्याशयः । **चटकाया ऐरक्**। 'चटकायाः' इति स्त्रीलिङ्गनिर्देशात्पुंसि न स्यादित्याशङ्क्याह—**चटकस्येति वाच्यमिति**। एवं च 'चटकादैरक्' इत्येव सांप्रदायिकः पाठ इति न्यासकृदुक्तिर्वार्तिकविरोधादुपेक्ष्या। **तयोरेवेति**। तत्र टाबन्तात्तद्धितलुकि 'लुक्तद्धितलुकि' इति टापो लुकि जातिलक्षणङीषं बाधित्वा अजादिलक्षणष्टाबिति भावः । **गोधा**। **गौधेर इति**। ढस्य एयादेशे कृते 'लोपो व्योः–' इति यलोपः। **आरगुदीचाम्**। वचनादेव ढ्रग्ढगारकां पर्याये सिद्धे उदीचांग्रहणं पूजार्थम् । 'अरक्' इति न सूत्रितम् 'यस्येति च' इत्याकारलोपे 'गौधरः' इत्यनिष्टप्रसङ्गात । **अन्यत इति**। अनाकारान्ताल्लक्ष्यानुरोधेन कुतश्चिदित्यर्थः। **पण्डस्येति**। पण्डो नपुंसकः, तस्यापत्यं तु कृत्रिमादि-

---

१ 'पण्ड' इति बहुत्र पाठ

क्षुद्राः, ताभ्यो वा ढ्रक् । पक्षे ढक् । काणेरः, काणेयः । दासेरः, दासेयः । **११३८ पितृष्वसुश्छण् । (४-१-१३२)** अणोऽपवादः । पैतृष्वस्रीयः । **११३९ ढकि लोपः । (४-१-१३३)** पितृष्वसुरन्त्यस्य लोपः स्याड्ढकि । अत एव ज्ञापकाड्ढक् । पैतृष्वसेयः । **११४० मातृष्वसुश्च । (४-१-१३४)** पितृष्वसुर्यदुक्तं तदस्यापि स्यात् । मातृष्वस्रीयः, मातृष्वसेयः । **११४१ चतुष्पाद्भ्यो ढञ् । (४-१-१३५) ११४२ ढे लोपोऽकद्र्वाः । (६-४-१४७)** कद्रूभिन्नस्योवर्णान्तस्य भस्य लोपः स्याद् ढे परे । कामण्डलेयः । कमण्डलुशब्दश्चतुष्पाज्जातिविशेषे । **११४३ गृष्ट्यादिभ्यश्च । (४-१-१३६)** एभ्यो ढञ् स्यात् । अण्ढकोरपवादः । गार्ष्टेयः । मित्रयोरपत्यम्, ऋष्यणि प्राप्ते

यथेष्टपुरुषसंचारिण्य इति यावत् । 'अनियतपुंस्का अङ्गहीना वा क्षुद्राः, इति भाष्यम् । **पितृष्वसुश्छण् । पैतृष्वस्रीय इति** पितृष्वसुरपत्यमिति विग्रहः । छस्य ईयादेशे आदिवृद्धिः । सकारादृकारस्य यण् । **ढकि लोपः ।** पितृष्वसुरित्यनुवर्तते । अलोऽन्त्यपरिभाषया अन्त्यस्य लोपः । तदाह—**पितृष्वसुरन्त्यस्य लोप इति** । ननु पितृष्वसुरपत्ये ढक एव दुर्लभत्वात्कथं तस्मिन् परे लोपविधिरित्यत आह—**अत एवेति** । शुभ्रादित्वाद् ढगित्यन्ये । **पैतृष्वसेय इति** । ढकि अन्त्यस्य ऋकारस्य लोपे आदिवृद्धिः । 'मातृपितृभ्यां स्वसा' इति षत्वम् । **मातृष्वसुश्च** । चकाराच्छण् ढकि लोपश्चानुकृष्यते । तदाह—**पितृष्वसुर्यदुक्तमिति । चतुष्पाद्भ्यो ढञ् ।** चतुष्पादः पशवः, तद्विशेषवाचिभ्यः अपत्ये ढञित्यर्थः । **ढे लोपोऽकद्र्वाः** । भस्येत्यधिकृतम् 'ओर्गुणः' इत्यत ओरिति षष्ठ्यन्तेनानुवृत्तेन विशेष्यते । तदन्तविधिः । तदाह—**कद्रूभिन्नस्येति** । 'अलोऽन्त्यस्य' इत्यन्त्यलोपः । ओर्गुणापवादः । **कामण्डलेय इति** । कमण्डलोरपत्यमिति विग्रहः । ढकि एयादेशे आदिवृद्धौ उकारलोपः । ननु कमण्डलुशब्दवाच्यस्य जलपात्रस्याचेतनस्य कथमपत्ययोगः, तदाह—**कमण्डलुशब्दश्चतुष्पाज्जातिविशेष इति** । अत एव 'कमण्डलुपदे आदधीत' इति बह्वृचब्राह्मणं सगच्छत इति भावः । **गृष्ट्यादिभ्यश्च । अण्ढकोरिति** । गृष्टि, हलि, बलि, कुठि, अगस्ति, मित्रयु—एते गृष्ट्यादयः । अत्र अन्त्ययोः ऋषित्वादण् प्राप्तः । अन्येभ्यस्तु 'इतश्चानिञः' इति ढक् प्राप्त इति विवेकः । सकृत्प्रसूता मानुष्यादिरपि गृष्टिः, नतु गौरेव । ततश्च 'चतुष्पाद्भ्यः—' इत्यनेन न

रिति । **क्षुद्राभ्यः** । अर्थगतं स्त्रीत्वं शब्दे आरोप्य स्त्रीलिङ्गनिर्देशः । **गृष्ट्यादिभ्यश्च** । गृष्टि, हृष्टि, हलि, बलि, कुद्रि, अजगस्ति, मित्रयु । **अण्ढकोरपवाद इति** । इहान्त्ययोर्द्वयोर्ऋषित्वादण् प्राप्तः, अन्येभ्यस्तु 'इतश्चानिञः' इति

ढञ् । ११४४ केकयमित्रयुप्रलयानां यादेरियः । (७-३-२) एषां यकारादेरियादेशः स्याद् ञिति णिति किति च तद्धिते परे । इति इयादेशे प्राप्ते । ११४५ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि । (६-४-१७४) एतानि

प्राप्तिः । केकयमित्रयु । 'तद्धितेष्वचामादेः' इत्यतस्तद्धितग्रहणमनुवर्तते । 'अचो ञ्णिति' 'किति च' इत्यतो ञ्णितीति, कितीति च, तदाह—एषामिति । आदेशे यकारादकार उच्चारणार्थः । केकयस्यापत्यं स्त्री कैकेयी । 'जनपदशब्दात्–' इत्यञ् । मैत्रेयिकया श्लाघते, मित्रयोर्भाव इत्यर्थे 'गोत्रचरणात्–' इति वुञ् । प्रलयादागतं प्रालेयम् , अण् अत्र सर्वत्र यादेरियादेश इत्युदाहरणानि । प्राप्त इति । मित्रयोरपत्ये ढञि एयादेशे मित्रयु एय इति स्थिते ओर्गुणं बाधित्वा यु इत्यस्य इयादेशे सति आद्गुणे मैत्रेयेय इति प्राप्ते सतीत्यर्थः । दाण्डिनायन । एतानि निपात्यन्त इति । दण्डिनो हस्तिनश्चापत्यं दाण्डिनायनः, हास्तिनायनः । नडादित्वात्फक् । निपातनाट्टिलोपो न । अथर्वणा प्रोक्तो ग्रन्थ उपचारादथर्वा, तमधीते आथर्वणिकः । वसन्तादित्वात् ठक् । निपातनाच्च टिलोपः । जिह्माशिनोऽपत्यं जैह्माशिनेयः । शुभ्रादित्वाड्ढक् । निपातनाच्च टिलोपः । वाशिनोऽपत्यं वाशिनायनिः । 'उदीचां वृद्धात्–' इति फिञ् । निपातनाच्च टिलोपः । भ्रूणहन धीवन् एतयोर्भावे ष्यञ् , नकारस्य तकारश्च निपात्यते । नच 'हनस्तोऽचिण्णलोः' इत्यनेनैव तकारः सिद्ध इति शङ्क्यम् , 'धातोः कार्यमुच्यमानं तत्प्रत्यये भवति' इति परिभाषया 'हनस्तः–' इति तत्वस्य धातुविहितप्रत्यये पर एव प्रवृत्तेः । इदमेव तकारनिपातनमस्यां परिभाषायां ज्ञापकमिति 'मृजेर्वृद्धिः' इत्यत्र भाष्ये स्पष्टम् । तेन वार्त्रघ्नमित्यत्र तत्वं न । सरय्वां भवं सारवम् उदकम् । अणि यू इत्यस्य व इत्यादेशो निपात्यते । इक्ष्वाकोरपत्यमैक्ष्वाकः । जनपदशब्दात्क्षत्रियादञ् । उकारलोपो निपात्यते । बहुत्वे तु तद्राजत्वाल्लुक् । इक्ष्वाकवः । इक्ष्वाकुषु जनपदेषु भवोऽप्यैक्ष्वाकः । कोपधादण् । उकारलोपश्च । सूत्रे ऐक्ष्वाकेत्यत्र अञणन्तयोर्ग्रहणम् । बहुत्वे तद्राजत्वादञो लुक् अणस्तु नेति विशेषः । हिरण्यस्य विकारो हिरण्मयः । मयटि णकाराद्यकाराकार-

विवेकः । गार्ग्येय इति । सकृत्प्रसूता सर्वापि गृष्टिः, न तु गौरेव । अतोऽत्र न 'चतुष्पाद्भ्यः–' इत्यनेन ढञ्सिद्धिः । केकय । केकयस्यापत्यं स्त्री कैकेयी । 'जनपदशब्दात्क्षत्रियादञ्' । मैत्रेयिकया श्लाघ्यते । मित्रयूणां भावेनेत्यर्थः । 'गोत्रचरणाच्छ्लाघात्याकार–' इति वुञ् । तत्र हि लौकिकं गोत्रं गृह्यते, लोके च 'ऋषिशब्दो गोत्रमिति प्रसिद्धम्' इति काशिका । एतच्च यदा मित्रयुशब्दोऽभेदोपचारात्तदपत्यसंताने

निपात्यन्ते । इति युलोपः । मैत्रेयः । मैत्रेयी । **११४६ यस्कादिभ्यो गोत्रे ।** (२-४-६३) एभ्योऽपत्यप्रत्ययस्य लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम् । मित्र-

---

योर्लोपः । **इति युलोप इति** । मित्रयु एय इति स्थिते यु इत्यस्य लोपो निपातनादिति भावः । मैत्रेयीति 'टिड्ढाणञ्–' इति ङीप् । **यस्कादिभ्यो गोत्रे** । नेदं सूत्रमपत्याधिकारस्थम् , किंतु द्वैतीयीकम् । अतो गोत्रशब्देन प्रवराध्यायप्रसिद्धमेव गोत्रमिह विवक्षितम् , 'अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते' इति 'यूनि लुक्' 'स्त्रीपुंसाभ्याम्–' इत्यादिसूत्रभाष्ये सिद्धान्तितत्वात् । 'एयक्षत्रियार्ष–' इत्यतो लुगित्यनुवर्तते । 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति सूत्रं तद्राजवर्जमनुवर्तते ।

वर्तते तदा बोध्यम् , अन्यथा 'मित्रयूनाम्' इति बहुवचनान्तेन विग्रहो न स्यात् । प्रलयादागतं प्रालेयम् । इयादेशो वृद्धिं न बाधते 'अचामादेरचो वृद्धिः' 'यादेरियादेशः' इति भिन्नविषयत्वात्, अङ्गं तूभयोर्विशेषणं न तु कार्यीति हरदत्तः । आदिवृद्धेरपीदमेव सूत्रं विधायकमस्तु । किमनेन विषयभेदविचारेणेत्यन्ये । **दाण्डिनायन । निपात्यन्त इति** । दण्डिन्, हस्तिन, आभ्यां नडादित्वात्फक्, निपातनाट्टिलोपाभावः । वसन्तादिषु 'अथर्वन्' इति पठ्यते । 'अथर्वणा प्रोक्तो ग्रन्थ उपचारादथर्वा, तमधीते आथर्वणिकः' । शुभ्रादिषु 'जिह्माशिन्' इति पठ्यते तस्यापत्यं जैह्माशिनेयः । वाशिनोऽपत्यं वाशिनायनिः । 'उदीचां वृद्धात्–' इति फिञ् । भ्रूणहन्, धीवन्, अनयोः ष्यञि तकारोऽन्तादेशो निपात्यते । भ्रूणघ्नो भावो भ्रौणहत्यम् । धैवत्यम् । 'हनस्तोऽचिण्णलोः' इत्यनेनैव हन्तेस्तत्वे सिद्धे तकारनिपातनं ज्ञापयति 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति । तेन वार्त्रघ्नमित्यत्र तत्वं न । नन्वेवं 'प्रसूड्भ्याम्' इत्यादौ 'अनुदात्तस्य च–' इत्यम् दुर्वारः स्यात् । अम्विधौ धातोः स्वरूपग्रहणाभावात् । अत्राहुः—'मृजेर्वृद्धिः' इति सूत्रस्थभाष्यपर्यालोचनया 'धातोः कार्यमुच्यमानं तत्प्रत्यये भवति' इति ज्ञापनार्थं तकारनिपातनमिति व्याख्येयम् । तेन न कोऽपि दोष इति । सरयू इत्यस्याणि परे य्वादेर्वा निपात्यते । सरय्वां भवं सारवमुदकम् । इक्ष्वाकोरपत्यं ऐक्ष्वाकः । 'जनपदशब्दात्क्षत्रियादञ्' । उलोपो निपातनात् । इक्ष्वाकुषु जनपदेषु भवः 'कोपधादण्' ऐक्ष्वाकः । अत्राप्युलोपो निपातनादेव । अञणन्तयोर्द्वयोरप्येकश्रुत्या पाठात् । बहुत्वे तु 'अञस्तद्राजत्वाल्लुक्' 'अणस्तु न' इति विशेषः । तथा च रघुः 'इक्ष्वाकूणां दुरापेऽर्थे' इति । मुरारिस्त्वाह 'ऐक्ष्वाकेषु च मैथिलेषु च फलन्त्वस्माकमद्याशिषः' इति । हिरण्यस्य विकारो हिरण्मयः । मयटि यादेर्लोपोऽत्र निपात्यते । **यस्कादिभ्यो ।** अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इत्याशयेनाह—**अपत्यप्रत्ययस्येति ।**

यवः। ११४७ **अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च।** (२-४-६५) एभ्यो गोत्रप्रत्ययस्य लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम्। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अङ्गिरसः। ११४८ **बह्वच इञः प्राच्यभरतेषु।** (२-४-६६) बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक्स्यात्। पन्नागाराः। युधिष्ठिराः। ११४९ **न गोपवनादिभ्यः।** (२-४-६७) एभ्यो गोत्रप्रत्ययस्य लुक् न स्यात्। बिदाद्यन्तर्गणोऽयम्। गौपवनाः। शैग्रवाः। ११५० **तिककितवादिभ्यो द्वन्द्वे।** (२-४-६८) एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक्स्याद् द्वन्द्वे। तैकायनयश्च कैतवायनयश्च, 'तिकादिभ्यः फिञ्' (सू ११७८) तस्य लुक्, तिककितवाः। ११५१ **उपकादिभ्योऽन्यतरस्याम-**

तदाह—**एभ्योऽपत्यप्रत्ययस्येति।** **मित्रयव इति।** मित्रयोरपत्यानि पुमांस इत्यर्थः। गृष्ट्यादिढको लुकि आदिवृद्धिनिवृत्तिः। **अत्रिभृगु** पूर्वसूत्राद्गोत्र इति, तत्र यदनुवृत्तं तच्च सर्वमिहानुवर्तते, तदाह—**एभ्यो गोत्रेति।** अत्रेः, भृगोः, कुत्सस्य, वसिष्ठस्य, गोतमस्य, अङ्गिरसश्च अपत्यानि पुमांस इति विग्रहाः। तत्र अत्रेः 'इतश्चानिञः' इति ढकोऽनेन लुक्। इतरेभ्यस्तु ऋष्यण इति बोध्यम्। लुकि आदिवृद्धेर्निवृत्तिः। **बह्वच इञः।** प्राच्ये उदाहरति—**पन्नागारा इति।** पन्नागारस्यापत्यानीति विग्रहः। अत इञो लुक्। भरतगोत्रे उदाहरति—**युधिष्ठिरा इति।** युधिष्ठिरस्यापत्यानीति विग्रहः। कुरुलक्षणं ण्यं बाधित्वा बाह्वादित्वाद् इञ्, तस्य लुक्। अबहुत्वे तु यौधिष्ठिरिः। **न गोपवनादिभ्यः।** **बिदाद्यन्तर्गणोऽयमिति।** ततश्च अञः 'यञञोश्च' इति प्राप्तस्य लुङ् नेति भावः। **तिककितव।** **तैकायनयश्च कैतवायनयश्चेति।** द्वन्द्वविग्रहप्रदर्शनम्। **तिककितवा इति।** द्वन्द्वे

'ण्यक्षत्रियार्ष–' इत्यतो लुगित्यनुवर्तते, 'तद्राजस्य–' इति सूत्राद् 'बहुषु तेनैवास्त्रियाम्' इति च, तदाह—**लुक् स्यादित्यादि।** तत्कृते इति किम्, प्रिययास्काः। बहुत्वे किम्, यास्कः। शिवायण्। यस्क, लुह्य, द्रुह्य, कर्णाटक, वस्ति, कुद्रि, मित्रयु, इत्यादि। **अत्रि।** **गोत्रप्रत्ययस्येति।** अत्रिशब्दाद् 'इतश्चानिञः' इति ढक्। इतरेभ्यस्तु ऋष्यणिति बोध्यम्। भरतगोत्रे उदाहरति—**युधिष्ठिरा इति।** बहुष्वेव लुक्। नेह यौधिष्ठिरिः। कुरुलक्षणं ण्यं बाधित्वा बाह्वादित्वादिञ्। **बिदाद्यन्तर्गणोऽयमिति।** 'यञञोश्च' इति लुगत्र प्राप्नोतीति भावः। **तिककितवादिभ्यो।** यद्यपि द्वन्द्वरूपाण्येव गणे पठ्यन्ते, तिकादीनि पूर्वपदानि, कितवादीन्युत्तरपदानि, तथापि 'तिकादिभ्यः' इत्युक्ते पूर्वपदेष्वेव लुगाशङ्क्येत, इष्यते तूत्तरपदेष्वपि, अतः 'तिककितवादिभ्यः' इत्युक्तम्। **तिककितवा इति।** अन्येऽ-

द्वन्द्वे । (२-४-६९) एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुग्वा स्याद् द्वन्द्वे चाद्वन्द्वे च। [औपकायनाश्च लामकायनाश्च, 'नडादिभ्यः फक्' (सू ११०१), तस्य लुक्, उपकलमकाः, औपकायनलामकायनाः। भ्राष्ट्रककपिष्ठलाः, भ्राष्ट्रकिकापिष्ठलयः। उपकाः, औपकायनाः। लमकाः, लामकायनाः।] ११५२ आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । (२-४-७०) एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक्स्यात्, अवशिष्टस्य प्रकृतिभागस्य यथासंख्यम् अगस्ति कुण्डिनच्

इति सप्तमीनिर्देशात् पदद्वयादपि फिञो लुक्। **उपकादिभ्यो**। चकारमध्याहृत्याह— **द्वन्द्वे चेति**। एवं च अस्वरितत्वादेव पूर्वसूत्राद् द्वन्द्वग्रहणानुवृत्त्यैव सिद्धे अद्वन्द्वग्रहणं स्पष्टार्थमेव। न च द्वन्द्वे नेति निषेध एव किं न स्यादिति वाच्यम्, द्वन्द्वानामपि गणे पाठात्। तदेतत्सूचयन् द्वन्द्वमुदाहरति— **भ्राष्ट्रककपिष्ठला इति**। इञो वा लुक्। अद्वन्द्वे उदाहरति— **लमकाः, लामकायना इति**। अश्वादि-

भ्यन्त्रोदाहर्तव्याः—औपकायनाश्च लामकायनाश्च, 'नडादिभ्यः फक्' तस्य लुक्। उपकलमकाः। भ्राष्ट्रकयश्च कापिष्ठलयश्च 'अत इञ्' तस्य लुक् भ्राष्ट्रककपिष्ठलाः। कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च 'अत इञ' तस्य लुक् कृष्णाजिनकृष्णसुन्दरा इत्यादि। **उपकादिभ्यो**। अद्वन्द्वग्रहणं 'द्वन्द्वे' इत्येतन्नाधिक्रियत इति स्फुटीकरणार्थम्। उपकादीनां मध्ये त्रयो द्वन्द्वास्तिककितवादिषु पठ्यन्ते 'उपकलमकाः' इत्यादयस्तेषां पूर्वेण नित्यमेव लुक्, अद्वन्द्वे त्वनेन विकल्प इति ज्ञेयम्। भाष्ये 'भ्राष्टकिकापिष्ठलयः' इत्युदाहरणात्तिककितवादिष्वस्य पाठोऽनार्ष इति कैयटः। तेनात्र द्वन्द्वेऽपि विकल्प एवोचित इत्याशयेनोदाहरति—**भ्राष्ट्रककपिष्ठला इत्यादि**। तिककितवादिषु पठितानामनेनाद्वन्द्व एव विकल्प इत्याशयेनोदाहरति—**लमकाः। लामकायना इति**। एवमन्येऽप्युदाहर्तव्याः। उपकाः औपकायनाः, भ्राष्ट्रकाः भ्राष्ट्रकायना इत्यादि। **आगस्त्य**। अगस्त्यशब्दादृष्यण्, कुण्डिनीशब्दात्तु गर्गादियञ्। ननु कुण्डिनीशब्दस्य यञि 'भस्याढे—' इति पुंवद्भावे 'नस्तद्धिते' इति टिलोपः प्राप्नोति। न च 'संयोगादिश्च' इति प्रकृतिभावः शङ्क्यः, 'अणि' इति तत्रानुवर्तनात्। मैवम्, अस्मादेव निपातनात् तस्याप्रवृत्तेः कौण्डिन्यः सिध्यति। चकारस्त्वन्तोदात्तार्थः। मध्योदात्तः कुण्डिनीशब्दः। कुण्डमस्त्यस्या इति मत्वर्थीयस्येनेरुदात्तत्वादादेशस्यापि कुण्डिनशब्दस्यान्तरतम्यान्मध्योदात्तत्वात्। **अवशिष्टस्य प्रकृतिभाग-**

१ बन्धनीभूतः पाठो बालमनोरमायां न व्याख्यातः, अथापि पुस्तकान्तर संवादाय धृतः। २ नायं मूलपाठो बालमनोरमासंमतः। कौमुदीपुस्तकान्तरेष्वपि क्वचिन्न दृश्यते। क्वचिच्च 'उपकाः, औपकाः, लमकाः, लामकाः' इत्येव दृश्यते।

एतावादेशौ स्तः । अगस्तयः । कुण्डिनाः । ११५३ राजश्वशुराद्यत् । (४-४-१३७) 'राज्ञो जातावेवेति वाच्यम्' (वा २६२७) । ११५४ ये चाभावकर्मणोः । (६-४-१६८) यादौ तद्धिते परेऽन्प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । श्वशुर्यः । जातिग्रहणाच्छूद्रादावुत्पन्नो राजनः । ११५५ अन् । (६-४-१६७) अणि अन् प्रकृत्या स्यात् । इति टिलोपो न । अभावकर्मणोः किम्—राज्ञः कर्म भावो वा राज्यम् । ११५६ संयोगादिश्च । (६-४-१६६) इन् प्रकृत्या स्यादणि परे । चक्रिणोऽपत्यं चाक्रिणः ।

फञो लुग्विकल्पः । उपका औपकायना इत्याद्यप्युदाहार्यम् । **आगस्त्य । अगस्तयः । कुण्डिना इति ।** अगस्त्यशब्दादृष्यणो लुक् प्रकृतेरगस्त्यादेशः । कौण्डिन्यशब्दो गर्गादियञन्तः । बहुत्वे यञो लुक् । प्रकृतेः कुण्डिनादेशश्च । 'यस्कादिभ्यो गोत्रे' इत्यारभ्य 'आगस्त्यकौण्डिन्ययोः—' इत्यन्तं द्वैतीयीकम् । अथ प्रकृतं चातुर्थिकम् । **राजश्वशुराद्यत् ।** राजन्शब्दात् श्वशुरशब्दाच्चापत्ये यत्प्रत्ययः स्यादित्यर्थः । क्रमेण अणिञोरपवादः । **राज्ञो जातावेवेति ।** जातिः समुदायवाच्या चेदित्यर्थः । **ये चाभावकर्मणोः ।** 'अन्' इति पूर्वसूत्रमनुवर्तते । 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति । अन्नाधिकारलब्धप्रत्ययो यकारेण विशिष्यते । तदादिविधिः । तदाह—**यादाविति । राजन्य इति ।** क्षत्रियात् क्षत्रियायां स्वभार्यायामुत्पन्नो राजन्य इति धर्मशास्त्रेषु प्रसिद्धम् । यत्प्रत्यये प्रकृतिभावान्न टिलोपः । **शूद्रादाविति ।** क्षत्रियात् शूद्रायां वा तदन्यस्यां वा अनूढायाम् उत्पन्न इत्यर्थः । **राजन इति ।** अणि रूपम् । तत्र 'नस्तद्धिते' इति टिलोपे प्राप्ते । **अन् ।** 'इनण्यनपत्ये' इत्यतः अणीत्यनुवर्तते, 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति च, तदाह—**अणीति । राज्यमिति ।** 'गुणवचनब्राह्मणादिभ्यः' इति ष्यञ् । टिलोपः । **संयोगादिश्च । इन् प्रकृत्येति ।** 'इनण्यनपत्ये' इत्यतः 'प्रकृत्यैकाच्' इत्यतश्च तदनुवृत्तेरिति भावः । **चक्रिणोऽपत्यं चाक्रिण इति ।** 'इनण्यनपत्ये' इत्यत्रानपत्ये इति

स्येति । न च प्रत्ययविशिष्टस्यादेशमात्रं विधीयतां किं लुग्विधानेनेति वाच्यम्, अगस्तीयाश्छात्रा इत्यनापत्तेः, लुकि हि सति 'गोत्रेऽलुगचि' इति लुकि प्रतिषिद्धे वृद्धत्वाच्छः सिध्यति । प्रत्ययविशिष्टस्यादेशविधौ तु वृद्धत्वापगमे शैषिकोऽणेव स्यात् । कौण्डिनाश्छात्रा इति तूभयथापि सिध्यत्येव । छापवादस्य 'कण्वादिभ्यो गोत्रे' इत्यण्प्रत्ययस्य प्रवृत्त्या तत्र विशेषाभावात् । **राजश्वशुराद्यत् ।** क्रमेणाणिञोरपवादः । **जातावेवेति ।** प्रकृतिप्रत्ययसमुदायेन जातिश्चेद्वाच्येत्यर्थः । प्रत्ययस्त्वपत्य एव । एवं च पङ्कजादिवद्योगरूढ इति फलितोऽर्थः । **अन् टिलोपो नेति ।** 'नस्तद्धिते'

११५७ न मपूर्वोऽपत्येऽवर्मणः । (६-४-१७०) मपूर्वोऽन् प्रकृत्या न स्यादपत्येऽणि । भाद्रसामः । मपूर्वः किम्–सौत्वनः । अपत्ये किम्–चर्मणा परिवृतश्चार्मणो रथः । अवर्मणः किम्–चक्रवर्मणोऽपत्यं चाक्रवर्मणः । 'वा हितनाम्न इति वाच्यम्' (वा ४२१५) । हितनाम्नोऽपत्यं हैतनामः, हैतनामनः । **११५८ ब्राह्मो जातौ । (६-४-१७१)** योगविभागोऽत्र कर्तव्यः । ब्राह्म इति निपात्यतेऽनपत्येऽणि । ब्राह्मं हविः । ततो जातौ । अपत्ये जातावणि

पर्युदासादप्राप्तिः । **न मपूर्वोऽपत्येऽवर्मणः । भाद्रसाम इति ।** भद्रसाम्नोऽपत्यमिति विग्रहः । अणि टिलोपः । अनो मपूर्वत्वान्न प्रकृतिभावः । **सौत्वन इति ।** सुत्वनोऽपत्यमिति विग्रहः । मपूर्वत्वाभावात्प्रकृतिभावः । **चार्मण इति ।** 'परिवृतो रथः' इत्यणि टिलोपः । अणः आपत्यत्वाभावात्प्रकृतिभावः । **वा हितनाम्न इति ।** 'न मपूर्वः' इति प्रतिषेध इति शेषः । **ब्राह्मो जातौ ।** ब्रह्मन्शब्दादपत्ये अणि 'न मपूर्वोऽपत्ये–' इति प्रकृतिभावनिषेधो जातावेवेत्यर्थः फलति । तथा सति ब्रह्मणोऽपत्यं ब्राह्मण इति जातिविशेषे न सिध्येत्, 'न मपूर्वः–' इति प्रकृतिभावनिषेधे सति 'नस्तद्धिते' इति टिलोपस्य दुर्वारत्वात् । किंच ब्रह्मा देवता अस्य ब्राह्मं हविरिति न सिध्येत्, 'न मपूर्व–' इति प्रकृतिभावनिषेधस्य जातावेवेति नियमितत्वेन 'अन्' इति प्रकृतिभावाट्टिलोपासंभवात्, अत आह—**योगविभाग इति ।** 'ब्राह्मः' इत्येकं सूत्रम् । तत्र 'इनण्यनपत्ये' इत्यतः अनपत्येऽणीत्यनुवर्तते, तदाह—**ब्राह्म इति निपात्यते अनपत्येऽणीति ।** तथाच ब्रह्मन्शब्दादनपत्येऽणि अनिति प्रकृतिभावनिवृत्तेष्टिलोपः फलित इति मत्वोदाहरति—**ब्राह्मं हविरिति ।** ब्रह्मा देवता अस्येति विग्रहः । 'सास्य देवता' इत्यण् । **ततो जाताविति ।** ततो ब्राह्म

इति प्राप्तष्टिलोपो नेत्यर्थः । **ब्राह्मो जातौ । योगविभागोऽत्रेति ।** एकयोगत्वे त्वारम्भसामर्थ्यादनपत्ये जातौ 'ब्राह्मी' इत्यत्र प्राप्तटिलोपसिद्धावपि ब्राह्मण इति न सिध्येत् । 'अन्' इति प्रकृतिभावस्य 'न मपूर्वोऽपत्ये–' इति निषेधाट्टिलोपस्य दुर्वारत्वात् । किंच जातौ ब्राह्मणमित्यादि न सिध्येत्, 'अन्' इति प्रकृतिभावस्य दुर्वारत्वादिति भावः । **ब्राह्म इति ।** इह 'अपत्ये' इति न सम्बध्यते । अन्यथा निपातनमिदं व्यर्थं स्यात् 'न मपूर्व–' इति प्रकृतिभावनिषेधाट्टिलोपसिद्धेरित्याशयेनाह—**अनपत्येऽणीति । ब्राह्ममिति ।** 'ब्राह्मो मुहूर्तः, ब्राह्मः स्थालीपाकः' इत्याद्यप्युदाहरणम् । नन्वेवमपि ब्राह्मणो न सिध्यति 'न मपूर्वः–' इति प्रकृतिभावनिषेधादपत्येऽणि 'नस्तद्धिते' इति टिलोपप्रवृत्तेरत आह—**जाताविति ।** इह

---

१ 'ब्रह्म' इति क. ख. ।

ब्रह्मणष्टिलोपो न स्यात्। ब्रह्मणोऽपत्यं ब्राह्मणः। अपत्ये किम्-ब्राह्मी ओषधिः।
११५९ औक्षमनपत्ये। (६-४-१७३) अणि टिलोपो निपात्यते। औक्षं पदम्। अनपत्ये किम्- उक्ष्णोऽपत्यमौक्ष्णः। **११६० षपूर्वहन्धृतराज्ञामणि** (६-४-१३५) षपूर्वो योऽन् तस्य हनादेश्च भस्यातो लोपोऽणि। औक्ष्णः। ताक्ष्णः। औपघ्नः। धृतराज्ञोऽपत्यं धार्तराज्ञः। षपूर्व इति किम्-साम्नोऽपत्यं सामनः। अणि किम्-ताक्षण्यः। **११६१ क्षत्राद्धः।** (४-४-१३८) क्षत्रियः। जातौ इत्येव, क्षात्त्रिरन्यः। **११६२ कुलात्खः।** (४-४-१३९) कुलीनः। तदन्तादपि, उत्तरसूत्रे अपूर्वपदाद् इति लिङ्गात्। आढ्यकुलीनः।

इति सूत्रात्पृथगेव 'जातौ' इति सूत्रं कर्तव्यमित्यर्थः। इह 'न मपूर्वोऽपत्येऽवर्मणः' इति सूत्रादपत्ये इति 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति चानुवर्तते, तदाह—**अपत्ये जाताविति। ब्राह्मण इति।** ब्रह्मणः सकाशात्सजातीयायां भार्यायामुत्पन्न इत्यर्थः। योगविभागस्त्वयं भाष्ये स्पष्टः। **औक्षम्।** शेषपूरणेन सूत्रं व्याचष्टे—**अणि टिलोपो निपात्यत इति।** 'अन्' इति प्रकृतिभावापवाद इति भावः। **औक्षमिति।** टिलोपे रूपम्। **औक्ष्ण इति।** अपत्येऽणि टिलोपाभावे अल्लोप इति भावः। ननु प्रकृतिभावादल्लोपो न स्यादत आह—**षपूर्वहन्।** 'अल्लोपोऽनः' इत्यनुवर्तते। भस्येत्यधिकृतम्। तदाह—**षपूर्व इति। ताक्ष्ण इति।** 'तक्ष्णोऽण उपसंख्यानम्' इति कारिलक्षणण्यस्यापवादोऽण्। **ताक्षण्य इति।** 'सेनान्तलक्षणकारिभ्यश्च' इति ण्यः। **क्षत्राद्धः।** अपत्ये इति शेषः। **क्षत्रिय इति।** घस्य इयादेशे 'यस्येति च' इत्यकारलोपः। **क्षात्त्रिरन्य इति।** क्षत्राच्छूद्रादावुत्पन्न इत्यर्थः। **कुलात्खः।** अपत्ये इति शेषः। **कुलीन इति।** खस्य ईनादेशः। ननु 'समासप्रत्ययविधौ—' इति तदन्तविधिनिषेधाद् आढ्यकुलीन इति कथमित्यत आह—**तदन्तादपीति। आढ्यकुलीन इति।** आढ्यकुलशब्दात्कर्मधार-

---

भगड्ड्कप्लुत्या 'अपत्ये' इत्यनुवर्तते, 'न' इति च तदेतदाह—**अपत्ये जाताविस्यादिना।** अयमत्रार्थः—'अपत्ये जातौ ब्राह्मणशब्दे टिलोपो न भवति' इति। केचिदिह 'अजातौ' इति छित्त्वा 'जातौ न भवति' इति व्याचक्षते। तस्मिंस्तु व्याख्याने 'न' इति नानुवर्तनीयम्। जातौ किम्, ब्राह्मो नारदः। **ताक्ष्ण इति।** शिवादित्वात्, 'तस्येदम्' इति वाण्। **ताक्षण्य इति।** कारिलक्षणो ण्यः। **कुलात्खः।** केवलात्कुलशब्दाद् 'अपूर्वपदात्—' इत्यादिना विशेषविहिताभ्यामपि। यड्ढकञ्भ्यां खो न बाध्यते, तद्विधावन्यतरस्यांग्रहणादित्याशयेनाह—**कुलीन इति। लिङ्गादिति।** अन्यथा 'ग्रहणवता—' इति तदन्तविधिप्रतिषेधादपूर्वपदग्रहणं व्यर्थं स्यादिति भावः।

११६३ अपूर्वपदादन्यतरस्यां यड्ढकञौ । (४-४-१४०) कुलाद् इत्येव । पक्षे खः । कुल्यः, कौलेयकः, कुलीनः । पदग्रहणं किम्—बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः । ११६४ महाकुलादञ्खञौ । (४-४-१४१) अन्यतरस्याम् इत्यनुवर्तते । पक्षे खः । माहाकुलः, माहाकुलीनः, महाकुलीनः । ११६५ दुष्कुलाड्ढक् । (४-१-१४२) पूर्ववत्पक्षे खः । दौष्कुलेयः, दुष्कुलीनः । ११६६ स्वसुश्छः । (४-१-१४३) स्वस्रीयः । ११६७ भ्रातुर्व्यच्च । (४-१-१४४) चाच्छः । अयोऽपवादः । भ्रातृव्यः, भ्रात्रीयः । ११६८ व्यन्सपत्ने । (४-१-१४५) भ्रातुर्व्यन् स्यादपत्ये, प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये । भ्रातृव्यः शत्रुः । 'पाप्मना भ्रातृव्येण' इति तूपचारात् ।

यात्खः । कुल आढ्यत्वप्रतीतिरत्र फलम् । कुलीनशब्देन कर्मधारये तु तदप्रतीतिरिति भेदः । **अपूर्वपदादन्यतरस्याम् । कुलादित्येवेति** । पूर्वपदरहितात् कुलादपत्ये यड्ढकञौ वा स्त इत्यर्थः । **पक्षे ख इति** । यड्ढकञोरभावपक्ष इत्यर्थः । **बहुकुल्य इति** । 'विभाषा सुपः—' इति बहुच्प्रत्ययो न पदम् । अतः पूर्वपदरहितत्वाद् यड्ढकञ्खा भवन्त्येवेत्यर्थः । **महाकुलादञ्खञौ । अनुवर्तत इति** । अन्यथा महाविभाषाधिकारे अपवादेन मुक्ते उत्सर्गस्याप्रवृत्तेः 'पीलाया वा' इत्यत्रोक्तत्वात्पूर्वसूत्रोक्तः खो न स्यादिति भावः । तदाह—**पक्षे ख इति** । तथा सति आदिवृद्धिर्नेति भावः । **दुष्कुलाड्ढक् । पूर्ववदिति** । अन्यतरस्यांग्रहणानुवृत्तेरिति भावः । **स्वसुश्छः** । अपत्य इति शेषः । **स्वस्रीय इति** । छस्य ईयादेशः, ऋकारस्य यण् । **भ्रातुर्व्यच्च** । तकारः 'तित्स्वरितम्' इति स्वरार्थ इति बोध्यम् । **व्यन् सपत्ने । अपत्य इति** । प्रत्ययेनापत्यमुच्यते । भ्रातृशब्दार्थस्तु न विवक्षितः । तथा च 'भ्रातृशब्दोत्तरत्वे व्यन्प्रत्ययार्थः शत्रुः' इति भाष्ये स्पष्टम् । ननु 'पाप्मना भ्रातृव्येण' इति कथम्, पाप्मनोऽपत्यत्वाभावादित्यत आह—**पाप्मना भ्रातृव्येण इति तूपचारादिति** । हिंसकत्वगुणयोगाल्लाक्षणिक

आढ्यकुलीन इति । आढ्यश्चासौ कुलीनश्चेति कुलीनविशेषणत्वे कुलस्याढ्यत्वं न प्रतीयते । किं च ईकार उदात्त इति स्वरेऽपि विशेषोऽस्तीति भावः । **बहुकुल्य इति** । 'विभाषा सुपः—' इति बहुच्प्रत्ययो न पदमिति अपूर्वपदत्वात्प्रत्ययत्रयं भवत्येवेति भावः । **व्यन्स्यादिति** । भ्रातुरपत्यं यदि शत्रुः तदा भ्रातृशब्दाद् व्यन्नेव स्यात् । न तु व्यच्छौ इत्यर्थः । **समुदायेनेति** । तद्धितप्रत्ययेन शत्रुरूपेऽपत्ये वाच्य इत्यर्थः । यत्तु वृत्तिकृतोक्तम् 'अपत्यार्थोऽत्र नास्त्येव' इति, तदुपेक्ष्यं भाष्यविरोधादिति मनसि निधायाह—**पाप्मनेति** । श्रुतिगतभ्रातृव्यशब्दस्य गतिं

११६९ रेवत्यादिभ्यष्ठक्। (४-१-१४६) **११७० ठस्येकः।** (७-३-५०) अङ्गात्परस्य ठस्येकादेशः स्यात्। रैवतिकः। **११७१ गोत्रस्त्रियाः कुत्सने ण च।** (४-१-१४७) गोत्रं या स्त्री तद्वाचकाच्छब्दाण्णठकौ स्तः कुत्सायाम्। सामर्थ्याद्यूनि। गार्ग्या अपत्यं गार्गः, गार्गिको वा जाल्मः। 'भस्याढे तद्धिते' इति पुंवद्भावाद्गार्ग्यशब्दाण्णठकौ। 'यस्य–' (सू ३११) इति लोपः।

इत्यर्थः। **रेवत्यादिभ्यष्ठक्।** अपत्य इति शेषः। ढगाद्यपवादः। **ठस्येकः।** अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते। तदाह—**अङ्गात्परस्य ठस्येति।** ठकारस्येत्यर्थः। **रैवतिक इति।** रेवत्या अपत्यमिति विग्रहः। ठकि ककार इत्, अकार उच्चारणार्थः। ठकारस्य इकः अदन्त आदेशः। अङ्गात्किम्? कमठ इत्यत्र ठकारस्य न भवति। अत्र भाष्ये अङ्गसबन्धिठस्येति व्याख्याने कर्मठ इत्यत्र सुपं प्रति कर्मठशब्दस्याङ्गत्वात्तदीयठस्य इकादेशमाशङ्क्य अङ्गसंज्ञानिमित्तं यष्ठकारस्तस्येको भवति, तादृशश्च ठकारः प्रत्यय एव भवति, नचेह ठकारः प्रत्यय इति समाहितम्। ततश्च ठकि अकार उच्चारणार्थः, ठकार एव प्रत्यय इति विज्ञायते। 'ठस्येति संघातग्रहणम्' इत्यपि भाष्ये स्थितम्। अस्मिन्पक्षे ठकि अकार उच्चारणार्थो न भवति, संघात एव प्रत्ययः, इकादेशे अकार उच्चारणार्थ एवेत्यलम्। **गोत्रस्त्रियाः।** ण इति लुप्तप्रथमाकम्। चात् ठगनुकृष्यते। तदाह—**गोत्रं या स्त्री इत्यादिना सामर्थ्यादिति।** 'एको गोत्रे' इति नियमादिति भावः। **गार्ग्या अपत्यमिति।** गर्गस्य गोत्रापत्यं स्त्री गार्गी। 'गर्गादिभ्यः–' इति यञ्। 'यञश्च' इति ङीप्। 'यस्येति च' इत्यकारलोपः। 'हलस्तद्धितस्य' इति यकारलोपः। गार्ग्या अपत्यं युवेति विग्रहः। पितुरविज्ञाने मात्रा व्यपदेशः कुत्सनम्। यद्यपि णप्रत्यये ठक इकादेशे च 'यस्येति च' इति लोपे गार्गो गार्गिक इति सिध्यति। तथापि वस्तुस्थितिमाह—**पुंवद्भावादिति।** 'भस्याढे–' इति पुंवत्त्वे सति ङीपो निवृत्तौ भूतपूर्वगत्या स्त्रीवाचकत्वमादाय गार्ग्यशब्दाण्णठकावित्यर्थः।

वदति—**उपचारादिति।** 'अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम्' इत्यमरः। न हि पापं भ्रातुरपत्यं भवतीत्यतो भाक्त एवायं प्रयोग इति भावः। **रेवत्या।** रेवती, अश्वपाली, मणिपाली, द्वारपाली, इत्यादि। **ठस्येकः।** 'अङ्गस्य' इत्यनुवर्तनादाह—**अङ्गात्परस्येति।** 'अङ्गात्' इति ठकारविशेषणादठचष्ठकारस्य न भवति। कर्मठः। **गोत्रस्त्रियाः।** णित्वं तु 'ग्लुचुकायन्या अपत्यं ग्लौचुकायनो जाल्मः' इत्यत्र फिञन्ताण्णे वृद्ध्यर्थमिति बोध्यम्। **सामर्थ्याद्यूनीति।** 'गोत्राद्परो गोत्रप्रत्ययो न' इत्युक्तत्वादिति भावः। **गार्ग्या अपत्यमिति।** पितुरसंविज्ञाने मात्रा व्यपदेशात् कुत्सा। गोत्रेति किम्, कारिकेयो जाल्मः। स्त्रियाः किम्,

'आपत्यस्य-' (सू १०८२) इति यलोपः । ११७२ **वृद्धाट्ठक् सौवीरेषु बहुलम्।** (४-१-१४८) सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीरगोत्रायूनि बहुलं ठक्स्यात्कुत्सायाम्। भागवित्तेः, भागवित्तिकः। पक्षे फक्। भागवित्तायनः। ११७३ **फेश्छ च ।** (४-१-१४९) फिञन्तात्सौवीरगोत्रादपत्ये छः ठक्च कुत्सने। गम्ये यमुन्दस्यापत्यं यामुन्दायनिः, तिकादित्वात्फिञ् । तस्यापत्यं यामुन्दायनीयः, यामुन्दायनिकः। कुत्सने किम्-यामुन्दायनिः। औत्सर्गिकस्याणो 'यस्करिञ-' (सू १२७६) इति लुक् । सौवीर इति किम्-तैकायनिः। ११७४ **फाण्टाहृतिमिमताभ्यां णफिञौ।** (४-१-१५०) **सौवीरेषु।** नेह यथासंख्यम्, अल्पाच्तरस्य परनिपातात्लिङ्गाद् इति वृत्तिकारः। भाष्ये तु 'यथासंख्यमेव' इति स्थितम्। फाण्टाहृतः, फाण्टाहृतायनिः। मैमतः, मैमतायनिः।

नच 'वृद्धिनिमित्तस्य च-' इति पुंवत्त्वनिषेधः शङ्क्यः, सौत्रस्यैवायं निषेधो न तु 'भस्याढे-' इति वार्तिकस्येत्युक्तत्वात्। 'भस्याढे-' इत्यस्य तद्धिते विवक्षिते प्रवृत्तिमभ्युपगम्य गार्ग्यशब्दादित्युक्तम्। तच्च समूहाधिकार 'भिक्षादिभ्योऽण्'इत्यत्र स्फुटीभविष्यति। स्त्रियाः किम्? औपगवस्यापत्यं युवा औपगविः। प्रकरणादिगम्या कुत्सा। गोत्रेति किम्? कारिकेयः। णस्य णित्त्वं तु ग्लुचुकायन्या अपत्यं युवा ग्लौचुकायन इत्यत्र वृद्ध्यर्थम्। **वृद्धाट्ठक्सौवीरेषु।** पूर्वसूत्राद्गोत्रेत्येकदेशोऽनुवर्तते। सौवीरेष्विति प्रकृतिविशेषणम्। तदाह—**वृद्धादिति।** 'वृद्धिर्यस्याचामादिः-' इति वृद्धसंज्ञकादित्यर्थः। ठग्ग्रहणं णस्य अनुवृत्तिनिवृत्त्यर्थम्। **भागवित्तेरिति।** भगवित्तस्य सौवीरं गोत्रापत्यं भागवित्तिः, तस्यापत्यं युवेत्यर्थे ठकि इकादेशे भागवित्तिक इति रूपमित्यर्थः। **पक्षे फगिति।** 'यञिञोश्च' इत्यनेनेति शेषः। **फेश्छ च।** छेति लुप्तप्रथमाकम्। **यमुन्दस्येति।** यमुन्दो नाम सुवीरदेशे कश्चित्। **यामुन्दायनिरिति।** यामुन्दायनेरपत्यं युवेत्यर्थे कुत्सनाभावात् छठगभावे 'तस्यापत्यम्' इत्यण्। 'ण्यक्षत्रियार्ष-' इति तस्य लुगित्यर्थः। **तैकायनिरिति।** तैकायनेरपत्यं युवेत्यर्थे असौवीरत्वात् छठगभावे 'तस्यापत्यम्' इत्यण्। 'ण्यक्षत्रिय-' इति तस्य लुगिति भावः। **फाण्टाहृति। सौवीरेष्विति।** शेषपूरणमिदम्। सौवीरगोत्रादित्यर्थः। फाण्टाहृतस्य गोत्रापत्यं फाण्टाहृतिः, अत इञ्। तस्यापत्यं युवेति विग्रहः। **मैमत इति।** मिमतस्यापत्यमिति विग्रहः। मिमतशब्दे सौवीर-

---

औपगवस्यापत्यम् औपगविर्जाल्मः । कुत्सनेति किम्, गार्ग्यो माणवकः । **फाण्टाहृति ।** 'कुत्सने' इति निवृत्तम्। वृत्तिमते णित्वस्य फलमस्तीति ध्वनयन्नुदाहरति— **मैमत इति।** न च भाष्यमतेऽपि 'फाण्टाहृताभार्यः' इत्यत्र 'वृद्धि-

११७५ कुर्वादिभ्यो ण्यः। (४-१-१५१) अपत्ये। कौरव्या ब्राह्मणाः। वावदूक्याः। 'सम्राजः क्षत्रिये' (ग सू ७२)। साम्राज्यः। साम्राजोऽन्यः। **११७६ सेनान्तलक्षणकारिभ्यश्च।** (४-१-१५२) एभ्यो ण्यः। 'एति संज्ञायाम्–' (सू १०२३) इति सस्य षः। हारिषेण्यः। लाक्षण्यः। कारिः शिल्पी, तस्मात् तान्तुवाय्यः। कौम्भकार्यः। नापित्यः। **११७७ उदीचामिञ्।**

गोत्रादिति न संबध्यते, व्याख्यानाद्गोत्रत्वाभावाच्चेति भावः। **कुर्वादिभ्यो ण्यः।** **अपत्ये इति।** शेषपूरणमिदम्। सौवीरेष्विति निवृत्तम्। **कौरव्या ब्राह्मणा इति।** कुरुर्नाम कश्चिद् ब्राह्मणः। तस्यापत्यानीति विग्रहः। ण्यप्रत्यये ओर्गुणो अवादेशः, आदिवृद्धिः। यस्तु 'कुरुनादिभ्यो ण्यः' इति ण्यो वक्ष्यते, तस्य तद्राजत्वाद् बहुषु लुकि कुरवः क्षत्रिया इति भवति। एतत्सूचनार्थमेव बहुवचनं ब्राह्मणा इति विशेष्यं चोदाहृतम्। **वावदूक्या इति।** वावदूकस्यापत्यानीति विग्रहः। **सम्राजः क्षत्रिय इति।** कुर्वादिगणसूत्रम्। अपत्य इति शेषः। क्षत्रिय एवेति नियमार्थमिदम्। **साम्राजोऽन्य इति।** सम्राजः शूद्रादौ उत्पन्न इत्यर्थः। **सेनान्त। एभ्य इति।** सेनान्तलक्षणकारिभ्य इत्यर्थः। अकुर्वादित्वाद्वचनम्। **हारिषेण्य इति।** हरिषेणो नाम कश्चित्। 'एति संज्ञायम्–' इति षत्वम्, तस्यासिद्धत्वात्सेनान्तत्वाण्ण्यः। **लाक्षण्य इति।** लक्षणमस्यास्तीति लक्षणः, अर्शआद्यच्, तस्यापत्यमिति विग्रहः। कारिपदं व्याचष्टे—**कारिः शिल्पीति। तस्मादिति।** कारिविशेष-

---

निमित्तस्य–' इति पुंवद्भावनिवृत्तिर्णित्त्वफलमस्तीति वाच्यम्, 'अस्त्रियाम्' इति युवसंज्ञानिषेधाद् गोत्रसंज्ञासद्भावाद् 'एको गोत्रे' इति नियमादिञन्तात्काण्टाहृतिशब्दादन्यस्यापत्यप्रत्ययस्याभावात्काण्टाहृताशब्दस्यैवासत्त्वादिति भावः। **कुर्वादिभ्यो।** 'सौवीरेषु' इत्यपि निवृत्तम्। **कौरव्या ब्राह्मणा इति।** यत्तु 'कुरुनादिभ्यो ण्यः' इति वक्ष्यति तस्य तद्राजत्वाद्बहुषु लुकि 'कुरवः क्षत्रियाः' इति भवति, न तु 'कौरव्याः' इति भावः। **वावदूक्या इति।** वदेर्यङन्तादूकप्रत्ययः। स चात्रैव गणे निपातनादित्याहुः। कुरु, गर्ग, वावदूक। **सम्राजः क्षत्रिय इति।** सम्राट्-शब्दाद् ण्य इत्यर्थः। वामरथस्य कण्वादिवत्स्वरवर्जम्। यञन्तस्य कण्वशब्दस्य यत्कार्यं तत् ण्यप्रत्ययान्तस्य वामरथ्यशब्दस्य स्यात्, आद्युदात्तं विनेत्यर्थः। बहुत्वे 'यञञोश्च' इति लुक्। वामरथाश्छात्राः। 'कण्वादिभ्यो गोत्रे' इति छापवादोऽण्। वामरथी। वामरथ्यायनी स्त्री। 'यञश्च'। प्राचां ष्फ तद्धितः' इति ङीषृष्फौ। वामरथानि सङ्घाङ्कलक्षणानि 'सङ्घाङ्कलक्षणेषु' इति छापवादोऽण्। सत्सङ्कार, वलभीकार, बुद्धिकार, इत्यादि। **हारिषेण्य इति।** 'एतिसंज्ञायाम्–' इति

(४-१-१५३) हारिषेणिः । वाम्रथिः । तान्तुवायिः । कौम्भकारिः । नापितात्तु परत्वात्फिञेव। नापितायनिः । 'तक्षणोऽण उपसंख्यानम्' (वा २२४०) 'षपूर्व-' (सू ११६०) इत्यनोऽकारलोपः । ताक्ष्णः पक्षे ताक्षण्यः । **११७८ तिकादिभ्यः फिञ् ।** (४-१-१५४) तैकायनिः । **११७९ कौसल्यकार्मार्याभ्यां च ।** (४-१-१५५) अपत्ये फिञ् । इञोऽपवादः । परमप्रकृतेरेवायमिष्यते । प्रत्ययसन्नियोगेन प्रकृतिरूपं निपात्यते । कोसलस्यापत्यं कौसल्यायनिः । कर्मारस्यापत्यं कार्मार्यायणिः । 'छागवृषयोरपि' (वा २६४३) । छाग्यायनिः । वार्ष्यायणिः । **११८० अणो द्व्यचः ।** (४-१-१५६) अपत्ये फिञ् । इञोऽपवादः । कार्त्रायणिः । अण इति किम्-दाक्षायणः । द्व्यचः किम्-

---

वाम्रिणो ण्ये सतीत्यर्थः । **तान्तुवाय्य इति ।** तन्तुवायस्यापत्यमिति विग्रहः । **कौम्भकार्य इति ।** कुम्भकारस्यापत्यमिति विग्रहः । **नापित्य इति ।** नापितस्यापत्यमिति विग्रहः । **उदीचामिञ् ।** सेनान्तलक्षणकारिभ्य इञ् स्यादुदीचां मते इत्यर्थः । **नापितात्तु परत्वात् फिञेवेति ।** उदीचां वृद्धादित्यनेनेति शेषः । **तक्ष्णोऽण उपसंख्यानमिति ।** उदीचां मत इति शेषः । **ताक्ष्ण इति ।** अणि प्रकृतिभावान्न टिलोपः । अल्लोपस्तु 'षपूर्वहन्-' इति वचनाद्भवति । **पक्षे ताक्षण्य इति ।** प्राचां मते कारित्वलक्षणो ण्य इत्यर्थः । 'ये चाभावकर्मणोः' इति प्रकृतिभावान्न टिलोपः । **तिकादिभ्यः फिञ् ।** इञोऽपवादः । **तैकायनिरिति ।** फिञि आयन्नादेशः । **कौसल्य । परमप्रकृतेरेवेति ।** कोशलकर्माराभ्यां फिञ्, तस्य युट् चेत्यर्थः । भाष्ये स्पष्टमेतत् । **छागवृषयोरपीति ।** फिञ्, तस्य युट् चेति वक्तव्यमित्यर्थः । **अणो द्व्यचः । अपत्ये फिञिति ।** शेषपूरणमिदम् ।

षत्वस्यासिद्धत्वात्सेनान्तोऽयम् । **ताक्ष्ण इति ।** उदीचामिञोपवादोऽयमण् । अस्मादुपसंख्यानाच्छिवादिषु तक्षन्शब्दपाठोऽनार्ष इति गम्यते । वृत्तिकारस्तु— तक्षन्शब्दं शिवादिषु पठित्वा 'कारिलक्षणमुदीचामिञमयमण् बाधते, ण्यस्य तु बाधो नेष्यते' इत्याह । तदनुरोधेनास्माभिरपि तत्र तथैव व्याख्यातम् । फले विशेषाभावात् । **कौशल्य । परमप्रकृतेरेवायमिति ।** यदि तु 'वृद्धेत्कोसला-' इति ञ्यङन्तात्कोसलशब्दात् कारिलक्षणण्यन्तात्कर्मारशब्दाच्चायं विधिः स्यात्, तदा यून्येव प्रसज्येतेति भावः । **छागेति ।** दगुशब्दस्याप्युपलक्षणमेतत् । फिञ्प्रकरणे 'दगुकोसलकर्मारच्छागवृषाणां युट् चादिष्टस्य' इति वार्तिकात् । आदिष्टस्य आयन्नादेशस्येत्यर्थः । अन्यथा, प्रतिपदोक्ते युटि कृते प्रत्ययादित्वाभावात् कौशल्यायनिरित्यादौ फस्यायन्नादेशो न स्यात्, युकि कृते तु 'दागव्यायनिः इत्यत्र ओर्गुणः, अन्यत्राल्लोपश्च

औपगविः। ['त्यदादीनां फिञ्वा वाच्यः' (वा ४०४०)। त्यादायनिः, त्यादः]। **११८१ उदीचां वृद्धादगोत्रात्। (४-१-१५७)** आम्रगुप्तायनिः। प्राचां तु आम्रगुप्तिः। वृद्धात् किम्—दाक्षिः। अगोत्रात् किम्-औपगविः। **११८२ वाकिनादीनां कुक् च। (४-१-१५८)** अपत्ये फिञ्वा। वाकिनस्यापत्यं वाकिनकायनिः, वाकिनिः। **११८३ पुत्रान्तादन्यतरस्याम्। (४-१-१५९)**

द्व्यचः अण्प्रत्ययान्तादपत्ये फिञित्यर्थः। **कार्त्रायणिरिति** । कर्तुश्छात्रः कार्त्रः, 'तस्येदम्' इत्यण्। कार्त्रस्यापत्यं कार्त्रायणिः। फिञि आयन्नादेशे णत्वम्। **दाक्षायण इति**। दक्षस्यापत्यं दाक्षिः। अत इञ्। दाक्षेरपत्यं दाक्षायणः। 'यञिञोश्च' इति फक्। अणन्तत्वाभावान्न फिञिति भावः। **औपगविरिति**। उपगोर्गोत्रापत्यमौपगवः। तस्यापत्यमौपगविः युवा। द्व्यच्त्वाभावान्न फिञिति भावः। कर्तुरपत्ये तु कुर्वादिगणे पाठाद् ण्य एवेति बोध्यम्। 'त्यदादीनां फिञ्वा वाच्यः। त्यादायनिः त्यादः।' इति क्वचित्पुस्तके दृश्यते। तत्तु प्रामादिकम्, 'त्यादादीनि च' इति त्यदादीनां वृद्धत्वाद् 'उदीचां वृद्धात्–' इत्येव सिद्धेः, भाष्ये अस्य वार्तिकस्य अदर्शनाच्च। **उदीचां वृद्धादगोत्रात्**। वृद्धसंज्ञकाद् अगोत्रप्रत्ययान्तात्फिञ् स्याद् उदीचां मत इत्यर्थः। **आम्रगुप्तायनिरिति**। आम्रगुप्तस्यापत्यमिति विग्रहः। **प्राचां त्विति**। मत इति शेषः। आम्रगुप्तिः। अत इञ्। **औपगविरिति**। उपगोर्गोत्रापत्यम् औपगवः, तस्यापत्यं युवा औपगविः। औपगवस्य गोत्रत्वात्ततो यूनि फिञभावे इञेवेति भावः। **वाकिनादीनाम्**। शेषपूरणेन सूत्रं व्याचष्टे— **अपत्ये फिञ्वेति**। चकाराद् उदीचाम् इति फिञिति चानुवर्तत इति भावः। तथा च वाकिनादिभ्यः फिञ् वा स्यात्, प्रकृतीनां कुगागमश्चेति फलितम्।

न स्यादिति भावः। **कार्त्रायणिरिति**। कर्तुरपत्यं कार्त्रस्तस्यापत्यं तु कार्त्रायणिः। अत्र व्याचक्षते—कर्तृशब्दः कुर्वादिषु पठ्यते। तथा च 'कार्त्र्यः' इत्येव वर्धमाने-नोदाहृतम्। तस्मादिह भर्तृहर्त्रादयुदाहार्यमिति। **दाक्षिरिति**। 'वा नामधेयस्य' इति वृद्धसंज्ञाभावपक्षे प्रत्युदाहरणमिदम्। पक्षान्तरे तु फिञ् भवत्येव। 'दाक्षायणयो-ऽश्विनीत्यादि ताराः' इत्यमरः। **वाकिनादीनाम्**। यदि हि वृद्धमगोत्रं शब्दरूपम्, तत्रागमार्थमेवेदं वचनमन्येषां तूभयार्थम्। 'उदीचाम्–' इत्यनुवर्तनाद्विकल्पः फलित इत्याह— **फिञ्वा स्यादिति**। **वाकिनकायनिरिति**। वचनं वाकः सोऽस्यास्तीति वाकिनः। अतएव निपातनादिनन्। अगारे एधत इति गारेधः पृषोदरादित्वादादिलोपः शकन्ध्वादित्वात्पररूपम्। गारेधकायनिः। चर्मिवर्म्यादौ तूभयार्थम्। चर्मवर्मशब्दाभ्यां व्रीह्यादित्वादिनिः। **'चर्मिवर्मिणोर्नलोपश्च'** इति गणसूत्रम्।

अस्माद्वा फिञ्सिद्धः, तस्मिन्परे पुत्रान्तस्य वा कुग्विधीयते । गार्गीपुत्रिकायणिः, गार्गीपुत्रायणिः, गार्गीपुत्रिः । **११८४ प्राचामवृद्धात्फिन्बहुलम्** । (४-१-१६०) ग्लुचुकायनिः । **११८५ मनोर्जातावञ्यतौ षुक् च** । (४-१-१६१) समुदायार्थो जातिः । मानुषः, मनुष्यः । **११८६ जनपदशब्दात् क्षत्रियादञ्**। (४-१-१६८) जनपदक्षत्रिययोर्वाचकादञ् स्यादपत्ये। 'दाण्डिनायन-' (सू ११४२) इति सूत्रे निपातनाट्टिलोपः। ऐक्ष्वाकः। ऐक्ष्वाकौ।

पुत्रान्तादन्यतरस्याम् । स्पष्टम्। **प्राचामवृद्धात्**। अवृद्धसंज्ञकाद् अपत्ये बहुलं फिन् स्यादित्यर्थः। प्राचांग्रहणं पूजार्थम्। **ग्लुचुकायनिरिति**। ग्लुचुकस्यापत्यमिति विग्रहः। अवृद्धात्किम् ? राजदन्तिः। बहुलग्रहणान्नेह—दाक्षिः। **मनोर्जातौ**। मनुशब्दाद् अञ् यत् एतौ प्रत्ययौ स्तः, तयोः परयोः मनुशब्दस्य षुगागमश्च प्रकृतिप्रत्ययसमुदायेन जातौ गम्यायामित्यर्थः, तदाह—**समुदायार्थो जातिरिति**। नात्रापत्यग्रहणं संबन्ध्यत इति भावः। अन्यथा मानुषा इत्यत्र 'यञञोश्च' इति लुक् स्यादिति बोध्यम्। **जनपदशब्दात्**। जनपदो देशः, तद्वाचकशब्दो जनपदशब्दः, तथाभूतो यः क्षत्रियवाचकशब्दः, तस्मादित्यर्थः। फलितमाह—**जनपदक्षत्रिययोरिति। ऐक्ष्वाक इति**। इक्ष्वाकुर्नाम देशः,

---

चार्मिकायणिः। वार्मिकायणिः। कुकि कृते नकारस्यानन्त्यत्वान्नलोपाप्राप्तौ वचनम्। न च कुक्परादिरस्त्विति वाच्यम्, फस्थानादित्वादायनादेशाभावप्रसङ्गात्। **वाकिनिरिति**। 'अत इञ्'। फिञभावे तत्संनियोगशिष्टः कुगत्र न भवति। एवं गारेधिः, चार्मिण इत्याद्यूह्यम्। **पुत्रान्तात्**। 'उदीचां वृद्धात्-' इत्यनुवर्तत इत्याशयेनाह— **वा फिञ् सिद्ध इति**। तेनैव सूत्रेण फिञि सिद्धे अनेन कुगेव वा विधीयत इति भावः। **प्राचामवृद्धात्**। प्राचांग्रहणं पूजार्थम्। अवृद्धादिति किम्, राजदन्तिः। बहुलग्रहणान्नेह। दाक्षिः। **मानुषः। मनुष्य इति**। जातिशब्दावेतौ **'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ॥'** णत्वविधानार्थमिदम्। अणः सिद्धत्वात्। अनधीतवेदत्वान्मूढत्वं विहिताननुष्ठानाच्च कुत्सितत्वम्। इदं च वचनं 'ब्राह्मणमाणव-' इति णत्वनिपातनाल्लब्धमित्याहुः। **जनपद। जनपदक्षत्रियेति**। जनपदवाची सन् यः क्षत्रियवाचीत्यर्थः। यद्यपि पञ्चालादयो जनपदे बहुवचनान्ताः, क्षत्रिये त्वेकवचनान्ताः, तथापि प्रातिपदिकस्योभयवाचित्वमक्षतमेवेति बोध्यम्। जनपदशब्दात्किम्, द्रुह्योरपत्यं द्रौह्यवः। केवलक्षत्रियवाच्यम्। क्षत्रियादिति किम्, ब्राह्मणस्य पञ्चालस्यापत्यं पाञ्चालिरिति वृत्तिकारादयः। बाह्वादिष्वस्य पाठादिदं प्रत्यु-

'क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्' (वा २६६९)। तद्राज-माचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात् । पञ्चालानां राजा पाञ्चालः । 'पूरोरण्वक्तव्यः' (वा २६७०) पौरवः । 'पाण्डोर्ड्यण्' (वा २६७१) पाण्ड्यः । ११८७ **साल्वेयगान्धारिभ्यां च** । (४-१-१६९) आभ्यामपत्ये-

---

राजा च । तस्य राज्ञोऽपत्यमिति विग्रहे अञ् , अणोऽपवादः । नवरे विशेषः । ओर्गुणं बाधित्वा 'दाण्डिनायन-' इति सूत्रे निपातनादुकारस्य टेर्लोपः । **ऐक्ष्वाका-विति** । बहुवचने तु लुग्वक्ष्यत इति भावः । **क्षत्रियसमानेति** । क्षत्रियवाचक-शब्देन समानशब्दो जनपदवाचकः, तस्मात् षष्ठ्यन्ताद् राजन्यर्थे अपत्यवत्प्रत्यया भवन्तीत्यर्थः । वार्तिकमेतत्सूत्रसिद्धार्थकथनपरमित्याह—**तद्राजमिति** । 'जनपद-शब्दात्-' इत्यादिविहितानामञादीनां तद्राजसंज्ञा विहिता 'ते तद्राजाः' इति । प्रत्ययानां तद्राजत्वं तद्वाचकत्वाद्गौणम् । एवं च तद्राजवाचकास्तद्राजा इत्यन्वर्थसंज्ञैषा, नतु टिघुभादिवदवयवार्थरहिता । तथा च अञादिप्रत्ययानां तद्राजसंज्ञया नां राजवाचक-त्वमपि विज्ञायत इति राजन्यपि वाच्ये ते भवन्तीति विज्ञायत इत्यर्थः । **पञ्चालानामिति** । बहुवचनान्तमिदं देशविशेषनाम, भाष्ये तथैव प्रयोगदर्शनात् । 'द्व्यञ्मगध-' इत्यत्र भाष्ये 'नेषो नाम जनपदः' इति दर्शनाद्देशवाचिनोऽप्येकवचन-मिति ज्ञेयम् । जनपदशब्दादिति किम् ? द्रुह्योरपत्यं द्रौह्यवः, अरोव, तद्राजत्वा-भावाद्बहुत्वे न लुक्, द्रौह्यवाः । क्षत्रियादिति किम् ? पञ्चालो नाम कश्चिद् ब्राह्मणः, तस्यापत्यं पाञ्चालिः । वैदेहिः । **पूरोरणिति** । पूरुशब्दस्य जनपदवाचित्वाभावात्प्रा-ग्दीव्यतीये अणि सिद्धे तद्राजसंज्ञार्थं वचनम् । देशवाचित्वे तु 'द्व्यञ्मगध-' इत्येव सिद्धम् । पाण्डोर्ड्यणिति । वाच्य इति शेषः । इह श्वेतगुणवाचिनो युधिष्ठिरपितृवाचि-नश्च पाण्डोर्न ग्रहणम्, जनपदादित्युक्तेः, तस्य च पाण्डुदेशाधिपतिराजत्वाभावात् । **पाण्ड्य इति** । पाण्डोरपत्यं पाण्डोर्देशस्य राजा वेत्यर्थः । **साल्वेय** । ननु

दाहरणं चिन्त्यमित्यन्ये । **क्षत्रियसमानशब्दादिति** । समानः शब्दो यस्य जनपदस्य सोऽयं समानशब्दो जनपदः । क्षत्रियेण समानशब्दः क्षत्रियसमानशब्दस्तस्मात्, 'तस्य' इति षष्ठीसमर्थाद्राजनि वाच्ये अपत्यवत्प्रत्ययो भवतीत्यर्थः । **पाञ्चालानां राजेति** । इह 'अवृद्धादपि बहुवचनविषयात्' इति प्राप्तो वुञ् बाध्यते । **पूरोरिति** । पूरु-शब्दो न जनपदवाचीति प्राग्दीव्यतीये अणि सिद्धे तद्राजसंज्ञार्थं वचनम् । जनपद-वाचित्वे तु 'द्व्यञ्मगध-' इत्येव सिद्धम् । **पाण्डोर्ड्यणिति** । णित्करणं तु 'पाण्ड्याभार्यः' इत्यत्र 'वृद्धिनिमित्तस्य-' इति पुंवद्भावप्रतिषेधार्थम् । युधिष्ठिरपितृवाचिनो गुणवाचिनश्च पाण्डोर्नेह ग्रहणम्, 'जनपदशब्दात्-' इत्युक्ते तदधिपतिवाचिन एवोप-

ऽञ्। 'वृद्धेत्–' (सू ११८१) इति ञ्यङोऽपवादः । साल्वेयः । गान्धारः । तस्य राजन्यप्येवम् । **११८८ द्व्यञ्मगधकलिङ्गसूरमसादण्** । (४-१-१७०) अञोपवादः । द्व्यच्—आङ्गः, वाङ्गः, सौह्मः । मागधः । कालिङ्गः । सौरमसः । तस्य राजन्यप्येवम् । **११८९ वृद्धेत्कोसलाजादाञ्ञ्यङ्** । (४-१-१७१) वृद्धात्—आम्बष्ठ्यः, सौवीर्यः । इत्—आवन्त्यः, कौन्त्यः, कौसल्यः । अजादस्यापत्यमाजाद्यः । **११९० कुरुनादिभ्यो ण्यः** । (४-१-१७२) कौरव्यः, नैषध्यः । 'स नैषधस्यार्थपतेः' इत्यादौ तु शैषिकोऽण् । **११९१ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्** । (४-१-१७३) साल्वो जनपदस्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथादिभ्यस्त्रिभ्यश्च इञ् । अञोऽपवादः । औदुम्बरिः । प्रात्यग्रथिः । कालकूटिः ।

साल्वेयगान्धारिशब्दौ अव्युत्पन्नौ देशक्षत्रियोभयवाचिनौ । ताभ्यां जनपदशब्दादिति सिद्धे किमर्थमिदमित्यत आह—**वृद्धेदिति** । **ञ्यङोऽपवाद इति** । **द्व्यञ्मगध** । **अञोऽपवाद इति** । जनपदशब्दादिति विहितस्याञोऽपवाद इत्यर्थः । **द्व्यजिति** । उदाहियत इति शेषः । अङ्ग, वङ्ग, सुह्म इत्येते द्व्यचो देशक्षत्रियवाचिनः । अङ्गस्यापत्यमिति विग्रहः । **तस्य राजन्यप्येवमिति** । अङ्गादिदेशस्य राजेति विग्रहः । **वृद्धेत्कोसलाजादाञ्ञ्यङ्** । जनपदक्षत्रियोभयवाचकाद् वृद्धसंज्ञकाद् इदन्तात् कोसलाद् अजादाच्चापत्ये ञ्यङित्यर्थः । **वृद्धादिति** । उदाहियत इत्यर्थः । **आम्बष्ठ्यः, सौवीर्य इति** । आम्बष्ठसौवीरशब्दौ जनपदक्षत्रियोभयवाचकौ । **इदिति** । इदन्तोदाहरणसूचनमिदम् । **आवन्त्य इति** । अवन्तिशब्दो देशे राजनि च । **कौसल्य इति** । कोसलशब्दो देशे राजनि च । **अजादस्यापत्यमिति** । राजवाचकत्वे विग्रहोऽयम् । देशवाचकत्वे तु अजादानां राजेति विग्रहः । **कुरुनादिभ्यो ण्यः** । कुरुशब्दाद् नकारादिभ्यश्च जनपदक्षत्रियवाचकेभ्योऽपत्ये राजनि च ण्यः स्यादित्यर्थः । **कौरव्य इति** । कुरोरपत्यं कुरूणां राजेति वा विग्रहः । **नैषध्य इति** । निषधशब्दो देशे राजनि च । **शैषिक इति** । तस्येदमित्यनेनेति शेषः । **साल्वावयव** । **उदुम्बरादय इति** ।

स्थानात् । **वृद्धेत्** । तपरकरणं किम्, कौमारः । कुमारीशब्दो हि जनपदक्षत्रियवचनः । **कुरुना** । नकार आदिर्येषां ते नादयः । कुरुशब्दाद् द्व्यज्लक्षणे अणि प्राप्ते, नादिभ्यस्त्वञि प्राप्ते च वचनम् । **उदुम्बरादय इति** । 'उदुम्बरास्तिलखला मद्रकारा युगन्धराः । भूलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिकाः' इति वृत्तिः ।

आश्मकिः । राजन्यप्येवम्। **११६२ ते तद्राजाः (४-१-१७४)** अञादय एतत्संज्ञाः स्युः। **११६३ तद्राजस्य बहुषु तेनैवास्त्रियाम्। (२-४-६२)** बहुष्वर्थेषु तद्राजस्य लुक्स्यात्तदर्थकृतबहुत्वे, न तु स्त्रियाम् । इक्ष्वाकवः, पञ्चाला इत्यादि । कथं तर्हि 'कौरव्याः पशवः' 'तस्यामेव रघोः पाण्ड्याः' इति च। कौरव्ये पाण्ड्ये च साधव इति समाधेयम्। 'रघूणामन्वयं वक्ष्ये'

'उदुम्बरास्तिलखला मद्रकारा युगन्धराः।
भूलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः ॥'

इति प्रसिद्धिः। 'वृन्मगध-' इति भाष्ये तु बुध आजमीढ अजकन्दा अपि गृहीताः। **ते तद्राजाः**। ते इत्यनेन जनपदशब्दादित्याद्यारभ्य विहिता अञादयः परामृश्यन्ते। तदाह—**अञादय इति**। **तद्राजस्य**। 'ण्यक्षत्रियार्ष-' इत्यतो लुगित्यनुवर्तते। तेनेत्यनन्तरं कृते बहुत्वे इत्यध्याहार्यः। तदाह—**बहुष्विति**। **तदर्थकृतबहुत्व इति**। अञादिप्रत्ययान्तमात्रार्थगतबहुत्वे प्रतीत्यर्थः। तेनेति किम्? प्रियो वाङ्गो येषां ते प्रियवाङ्गाः इत्यत्र बहुत्वस्यान्यपदार्थगतत्वाद् वाङ्गशब्दात्परस्य न लुक्। यद्यपि वर्तिपदार्थविशिष्टान्यपदार्थगतं बहुत्वं वर्तिपदार्थगतमपि भवति, तथापि अञ्प्रत्ययान्तार्थवाङ्गमात्रगतं न भवतीति न लुक्। एतदर्थमेवकारग्रहणम्। **इक्ष्वाकवः, पञ्चाला इति**। 'जनपदशब्दात्-' इति विहितस्य अञो लुकि आदिवृद्धिनिवृत्तिः। **इत्यादीति**। अङ्गाः, वङ्गा इत्यादि बोध्यम्। **कथं तर्हीति**। कौरव्या इत्यत्र ण्यप्रत्ययस्य पाण्ड्य इत्यत्र ड्यण्प्रत्ययस्य च तद्राजतया बहुषु लुक्प्रसङ्गादित्यर्थः। **साधव इतीति**। कौरव्यशब्दात् पाण्ड्यशब्दाच्च 'तत्र साधुः' इति यत्प्रत्यये 'यस्येति च' इत्यकारलोपे यत्प्रत्ययस्य तद्राजत्वाभावान्न लुगित्यर्थः। ननु रघुयदुशब्दयोर्जनपदवचित्वाभावात् प्राग्दीव्यतीयेऽणि तस्य तद्राजत्वाभावात् कथं बहुषु तस्य लुगित्याशङ्क्य परिहरति—

औदुम्बरिरिति। तैलखलिः । माद्रकारिः । यौगन्धरिरित्याद्युदाहरणान्युदाहर्तव्यानि । **ते तद्राजाः । अञादय इति** । ततः प्राचीनस्तु तच्छब्देन न परामृश्यन्ते गोत्रयुवसंज्ञाकाण्डेन विच्छेदात्। एतदर्थमेवेदं न तत्काण्डमध्ये कृतमाचार्येणेत्याहुः। वस्तुतस्तु 'तद्राज' इत्यधिकृत्य 'जनपदशब्दात्क्षत्रियादञ्' इत्यादिसूत्राणामारम्भे गोत्रयुवसंज्ञाकाण्डस्य मध्ये पाठाभावेऽपि न क्षतिरित्यन्ये। **तद्राजस्य। तदर्थेति**। तद्राजप्रत्ययार्थेन कृत इत्यर्थः। तेनैवेति किम्, प्रियपाञ्चालाः। **साधव इतीति**। तथा च 'तत्र साधुः' इति यत्प्रत्ययस्य तद्राजत्वाभावाल्लुङ् नेति भावः। रघुयदुशब्दयोर्जनपदवाचित्वाभावादाभ्यां परस्य तद्राजसंज्ञा नेति लुकोऽप्रवृत्त्या

'निरुध्यमाना यदुभिः कथञ्चित्' इति तु रघुयदुशब्दयोस्तदपत्ये लक्षणया । ११६४ कम्बोजाल्लुक् । (४-१-१७५) अस्मात्तद्राजस्य लुक् । कम्बोजः । कम्बोजौ । 'कम्बोजादिभ्य इति वक्तव्यम्' (वा २६७४) । चोलः । शकः । अज्लक्षणस्याणो लुक् । केरलः । यवनः । अञो लुक् । 'कम्बोजाः समरे' इति पाठः सुगमः । दीर्घपाठे तु कम्बोजोऽभिजनो येषामित्यर्थः । सिन्धुतक्षशिलादिभ्योऽणञौ' (सू १४७३) इत्यण् । ११६५ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । (४-१-१७६) तद्राजस्य लुक्स्यात् । अवन्ती । कुन्ती । कुरूः । ११६६

रघूणामिति । लक्षणयेति । प्रयोग इति शेषः । ततश्च नेदमपत्यप्रत्ययान्तमिति भावः । लक्षणाबीजं तु रघुयदुसमानवृत्तिकत्वं बोध्यम् । कम्बोजाल्लुक् । तद्राजा इत्यनुवृत्तं षष्ठ्या विपरिणम्यते । कम्बोजात्परस्य तद्राजस्य लुक् स्यादित्यर्थः । अबहुत्वार्थं सूत्रम् । तदाह—कम्बोजः कम्बोजाविति । जनपदशब्दादिति । विहितस्य अञो लुक् । चोलः, शक इति । चोलशकौ देशविशेषौ राजविशेषौ च । अयजूलक्षणस्येति । 'द्व्यञ्मगध–' इति विहितस्येत्यर्थः । केरल इति । केरलयवनशब्दौ देशराजोभयवाचिनौ । अञो लुगिति । जनपदशब्दादिति विहितस्येति शेषः । ननु काम्बोज इति कथम्, लुक्प्रसङ्गादित्यत आह—कम्बोजाः समर इति । दीर्घपाठे त्विति । अवां मध्ये आदेरचो दीर्घभूतस्य पाठे त्वित्यर्थः । अभिजन इति । यत्र पूर्वैरुषितं सोऽभिजन इत्यग्रे वक्ष्यति । सिन्धुतक्षेति । सिन्ध्वादौ कम्बोजशब्दस्य पाठादिति भावः । स्त्रियामवन्ति । अवन्ती कुन्तीति । अवन्तेः कुन्तेश्चापत्यं स्त्री राज्ञी वेति विग्रहः । 'वृद्धेत्कोसल–' इति ञ्यङोऽनेन लुकि 'इतो मनुष्यजातेः' इति ङीष् । कुरूरिति । 'कुरुना-

---

राघवाणां यादवैरित्येव भवितव्यमित्याशङ्क्याह—रघुयदुशब्दयोरिति । लक्षणयेति । ततश्चोक्तार्थत्वादपत्यप्रत्ययो नात्रोत्पन्न इति भावः । कम्बोजाल्लुक् । 'तद्राजस्य बहुषु–' इति प्रकरण एवेदं न कृतम्, द्व्येकार्थवाचकस्याञो लुगभावप्रसंगात् । यद्यपि लुगधिकारे पुनर्लुग्विधानसामर्थ्याद् द्व्येकयोरप्यञो लुग्भविष्यत्येवेति वक्तुं शक्यम्, तथाप्यतद्राजस्यापि लुक्प्रसङ्गशङ्कापत्तेर्लाघवाभावाच्च तत्प्रकरणे न कृतमित्याहुः । न चात्र आपत्ये लक्षणयैव 'कम्बोजः कम्बोजौ' इत्यादिरूपसिद्धौ किमनेन सूत्रेणेति शङ्क्यम्, काम्बोज इत्यादिपाक्षिकानिष्टवारणाय सूत्रस्यावश्यकत्वात् । सिन्धुतक्षेति । कम्बोजशब्दस्य सिन्ध्वादित्वादण् । तस्य तु तद्राजत्वाभावाल्लुङ् नेति भावः । अवन्ती । कुन्तीति । 'वृद्धेत् ' इति ञ्यङो लुकि 'इतो मनुष्यजातेः' इति ङीष् ।

---

१ 'पूर्वम्' इति क्वचित् पाठः ।

अतश्च । (४-१-१७७) तद्राजस्याकारस्य स्त्रियां लुक्स्यात् । शूरसेनी । मद्री । कथं 'माद्रीसुतौ' इति—'ह्रस्व एव पाठः' इति हरदत्तः । भर्गादित्वं वा कल्प्यम् । **११६७ न प्राच्यभर्गादियौधेयादिभ्यः** । (४-१-१७८) एभ्य- स्तद्राजस्य न लुक् । पाञ्चाली । वैदर्भी । आङ्गी । वाङ्गी । मागधी । एते प्राच्याः । भार्गी । कारूशी । कैकेयी । केकयीरयत्र तु जन्यजनकभावलक्षणे पुंयोगे ङीष् । युधा शुका आभ्यां 'द्व्यचः' (सू ११२४) इति ढक् । ततः स्वार्थे 'पर्श्वादियौधे- यादिभ्योऽणञौ' (सू २०७०) इत्यञ् । 'शार्ङ्गरवाद्यञः–' (सू ५२७) इति ङीन् । 'अतश्च' (सू ११६६) इति लुकि तु ढगन्तत्वान्ङीप्युदात्तनिवृत्तिस्वरः

दिभ्यः–' इति ण्यस्य लुक् । **अतश्च । तद्राजस्याकारस्येति** । अत इति तद्रा- जविशेषणम् । तद्राजात्मकस्य अकारस्येत्यर्थः । **शूरसेनीति** । अञो लुकि प्रत्यय- लक्षणमाश्रित्य अपत्यप्रत्ययान्तत्वेन जातित्वात् ङीष् । 'न लुमता–' इति निषे- धस्तु न, ङीष्विधेरङ्गकार्यत्वाभावात् । एवं मद्री । **न प्राच्य । एभ्य इति** । प्राच्येभ्यः, भर्गादिभ्यः, यौधेयादिभ्यश्चेत्यर्थः । **एते प्राच्या इति** । क्षत्रिया इति शेषः । यथायथम्, अञः अणश्च लुक् । भर्गादीनुदाहरति—**भार्गी, कारूशी, कैकेयीति । जन्यजनकभावेति** । अत्र यद्वक्तव्यं तत् 'पुंयोगादाख्यायाम्' इत्यत्रोक्तम् । अथ यौधेयादिभ्यो लुक्प्रतिषेधं दर्शयितुमाह—**युधा, शुका इत्या- दिना । ढगिति** । युधाया अपत्यं शुकाया अपत्यमिति विग्रहे तत्रामिकाणं बाधित्वा 'द्व्यचः' इति ढकि एयादेशे 'यस्येति च' इत्यकारलोपे आदिवृद्धिः । यौधेयशब्दात् शौकेयशब्दाच्च 'पर्श्वादियौधेयादिभ्योऽणञौ' इति स्वार्थे तद्राजसंज्ञके पाञ्चमिके अञि 'यस्येति च' इत्यकारलोपे 'शार्ङ्गरवाद्यञः–' इति ङीनि यौधेयी शौकेयीति रूपमिति

कुरूरिति । ण्यस्य लुक् 'ऊङुतः' इत्यूङ् । **अतश्च** । इह तद्राजेन अकारो विशेष्यते, न त्वकारेण तद्राजः । विशेषणेन तदन्तविधौ व्यङ्ण्यादीनामप्यदन्त- तद्राजत्वादनेनैव लुकि सिद्धे अवन्तिकुन्तिकुरुभ्यो लुग्विधायकस्य 'स्त्रियामवन्ति-' इति सूत्रस्य वैयर्थ्यापत्तेः । न चेष्टापत्तिः । कौसल्येति रूपासिद्धिप्रसङ्गादतो व्याचष्टे– **तद्राजस्याकारस्येति** । सूत्रे तपरकरणं विस्पष्टार्थमिति भावः । **शूरसेनीति** । अञो लुकि 'जातेः' इति ङीष् । न त्वञन्तलक्षणो ङीन्, 'अञो योऽकारस्तदन्तात्' इति व्याख्यानात् । **कारूशीति** । कुत्स उः करुः, तं वष्टि करूशः । 'वश कान्तौ' मूलविभुजादित्वात्कः । 'ग्रहिज्या–' इति संप्रसरणम् । तस्यापत्यं राजा वा कारूशः । स्त्रियां कारूशी । एतेन मूर्धन्योपधः पाठो निरस्तः । यौधेयादिभ्यो लुक्प्रतिषेध- मुदाहर्तुमाह— **युधा । शुकेत्यादि । अतश्चेति लुकि त्विति** । 'आदय-

स्यात्। यौधेयी। शौक्रेयी। ११९८ अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे। (४-१-७८) ष्यादीनामन्त्यमुत्तमम्, तस्य समीपमुपोत्तमम्। गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः

भावः। नन्वत्र 'अतश्च' इति अञो लुकि सत्यपि 'टिड्ढ–' इति ङीपि, यौधेयी शौक्रेयीति सिद्धेरिह यौधेयादिग्रहणमनर्थकमित्यत आह—**अतश्चेति लुक त्विति। उदात्तनिवृत्तीति।** 'अनुदात्तस्य च यत्रोदात्तलोपः–' इत्येनन ङीबुदात्तः स्यात्। सिद्धान्ते त्वञन्तत्वाद् ङीनि आद्युदात्तत्वमिति भावः। **अणिञो। ष्यादीनामन्त्यमुत्तममिति।** तथा भाष्यादिति भावः। **तस्य समीपमुपोत्तममिति।** सामीप्येऽव्ययीभाव इति भावः। गुरु उपोत्तमम् उत्तमसमीपवर्ति ययोरिति विग्रहः। प्रातिपदिकादित्यधिकृतं षष्ठीद्विवचनेन विपरिणम्यते। उपोत्तमगुरुवर्णकयोः प्रातिपदिकयोरिति लभ्यते। 'अणिञोः–' इत्यनेन प्रत्ययग्रहणपरिभाषया अणिञन्तयोर्ग्रहणम्। गोत्रे इत्येतद् अणिञोरन्वेति। ऋषेरविहितौ अनार्षौ। इदमपि अणिञोर्विशेषणम्। स्त्रियामित्यधिकृतम्। तदाह—**गोत्रे यावणिञावित्यादिना।**

स्तद्राजाः' इति वक्ष्यमाणत्वादञोऽस्य तद्राजत्वमस्तीति भावः। योपधत्वान् ङीषः प्राप्तिर्नेत्याशयेनाह—**ङीपीति। उदात्तनिवृत्तिस्वर इति।** 'अनुदात्तस्य च यत्रोदात्तलोपः' इत्यनेन ङीबुदात्तः स्यादित्यर्थः। सिद्धान्ते त्वञो लुगभावाद् ङीन्याद्युदात्तत्वमिति ज्ञेयम्। स्यादेतत्। 'अतश्च–' इति सूत्रेण विधीयमानो लुक् चातुरर्थिकानामेव तद्राजानां भवतु, संनिधानात्, न तु 'ञ्यादयस्तद्राजाः' इति पाञ्चमिकानामपि तद्राजानामिति किमनेन यौधेयादिग्रहणेन। सत्यम्, 'व्याप्तिन्यायेन पाञ्चमिकस्यापीह ग्रहणम्' इति ज्ञापयितुं यौधेयादिग्रहणम्। तेन पार्श्वायणः स्त्रियां लुक् सिध्यति। तथा हि पर्शुः क्षत्रियो जनपदेन समानशब्दः। तस्यापत्यं स्त्री 'द्व्यञ्मगध–' इत्यण्, तस्य 'अतश्च' इति लुक्। पुनः पर्श्वादिलक्षणः स्वार्थिकोऽण्। तस्यापि लुकि 'ऊङुतः' पर्शूः। एवं रक्षसः क्षत्रियस्यापत्यं स्त्री रक्षाः। पूर्ववदण्द्वयस्यापि लुकि 'अत्वसन्तस्य–' इति दीर्घः। उक्तं च वार्तिककृता—'पर्श्वादिभ्यो लुग्वक्तव्यः। यौधेयादिप्रतिषेधो वा ज्ञापकः पार्श्वादिलुकः' इति। **यौधेयीत्यादि।** युधायाः शुक्राया अपत्यं स्त्रीति विग्रहः। **अणिञोः। उत्तममिति।** अव्युत्पन्नं प्रातिपदिकमिदम्। न तूच्छब्दात्तमप्, तेन 'किमेत्तिङव्ययघात्–' इत्याम् न शङ्क्यः। **गोत्रे यावीति।** 'अपत्याधिकारादन्यत्र लौकिकं गोत्रम्' इति नेह शास्त्रीयं गृह्यते। तथा च 'अनार्षयोः' इति पर्युदासादेव सिद्धे गोत्रग्रहणमिह त्यक्तुं शक्यम्। न चात्र गोत्रग्रहणसामर्थ्यात् शास्त्रीयमेव गोत्रं गृह्यत इति वाच्यम्। दैवदत्त्या

स्यात्। 'निर्दिश्यमानस्यादेशा भवन्ति' (प १२) इत्यणिञोरेव। षङावितौ। 'यङश्चाप्' (सू ४२८)। कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या। वाराह्या। बला-

---

आदेशः स्यादिति। स्थानषष्ठीनिर्देशादादेशत्वलाभः। ननु अणिञन्तयोः ष्यङादेशोऽयमनेकाल्त्वात् सर्वादेशः स्यादित्यत आह—**निर्दिश्यमानस्येति**। तथा च अणिञोरेवायमादेश इति भावः। 'ङिच्च' इत्यन्तादेश इति तु न युक्तम्, ङित्त्वस्य 'ष्यङः सम्प्रसारणम्—' इत्यादौ चरितार्थत्वात्। **कुमुदगन्धेरिति**। कुमुदगन्ध इव गन्धो यस्येति विग्रहः। 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्च' इति बहुव्रीहिः, पूर्वखण्डे उत्तरपदस्य गन्धशब्दस्य लोपश्च। 'उपमानाच्च' इति इत्त्वम्। कुमुदगन्धेरपत्यं स्त्रीति विग्रहे अण्। 'यस्येति च' इति इकारलोपः, आदिवृद्धिः, कौमुदगन्धशब्दः, तत्र धकारादणोऽकार उत्तमः। तत्समीपवर्ती गुरुः गकारादकारः, 'संयोगे गुरु' इत्युक्तेः। नचानुस्वारधकारव्यवहितत्वात्कथमुत्तमसमीपवर्तित्वं गकारादकारस्येति वाच्यम्, 'येन नाव्यवधानं तेन व्यवहितेऽपि' इति न्यायेन हला व्यवधानस्यादोषत्वात्। नह्यणि परे अव्यवहितो गुरुः क्वचिदस्ति। एवं च गुरूपोत्तमं प्रातिपदिकं कौमुदगन्धेत्यणन्तम्, तदवयवस्य अणः ष्यङादेशे 'यङश्चाप्' इति चापि कौमुदगन्ध्याशब्द इत्यर्थः। इञन्तस्योदाहरति—**वाराह्येति**।

याज्ञदत्त्येत्यादीनामनन्तरापत्येऽपीष्यमाणत्वात्। अतएवानुपदं वक्ष्यति 'कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या' इति। इदं च कौस्तुभानुसारि व्याख्यानमत्रत्यमूलानुगुणमपि 'दैवयज्ञि—' सूत्रस्थेन 'अगोत्रार्थमिदम्' इत्यादिमूलग्रन्थेन सह विरुध्यत इति तत्रैव स्फुटीभविष्यति। यद्यपि स्त्रीप्रत्ययाः प्रकृताः तथापि 'पत्युर्नो यज्ञसंयोगे' इति नकारस्येव ष्यङ आदेशत्वमेवोचितम् 'अणिञोः—' इति षष्ठीस्वरसादित्यभिप्रेत्याह—**ष्यङादेशः स्यादिति**। ष्यङः प्रत्ययत्वेऽपि लक्ष्यसिद्धिरप्रत्यूहेति मनोरमायां स्थितम्। नन्वयं 'ङिच्च' इत्यन्तादेशं बाधित्वा परत्वात्सर्वादेशः स्यात्। 'ङिच्च' इत्यस्यानन्यार्थङित्त्वेष्वनङादिषु चरितार्थत्वात्। ष्यङोऽनुबन्धस्य 'यङश्चाप्' इति विशेषणार्थतया सप्रयोजनत्वादित्याशङ्क्याह—**निर्दिश्यमानस्येति**। **षङाविताविति**। अनुबन्धद्वयकरणं ष्यङ इव ष्यञोऽपि 'यङश्चाप्' इत्यत्र सामान्यग्रहणार्थम्। न च 'ष्यङः संप्रसरणम्' इत्यत्र विशेषणार्थं तयोरुपयोगोऽस्ति। अन्यथा पाश्यापुत्रः पाश्यापतिरित्यत्र 'पाशादिभ्यो यः' इति यप्रत्ययेऽपि संप्रसारणप्रसङ्ग इति वाच्यम्। 'यङः संप्रसारणम्' इत्येकानुबन्धेनापि तद्वारणात्। लोलूयापतिरित्यत्र त्वकारप्रत्ययेन व्यवधानात्संप्रसारणाभावः। कौमुदगन्धीपुत्र इत्यत्र त्वेकादेशस्य पूर्वान्तत्वेन ग्रहणान्नास्ति व्यवधानमिति संप्रसारणं सिध्यति। **कौमुदगन्ध्येति**। अणः ष्यङ्।

र्षयोः किम्—वासिष्ठी। वैश्वामित्री। गुरूपोत्तमयोः किम्—औपगवी। जातिलक्षणो ङीष्। गोत्रे किम्—अहिच्छत्रे जाता अहिच्छत्री। ११६६ **गोत्रावयवात्।** (४-१-७९) गोत्रावयवा गोत्राभिमताः कुलाख्याः, ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात्। अगुरूपोत्तमार्थं आरम्भः। पौणिक्या। भौणिक्या।

वराहस्यापत्यं स्त्रीति विग्रहः, अत इञ्, अकारलोपः, वाराहिशब्दः। तत्र इकार उत्तमः। रेफादाकार उत्तमसमीपवर्ती गुरुः। इञ इकारस्य ष्यङादेशः, चाविति भावः। **वासिष्ठी। वैश्वामित्रीति।** ऋष्यणन्तावेतौ। **औपगवीति।** अणन्तत्वेऽपि गुरूपोत्तमत्वाभावान्न ष्यङ्। **जातिलक्षण इति।** 'गोत्रं च चरणैः सह' इति जातित्वम्। **आहिच्छत्रीति।** जातार्थे अणयम्, नतु गोत्र इति न ष्यङ्। नच ष्यङ्प्रत्यय एव कुतो न विधीयत इति वाच्यम्, तथा सति उदमेवस्यापत्यं स्त्री इति विग्रहे अत इञि ष्यङि चापि औदमेय्या, तस्या अपत्यं औदमेयेय इति न सिध्येत्, अस्यापत्यप्रत्ययत्वाभावेन यलोपाप्राप्तेरिति स्पष्टं भाष्ये। **गोत्रावयवात्।** गोत्रावयवशब्दं व्याचष्टे—**गोत्रावयवा गोत्राभिमता इति।** गोत्रं कुलम् अभिमतं प्रख्यातं याभिरिति विग्रहः। कुलप्रख्यातिकृत इत्यर्थः। कुलव्यपदेशकृत इति यावत्। तदाह—**कुलाख्या इति।** कुलम् आख्यायते व्यपदिश्यते आभिरिति कुलाख्याः। कुलनामानीत्यर्थः। पुणिकादिशब्दैर्हि कुलं व्यपदिश्यते—पुणिका वयम्, भुणिका वयमित्यादि। अवपूर्वकाद् 'यु मिश्रणे' इति धातोरुपसर्गवशेन प्रख्यात्यर्थकात् पचाद्यचि अवयवशब्दः। कुलस्यावयवः प्रख्यापकशब्दः कुलावयव इति लभ्यत इति भावः। ननु पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह—**अगुरूपोत्तमार्थ इति।** गोत्रादवयुतं मिश्रितम् अनन्तरापत्यं तदर्थमित्यपि भाष्ये स्पष्टम्। एवं च पूर्वसूत्रे अपत्याधिकारबहिर्भूतेऽपि पारिभाषिकमेव गोत्रं गृह्यत इति भाष्यस्वरसः।

वाराह्येति। इञः ष्यङ्। अणिञोः किम्, ऋतभागस्यापत्यमार्तभागी। बिदादित्वादञ् 'शार्ङ्गरवाद्यञः' इति ङीन्। 'टिड्ढा—' इत्यादिना ङीबिति तु वृत्तिकारः। 'अणिञोः—' इत्यत्र तु लौकिकं गोत्रं गृह्यते। 'गोत्रं च चरणैः—' इत्यत्र तु पारिभाषिकमेव गृह्यते। तेन जातित्वाभावान्ङीनः प्राप्तिर्नास्तीति स्थितस्य गतिमाहुः। **गोत्रावयवात्।** अवयवशब्दोऽप्रधानवाची, अवयवश्चासौ गोत्रं चेति कर्मधारयः, निपातनाद् गोत्रशब्दस्य पूर्वनिपातः। **गोत्राभिमता इति।** गोत्रमित्येवमभिमताः गोत्रवाचित्वेन देशविशेषे प्रसिद्धाः, न तु प्रवराध्याये पठिता इत्यर्थः। प्रवराध्यायेऽपाठश्चाप्राधान्यम्। **कुलाख्या इति।** कुलमाख्यायते यैरिति कुलाख्याः पुणिकभुणिकमुखरप्रभृतयः तैर्हि कुलमाख्यायते 'पुणिका वयं गोत्रेण' 'भुणिका वयं गोत्रेण'

१२०० कौड्यादिभ्यश्च। (४-१-८०) स्त्रियां ष्यङ्प्रत्ययः स्यात्। अगुरूपोत्तमार्थोऽनणिञन्तार्थश्चारम्भः। कौड्या। व्याड्या। गौकक्ष्या[1]। 'सूत युवत्याम्' (ग सू २५) सूत्या। 'भोज क्षत्रिये' (ग सू २६)। भोज्या। **१२०१ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम्।** (४-१-८१) एभ्यश्चतुर्भ्यः ष्यङ्वा। अगोत्रार्थमिदं गोत्रेऽपि परत्वात्प्रवर्तते। पक्षे 'इतो

पौणिक्येति। पुणिकस्यापत्यं स्त्रीति विग्रहे अत इञन्तात् ष्यङि चाप्। एवं भौणिक्या। मनुष्यनामत्वे तन्नामिकाण्णः ष्यङ्। **कौड्यादिभ्यश्च।** 'प्रत्ययविधिः' इति भाष्योक्तं पक्षान्तरमाश्रित्याह—**ष्यङ्प्रत्यय इति।** पूर्वेण सिद्धे किमर्थमिदमित्यत आह—**अगुरूपोत्तमार्थोऽनणिञन्तार्थश्चेति। कौड्येति।** क्रोडस्यापत्यं स्त्रीति विग्रहे अत इञन्तात्ष्यङ्, चाप्। इह 'त्र्यादीनामन्त्यमुत्तमम्' इत्युक्तेर्न गुरूपोत्तमत्वम्। मनुष्यनामत्वे त्वण्। गौकक्ष्यशब्दो गर्गादियञन्तः। तस्य अनणिञन्तत्वेऽपि ष्यङ्। **सूत युवत्यामिति।** गणसूत्रमिदम्। सूतशब्दो युवत्यां ष्यङं लभत इत्यर्थः। **सूत्येति।** प्राप्तयौवनेत्यर्थः। जातौ तु सूतीत्येव। **भोजक्षत्रिये।** इदमपि गणसूत्रम्। **दैवयज्ञि। अगोत्रार्थमिति।** अनन्तरापत्यार्थमित्यर्थः। **प्रवर्तत इति।** विकल्प इति शेषः। **पक्ष इति।** ष्यङभाव-

---

इति। **तत इति।** गोत्रावयवादित्यर्थः। **कौड्यादिभ्यश्च।** पञ्चमीनिर्देशात्प्रत्ययत्वमेवेहाश्रीयत इत्याह—**ष्यङ् प्रत्यय इति।** कौडि, व्याडि, आपिशलि, गौकक्ष्य इत्यादि। गौकक्ष्यशब्दो गर्गादियञन्तस्तदर्थमाह—**अनणिञन्तार्थश्चेति। सूतेति।** गणसूत्रम्। सूतशब्दो ष्यङं लभते युवत्यां वाच्यायामित्यर्थः। **सूत्येति।** ष्यङि 'यङश्चाप्'। अन्यत्र तु क्रियाशब्दाट्टाप्। सूतजातिवाचिनस्तु ङीष्, सूती। **भोजेति।** इदमपि गणसूत्रम्। जातिलक्षणङीषोऽपवादः ष्यङ्, क्रियाशब्दात्तु टाबेव। भोजयतीति भोज्या। **दैवयज्ञि। चतुर्भ्य इति।** इञन्तेभ्य इति शेषः। देवा यज्ञा यष्टव्या यस्य स देवयज्ञः। शुचिर्वृक्षो यस्य शुचिवृक्षः। सत्यमुग्रं यस्य सत्यमुग्रः। निपातनाद्विशेष्यस्य पूर्वनिपातो मुमागमश्च। काण्डेन विद्धः काण्डेविद्धः। 'कर्तृकरणे कृता-' इति समासः। निपातनात्काण्डशब्दस्य एकारः। पाठान्तरे कण्ठे विद्धमस्य, कण्ठे वा विद्धः कण्ठेविद्धः। 'अमूर्धमस्तकात्-' इत्यलुक्। एभ्यः सर्वेभ्योऽपत्ये 'अत इञ्'। **गोत्रेऽपि। परत्वादिति।** तथा चोभयत्र विभाषेति भावः। अत्रेदमवधेयम्—'अणिञोः-' इति सूत्रे यदि शास्त्रीयं गोत्रं गृह्यते तदा 'अगोत्रार्थमिदम्' इत्यादिग्रन्थः स्वरसतः संगच्छते। यदि तु लौकिकं गोत्रमेव तत्र गृह्यते तदा

---

[1] नास्ति क.।

मनुष्य-' (सू ४२०) इति ङीष्। दैवयज्ञ्या, दैवयज्ञी इत्यादि।

इत्यपत्याधिकारप्रकरणम्।

अथ तद्धितेषु चातुरर्थिकप्रकरणम्। २७।

१२०२ तेन रक्तं रागात्। (४-२-१) रज्यतेऽनेनेति रागः, कषायेण रक्तं वस्त्रं काषायम्। माञ्जिष्ठम्। रागात् किम्—देवदत्तेन रक्तं वस्त्रम्। १२०३ लाक्षारोचनाट्ठक्। (४-२-२) लाक्षिकः, रौचनिकः। 'शकलकर्दमाभ्या-

---

पक्ष इत्यर्थः। दैवयज्ञीति। देवयज्ञस्यापत्यं स्त्रीति विग्रहे अत इञन्तात् ष्यङ्विकल्पः। इत्यादीति। शुचिवृक्षस्यापत्यं स्त्री शौचिवृक्ष्या, शौचिवृक्षी। सत्यमुग्रः, निपातनान्मुम्। सत्यमुग्रस्यापत्यं स्त्री सात्यमुग्र्या, सात्यमुग्री। काण्डेन विद्धः काण्डेविद्धः। निपातनादेत्त्वम् काण्डेविद्धस्यापत्यं स्त्री काण्डेविद्ध्या, काण्डेविद्धी। काण्ठेविद्धीति पाठान्तरम्। कण्ठे विद्धं वेधो यस्य, तस्यापत्यम्, काण्ठेविद्धिः।

इत्यपत्याधिकारप्रकरणम्।

अथ तद्धितचातुरर्थिकप्रकरणं निरूप्यते। तेन रक्तं रागात्। रज्यत इति। रज्यते वर्णान्तरं प्राप्यते अनेनेत्यर्थे रञ्जेः करणे घञि कृते 'घञि च भावकरणयोः' इति नलोपे 'चजोः कुघिण्ण्यतोः' इति कुत्वे उपधावृद्धौ रागशब्द इत्यर्थः। तथा च रागशब्देन रञ्जनसाधनं द्रव्यमुक्तं भवति। तेनेति सामान्यनिर्देशः। तथाच तेन रक्तं वर्णान्तरं प्राप्तमित्यर्थे रागाद् रञ्जनद्रव्यवाचकात् तृतीयान्तादण् स्यादित्यर्थः, 'प्राग्दीव्यतोऽण्' इत्यधिकारात्। कषायेणेति। कषायो धातु-विशेषो रञ्जनद्रव्यम्, तेन रक्तं वर्णान्तरं प्राप्तं काषायमित्यर्थः। माञ्जिष्ठमिति। मञ्जिष्ठा नाम रञ्जनद्रव्यविशेषः। लाक्षारोचनाट्ठक्। अणोऽपवादः। लाक्षिक

'अणिञोः—' इति नित्ये प्राप्ते विकल्पार्थमिदमित्येव व्याख्यातुमुचितमिति।

इति तत्त्वबोधिन्यामपत्याधिकारप्रकरणम्।

तेन रक्तम्। तृतीयान्तात्समर्थाद्यथाविहितं प्रत्ययाः स्युः। रज्यतेऽनेनेतीति। बाहुलकात्करणे घञ्। राग इति। रञ्जकद्रव्यमित्यर्थः। शुक्लस्य वर्णान्तरापादनमिह रञ्जेरर्थः। लाक्षारोचनात्। वृत्तिकृता तु वार्तिकस्थौ शकल-

---

१ कण्ठविद्धमित्यारभ्य काण्ठेविद्धिरितियावत् पाठः क्वचित् पुस्तके नास्ति।

मुपसंख्यानम्।' (वा २६७९)। शाकलिकः। कार्दमिकः। 'आभ्यामणपि' इति वृत्तिः। शाकलः। कार्दमः। 'नील्या अन्' (वा २६८०) नील्या रक्तं नीलम्। 'पीतात्कन्' (वा २६८१)। पीतकम्। 'हरिद्रामहारजनाभ्यामञ्' (वा २६८२)। हारिद्रम्। माहारजनम्। **१२०४ नक्षत्रेण युक्तः कालः।** (४-२-३) पुष्येण युक्तं पौषमहः। पौषी रात्रिः। **१२०५ लुबविशेषे।** (४-२-४) पूर्वेण विहितस्य लुप्स्यात् षष्टिदण्डात्मककालस्यावान्तरविशेषश्चेन्न

इति। पट इति शेषः। लाक्षया रक्त इति विग्रहः। **रौचनिक इति**। रोचनया रक्त इति विग्रहः। **शाकलिक इति**। शकलं रागद्रव्यविशेषः। **वृत्तिरिति**। भाष्ये तु नैतद् दृष्टम्। **नील्या अनिति**। वक्तव्य इति शेषः। अणोऽपवादः। नीली ओषधिविशेषः। 'पीतात्कन्' अणोऽपवादः। पीतं हरितालकादि द्रव्यम्। **हारिद्रामहेति**। अणोऽपवादः। स्वरे विशेषः। हरिद्रा प्रसिद्धा। महारजनं नाम रागद्रव्यविशेषः। इति रक्ताधिकारः।

नक्षत्रेण। अस्मिन्नर्थे प्रथमोच्चारिताद् नक्षत्रवाचकाच्छब्दात् प्राग्दीव्यतीयाः प्रत्यया यथायथं स्युरित्यर्थः। नक्षत्रयुक्तश्चन्द्रमाः नक्षत्रशब्देन विवक्षितः। **पुष्येण युक्तमिति**। पुष्ययुक्तचन्द्रमसा युक्तमित्यर्थः। **पौषम् अहरिति**। पुष्यशब्दादणि 'तिष्यपुष्ययोर्नक्षत्राणि यलोपः' इति यलोपः। **पौषी रात्रिति**। पुष्ययुक्तचन्द्रमसा युक्तेत्यर्थः। अणि यलोपे: 'टिड्ढ–' इति ङीप्। नक्षत्रेणेति किम्? चन्द्रेण युक्ता रात्रिः। कालः किम्? पुष्येण युक्तश्चन्द्रमाः। **लुबविशेषे**। **षष्टिदण्डेति**। षष्टिघटिकापरिच्छिन्ने काले एकैकस्मिन् एकैकेन

कर्दमौ सूत्रे प्रक्षिप्तौ। 'शकलं त्वचि खण्डे च रागवस्तुनि वल्कले' इति विश्वः। **वृत्तिकार इति**। भाष्ये तु नैतद् दृष्टमिति भावः। **नील्येति**। नीली ओषधिविशेषः। अणपवादोऽयम्। **नक्षत्रेण**। नक्षत्रवाचकाः शब्दा वृत्तिविषये तद्युक्तं चन्द्रमसमभिधानाः प्रत्ययं लभन्ते। **पुष्येणेति**। पुष्यसमीपस्थेन चन्द्रमसेत्यर्थः। एवं च पौषमहः, इत्यादिव्यवहारः सङ्गच्छते। सर्वेषामप्यह्नां पुष्ययोगसत्त्वेऽपि तत्समीपस्थचन्द्रमसा योगस्यासार्वत्रिकत्वात्। नक्षत्रेणेति किम्, चन्द्रेण युक्ता रात्रिः। कालः किम्, पुष्येण युक्तश्चन्द्रः। **लुबविशेषे**। पूर्वसूत्रस्यानुवर्तनादिह 'नक्षत्रेण युक्तस्य कालस्याविशेषे गम्ये' इत्यर्थः उपलभ्यते तदाह—**षष्टिदण्डेति**। 'अद्य पुष्यः' इत्युक्त्या 'न ह्यो, न श्वः' इति विशेषे गम्यमानेऽपि अहोरात्रात्मककालस्यावान्तरविशेषानवगमाल्लुब् भवत्येवेति भावः। 'अविशेषे' इत्यत्र प्रसज्यप्रतिषेधाश्रयणात् 'पौषोऽहोरात्रः' इत्यत्र लुब् न भवति, षष्टिदण्डसमुदायरूपकालस्य

गम्यते । अद्य पुष्यः । कथं तर्हि 'पुष्ययुक्ता पौर्णमासी पौषी' इति । 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' (सू १२२९) इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात् । श्रवणशब्दात्तु अत एव लुब् युक्तवद्भावाभावश्च । अबाधकान्यपि निपातनानि । श्रावणी । १२०६ संज्ञायां श्रवणाश्वत्थाभ्याम् । (४-२-५) विशेषार्थोऽयमारम्भः । श्रवणा रात्रिः । अश्वत्थो मुहूर्तः । संज्ञायां किम्-श्रावणी, आश्वत्थी । १२०७ द्वन्द्वाच्छः । (४-२-६) नक्षत्रद्वन्द्वाद्युक्ते काले छः स्याद्विशेषे सत्यसति च । तिष्यपुनर्वसवीयमहः । राधानुराधीया

नक्षत्रेण चन्द्रमा युज्यत इति स्थितिः । तस्य षष्टिदण्डस्य कालस्य अवान्तरविशेषः अहर्वा रात्रिर्वेति न गम्यते चेदित्यर्थः । **अद्य पुष्य इति** । अद्येत्यव्ययम् अहोरात्रवाचि अधिकरणशक्तिप्रधानम्, इह तु अधिकरणशक्तिविनिर्मुक्तः अहोरात्रकालो विवक्षितः । तथा च अयमहोरात्रः पुष्ययुक्तचन्द्रमसा युक्त इत्यर्थः । अहर्वा रात्रिर्वेति विशेषानवगमादणो लुप् । **कथं तर्हीति** । पौर्णमास्याः षष्टिदण्डात्मिकाया अवान्तरविशेषानवगमादिह लुप् स्यादित्याक्षेपः । समाधत्ते—**विभाषेति** । फाल्गुनीकार्तिकीचैत्रीशब्दानां नक्षत्राणविशिष्टानां पौर्णमास्यां प्रयोगदर्शनेन पौर्णमास्यां नक्षत्रयुक्तायां 'लुबविशेषे' इत्ययं लुब् नेति ज्ञापितत्वात् पौषी पौर्णमासीत्यत्र न लुबित्यर्थः । ननु तर्हि श्रवणायुक्तपौर्णमास्यां लुबभावात् कथं श्रवणेति निर्देश इत्यत आह—**श्रवणशब्दात्त्वत एव लुबिति** । श्रवणेति निपातनादेव पौर्णमास्यां लुबित्यर्थः । ननु 'कृत्तिका श्रवणः पुष्यः चित्रास्वात्योर्यदन्तरम् ।' इत्यादौ श्रवणशब्दस्य पुँल्लिङ्गत्वदर्शनेन तस्मादणो लुपि कृते 'लुपि युक्तवद्व्यक्तिवचने' इति पुँल्लिङ्गत्वावश्यंभावाच्छ्रवणेति कथं स्त्रीलिङ्गतेत्यत आह—**युक्तवद्भावाभावश्चेति** । निपातनादिति शेषः । ननु तर्हि श्रावणीति नैव स्यादित्यत आह—**अबाधकान्यपि निपातनानीति** । इयं परिभाषा वृत्तौ स्थिता । सर्वादिसूत्रभाष्ये तु 'बाधकान्येव निपातनानि' इत्युक्तम् । **संज्ञायाम्** । श्रवणाश्वत्थाभ्यां परस्य नक्षत्रप्रत्ययस्य लुप् स्यात्संज्ञायामित्यर्थः । ननु 'लुबविशेषे' इत्येव सिद्धे किमर्थमिदमित्यत आह—**विशेषार्थोऽयमारम्भ इति** । **श्रवणा रात्रिरिति** । श्रवणयुक्तचन्द्रमसा युक्ता रात्रिरित्यर्थः । 'विभाषा फाल्गुनीश्रवणा—' इति सूत्रे श्रवणेति निर्देशस्य सामान्यापेक्षत्वाद् अपौर्णमास्यामपि युक्तवद्भावो नेति विज्ञायते । अतः श्रवणा रात्रिरिति सिद्धमिति प्रकृतसूत्रे भाष्ये स्पष्टम् । **अश्वत्थो मुहूर्त इति** । अश्वत्थो नाम अश्विनीनक्षत्रम् । तेन युक्तः अश्वत्थो

प्रतीतावप्यवयवद्वयात्मकस्य विशेषस्य प्रतीतेरित्याशयेनाह – **विशेषश्चेमेति** । **अद्य पुष्य इति** । 'मूलेनावाहयेद्देवीं श्रवणेन' इत्यप्युदाहरणं बोध्यम् । **द्वन्द्वाच्छः** ।

रात्रिः । १२०८ दृष्टं साम । (४-२-७) तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम । 'अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः' (वा २६९०) । उशनसा दृष्टमौशनम्, औशनसम् । १२०९ कलेर्ढक् । (४-२-८) (वा २६८९) । कलिना दृष्टं कालेयं साम । १२१० वामदेवाड्ड्यड्ड्यौ । (४-२-९) वामदेवेन दृष्टं साम वामदेव्यम् ।

मुहूर्तविशेषो ज्यौतिषे प्रसिद्धः । **द्वन्द्वाच्छः । तिष्यपुनर्वसवीयमहरिति ।** तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू, ताभ्यां युक्तमहरिति विग्रहः । छस्य ईयादेशे ओर्गुणः । **राधानुराधीया रात्रिरिति ।** राधेति विशाखानक्षत्रमुच्यते । राधा च अनुराधाश्च राधानुराधाः, तद्युक्ता रात्रिरित्यर्थः । **दृष्टं साम । तेनेत्यवेति ।** अनुवर्तत एवेत्यर्थः । तेन दृष्टं सामेत्यर्थे तृतीयान्तादणादयः स्युरित्यर्थः । **अस्मिन्नर्थ इति ।** 'दृष्टं साम' इत्यर्थे यः अण् स डिद्वेत्यर्थः । **औशनमिति ।** अणि टिलोपपक्षे रूपम् । **कलेर्ढक् । वामदेवाड्ड्यड्ड्यौ । वामदेव्यमिति ।** डित्त्वाट्टिलोपः, ञित्त्वं स्वरार्थम् । ननु 'यस्येति च' इति लोपेन सिद्धे किमर्थमिह डित्करणमिति चेत्, सत्यम्—ययतोरेव विधौ 'ययतोश्चातदर्थे' इति नञः परस्य ययदन्तस्यान्तोदात्तस्वरविधौ अनयोर्ग्रहणं स्यात्, तदभावार्थं डित्करणम् । डित्करणे सति तु स्वरविधावनयोर्न ग्रहणम्, 'निरनुबन्धकग्रहणे सति न सानुबन्धकस्य ग्रहणम्' इति परिभाषया 'तदनुबन्धकग्रहणे सति नातदनुबन्धकस्य' इति परिभाषया च तन्निवृत्तिर्भवति । एते तु परिभाषे इहैव

विशेषे उदाहरणमाह—**तिष्येत्यादि ।** अविशेषे तूदाहर्तव्यम् 'अद्य राधानुराधीयम्' इति । न चात्र 'लुबविशेषे' इति अण इव छस्यापि लुप्स्यादिति वाच्यम् । मध्येऽपवादन्यायरीत्या पूर्वोपस्थितस्याण एव तत्प्रवृत्तेः । यत्तु 'लुपं परत्वाद्बाधते' इति वृत्तिकृतोक्तम् । तन्न । द्वयोर्युगपत्प्राप्त्यभावात् । **दृष्टं साम ।** तृतीयान्ताद् दृष्टमित्यर्थेऽणादयः स्युर्यद्दृष्टं तच्चेत्साम । **अस्मिन्नर्थ इति ।** तथा च श्लोकवार्तिकम्—'दृष्टे सामनि जाते वाप्यण् डिद् द्विर्वा विधीयते । तीयादीकक् न विद्याया गोत्रादङ्कवदिष्यते ।' इति जातेऽर्थे यो द्विरण् स च वा डिदित्यन्वयः । शतभिषजि जातः शताभिषः, शातभिषजः । इह हि 'प्राग्दीव्यतः—' इति प्राप्तोऽण् कालाट्ठञा बाधितः, स च 'सन्धिवेलादि—' सूत्रेण प्रतिप्रसूयते इत्ययं द्विरुक्तोऽण् । तीयादीति । तीयादीकक् स्वार्थे भवतीत्यर्थः । द्वैतीयकः, तार्तीयकः । न विद्याया इति । विद्यावाचकात्तीयान्तादीकक् न भवतीत्यर्थः । द्वितीया विद्या । गोत्रादङ्कवदिति । गोत्रप्रत्ययान्तादङ्के यः प्रत्ययः स दृष्टे सामन्यपि भवति । औपगवेन दृष्टमौपगवकम् ।

१ इदं वार्त्तिकमिति शेखरे ।

'सिद्धे यस्येति लोपेन किमर्थं ययतौ ङितौ ।
ग्रहणं माऽतदर्थे भूद्वामदेव्यस्य नञ्स्वरे ॥' इति भाष्यम् ।

१२११ परिवृतो रथः । (४-२-१०) वस्त्रैः परिवृतो वास्त्रो रथः । रथः किम्-वस्त्रेण परिवृतः कायः । समन्ताद्वेष्टितः परिवृत उच्यते । तेनेह न-छात्रैः परिवृतो रथः । १२१२ पाण्डुकम्बलादिनिः । (४-२-११) पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली । पाण्डुकम्बलशब्दो राजास्तरणवर्णकम्बलस्य वाचकः । मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थम् । १२१३ द्वैपवैयाघ्रादञ् ।

ज्ञाप्येते । तथा च अवामदेव्यमित्यत्रायं स्वरो न भवति । एतत्संग्राहकं भाष्यस्थं श्लोकं पठति—**सिद्धे यस्येत्यादि** । अत्र पूर्वार्धमाक्षेपपरम् । 'यस्य-' इति लोपेन सिद्धे ययतौ किमर्थं ङितौ कृताविल्यर्थः । **ग्रहणमिति** । वामदेव्यशब्दस्य नञ्स्वरे नञाश्रयस्वरविधौ अतदर्थे 'ययतोश्चातदर्थे' इति सूत्रे अनयोर्ङ्यड्योर्ग्रहणं मा भूदित्येतदर्थं ङित्करणमित्यर्थः । **परिवृतो रथः** । तेनेत्यनुवर्तते । तेन परिवृतो रथ इत्यर्थे तृतीयान्तादणादयः स्युरित्यर्थः । ननु छात्रैः परिवृतो रथ इत्यत्रापि स्यादित्यत आह—**समन्ताद्वेष्टितः परिवृत इत्युच्यत इति** । रथस्य समन्तादाच्छादनार्थं यद्वस्त्रादिकं रथावयवभूतं तद्वाचकादेवेत्याशयः, एकान्तग्रहणमिति वार्तिकात् । **पाण्डुकम्बलादिनिः** । 'तेन' इति परिवृतो रथ इति चानुवर्तते । इनिप्रत्यये नकारादिकार उच्चारणार्थः । ननु 'अत इनिठनौ' इति मत्वर्थीयेन इनैव सिद्धे किमर्थमिदमित्यत आह—**अणो निवृत्त्यर्थमिति** । **द्वैपवैयाघ्रादञ्** । 'तेन' इति परिवृतो रथ इति

इह 'गोत्रचरणाद् वुञ्' इति वुञ् । **वामदेवात्** । **ग्रहणं माऽतदर्थ इत्यादि** । अतदर्थे 'ययतोश्चातदर्थे' इति विहिते नञ्स्वरे नञाश्रितस्वरे ड्यड्ययतोर्ग्रहणं मा भूदित्यर्थः । 'ययतोश्च-' इति सूत्रेण विधीयमानं नञः परस्य यत्प्रदन्तस्योत्तरपदस्यान्तोदात्तत्वं वामदेव्यशब्दे मा भूत् । किंतु—अव्ययपूर्वपदस्वर एव यथा स्यादित्येतदर्थं ङित्करणमिति फलितोऽर्थः । न च कृतेऽपि ङित्त्वे 'ययतोः-' इत्यस्य प्रवृत्तिः कुतो नेति शङ्क्यम् । 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषयोः सत्त्वात् । इमे च परिभाषे इहैव ङित्त्वेन ज्ञाप्येते । तत्राद्यायाः प्रयोजनं 'पूरणगुण-' इति सूत्रे तव्यग्रहणे तव्यतोऽग्रहणम् । द्वितीयस्यास्तु अङ्ग्रहणे चङोऽग्रहणम् । 'श्वयतेरः' अङि परे इति शेषः । अश्वत् । चङि परे तु न, अशिश्वियत् । **परिवृतो** । तृतीयान्तात्परिवृत इत्यर्थेऽणादयः स्युर्यः परिवृतः स चेद्रथो भवति । रथाच्छादनार्थं यद्वस्त्रकम्बलादिकं तत एव सर्ववेष्टनं भवति, न तु छत्रादिभ्य इत्याशयेनाह—**समन्ताद्वेष्टित इति** । परिः सर्वतोभावे

(४-२-१२) द्वीपिनो विकारो द्वैपम् । तेन परिवृतो द्वैपो रथः । एवं वैयाघ्रः । **१२१४ कौमारापूर्ववचने ।** (४-२-१३) कौमार इत्यविभक्तिको निर्देशः । अपूर्वत्वे निपातनमिदम् । अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः । यद्वा–अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या । **१२१५ तत्रोद्धृतममत्रेभ्यः ।** (४-२-१४) शरावे उद्धृतः, शाराव ओदनः । उद्धरतिरिहोद्धरणपूर्वके निधाने वर्तते । तेन सप्तमी । उद्धृत्य निहित इत्यर्थः । **१२१६ स्थण्डिलाच्छयितरि व्रते ।** (४-२-१५) तत्र इत्येव । समुदायेन चेद् व्रतं गम्यते ।

चानुवर्तते तृतीयान्ताद् द्वैपशब्दाद्वैयाघ्रशब्दाच्च परिवृतो रथ इत्यर्थे अञ् स्यादित्यर्थः अणोऽपवादः । स्वरे विशेषः । **द्वीपिन इति** । द्वीपी व्याघ्रः, तस्य विकारः चर्मेत्यर्थे 'प्राणिरजतादिभ्यः' इत्यञि टिलोपे द्वैपशब्द इत्यर्थः । **एवं वैयाघ्र इति** । व्याघ्रस्य चर्म वैयाघ्रम् । अञि 'न य्वाभ्याम्–' इत्यैच् । तेन परिवृतो वैयाघ्र इति भावः । **कौमारापूर्ववचने** । 'तेन' इति परिवृतो रथ इति च निवृत्तम् । **अविभक्तिक इति** । लुप्तप्रथमाक इति भावः । अपूर्वशब्दो भावप्रधान इत्याह—**अपूर्वत्वे निपातनमिदमिति** । न पूर्वः पतिर्यस्याः सा अपूर्वपतिः, तां कुमारीमुपयतवान् पतिरित्यर्थे द्वितीयान्तात् कुमारीशब्दादण् स्यादित्येकोऽर्थः । कुमारी अपूर्वं पतिमुपपन्नेत्यर्थे प्रथमान्तात्कुमारीशब्दादण् स्यादित्यन्योऽर्थः । आद्ये उदाहरति—**अपूर्वपतिमिति** । द्वितीये उदाहरति—**यद्वेत्यादि** । आद्ये उपयन्तरि प्रत्ययः । द्वितीये उपयतायां स्वार्थे प्रत्यय इति विवेकः । **तत्रोद्धृतम्** । तत्रोद्धृतमित्यर्थे अमत्रवाचकशब्दात् सप्तम्यन्तात् प्रत्ययः स्यादित्यर्थः । अमत्रं भाजनं शरावादि । ननु उद्धरणे पृथक्करणे शरावस्यापादानत्वात् कथं सप्तमीत्यत आह—**उद्धरतिरिहेति** । 'सास्मिन्पौर्णमासी' इत्यतः प्राक् 'तत्र' इत्यनुवर्तते । **स्थण्डिलाच्छयितरि** । स्थण्डिलशब्दात्सप्तम्यन्ताद्

वर्तेत इति भावः । **कौमारा** । तेनेति निवृत्तम् । 'अपूर्व' इति भावप्रधानो निर्देश इत्याह—**अपूर्वत्व इति** । अपूर्वत्वं तु स्त्रिया एवेष्यते, पुरुषस्तु अपूर्वभार्योऽस्तु वा मा वेत्यनाग्रहः । **अपूर्वपतिमिति** । न पूर्वः पतिर्यस्या इति बहुव्रीहिः । **कौमारः पतिरिति** । द्वितीयान्तात्कुमारीशब्दादुपयन्तरि प्रत्ययः । **कौमारीति** । इह कुमारीशब्दात्प्रथमान्तात्स्वार्थे प्रत्ययः, 'टिड्ढाण–' इति ङीप् । **तत्रोद्धृत** । 'सास्मिन्पौर्णमासी–' इति सूत्रात्प्राक् 'तत्र' इत्यधिकारः । पात्रवाचिभ्यः सप्तम्यन्तेभ्य उद्धृतमित्यर्थे यथाविहितं प्रत्ययाः स्युः । **शाराव इति** । भुक्तोच्छिष्ट इत्यर्थे इति वृत्तिकृत् । अवशिष्ट इति तदर्थः । 'उच्छिनष्टि, न सर्वं जुहोति' इति कल्पसूत्रव्यवहारात् । **सप्तमीति** । निधानक्रियापेक्षया अधिकरणत्वादिति भावः ।

स्थण्डिले शेते स्थाण्डिलो भिक्षुः। १२१७ संस्कृतं भक्षाः। (४-२-१६) सप्तम्यन्तादण्स्यात्संस्कृतेऽर्थे, यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृता भ्राष्ट्रा यवाः। अष्टसु कपालेषु संस्कृतोऽष्टाकपालः पुरोडाशः। १२१८ शूलोखाद्यत्। (४-२-१७) अणोऽपवादः। शूले संस्कृतं शूल्यं मांसम्। उखा पात्रविशेषः। तस्यां संस्कृतमुख्यम्। १२१९ दध्नष्ठक्। (४-२-१८) दध्नि संस्कृतं दाधिकम्। १२२० उदश्वितोऽन्यतरस्याम्। (४-२-१९) ठक्स्यात्। पक्षेऽण्। १२२१ इसुसुक्तान्तात्कः। (७-३-५१) इस् उस् उक् त् एतदन्ता-

---

व्रतनिमित्तकशयनकर्तरि वाच्ये प्रत्ययः स्यादित्यर्थः। **संस्कृतं भक्षाः**। भक्ष्यन्त इति भक्षाः, कर्मणि घञ्। तत्रेत्यनुवर्तते। तदाह—**सप्तम्यन्तादिति**। एकवचनं बहुवचनं च सामान्याभिप्रायम्, 'जात्याख्यायामेकस्मिन्बहुवचनम्—' इत्युक्तेरित्यभिप्रेत्याह **यत्संस्कृतं भक्षाश्चेत्ते स्युरिति**। संस्कारो नाम पाकादिना गुणविशेषाधानम्, **अष्टाकपाल इति**। 'तद्धितार्थ—' इति समासः। भक्षा इति किम्? पुष्पपुटे संस्कृतं वस्त्रम्। **शूलोखाद्यत्**। समाहारद्वन्द्वात्पञ्चमी। 'तत्र' इति 'संस्कृतं भक्षा' इति चानुवर्तते। सप्तम्यन्ताच्छूलशब्दादुखाशब्दाच्च 'संस्कृतं भक्षाः' इत्यर्थे यत् स्यादित्यर्थः। **उखा पात्रविशेष इति**। 'पिठरं स्थाल्युखा कुण्डम्' इत्यमरः। **दध्नष्ठक्**। सप्तम्यन्ताद्दधिशब्दात् संस्कृतं भक्षा इत्यर्थे ठक् स्यादित्यर्थः। अणोऽपवादः। **दाधिकमिति**। ठकि इकादेशे 'यस्येति च' इति इकारलोपः। इह दध्नि अधिकरणे संस्कारो लवणादिना भवति। प्राग्वहतेरित्यत्र तु 'संस्कृतम्' इति तृतीयान्ताद् ठग्वक्ष्यते। **उदश्वितोऽन्यतरस्याम्**। **ठक् स्यादिति**। शेषपूरणमिदम्।

स्थण्डिलात्। व्रतं शास्त्रेण विहितो नियमः, तस्मिन्समुदायेन गम्ये सप्तम्यन्ताद्यथाविहितः प्रत्ययो भवति शयितर्यर्थे। **अष्टाकपाल इति**। 'द्विगोर्लुगनपत्ये' इत्यणो लुक्। **शूलोखात्**। 'संस्कृतं भक्षाः' इत्यनुवर्तते। कथम् 'उख्योभिः' इति। न ह्यसौ भक्ष इति चेत्। अत्राहुः—दिगादित्वाद्भवार्थे यदिति। **दध्नष्ठक्। दध्नीति**। संस्कारस्त्विह लवणादिना, दधि त्वधिकरणमात्रम्। यस्तु 'प्राग्वहतेः' इत्यत्र 'संस्कृतम्' इति ठग्वक्ष्यते स तृतीयान्ताद्बोध्यः। तेन दध्ना संस्कृतमपि दाधिकमेव। **इसुसुक्तान्तात्**। 'तात्' इत्युक्तेऽप्यङ्गविशेषणेनैव तान्तादिति लब्धे अन्तग्रहणं प्रत्ययोपदेशकाले यस्तान्तस्तस्मात्परस्य ठस्य कादेशो यथा स्यादित्येवमर्थम्। तेन 'माथितिकः' इत्यत्र ठस्य इकादेशे 'यस्य—' इति लोपे च कृते तान्तत्वेऽपि इकस्य कादेशो न भवतीति 'ठस्येकः' इति सूत्रे कैयटः। संनिपातपरिभाषयैव इकस्य कादेशो न स्यादित्यन्तग्रहणं त्यक्तुं शक्यमित्यन्ये। **उदश्विदिति**। श्वयतेः क्विपि तुक्

त्परस्य ठस्य कः स्यात् । उदकेन श्वयति वर्धते इत्युदश्वित् । तत्र संस्कृतः, औदश्वित्कः, औदश्वितः । इसुसोः प्रतिपदोक्तयोर्ग्रहणमेह । आशिषा चरत्याशिषिकः । उषा चरति औषिकः । 'दोष उपसंख्यानम्' (वा २०५१) दोर्भ्यां चरति दौष्कः । १२२२ क्षीराड्ढञ् । (४-२-२०) अत्र संस्कृतम् इत्येव सम्बध्यते, न तु भक्षा इति । तेन यवाग्वामपि भवति । क्षैरेयी । १२२३ सास्मिन्पौर्णमासीति । (४-२-२१) इतिशब्दात् 'संज्ञायाम्' इति लभ्यते । पौषी पौर्णमास्यस्मिन्पौषो मासः । १२२४ आग्रहायण्यश्वत्थाट्ठक् ।

उक्तविषये उदश्विच्छब्दाट्ठग्वा स्यादित्यर्थः । **इसुसुक्तान्तात्कः** । इसुसुक्ताः अन्ता यस्येति विग्रहः । तकारादकार उच्चारणार्थः । **ठस्य कः स्यादिति** । ठकि ककार इत् , अकार उच्चारणार्थः, ठकारस्य शिष्टस्य ककार आदेश इति 'ठस्येकः' इत्यत्रोक्तम् । श्वयतीत्यस्य विवरणम्—वर्धते इति । 'टु ओ श्वि गतिवृद्धयोः' इति धातुरिह वृद्ध्यर्थक इति भावः । **उदश्विदिति** । क्विपि तुक् । 'उदकस्योदः संज्ञायाम्' इत्युदादेशः । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः । **प्रतिपदोक्तयोरिति** । इस्प्रत्ययस्य उस्प्रत्ययस्य च उणादौ प्रतिपदोक्तयोरिह ग्रहणमित्यर्थः । यथा सार्पिष्कः, धानुष्कः इति । **आशिषिक इति** । चरतीति ठक् । शासुधातोः क्विपि 'आशासः क्वौ-' इत्युपधाया इत्वम् । **उषा चरति औषिक इति** । वसधातोः क्विपि सम्प्रसारणे उषेति तृतीयान्तम् । 'शासिवसिघसीनां च' इत्युभयत्र षत्वम् । **दोष इति** । दोष्शब्दात् ठस्य कः स्यादित्यर्थः । **दौष्क इति** । तरतीति ठक् । **क्षीराड्ढञ्** । **क्षैरेयीति** । क्षीरे संस्कृता यवागूरित्यर्थः । भक्षग्रहणानुवृत्तौ त्विह न स्यात् , यवाग्वाः पेयत्वेन खाद्यत्वाभावात् । **सास्मिन्पौर्णमासीति** । 'तत्र' इति, 'संस्कृतं भक्षाः' इति च निवृत्तम् । सा पौर्णमासी अस्मिन्नित्यर्थे प्रथमान्तात्प्रत्ययः स्यादित्यर्थः । **इतिशब्दादिति** । एतच्च भाष्ये स्थितम् । **पौषीति** । पुष्येण युक्ता पौषी पौर्णमासी, सा यस्मिन्मासे स पौषो मासः । पौषीशब्दादणि 'यस्येति च' इति इकारलोपः । एवं मघाभिर्युक्ता पौर्णमासी माघी, सा यस्मिन्स माघो मासः । तथा

'उदकस्योदः–' इत्युदादेशः । इहैव निपातनात्संप्रसारणाभावः । **सास्मिन्** । सेति प्रथमान्तादस्मिन्निति सप्तम्यन्तार्थे प्रत्ययः स्याद्यः प्रथमान्तार्थः स चेत्पौर्णमासी भवति । **इति शब्दादिति** । स हि लौकिकीं विवक्षामनुसारयति । वृत्तिकृता तु सूत्रे एव 'संज्ञायाम्' इति प्रक्षिप्तम् । **पौर्णमासीति** । पूर्णो मासोऽस्यां तिथाविति बहुव्रीहौ प्रज्ञादित्वात्स्वार्थिकोऽणिति हरदत्तादयः । 'तदस्मिन्वर्तते' इत्यधिकारे

(४-२-२२) अग्रे हायनमस्या इत्याग्रहायणी । प्रज्ञादेराकृतिगणत्वादण् । 'पूर्वपदात्संज्ञायाम्-' (सू ८५७) इति णत्वम् । आग्रहायणी पौर्णमास्यस्मि-न्नाग्रहायणिको मासः । अश्वत्थेन युक्ता पौर्णमास्यश्वत्थः । निपातनात्पौर्णमास्या-मपि लुप् । आश्वत्थिकः । **१२२५ विभाषा फाल्गुनीश्रवणाकार्तिकी-चैत्रीभ्यः । (४-२-२३)** एभ्यष्ठग्वा । पक्षेऽण् । फाल्गुनिकः, फाल्गुनो वा मासः । श्रावणिकः, श्रावणः । कार्तिकिकः, कार्तिकः । चैत्रिकः, चैत्रः । **१२२६ साऽस्य देवता । (४-२-२४)** इन्द्रो देवता अस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम् । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता, मन्त्रस्तुत्या च । ऐन्द्रो मन्त्रः । 'आग्नेयो वै ब्राह्मणो देवतया' इति तु शैषिकेऽर्थे 'सर्वत्राग्नि-'

फाल्गुन इत्यादि । संज्ञायां किम् ? पौषी पौर्णमासी अस्मिन्पञ्चदशरात्रे । **आग्रहाय-ण्यश्वत्थाट्ठक्** । पूर्वसूत्रविषये आग्रहायणीशब्दादश्वत्थशब्दाच्च ठक् स्या-दित्यर्थः । अणोऽपवादः । **हायनमिति** । संवत्सर इत्यर्थः । 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री' इत्यमरः । यस्या ऊर्ध्वं संवत्सरस्यारम्भः सा पौर्णमासी आग्रहायणीत्यर्थः । तर्हि आग्रहायणेति स्यादित्यत आह—**प्रज्ञादेरिति** । 'प्रज्ञा-दिभ्यश्च' इति स्वार्थे अणि 'टिड्ढ-' इति ङीबित्यर्थः । **अश्वत्थेनेति** । अश्वि-नीनक्षत्रेणेत्यर्थः । **अश्वत्थ इति** । नक्षत्राणः 'लुबविशेषे' इति लुबिति भावः । ननु 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' इति निर्देशेन पौर्णमास्यां 'लुब-विशेषे, इत्यस्याप्रवृत्तेरुक्तत्वात् कथमिह लुबित्यत आह—**निपातनात्पौर्णमास्या-मपि लुबिति** । तथा च पौर्णमास्यां लुब् नेति ज्ञापनमेतद्व्यतिरिक्तविषयमिति भावः । **विभाषा फाल्गुनी । एभ्यष्ठग्वेति** । 'सास्मिन्-' इत्युक्तविषये इति शेषः । **फाल्गुनिकः फाल्गुनो वा मास इति** । फाल्गुनी पौर्णमास्य-स्मिन्निति विग्रहः । एवं श्रावणिक इत्यादि । इति युक्ताद्यर्थकाः ।

साऽस्य देवता । अस्मिन्नर्थे प्रथमान्तादणादयः स्युरित्यर्थः । **ऐन्द्रं हविरिति** । इन्द्रात्मकदेवतासम्बन्धीत्यर्थः । **पाशुपतमिति** । पशुपतिर्देवता अस्येति विग्रहः । ननु देवताशब्दस्य लोकप्रसिद्धजातिविशेषवाचकत्वे पितरो देवता अस्य पित्र्यमित्याद्यनुपपन्नमित्यत आह—**त्यज्यमानद्रव्ये उद्देश्य-विशेषो देवतेति** । हविश्शेषमृत्विग्भ्यो ददाति, विप्राय गां ददाति इत्यादौ ऋत्विग्विप्रादेर्देवतात्वव्यावृत्तये विशेषग्रहणम् । त्यज्यमानहविस्साध्यः अस्मदाद्य-

'पूर्णमासादण् वक्तव्यः' इति वार्तिकं न कर्तव्यमिति तदाशयः । **सास्य** । 'सेति प्रकृतं संज्ञासम्बद्धम्-' इति पुनः साग्रहणं कृतमित्याहुः । इहैव सूत्रे निपातनादेव-

(वा २६८९) इति ठक्। **१२२७ कस्येत्।** (४-२-२५) कशब्दस्येदादेशः स्यात्प्रत्ययसंनियोगेन। 'यस्य-' (सू ३११) इति लोपात्परत्वादादिवृद्धिः। को ब्रह्मा देवता अस्य कायं हविः। श्रीर्देवता अस्य श्रायम्। **१२२८ शुक्राद्घन्।**

प्रत्ययः यस्तुत्याद्युपकारः तदाश्रयो देवतेति यावत्। **मन्त्रस्तुत्या चेति।** 'अग्निमीडे पुरोहितम्' इत्यादिमन्त्रेषु यज्ञपुरोहितत्वादिगुणविशिष्टत्वेन या प्रतिपाद्यते सापि देवतेत्यर्थः। **ऐन्द्रो मन्त्र इति।** इन्द्रस्तुत्यको मन्त्र इत्यर्थः। ननु 'आग्नेयो वै ब्राह्मणो देवतया' इत्यत्र कथं देवतातद्धित। अत्र अग्नेर्हविरुद्देश्यत्वस्य मन्त्रस्तुत्यत्वस्य चाभावादित्यत आह—**आग्नेयो वै इति। शैषिकेऽर्थे इति।** शेषे इति सूत्रलब्धे तदभिमानिकत्वे गम्ये इत्यर्थः। अग्निर्नाम यो देवताजातिविशेषो लोकवेदसिद्धः तदभिमानिको ब्राह्मण इति बोधः। **कस्येत्। प्रत्ययसंनियोगेनेति।** 'साऽस्य देवता' इति विहिते कशब्दादणप्रत्यये परे तत्सन्नियोगेन प्रकृतेरिकारोऽन्तादेश इत्यर्थः। तथा च कशब्दादणि प्रकृतेरिकारे अन्तादेशे वृद्धौ आयादेशे कायमिति सिद्धम्। तत्र कि अ इति स्थिते 'यस्येति च' इति इकारलोपमाशङ्क्याह—**यस्येति लोपात्परत्वादादिवृद्धिरिति।** कशब्दस्य विवरणं ब्रह्मेति। यद्यप्यत्र इत्वविधिबलादेव लोपो न भवतीति भाष्यम्। तथापि वस्तुस्थितिकथनमिदम्। तस्य प्रयोजनमाह—**श्रीर्देवता अस्य श्रायं हविरिति।** अत्रेदमवधेयम्। 'कस्येत्' इत्यत्र कशब्दस्य अकारान्तस्य षष्ठ्येकवचनमित्येकः पक्षः। सर्वादिगणपठितस्य किंशब्दस्य षष्ठ्येकवचनमिति पक्षान्तरम्। तत्राद्यपक्षे हविःप्रचारे 'कायानुब्रूहि' इति प्रैष इति निर्विवादम्, सर्वादिगणबहिर्भूतत्वेन स्मैभावासंभवात्। द्वितीयपक्षे तु किंशब्दस्य प्रजापतिनामत्वेन असर्वनामत्वान्न स्मैभावः, अन्वर्थसंज्ञाबलेन एकार्थवृत्तेः संज्ञाशब्दस्य सर्वनामत्वाभावात्। तथा च 'कायानुब्रूहि' इत्येव प्रैषः। यद्वा प्रजापतेः सर्वात्मकत्वेन तन्नाम्नः किंशब्दस्य सर्वनामत्वात् 'कस्मा अनुब्रूहि' इत्येव संप्रैष इति भाष्ये प्रपञ्चितम्। एवं च विष्णुसहस्रनामसु 'विश्वं विष्णुः' इति, 'एको नैकः स्रवः कः किं यत्तत्पदमनुत्तमम्।' इति च पठितविश्वादिशब्देष्वप्ययं न्यायस्तुल्यः। तथा च विश्वस्मै नमः, विश्वाय नम इत्यादि प्रयोज्यमित्यास्तां प्रासङ्गिकम्। **शुक्राद्घन्।**

शब्दात्स्वार्थे तल्। **मन्त्रस्तुत्येति।** मन्त्रेण स्तुत्या। 'एतिस्तुशास्-' इत्यादिना क्यपि तुक् टाप्। **आग्नेयो वै ब्राह्मण इति।** इहाग्न्युद्देशेन ब्राह्मणो न त्यज्यत इति कथमयं प्रयोग इति न शङ्क्यमिति भावः। **परत्वादादिवृद्धिरिति।** इदं च समाधानं श्रायमित्यत्रावश्यकमिति तेनैव परिहारसम्भवादित्वविधानसामर्थ्य-

(४-२-२६) शुक्रियम्। १२२९ अपोनप्त्रपांनप्तृभ्यां घः। (४-२-२७) अपोनप्त्रियम्, अपांनप्त्रियम्। अपोनपात्, अपांनपाच्च देवता। प्रत्ययसंनियोगेन तूक्तं रूपं निपात्यते। अत एव 'अपोनपाते अपांनपातेऽनुब्रूहि' इति प्रैषः। १२३० छ च। (४-२-२८) योगविभागो यथासंख्यनिवृत्त्यर्थः। अपोनप्त्रीयम्, अपांनप्त्रीयम्। ('छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम्' (वा २७०१)। पैङ्गाक्षीपुत्रीयम्। तार्णबिन्दवीयम्)। 'शतरुद्राद्घश्च' (वा २७०२)। चाच्छः। शतं रुद्रा देवता अस्य शतरुद्रियम्, शतरुद्रीयम्। घच्छयोर्विधानसामर्थ्याद् 'द्विगोर्लुगनपत्ये' (सू १०८०) इति न लुक्। १२३१ महेन्द्राद्घाणौ च। (४-२-२९) चाच्छः। महेन्द्रियम् हविः, माहेन्द्रम्, महेन्द्रीयम्। १२३२ सोमाट्ट्यण्। (४-२-३०) सौम्यम्। टित्वान्ङीप्, सौमी ऋक्। १२३३ वाय्वृतुपित्रुषसो यत्। (४-२-३१)

'साऽस्य देवता' इत्यर्थे इति शेषः। **शुक्रियमिति**। शुक्रो देवता अस्येति विग्रहः। **अपोनप्त्रपांनप्तृभ्यां घः**। **प्रत्ययसंनियोगेनेति**। घप्रत्ययसंनियोगेन अपोनपाच्छब्दस्य अपोनप्तृभावः, अपांनपाच्छब्दस्य अपांनप्तृभावश्च निपात्यत इत्यर्थः। **अत एवेति**। घप्रत्ययसंनियोगेनैव उक्तादेशविधेरित्यर्थः। अत्र घप्रत्ययाभावान्नोक्तादेशाविति भावः। **छ च**। उक्तविषये छोऽपीत्यर्थः। ननु अपोनप्त्रपांनप्तृभ्यां घच्छौ इत्येवास्तु। तत्राह—**योगविभाग इति**। **पैङ्गाक्षीपुत्रीयमिति**। पैङ्गाक्षीपुत्रो देवता अस्येति विग्रहः। **तार्णबिन्दवीयमिति**। तार्णबिन्दुः देवता अस्येति विग्रहः। **शतरुद्राद्घ श्चेति**। वार्तिकमिदम्। **शतरुद्रियमिति**। घस्य इयादेशः। **शतरुद्रीयमिति**। छस्य ईयादेशः। उभयत्र 'तद्धितार्थ–' इति द्विगुसमासः। 'द्विगोर्लुगनपत्ये' इति लुकमाशङ्क्याह—**घच्छयोरिति**। **महेन्द्राद्घाणौ च**। **महेन्द्रियमिति**। महेन्द्रो देवता अस्येति विग्रहः। घस्य इयादेशः। **माहेन्द्रमिति**। अणि रूपम्। **महेन्द्रीयमिति**। छस्य ईयादेशः। **सोमाट्ट्यण्**। **सौम्यमिति**। सोमो देवता अस्येति विग्रहः। टित्वस्य प्रयोजनमाह—**टित्वान्ङीबिति**। **सौमीति**। सोमो देवता अस्या ऋच इति विग्रहः। ङीपि 'हलस्तद्धितस्य' इति यलोपः। **वाय्वृतु-**

मिह नाश्रितम्। **उक्तं रूपमिति**। 'नपात्' इत्यस्य 'नप्तृ' इति रूपमित्यर्थः। **शतं रुद्रा इति**। शतशब्दोऽनन्तवचनः। **सौमीति**। 'हलस्तद्धितस्य' इति

---

१ कोष्ठकान्तर्गतः पाठो बहुत्र मूले नोपलभ्यते। बालमनोरमानुरोधादिह स्थाप्यते। २ क्वचिद् 'घ च' इति शकाररहितः पाठः।

वायव्यम्। एवम् ऋतव्यम्। **१२३४ रीङृतः। (७-४-२७)** अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात्। 'यस्येति च' (सू ३११) पित्र्यम्। उषस्यम्। **१२३५ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। (४-२-३२)** चाद्यत्। द्यावापृथिवीयम्, द्यावापृथिव्यम्। शुनासीरीयम्, शुनासीर्यम्। **१२३६ अग्नेर्ढक्।**

पित्रुषसो यत्। वायु, ऋतु, पितृ, उषस् एभ्यो यदित्यर्थः। **वायव्यमिति**। वायुर्देवता अस्येति विग्रहः। यति ओर्गुणः। 'वान्तो यि–' इत्यवादेशः। **एवम् ऋतव्यमिति**। ऋतुः देवता अस्येति विग्रहः। **रीङृतः**। अङ्गस्येत्यधिकृतम् ऋता विशेष्यते, तदन्तविधिः। 'अयङ् यि क्ङिति' इत्यतो 'यि' इत्यनुवर्तते। 'अकृत्सार्वधातुकयोः–' इत्यतः 'अकृत्सार्वधातुकयोः' इति 'च्वौ च' इति सूत्रं च तदाह—**अकृदित्यादिना**। **पित्र्यमिति**। पितरो देवता अस्येति विग्रहः। यति पितृशब्दस्य रीङ्। 'ङिच्च' इत्यन्तादेशः। 'यस्येति च' इति इकारलोपः। क्यचि पित्रीयतीत्यादौ 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति वचनाद् 'अकृत्सार्वधातुकयोः–' इति दीर्घे अप्राप्ते इकारोच्चारणम्। **उषस्यमिति**। उषो देवता अस्येति विग्रहः। भत्वेन पदत्वाभावात् सकारस्य न रुत्वादि। **द्यावापृथिवी**। द्यावापृथिवी, शुनासीर, मरुत्वत्, अग्नीषोम, वास्तोष्पति, गृहमेध एतेभ्यः[1], छो यच्च स्यादित्यर्थः। अणः पत्युत्तरपदण्यस्य चापवादः। **द्यावापृथिवीयम्, द्यावापृथिव्यमिति**। द्यावापृथिवी देवता अस्येति विग्रहः। छस्य ईयादेशः। उभयत्र 'यस्येति च' इति लोपः। **शुनासीरीयमिति**। शुनो वायुः, सीरः आदित्यः, शुनश्च सीरश्च शुनासीरौ। 'देवताद्वन्द्वे च' इत्यानङ्। शुनासीरावस्य स्तं इति शुनासीरः। 'वाय्वादित्यवानिन्द्रो विवक्षितः' इति वेदभाष्ये भट्टभास्करः, शुनासीरो देवता अस्येति विग्रहः। मरुत्वान् देवता अस्य मरुत्वतीयम्, मरुत्वत्यम्। अग्नीषोमौ देवता अस्य

यलोपः। **रीङृतः**। अङ्गवृत्तपरिभाषया 'अकृत्सार्व–' इति दीर्घो न प्रवर्तत इति दीर्घग्रहणमित्याहुः। **यस्येति चेति**। पित्रीयतीत्यत्र रीङ्विधिः सावकाश इति भावः। **उषस्यमिति**। उषस्शब्दः स्त्रीलिङ्गो दिवो दुहितरं देवतां ब्रवीति। **द्यावापृथिवी**। अणण्यञोरपवादः। **शुनासीरीयमिति**। शुनश्च सीरश्चेति द्वन्द्वे 'देवताद्वन्द्वे च' इत्यानङ्। शुनो वायुः, सीर आदित्य इति वृत्तिकृत्। हरदत्तस्तु शुनासीरशब्द इन्द्रस्य गुणवाचीत्यन्ये मन्यन्त इत्याह। तथा च मन्त्रः—'इन्द्रं वयं शुनासीरमस्मिन्यज्ञे हवामहे' इति। मरुतो यस्य सन्तीति मरुत्वानिन्द्रः, मरुत्वतीयम्,

---

१ 'षड्भ्यः' इत्यधिकः पाठः क्वचित्।

(४-२-३३) आग्नेयम्। **१२३७ कालेभ्यो भववत्।** (४-२-३४) मासिकम्। प्रावृषेण्यम्। **१२३८ महाराजप्रोष्ठपदाट्ठञ्** (४-२-३५) माहाराजिकम्। प्रौष्ठपदिकम्। **१२३९ देवताद्वन्द्वे च।** (७-३-२१) अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्याद् ञिति णिति किति च परे। आग्निमारुतम्। **१२४० नेन्द्रस्य परस्य।** (७-३-२२) परस्येन्द्रस्य वृद्धिर्न स्यात्। सौमेन्द्रः।

अग्नीषोमीयम्। वास्तुनः पतिः वास्तोष्पतिः रुद्रः। निपातनादलुक् षत्वं च। 'रुद्रः खलु वै वास्तोष्पतिः' इति ब्राह्मणम्। अमरस्तु इन्द्रपर्यायेषु 'वास्तोष्पतिः सुरपतिः' इत्याह। वास्तोष्पतिर्देवता अस्य वास्तोष्पतीयम्, वास्तोष्पत्यम्। गृहमेधो देवता अस्य गृहमेधीयम्, गृहमेध्यम्। **अग्नेर्ढक्। आग्नेयमिति।** प्राग्दीव्यतीयेष्वर्थेष्वयम्। 'सर्वत्राग्निकलिभ्याम्–' इति वचनात्। **कालेभ्यो भववत्।** कालवाचिभ्यो भवेऽर्थे येन विशेषणेन ये प्रत्यया वक्ष्यन्ते, ते 'साऽस्य देवता' इत्यर्थे कालवाचिभ्यस्तेनैव विशेषणेन भवन्तीत्यर्थः। **मासिकमिति।** मासो देवता अस्येति विग्रहः कालाट्ठञ्। **प्रावृषेण्यमिति।** प्रावृड् देवता अस्येति विग्रहः। प्रावृष एण्यः। **महाराजप्रोष्ठपदाट्ठञ्। माहाराजिकमिति।** महाराजो वैश्रवणः, स देवता अस्येति विग्रहः। **प्रौष्ठपदिकमिति।** प्रोष्ठपदो देवता अस्येति विग्रहः। वृत्तः 'साऽस्य देवता' इत्यधिकारः। अथ प्रासङ्गिकम्। **देवताद्वन्द्वे च।** 'मृजेर्वृद्धिः' इत्यतो 'वृद्धिः' इत्यनुवर्तते। 'अचो ञ्णिति' इत्यतो 'ञ्णिति' इति, 'किति च' इति सूत्रं चानुवर्तते। 'तद्धितेष्वचामादेः' इत्यतः 'अचामादेः' इति 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्यतः 'पूर्वपदस्य' इति, 'उत्तरपदस्य च' इति सूत्रं चानुवर्तते। तदाह—**अत्रेत्यादिना। आग्निमारुतमिति।** अग्निश्च मरुच्च अग्नामरुतौ, 'देवताद्वन्द्वे च' इत्यानङ्। अग्नामरुतौ देवता अस्य आग्निमारुतम्। अणि अनेन उभयपदादिवृद्धिः। अलौकिके विग्रहवाक्ये एव आनङं बाधित्वा 'इद् वृद्धौ' इति इत्त्वम्। **नेन्द्रस्य परस्य।** 'देवताद्वन्द्वे च' इत्युक्ता उभयपदवृद्धिः उत्तरपदस्य इन्द्रशब्दस्य नेत्यर्थः। **सौमेन्द्र इति।** चरु-

---

मरुत्वत्यम्। अग्नीषोमीयम्, अग्नीषोम्यम्। 'ईदग्नेः सोमवरुणयोः'। वास्तुनः पतिः वास्तोष्पतिः। इहैव सूत्रे निपातनात्साधुः। 'वेश्मभूर्वास्तुरस्त्रियाम्' वास्तोष्पतीयं वास्तोष्पत्यम्। गृहमेधीयं गृहमेध्यम्। गृहमेधशब्दोऽकारान्तः। तथा च आश्वलायनः—'मरुद्भ्यो गृहमेधेभ्यः' इति। **कालेभ्यो।** कालवाचिभ्यो ये प्रत्यया भवार्थे वक्ष्यन्ते ते 'सास्य देवता' इत्यस्मिन्नर्थेऽनेनातिदिश्यन्ते। वत्करणं सर्वसादृश्यार्थम्। तेन यस्माद्यो विहितस्तस्मात्स एव भवति नान्यः। तथैवोदाहरति—

परस्य किम्—ऐन्द्राग्नः । १२४१ दीर्घाच्च वरुणस्य । (७-३-२३) दीर्घात्परस्य वरुणस्य न वृद्धिः । ऐन्द्रावरुणम् । दीर्घात् किम्—आग्निवारुणम् । आग्निवारुणीमनड्वाहीमालभेत । 'तदस्मिन्वर्तत इति नवयज्ञादिभ्य उपसंख्यानम्' (वा २७०६)। नावयज्ञिकः कालः । पाकयज्ञिकः । 'पूर्णमासादण्वक्तव्यः' (वा २७०७) । पूर्णो मासोऽस्यां वर्तत इति पौर्णमासी तिथिः । १२४२ पितृव्यमातुलमातामहपितामहाः । (४-२-३६) एते निपात्यन्ते । 'पितुर्भ्रातरि व्यत्' (वा २७०८)। पितुर्भ्राता पितृव्यः । 'मातुर्डुलच्' (वा १७०८) मातुर्भ्राता मातुलः । 'मातृपितृभ्यां पितरि डामहच्' (वा २७०९)। मातुः पिता मातामहः । पितुः पिता पितामहः । 'मातरि षिच्च' (वा २७१०)।

रिति शेषः । तैत्तिरीये 'सोमेन्द्रं श्यामाकं चरुम्' इति छान्दसम् । **दीर्घाच्च वरुणस्य । ऐन्द्रावरुणमिति** । इन्द्रावरुणौ देवता अस्येति विग्रहे द्वन्द्वः । आनङ् । इन्द्रावरुणशब्दादणि दीर्घाकारात्परत्वाद् वरुणस्य नादिवृद्धिः । **आग्निवारुणमिति** । 'इद् वृद्धौ' इत्यग्नेरानङं बाधित्वा इत्वे कृते दीर्घात्परत्वाभावान्निषेधाभावे सति 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिरिति भावः । इति प्रासङ्गिकम् । अथ प्रकृतम्—**तदस्मिन्निति** । 'महाराजप्रोष्ठपदाट्ठञ्' इति सूत्रे वार्तिकमिदम् । 'तदस्मिन्वर्तते' इत्यर्थे नवयज्ञादिभ्यः प्रथमान्तेभ्यः ठञ उपसंख्यानमित्यर्थः । **नावयज्ञिकः काल इति** । नवयज्ञो नूतनधान्यद्रव्यको यज्ञः — आग्रयणाख्यः स यस्मिन्काले वर्तते स नावयज्ञिकः, आग्रयणकाल इति यावत् । **पाकयज्ञिक इति** । पाकयज्ञ औपासनाग्निसाध्यः पार्वणस्थालीपाकादिः, स यस्मिन्काले वर्तते स पाकयज्ञिकः । **पूर्णमासादिति** । तदस्मिन्वर्तत इत्यर्थे पूर्णमासशब्दात्प्रथमान्तादण् वक्तव्य इत्यर्थः । **पूर्णो मासोऽस्यामिति** । मासश्चन्द्रमाः पूर्णश्चासौ मासश्च पूर्णमासः, पूर्णचन्द्रः, स यस्यां तिथौ वर्तते सा पौर्णमासी तिथिरित्यर्थः । अणि 'टिड्ढाणञ्-' इति ङीप् । यद्यपि पूर्णो माः चन्द्रः पूर्णमाः, तस्येयमित्यर्थे 'तस्येदम्' इत्यणि पौर्णमासीति सिद्धम्, तथापि ईदृश एवार्थे[1] अयं साधुरिति भावः । **पितृव्यमातुल** । कस्मिन् अर्थे किं निपात्यत इत्यत आह—**पितुर्भ्रातरि व्यदित्यादिना । मातुल इति** । मातृशब्दाद् डुलचि 'टेः' इति टिलोपः । **मातामह इति** । मातृशब्दाद् डामहचि टिलोपः । एवं पितामहः । **मातरि**

मासिकम् । प्रावृषेण्यमिति । 'कालाट्ठञ् ।' प्रावृष एण्यः । **डामहजिति** । एतच्च वृत्त्याद्यनुरोधेनोक्तम् । भाष्ये तु आनङादेशो महच्च प्रत्ययश्च निपात्यते ।

१ 'अर्थे' इत्यस्य स्थाने 'शब्दे' क ।

मातामही । पितामही । 'अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः' (वा २७१२)। सकारपाठसामर्थ्यान्न षः । अविसोढम् । अविदूसम् । अविमरीसम् । 'तिलान्निष्फलात्पिञ्जपेजौ' (वा २७१३) । तिलपिञ्जः । तिलपेजः । वन्ध्यस्तिल इत्यर्थः । 'पिञ्जश्छन्दसि डिच्च' (वा २७१४) तिल्पिञ्जः । १२४३ तस्य समूहः । (४-२-३७) काकानां समूहः काकम् । बाकम् । १२४४ भिक्षादिभ्योऽण् (४-२-३८) भिक्षाणां समूहो भैक्षम् । गर्भिणीनां समूहो गार्भिणम् ।

षित्त्वेति । मातृपितृभ्यां मातरि डामहच् , स च षिद्भवतीत्यर्थः । षित्त्वस्य फलं ङीषित्याह—**मातामही, पितामहीति । अवेरिति** । अवेर्दुग्धमित्यर्थे अविशब्दात् सोढ, दूस, मरीसच् एते प्रत्यया वक्तव्या इत्यर्थः । सोढसकारस्य प्रत्ययावयवत्वात् षत्वमाशङ्क्याह—**सकारपाठसामर्थ्यान्न ष इति** । अन्यथा षोढ इत्येवोपदिशेदिति भावः । **तिलादिति** । तिलशब्द ओषधिविशेषे मुख्यः । तत्फले तु गौणः । तत्र यदा तिलशब्दो निष्फले ओषधिविशेषे वर्तते, तदा तस्मात्स्वार्थे पेज, पिञ्ज इति प्रत्ययौ स्त इत्यर्थः । इति देवतार्थकाः ।

तस्य समूहः । 'इनित्रकट्यचश्च' इति यावदिदमनुवर्तते । अस्मिन्नर्थे प्रथमोच्चारितात् षष्ठ्यन्तात्प्राग्दीव्यतीया अणादयो यथासम्भवं स्युरित्यर्थः । 'अचित्तहस्तिधेनोष्ठक्' इत्याद्यपवादविषयं परिहृत्योदाहरति—**काकम् । बाकमिति** । समूहप्रत्ययान्तानां नपुंसकत्वं लोकात् । **भिक्षादिभ्योऽण्** । तस्य समूह इत्येव । **भैक्षमिति** । अत्र 'अचित्तहस्ति—' इति वक्ष्यमाणठगपवादोऽण् ।

तेनावग्रहः सिध्यतीत्युक्तम् । **सकारपाठेति** । अन्यथा प्रक्रियालाघवाय षकारमेव पठेदिति भावः । एतच्च मनोरमायां स्थितम् । अन्ये तूक्तरीत्या 'अविसोढम्' इत्यत्र षत्वनिवारणेऽपि 'अविदूसम्' इत्यादौ स्यादेव षत्वम् । तत्र हि सयन्तात्क्विपि 'अविदूः' इत्यादिरूपसिद्धये सकारपाठसामर्थ्यस्योपक्षीणत्वात् । तस्माद् 'अविसोढम्' इत्यादिभाष्यकृदुदाहरणेषु सकारपाठसामर्थ्यादिति व्याख्येयमित्याहुः। **तस्य समूहः** । इह 'अचित्ताठ्ठक्', 'अनुदात्तादेरञ्', गोत्रान्ताद् वुञ्, 'केदाराद्यञ्च' इत्यादिना प्रतिपदं यञादींश्च वक्ष्यति । तथा च चित्तवदाद्युदात्तमगोत्रान्तं प्रतिपदोक्तप्रत्ययरहितमिहोदाहरणमित्याशयेनोदाहरति—**काकम् । बाकमिति** । एवं वार्कम् । काकबकवृकशब्दाः 'प्राणिनां कुपूर्वाणाम्' इति फिट्सूत्रेणाद्युदात्ताः । प्राणिवाचिनां ये आदिभूताः कवर्गात्पूर्वे तेषामुदात्तः स्यादिति सूत्रार्थः । 'अथादिः प्राक् शकटेः' इत्यधिकारात् । यत्तु वृत्तिन्यासयोः शौकमित्युदाहृतं तदुपेक्ष्यम् । खण्डिकादिषु शुकशब्दस्य पाठात्तत्राञा भाव्यमिति हरदत्तादयः । **भिक्षादिभ्योऽण्** ।

इह 'भस्याढे–' इति पुंवद्भावे कृते। **१२४५ इनण्यनपत्ये।** (६-४-१६४) अनपत्यार्थेऽणि परे इन्प्रकृत्या स्यात्। तेन 'नस्तद्धिते' (सू १६७९) इति टिलोपो न। युवतीनां समूहो यौवनम्। शत्रन्तादनुदात्तादेरञि यौवतम्। १२४६

गार्भिणमिति। गर्भशब्दान्मत्वर्थीये इन्प्रत्यये कृते 'प्रत्ययः' 'परश्च' 'आद्युदात्तश्च' इति इकारस्य उदात्तत्वे 'अनुदात्तं पदमेकवर्जम्' इति शिष्टस्यानुदात्तत्वे गर्भिनशब्दः अनुदात्तादिः। ततो नान्तलक्षणङीपि तस्य 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वे गर्भिणीशब्दोऽप्यनुदात्तादिरेव। ततः समूहेऽर्थे 'अनुदात्तादेरञ्' इति वक्ष्यमाणे अञि प्राप्ते भिक्षादित्वादणिति भावः। अणि प्रत्ययस्वरेणान्तोदात्तत्वम्। अञि तु 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वमिति स्वरे विशेषः। अणि टिलोपाभावोऽपि प्रयोजनमिति दर्शयति—**इह भस्येति।** गर्भिणीशब्दादणि गति 'भस्याढे–' इति पुंवत्त्वेन ङीपो निवृत्तौ गर्भिन् अ इति स्थिते 'नस्तद्धिते' इति टिलोपे प्राप्ते सतीत्यर्थः। **इनण्यनपत्ये।** इन् अणीति छेदः। **प्रकृत्येति।** 'प्रकृत्यैक च्' इत्यतस्तदनुवृत्तेरिति भावः। **टिलोपो नेति।** अञि तु प्रकृतिभावाप्रवृत्तेः टिलोपः स्यादिति भावः। **यौवनमिति।** 'कनिन्युवृषितक्षि–' इत्यौणादिककनिन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। ततः स्त्रियां 'यूनस्तिः' इति तिप्रत्ययस्य प्रत्ययस्वरेणोदात्तत्वे सति शिष्टस्वरेण युवतिशब्दस्यानुदात्तादित्वादञि प्राप्ते भिक्षादित्वादणि कृते सति 'भस्याढे–' इति पुंवत्त्वे तिप्रत्ययस्य निवृत्तौ 'अन्' इति प्रकृतिभावाट्टिलोपाभावे यौवनमिति रूपम्। अञि तु प्रकृतिभावस्याप्रवृत्तेष्टिलोपः स्यादिति भावः। वस्तुतस्तु 'भस्याढे तद्धिते' इत्यस्य अढे तद्धिते विवक्षिते सति ततः प्रागेव पुंवदित्यर्थः। ततश्च तद्धितोत्पत्तेः प्रागेव युवतिशब्दस्य पुंवत्त्वे तिप्रत्ययस्य निवृत्तौ युवन्शब्दस्य कनिन्प्रत्ययान्तस्य नित्स्वरेणाद्युदात्तत्वादनुदात्तादित्वाभावादञभावे

भक्षैमिति। अचित्तत्वाट्ठक् प्राप्तः। **गार्भिणमिति।** अनुदात्तादित्वादञ् प्राप्तः। सति हि तस्मिन्नाद्युदात्तटिलोपौ स्याताम्। न च 'भस्याढे–' इति पुंवाचकरूपातिदेशान्न टिलोपः स्यादिति वाच्यम्। हस्तिनीनां समूहो हास्तिकमित्यत्रापि टिलोपानापत्तेः। तस्मात् स्त्रीप्रत्ययनिवृत्तिमात्रपरं तत्, न तु रूपातिदेशकमिति बोध्यम्। **यौवनमिति।** युवतिशब्दस्यानुदात्तादित्वादञि प्राप्ते अणर्थमिह पाठः। पुंवद्भावात्तिप्रत्ययनिवृत्तिः। 'अन्' इति प्रकृतिभावः। ननु भस्याढे–' इत्यत्र 'अढे तद्धिते विवक्षिते पुंवद्भावः' इत्यभ्युपगमात्तद्धितोत्पत्तेः प्रागेव तिप्रत्ययनिवृत्तौ सत्यां 'कनिन्युवृषि–' इति कनिनन्ततया आद्युदात्तत्वादण् सिद्ध एवेति चेत्। सत्यम्, अतएव भाष्ये भिक्षादिषु युवतिशब्दपाठः प्रत्याख्यातः। 'इह युवतिशब्दपाठसामर्थ्यात्पुंवद्भावो

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् । (४-२-३९) एभ्यः समूहे वुञ् स्यात् । लौकिकमिह गोत्रम्, तच्चापत्यमात्रम् । १२४७ **युवोरनाकौ** । (७-१-१) यु वु एतयोरनुनासिकयोः क्रमाद् अन अक एतावादेशौ स्तः । ग्लुचुकायनीनां समूहो ग्लौचुकायनकम् । औक्षकमित्यादि । 'आपत्यस्य च–' (सू १०८२) इति यलोपे प्राप्ते 'प्रकृत्याऽके राजन्यमनुष्ययुवानः' (वा ४२१४) राजन्यकम् । मानुष्यकम् । 'वृद्धाच्चेति वक्तव्यम्' (वा २७१६)

'तस्य समूहः' इत्यणि प्रकृतिभावाट्टिलोपाभावे यौवनमिति सिद्धमेवेति युवतिशब्दो भिक्षादिगणे प्रत्याख्यातो भाष्यकैयटयोरित्यलम् । **शत्रन्तादिति** । प्रत्ययस्वरेण मध्योदात्तत्वादनुदात्तादिरयं युवच्छब्दः । तत उगिल्लक्षणङीपः पुंवत्त्वेन निवृत्तौ युवच्छब्दादनुदात्तादेरञि यौवतमिति रूपमिति भावः । **गोत्रोक्षोष्ट्र । एभ्य इति** । गोत्र, उक्षन्, उष्ट्र, उरभ्र, राजन्, राजन्य, राजपुत्र, वत्स, मनुष्य, अज एतेभ्य इत्यर्थः । **लौकिकमिह गोत्रमिति** । नतु पारिभाषिकमित्यर्थः । अत्र लौकिकं गोत्रं किमित्यत आह—**तच्चापत्यमात्रमिति** । प्रवराध्याये परिगणितं पुत्रपौत्रादि कृत्स्नापत्यमित्यर्थः । 'अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते, नतु परिभाषिकं गोत्रमिष्यते' इति 'स्त्रीपुंसाभ्याम्–' इत्यादिसूत्रभाष्ये सिद्धान्तितत्वादिति भावः । **युवोरनाकौ** । युश्च वुश्च युवु । समाहारद्वन्द्वे सौत्रं पुंस्त्वम् । तदाह—**यु वु एतयोरिति** 'अनुनासिकयोरिष्यते' इति वार्तिकलब्धमेतत् । अनुनासिकयोः किम् ? ऊर्णायुः । **ग्लुचुकायनीनामिति** । 'प्राचामवृद्धात्' इति ग्लुचुकशब्दादपत्ये फिन्, 'इतो मनुष्यजातेः' इति ङीष्, समूहे वुञ् । अकादेशः, आदिवृद्धिः, 'यस्येति च' इतीकारलोपः । **औक्षकमिति** । उक्ष्णां समूह इति विग्रहः । वुञ्, अकादेशः, टिलोपः, आदिवृद्धिः । उष्ट्राणां समूह इति विग्रहः, औष्ट्रकम् । उरभ्रा मेषाः, तेषां समूह औरभ्रकम् । राजकम्, राजन्यकम् । वात्सकम् । मानुष्यकम् । आजकम् । **यलोपे प्राप्त इति** । राजन्यशब्दाद् वुञि अकादेशे 'आपत्यस्य च–' इति यकारस्य लोपे प्राप्ते सतीत्यर्थः । **प्रकृत्याऽके राजन्यमनुष्ययुवान इति** । अके परे राजन्य, मनुष्य, युवन् एते प्रकृत्या स्युरिति वक्तव्यमि-

---

न' इति वृत्तिकारोक्तिरप्यत एव निरस्ता । नन्वेवं 'गार्भिणं यौवतं गणे' इत्यादिप्रयोगा भाष्यमते न संगच्छेरन्नित्याशङ्क्याह—**शत्रन्तादिति** । **युवोः** । समाहारद्वन्द्वे सौत्रं पुंस्त्वम् । उकारस्तूच्चारणार्थो नेत्संज्ञकः । तेन नन्दनः, कारकः, नन्दना, कारिका इत्यत्रोगिल्लक्षणौ नुम्ङीपौ न स्तः । अनुनासिकयोरिति किम्, ऊर्णायुः । **प्रकृत्याऽक इति** । इह राजन्यमनुष्यग्रहणं व्यर्थम् । रूढिशब्दत्वेन 'आपत्यस्य

वार्द्धकम्। १२४८ केदाराद्यञ्च। (४-२-४०) चाद्वुञ्। कैदार्यम्, कैदारकम्। 'गणिकाया यञिति वक्तव्यम्' (वा २७११)। गाणिक्यम्। १२४९ ठञ्कवचिनश्च। (४-२-४१) चात्केदारादपि। कवचिनां समूहः कावचिकम्। कैदारिकम्। १२५० ब्राह्मणमाणववाडवाद्यन्। (४-२-४२) ब्राह्मण्यम्। माणव्यम्। बाडव्यम्। 'पृष्ठादुपसंख्यानम्' (वा २७२०) पृष्ठ्यः षडहः। १२५१ ग्रामजनबन्धुभ्यस्तल्। (४-२-४३) ग्रामता। जनता। बन्धुता।

त्यर्थः। यूनो भावो यौवनकम्। मनोज्ञादित्वाद् वुञ्। प्रकृतिभावान्न टिलोपः। 'वृद्धाच्च' इति वृद्धशब्दस्वरूपमेव गृह्यते, नतु 'वृद्धिर्यस्याचामादिः-' इति वृद्धसंज्ञकम्, भाष्ये वृद्धशब्दस्यैवोदाहरणात्। तदाह—**वार्द्धकमिति**। वृद्धानां समूह इति विग्रहः। **केदराद्यञ् च। कैदार्यम्, कैदारकमिति**। केदाराणां समूह इति विग्रहः। **गणिकाया यञ्**। यञ्ग्रहणाद् वुञो निवृत्तिः। **गाणिक्यमिति**। गणिकानां समूह इति विग्रहः। **ठञ् कवचिनश्च। केदारादपीति**। कवचिन्शब्दात् केदारशब्दाच्च समूहे ठञ् स्यादित्यर्थः। **कावचिकमिति**। ठञ्, एकादेशे टिलोपः। **ब्राह्मणमाणववाडवाद्यन्। ब्राह्मण्यमित्यादि**। ब्राह्मणानां माणवानां बाडवानां च समूह इति विग्रहः। मनोरपत्यं माणवः। अणि नस्य णत्वम्।

'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्धन्यः तेन सिध्यति माणवः॥'

इति 'मनोर्जातावञ्यतौ षुक्च' इति सूत्रे भाष्यम्। **पृष्ठादिति**। यन इति शेषः। **पृष्ठ्यः षडह इति**। षण्णाम् अह्नां समाहारः षडहः, समाहारे द्विगुः। 'राजाहस्सखिभ्यः-' इति टचि टिलोपः। रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यानि षट् पृष्ठाख्यस्तोत्राणि, तद्युक्तान्यहानि लक्षणया पृष्ठानि, तेषां समूह इति विग्रहः। **ग्रामजन**। समूह इत्येव। **ग्रामतेत्यादि**।

च-' इति यलोपस्य प्राप्त्यभावात्। अतएव 'गोत्रोक्षोष्ट्र-' इत्यत्र तयोर्ग्रहणं सार्थकम्। अन्यथा गोत्रग्रहणेनैव सिद्धे तयोर्ग्रहणं न कुर्यादित्याहुः। यूनो भावो यौवनिका मनोज्ञादित्वाद् वुञ्। **वार्धकमिति**। यदि वृद्धत्वेऽपि वार्धकमिति प्रयोगोऽस्ति, तर्हि मनोज्ञादित्वं कल्पनीयमित्याहुः। **ब्राह्मणमाणव**। ननु त्रयोऽप्यमी वृद्धाः। तेभ्यः प्रकृतो यञेवास्तु, वृद्धाद्यति यञि वा रूपे विशेषाभावात्। नापि स्वरे विशेषः, उभयथाप्याद्युदात्तत्वात्। स्त्रियां विशेषस्तु न शङ्क्य एव, नपुंसकत्वात्। 'यनश्च' इत्यत्रापत्यग्रहणाच्च। ठञ् तु नानुवर्तिष्यते अस्वरितत्वादिति चेत्। सत्यम्, अवृद्धादपि कुतश्चिद्विधानार्थं यद्वचनम्। तत्सिद्धार्थानुवादकं वार्तिकमाह—**पृष्ठादिति**। पृष्ठं स्तोत्रविशेषः। **पृष्ठ्य इति**। पृष्ठानां समूहः पृष्ठ्यः षडह इति

'गजसहायाभ्यां चेति वक्तव्यम्' (वा २७२१) गजता, सहायता । 'अह्नः खः क्रतौ' (वा २७२२--२७२३)। अहीनः। अहर्गणसाध्यसुत्याकः क्रतुरित्यर्थः । क्रतौ किम्--आह्नः । इह खण्डिकादित्वादञ् । 'अह्नष्टखोरेव' (सू ७८१) इति नियमाट्टिलोपो न । 'पर्श्वा णस् वक्तव्यः' (वा २७२४)। **१२५२ सिति च** । (१-४-१६) सिति परे पूर्वं पदसंज्ञं स्यात् । अभत्वादोर्गुणो न । पर्शूनां समूहः पार्श्वम्। **१२५३ अनुदात्तादेरञ्** । (४-२-४४) कापोतम्। मायूरम्। **१२५४ खण्डिकादिभ्यश्च** । (४-२-४५) अञ् स्यात्। खण्डिकानां समूहः

ग्रामाणां जनानां बन्धूनां च समूह इति विग्रहः। तलन्तानां स्त्रीत्वं लोकात्, 'तलन्तं स्त्रियाम्' इति लिङ्गानुशासनसूत्राच्च। **गजसहायाभ्यां चेति**। आभ्यामपि समूहे तलिति वक्तव्यमित्यर्थः। **अह्नः खः क्रतौ इति**। वार्तिकमिदम्। क्रतौ वर्तमानाद् अहन्शब्दात् समूहेऽर्थे खप्रत्ययो वाच्य इत्यर्थः। **अहीन इति**। अहश्शब्देन सौत्यान्यहानि विवक्षितानि। तेषां समूह इति विग्रहः। अहन्शब्दात् खः, ईनादेशः। 'अह्नष्टखोरेव' इति टिलोप इति भावः। फलितमाह—**अहर्गणेति**। **आह्न इति**। अह्नां समूह इति विग्रहः। इह क्रत्वप्रतीतेर्न ख इति भावः। 'अचित्तहस्तिधेनोः—' इति ठकमाशङ्क्याह—**इहेति**। 'खण्डिकादिभ्यश्च' इत्यञित्यर्थः। नन्वेवं सति 'अन्' इति प्रकृतिभावस्याणि विहितस्यात्रासंभवाट्टिलोपः स्यादित्यत आह—**अह्नष्टखोरेवेतीति**। टिलोपाभावे सति 'अल्लोपोऽनः' इत्यकारलोपे आह्न इति रूपमिति भावः। **पर्श्वा णसिति**। अणोऽपवादः। पर्शुशब्द उकारान्तस्त्रीलिङ्गः पार्श्वगतमस्थिवाची। तस्माद् णसि ओर्गुणे प्राप्ते—**सिति च**। 'सुप्तिङन्तं पदम्' इत्यतः पदमित्यनुवर्तते तदाह—**सिति परे पूर्वपदसंज्ञमिति**। सकार इद् यस्य स सित्। 'स्वादिष्वसर्वनामस्थाने' इत्येव सिद्धे भसंज्ञापवादोऽयम्। **अभत्वादिति**। पदत्वेनानेन भत्वस्य बाधादिति भावः। **पर्शूनां समूहः पार्श्वमिति**। पर्शु अ इति स्थिते 'इकोऽसवर्णे—' इति शाकल्यह्रस्वप्रकृतिभावयोः 'सिति च' इति तत्रत्यवचनान्तरेण तन्निषेधे यणादेशे पार्श्वमिति रूपमिति भावः। **अनुदात्तादेरञ्**। समूह इत्येव। **कापोतम्। मायूरमिति**। 'लघावन्ते द्वयोश्च बह्वषो गुरुः' इति कपोतमयूरशब्दौ मध्यो-

---

तु मत्वर्थलक्षणया बोध्यम्। **ग्रामजन**। वृत्तिकृता तु वार्तिकस्थसहायशब्दोऽपि सूत्रे प्रक्षिप्तः। **अनुदात्तादेरञ्**। आपूपिकं शाष्कुलिकमित्यादौ परत्वाद् 'अचित्तहस्तिधेनोः—' इति ठगेवेत्याशयेनेह सूत्रे चित्तवन्तमुदाहरति—**कापोतमिति**। 'लघावन्त—' इति फिट्सूत्रेण कपोतमयूरशब्दौ मध्योदात्तौ। न च 'शकुनीनां च लघु पूर्वम्' इत्याद्युदात्ताविमाविति शङ्क्यम्। 'अन्त्यात्पूर्वं लघूदात्तम्' इति तत्र

खाण्डिकम्। १२५५ **चरणेभ्यो धर्मवत्।** (४-२-४६) काठकम्। छान्दोग्यम्। १२५६ **अचित्तहस्तिधेनोष्ठक्।** (४-२-४७) साक्तुकम्। हास्तिकम्। धैनुकम्। १२५७ **केशाश्वाभ्यां यञ्छावन्यतरस्याम्।** (४-२-४८) पक्षे ठगणौ। कैश्यम्, कैशिकम्। अश्वीयम्, आश्वम्। १२५८ **पाशादिभ्यो यः।** (४-२-४९) पाश्या। तृण्या। धूम्या। वन्या। वात्या। १२५९ **खलगोरथात्।** (४-२-५०) खल्या। गव्या। रथ्या। १२६० **इनित्रकट्यचश्च।**

दात्ताविति भावः। **खण्डिकादिभ्यश्च**। शेषपूरणेन सूत्रं व्याचष्टे—**अञ् स्यादिति**। समूह इति शेषः। आद्युदात्तार्थमिदम्। **चरणेभ्यो धर्मवत्**। चरणाः शाखाध्येतारः। धर्मेऽर्थे याभ्य प्रकृतिभ्यो ये प्रत्ययाः वक्ष्यन्ते ते ताभ्यः प्रकृतिभ्यः समूहे स्युरित्यर्थः। **काठकमिति**। कठानां समूह इति विग्रहः। 'गोत्रचरणाद्वुञ्' इति धर्मे वक्ष्यमाणो वुञ् समूहेऽपि भवति। **छान्दोग्यमिति**। छन्दोगाः सामशाखिनः, तेषां समूह इति विग्रहः। 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटाद् ञ्यः' इति धर्मे वक्ष्यमाणो ञ्यः समूहेऽपि भवति। **अचित्तहस्ति**। अचित्ता अप्राणिनः, तद्वाचिभ्यः, हस्तिशब्दाद् धेनुशब्दाच्च समूहे ठक् स्यादित्यर्थः। **साक्तुकमिति**। सक्तूनां समूह इति विग्रहः। 'इसुसुक्तान्तात्कः' इत्युकः परत्वात् ठस्य कः। आदिवृद्धिः। **हास्तिकमिति**। हस्तिनां समूह इति विग्रहः, ठक्, इकः, टिलोपः, आदिवृद्धिः। **धैनुकमिति**। धेनूनां समूह इति विग्रहः। उकः परत्वात् ठस्य कः। आदिवृद्धिः। **केशाश्वाभ्याम्**। समूह इत्येव। केशाद्यञ् वा, अश्वाच्छो वेत्यर्थः। **पक्ष इति**। केशाद्यञभावे 'अचित्त–' इति ठक्। अश्वाच् छाभावे अणित्यर्थः। **कैश्यम्, कैशिकमिति**। केशानां समूह इति विग्रहः। क्रमेण यञ्ठकौ। **अश्वीयम्, आश्वमिति**। क्रमेण छाणौ। **पाशादिभ्यो यः**। समूह इत्येव। **पाश्येत्यादि**। पाशानां तृणानां धूमानां वनानां वातानां च समूह इति विग्रहः। स्त्रीत्वं लोकात्। **खलगोरथात्**। समूह इत्येव। ख्व, गो, रथ एभ्यो यः स्यादित्यर्थः। **खल्या गव्या रथ्येति**। खलानां गवां रथानां च समूह इति विग्रहः। यद्यपि पाशादिष्वेव एषां पाठो युक्तः। तथापि उत्तरसूत्रे एषामेवानुवृत्त्यर्थं पृथक् पाठः।

व्याख्यानादित्याहुः। **खण्डिका**। आद्युदात्तार्थमचित्ताट्ठको बाधनार्थं च वचनम्। **चरणेभ्यः**। यस्याः प्रकृतेर्यः प्रत्ययो धर्मे वक्ष्यते, स तस्याः प्रकृतेः समूहेऽपि स्यादित्यर्थः। वुञादयो हि चरणेभ्यो वक्ष्यन्ते। तत्र 'चरणाद्धर्माम्नाययोः' इति तु वार्तिकम्। तदप्यनेनैवातिदेशसूत्रेण ज्ञाप्यते। **काठकमित्यादि**। गोत्रचरणाद् वुञ्। **छान्दोग्यमिति**। 'छन्दोगौक्थिक–' इति ञ्यः। **यञ्छाविति**। यथासंख्यं स्तः।

(४-२-५१) खलादिभ्यः क्रमात्स्युः। खलिनी। गोत्रा। रथकट्या। 'खलादिभ्य इनिर्वक्तव्यः' (वा २७३२)। डाकिनी। कुटुम्बिनी। आकृतिगणोऽयम्। **१२६१ विषयो देशे।** (४-२-५२) षष्ठ्यन्तादणादयः स्युरत्यन्तपरिशीलितेऽर्थे स चेद्देशः। शिबीनां विषयो देशः शैबः। देशे किम्-देवदत्तस्य विषयोऽनुवाकः। **१२६२ राजन्यादिभ्यो वुञ्।** (४-२-५३) राजन्यकः। १२६३

इनित्रकट्यचश्च। स्युरिति। इनि त्र कट्यच् एते स्युरित्यर्थः। **खलिनीति।** खलानां समूह इति विग्रहः। इनिप्रत्यये नकारादिकार उच्चारणार्थः। स्त्रीत्वं लोकात्। नान्तत्वान्ङीप्। **गोत्रेति।** गवां समूह इति विग्रहः। गोशब्दात् त्रः। स्त्रीत्वं लोकात्, टाप्। **रथकट्येति।** रथानां समूह इति विग्रहः। कट्यचि ककारस्य नेत्त्वम्, अतद्धित इत्युक्तेः स्त्रीत्वाट्टाप्। **खलादिभ्य इनिर्वक्तव्य इति।** 'इनित्रकट्यचश्च' इति सूत्रे इनिग्रहणमकृत्वा 'गोरथात्त्रकट्यचौ' इत्येवं सूत्रं कृत्वा 'खलादिभ्य इनिः' इति पृथक्कर्तव्यमित्यर्थः।

विषयो देशे। समूह इति निवृत्तम्। तस्येत्यनुवर्तते। तस्य विषय इत्यर्थे प्रथमोच्चारितात् षष्ठ्यन्तात्प्रत्ययाः स्युरिति लभ्यते। तदाह—**षष्ठ्यन्तादिति।** विषयशब्दं व्याचष्टे—**अत्यन्तपरिशीलितेऽर्थे इति।** देवदत्तविषयोऽनुवाक इत्यत्र तथा दर्शनादिति भावः। तर्हि तत्रातिव्याप्तिः स्यादित्यत आह—**स चेदिति।** सः अत्यन्तपरिशीलितोऽर्थो देशश्चेदित्यर्थः। एवं च अत्यन्तपरिशीलिते देशे गम्ये प्रत्ययाः स्युरिति फलितम्। विषयशब्दो ह्ययं क्वचित् ग्रामसमूहात्मके जनपदे वर्तते। तद्यथा—सामन्तस्य राज्ञो विषयोऽनेन लब्ध इति। क्वचिदिन्द्रियग्राह्ये वर्तते। तद्यथा चक्षुर्विषयो रूपमिति। क्वचिदन्यत्राावृत्तौ वर्तते। यथा मत्स्यानां विषयो जलमिति। अन्यत्र नास्तीति गम्यते। प्रकृते तु देवदत्तविषयोऽनुवाक इतिवदत्यन्तपरिशीलिते वर्तते। तत्र विषयशब्देन अत्यन्तपरिशीलितेऽर्थे अवगते सति अनुवाकादिव्यावृत्त्यर्थं देशग्रहणम्। **शिबीनां विषयो देश इति।** अत्यन्तपरिचितो देश इत्यर्थः। **देवदत्तस्य विषय इति।** अत्यन्तपरिचितोऽनुवाक इत्यर्थः। अत्र देशस्यानवगमाद् न प्रत्यय इति भावः। विषय इति किम्—देवदत्तस्य कदाचिद्गन्तव्यो मार्गः। न च देवदत्तस्य गृहमित्यत्र अत्यन्तपरिचितदेशत्वात् प्रत्ययः स्यादिति वाच्यम्, जनपदसमूहात्मकात्यन्तपरिशीलितदेशस्यैवात्र विवक्षितत्वात्। **राजन्यादिभ्यो वुञ्।** तस्य विषयो देश इत्यर्थे राजन्यादिभ्यः षष्ठ्यन्तेभ्यो वुञ् स्यादित्यर्थः। अणोऽपवादः। राजन्यक

ठगणाविति। केशशब्दादचित्तत्वेन ठक्। **विषयो देशे।** 'तस्य' इत्यनुवर्तत

भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ । (४-२-५४) भौरिकीणां विषयो देशो भौरिकिविधम्। भौलिकिविधम्। ऐषुकारिभक्तम्। सारसायनभक्तम्। १२६४ **सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ।** (४-२-५५) अण्। पङ्क्तिरादिरस्येति पाङ्क्तः प्रगाथः । 'स्वार्थ उपसंख्यानम् (वा २७४४)। त्रिष्टुबेव त्रैष्टुभम्। १२६५ **संग्रामे प्रयोजनयोद्धृभ्यः ।** (४-२-५६) 'सोऽस्य' इत्यनुवर्तते । सुभद्रा प्रयोजनमस्य सङ्ग्रामस्येति सौभद्रः। भरता

इत्यत्र राजन्यानां विषयो देश इत्यर्थः । **भौरिक्याद्यैषु ।** भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च षष्ठ्यन्तेभ्यो यथाक्रमं विधल्, भक्तल्, एतौ प्रत्ययौ स्तो विषयो देश इत्यर्थे। **भौरिकिविधमिति ।** भौरिकीणां विषयो देश इत्यर्थः। **भौलिकिविधमिति ।** भौलिकीनां विषयो देश इत्यर्थः । **ऐषुकारिभक्तमिति ।** ऐषुकारीणां विषयो देश इत्यर्थः। **सारसायनभक्तमिति ।** सारसायनानां विषयो देश इत्यर्थः। इह नपुंसकत्वं लोकात्। **सोऽस्यादिः ।** ऋग्द्वयमाम्नातं पादावृत्त्या ऋक्त्रयं संपद्यते। स च संप्रगाथ इति छन्दोगसूत्रे बह्वृचसूत्रे च प्रसिद्धम्। षष्ठ्येकवचनस्थाने सप्तमीबहुवचनमार्षम् । सोऽस्य प्रगाथस्य आदिरित्यर्थे प्रथमान्तात् छन्दोविशेषवाचकाद् अणादिप्रत्ययाः स्युरित्यर्थः। अत्रैरेयत्ताविशेषो गायत्र्यादिश्छन्दः। **पङ्क्तिरादिरिति ।** पङ्क्तिच्छन्दस्का ऋग् आदिर्यस्य प्रगाथस्य स पाङ्क्तः प्रगाथ इत्युच्यत इत्यर्थः। **स्वार्थ इति ।** छन्दोवाचिभ्यः स्वार्थे अणादिप्रत्ययस्योपसंख्यानमित्यर्थः । **त्रैष्टुभमिति ।** क्लीबत्वं लोकात्। **संग्रामे ।** **अनुवर्तत इति ।** तथा च संग्राम इति सप्तम्यन्तं षष्ठ्या विपरिणतम् अस्येत्यनेनान्वेति-तदस्य

इत्याह—**षष्ठ्यन्तादिति ।** विषयशब्दार्थमाह—**अत्यन्तेति** **भौरिक्या ।** आभ्यां गणाभ्यां यथासंख्यमेतौ प्रत्ययौ स्तः । **भौरिकिविधमित्यादि ।** क्लीबत्वं लोकात् । **सोऽस्यादिरिति ।** छन्दो नामात्तरेयत्तानिबन्धनपङ्क्त्यादिरिह विवक्षितः। तद्वाचकात्प्रथमान्तादस्येत्यादिमति प्रत्ययः स्यात्, य आदिमान्स प्रगाथश्चेत् । प्रग्रथ्यत इति प्रगाथः। 'ग्रन्थ संदर्भे' इत्यस्माद् 'अकर्तरि च कारके-' इति कर्मणि घञ्। पृषोदरादित्वाद्रेफनकारयोर्लोपः। अन्ये तु प्रगीयत इति प्रगाथः 'गै शब्दे' इत्यतः 'उषिकुषिगार्तिभ्यः स्थन्' इत्याहुः । यत्र द्वे ऋचावावृत्त्या तिस्रः क्रियन्ते स प्रगाथः—**त्रैष्टुभमिति ।** 'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति न्यायेन क्लीबतेति भावः। **संग्रामे ।** ननु 'प्रथमात्' इत्यधिकारात्प्रथमोच्चारितसंग्रामवाचिन एव प्रत्ययः प्राप्नोति, न प्रयोजनयोद्धृभ्य इत्यत आह—**सोऽस्येतीति ।** एवं च प्रथमान्तविशेषणद्वारा प्रयोजनयोद्धृणां प्रकृतित्वम् 'अस्य' इति

योद्धारोऽस्य संग्रामस्य भारतः। **१२६६ तदस्यां प्रहरणमिति क्रीडायां णः।** (४-२-५७) दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा। **१२६७ घञः सास्यां क्रियेति ञः।** (४-४-५८) घञन्तात्क्रियावाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे ञप्रत्ययः स्यात्। घञ इति कृद्ग्रहणाद्गतिकारकपूर्वस्यापि ग्रहणम्। **१२६८ श्येनतिलस्य पाते ञे।** (६-३-७१) श्येन तिल एतयोर्मुमागमः स्याद् ञप्रत्यये परे पातशब्दे उत्तरपदे। श्येनपातोऽस्यां वर्तते श्यैनम्पाता मृगया। तिलपातोऽस्यां वर्तते तैलम्पाता स्वधा। श्येनतिलस्य

संग्रामस्य प्रयोजनम्, तेऽस्य संग्रामस्य योद्धार इत्यर्थे प्रयोजनयोद्धृवाचिभ्यः प्रथमान्तेभ्यः अणादयः स्युरित्यर्थः। **तदस्याम्**। तद् अस्यां क्रीडायां प्रहरणमित्यर्थे प्रथमान्तात् प्रहरणवाचकाद् णप्रत्ययः स्यादित्यर्थः। प्रह्रियते अनेनेति प्रहरणम् आयुधम्। **दाण्डेति**। अणि तु ङीप् स्यादिति भावः। **मौष्टेति**। मुष्टिः प्रहरणमस्यां क्रीडामिति विग्रहः। **घञः सास्याम्**। अस्यामित्यनन्तरं मृगयायामित्यादि स्त्रीलिङ्गविशेष्यमध्याहार्यम्। सा क्रिया अस्यां मृगयादिक्रियायामित्यर्थे घञन्तप्रकृतिकप्रथमान्तात्क्रियावाचिनो ञः स्यादित्यर्थः। फलितमाह—**घञन्तादित्यादिना। कृद्ग्रहणादिति।** तत्प्रयोजनमनुपदमेव वक्ष्यते। **श्येनतिलस्य पाते ञे। मुमागम इति।** 'अरुर्द्विषत्—'इत्यतः तदनुवृत्तेरिति भावः। **ञप्रत्यय इति**। ञप्रत्यये परे यः पातशब्दः तस्मिन्नित्यर्थः। **उत्तरपद इति**। 'अलुगुत्तरपदे' इति तदधिकारादिति भावः। **श्येनपात इति**। पतनं पातः। भावे घञ्। **श्यैनंपातेति**। श्येनपातशब्दाद् घञन्ताद् ञः। यद्यपि पातशब्द एव घञन्तः तथापि कृद्ग्रहणपरिभाषया श्येनपातशब्दस्यापि ग्रहणं बोध्यम्। श्येनस्य पात इति कृद्योगषष्ठ्या समासः। तथा च श्येनपातशब्दस्यादिवृद्धिः। **तैलंपाता स्वधेति**। स्वधाशब्दः स्त्रीलिङ्गः पित्र्यक्रियायां वर्तते, 'नमः स्वधायै' इत्यादिदर्शनात्। स्वधेत्यनेन

प्रत्ययार्थविशेषणद्वारा संग्रामस्य प्रत्ययार्थत्वं वक्तुं शक्यमिति भावः। तथा चायमिह सूत्रार्थः—प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च प्रथमान्तेभ्योऽस्येति षष्ठ्यन्तार्थेऽण् स्यात्, स च षष्ठ्यन्तार्थः संग्रामश्चेदिति। **तदस्याम्**। प्रथमान्तात्प्रहरणोपाधिकात्सप्तम्यन्तार्थेऽण् स्यात्, स चेत्सप्तम्यन्तार्थः क्रीडा भवति। प्रहरणं किम्, माला भूषणमस्याम्। क्रीडायां किम्, खड्गः प्रहरणमस्यां सेनायाम्। **घञः। कृद्ग्रहणादिति**। तेन 'श्यैनंपाता' इत्यत्र 'ञ्णिति' इत्यङ्गस्य विधीयमाना वृद्धिः सिद्धा। श्येनपातस्यापि घञन्तत्वादिति भावः। घञः किम्, श्येनपतनमस्यां वर्तते। क्रिया किम्, प्रकारोऽस्यां वर्तते। 'तदस्याम्' इति प्रकृते पुनः 'सास्याम्' इत्युक्तिः

किम्—दण्डपातोऽस्यां तिथौ वर्तते दाण्डपाता तिथिः । १२६९ **तदधीते तद्वेद** । (४-२-५९) व्याकरणमधीते वेद वा वैयाकरणः । १२७० **क्रतूक्थादिसूत्रान्ताट्ठक्** । (४-२-६०) क्रतुविशेषवाचिनामेवेह ग्रहणम् । तेभ्यो मुख्यार्थेभ्यो वेदितरि, तत्प्रतिपादकग्रन्थपरेभ्यस्त्वध्येतरि । आग्निष्टोमिकः । वाजपेयिकः । उक्थं सामविशेषः, तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थम् , तदधीते वेद वा औक्थिकः । 'मुख्यार्थात्तूक्थशब्दाट्ठगणौ नेष्येते' । न्यायम्—

क्रीडायामिति नानुवर्तत इति सूचितम् , तदस्यामिति प्रकृते पुनरस्यामिति ग्रहणात् । **तदधीते** । तदधीते इत्यर्थे तद्वेत्तीत्यर्थे च द्वितीयान्तादणादयः स्युरित्यर्थः । गुरुमुखादक्षरानुपूर्वीग्रहणमध्ययनम् । शब्दार्थज्ञानं वेदनम् । एतेन अध्ययनविधिरर्थज्ञानपर्यन्त इति कतिपयमीमांसकोक्तिः परास्ता, पृथग्ग्रहणवैयर्थ्यात् । यथाचैतत्तथा अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः । **वैयाकरण इति** । अणि 'न य्वाभ्याम्—' इत्यैजागमः । **क्रतूक्थादि** । 'तदधीते तद्वेद' इत्यर्थयोः क्रतु, उक्थादि, सूत्रान्त एभ्यः ठक् स्यादित्यर्थः । **क्रतुविशेषवाचिनामेवेति** । न तु क्रतुशब्दस्यैवेत्यर्थः । अन्यथा उक्थादिगण एव क्रतुशब्दमपि पठेदिति भावः । ननु क्रतुविशेषाणां कथमध्ययनम् । अक्षरग्रहणात्मकत्वाभावादित्यत आह—**तेभ्य इति** । अग्निष्टोमादिशब्दाः क्रतुविशेषेषु मुख्याः । तत्प्रतिपादकग्रन्थेषु तु गौणाः । तत्र क्रतुविशेषात्मकमुख्यार्थकेभ्यः अग्निष्टोमादिशब्देभ्यो वेदितरि प्रत्ययाः अग्निष्टोमादिक्रतुप्रतिपादकग्रन्थेषु लक्षणया विद्यमानेभ्यस्तु तेभ्यः अध्येतरीत्यर्थः । **आग्निष्टोमिक इति** । अग्निष्टोमं क्रतुं वेत्ति तत्प्रतिपादकग्रन्थमधीत इति वार्थः । उक्थशब्दः सामसु मुख्यः । सामलक्षणग्रन्थे प्रातिशाख्ये तु गौणः । तत्र गौणार्थकादेव उक्थशब्दात् ठगित्याह—**उक्थं सामविशेष इति** । 'अग्निष्टोमस्तोत्रात्परं यत्साम गीयते' इति वृत्तिकृदुक्तेरिति भावः । भाष्ये तु सामशब्दपर्याय उक्थशब्द

'क्रीडायाम्' इत्यस्य निवृत्तिर्यथा स्यादिति । अतएवाह—**दण्डपातोऽस्यां तिथाविति** । **तदधीते** । द्वितीयान्तादध्येतरि वेदितरि च प्रत्ययः स्यात् । द्विस्तद्ग्रहणमधीयाने विदुषि च प्रत्येकं विधानार्थम् । तेनोत्तरत्र क्रतुवसन्तादयः शब्दास्तत्प्रतिपादकग्रन्थे गौणा अप्यधीयानेऽपि प्रत्ययं प्राप्नुवन्ति । अन्यथा तेषामध्ययनासम्भवेन वेदितर्येव प्रत्ययः स्यादिति भावः । **क्रतूक्थादि** । **क्रतुविशेषेति** । स्वरूपस्य तु न ग्रहणम् । तथात्वे सत्युक्थादिष्वेव क्रतुशब्दः पठ्येत, नापि क्रतुपर्यायाणामुक्थादिगणे यज्ञशब्दपाठादिति भावः । **अध्येतरीति** । अध्येतर्यपीत्यर्थः । **आग्निष्टोमिक इति** । संस्थाविशेषवाचकस्याप्यग्निष्टोमशब्दस्य तत्संस्थाके क्रतौ

नैयायिकः । वृत्तिम्—वार्त्तिकः । लोकायतम्—लौकायतिक इत्यादि । 'सूत्रान्ताच्चकल्पादेरेवेष्यते' (वा २७४४) । सांग्रहसूत्रिकः । अकल्पादेः किम्–काल्पसूत्रः । 'विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम्' (वा २७४४) वायसविद्यिकः । गौलक्षणिकः । आश्वलक्षणिकः । पाराशरकल्पिकः । 'अङ्गक्षत्रधर्मत्रिपूर्वाद्विद्यान्ताच्चेति वक्तव्यम्' (वा २७४२) । आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । त्रिविधा विद्या त्रिविद्या, तामधीते वेद वा त्रैविद्यः । 'आख्यानाख्यायिकेतिहासपुराणेभ्यश्च' (वा २७४६) यवक्रीतमधिकृत्य कृतमाख्यानमुपचाराद्यवक्रीतम्, तदधीते वेत्ति वा यावक्रीतिकः । वासवदत्तामधिकृत्य

इति लक्ष्यते । **मुख्यार्थादिति** । सामवाचिन उक्थशब्दात्तु न ठक् । तस्मिन्निषिद्धे तदधीते इत्यण् च न भवतीत्यर्थः । भाष्ये तु मुख्यार्थकादुक्थशब्दात् ठक्, नेत्येव लक्ष्यते । उक्थादिगणपठिताद् न्यायादिशब्दात् ठकमुदाहरति—**न्यायमिति** । अधीते वेद वेति शेषः । **नैयायिक इति** । ठकि ऐजागमः । **वृत्तिमिति** । अधीते वेद वेति शेषः । **वार्त्तिक इति** । ठकि आदिवृद्धौ रपरत्वम् । **सांग्रहसूत्रिक इति** । संग्रहाख्यं सूत्रमधीते वेत्ति वेत्यर्थः **विद्यालक्षणेति** । विद्या, लक्षण, कल्प एतदन्तादपि उक्तेऽर्थे ठगित्यर्थः । **अङ्गेति** । अङ्ग, क्षत्रधर्म, त्रि एतत्पूर्वकाद्विद्यान्तात् समासात् ठग् नेत्यर्थः । ततश्च अणेव । **त्रिविधा विद्या त्रिविद्या इति** । शाकपार्थिवादित्वाद्विधाशब्दस्य लोप इति भावः । तिस्रो विद्यास्त्रिविद्या इति न विग्रहः, 'दिक्संख्ये संज्ञायाम्' इति नियमात् । नापि तिस्रो विद्या अधीते वेद वेति तद्धितार्थे द्विगुः, तथा सति तद्धितस्य द्विगुनिमित्ततया 'द्विगोर्लुगनपत्ये' इति लुगापत्तेः । तिसृणां विद्यानां समाहार इति द्विगुरप्यत्र निर्बाध एव । **आख्यानेति** । आख्यान, आख्यायिका, इतिहास, पुराण एभ्यश्च उक्तेऽर्थे ठग्वक्तव्य इत्यर्थः । तत्र आख्यानशब्देन आख्यायिकाशब्देन च आख्यानविशेषवाचिन आख्यायिकाविशेषवाचिनश्च ग्रहणम् । इतिहासपुराणशब्दयोस्तु स्वरूपयोरेव ग्रहणम् । आख्यानं नाम कथाप्रबन्धः । 'आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम्' इत्यमरः । 'इतिहासः पुरावृत्तम्' इति च ।

निरूढप्रयोगः । **तल्लक्षणेत्यादि** । तत्प्रतिपादकप्रातिशाख्यमित्यर्थः । **नेष्यते इति** । अनभिधानादिति भावः । **त्रिविधेति** । 'तिस्रो विद्या अधीते' इति विग्रहे तु तद्धितार्थे द्विगौ 'त्रिविद्यः' इत्येव स्याद् 'द्विगोर्लुगनपत्ये' इति लुक्प्रवृत्तेरिति भावः ।

१ 'लभ्यते इति क.। २ एवं सति 'त्रिविद्यम्' इति जाते विद्याशब्दान्तत्वाभावादुदाहरणं न संभवेदिति चिन्त्यमिदम् । अपिशब्दस्वारस्याद् 'न निर्बाधः' इति पाठः प्रतीयते ।

कृता आख्यायिका वासवदत्ता। 'अधिकृत्य कृते ग्रन्थे' (सू १४६७) इत्यर्थे 'वृद्धाच्छः' (सू १३३७)। तस्य 'लुबाख्यायिकाभ्यो बहुलम्' इति लुप्। ततोऽनेन ठक्। वासवदत्तिकः। ऐतिहासिकः। पौराणिकः 'सर्वादेः सादेश्च लुग्वक्तव्यः' (वा २७४८) सर्ववेदानधीते सर्ववेदः। सर्वतन्त्रः। सवार्तिकः। द्विगोर्लुक्'— (सू १०८०) इति लुक्। द्वितन्त्रः। 'इकन्पदोत्तरपदाच्छतषष्टेः षिकन्पथः' (वा २७४९–२७५०) पूर्वपदिकः। उत्तरपदिकः। शतपथिकः, शतपथिकी। षष्टिपथिकः, षष्टिपथिकी। (१२७१) **क्रमादिभ्यो वुन्।** (४-२-६१)

'सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥'

तत्र आख्यानादुदाहरति। **यवक्रीतमिति**। आख्यायिकाया उदाहरति— **वासवदत्तामिति**। **लुग्वक्तव्य इति**। उक्तप्रत्ययस्येति शेष। **सर्ववेद इति**। अणो लुकि आदिवृद्ध्यभावः। **सर्वतन्त्र इति**। सर्वतन्त्राण्यधीते वेद वेत्यर्थः। **सवार्तिक इति**। वार्तिकेन सह सवार्तिकम्। तेन बहुव्रीहिः। 'वोपसर्जनस्य' इति सभावः। सवार्तिकं सूत्रमधीत इत्यर्थः। **द्विगोरिति**। द्वे तन्त्रे अधीते वेत्ति वेत्यर्थे तद्धितार्थे द्विगुनिमित्तत्वादणो लुकि आदिवृद्ध्यभावे द्वितन्त्र इति रूपमित्यर्थः। **इकन् पदोत्तरपदादिति**। पदशब्द उत्तरपदं यस्य स पदोत्तरपदः, तस्मादुक्तेऽर्थे इकन्प्रत्ययो वक्तव्यः। **शतषष्टेः षिकन्पथ इति**। शतशब्दात् षष्टिशब्दाच्च परो यः पथिन्शब्दः तस्माद् उक्तेऽर्थे षिकन्प्रत्ययो वक्तव्य इत्यर्थः। **पूर्वपदिक इति**। पूर्वपदमधीते वेत्ति वेत्यर्थः। एवमुत्तरपदिकः। **शतपथिक इति**। शतपथं नाम वाजसनेयिब्राह्मणम्। तदधीते वेत्ति वेत्यर्थः। **शतपथिकीति**। टित्त्वान् ङीबिति भावः। एवं षष्टिपथिकः षष्टिपथिकीति। **क्रमादिभ्यो वुन्**। तदधीते तद्वेद इत्यर्थे इति शेषः।

आख्यायिकेति। गद्यपद्यरूपो ग्रन्थविशेष इत्यर्थः। **सर्वादेरिति**। 'सादेः' इत्येव सिद्धे सर्वादिग्रहणमर्थवत्परिभाषाज्ञापनार्थम्। **सवार्तिक इति**। वार्तिकान्तमधीत इत्यर्थः। अन्तवचने अव्ययीभावः। 'अव्ययीभावे चाकाले' इति सहस्य सभावः। **इकन्निति**। पदशब्द उत्तरपदं यस्य तस्मादिकन्। शतशब्दात्षष्टिशब्दाच्च परो यः पथिन्शब्दस्तदन्तात्तु षिकन् वाच्य इत्यर्थः। **शतपथिक इति**। वृत्तिकृता तु वार्तिके 'बहुलम्' इति पूरयित्वा 'शातपथः' इत्यणन्तमप्युदाहृतम्। तत्तु भाष्ये

---

१ 'टिकन् पथः' इति क. ख.। अयमेव पाठो बालमनोरमासंमतः प्रतीयते, परं कौमुदीपुस्तकानामसंवादबाहुल्यादिह षिकन् निवेशितः। २ 'षिकन्' इति पाठानुरोधेन 'षित्वात्' इति युक्तं स्यात्।

क्रमकः । क्रम पद शिक्षा मीमांसा क्रमादिः । १२७२ **अनुब्राह्मणादिनिः ।** (४-२-६२) 'तदधीते तद्वेद' (सू १२६१) इत्यर्थे । ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम्, तदधीतेऽनुब्राह्मणी । मत्वर्थीयेनैव सिद्धेऽणबाधनार्थमिदम्। १२७३ **वसन्तादिभ्यष्ठक्।** (४-२-६३) वासन्तिकः। अथर्वाणमधीते आथर्वणिकः। 'दाण्डिनायन-' (सू ११४५) इति सूत्रे निपातनाट्टिलोपो न । १२७४ **प्रोक्ताल्लुक् ।** (४-२-६४) प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक्स्यात् । पणनं पणः । 'घञर्थे कविधानम्' इति कः, सोऽस्यास्तीति पणी । तस्य गोत्रापत्यं पाणिनः । १२७५ **गाथिविदथिकेशिगणिपणिनश्च ।**

क्रमक इति । क्रममधीते वेत्ति वेत्यर्थः । क्रमादिगणं पठति—**क्रमेत्यादि** । **क्रमादिरिति** । अयं क्रमादिगण इत्यर्थः । पदकः शिक्षकः मीमांसक इत्युदाहरणानि। **अनुब्राह्मणादिनिः** । शेषपूरणेन सूत्रं व्याचष्टे—**तदधीते तद्वेदेत्यर्थे इति** । इनिप्रत्यये नकारादिकार उच्चारणार्थः । तथा च नकारस्योपदेशेऽन्त्यत्वाभावान्नेत्संज्ञा । ननु 'अत इनिठनौ' इति मत्वर्थे इनिनैव सिद्धत्वादिदं व्यर्थमित्यत आह—**अणबाधनार्थमिति** । भाष्ये तु प्रत्याख्यातमेवेदम् । **वसन्तादिभ्यष्ठक्** । 'तदधीते तद्वेद' इत्येव । **वासन्तिक इति** । वसन्तवर्णनपरग्रन्थो वसन्तः । तमधीते वेत्ति वेत्यर्थः । **अथर्वाणमिति** । अथर्वणा प्रोक्तो वेदो लक्षणया अथर्वा, तमित्यर्थः । वस्तुतस्तु प्रोक्तप्रत्ययस्य 'ऋषिभ्यो लुग्वक्तव्यः' इति वचनाल्लुक् । आथर्वणिक इत्यत्र 'नस्तद्धिते' इति टिलोपमाशङ्क्याह—**दाण्डिनायनेति** । वान्तसंयोगपूर्वकत्वात्तु नाल्लोपः । अथ पाणिनिशब्दं व्युत्पादयितुमुपक्रमते—**प्रोक्ताल्लुक्** । प्रोक्तशब्देन प्रोक्तार्थप्रत्ययो विवक्षितः । अध्येतृवेदितृप्रत्ययस्येति प्रकृतत्वाल्लभ्यते, तदाह—**प्रोक्तार्थकेति** । **पणनं पण इति** । स्तुतिरित्यर्थः । ननु 'हलश्च' इति घञि उपधावृद्धिः स्यादित्यत आह—**घञर्थे इति** । **पणीति** । 'अत इनिठनौ' इति मत्वर्थे इनिः । **तस्येति** । पणिनो गोत्रापत्ये तस्यापत्यमित्यणि पाणिन इति रूपमित्यर्थः । अत्र अणः अपत्यत्वात्तस्मिन् परे 'इनण्यनपत्ये' इति

न दृष्टम् । षित्त्वफलं दर्शयति—**शतपथिकीति** । **अणबाधनार्थमिति** । भाष्ये तु प्रत्याख्यातमेवेदं सूत्रं तद्रीत्या त्वणिष्यत इति, अनभिधानान्नेति वा बोध्यम् । **वसन्ता** । उक्थादिष्वेव वसन्तादीन् पठित्वा, वसन्तादिषु वा उक्थादीन् पठित्वा, अन्यतरच्छक्यमवक्तुम् । **अथर्वाणमिति** । अथर्वणा प्रोक्त उपचारादथर्वा। यद्वा 'तेन प्रोक्तम्' इत्यधिकारे **'ऋषिभ्यो लुग्वक्तव्यः'** वसिष्ठो विश्वामित्रोऽनुवाक इत्युदाहृत्य **'अथर्वणो वा' 'अथर्वा' 'आथर्वणः'** इति भाष्योक्तेः साधुः ।

(६-४-१६५) एतेऽणि प्रकृत्या स्युः । इति टिलोपो न । ततो यून्यपत्ये इञ् । पाणिनिः । १२७६ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः । (२-४-५८) ण्यप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्तादृष्यभिधायिनो गोत्रप्रत्ययान्ताद् ञितश्च परयोर्युवाभिधायिनोरणिञोर्लुक्स्यात् । कौरव्यः पिता, कौरव्यः पुत्रः । श्वाफल्कः पिता, श्वाफल्कः पुत्रः । वासिष्ठः पिता, वासिष्ठः पुत्रः । तैकायनिः पिता,

---

प्रकृतिभावाभावाट्टिलोपे प्राप्ते । **गाथिविदथि** । 'इनण्यनपत्ये' इत्यतः 'अणि' इत्यनुवर्तते । 'प्रकृत्यैकाच्' इत्यतः 'प्रकृत्या' इति च । तदाह--**एतेऽणि प्रकृत्या स्युरिति** । गाथिन्, विदथिन्, केशिन्, गणिन्, पणिन् एत इत्यर्थः । अपत्येऽप्यणि प्रकृतिभावार्थमिदम् । **ततो यून्यपत्य इति** । मूलप्रकृतिः पणी । तदपेक्षया चतुर्थेऽपत्ये यूनि विवक्षिते पाणिनशब्दाद् गोत्राणन्ताद् अत इञि पाणिनिरिति रूपमित्यर्थः । पाणिनशब्दस्य अनन्तरापत्यप्रत्ययान्तत्वे तु ततोऽनन्तरापत्ये मूलप्रकृतिपणयपेक्षया तृतीये गोत्रापत्ये इञ् न संभवति 'एको गोत्रे' इति नियमात् । नापि मूलप्रकृत्यपेक्षया चतुर्थापत्ये यूनि पाणिनशब्दादनन्तरापत्यप्रत्ययान्तादिञ् संभवति, 'गोत्राद्यून्यस्त्रियाम्' इति यून्यपत्ये गोत्रप्रत्ययान्तादेवापत्यप्रत्ययनियमात् । अतो गोत्राणप्रत्ययान्तात् पाणिनशब्दाद्यूनि इञ्प्रत्यय इत्युक्तमिति बोध्यम् । अत्र इञो लुकमाशङ्कितुमाह—**ण्यक्षत्रियार्ष** । ण्यादयः सर्वे गोत्रप्रत्यया एव गृह्यन्ते, 'गोत्राद्यूनि' इत्युक्तेः । तदाह—**गोत्रप्रत्ययान्तादित्यादि** । ण्यप्रत्ययस्योदाहरति—**कौरव्य इति** । कुरोः गोत्रापत्यं कौरव्यः । कुर्वादिभ्यो ण्यः । कौरव्यस्यापत्यं युवेत्यर्थे अत इञ् । तस्यानेन लुक् । क्षत्रियप्रत्ययस्योदाहरति—**श्वाफल्क इति** । श्वफल्कस्य गोत्रापत्यं श्वाफल्कः । 'ऋष्यन्धक-' इत्यण् । श्वाफल्कस्यापत्यं युवेत्यर्थे अत इञ् । तस्यानेन लुक् । आर्षप्रत्ययस्योदाहरति—**वासिष्ठ इति** । वसिष्ठस्य गोत्रापत्यं वासिष्ठः । ऋष्यण् । वासिष्ठस्यापत्यं युवेत्यर्थे इञ् । तस्यानेन लुक् । ञित उदाहरति—**तैकायनिरिति** ।

गाथिविदथि । 'इनण्यनपत्ये' इति सिद्धे अपत्येऽप्यणि प्रकृतिभावार्थमयमारम्भः । गाथिनः । वैदथिनः । कैशिनः । गाणिनः । पाणिनः । **ण्यक्षत्रियार्ष** । **कौरव्य इति** । 'कुर्वादिभ्यो ण्यः' तत इञो लुक् । कौरव्यः पुत्रः । ननु तिकादिषु कौरव्यशब्दः पठ्यते, तथा च कौरव्यायणिरिति फिञः भाव्यम्, न त्विञेति चेत् । सत्यम्, 'कुरुनादिभ्यो ण्यः' इति क्षत्रियगोत्रे विहितो यो ण्यस्तदन्तं तत्र पठ्यते । प्रकृते तु ब्राह्मणगोत्रप्रत्ययान्तमित्यवधेयम् । **श्वाफल्क इति** । 'ऋष्यन्धक-' इत्यण् । तत इञो लुक्, श्वाफल्कः पुत्रः । **वासिष्ठ इति** । ऋष्यण तत इञो

तैकायनिः पुत्रः। 'एभ्यः' किम्-शिवाद्यण्। कौहडः पिता। तत इञ्। कौहडिः पुत्रः। 'यूनि' किम्-वामरथ्यस्य छात्रा वामरथाः, इत्यणो लुक्तु न भवति, आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात्। पाणिनिना प्रोक्तं पाणिनीयम्। 'वृद्धाच्छः' (सू १३३७)। 'इञश्च' (सू १३३२) इत्यण् तु न। गोत्रे य इञ्

तिकस्य गोत्रापत्यं तैकायनिः। तिकादिभ्यः फिञ्। तैकायनेरपत्यं युवेत्यर्थे तस्यापत्यमित्यण्। तस्यानेन लुक्। **वामरथ्यस्येति**। वामरथस्य गोत्रापत्यं वामरथ्यः। कुर्वादिभ्यो ण्यः। वामरथ्यस्य छात्रा इत्यर्थे 'कण्वादिभ्यो गोत्रे' इति छापवादः अण्, तस्यानेन लुङ् न भवति, तस्य युवार्थकत्वाभावादिति भावः। **इत्यणो लुक्तु न भवतीति**। 'ण्यक्षत्रिय-' इति सूत्रेण पाणिनिरित्यत्र इञो लुङ् न भवतीत्यर्थः। कुत इत्यत आह—**आर्षग्रहणेनेति**। पाणिनिशब्दे पणिन्शब्दादण्प्रत्ययस्य औत्सर्गिकस्य वस्तुगत्या ऋषिवाचित्वेऽपि ऋषौ प्रतिपदोक्तत्वाभावाच्च ततः परस्य इञो लुगिति भावः। न च पणिन्शब्दाद्गोत्रापत्ये 'ऋष्यन्धक-' इत्यणेव कुतो न स्यादिति वाच्यम्, यत्र औत्सर्गिकस्य अण इञादिना बाधः प्रसक्तः, तत्रैव तद्बाधनार्थम् ऋष्यणः प्रवृत्तेः। वस्तुतस्तु 'वान्यस्मिन्सपिण्डे-' इति सूत्रभाष्ये अत्रिशब्दाद् 'इतश्चानिञः' इति ढकि आत्रेयशब्दादिञो 'ण्यक्षत्रियार्ष-' इति लुगित्युक्तत्वादिदमुपेक्ष्यम्। 'ण्यक्षत्रिय-' इत्यत्र तु ऋषिवाचकस्य रूढस्यैव ग्रहणम्। पणिन्शब्दः, तदपत्ये पाणिनशब्दश्च न ऋषिवाचकौ। अत औत्सर्गिकाणन्त एव पाणिनशब्द इति शब्देन्दुशेखरे प्रपञ्चितम्—**पाणिनिनेति**। पाणिनिना प्रोक्तमित्यर्थे 'तेन प्रोक्तम्' इत्यणं बाधित्वा 'वृद्धाच्छः' इति छप्रत्यये ईयादेशे पाणिनीयशब्द इत्यर्थः। ननु पाणिनिशब्दात्तद्धिते विवक्षिते 'यूनि लुक्' इति इञो लुकि सत्यपि प्रत्ययलक्षणेन इञन्तत्वमाश्रित्य छापवादः अण् स्यादित्यत आह—**इञश्चेत्यण् तु नेति**।

लुक्। वासिष्ठः पुत्रः। **तैकायनिरिति**। 'तिकादिभ्यः फिञ्' ततोऽणो लुक्। तैकायनिः पुत्रः। **वामरथा इति**। कुर्वादित्वाद् ण्यः। ततो वृद्धाच्छं बाधित्वा 'कण्वादिभ्यो गोत्रे' इति शैषिकोऽण्। **इतीति**। 'ण्यक्षत्रियार्ष-' इत्युदाहृतसूत्रेणेत्यर्थः। **ऋष्यण एवेति**। पाणिनशब्दे तु औत्सर्गिक एवाणिति भावः। नन्विदं 'वान्यस्मिन् सपिण्डे-' इति सूत्रस्थभाष्यकैयटाभ्यां विरुध्यते। अत्रेर्युवापत्यानि पुमांसोऽत्रयः, 'इतश्चानिञः' इति ढक्, तदन्ताद्यूनि 'अत इञ्' तस्य 'ण्यक्षत्रिय-' इति लुक्, 'अत्रिभृगुकुत्स-' इति ढकोऽपि लुक् इत्युक्तत्वात्। 'ऋष्यन्धक-' इत्यण एव ग्रहणे तु ढकोऽग्रहणात्ततः परस्येञो लुङ् न स्यादित्याहुः। वस्तुतस्तु 'दाक्षीपुत्र

तदन्तादिति वक्ष्यमाणत्वात्। ततोऽध्येतृवेदित्रणो लुक्। स्वरे स्त्रियां च विशेषः। पाणिनीयः। पाणिनीया। **१२७७ सूत्राच्च कोपधात्।** (४-२-६५) सूत्रवाचिनः ककारोपधादध्येतृवेदितृप्रत्ययस्य लुक् स्यात्। अप्रोक्तार्थ आरम्भः। अष्टावध्यायाः परिमाणमस्य अष्टकं पाणिनेः सूत्रम्। तदधीयते विदन्ति वा अष्टकाः। 'संख्याप्रकृतिकादिति वाच्यम्'। नेह—माहावार्तिकः। कालापकः।

पाणिनिशब्दे इञ् युवापत्यार्थक एव, न तु गोत्रार्थकः, युवसंज्ञया गोत्रसंज्ञाया बाधादिति भावः। यद्यपि अपत्याधिकारादन्यत्र न पारिभाषिकं गोत्रमित्युक्तम्। तथाप्यत्र पारिभाषिकमेव गोत्रं गृह्यत इति उपरिष्टाद् 'इञश्च' इति सूत्रे वक्ष्यते। **तत इति।** पाणिनीयशब्दादित्यर्थः। पाणिनीयमधीते वेत्ति वेत्यर्थे पाणिनीयशब्दादणि 'प्रोक्ताल्लुक्' इति तस्य लुगिति भावः। ननु असत्यपि अध्येतृवेदितृप्रत्ययस्याणो लुकि पाणिनीयशब्दः सिध्यत्येवेत्यत आह—**स्वरे स्त्रियां च विशेष इति।** अध्येतृवेदितृप्रत्ययस्याणो लुगभावे प्रत्ययस्वरेणान्तोदात्तत्वं स्त्रियां च ङीप् स्यात्। लुकि तु सति छादेशस्य ईयादेशस्य ईकारः प्रत्ययस्वरेणोदात्तः टाप् च सिध्यति। तदाह—**पाणिनीयः, पाणिनीयेति। सूत्राच्च कोपधात्।** ककारोपधादित्यनन्तरं परस्येति शेषः। ननु 'प्रोक्ताल्लुक्' इत्येव सिद्धे किमर्थमिदमित्यत आह—**अप्रोक्तार्थ आरम्भ इति।** अप्रोक्तार्थादपि प्रत्ययात्परस्य लुगर्थमित्यर्थः। **अष्टकमिति।** तदस्य परिमाणमित्यधिकारे 'संख्यायाः संज्ञासंघसूत्राध्ययनेषु' इति 'संख्याया अतिशदन्तायाः कन्' इति च सूत्ररूपेऽर्थे कन्। **अष्टका इति।** अष्टकशब्दादध्येतृवेदितृप्रत्ययस्य अनेन लुक्, कोपधात्सूत्रवाचिनः परत्वादिति भावः। **संख्याप्रकृतिकादिति।** 'सूत्राच्च कोपाधात्' इति लुक् संख्याप्रकृतिकप्रत्ययान्तादेव परस्य भवतीत्यर्थः। **माहावार्तिक इति।** महावार्तिकं नाम सूत्रम्, तदधीते वेत्ति वा माहावार्तिकः। अत्र अणो

पाणिनेः' इति भाष्यप्रयोगादस्य साधुत्वमिति ज्ञेयम्। **इञश्चेत्यतीति।** 'यूनि लुक्' इति लुक्यपि प्रत्ययलक्षणेन इञन्तमस्तीति भावः। **गोत्रे च इति।** 'गोत्रमिह शास्त्रीयम्, न तु लौकिकमिति तत्र वक्ष्यते' इति भावः। **स्वर इति।** लुगभावे प्रत्ययस्वरेणान्तोदात्तत्वं स्त्रियां च ङीप्स्यात्। लुकि सति त्वीकार उदात्तः, टाप् च सिध्यतीति भावः। **अष्टकमिति।** 'संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' इति 'संख्याया अतिशदन्तायाः कन्'। **संख्याप्रकृतिकादिति।** संख्याप्रकृतिकप्रत्ययान्तादित्यर्थः। **कालापक इति।** कलापिन्शब्दात्प्रोक्तार्थेऽण्, 'सब्रह्मचारी-' इत्युपसंख्यानाट्टिलोपः। ततोऽध्येतर्यण्, तस्य 'प्रोक्ताल्लुक्' इति लुक्। कालापानामाम्नाय इत्यर्थे 'गोत्रचरणाद्-

१२७८ छन्दोब्राह्मणानि च तद्विषयाणि । (४-२-६६) छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः । अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः । कठेन प्रोक्तमधीयते कठाः । वैशम्पायनान्तेवासित्वाणिणिनिः । तस्य 'कठचरकात्-' (सू १४८७) इति लुक् । ततोऽण् । तस्य 'प्रोक्ताल्लुक्' (सू १२७४)।

न लुक् । **छन्दोब्राह्मणानि ।** छन्दांसि मन्त्राः, ब्राह्मणानि विधिवाक्यानि । तेषां द्वन्द्वः, वेद इति यावत्, मन्त्रब्राह्मणयोर्वेदनामधेयमिति स्मरणात् । 'प्रोक्ताल्लुक्' इत्यतः प्रोक्तादित्यनुवर्तते । प्रथमाबहुवचनेन विपरिणम्यते । प्रोक्तप्रत्ययान्तानीति लभ्यते । तदाह—**छन्दांसीत्यादिना ।** तद्विषयाणीत्यत्र तच्छब्देन अध्येतृवेदितृप्रत्यया विवक्षिताः । तैर्विषयः अविनाभावो येषां तानि तद्विषयाणि, 'षिञ् बन्धने' विशिष्य सयो बन्धः विषयः, अविनाभाव इति यावत् । अध्येतृवेदितृप्रत्ययसंयुक्तान्येव स्युरित्यर्थः । फलितमाह—**अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थ इति ।** पाणिनिना प्रोक्तं पाणिनीयं व्याकरणम् । पाणिनीयास्तदध्येतारो वेदितारो वेतिवद् अध्येतृप्रत्ययं विनापि प्रयोगे प्राप्ते नियमार्थमिदम् । **कठेनेति ।** कठेन प्रोक्तमधीयते इत्यर्थे कठा इत्युदाहरणमिति भावः । तदुपपादयति—**वैशम्पायनेति ।** कठेन प्रोक्तमित्यर्थे तेन प्रोक्तमित्यणपवादः 'वैशम्पायनान्तेवासिभ्यश्च' इति णिनिरित्यर्थः । **तस्येति ।** णिनेः 'कठचरकाल्लुक्' इत्यनेन लुगित्यर्थः । एवं च कठेन प्रोक्तो वेदभागः कठ इति स्थितम् । **ततोऽणिति ।** तस्माद् लुप्तप्रोक्तप्रत्ययकात् कठशब्दात् तदधीते इति अणित्यर्थः । **तस्य प्रोक्ताल्लुगिति ।** तस्याध्येत्रणः 'प्रोक्ताल्लुक्' इति लुगित्यर्थः । तथा च कठेन प्रोक्तमधीयते कठा इत्येवं कठशब्दस्य लुप्तप्रोक्तप्रत्ययान्तस्य अध्येत्रणा सहैव प्रयोगार्हता, नतु तेन बिना केवलप्रोक्तप्रत्ययान्तस्येति भावः ।

लुक्' ततोऽध्येतृवेदित्रणो लुक्, स्वरे स्त्रियां च विशेषः । **छन्दोब्राह्मणानि ।** इह मण्डूकप्लुत्यानुवृत्तं 'प्रोक्तात्' इति पञ्चम्यन्तं जसन्तत्वेन विपरिणम्यते 'छन्दोब्राह्मणानि' इत्यनेन सामानाधिकरण्यात् । प्रोक्तशब्दश्च प्रोक्तार्थके प्रत्यये लाक्षणिक इत्याशयेनाह—**प्रोक्तप्रत्ययन्तानीति । तद्विषयाणीति ।** तच्छब्देन अध्येतृवेदितृप्रत्ययः परामृश्यते, विषयशब्दस्त्विवद्यानन्यभाववाची न तु देशवाचीत्यभिप्रेत्याह—**प्रत्ययं विना न प्रयोज्यानीत्यर्थ इति ।** पाणिनीयं पाणिनीया इतिवदनियमेन प्रयोगे प्राप्ते नियमार्थमेतदिति भावः । छन्दोग्रहणादेव सिद्धे ब्राह्मणग्रहणं चिरन्तनप्रोक्तब्राह्मणानामेव तद्विषयत्वार्थम् । तेनेह न—याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि

अथ चातुरर्थिकाः ।

१२७९ तदस्मिन्नस्तीति देशे तन्नाम्नि । (४-२-६७) उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरः । १२८० तेन निर्वृत्तम् । (४-२-६८) कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी । १२८१ तस्य निवासः । (४-२-६९) शिबीनां निवासो देशः शैबः । १२८२ अदूरभवश्च । (४-२-७०) विदिशाया अदूरभवं नगरं वैदिशम् । चकारेण प्रागुक्तास्त्रयोऽर्थाः सन्निधाप्यन्ते, तेन वक्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति । १२८३ ओरञ् । (४-२-७१)

अथ चातुरर्थिकान् प्रत्ययान् वक्तुमुपक्रमते । **तदस्मिन्नस्तीति** । तदस्मिन्नस्तीत्यर्थे प्रथमोच्चारितात्प्रथमान्तादणादयः स्युः । प्रत्ययान्तेन प्रकृतिनामके देशे गम्य इत्यर्थः । प्रसिद्धदेशग्रहणार्थं इतिशब्दः । मतुपोऽपवादः । **तेन निर्वृत्तम्** । देशे तन्नाम्नीत्यनुवर्तते । तेन निर्वृत्तमित्यर्थे तृतीयान्तादणादयः स्युः तन्नाम्नि देशे इत्यर्थः । **तस्य निवासः** । तन्नाम्नि देशे इत्येव । तस्य निवास इत्यर्थे षष्ठ्यन्तादणादयः स्युः तन्नाम्नि देशे इत्यर्थः । स्वत्ववान् विषयः । निवासस्तु वसतिमात्रं स्वत्वास्वत्वसाधारणमित्याहुः । **अदूरभवश्च** । 'तस्य' इति 'तन्नाम्नि देशे' इति चानुवर्तते । तस्य अदूरभव इत्यर्थे षष्ठ्यन्तादणादयः स्युः तन्नाम्नि देशे इत्यर्थः । नन्वत्र चकारः किमर्थ इत्यत आह—**चकारेणेति** । अदूरभव इति विध्यनन्तरं प्रागुक्तास्त्रयोऽर्थाः पुनरुपस्थाप्यन्त इत्यर्थः । किमर्थमित्यत आह—**तेनेति** । अन्यथा संनिहितत्वाद् अदूरभव इत्येव उत्तरविधिष्वनुवर्तेतेति भावः । **चातुरर्थिकत्वमिति** । चतुरर्थ्यां भव इत्यर्थे

याज्ञवल्कानि । यञन्तात् 'कण्वादिभ्यो गोत्रे' इत्यण्, 'आपत्यस्य च—' इति यलोपः । याज्ञवल्क्यादयो हि पाणिन्यपेक्षया नूतना इति वृत्तिकृतां व्यवहारः । चकारोऽनुक्तसमुच्चयार्थः । तेन काश्यपिनः कौशिकिन इत्यत्र कल्पेऽपि तद्विषयत्वं सिद्धम् । काश्यपकौशिकाभ्यामृषिभ्याम्—' इति प्रोक्ते णिनिः, अध्येत्रणो लुक् । छन्दोब्राह्मणानीति किम्, पाणिनीयं व्याकरणम् ॥ इति रक्ताद्यर्थकाः ॥

अथ चातुरर्थिकाः ।

तदस्मिन् । अस्तीत्युपाधिकात्प्रथमान्तादस्मिन्निति सप्तम्यन्तार्थे यथाविहितं प्रत्ययः स्यात्प्रत्ययान्तनामा देशश्चेत् । तत्प्रत्ययान्तं नाम यस्येति बहुव्रीहिः । मतुपोऽयमपवादः । इतिशब्दस्तु सकललोकप्रसिद्धे देशे यथा स्यात्, न त्वाधुनिकसंकेतेऽपीत्येतदर्थः । उत्तरसूत्रत्रयेऽपि 'देशे तन्नाम्नि' इत्यनुवर्तते । **तेन निर्वृत्तम्** । अन्तर्भावितण्यर्थवृत्तेः कर्मणि क्तः । **अदूर** । अदूरमन्तिकम्, तत्र भवतीत्यदूरभवः, निपातनात्सप्तमीसमासः । **चातुरर्थिकत्वमिति** । चतुर्णामर्थानां समाहारश्चतुरर्थी ।

अणोऽपवादः । कक्षतु काक्षतवम् । नद्यास्तु परत्वान्मतुप् । इक्षुमती । १२८४ **मतोश्च बह्वजङ्गात्** । (४-२-७२) बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ्, नाण् । सैध्रकावतम् । 'बह्वच्' इति किम्—आहिमतम् । अङ्गग्रहणं बह्वच् इति तद्विशेषणं यथा स्याद् मत्वन्तविशेषणं मा भूत् । १२८५ **बह्वचः कूपेषु** । (४-२-७३) अणोऽपवादः । दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः कूपः । १२८६ **उदक्च विपाशः** । (४-२-७४) विपाश उत्तरे कूले ये कूपास्तेष्वञ् । अबह्वजर्थं आरम्भः । दैत्तेन[1] निर्वृत्तो दात्तः कूपः । उदक् किम्—दक्षिणतः कूपेष्वणेव । १२८७ **सङ्कलादिभ्यश्च** । (४-२-७५) कूपेषु इति निवृत्तम् । सङ्कलेन निर्वृत्तं साङ्कलम् । पौष्कलम् । १२८८ **स्त्रीषु सौवीरसाल्वप्राक्षु** । (४-२-७६) स्त्रीलिङ्गेषु देशेषु वाच्येष्वञ् । सौवीरे, दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी । साल्वे, वैधूमाग्नी । प्राचि, माकन्दी । १२८९ **सुवास्त्वा-**

द्विगोरध्यात्मादित्वाट्ठञ् । तद्धितार्थद्विगौ तु 'द्विगोर्लुगनपत्ये' इति लुक् स्यात् । केचित्तु चतुर्णां सूत्राणामर्थाश्चतुरर्थाः, तत्र भवाश्चातुरर्थिका इत्याहुः । **ओरञ्** । 'तदस्मिन्नस्ति' इत्यादिषु चतुर्ष्वर्थेषु प्रथमोच्चारितात्तद्विभक्त्यन्तादञ् स्यात्, अणोऽपवादः अत्राधिकारः 'सुवास्त्वादिभ्योऽण्' इति यावत् । **काक्षतवमिति** । कक्षतुरस्मिन्नस्तीत्यादि विग्रहः । **मतोश्च** । **सैध्रकावतमिति** । सिध्रकावानस्मिन्नस्तीत्यादयश्चत्वारोऽर्थाः यथायोगं बोध्याः । **आहिमतमिति** । अहिमानस्मिन्नस्तीत्यादयोऽर्थाः । अहिशब्दस्य द्व्यच्कत्वादञ् नेति भावः । **बह्वचः कूपेषु** । बह्वचः प्रातिपदिकाद् अञ् चतुर्ष्वर्थेषु अणोऽपवादः । दीर्घवरत्रेण निर्वृत्तः कूपः दैर्घवरत्रः । **उदक्च विपाशः** । **विपाश उत्तरे कूले इति** । विपाश्शब्द शकारान्तो नदीविशेषवाची । **सङ्कलादिभ्यश्च** । **निर्वृत्तमिति** । व्याख्यानादिति भावः । अणोऽपवादः । **पौष्कलमिति** । पुष्कलेन निर्वृत्तमिति विग्रहः । **स्त्रीषु सौवीर** । **सौवीर इति** । उदाहरणं वक्ष्यत इति शेषः । **दात्तामित्री नगरीति** । 'टिड्ढ—' इति ङीप् । **साल्व इति** । उदाह्रियत इति शेषः । **वैधूमाग्नीति** । विधूमाग्निना निर्वृत्तेत्यर्थः । अञि ङीप् । **प्राचीति** । प्राचि देशे उदाह्रियत इत्यर्थः । **माकन्दीति** । माकन्देन निर्वृत्तेत्यर्थः ।

तत्र भवाश्चातुरर्थिकाः । अध्यात्मादित्वाट्ठञ् । चतुर्ष्वर्थेषु भवा इति तद्धितार्थे द्विगौ तु 'द्विगोर्लुगनपत्ये' इति ठञो लुक् स्यात् । **मतोश्च** । ननु 'मतोर्बह्वचः' इत्येवास्तु । बह्वचो विहितो यो मतुप् तदन्तादिति वैयधिकरण्येन व्याख्यानादिष्टं सिध्यति किमङ्गग्रहणेनेत्याशङ्कां निवारयति—**अङ्गग्रहणमिति** । **मत्वन्तविशेषणमिति** ।

1 'दत्तेन निर्वृत्तो दात्तः कूपः' इति क्वचित्पाठः ।

दिभ्योऽण् (४-२-७७) अञोऽपवादः । सुवास्तोरदूरभवं सौवास्तवम् । वर्णु, वार्णवम् । अण्ग्रहणं नद्यां मतुपो बाधनार्थम् । सौवास्तवी । १२६० रोणी । (४-२-७८) रोणीशब्दात्तदन्ताच्चाण् । कूपाञोऽपवादः । रौणः । आजकरौणः । १२६१ कोपधाच्च । (४-२-७९) अण् । अञोऽपवादः । कार्णच्छिद्रकः कूपः । कार्कवाकवम् । त्रैशङ्कवम् । १२६२ वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः ।

सुवास्त्वादिभ्योऽण् । **अञ इति** । ओरञित्यस्यापवाद इत्यर्थः । **सौवास्तवमिति** । अणि ओर्गुणः । **वार्णवमिति** । वर्णोरदूरभवमित्यर्थः । ननु 'ओरञ्' इत्येव सिद्धे पुनर्विधिसामर्थ्यादेव तदननुवृत्तौ अणि सिद्धे पुनरण्ग्रहणं व्यर्थमित्यत आह—**अण्ग्रहणमिति** । **रोणी** । लुप्तपञ्चमीकमिदम् । **तदन्तादिति** । 'येन विधिः' इति सूत्रस्थभाष्यादिह प्रत्ययविधावपि तदन्तविधिरिति भावः । **रौण इति** । रोण्या निर्वृत्तः कूप इत्यर्थः । **आजकरौण इति** । अजकरोण्या निर्वृत्त इत्यर्थः । अणि 'यस्य' इति ईकारलोपः । **कोपधाच्च** । **कार्णच्छिद्रक इति** । कर्णच्छिद्रकेण निर्वृत्तः कूप इत्यर्थः । **कार्कवाकवमिति** । कृकवाकुना निर्वृत्तः कूप इत्यर्थः । ओर्गुणः, आदिवृद्धौ रपरत्वम् । **त्रैशङ्कवमिति** । त्रिशङ्कुना निर्वृत्तः कूप इत्यर्थः । **वुञ्छण्** । वुञ्, छण्, क, ठच्, इल, स, इनि, र, ढञ्, ण्य, य, फक्, फिञ्, इञ्, ञ्य, कक्, ठक्, एतेषां सप्तदशानां द्वन्द्वात्प्रथमाबहुवचनम् । अरीहण, कृशाश्व, ऋश्य, कुमुद, काश, तृण, प्रेक्षा, अश्मन्, सखि, सङ्काश, बल, पक्ष, कर्ण, सुतङ्गम, प्रगदिन्, वराह, कुमुद एतेषां सप्तदशानां द्वन्द्वः । एते आदयो येषामिति बहुव्रीहिः पञ्चमीबहुवचनम् । यथासंख्यासंगमाय कुमुदशब्दयोरेकशेषो न कृतः । प्रगदिन्शब्दे नलोपाभावस्तु इकारान्तत्वभ्रमनिरासाय । द्वन्द्वान्ते

सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वादण्ग्रहणाभावे मत्वन्तविशेषणं स्यादेव । ततश्चाद्रिमतमित्यादावतिप्रसङ्गः स्यादिति भावः । **रोणी** । रोणीशब्दः प्रत्ययमुत्पादयतीत्यर्थः । तथा च फलितमाह—**रोणीशब्दादिति** । पञ्चम्याः सौत्रो लुगित्यन्ये । **तदन्तादिति** । 'येन विधिः-' इति सूत्रे भाष्यस्थविशेषवचनाद्, विशेषणविशेष्ययोः कामचारमाश्रित्य 'समासप्रत्ययविधौ प्रतिषेधः' इत्यस्य प्रत्याख्यानाद्वा तदन्तविधिरिति भावः । **वुञ्छण्** । 'ठक्' इत्यन्तमेकं समस्तपदम् । अरीहणादि त्वपरम् । तत्र प्रथमतः कुमुदान्तानां चतुर्णां द्वन्द्वं विधाय, द्वितीयेन काशादिकुमुदान्तद्वन्द्वेन सह पुनर्द्वन्द्वो बोध्यः । तेन कुमुदशब्दस्य द्विःपाठेऽपि

(४-२-८०) सप्तदशभ्यो गणेभ्यः सप्तदश क्रमात्स्युश्चतुरर्थ्याम् । अरीहणादिभ्यो वुञ् , अरीहणेन निर्वृत्तमारीहणकम्। कृशाश्वादिभ्यश्छण् , कार्शाश्वीयम् । ऋश्यादिभ्यः कः, ऋश्यकम् । कुमुदादिभ्यष्ठच् , कुमुदिकम्। काशादिभ्य इलः । काशिलः । तृणादिभ्यः सः, तृणसम् । प्रेक्षादिभ्य इनिः, प्रेक्षी । अश्मादिभ्यो रः, अश्मरः सख्यादिभ्यो ढञ् , साखेयम् । सङ्काशादिभ्यो ण्यः, साङ्काश्यम् । बलादिभ्यो यः, बल्यम् । पक्षादिभ्यः फक् , पाक्षायणः । 'पथः पन्थ च' (ग सू ७६) पान्थायनः । कर्णादिभ्यः फिञ् , कार्णायनिः । सुतङ्गमादिभ्य इञ् , सौतङ्गमिः । प्रगद्यादिभ्यो ञ्यः, प्रागद्यः । वराहादिभ्यः कक् , वाराहकः। कुमुदादिभ्यष्ठक् , कौमुदिकः । १२९३ जनपदे लुप् । (४-२-८१) जनपदे वाच्ये चातुरर्थिकस्य लुप्स्यात् । १२९४ लुपि युक्तवद्व्यक्तिवचने । (१-२-५१) लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः ।

श्रूयमाणस्य आदिशब्दस्य अरीहणादिषु प्रत्येकमन्वयः । तथा च अरीहणादिभ्यो वुञ् , कृशाश्वादिभ्यः छण् इत्येवं सप्तदश वाक्यानि संपन्नानि, तदाह—**सप्तदशभ्य इति** । अरीहणादिसप्तदशगणेभ्यो वुञादयः प्रत्ययाः क्रमात्स्युरित्यर्थः । **चतुरर्थ्यामिति** । 'तदस्मिन्नस्तीति देशे तन्नाम्नि' 'तेन निर्वृत्तम्' 'तस्य निवासः' 'अदूरभवश्च' इति चतुर्ष्वर्थेषु प्रथमोच्चारितात्तत्तद्विभक्त्यन्ताद् यथायोगं प्रत्यया इति फलितम् । एतेषु गणेषु चेतनवाचका अचेतनवाचकाश्च सन्ति । तत्र यथायोगं चतुरर्थ्या अन्वयः । **प्रेक्षीति** । प्रेक्षत इति प्रेक्षः, तेन निर्वृत्तमित्यर्थः । प्रेक्षया निर्वृत्तमिति वा । **पथः पन्थ च इति** । पक्षादिगणसूत्रमिदम् । **पान्थायन इति** । पथः अदूरभव इत्यथः । **जनपदे लुप् । चातुरर्थिकस्येति।** प्रकरणलभ्यमिदम् । **लुपि युक्तवत्** । प्रकृतिभूतः शब्दो युक्तः, व्यक्तिः लिङ्गम्, वचनं संख्येति पूर्वाचार्यसंकेतः । तदाह—**लुपि सति प्रकृतिवल्लिङ्गवचने स्त इति** । लुबिति प्रत्ययादर्शनमुच्यते । लुपः प्रवृत्तेः प्राक् प्रत्ययप्रकृतेर्यल्लिङ्गं वचनं ते एव लुपि सति भवतः, न तु प्रत्ययार्थविशेष्यमनुसृत्येत्यर्थः । **पञ्चालानामिति ।**

नैकशेषः । आदिशब्दः प्रत्येकं सम्बध्यत इत्याह—**अरीहणादिभ्य इति** । पक्षाद्यन्तर्गणसूत्रमाह—**पथ इति । जनपदे लुप्** । तन्नाम्नीत्येव, नेह—उदुम्बराः सन्त्यस्मिन्नौदुम्बरो जनपदः, न ह्यत्र लुबन्तं नामधेयम् जनपदस्यैकत्वादेकवचने प्राप्ते बहुवचनादिफलकमतिदेशमाह—**लुपि युक्तवदिति** । व्यक्तिवचने किम्, शिरीषाणामदूरभवो ग्रामः शिरीषाः, 'वरणादिभ्यश्च' इति लुप् । तस्य वनं शिरीषवनम् । इह वनस्पतित्वमतिदिश्यत । ततश्च 'विभाषौषधिवनस्पतिभ्यः' इति

कुरवः। अङ्गाः। वङ्गाः। कलिङ्गाः। **१२९५ तदशिष्यं संज्ञाप्रमाणत्वात्।** (१-२-५३) युक्तवद्वचनं न कर्तव्यम्, संज्ञानां प्रमाणत्वात्। **१२९६ लुब्योगाप्रख्यानात्।** (१-२-५४) लुबपि न कर्तव्योऽवयवार्थस्येहाप्रतीतेः। **१२९७ योगप्रमाणे च तदभावेऽदर्शनं स्यात्।** (१-२-५५)

पञ्चालसंज्ञकानां राज्ञामित्यर्थः। **पञ्चाला इति।** तस्य निवास इति विहितस्याणः 'जनपदे लुप्' इति लुपि प्रकृतिवद् बहुवचनमिति भावः। **कुरव इत्यादि।** कुरूणाम् अङ्गानां वङ्गानां कलिङ्गानां च निवासो जनपद इति विग्रहः। लिङ्गातिदेशे तु कटुबदर्या अदूरभवो जनपदः कटुबदरीत्युदाहार्यम्। तदेतत्पूर्वाचार्यसूत्रं पाणिनिः प्रत्याचष्टे। **तदशिष्यम्।** यथा दारा इत्यादौ शास्त्रीयपुंस्त्वविशिष्टस्यैव स्त्रीरूपार्थस्य भानम्, तथा लुपि सति शास्त्रीयप्रकृत्यर्थगतलिङ्गसंख्याविशिष्टस्यैव स्वार्थस्य लोकव्यवहारादेव भानं संभवति, न तु तदंशे शास्त्रव्यापारापेक्षेति भावः। **संज्ञानामिति।** लोकव्यवहाराणामित्यर्थः। एवं च लुबपि न विधेय इत्याह—**लुब्योगाप्रख्यानात्।** अशिष्यमित्यनुवृत्तं पुँल्लिङ्गेन विपरिणतं लुबित्यनन्तरं संबध्यते। तदाह—**लुबपि न कर्तव्य इति।** योगः अवयवार्थः, तस्य अप्रख्यानाद् अप्रतीतेरित्यर्थः, तदाह—**अवयवेति।** नहि पञ्चालाङ्गवङ्गादिसंबन्धित्वेन पञ्चाला अङ्गा वङ्गा इत्यादितो बोधः, अतः प्रत्यय एव तत्र नास्तीति भावः। प्रत्ययस्त्री-

---

णत्वं स्यात्। नन्वत्र शिरीषाणामिति षष्ठीबहुवचनं कुतो नातिदिश्यत इति चेत्। अत्राहुः—वचनमिह संख्या, न त्वेकवचनद्विवचनादि। न चैवमपि संख्याबोधकत्वेन श्रुतैव षष्ठी परिगृह्यतामिति वाच्यम्, षष्ठ्यर्थस्य तद्धितवृत्त्यन्तर्गतत्वादुक्तार्थे प्रथमाया एव युक्तत्वादिति। **पञ्चाला इत्यादि।** यद्यप्यन्नाभिधेयलिङ्गवत्त्वेऽपीष्टसिद्धिः, तथापि कटुबदर्या अदूरभवो ग्रामः कटुबदरीत्यादिसिद्धये प्रकृतिलिङ्गातिदेश इति भावः। पूर्वाचार्यानुरोधेन कृतं सूत्रं संप्रति प्रत्याचष्टे—**तदशिष्यमिति।** पञ्चालाः, अङ्गाः, वङ्गाः, कलिङ्गा इत्यादयो जनपदस्य यथायथं बहुवचनान्ता एव संज्ञा, न त्वत्र यत्नेन लिङ्गसंख्ये प्रतिपादनीये। आपो दारा इत्यादिषु यथा। न हि तत्र शास्त्रेण लिङ्गसंख्ये प्रतिपाद्येते इति भावः। उपजीवकं प्रत्याख्यायोपजीव्यं प्रत्याचष्टे—**लुब्योगेति।** 'जनपदे लुप्' 'वरणादिभ्यश्च' इति द्विसूत्री लुप्शब्देन विवक्षित। 'अशिष्यम्' इति सम्बध्यत एव, तदाह—**लुबपीति।** प्रकृतिप्रत्ययार्थयोः सम्बन्धो योग इत्याशयेन फलितमाह—**अवयवार्थस्येति।** अप्रख्यानादिति व्याचष्टे—**अप्रतीतेरिति।** पञ्चालादयः शब्दाः क्षत्रियेषु यथा रूढास्तथा जनपदेऽपीति 'तस्य निवासः' 'अदूरभवश्च' इति तद्धितो नैवोत्पद्यते, किमनेन लुपो विधानेनेत्यर्थः।

यदि हि योगस्यावयवार्थस्येदं बोधकं स्यात्तदा तदभावे न दृश्येत । १२९८ **प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्** । (१-२-५६) 'प्रत्ययार्थः प्रधानम्' इत्येवं रूपं वचनमप्यशिष्यम् । कुतः ? अर्थस्य लोकत एव सिद्धेः । १२९९ **कालोपसर्जने च तुल्यम्** । (१-२-५७) अतीतायाः रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन च सहितो दिवसोऽद्यतनः, विशेषणमुपसर्जनम् इत्यादि पूर्वाचार्यैः परिभाषितम्, तत्राप्यशिष्यत्वं समानम्, लोकप्रसिद्धेः । १३०० **विशेषणानां चाजातेः** । (१-२-५२) लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा । पञ्चाला रमणीयाः । गोदौ रमणीयौ । अजातेः

कारे बाधकमाह—**योगप्रमाणे च** । पञ्चालाङ्गवङ्गादिशब्देषु योगस्य अवयवार्थस्य प्रमापकत्वे सति तदभावे पञ्चालाङ्गादिक्षत्रियसम्बन्धाभावे संप्रति शूद्रादिराजके जनपदे पञ्चालादिशब्दो न प्रयुज्येत, प्रयुज्यते च यतः, अतः पञ्चालादिशब्दा जनपदविशेषेषु केवलरूढा इति युक्तमित्यर्थः । तदाह—**यदि हि योगस्येति** । अथ प्रसङ्गादन्यदपि पूर्वाचार्यपरिभाषितं निराचष्टे । **प्रधानप्रत्ययार्थ** । **प्रत्ययार्थ इति** । प्रकृत्यर्थं प्रति प्रत्ययार्थः प्रधानं विशेष्यम्, प्रकृत्यर्थस्तु तद्विशेषणमित्येवं यत्पूर्वाचार्यवचनं तदपीत्यर्थः । **कालोपसर्जने च** । कालश्च उपसर्जनं चेति समाहारद्वन्द्वाद् विषयसप्तमी । अशिष्यमित्यनुवृत्तं भावप्रधानमाश्रीयते । कालविषये उपसर्जनविषये च यत्पूर्वाचार्याणां विशेषवचनं तत्राप्यशिष्यत्वं समानमित्यर्थः । तद्विशेषवचनं विशदयन् व्याचष्टे—**अतीताया इत्यादिना** । **विशेषणानां चाजातेः** । कस्य विशेषणानामित्याकाङ्क्षायां लुबित्यनुवृत्तं षष्ठ्या विपरिणतं संबध्यते, लुप्प्रत्ययार्थस्येति लभ्यते । तदाह—**लुबर्थस्येति** । **तद्वदिति** । प्रकृतिवदित्यर्थः । 'लुपि युक्तवद्व्यक्तिवचने' इत्यस्मादुत्तरं पठितमिदं सूत्रं तत्रैव व्याख्यातुमुचितम् । **पञ्चाला रमणीया इति** । पञ्चालानां निवासो जनपद इत्यर्थः । अत्र प्रत्ययार्थजनपदं प्रति विशेषणस्यापि रमणीयशब्दस्य

न दृश्येतेति । विनापि क्षत्रियसम्बन्धं पञ्चालादिशब्दो जनपदेषु प्रयुज्यत इति नार्थः सूत्रेणेत्यर्थः । प्रसङ्गात्पूर्वाचार्यपरिभाषितमन्यदपि प्रत्याचष्टे—**प्रधानेत्यादिना** । **विशेषणानाम्** । यद्यपि सूत्रपाठे 'लुपि युक्तवत्-' इति सूत्रादनन्तरमेतत्सूत्रं पठित्वा 'तदशिष्यम्-' इत्यारब्धत्वात्तत्रैवेदं व्याख्यातुमुचितम् । तथापि जातेः प्रतिषेधमात्रपरमिदम्, न तु युक्तवद्भावपरमित्याशयेन तत्र नोक्तमित्याहुः । **पञ्चाला रमणीया इति** । कथं तर्हि 'पञ्चाला जनपदः सुभिक्षः सम्पन्नपानीयः' इति प्रयोग इति चेत्, जनपदविशेषणत्वादित्यवेहि । पञ्चालविशेषणत्वाभ्युपगमे तु तद्वल्लिङ्गवचने

किम्-पञ्चाला जनपदः। गोदौ ग्रामः। 'हरीतक्यादिषु व्यक्तिः' (वा ७१५)। हरीतक्याः फलानि हरीतक्यः। 'खलतिकादिषु वचनम्' (वा ७१६)। खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि। 'मनुष्यलुपि प्रतिषेधः' (वा ७१७) मनुष्यलक्षणे लुबर्थे विशेषणानां न। लुबन्तस्य तु भवतीत्यर्थः। चञ्चा अभिरूपः। **१३०१ वरणादिभ्यश्च। (४-२-८२)** अजनपदार्थ आरम्भः। वरणानामदूरभवं नगरं वरणाः। **१३०२ शर्कराया वा। (४-२-८३)**

प्रकृतिवद्बहुवचनम्। **गोदौ रमणीयाविति**। गोदयोर्निवासो जनपद इत्यर्थः। अत्र प्रत्ययार्थजनपदस्य तद्विशेषणस्यापि प्रकृतिवद् द्विवचनम्। **पञ्चाला जनपद इति**। जनपदशब्दस्य जातिवाचित्वान्न प्रकृतिवद्बहुवचनम्। **गोदौ ग्राम इति**। अत्र ग्रामशब्दस्य जातिवाचित्वान्न प्रकृतिवद् द्विवचनम्। **हरीतक्यादिषु व्यक्तिरिति**। वार्तिकमिदम्। लुपि लिङ्गं प्रकृतिवद्भवति, न तु वचनमिति शेषः। **हरीतक्याः फलानि हरीतक्य इति**। 'हरितक्यादिभ्यश्च' इति विकारप्रत्ययस्य लुप्। अत्र प्रत्ययार्थेषु फलेषु प्रकृतिवत्स्त्रीलिङ्गमेव भवति, न त्वेकवचनमिति भावः। **खलतिकादिषु वचनम्**। वार्तिकमिदम्। एषु लुपि प्रकृतिवद्वचनमेव भवति, नतु लिङ्गमित्यर्थः। **खलतिकं वनानीति**। 'वरणादिभ्यश्च' इति लुप्। अत्र खलतिकशब्दस्य लुप्तप्रत्यायान्तस्य प्रकृतिवत्पुँल्लिङ्गत्वं न भवति, किन्तु एकवचनमेवेति भावः। **मनुष्यलुपि प्रतिषेध इति**। वार्तिकमिदम्। **मनुष्यलक्षण इति**। मनुष्यात्मके लुप्तप्रत्ययार्थे यानि विशेषणानि तेषां प्रकृतिवल्लिङ्गवचनप्रतिषेध इत्यर्थः। **चञ्चा अभिरूप इति**। चञ्चा तृणमयी प्रतिमा, तत्सदृशो मनुष्यः चञ्चा। 'इवे प्रतिकृतौ' इत्यधिकारे 'संज्ञायाम्' इति कनः 'लुम्मनुष्ये' इति लुप्। अत्र लुप्तप्रत्ययान्तस्य चञ्चाशब्दस्य मनुष्ये वाच्ये प्रकृतिलिङ्गत्वम्, नतु तद्विशेषणस्य अभिरूपशब्दस्येति भावः। **इति युक्तवद्भावप्रकरणम्**। अथ प्रकृतमारभते। **वरणादिभ्यश्च**। 'जनपदे लुप्' इत्युत्तरमिदं सूत्रम्। वरणादिभ्यः परस्य चातुरर्थिकप्रत्ययस्य लुप् स्यादित्यर्थः। पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह—**अजनपदार्थ आरम्भ इति**। **वरणानामिति**। वरणा नाम नदी

स्त एव। पञ्चाला जनपदाः सुभिक्षाः सम्पन्नपानीया इति। **हरीतक्य इति**। 'हरीतक्यादिभ्यश्च' इत्यणो लुप्। तत्र हि 'लुप् च' इत्यतो लुबनुवर्तते। **खलतिकमिति**। 'वरणादिभ्यश्च' इति लुप्। **चञ्चेति**। 'संज्ञायाम्' इति कनो 'लुम्मनुष्ये' इति लुप्। चञ्चा तृणमयः पुमान्। **वरणादि**। चकारोऽनुक्तसमुच्चयार्थः, तेनास्याकृतिगणत्वं सिद्धम्। **वरणा इति**। एवं कटुबदरी, शिरीषाः, गोदौ

अस्माच्चातुरर्थिकस्य वा लुप्स्यात् । १३०३ ठक्छौ च । (४-२-८४) शर्कराया एतौ स्तः । कुमुदादौ वराहादौ च पाठसामर्थ्यात्पक्षे ठच्ककौ । वाग्रहणसामर्थ्यात्पक्षे औत्सर्गिकोऽण् । तस्य लुब्विकल्पः । षड् रूपाणि । शर्करा, शार्करम्, शार्करिकम्, शर्करीयम्, शर्करिकम्, शार्करकम् । १३०४ नद्यां मतुप् । (४-२-८५) चातुरर्थिकः । इक्षुमती । १३०५ मध्वादिभ्यश्च । (४-२-८६) मतुप्स्याच्चातुरर्थिकः । मधुमान् । अनद्यर्थ आरम्भः । १३०६ कुमुदनडवेतसेभ्यो ड्मतुप् । (४-२-८७) कुमुद्वान् । नड्वान् । वेतस्वान् । आद्ययोः 'झयः' (सू १८९८) इति, अन्त्ये 'मादुपधायाः–'

काश्या उत्तरतः प्रसिद्धा । अवयवाभिप्रायं पूजार्थं वा बहुवचनम् । वरणानामदूरभवं नगरं वरणाः । अत्र लुप्प्रत्ययान्तस्य वरणाशब्दस्य नगरे वाच्ये प्रकृतिवत्स्त्रीलिङ्गं बहुवचनं च । **शर्कराया वा** । लुबित्यनुवर्तते । प्रत्यासत्त्या चातुरर्थिकस्येति लभ्यते । तदाह—**अस्मादिति ठक्छौ च** । 'शर्कराया' इत्यनुवर्तते । तदाह— **शर्कराया एतौ स्त इति** । **ठच्ककाविति** । कुमुदादित्वात् ठच् वराहादित्वात् कक् इति विवेकः । **वाग्रहणेति** । अन्यथा तत्र पाठसामर्थ्यादेव ठचः ककश्च लोपविकल्पसिद्धेस्तद्वैयर्थ्यादिति भावः । **शर्करेति** । अणो लुपि युक्तवद्भावे रूपम् । **शार्करमिति** । अणि रूपम् । **शार्करिकमिति** । ठकि रूपम् । **शर्करीयमिति** । छे रूपम् । **शर्करिकमिति** । ठचि रूपम् । **शार्करकमिति** । ककि रूपम् । शर्कराः सन्त्यस्मिन् इत्यर्थः, शर्कराभिः निर्वृत्तमिति वा । **नद्यांमतुप्** । **चातुरर्थिक इति** । शेषपूरणम् । **इक्षुमतीति** । मतुपि उपावितौ । इक्षवः सन्त्यस्मिन् इत्यर्थः । **मध्वादिभ्यश्च** । शेषपूरणेन सूत्रं व्याचष्टे । **मतुप् स्याच्चातुरर्थिक इति** । **मधुमानिति** । मधूनां निवास इत्यर्थः । पूर्वेण सिद्धे किमर्थमिदमित्यत आह—**अनद्यर्थ इति** । **कुमुदनड** । कुमुद नड वेतस एतेभ्यो ड्मतुप् स्यादित्यर्थः । डकार उपौ च इतः । अयं मत्वर्थ एवेति 'न पदान्त–' इति सूत्रभाष्यकैयटयोः स्थितम् । **कुमुद्वानिति** । कुमुदा अस्मिन् सन्तीति विग्रहः । ड्मतुपि डित्त्वात् टिलोपः । **नड्वानिति** । नडा अस्मिन् सन्तीति विग्रहः । कुमुद्वान्कुमुदप्राये इत्यमरः । **वेतस्वानिति** । वेतसा अस्मिन् सन्तीति विग्रहः । **आद्ययोरिति** । कुमुद्वच्छब्दे नड्वच्छब्दे च 'झयः' इति मतुपो मस्य वकारः । वेतस्व-

---

खलतिकमित्यादीन्युदाहर्तव्यानि । **कुमुद** वत्त्वस्यासिद्धत्वात्तस्मिन्कर्तव्ये टिलोपो न स्थानि-

---

१ 'शर्कराणां निवास इत्यर्थः' इति क-ख । २ 'इक्षूणां निवास इत्यर्थः' इति क-ख ।

(१८१७) इति वक्ष्यमाणेन वः। 'महिषाच्चेति वक्तव्यम्' (वा २७६१) महिष्मान्नाम देशः। १३०७ **नडशादाड्ड्वलच्** । (४-२-८८)

च्छब्दे तु 'मादुपधायाः–' इति मस्य वकार इत्यर्थः। वस्तुतस्तु नड्वच्छब्देऽपि 'झयः' इत्यस्यासिद्धत्वात् 'मादुपधायाः–' इत्येव न्याय्यम्, 'प्रकरणे प्रकरणमसिद्धम, नतु एकस्मिन्नेव प्रकरणे पूर्वयोगं प्रति परस्यासिद्धत्वम्' इत्यस्य 'उपसर्गादसमासे–' इति सूत्रभाष्ये दूषितत्वात्। वेतस्वानित्यत्र रुत्वं तु न, अल्लोपस्य स्थानिवत्त्वात्। 'न पदान्त–' इति निषेधस्तु न, पदे अन्त इति विगृह्य पदे परतश्चरमावयवे कर्तव्ये परपदस्थाजादेशस्यैव तन्निषेधप्रवृत्तेर्भाष्याभ्युपगतत्वात्। 'पूर्वत्रासिद्धे न स्थानिवत्' इति निषेधोऽपि न, पदे अन्त इति विगृह्य तत्र स्थानिवत्त्वनिषेधव्यावृत्तिसाधनपरभाष्यप्रामाण्येन पदचरमावयवकार्यविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणादिति शब्देन्दुशेखरे विस्तरः। महिषाच्चेत्यनन्तरं तु ड्मतुबिति शेषः। **महिष्मानिति।** महिषा अस्मिन् सन्तीति विग्रहः। डित्त्वाट्टिलोपः। अल्लोपस्य स्थानिवत्त्वान्न जश्त्वम्।

वदित्याशयेनाह—**झय इति।** नड्वानित्यत्रापि परत्वाद् 'झयः' इत्यनेनैव वकारो न तु 'मादुपधायाः–' इत्यनेनेति भावः। न चासिद्धत्वात् 'मादुपधायाः–' इत्येव तत्र न्याय्यमिति वाच्यम्, 'प्रकरणे प्रकरणमसिद्धम्, न तु योगे योगः' इति 'उपसर्गादसमासेऽपि–' इत्यत्र भाष्ये निर्णीतत्वात्। ननु वेतस्वानित्यत्र वेतसशब्दस्य सुबन्तत्वेन पदत्वाद् ड्मतुपो डित्त्वसामर्थ्याट्टिलोपे एकदेशविकृतन्यायेन पदत्वात्सस्य रुत्वं स्यात्। न च स्थानिवत्त्वेन निर्वाहः, पूर्वत्रासिद्धे तन्निषेधादिति चेत्, मैवम्, अन्तरङ्गं रुत्वं प्रति बहिरङ्गस्य टिलोपस्यासिद्धत्वात्। न च षाष्ठी बहिरङ्गपरिभाषा त्रैपादिकं न जानातीति वाच्यम्, कार्यकालपक्षाभ्युपगमात्। नन्वेवमपि 'स्वादिषु–' इति सान्तस्य पदत्वे तदाश्रयरुत्वस्यान्तरङ्गत्वाभावाद्बहिरङ्गपरिभाषा न प्रवर्तेत इति रुत्वं दुर्वारमेव। न च 'नद्यां मतुप्' इति चतुरर्थ्यां मतुपो विधानाच्चातुरर्थिको ड्मतुप् मत्वर्थीय इति 'तसौ मत्वर्थे' इत्यनेन भत्वं शक्यम्, टिलोपस्य स्थानिवत्त्वात्। न च पदत्वेऽप्येवम्, तस्य रुत्वविधिना सह कार्यकालतया 'पूर्वत्रासिद्धे न–' इति निषेधात् इति चेत्—अत्राहुः—पदसंज्ञायां यथोद्देशपक्षाश्रयणात् 'पूर्वत्रासिद्धे न–' इति निषेधाप्रवर्तनात्स्थानिवत्त्वप्रवृत्त्या सान्तस्यापदत्वादिति। एतेन घटी आमलकीत्यत्र 'स्वादिषु–' इति पदत्वाज्जश्त्वं स्यात्, औरसीत्यत्र तु संयोगान्तलोपः स्यादिति शङ्कापि परास्तेति दिक्। ननु प्रक्रियालाघवाय ड्वतुबेव विधीयताम्, अथवा 'कुमुदनडवेतसेभ्यो डित्' इति प्रकृतस्य मतुपो डित्त्वमतिदिश्यताम्, किमनेन ड्मतुब्विधानेन। सत्यम्, अन्यतो विधानार्थं तत्। तत्सिद्धार्थकथनपरं वार्तिकमाह—**महिषाच्चेति।**

नड्वलः । 'शादो जम्बालघासयोः' इत्यमरः । शाद्वलः । **१३०८ शिखाया वलच् । (४-२-८९)** शिखावलम् । **१३०९ उत्करादिभ्यश्छः । (४-२-९०)** उत्करीयः । **१३१० नडादीनां कुक्च । (४-२-९१)** नडकीयम् । 'कुञ्चा ह्रस्वत्वं च' (ग सू ८०) । कुञ्चकीयः । 'तक्षन्नलोपश्च' (ग सू ८१) तक्षकीयः । **१३११ बिल्वकादिभ्यश्छस्य लुक् । (६-४-१५३)** नडाद्यन्तर्गता बिल्वकादयः, तेभ्यश्छस्य लुक्तद्धिते परे । बिल्वा यस्यां सन्ति सा बिल्वकीया । तस्यां भवा बैल्वकाः । वेत्रकीयाः, वैत्रकाः । 'छस्य' किम्-छमात्रस्य लुग्यथा स्यात्कुको निवृत्तिर्मा भूत् । अन्यथा

'प्रत्यये भाषायां नित्यम्' इति तु न, तस्य सवर्णे परतो विधेः । न हि षकारसवर्णोऽनुनासिकोऽस्ति । **नडशादाड्ड्वलच् । नड्वल इति ।** ङित्वाट्टिलोपः । **शाद्वल- इति ।** शादा अस्मिन् सन्तीति विग्रहः । शादो दन्त्योपधः । डोपध इत्यन्ये । 'नडप्राये नड्वान्नड्वल इत्यपि' इत्यमरः । 'शाद्वलः शादहरिते ' इति च । **शिखाया वलच् ।** निर्वृत्ताद्यर्थे सूत्रं देशे तन्नाम्नि अणो बाधनार्थं च । 'दन्तशिखात्संज्ञायाम्' इति पञ्चमे वक्ष्यमाणं तु अदेशेऽपि शिखावल इति रूपार्थम् । **उत्करादिभ्यश्छः ।** चातुरर्थिक इति शेषः । **उत्करीय इति ।** देशविशेषोऽयम् । उत्करेण निर्वृत्तमिति वा, तस्य निवासः, तस्य अदूरभव इति वा । **नडादीनां कुक्च ।** नडादिभ्यः छः स्यात् चातुरर्थिकः प्रकृतेः कुक् च । **कुञ्चा- ह्रस्वत्वं चेति !** नडादिगणसूत्रम् । कुञ्चाशब्दाच्छः, प्रकृतेः कुक्, आकारस्य ह्रस्वश्च । **कुञ्चकीय इति ।** कुञ्चा अस्मिन् सन्तीत्यादिविग्रहः । **तक्षन्नलो- पश्च ।** इदमपि गणसूत्रम् । तक्षन्शब्दात् छः, कुक्, नकारस्य लोपश्च । **बिल्वकादिभ्यश्छस्य लुक् ।** षाष्ठमिदं सूत्रम् । बिल्वकादीति नडाद्यन्तर्गतबिल्वादीनां कृतकुगागमानां निर्देशः । ककारादकार उच्चारणार्थः । **तद्धित इति ।** 'आपत्यस्य च तद्धिते-' इत्यतस्तदनुवृत्तेरिति भावः । **बिल्वकीयेति ।** 'नडादीनां कुक् च' इति छः । प्रकृतेः कुक् च । **तस्यां भवा बैल्वका इति ।** बिल्वकीयाशब्दाद्भवार्थे अण्, तस्मिन्परे छस्य लुगिति भावः । **वेत्रकीया इति ।** वेत्राणि अस्यां सन्तीत्यर्थे नडादित्वाच्छः, प्रकृतेः कुक् च इति भावः । **वैत्रका**

शिखाया । निर्वृत्ताद्यर्थे देशे तन्नाम्न्यणो बाधनार्थं चेदम् । 'दन्तशिखात्संज्ञायाम्' इति पञ्चमे वक्ष्यमाणं त्वदेशेऽपि शिखावल इति रूपसिद्ध्यर्थम् । **नडादीनाम् ।** नड प्लक्ष बिल्व वेणु वेत्र वेतसादयो नडादयः । नडाद्यन्तर्गणसूत्रमाह **कुञ्चेति ।** एवं तक्षन्नित्यपि । उभयत्रापि षष्ठ्याः सौत्रो लुक् । **बिल्वका** 'ढे लोप-' इत्यतो लोप

'सन्नियोगशिष्टानाम्-' (प ८७) इति कुगपि निवर्तेत । लुग्ग्रहणं सर्वलोपार्थम् । लोपो हि यमात्रस्य स्यात् ।

इति तद्धितेषु चातुरर्थिकप्रकरणम् ।

अथ तद्धितेषु शैषिकप्रकरणम् । २८ ।

१३१२ शेषे । (४-२-९२) अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषः, तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । उलूखले क्षुण्ण औलूखलो यावकः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं

इति । वेत्रकीयायां भवा इत्यर्थः । वेत्रकीयाशब्दाद् अणि छस्य लुगिति भावः । **छस्य किमिति** । एभ्यः परस्य छस्यैव संभव इति प्रश्नः । **संनियोगेति** । 'संनियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति न्यायेनेत्यर्थः । ननु 'ढे लोपोऽकद्र्वाः' इत्यतो लोप इत्यनुवृत्त्यैव सिद्धे लुग्ग्रहणं किमर्थमित्यत आह— **लुग्ग्रहणं सर्वलोपार्थमिति** । प्रत्ययादर्शनस्यैव लुक्शब्दार्थत्वात् कृत्स्नस्य ईयस्य लोपो लभ्यत इति भावः । लोपविधौ तु नैवं लभ्यत इत्याह—**लोपो हीति** । लोपविधौ, 'सूर्यतिष्य-' इत्यतः 'य उपधायाः' इत्यनुवृत्तौ बिल्वकादिभ्यः परस्य छादेशभूतस्य ईयस्य उपधाभूतो यकारः, तस्य लोप इत्यर्थलाभाद्यकारमात्रस्य लोपः स्यात् । 'य उपधायाः' इत्यननुवृत्तौ तु 'आदेः परस्य' इति ईकारस्यैव लोपः स्यादिति भावः ।

इति तद्धितेषु चातुरर्थिकप्रकरणम् ।

अथ शैषिकप्रकरणं निरूप्यते । शेषे । **अणादय इति** । 'प्राग्दीव्यतोऽण्' इत्यादिसाधारणाः प्रत्यया इत्यर्थः । **चतुर्भिरिति** । अश्वादिभिरिति शेषः । **चतुर्दश्यामिति** । कृष्णचतुर्दश्यां रात्रौ रक्षांसि दृश्यन्ते इत्यागमः ।

इत्यनुवर्तमाने लुग्ग्रहणं व्यर्थमित्याशङ्क्याह—**सर्वलोपार्थमिति** । **यमात्रस्येति** । न च 'आदेः परस्य' इतीकारस्य भाव्यमिति वाच्यम् । 'सूर्यतिष्य-' इत्यतो यकारसम्बद्धस्यैव लोपस्यानुवर्तनादिति भावः ॥

इति चातुरर्थिकप्रकरणम् ॥

स्वः। 'शेषे' इति लक्षणं चाधिकारश्च। 'तस्य विकारः' इत्यतः प्राक्शेषाधिकारः।
१३१३ राष्ट्रावारपाराद्धखौ। (४-२-९३) आभ्यां क्रमाद्धखौ स्तः शेषे।

लक्षणमिति। प्रदर्शितेषु ग्रहणाद्यर्थेषु उत्तरसूत्रैरनुपात्तेषु अणादिविधायकमित्यर्थः। अधिकारत्वे तु उत्तरसूत्रेष्वेवानुवृत्तिलाभादिदं न सिध्येदिति भावः। **अधिकारश्चेति।** उत्तरसूत्रेष्वनुवृत्त्यर्थश्चेत्यर्थः, स्वरितत्वादिति भावः। अधिकारस्योत्तरावधिमाह—**तस्य विकार इत्यतः प्रागिति।** नच उत्तरसूत्रेषु निर्दिष्टानामर्थविशेषाणाम् अपत्यादिचतुरर्थ्यन्तादन्यत्वस्य सिद्धत्वात् शेषाधिकारो व्यर्थ इति वाच्यम्, 'तस्येदम्' इत्यादावपत्यादिचतुरर्थ्यन्तार्थानां ग्रहणाभावाय तदावश्यकत्वात्। न च प्रदर्शितेषु ग्रहणाद्यर्थेषु 'तस्येदम्' इत्येव अणादिसिद्धेः शेष इत्यस्य विधित्वं नाश्रयणीयमिति वाच्यम्, 'शैषिकान्मतुबर्थीयात्—' इत्यादौ प्रदर्शितग्रहणाद्यर्थकानामपि ग्रहणलाभाय तदावश्यकत्वात्। इदंत्वेन भासमानमपत्याद्यपि न शेषः, 'इदंविशेषा ह्येते अपत्यं समूहो विकारो निवासः' इति भाष्यात्। प्रपञ्चितं चैतत् 'तस्यापत्यम्' इत्यत्र 'तस्येदमित्यपत्येऽपि' इत्यादिश्लोकवार्तिकव्याख्यावसरे। **राष्ट्रावारपाराद्धखौ। आभ्यामिति।** राष्ट्रशब्दादवारपारशब्दाच्चे-

---

शेषे। लक्षणं चेति। ग्रहणचुरणादिष्वर्थेषूत्तरसूत्रानुपात्तेष्वेषु अणो विधायकमित्यर्थः। ननु लक्षणं तावद्व्यर्थम्, 'तस्येदम्' इत्यनेन चाक्षुषादीनाम्, 'संस्कृतं भक्षाः' इत्यनेन दार्षदादीनां सिद्धेः। तथा अधिकारोऽपि व्यर्थः। तथाहि अधिकारस्यापत्यादिचतुरर्थीपर्यन्तेष्वर्थेषु घादीनां टयुट्युलन्तानां निवृत्तिः, जाताद्यर्थसाकल्यं वा प्रयोजनम्। तत्र निवृत्तिस्तावन्न प्रयोजनम्। आर्द्रकशालादीनामुत्करादिपाठेन 'इतः प्राचीनेष्वर्थेषु घादयो न प्रवर्तन्ते' इति ज्ञापनात्। अन्यथा 'वृद्धाच्छः' इत्येव सिद्धे तत्पाठस्य वैयर्थ्यप्रसङ्गात्। नाप्यसाकल्यं प्रयोजनम्, जाताधिकारात्प्राक्पाठसामर्थ्यादेव तल्लाभात्। यदि संनिहिते जातार्थ एव घादयः स्युः, तदुत्तरेषु भवाद्यर्थेषु 'प्राग्दीव्यतः' इति विशिष्टावधिपरिच्छिन्नेष्वर्थेषु विधीयमानाऽणादय एव स्युस्तदा जाताधिकारानन्तरमेव 'प्रावृषष्ठप्' इत्यादिभिः सह 'राष्ट्रावारपारात्–' इत्यादयोऽपि पठ्येरन्। तस्माद्व्यर्थमिदं सूत्रमिति चेत्। अत्रोच्यते—'शैषिकात्सरूपः शैषिको न' इति वक्ष्यमाणार्थस्य विषयलाभाय शेषाधिकार आवश्यकः। शैषिकत्वप्रयुक्तकार्यविशेषं ज्ञापयितुं क्रियमाणः शेषाधिकार एव 'शैषिकान्मतुबर्थीयात्' इत्यादिश्लोकं ज्ञापयति। एष च श्लोकः सन्विधौ मतुब्विधौ च भाष्ये पठितः। इह तु समन्ते पठित इति तत्रैव व्याख्यास्यते। अपत्यादिष्वर्थेषु घादीनां निवृत्त्यर्थमप्यधिकार आवश्यकः। न चोक्तज्ञापकेनैव तत्सिद्धिरिति वाच्यम्, ज्ञापकस्य विशेषापेक्षत्वे

राष्ट्रियः। अवारपारीणः 'अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्' (वा २७७१-२७७२)। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषाद्धादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते, तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते। **१३१४ ग्रामाद्यखञौ।** (४-२-९४) ग्राम्यः, ग्रामीणः। **१३१५ कत्र्यादिभ्यो ढकञ्।** (४-२-९५) कुत्सितास्त्रयः कत्त्रयः। तत्र जातादिः कात्त्रेयकः। नागरेयकः। 'ग्रामात्' इत्यनुवृत्तेर्ग्रामेयकः।

त्यर्थः। **राष्ट्रिय इति।** राष्ट्रे जातो भव इत्यादिरर्थो यथायोगं बोध्यः। घस्य इयः। **अवारपारीण इति।** खस्य ईनादेशः, णत्वम्। **अवारपाराद्विगृहीतादपीति।** अवारशब्दात्पारशब्दाच्च पृथग्भूतादपि खो वक्तव्य इत्यर्थः। **विपरीताच्चेति।** पारावारशब्दादपीत्यर्थः। ननु राष्ट्रावारपारेत्यारभ्य 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इत्यन्तैः सूत्रैः राष्ट्रादिशब्देभ्यः प्रकृतिभ्यः शेषेऽर्थे प्रत्यया विहिताः। तस्यापत्यमित्यादिवदर्थविशेषास्तु न निर्दिश्यन्ते। यत्किञ्चिद्विभक्त्यन्तेभ्यो राष्ट्रादिप्रकृतिविशेषेभ्यो घादयष्ट्युट्युलन्ताः प्रत्ययाः स्युः, 'समर्थानां प्रथमाद्वा' इत्यस्यानुपस्थित्या प्रथमोच्चारितविभक्तिविशेषानुपस्थितेः। किंच 'तत्र जातः' इत्यादिसूत्रेषूत्तरेषु अर्थविशेषा एव निर्दिष्टाः। तत्र प्रथमोच्चारितसप्तम्यन्तादित्तद्विभक्त्यन्तेभ्यः सर्वेभ्यः साधारणा अणादय एव स्युः। तत्राह—**इह प्रकृतीत्यादिना।** राष्ट्रावारेत्यादिसूत्राणां प्रकृतिविशेषेभ्यः केवलप्रत्ययविधीनां अर्थविशेषविभक्तिविशेषाकाङ्क्षायां 'तत्र जातः' इत्यादिसूत्राणां च केवलमर्थविशेषनिर्देशपराणां 'समर्थानाम्—' इति सूत्रलब्धतत्तद्विभक्तिकप्रकृतिविशेषाणां विधेयप्रत्ययविशेषाकाङ्क्षायां परस्परमेकवाक्यत्वे सति तत्र जात इत्याद्यर्थेषु प्रथमोच्चारिततत्तद्विभक्त्यन्तेभ्यो राष्ट्रादिशब्देभ्यो घादयष्ट्युट्युलन्ताः प्रत्ययाः स्युरिति लभ्यत इति भावः। राष्ट्रान्याभ्यस्तु प्रकृतिभ्यो जाताद्यर्थेषु अणादयः साधारणा भवन्त्येव। **ग्रामाद्यखञौ। ग्राम्य इति।** यप्रत्यये 'यस्येति च' इति लोपः। **ग्रामीण इति।** खञ ईनादेशः, णत्वम्। **कत्र्यादिभ्यो ढकञ्। कत्त्रय इति।** 'कुगतिप्रादयः' इति कुशब्दस्य समासः। 'त्रौ च' इति

दोषतादवस्थ्यात्। 'आर्द्रकादिभ्यो यदि ञः स्यात्तर्हि चतुरर्थ्यामिव' इति नियमस्यापि सम्भवाच्च। एवं स्थिते चाक्षुषमित्यादिषु गृह्यमाणत्वादिप्रकारकबोधनाय विधायकत्वमपि तस्य सुवचमिति दिक्। **विगृहीतादपीत्यादि।** वचनमेवेदम्, सूत्रे यथासंख्यप्रवृत्त्यर्थं विशिष्टोच्चारणात्। **कुत्सितास्त्रय इति।** इह बहुव्रीहिरपि सुवचः। इहैव निपातनात्कोः कद्भावः। 'कद्भावे त्रावुपसंख्यानम्' इति तु प्रत्या-

१३१६ कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । (४-२-९६) कौलेयकः श्वा । कौलोऽन्यः । कौक्षेयकोऽसिः । कौक्षोऽन्यः । ग्रैवेयकोऽलङ्कारः । ग्रैवोऽन्यः । **१३१७ नद्यादिभ्यो ढक् । (४-२-९७)** नादेयम् । माहेयम् । वाराणसेयम् । **१३१८ दक्षिणापश्चात्पुरसस्त्यक् । (४-२-९८)** 'दक्षिणा' इत्याजन्तमव्ययम् । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः । **१३१९ कापिश्याः ष्फक् । (४-२-९९)** कापिश्यां जातादि कापिशायनं मधु । कापिशायनी द्राक्षा । **१३२० रङ्कोरमनुष्येऽण् च । (४-२-१००)** चात्ष्फक् । राङ्कवो

कोः कदादेशः । **कात्त्रेयक इति** । ढकञ्, ढकारस्य एयादेशः 'लोपो व्योः–' इति यलोपः । **अनुवृत्तेरिति** । स्वरितत्वादिति भावः । तथा च ग्रामशब्दाद् ढकञपि लभ्यत इत्यर्थः । **कुलकुक्षि** । कुलाच्छुनि, कुक्षेः असौ, ग्रीवाया अलंकारे ढकञित्यर्थः । **कौलेयकः श्वेति** । कुले जातादिरिति विग्रहः । **कौक्षेयकोऽसिरिति** । कुक्षौ कोशे भवः खड्ग इत्यर्थः । **ग्रैवेयक इति** । ग्रीवासु भव इति विग्रहः । **नद्यादिभ्यो ढक् । माहेयमिति** । मही भूमिः, तस्यां जातादीत्यर्थः । **वाराणसेयमिति** । वाराणस्यां जातादीत्यर्थः । **दक्षिणापश्चात् । आजन्तमव्ययमिति** । अव्ययसाहचर्यादाजन्तं गृह्यत इति भावः । दक्षिणा, पश्चात्, पुरस् एभ्योऽव्ययेभ्यो जाताद्यर्थेषु त्यक्प्रत्ययः स्यादित्यर्थः । **कापिश्याष्ष्फक्** । कापिश्याः ष्फक् इति छेदः । कापिशीशब्दात् ष्फक् स्यादित्यर्थः । कापिशी नाम देशविशेषः । **कापिशायनी द्राक्षेति** । षित्वाद् ङीष् । **रङ्कोरमनुष्येऽण च** ।

ख्येयम् । **'कुल्याया यलोपश्च'** इति गणसूत्रम् । कुल्यायां जातः कौलेयकः । कत्त्रि, उम्भि, कुण्डिन, माहिष्मतीत्यादि । **दक्षिणापश्चात् । अव्ययमिति** । साहचर्यादिति भावः । एवं च दाक्षिणात्य इत्यत्र 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवद्भावाशङ्कैव नास्तीति बोध्यम् । **पाश्चात्त्य इति** । कथं तर्हि 'पश्चात्तनैः कश्चन नुद्यमानः' इति न च दिग्देशवाचिनि पश्चाच्छब्दे सावकाशं त्यकं कालवाचकात् ट्युट्युलौ बाधेते परत्वादिति वाच्यम्, 'अग्रादिपश्चात्–' इति डिमचा ट्युट्युलोर्बाधस्य दुर्वारत्वात् । सत्यम्, पश्चात्तन्वन्ति पश्चात्तना इति कथंचित्समाधेयम् । **कापिश्याः ष्फक्** । कापिशीशब्दात्ष्फक् स्यात् । षित्वान्ङीष्; तदाह—**कापिशायनीति । रङ्कोरमनुष्ये** । रङ्कवो जनपदः, ततः 'प्राग्दीव्यतोऽण्' इत्यण् प्राप्तः । तद्बाधकत्वेन 'अवृद्धादपि–' इति वुञ् प्राप्तः, तमपि बाधित्वा 'आदेशे' इति ढञ् प्राप्तः, तस्य तु 'कोपधादण्' बाधकः, ततोऽपि परत्वात्कच्छाद्यणि प्राप्तेऽनेन ष्फगणौ विधीयेते । कोपधत्वादेवाणि सिद्धे कच्छादिषु रङ्कुशब्दस्य पाठो मनुष्यतत्स्थयोर्वुञ्-

गौः। राङ्कवायणः। 'अमनुष्ये' इति किम्—राङ्कवको मनुष्यः। **१३२१ द्युप्रागपागुदक्प्रतीचो यत्। (४-२-१०१)** दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्। **१३२२ कन्थायाष्ठक्। (४-२-१०२)** कान्थिकः। **१३२३ वर्णौ वुक्। (४-२-१०३)** वर्णुसमीपदेशो वर्णुः।

रङ्कोरण् स्यात् चात् ष्फक्। **राङ्कवो गौरिति।** रङ्कुर्नाम देशविशेषः, तत्र जातादिरित्यर्थः। **राङ्कवको मनुष्य इति।** अत्र मनुष्यत्वात् ष्फगणौ। किन्तु 'मनुष्यतत्स्थयोः—' इति वक्ष्यमाणो वुञ्। अकादेशः। राङ्कवो मनुष्य इति त्वपपाठः। **द्युप्रागपाक्।** दिव्, प्राञ्च्, अपाञ्च्, उदञ्च्, प्रत्यञ्च् एभ्यो यत्स्यादित्यर्थः। सूत्रे 'दिव उत्' इत्युत्त्वेन निर्देशः। **दिव्यमिति।** दिवि जात इत्यर्थः। **प्राच्यमिति।** प्राचि प्रदेशे जातादीत्यर्थः। तद्धितोत्पत्तौ सुब्लुकि प्राञ्च् य इति स्थिते 'अनिदिताम्—' इति नलोपे 'अचः' इत्यकारलोपे 'चौ' इति दीर्घे प्राच्यमिति रूपम्। **अपाच्यमिति।** इदमपि पूर्ववत्। **उदीच्यमिति।** अत्र 'उद ईत्' इति ईत्त्वं विशेषः। **प्रतीच्यमिति।** प्राच्यवद्रूपम्। **कन्थायाष्ठक्।** तिर्यक्स्यूतबहुवस्त्रखण्डसमूहः कन्था। देशविशेष इत्यन्ये। **वर्णौ वुक्। वर्णुसमीपेति।** वर्णुर्नाम सिन्धुनदः, तस्यादूरभव इत्यर्थे सुवास्त्वादित्वादणो 'जनपदे लुप्' इति

विधानार्थं इति कैयटः। अतएवाह—**राङ्कवको मनुष्य इति।** क्वचित्तु राङ्कव इति पठ्यते, स तु लेखकप्रमादः। स्यादेतत्—अमनुष्यग्रहणमिह व्यर्थम्। अपवादेन वुञा तत्र ष्फगणोर्बाधेनामनुष्य एव पर्यवसानात्। अणग्रहणमपि व्यर्थमेव, कच्छादित्वादेव तत्सिद्धेः। अत्राह काशिकाकृत्—नायं प्रसज्यप्रतिषेधः किं तु पर्युदासः, तेन मनुष्यभिन्ने प्राणिन्येव ष्फग्विधीयत इति, राङ्कवः कम्बल इत्यत्र न ष्फक्। विशेषविहितेन ष्फका अणो बाधा मा भूदित्यणग्रहणं च क्रियत इति। भाष्ये तु अप्राणिन्यपि ष्फकमङ्गीकृत्येदं द्वयमपि प्रत्याख्यातम्। **द्युप्रागपा। दिव्यमिति।** सूत्रे 'दिव उत्' इत्युत्त्वेन निर्देश इति भावः। अपाची दक्षिणा दिक्। द्वितीयो वर्णः पकारो, न तु दन्त्योष्ठ्यः, 'यदिन्द्र प्रागपागुदक्' इत्यादौ तथा दर्शनादिति स्थितं मनोरमायाम्। केचित्तु 'प्राच्यवाचीप्रतीच्यस्ताः' इत्यमरकोशे अवाचीति दन्त्योष्ठ्यपाठं क्वाचित्कं पुरस्कृत्य सूत्रेऽपि 'अवाक्' इति पठित्वा अवाच्यमित्युदाहरन्ति। 'प्रागपाक्' इति वेदे तु व्यत्ययेन वकारस्य पकार इति तेषामाशयः। प्रागादयोऽस्तात्यन्ता अव्ययाः, तद्भिन्नास्त्वनव्ययाः, उभयेषामपीह ग्रहणमविशेषात्। कथं तर्हि 'संस्काराः प्राक्तना इव' इति। अत्राहुः—कालवाचिनः प्राक्शब्दाद्यतं बाधित्वा परत्वात् ट्युट्युलौ बोध्याविति। **वर्णौ वुक्। वर्णुरिति।** 'अदूरभवश्च' इत्यर्थे सुवास्त्वादित्वादणि

तद्विषयार्थवाचिकन्थाशब्दाद् वुक्स्यात् । 'यथा हि जातं हिमवत्सु कान्थकम्'। १३२४ अव्ययात्त्यप्। (४-२-१०४) 'अमेहक्वतसित्रेभ्य एव' (वा २७७९) 'अमान्तिकसहार्थयोः' । अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । परिगणनं किम्—उपरिष्टाद्भवः औपरिष्टः । 'अव्ययानां भमात्रे टिलोपः' (वा ४१८७) । अनित्योऽयं बहिषष्टिलोपविधानात्। तेनेह न—आरातीयः। शाश्वतीयः। 'त्यब्नेर्ध्रुव इति वक्तव्यम्' (वा २७८०)। नित्यः। 'निसो गते' (वा २७८१)। १३२५ ह्रस्वात्तादौ तद्धिते। (८-३-१०१) ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते। निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः। 'अरण्याण्णः' (वा २७८२) आरण्याः सुमनसः। 'दूरादेत्यः' (वा २७८३)

लुप्। तथा च वर्णुसमीपदेशो वर्णुः, तस्मिन् या कन्था तद्वाचकात् वुक्प्रत्यय इति यावत्। **अव्ययात्त्यप्। अमेहेति।** अमा, इह, क्व, तसि, त्र—एभ्य एव अव्ययेभ्यः त्यप्प्रत्यय इति परिगणनवार्तिकमिदम्। **अमात्य इति।** समीपे सह वा जात इत्यर्थः। **औपरिष्ट इति।** उपरिष्टादित्यव्ययस्य परिगणितेष्वनन्तर्भावाद् न त्यप्। अणि औपरिष्ट इति रूपमित्यर्थः। कथमिह टिलोप इत्यत आह—**अव्ययानामिति।** वार्तिकमिदम्। **भमात्र इति।** कार्त्स्न्ये मात्रशब्दः। कृत्स्नस्य भस्याव्ययस्य टेर्लोपः। 'नस्तद्धिते' इत्याद्युपाधिर्नापेक्षित इत्यर्थः। नन्वेवं सति आरादित्यव्ययात् छस्य ईयादेशे टिलोपे आरीय इति स्यादित्यत आह—**अनित्योऽयमिति। त्यब्नेरिति।** नि इत्यव्ययात् त्यप् स्याद् ध्रुवे गम्ये इत्यर्थः। 'नियतं भवं नित्यम्' इति भाष्यम्। **निसो गते इति।** निस् इत्यव्ययात् त्यब् वक्तव्यो गते गम्ये इत्यर्थः। निस् त्य इति स्थिते सकारस्य पदान्तत्वादादेशप्रत्ययावयवत्वाभावाच्च षत्वे अप्राप्ते। **ह्रस्वात्तादौ।** इण्कोरित्यत इण्ग्रहणमनुवर्तते। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'अपदान्तस्य मूर्धन्यः' इत्यतः 'मूर्द्धन्यः' इति च, तदाह—**ह्रस्वादिण इति। निष्ट्य इति।** त्यपि सस्य षत्वे तकारस्य ष्टुत्वेन टः। **अरण्याण्ण इति।** वक्तव्य इति शेषः। **आरण्याः सुमनस इति।** 'स्त्रियः सुमनसः पुष्पम्' इत्यमरः। अरण्ये भवा इत्यर्थे णप्रत्यये टापि आरण्या इति रूपम्। अणि तु ङीप् स्यादिति भावः।

'जनपदे लुप्' इति लुप्। **अमात्य इति।** अमाशब्दः समीपवाची स्वरादिः। अमा समीपे भव इत्यर्थः। **ह्रस्वात्तादौ।** पदान्तत्वात्षत्वस्याप्राप्तावयमारम्भः। आदिग्रहणं तु व्यर्थं 'यस्मिन्विधि—' इत्येव सिद्धेः। ह्रस्वात्किम्, गीस्तराम्। धूस्तराम्। तादौ किम्, सर्पिःसाद्भवति। तद्धिते किम्, सर्पिस्तरति। **तिङन्तस्य प्रतिषेधो**

दूरेत्यः। 'उत्तरादाहञ्' (वा २७४४)। औत्तराहः। १३२६ ऐषमोह्यःश्वसोऽन्यतरस्याम्। (४-२-१०५) एभ्यस्त्यब्वा। पक्षे वक्ष्यमाणौ ट्युट्युलौ। ऐषमस्त्यम्, ऐषमस्तनम्। ह्यस्त्यम्, ह्यस्तनम्। श्वस्त्यम्, श्वस्तनम्। पक्षे शौवस्तिकं वक्ष्यते। १३२७ तीररूपोत्तरपदादञ्ञ्यौ। (४-२-१०६) यथासंख्येन। काकतीरम्। पाल्वलतीरम्। शैवरूप्यम्। तीररूपान्ताद् इति नोक्तम्। बहुच्पूर्वान्मा भूत्। बाहुरूपम्। १३२८ दिक्पूर्वपदादसंज्ञायां

दूरादेत्य इति। वक्तव्य इति शेषः। **दूरेत्य इति**। दूरादागतः, दूर भव इति वार्थः। दूरादित्यव्ययाद् एत्यप्रत्यये 'अव्ययानां भमात्रे-' इति टिलोपः। **उत्तरादाहञिति**। वाच्य इति शेषः। **औत्तराह इति**। उत्तरस्मादागतः उत्तरस्मिन् भव इति वार्थः। औत्तर इति त्वसाधु। **ऐषमोह्यः। एभ्य इति**। ऐषमस्, ह्यस्, श्वस् एतेभ्य इत्यर्थः। **वक्ष्यमाणाविति**। 'सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' इत्यनेनेति शेषः। **ऐषमस्त्यमिति**। ऐषमस् इत्यव्ययं वर्तमाने संवत्सरे वर्तते, तत्र भवमित्यर्थः। 'परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति।' इत्यमरः। **ऐषमस्तनमिति**। ट्युट्युलौ वा। टावितौ, य्वोरनादेशः, तस्य तुट्, ट इत्, उकार उच्चारणार्थः, टित्वादाद्यवयवः। **ह्यस्त्यं—ह्यस्तनमिति**। ह्यस् इत्यव्ययं गतेऽह्नि तत्र भवमित्यर्थः। **श्वस्त्यम्, श्वस्तनमिति**। श्वस् इत्यव्ययमनागतेऽह्नि। तत्र भवमित्यर्थः। 'ह्यो गतेऽनागतेऽह्नि श्वः' इत्यमरः। **पक्ष इति**। 'श्वसस्तुट् च' इति ठञि तस्य इकादेशे तुडागमे 'द्वारादीनां च' इत्यैजागमे शौवस्तिकमित्यपि वक्ष्यमाणं रूपमित्यर्थः। **तीररूप**। तीरोत्तरपदाद् रूपोत्तरपदाच्च क्रमादञ्ञ्यश्चेत्यर्थः। **काकतीरमिति**। काकतीरे[1] भवमित्यर्थः। **पाल्वलतीरमिति**। पल्वलतीरे भवमित्यर्थः। **शैवरूप्यमिति**। शिवरूपे भवमित्यर्थः। रूप्योत्तरपदेति क्वचित्पाठः। तथा सति ञ्यप्रत्यये 'यस्येति च' इत्यकारलोपे द्वियकारं रूपम्। **बाहुरूपमिति**। 'विभाषा सुपो बहुच् पुरस्तात्तु' इति बहुपूर्वस्य रूपान्तत्वेऽपि तदुत्तरपदकत्वाभावान्न ञ्य इति भावः। **दिक्पूर्वपदात्**। पञ्चम्यर्थे सप्तमी। असंज्ञाभूताद् दिक्पूर्वपदकाद्

वाच्यः। भिन्नमुत्तराम्। **दूरेत्य इति**। दूरादागत इत्यादिरर्थः। **औत्तराह इति**। इहाद्युदात्तत्वं स्त्रियां टाप् च बोध्यः। यदा तु 'उत्तराच्च' इत्याहिप्रत्यये ततोऽण् क्रियते 'अमेह-' इति परिगणनेन त्यपोऽभावात् तदा औत्तराहशब्दोऽन्तोदात्तः, स्त्रियां ङीप् च विशेषः। **वक्ष्यमाणाविति**। 'सायंचिरम्-' इत्यादिनेति शेषः। **वक्ष्यत इति**। 'श्वसस्तुट् च' इत्यत्र। **दिक्पूर्वे**। 'असंज्ञायाम्' इत्यत्र सौत्रत्वा-

---

१ 'काकतीरे' इति क,

ञः । (४-२-१०७) अणोऽपवादः । पौर्वशालः । असंज्ञायां किम्—संज्ञाभूतायाः प्रकृतेर्मा भूत् । पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः । 'प्राचां ग्रामनगराणाम्' (सू १४००) इत्युत्तरपदवृद्धिः । १३२९ मद्रेभ्योऽञ् । (४-२-१०८) 'दिक्पूर्वपदात्' इत्येव । 'दिशोऽमद्राणाम्' (१३६६) इति मद्रपर्युदासादादिवृद्धिः । पौर्वमद्रः । आपरमद्रः । १३३० उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् । (४-२-१०९) अञ् स्यात् । शैवपुरम् । १३३१ प्रस्थोत्तरपदपलद्यादिकोपधादण् । (४-२-११०) माहिकिप्रस्थः । पालदः । नैलीनकः । १३३२ कण्वादिभ्यो गोत्रे । (४-२-१११) एभ्यो गोत्रप्रत्यया-

ञः स्यादित्यर्थः । पौर्वशाल इति । पूर्वस्यां शालायां भव इत्यर्थे 'तद्धितार्थ—' इति समासाद् ञः । मद्रेभ्योऽञ् । इत्येवेति । दिक्पूर्वाद् मद्रशब्दादञित्यर्थः । पर्युदासादिति । उत्तरपदवृद्धेः पर्युदासे सति आदिवृद्धिरित्यर्थः । बहुवचनाज्जनपदवाचिन एव ग्रहणम् । पौर्वमद्र इति । पूर्वेषु मद्रेषु भव इत्यर्थः । उदीच्यग्रामाच्च । शैवपुरमिति । उत्तरदेशे शिवपुरं नाम ग्रामविशेषः । तत्र भवमित्यर्थः । समासस्येत्यन्तोदात्तः शिवपुरशब्दः । 'बह्वचः' किम् ? ध्वजी (ङीषन्तो) नाम उत्तरदेशे ग्रामविशेषः । तत्र भवः ध्वाजः । 'अन्तोदात्तात्' किम् । शार्करीधानम् । कृदुत्तरपदप्रकृतिस्वरेण लित्स्वरस्यैवावस्थानाद् मध्योदात्तोऽयम् । प्रस्थोत्तरपद । प्रस्थोत्तरपदात् पलद्यादिभ्यः कोपधाच्च अणित्यर्थः । पलदिः आदिर्येषामिति विग्रहः । उदीच्यग्रामलक्षणस्य ञोऽपवादः । माहिकिप्रस्थ इति । महिकिप्रस्थनाम्नि ग्रामे भव इत्यर्थः । पालद इति । पलदिनाम्नि ग्रामे भव इत्यर्थः । नैलीनक

तपञ्चम्यर्थे सप्तमीत्याशयेनाह—संज्ञाभूताया इति । मद्रेभ्योऽञ् । बहुवचननिर्देशाज्जनपदवाची गृह्यते, न तु भद्रपर्यायः । दिशोऽमद्राणामिति । 'दिग्वाचकादुत्तरपदस्य जनपदवाचिनो मद्रभिन्नस्याचामादेर्वृद्धिः स्याद् ञिति णिति किति च तद्धिते' इति सूत्रार्थः । पौर्वमद्र इति । मद्रैकदेशे मद्रशब्दस्य वृत्तौ दिक्शब्देन सामानाधिकरण्यात् 'तद्धितार्थ—' इति समासः । उदीच्य । दिग्ग्रहणं निवृत्तम् । उदीच्यग्रामात्किम्, माथुरः । बह्वचः किम्, ध्वाजः । पिप्पल्यादिङीषन्तो ध्वजीशब्दः । अन्तोदात्तात्किम्, शार्कराधानम्, शर्कराधानशब्दे धाशब्दाकार उदात्तः । कृदुत्तरपदप्रकृतिस्वरेण लित्स्वरस्यावस्थानात् । शैवपुरमिति । 'प्रस्थपुरवहान्ताच्च' इति वुञ् न भवति, 'वृद्धात्' इति तत्रानुवृत्तेः । प्रस्थोत्तर । उदीच्यग्रामलक्षणस्याञोऽपवादः । पालद इति । पलदीति ईकारान्त इत्येके । नान्त इत्यन्ये । नलोपे

१ 'ध्वजी' इति क. २ 'ध्वाजः' इति क. ३ 'शार्कराधानम्' इति क. ।

न्तेभ्योऽण् स्यात्। कण्वो गर्गादिः। काण्व्यस्य छात्राः काण्वाः। १३३३ इञश्च। (४-२-११२) गोत्रे य इञ् तदन्तादण् स्यात्। दाक्षाः। गोत्रे किम्-सौतङ्गमेरिदं सौतङ्गमीयम्। गोत्रमिह शास्त्रीयम्, न तु लौकिकम्। तेनेह न-पाणिनीयम्। १३३४ न द्व्यचः प्राच्यभरतेषु। (४-२-११३) 'इञश्च' (सू १३३३) इत्यणोऽपवादः। प्रौष्ठीयाः। काशीयाः। भरतानां प्राच्यत्वेऽपि पृथगुपादानम् अन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिङ्गम्। १३३५ वृद्धिर्यस्याचामादि-

---

इति। निलीनकनाम्नि ग्रामे भव इत्यर्थः। **कण्वादिभ्यो गोत्रे**। **काण्व्यस्येति**। कण्वस्य गोत्रापत्यं काण्व्यः। गर्गादियञ्। काण्व्यस्य छात्रा इत्यर्थे अनेन छापवादः अण्। 'यस्येति च' इत्यकारलोपः, 'आपत्यस्य च-' इति यकारलोपः, काण्वा इति रूपम्। **इञश्च**। **दाक्षा इति**। दक्षस्य गोत्रापत्यं दाक्षिः। 'अत इञ्।' दाक्षेः छात्रा इति विग्रहः। **सौतङ्गमेरिदमिति**। सुतङ्गमस्य निवासः सौतङ्गमिः। 'सुतङ्गमादिभ्य इञ्'। सौतङ्गमेरिदमित्यर्थे वृद्धात् छः, न त्वण्, इञो गोत्रार्थकत्वाभावात्। **गोत्रमिह शास्त्रीयमिति**। अपत्याधिकारादन्यत्र यद्यपि लौकिकमेव गोत्रमिति सिद्धान्तः। तथापि इह सूत्रद्वयेऽपि शास्त्रीयमेव गोत्रं गृह्यते, 'यूनि लुक्' इति सूत्रभाष्ये तथोक्तत्वादिति भावः। **पाणिनीयमिति**। पणिनो गोत्रापत्यं पाणिनः। तस्यापत्यं युवा पाणिनिः। तस्येदं पाणिनीयम्। वृद्धात् छः। अण् तु न, पाणिनिशब्दस्य युवप्रत्ययान्तत्वादिति भावः। **न द्व्यचः**। प्राच्येषु भरतेषु च गोत्रेषु विद्यमानादिञन्ताद् द्व्यचः अण् न भवतीत्यर्थः। **इञश्चेत्यणोऽपवादः**। प्रतिषेध इत्यर्थः। **प्रौष्ठीया इति**। प्रोष्ठस्य गोत्रापत्यं प्रौष्ठिः, तस्य छात्रा इत्यर्थः। **काशीया इति**। काशस्य गोत्रापत्यं काशिः, तस्य छात्रा इत्यर्थः। अणो निषेधे वृद्धात् छः।

सति यणादेशात्संहिता तुल्यैव। वाहीकशब्दः कोपधोऽपि पलद्यादिषु पठ्यते परं छं बाधितुम्। अन्यथा अणं बाधित्वा परत्वाच्छ एव स्यात्कोपधप्रयुक्तोऽण् अवृद्धे सावकाश इति। यकृल्लोमनि भवो याकृल्लोमः। 'अन्' इति प्रकृतिभावस्तु न, गणेऽस्मिन्नलोपनिपातनादिति हरदत्तादयः। **सौतंगमेरिति**। सुतंगमादिभ्यश्चातुरर्थिक इञ्। **शास्त्रीयमिति**। ननु 'अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते' इति चेत्। अत्राहुः—'पूर्वसूत्रे गोत्रग्रहणेन पौत्रप्रभृति गोत्रं गृह्यते, कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तेभ्यः-' इति गोत्रप्रत्ययानुवादेन तत्रारिवधानात्। कण्वादयश्च गर्गाद्यन्तर्गताः। 'गर्गादिभ्यो यञ्' इत्यत्र तु 'गोत्रे कुञ्जादिभ्यः-' इत्यतो गोत्र इत्यनुवर्तते, न तु शास्त्रीयगोत्रमेव गृह्यते अपत्याधिकारस्थत्वात् तदेव हि 'इञश्च' इति सूत्रेऽनुवर्तत इति। **न द्व्यचः**। **अपवाद इति**। प्रतिषेध

स्तद्वृद्धम् । (१-१-७३) यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् । १३३६ त्यदादीनि च । (१-१-७४) वृद्धसंज्ञानि स्युः । १३३७ वृद्धाच्छः । (४-२-११४) शालीयः । मालीयः । तदीयः । १३३८ एङ् प्राचां देशे । (१-१-७५) एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने । एणीपचनीयः । गोनर्दीयः । भोजकटीयः । पक्षेऽणि ऐणीपचनः, गौनर्दः, भौजकटः । एङ् किम्-आहिच्छत्रः । कान्यकुब्जः । 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्या' (वा ५७६) । देवदत्तः, देवदत्तीयः । १३३९ भवतष्ठक्छसौ । (४-२-११५) वृद्धाद्भवत एतौ स्तः । भावत्कः । जश्त्वम्, भवदीयः । वृद्धाद् इत्यनुवृत्तेः शत्रन्तादणेव । भावतः । १३४० काश्यादिभ्यष्ठञ्ञिठौ । (४-२-११६) इकार उच्चारणार्थः । काशिकी, काशिका ।

लिङ्गमिति । तेन औद्दालकिः पिता, औद्दालकायनः पुत्र इत्यत्र 'इञः प्राचाम्' इति भरतेभ्यो लुङ् न भवति । **वृद्धिर्यस्य ।** अचामिति बहुत्वमनेकत्वोपलक्षणम् । तेन शालाशब्दस्यापि वृद्धत्वं सिध्यति । व्यपदेशिवत्त्वेन आशब्दस्यापि वृद्धत्वम् । **त्यदादीनि च ।** शेषपूरणेन सूत्रं व्याचष्टे—**वृद्धसंज्ञानि स्युरिति ।** आदेरचो वृद्धसंज्ञकत्वाभावादारम्भः । **वृद्धाच्छः ।** वृद्धसंज्ञकात् छः स्याद् जातादिष्वर्थेषु । अणोऽपवादः । **शालीय इति ।** शालायां जात इत्यादिरर्थः । एवं तदीयः । **एङ् प्राचां देशे ।** देशविशेषनाम्नश्चेदेङादिरव वृद्धसंज्ञक इति नियमार्थमिदम् । **वा नामधेयस्येति ।** रूढशब्दत्वमिह नामत्वम्, न त्वाधुनिकसंकेतितत्वमेव, तेन घटीयमित्यादि सिद्धम् । **भवतष्ठक्छसौ । भावत्क इति ।** 'इसुसुक्तान्तात्कः' । ननु भवच्छब्दाच्छस्य ईयादेशे सति भत्वेन पदत्वस्य बाधात्कथं जश्त्वमित्यत आह—**जश्त्वमिति ।** 'सिति च' इति पदत्वेन भत्वस्य बाधादिति भावः । ननु भावत इति कथमणप्रत्ययः, 'त्यदादीनि च' इति भवच्छब्दस्य वृद्धतया छस्यैव युक्तत्वादित्यत आह—**वृद्धादित्यनुवृत्तेः शत्रन्तादणेवेति ।** त्यदादिषु 'भातेर्डवतुः' इति डवत्वन्तस्यैव पाठादिति भावः । **काश्यादिभ्यष्ठञ्ञिठौ ।** ठञ् ञिठ इति प्रत्ययौ स्तः । ञिठप्रत्यये ञि इति समुदायस्य 'आदिर्ञिटुडवः' इति इत्संज्ञायां प्रयोजनाभावाद् ञकार एव इत्, तस्य ञित्स्वरः प्रयोजनम् । ठञ एव विधौ तु ङीप् स्यात्, टाब् न स्यात् । नन्वेवं सति इठप्रत्यये ठस्य इकादेशो न स्यात् ।

इत्यर्थः । **भरतानामग्रहणस्येति ।** तेन 'इञः प्राचाम्' इति भरतेभ्यो युवप्रत्ययस्य लुङ् न भवति । औद्दालकिः पिता, औद्दालकायनः पुत्रः, इति 'आर्हादगोपुच्छ-' इति सूत्रे कैयट   **भवतः ।** छादिरय प्रत्ययो न तु शादिः । पदसंज्ञार्थं सित्करणा

वैदिकी, वैदिका। 'आपदादिपूर्वपदात् कालान्तात्' (ग सू ७४)। आपदादिराकृतिगणः। आपत्कालिकी, आपत्कालिका। **१३४१ वाहीकग्रामेभ्यश्च।** (४-२-११७) वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः। छस्यापवादः। कास्तीरं नाम वाहीकग्रामः। कास्तीरिकी, कास्तीरिका। **१३४२ विभाषोशीनरेषु।** (४-२-११८) एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः। सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया। **१३४३ ओर्देशे ठञ्।** (४-२-११९) उवर्णान्ताद्देशवाचिनष्ठञ्। निषादकर्षूः। नैषादकर्षुकः। 'केऽणः' (सू ८३४) इति ह्रस्वः। 'देशे किम्–पटोश्छात्राः पाटवाः। ञिठं व्यावर्तयितुं ठञ्ग्रहणम्। वृद्धाच्छं परत्वादयं बाधते। दाक्षिकर्षुकः। **१३४४ वृद्धात्प्राचाम्।** (४-२-१२०) प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम्। आढकजम्बुकः। शाकजम्बुकः। नेह—मल्लवास्तु, माल्लवास्तवः। **१३४५ धन्वयोपधाद् वुञ्।**

अज्ञातपरत्वाभावादित्यत आह—**इकार उच्चारणार्थ इति**। **काशिकीति**। काश्यां जातादिरित्यर्थः। ठञन्ताद् ङीप्। **काशिकेति**। ञिठप्रत्यये इकारः। टाप्। **वैदिकी, वैदिकेति**। वेदिर्देशविशेषः। **आपदादिपूर्वपदात्कालान्तादेति**। गणसूत्रम्। ठञ्ञिठावित्येव। **आपदादिरिति**। आपद् आदिर्यस्येति विग्रहः। **आपत्कालिकी, आपत्कालिकेति**। ठञि ङीप्, ञिठे टाप्। **वाहीकग्रामेभ्यश्च**। वाहीकाख्याः केचिद् ग्रामाः, तद्विशेषवाचिभ्य इत्यर्थः। तदाह—**वाहीकग्रामवाचिभ्य इति**। **विभाषोशीनरेषु**। पूर्वसूत्रे समस्तनिर्देशेऽपि 'ग्रामेभ्यः' इत्यनुवर्तते, एकदेशे स्वरितत्वप्रतिज्ञानात्, तदाह—**एषु ये ग्रामा इति**। उशीनरेषु ये ग्रामास्तद्विशेषवाचिभ्य इत्यर्थः। सौदर्शनो नाम उशीनरदेशे कश्चिद् ग्रामः। **सौदर्शनीया इति**। ठञ्ञिठयोरभावे वृद्धाच्छः। **ओर्देशे ठञ्**। **निषादकर्षूरिति**। कश्चिद् ग्राम इति शेषः। **नैषादकर्षुक इति**। उगन्तात्परत्वात् कादेशः। **वृद्धात्प्राचाम्**। 'ओर्देशे ठञ्' इत्यनुवर्तते। प्राचामिति देशविशेषणम, न तु विकल्पार्थम्, व्याख्यानात्। पूर्वेण सिद्धे नियमार्थमिदम्। तदाह—**प्राग्देशेत्यादिना**। **आढकजम्बुक इति**। आढकजम्बूर्नाम कश्चिद् ग्रामः। तत्र भव इत्यर्थः। उगन्तात्परत्वात् ठस्य कः। 'केऽणः' इति ह्रस्वः। एवं शाकजम्बुकः। **मल्लवास्त्विति**।

दित्याशयेनाह—**जश्त्वमिति**। **काश्यादिभ्यः**। **इकार उच्चारणार्थ इति**। उभयत्र ञकार एवानुबन्धः, तस्य व्यत्यासपाठस्तु स्त्रीप्रत्यये विशेषार्थ इति भावः। **आपदादीति**। गणसूत्रमिदम्। **वृद्धादेवेति**। 'वृद्धाचेत्प्राग्रामेव' इति विपरीतनियमस्तु न भवति, अप्राग्देशवाचिनो वृद्धस्य उवर्णान्तस्याभावात्। **धन्वयोपधात्**।

(४-२-१२१) धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद् वुञ् स्यात् । ऐरावतं धन्व, ऐरावतकः । साङ्काश्यकाम्पिल्यशब्दौ वुञ्छणादि—(सू १२६२) सूत्रेण यान्तौ । साङ्काश्यकः । काम्पिल्यकः । **१३४६ प्रस्थपुरवहान्ताच्च ।** (४-२-१२२) एतदन्ताद् वृद्धाद्देशवाचिनो वुञ्स्यात् । छस्यापवादः । मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । पुरान्तग्रहणमप्रागर्थम् । प्राग्देशे तूत्तरेण सिद्धम् । **१३४७ रोपधेतोः प्राचाम् ।** (४-२-१२३) रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद् वुञ्स्यात् । पाटलिपुत्रकः । ऐतः, काकन्दकः । **१३४८ जनपदतदवध्योश्च ।** (४-२-१२४) जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद् वुञ्स्यात् । आदर्शकः । त्रैगर्तकः । **१३४९ अवृद्धादपि बहुवचन-**

कश्चित् प्राच्यो ग्राम इति शेषः । **धन्वयोपधाद् वुञ् । ऐरावतं धन्वेति ।** ऐरावताख्यं धन्वेत्यर्थः । धन्व मरुप्रदेशः । 'समानौ मरुधन्वानौ' इत्यमरः । आष्टकं नाम धन्व इति भाष्यान्नपुंसकत्वमपि । **ऐरावतक इति ।** ऐरावताख्ये मरुप्रदेशे भव इत्यर्थः । वुञ्, अकादेशः । **साङ्काश्यकः । काम्पिल्यक इति ।** साङ्काश्ये काम्पिल्ये च भव इत्यर्थः । **प्रस्थपुरवहान्ताच्च । एतदन्तादिति ।** प्रस्थ, पुर, वह एतदन्तादित्यर्थः । ननु पुरान्तग्रहणं व्यर्थम्, नान्दीपुरक इत्यत्र 'रोपधेतोः प्राचाम्' इत्युत्तरसूत्रेण सिद्धत्वादित्यत आह—**पुरान्तेति । रोपधेतोः प्राचाम् ।** रोपधश्च, ईच्च तयोरिति द्वन्द्वः । षष्ठी पञ्चम्यर्थे । प्राचामिति देशविशेषणम् । तदाह—**रोपधादित्यादिना । ईत इति ।** उदाह्रियत इति शेषः । **काकन्द इति ।** काकन्दी नाम देशः, तत्र भव इत्यर्थः । **जनपदतदवध्योश्च । आदर्शक इति ।** आदर्शो नाम जनपदः । तत्र भव इत्यर्थः । त्रिगर्तो नाम जनपदविशेषस्यावधिः । जनपदत्वेन सिद्धावपि त्रिगर्तशब्दे परमपि गर्तोत्तरपदाच्छं बाधितुमिह तदवधिग्रहणम् । तदाह—**त्रैगर्तक इति । अवृद्धादपि बहुवचन-**

धन्वेति न स्वरूपपर्याययोर्ग्रहणम्, वृद्धत्वासम्भवादित्याशयेनाह—**धन्वविशेषेति । ऐरावतं धन्वेति ।** यद्यपि 'समानौ मरुधन्वानौ' इत्यमरेण पुंस्त्वमुक्तम्, तथापि 'आष्टकं नाम धन्व' इति भाष्ये ह्रस्वपाठान्नपुंसकोऽपि धन्वशब्दोऽस्त्येवेति बोध्यम् । **उत्तरेणेति ।** रोपधत्वादिति भावः । **जनपद ।** स चासौ अवधिश्चेति कर्मधारयाज्जनपदरूप एवावधिर्लभ्यते । न च जनपदत्वादेव सिद्धे अवधिग्रहणं व्यर्थम्, 'वुञेव यथा स्यादन्यत्' इत्येतदर्थं तस्यावश्यकत्वात् । अत एव जनपदावधिवाचिनस्त्रिगर्तशब्दाद् 'गर्तोत्तरपदात्—' इति छो न भवति, किंतु 'अवृद्धादपि बहुवचनविषयात्' इत्युत्तरसूत्रेण वुञेव भवतीत्याशयेनोदाहरति—**त्रैगर्तक इति ।**

विषयात्। (४-२-१२५) अवृद्धाद् वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद् वुञ्स्यात्। अवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्, आङ्गकः। अवृद्धाज्जनपदावधेः, आजमीढकः। वृद्धाज्जनपदात्, दार्वकः वृद्धाज्जनपदावधेः, कालञ्जरकः। 'विषय' ग्रहणं किम्-एकशेषेण बहुत्वे मा भूत्—वर्तनी च वर्तनी च वर्तनी च वर्तन्यः, तासु भवो वार्तनः। १३५० **कच्छाग्निवक्त्रवर्तोत्तरपदात्।** (४-२-१२६) देशवाचिनो वृद्धादवृद्धाच्च वुञ्स्यात्। दारुकच्छकः। काण्डाग्नकः। सैन्धुवक्त्रकः। बाहुवर्तकः। १३५१ **धूमादिभ्यश्च।** (४-२-१२७) देशवाचिभ्यो वुञ्। धौमकः। तैर्थकः। १३५२ **नगरात्कुत्सनप्रावीण्ययोः।** (४-२-१२८) नगरशब्दाद् वुञ्स्यात्कुत्सने प्रावीण्ये च गम्ये। नागरकश्चौरः शिल्पी वा। 'कुत्सन' इति किम्—नागरा ब्राह्मणाः। १३५३ **अरण्यान्मनुष्ये।** (४-२-१२९) वुञ्। 'अरण्याण्णः' (वा २७८२) इत्यस्यापवादः। 'पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम्' (वा २८१९) आरण्यकः पन्थाः अध्यायो न्यायो विहारो मनुष्यो हस्ती वा। 'वा गोमयेषु' (वा २८२०)। आरण्यका आरण्या वा गोमयाः।

विषयात्। अवृद्धाज्जनपदादिति। उदाह्रियत इति शेषः। **आजमीढक इति।** अजमीढेषु भव इत्यर्थः। अजमीढाख्यो जनपदः कस्यचिज्जनपदस्यावधिः। **वृद्धाज्जनपदादिति।** उदाह्रियत इति शेषः। **दार्वक इति।** दार्वा इति बहुवचनान्तो जनपदविशेषे वर्तते। तत्र भव इत्यर्थः। **कालञ्जरक इति।** कलञ्जरेषु भव इत्यर्थः। **कच्छाग्नि।** कच्छ, अग्नि, वक्त्र, वर्त एतदुत्तरपदादित्यर्थः। शेषपूरणेन सूत्रं व्याचष्टे—**देशवाचिन इति।** छाणोरपवादः। **दारुकच्छक इति।** दारुकच्छे भव इत्यर्थः। **काण्डाग्नक इति।** काण्डाग्नौ भव इत्यर्थः। अकादेश 'यस्येति च' इति इकारलोपः। **सैन्धुवक्त्रक इति।** सिन्धुवक्त्रे भव इत्यर्थः। **बाहुवर्तक इति।** बहुवर्ते भव इत्यर्थः। **धूमादिभ्यश्च।** देशवाचिभ्यो वुञिति शेषपूरणम्। **नगरात्कुत्सन। नागरा ब्राह्मणा इति।** कत्र्यादिषु माहिष्मतीसाहचर्येण संज्ञाभूतस्यैव नगरशब्दस्य ग्रहणम् अतो न ढकञ्। 'प्राचां ग्रामनगराणाम्' इति सूत्रभाष्ये नागरा इत्युदाहरणात्। **अरण्यान्मनुष्ये। आरण्यक इति।** पन्थाः अध्यायो न्यायो विहारो मनुष्यो हस्ती वा। **वा**

'जनपदतदवध्योः–' इति सूत्रे जनपदावधिवाचिन उदाहरणं तु 'श्यामायनकः' इत्यादि बोध्यम्। **नागरा ब्राह्मणा इति।** कत्र्यादिषु माहिष्मतीति संज्ञाशब्दसाहचर्यात्संज्ञाभूतनगरशब्दस्यैव ढकञा नागरेयक इति भाव्यमिति भावः।

१३५४ विभाषा कुरुयुगन्धराभ्याम् । (४-२-१३०) वुञ् । कौरवकः, कौरवः । यौगन्धरकः, यौगन्धरः । **१३५५ मद्रवृज्योः कन्** । (४-२-१३१) जनपदवुञोऽपवादः । मद्रेषु जातो मद्रकः । वृजिकः । **१३५६ कोपधादण्** । (४-२-१३२) माहिषिकः । **१३५७ कच्छादिभ्यश्च** । (४-२-१३३) देशवाचिभ्योऽण् । वुञादेरपवादः । काच्छः । सैन्धवः । **१३५८ मनुष्यतत्स्थयोर्वुञ्** । (४-२-१३४) कच्छाद्यणोऽपवादः । कच्छे जातादिः काच्छको मनुष्यः । काच्छकं हसितम् । 'मनुष्य' इति किम्—काच्छो गौः । **१३५९ अपदातौ साल्वात्** । (४-२-१३५) साल्वशब्दस्य कच्छादित्वाद् वुञि सिद्धे नियमार्थमिदम्, अपदातावेवेति । साल्वको ब्राह्मणः । 'अपदातौ' किम्—साल्वः पदातिर्व्रजति । **१३६० गोयवाग्वोश्च** । (४-२-१३६) साल्वाद् वुञ् । कच्छाद्यणोऽपवादः । साल्वको गौः । साल्विका यवागूः । साल्वमन्यत् । **१३६१ गर्तोत्तरपदाच्छः** । (४-२-१३७) देशे । अणोऽपवादः । वृकगर्तीयम् । उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम् । **१३६२ गहादिभ्यश्च** । (४-२-१३८)

गोमयेष्विति । वार्तिकमिदम् । **विभाषा कुरु** । कुरुयुगन्धरौ जनपदौ । अवृद्धाभ्यामपि ताभ्याम 'अवृद्धादपि–' इति नित्यं प्राप्ते विकल्पः **मद्रवृज्योः कन्** । मद्रो वृजिश्च जनपदविशेषः । जनपदवुञोऽपवादः । **कोपधादण्** । **माहिषिक इति** । महिषिको नाम जनपदः, तत्र भव इत्यर्थः । प्रस्थोत्तरपद–' इत्यादिना सिद्धे जनपदवुञ्बाधनार्थमिदम् । **कच्छादिभ्यश्च** । **काच्छ इति** । अत्र वुञोऽपवादोऽण् । **सैन्धव इति** । ओर्देशे ठञोऽपवादः । **मनुष्यतत्स्थयोर्वुञ्** । कच्छादिभ्य इत्यनुवर्तते । तदाह—**कच्छादीति** । **अपदातौ साल्वात्** । **नियमार्थमिति** । साल्वाचेदपदातावेवेति नियमार्थमित्यर्थः । **गोयवाग्वोश्च** । जातत्वादिना विवक्षितयोरित्यर्थः । **गर्तोत्तरपदाच्छः** । **देश इति** । शेषपूरणम् । देशवाचिन इति यावत् । **वृकगर्तीयमिति** । वृकगर्तो नाम देशः । तत्र भव इत्यर्थः । ननु गर्ताच्छ इत्येतावतैव केवलगर्तशब्दस्य

विभाषा कुरु । कुरुशब्दः कच्छादिषु पठ्यते, तत्सामर्थ्यात्पक्षेऽण् सिद्ध इति परिशेषाद्विभाषाग्रहणं युगन्धरार्थमेव । 'अवृद्धादपि–' इति नित्यप्राप्तो वुञनेन विकल्प्यते । मनुष्यतत्स्थयोस्तु परत्वान्नित्य एव वुञ् । कौरवको मनुष्यः । कौरवकमस्य हसितम् । एतदर्थमेवास्य कच्छादौ पाठः । अन्यथा अनयैव विभाषया वुञणोः सिद्धौ किं तेनेति भावः । **सैन्धव इति** । 'ओर्देशे–' इति ठञ् प्राप्तः । **वुञि सिद्धे इति** । 'मनुष्यतत्स्थयोः–' इत्यनेन । **गहादिभ्यश्च** । एभ्यो देशवाचिभ्यश्छः

छः स्यात्। गहीयः। 'मुखपार्श्वतसोर्लोपश्च' (ग सू ७८)। मुखतीयम्। पार्श्वतीयम्। अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम्। 'कुग्जनस्य परस्य च' (ग सू ८६)। जनकीयम्। परकीयम्। 'देवस्य च' (ग सू ६०)। देवकीयम्। 'स्वस्य च' स्वकीयम्। 'वेणुकादिभ्यश्छण्वाच्यः' (ग सू ६१)। वैणुकीयम्। वैत्रकीयम्। औत्तरपदकीयम्। १३६३ प्राचां कटादेः। (४-२-१३६) प्राग्देशवाचिनः कटादेश्छः स्यात्। अणोऽपवादः। कटनगरीयम्। कटघोषीयम्। कटपल्वलीयम्। १३६४ राज्ञः क च। (४-२-१४०) वृद्धत्वाच्छे सिद्धे तत्संनियोगेन कादेशमात्रं विधीयते, राजकीयम्। १३६५ वृद्धादकेकान्तखोपधात्। (४-२-१४१) 'अक' 'इक' एतदन्ता-

---

देशवाचित्वाभावाद् 'गर्तोत्तरपदात्' इति सिद्धे उत्तरपदग्रहणं व्यर्थमित्यत आह—**उत्तरपदग्रहणमिति। गहादिभ्यश्च। गहीय इति** गहो देशविशेषः। **मुखपार्श्वेति।** गहादिगणसूत्रम्। मुखपार्श्वेति लुप्तषष्ठीकं पदम्। तसन्तयोरेतयोरन्त्यस्य लोपश्च। चाच्छः। असंभवादत्र जनपदस्येति न सम्बध्यते। **कुग्जनस्येति।** गणसूत्रमिदम्। जनशब्दस्य परशब्दस्य च कुगागमः स्यात्, चाच्छः। अत्रापि देश इति न सम्बध्यते। **देवस्य च।** इदमपि गणसूत्रम्। चात्कुक् छश्च। 'देवाद्यञञौ' इत्यस्यापवादः। दैवानुग्रह इति भाष्यप्रयोगाद्दैवमित्यपि साधु। **स्वकीयमिति।** गहादित्वाच्छः कुक्च। स्वशब्दोऽपि गहादिः, आगमशास्त्रानित्यत्वात् स्वीयम्। **प्राचां कटादेः। कटनगरीयमिति।** कटनगरो नाम प्राच्यो देशः। **राज्ञः क च।** राजन्शब्दात् छः स्यात्, ककारश्चान्तादेशः। **वृद्धादकेकान्तखो-**

स्यात्। पूर्वपक्षादिशब्देभ्यस्तु देशवाचित्वाभावेऽपि पाठसामर्थ्याच्छः। **मुखपार्श्वतसोरिति।** गणसूत्रमिदम्। सप्तम्यन्ताभ्यामाभ्यामाद्यादित्वात्तसिः। **मुखतीयमिति।** मुखे जातमित्याद्यर्थे तसन्ताच्छः। 'अलोऽन्त्यस्य' इति तसः सकारस्य लोपे 'यस्येति च' इत्यकारलोपः। **कुग्जनस्येति।** इदमपि गणसूत्रम्। **स्वकीयमिति।** स्वार्थिककन्नन्तात्स्वशब्दाद्गहादेराकृतिगणत्वाच्छः, देशवाचित्वाभावेऽपि पूर्वपक्षादिवद्बोध्यः। अतएव लुब्योगाप्रख्यानादिति सूत्रे 'न हि स्वकीयस्यैव प्रत्याख्यानम्' इति न्यासकारोक्तिः संगच्छते। केवलात्स्वशब्दादणेव। सौवम्। एतच्च 'द्वारादीनां च' इत्यत्र आकरे उदाहृतम्। स्वीयमित्यत्र तु 'प्राक्क्रीताच्छः'। अन्तरशब्दात्तु गहादित्वाच्छे तदन्तेन नशब्दस्य समासे स्वार्थे कनि च 'नान्तरीयकम्' इति भवति।

---

१ स्वार्थिककन्नन्तात्स्वशब्दाद् गहादेराकृतिगणत्वाच्छः—इति मनोरमातत्त्वबोधिन्यौ। गहादौ तु 'स्वस्य च' इति नोपलभ्यते।

स्वोपधाच्च वृद्धाद्देशवाचिनः छः स्यात् । ब्राह्मणको नाम जनपदः, यत्र ब्राह्मणा आयुधजीविनः, तत्र जातो ब्राह्मणकीयः । शाल्मलिकीयः । अयोमुखीयः । **१३६६ कन्थापलदनगरग्रामह्रदोत्तरपदात्। (४-२-१४२)** कन्थादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात् । ठञ्ञिठादेरपवादः । दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिह्रदीयम् । **१३६७ पर्वताच्च । (४-२-१४३)** पर्वतीयः । **१३६८ विभाषाऽमनुष्ये । (४-२-१४४)** मनुष्यभिन्नेऽर्थे पर्वताच्छो वा स्यात् । पक्षेऽण् । पर्वतीयानि, पार्वतानि वा फलानि । अमनुष्ये किम्—पर्वतीयो मनुष्यः । **१३६९ कृकणपर्णाद्भारद्वाजे । (४-२-१४५)** भारद्वाजदेशवाचिभ्यामाभ्यां छः । कृकणीयम् । पर्णीयम् । भारद्वाजे किम्—कार्कणम् । पार्णम् । **१३७० युष्मदस्मदोरन्यतरस्यां खञ् च । (४-३-१)** चाच्छः । पक्षेऽण् ।

पश्चात् । **ब्राह्मणकीय इति** । कोपधाणोऽपवादः छः । **शाल्मलिकीय इति** । शाल्मलिको नाम देशः । तत्र भव इत्यर्थः । इकान्तोदाहरणमिदम् । कोपधाणपवादः । **अयोमुखीय इति** । 'वाहीकग्रामेभ्यश्च' इति ठञ्ञिठयोरपवादः छः । **कन्थापलद । ठञ्ञिठादेरपवाद इति** । नगरान्ते 'रोपधेतोः–' इति वुञोऽपवादः । इतरत्र 'बाहीकग्रामेभ्यश्च' इति ठञ्ञिठयोरपवाद इति विवेकः । **पर्वताच्च** । इत्यादि स्पष्टम्[1] । **युष्मदस्मदोरन्यतरस्यां खञ् च** । युष्मदस्मच्छब्दयोरिह शब्दस्वरूपपरत्वात् 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषो न भवति । पञ्चम्यर्थे षष्ठी । युष्मच्छब्दादस्मच्छब्दाच्च जाताद्यर्थेषु खञ् स्यादित्यर्थः । चाच्छः । गर्तोत्तरपदादित्यधिकृतः छः चकारेण समुच्चीयत इत्यर्थः । **पक्षेऽणिति** । अन्यतरस्यांग्रहणादिति

अविनाभूतमित्यर्थः । **वृद्धादके । ब्राह्मणकीय इति** । 'कोपधादण्' इत्यण् प्राप्तः । **आयोमुखीय इति** । बाहीकग्रामलक्षणौ ठञ्ञिठाविह प्राप्तौ । **ठञ्ञिठादेरिति** । आदिशब्देन 'रोपधेतोः–' इत्यादिना प्राप्तस्य वुञः । **पर्वतीय इति** । 'तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत्' इत्यत्र तु 'पर्वतीयस्य राज्ञ इमे' इत्यर्थे छान्तादण् । **कृकण** । भारद्वाजशब्दोऽत्र देशवचनः, स च न प्रत्ययार्थः, किं तु प्रकृतिविशेषणमित्याह—**भाद्वाजदेशेत्यादिना** । **युष्मदस्मदोः** । 'त्यदादीनि च' इति वृद्धत्वान्नित्ये छे प्राप्ते खञणोरपि विधानार्थमिदम् । **पक्षे अणिति** । अन्यतरस्यांग्रहणा-

---

१ इह मूले टीकायां च 'इति चतुर्थस्य द्वितीयः पादः' इत्याद्यधिकं दृश्यते क. ख. पुस्तकयोः, परं प्रथमपादान्ते तथा लेखादर्शनान्मूलपुस्तकान्तरेष्वदर्शनाच्च सोऽत्रोपेक्षितः ।

युवयोः युष्माकं वा अयं युष्मदीयः। अस्मदीयः। १३७१ **तस्मिन्नणि च युष्माकास्माकौ।** (४-३-२) युष्मदस्मदोरेतावादेशौ स्तः, खञ्यणि च। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः। १३७२ **तवकममकावेकवचने।** (४-३-३) एकार्थवाचिनो युष्मदस्मदोस्तवकममकौ स्तःखञ्यणि च। तावकीनः, तावकः। मामकीनः, मामकः। छे तु। १३७३ **प्रत्ययोत्तरपदयोश्च।** (७-२-९८) मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये

भावः। अत्र 'युष्मदस्मदोः' इति योगो विभज्यते। आभ्यां छो भवतीत्यर्थः। 'खञ् च' इति योगान्तरम्। आभ्यां खञ् च भवतीत्यर्थः 'अन्यतरस्याम्' इति योगान्तरम्। आभ्यां छखञौ वा स्तः, पक्षेऽणित्यर्थः। अतो न यथासंख्यमिति भाष्ये स्पष्टम्। **युष्मदीय इति।** द्विवचनान्ताद्बहुवचनान्ताच्च छः। ईयादेशः। सुब्लुकि युवादेशस्य निवृत्तिः, तस्य विभक्तौ परे विधानात्। प्रकृत्यर्थैकत्वे विभक्तेर्लुप्तत्वेऽपि त्वादशो वक्ष्यते। **अस्मदीय इति।** आवयोरस्माकं वा अयमित्यर्थः। अथ खञि अणि च विशेषमाह—**तस्मिन्नणि च।** पूर्वसूत्रे निर्दिष्टः खञ् तच्छब्देन परामृश्यते। तदाह—**खञि अणि चेति।** अत्र स्थानिनोरादेशयोश्च यथासंख्यम्, न तु परनिमित्तयोः, 'तस्मिन्नणि' इति व्यस्तनिर्देशात्। **यौष्माकीण इति।** युवयोर्युष्माकं वा अयमिति विग्रहः। खञ्, ईनादेशः, युष्माकादेशः, आदिवृद्धिः, णत्वम्। **आस्माकीन इति।** आवयोरस्माकं वा अयमिति विग्रहः। अणि उदाहरति—**यौष्माकः, आस्माक इति। तवकममकौ।** 'एकवचने' इति युष्मदस्मदोः प्रकृत्योर्विशेषणम्। एकस्य वचनम् उक्तिः एकवचनम्। एकस्योक्तौ व्याप्रियमाणयोरिति लभ्यते। तदाह—**एकार्थवाचिनोरिति। छे त्विति।** एकार्थवृत्तयोर्विशेषो

दिति भावः। तथा चैते त्रयः प्रत्यया इति वैषम्याद्यथासंख्यं न भवन्तीति केचित्। मनोरमायां तु यथासंख्यनिवारणाय योगविभागः कृतः, तथा हि 'युष्मदस्मदोरन्यतरस्याम्'। आभ्यां छो वा स्यात्। 'त्यदादीनि च' इति वृद्धत्वान्नित्ये छे प्राप्ते विकल्पोऽयम्। ततः 'खञ्च'। एवमुत्तरसूत्रेऽपि योगविभागो बोध्यः। तेन आदेशयोः खञणभ्यां यथासंख्यं नेत्यादि। **युवयोरित्यादि।** एकवचने तवकममकादेशविधानादेकवचनान्तेन विग्रहोऽत्र न कृतः। **तस्मिन्नणि च।** तस्मिन्निति साक्षाद्विहितः खञ् निर्दिश्यते, न तु चानुकृष्ट। निमित्तयोरादेशौ प्रति यथासंख्यं तु न भवति 'खञणोः-' इति वक्तव्ये पृथग्विभक्तिनिर्देशसामर्थ्यात्। स्थान्यादेशयोस्तु इष्यत एव तत्। **तवक।** इह पूर्ववदेव निमित्तयोः खञणोरादेशौ प्रति यथासंख्यं न भवति, किंतु स्थान्यादेशयोरेवेत्याशयेनोदाहरति—**तावकीनः। मामकीन**

उत्तरपदे च। त्वदीयः। मदीयः। उत्तरपदे तु त्वत्पुत्रः, मत्पुत्रः। **१३७४ अर्धाद्यत्।** (४-३-४) अर्ध्यः। **१३७५ परावराधमोत्तमपूर्वाच्च।** (४-३-५) परार्ध्यम्। अवरार्ध्यम्। अधमार्ध्यम्। उत्तमार्ध्यम्। **१३७६ दिक्पूर्वपदाट्ठञ्च।** (४-३-६) चाद्यत्। पौर्वार्धिकम्, पूर्वार्ध्यम्। **१३७७ ग्रामजनपदैकदेशादञ्ठञौ।** (४-३-७) ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्धान्तादञ्ठञौ स्तः। इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धाः, पौर्वार्धिकाः। ग्रामस्य पूर्वस्मिन्नर्धे भवा इति तद्धितार्थे समासः। ठञ्ग्रहणं स्पष्टार्थम्। अञ्चेत्युक्ते यतोऽप्यनुकर्षः सम्भाव्येत। **१३७८ मध्यान्मः।** (४-३-८) मध्यमः। **१३७९ अ सांप्रतिके।** (४-३-९) मध्यशब्दादकारप्रत्ययः स्यात्सांप्रतिकेऽर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाकरणः।

वक्ष्यत इति शेषः। **प्रत्ययोत्तरपदयोश्च।** साप्तमिकमिदम्। त्वमावेकवचने इत्यनुवर्तते। 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते। मपर्यन्तस्येत्यधिकृतम्, तदाह—**मपर्यन्तयोरित्यादि। त्वदीयः। मदीय इति।** छे सुब्लुकि तवममयोर्निवृत्तौ मपर्यन्तयोः त्वदिति मदिति च आदेशौ। विभक्तिपरकत्वाभावान्न शेषे लोपः। उत्तरपदे तु परे त्वत्पुत्रो मत्पुत्र इत्युदाहरणम्। **अर्धाद्यत्। अर्ध्य इति।** अर्धे जातादिरित्यर्थः। 'सपूर्वपदाट्ठञ् वाच्यः' इति वार्तिकं भाष्ये स्थितम्। बालेयार्धिकः। **परावर।** अर्धाद्यदिति शेषः। अवरशब्दो दन्तोष्ठ्यवकारमध्यः। **दिक्पूर्वपदाद् ठञ् च।** अर्धादित्येव परावरपूर्वार्धशब्दात्पूर्वसूत्रेण यदेव, विशिष्य विहितत्वात्। **ग्रामजनपद।** ननु अञ् चेत्येतावतैव चकारात् ठञोऽनुकर्षसिद्धेः ठञ्ग्रहणं व्यर्थमित्यत आह—**ठञ्ग्रहणमिति।** ननु अञ् चेत्युक्तेऽपि चकाराट्ठञोऽनुकर्षः स्पष्ट एवेत्यत आह—**अञ् चेत्युक्त इत्यादि। मध्यान्मः।** स्पष्टम्। **अ सांप्रतिके।** अ इति लुप्तप्रथमाकम्। मध्यादित्यनुवर्तते। तदाह—**मध्यशब्दादित्यादि।** संप्रतीत्यव्ययम्

इति। परावरा। 'परावराधमोत्तमेभ्यः' इत्येव वक्तव्ये पूर्वग्रहणं पूर्वविप्रतिषेधसूचनार्थम्। तेन दिक्शब्दयोः परावरयोरर्धशब्देन समासे उत्तरसूत्रेण प्राप्तावपि ठञ्यतौ बाधित्वा यदेव भवति। **दिक्।** पूर्वपदग्रहणं स्वरूपविधिनिरासार्थमित्याहुः। **अ सांप्रतिके।** सम्प्रतीत्यव्ययं न्याय्ये वर्तते 'अनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रः स वा एष सम्प्रति यज्ञो यत्पञ्चरात्रः' इत्यत्र तथा दर्शनात्। न न्यूनो नातिरिक्तः सम इत्यर्थः। इदानीमित्यर्थे तु प्रसिद्धमेव। 'एतर्हि संप्रतीदानीम्' इत्यमरात्। ततः प्रज्ञादित्वात्स्वार्थेऽण्, विनयादित्वात्स्वार्थे ठगपि। तेन सांप्रतं सांप्रतिकमिति पर्यायौ।

मध्यं दारु । नातिह्रस्वं नातिदीर्घमित्यर्थः । **१३८० द्वीपादनुसमुद्रं यञ् ।** (४-३-१०) समुद्रस्य समीपे यो द्वीपस्तद्विषयाद् द्वीपशब्दाद्यञ् स्यात् । द्वैप्यम्, द्वैप्या । **१३८१ कालाट्ठञ् ।** (४-३-११) कालवाचिभ्यष्ठञ् स्यात् । मासिकम् । सांवत्सरिकम् । सायंप्रातिकः । पौनःपुनिकः । कथं तर्हि 'शार्वरस्य

उत्कर्षापकर्षहीनत्वात्मकसाम्ये वर्तते, तैत्तिरीये 'अनासश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथवा एष संप्रति यज्ञो यत्पञ्चरात्रः' इत्यत्र तथा दर्शनात् । पञ्चरात्रो न न्यूनो नाप्यतिरिक्तः, सम इत्यर्थः । संप्रतिशब्दात् स्वार्थे विनयादित्वाट्ठञि सांप्रतिकम् । प्रज्ञादित्वात् स्वार्थे अणि तु सांप्रतमित्यपि भवति । 'एतर्हि संप्रति' इति कोशादिदानीमित्यर्थेऽपि । प्रकृते तु साम्यं विवक्षितम् । **द्वीपादनु ।** अनुसमुद्रमिति सामीप्ये अव्ययीभावः । अनुसमुद्रमिति सप्तम्यन्तम्, विद्यमानादित्यध्याहार्यम्, तदाह--**समुद्रस्य समीप इति । द्वैप्येति ।** 'यञश्च' इति ङीप् तु न, अनपत्याधिकारस्थाद् नेति तन्निषेधात् । **कालाट् ठञ् ।** 'कालशब्दस्यैव न ग्रहणम्, किन्तु कालशब्दस्य कालविशेषवाचकानां च ग्रहणम्' इति 'तदस्य परिमाणम्' 'संख्यायाः–' इति सूत्रभाष्ये स्पष्टम् । तदाह—**कालवाचिभ्य इति सायंप्रातिकः पौनःपुनिक इति ।**

उत्कर्षेत्यादि । न्याय्ये विद्यमान एव संप्रतिशब्दोऽत्र गृह्यत इति भावः । **द्वीपादनु ।** समुद्रं समया अनुसमुद्रम् । 'अनुर्यत्समया' इत्यव्ययीभावः । सप्तम्यन्तं चेदम् । विद्यमानक्रियाद्वारा द्वीपविशेषणमित्याशयेनाह—**समुद्रसमीपे यो द्वीप इति ।** कच्छाद्यणो मनुष्यवुञश्चापवादोऽयम् । अनुसमुद्रं किम्, द्वैपमन्यत् । कच्छाद्यण् । द्वैपको मनुष्यः, 'मनुष्यतत्स्थयोः–' इति वुञ् । **द्वैप्येति** 'यञश्च' इति ङीन्न भवति । 'अपत्याधिकारस्थादेव यञो ङीप्' इति प्रागेवोक्तत्वात् । **कालाट्ठञ् ।** स्वरूपस्यैव न ग्रहणं संधिवेलादिसूत्रेण संधिवेलात्रयोदशीचतुर्दशीप्रभृतिभ्योऽर्द्धेभ्योऽपि ठञ्बाधनार्थमण्विधानात् । किंतु सर्वेषामपि कालवाचिनां ग्रहणमित्याशयेनाह— **कालवाचिभ्य इति ।** यत्तु स्वरूपस्य पर्यायाणां च न ग्रहणमिति पदमञ्जर्यादिषु स्थितम्, तदसत् 'कालिकः सम्बन्धः, कालिकी व्याप्तिः' इत्यादिप्रयोगानापत्तेः । न च विशेषाणामेव ग्रहणे सन्धिवेलादिसूत्रेण सन्धिवेलादिभ्योऽण्विधानं ज्ञापकमिति वाच्यम्, तस्य स्वरूपमात्रग्रहणनिरासकत्वेनापि साफल्यात् । गौणमुख्यन्यायस्त्विह नाश्रीयते । तेन कदम्बपुष्पसाहचर्यात्कदम्बपुष्पः कालः, व्रीहिपलालसाहचर्याद् व्रीहिपलालः कालः, तत्र भवं कादम्बपुष्पिकं व्रैहिपलालिकमित्याकरः । अत्र हि प्रमाणं सन्धिवेलादिसूत्रे अनेन कालग्रहणेन नक्षत्राणां विशेषणमेवेत्याहुः । न च पुष्पादिशब्दानां कालो मुख्य एवार्थः, 'लुबविशेषे' इति व्युत्पादनात् । तथा च कालविशेषण-

तमसो निषिद्धये ' इति कालिदासः। ' अनुदितौषसरागा ' इति भारविः। समानकालीनं प्राक्कालीनमित्यादि च । ' अपभ्रंशा एवैते ' इति प्रामाणिकाः। 'तत्र जातः' (सू १२१३) इति यावत्कालाधिकारः। **१३८२ श्राद्धे शरदः।** (४-३-१२) ठञ् स्यात् । ऋत्वणोऽपवादः । शारदिकं श्राद्धम्। **१३८३ विभाषा रोगातपयोः।** (४-३-१३) शारदिकः शारदो वा रोग आतपो वा। 'एतयोः' किम्-शारदं दधि। **१३८४ निशाप्रदोषाभ्यां च** (४-३-१४) वा ठञ् स्यात् नैशिकम्, नैशम् । प्रादोषिकम्, प्रादोषम् । **१३८५ श्वसस्तुट् च।** (४-३-१५) श्वस्शब्दाट्ठञ् वा स्यात् । तस्य तुडागमश्च । **१३८६ द्वारादीनां च।** (७-३-४) द्वार, स्वर, स्वाध्याय, व्यल्कश,

'अव्ययानां भमात्रे-' इति टिलोपः। 'सायंचिरम्-' इति ट्युट्युलौ तु न भवतः, 'नस्तद्धिते' इति सूत्रभाष्ये तथा प्रयोगदर्शनात्। **शार्वरस्येति।** शार्वरिकस्येति भाव्यमिति भावः। **अनुदितौषसेति।** औषसिकेति भाव्यमिति भावः। **समानेति।** समानकालिकं प्राक्कालिकमिति भाव्यमित्यर्थः। **प्रामाणिका इति।** केचित्तु अमुकः पुरतः परेद्युरित्यादिवद् एतेऽपि शब्दा अव्युत्पन्नाः, पृषोदरादयो वा साधव इत्याहुः। **इति यावदिति।** व्याख्यानादिति भावः। **श्राद्धे शरदः। ठञ् स्यादिति।** शेषपूरणमिदम्। ननु 'कालाट्ठञ्' इत्येव सिद्धे किमर्थमिदमित्यत आह—**ऋत्वण इति।** 'संधिवेलाद्यृतु-नक्षत्रेभ्योऽण्' इति वक्ष्यमाणस्येत्यर्थः। **शारदिकमिति।** शरदि ऋतौ भवमित्यर्थः। शरच्छब्दस्य संवत्सरवाचित्वे तु पूर्वेणैव सिद्धम्। **विभाषा रोगातपयोः।** 'ठञ्' इति 'शरद' इति चानुवर्तते। **शारदं दधीति।** ऋत्वणिति भावः। **निशाप्रदोषाभ्यां च। वा ठञ् स्यादिति।** शेषपूरणम्। 'कालाट्ठञ्' इति नित्यं प्राप्ते विकल्पोऽयम्। **श्वसस्तुट् च। तस्येति।** प्रत्ययस्येत्यर्थः।

मुक्तार्थे न प्रमाणमिति वाच्यम्, पुष्यादिसमीपस्थचन्द्रमसा युक्ते काले पुष्यादिशब्दानां गौणत्वात्। 'लुबविशेषे' इति शास्त्रमपि गौणवृत्तित्वान्वाख्यापकमेवेति दिक्। एवं स्थिते 'कालवाचिभ्यः-' इति मूलस्य 'कालप्रतिपादकेभ्यः' इति फलितोऽर्थः। **श्राद्धमिति।** भक्त्या क्रियमाणं पित्र्यं कर्मेत्यर्थः। 'प्रज्ञाश्रद्धार्चाभ्योऽणः' इति मत्वर्थीयेन व्युत्पादितः श्रद्धावान्पुरुषस्तु न गृह्यते, अनभिधानात्। **श्वसस्तुट् च।** विभाषेत्यनुवर्तनादाह—**ठञ् वा स्यादिति।** 'ऐषमो ह्यः-' इत्यादिना त्यबपि

१ क्वचित् 'स्वानाम' शब्दपाठोऽप्यत्रोपलभ्यते । क्वचिच्च 'स्वाध्याय' शब्दस्यापि पाठो नास्ति।

स्वस्ति, स्वर्, स्फयकृत्, स्वादु, मृदु, श्वस्, श्वन्, स्व एषां न वृद्धिरैजागमश्च। शौवस्तिकम्। **१३८७ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।** (४-३-१६) सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् स्यात्। सन्धिवेलायां भवं सान्धिवेलम्। ग्रैष्मम्। तैषम्। सन्धिवेला, सन्ध्या, अमावस्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत्। 'संवत्सरात्फलपर्वणोः' (ग सू १२)। सांवत्सरं फलं पर्व वा। सांवत्सरिकमन्यत्। **१३८८ प्रावृष एण्यः** (४-३-१७)

तुटि टकार इत्। उकार उच्चारणार्थः। **द्वारादीनां च**। 'न य्वाभ्याम्–' इति सूत्रं 'पदान्ताभ्याम्' इतिवर्जमनुवर्तते, 'मृजेर्वृद्धिः' इत्यतो 'वृद्धिः' इति च, तदाह—**एषां न वृद्धिरैजागमश्चेति**। द्वारादीनां नादिवृद्धिः, किन्तु यकारवकाराभ्यां पूर्वौ ऐजागमौ स्त इत्यर्थः। अत्र यकारवकारयोरपदान्तत्वाद् 'न य्वाभ्यां पदान्ताभ्याम्–' इत्यप्राप्ते वचनमिदम्। **शौवस्तिकमिति**। श्वस् इत्यव्ययाद् जाताद्यर्थे ठञि इकादेशे तुडागमे वकारात्पूर्वमैजागमेन औकारः। अकारस्य न वृद्धिः। **संधिवेला। कालवृत्तिभ्य इति**। कालाट्ठञ्' इत्यतस्तदनुवृत्तेरिति भाव.। ठञोऽपवादः। **तैषमिति**। तिष्ये भवादीत्यर्थः। 'तिष्यपुष्ययोर्नक्षत्राणि–' इति यलोपः। तिष्ये जात इत्यर्थे 'श्रविष्ठाफल्गुनी–' इति लुग्वक्ष्यते। सन्धिवेलादिगणं पठति—**संधिवेलेत्यादि**। **संवत्सरात्फलपर्वणोरिति**। गणसूत्रमिदम्। **प्रावृष**

विकल्पेन विहितः, आभ्यां मुक्ते त्यप्त्युलावपि स्त एव। **शौवस्तिकमिति**। नन्वन्तरङ्गत्वात् तुटि ठस्य प्रत्ययादित्वाभावात्कर्मठ इत्यत्र ठच इवेकादेशो न स्यात्। न च परत्वादिकादेशे तस्य तुडिति वाच्यम्, आदेशात्प्रागेवान्तरङ्गत्वात्तुटः प्रवृत्तेः। इकादेशस्य त्वाङ्गत्वेन बहिरङ्गत्वात्। सूत्रभङ्गेन तुकि हि क्रियमाणे तु 'इसुसुक्तान्तात्–' इति कादेशप्रसङ्ग इति चेत्। सत्यम्, वुञ्छणादिषु ठचश्चित्त्वेन 'एकादेशोऽन्तरङ्गेभ्यो बलवान्' इति ज्ञापितत्वात्। अन्यथा प्रत्ययाद्युदात्तत्वे कृते एकादेशः स्यादिति किं ठचश्चित्त्वेन। कृते त्विकादेशे प्रत्ययस्वरबाधनाय चित्त्वं प्रयुज्यत इति मनोरमायां स्थितम्। **संधिवेला**। अण्ग्रहणं तु छबाधनार्थम्। अन्यथा 'सन्धिवेलादिभ्यो यथाविहितं प्रत्ययाः स्युः' इत्युक्ते पौर्णमासीशब्दाद् 'वृद्धाच्छः' स्यात्। वचनं तु ठञो बाधनाय स्यादिति भावः। **तैषमिति**। तिष्याद्भवादावण्। जातार्थे तु 'श्रविष्ठाफल्गुनी–' इति लुक् स्यात्। 'सूर्यतिष्य–' इत्यत्र 'तिष्यपुष्ययोर्नक्षत्राणि–' इति वचनाद्यलोपः। **प्रावृष एण्यः**। ऋत्वणोऽपवादः। प्रवर्षतीति प्रावृट्, 'नहिवृति–' इति दीर्घः। तत्र भवः। जाते तु ठपं वक्ष्यति। 'रषाभ्याम्–' इति सिद्धे प्रक्रियालाघवार्थं णकारोच्चारणमित्याहुः। किंच प्रावृषेण्यमाचक्षाणः प्रावृषेण

प्रावृषेण्यः । १२८९ **वर्षाभ्यष्ठक्** (४-३-१८) वर्षासु साधु वार्षिकं वासः । 'कालात्साधुपुष्प्यत्पच्यमानेषु' (सू १४१८) इति साध्वर्थे । १२९० **सर्वत्राण् च तलोपश्च** । (४-३-२२) हेमन्तादण् स्यात्तलोपश्च वेदलोकयोः । चकारादपि ऋत्वण् । हैमनम्, हैमन्तम् । १२९१ **सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ**

एण्यः । ऋत्वणोऽपवादः । **प्रावृषेण्य इति** । प्रावृड् वर्षर्तुः, तत्र भवादित्यर्थः । जाते तु ठप् वक्ष्यते । प्रक्रियालाघवार्थं णकारोच्चारणम् । **वर्षाभ्यष्ठक्** । तृतीयतौ वर्षाशब्दो नित्यं बहुवचनान्तः, 'अप्सुमनःसमासिकतावर्षाणां बहुत्वम्' इति लिङ्गानुशासनसूत्रात् । 'स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः' इत्यमरः । वर्षाशब्दाज्जाताद्यर्थे ठगित्यर्थः । **वर्षासु साध्विति** । हितकारीत्यर्थः । ननु 'तत्र साधुः' इति साध्वधिकारस्य शेषाधिकारबहिर्भूतत्वात्कथं साध्वर्थेऽयं प्रत्यय इत्यत आह— **कालादिति । साध्वर्थ इति** । साध्वर्थेऽपि ठगित्यर्थः । अस्य जाताद्यर्थेषु शैषिकेष्वन्तर्भावादिति भावः । **सर्वत्राण्च** । छन्दसीत्यनुवृत्तिनिवृत्त्यर्थं सर्वत्रग्रहणम् । लोके वेदे चेत्यर्थः । 'हेमन्ताच्च' इति पूर्वसूत्राद् हेमन्तादित्यनुवर्तते । तदाह— **हेमन्तादित्यादिना** । ननु 'सर्वत्राण् तलोपश्च' इत्येव सिद्धे प्रथमचकारो व्यर्थ इत्यत आह—**चकारादिति । हैमनमिति** । हेमन्तेत्यत्र तकारात्प्राग् नकारस्यानुस्वारपरसवर्णौ स्थितौ । तत्र तकाराकारसमुदायस्य लोप इति पक्षे अनिति प्रकृतिभावान्न टिलोपः । तकारस्यैव लोप इति पक्षे तु अकारस्य 'यस्येति च' इति लोपे तस्य आभीयत्वेनासिद्धत्वात् स्थानिवत्त्वाद्वा न टिलोपः । **हैमन्तमिति** ।

इत्यत्र णकारश्रवणार्थमपि तत् । णयन्तात्क्विपि टिलोपणिलोपयलोपाः । **सर्वत्राण्च** । **हेमन्तादिति** । एतच्च 'हेमन्ताच्च' इत्यतोऽनुवृत्तमिति भावः । **हैमनमिति** । अकारविशिष्टस्य तशब्दस्य लोपे 'अन्' इति प्रकृतिभावाद् 'नस्तद्धिते' इति टिलोपो न । तकारस्यैव लोप इति पक्षे तु 'यस्येति च' इत्यल्लोपस्याभीयत्वेनासिद्धत्वात्स्थानिवद्भावाद्वा टिलोपो नेति बोध्यम् । **हैमन्तमिति** । ऋत्वणि तकारलोपो न भवति, तस्य 'सर्वत्राण्-' इति प्रतिपदोक्तेन अणा संनियोगशिष्टत्वात् । एतच्च प्रत्याख्यातं भाष्ये । तथाहि हेमन्तपर्यायो हेमन्शब्दोप्यस्ति 'हेमन्नागनीगन्ति कर्णौ' इत्यादिप्रयोगात्, ततश्च हेमन्हेमन्तशब्दाभ्यामृत्वणि हैमनं हैमन्तमिति रूपद्वयं सिद्धम् । छन्दसि तु 'हेमन्ताच्च' इति ठञा हैमन्तिकमिति तृतीयमपि रूपं सिध्यति । न च विशेषविहितेन ठञा अणो बाधः शङ्क्यः, छन्दसि सर्वविधीनां वैकल्पिकत्वात् । वृत्तिकृता तु 'हेमन्ताच्च' इति सूत्रे सर्वत्रग्रहणमपकृष्य लोकेऽपि हैमन्तिकमिति स्वीकृतम् । **सायंचिरं** । नन्वन्तरङ्गत्वात्प्रथमं तुटि 'मृत्युः' इत्यादाविव त्युशब्दस्य

तुट् च (४-३-२३) सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यः ट्युट्युलौ स्तः तयोस्तुट् च। तुटः प्रागनादेशः, 'अनद्यतने- (सू २१८२) इत्यादिनिर्देशात्। सायंतनम्। चिरंतनम्। प्राह्णप्रगयोरेदन्तत्वं निपात्यते।

ऋत्वणि रूपम्। अत्र न तलोपः, तस्य एतत्सूत्रप्रतिपदोक्तत्वेन संनियोगशिष्टत्वादिति भावः। **सायंचिरम्। चतुर्भ्य इति।** सायं चिरं प्राह्णे प्रगे इत्येभ्य इत्यर्थः। **कालवाचिभ्य इति।** 'कालाट्ठञ्' इत्यतस्तदनुवृत्तेरिति भावः। **तयोरिति।** ट्युट्युलोरित्यर्थः। ननु सायंतनमित्यादौ कथं योरनादेशः। 'युवोरनाकौ' इति ह्यङ्गाधिकारस्थम्। अङ्गात्परयोः यु वु इत्येतयोरनाकौ विधीयेते। प्रकृते च अन्तरङ्गत्वात्तुटि यु इत्यस्य अङ्गात्परत्वाभावादनादेशो न संभवति। नच 'तदागमास्तद्ग्रहणेन गृह्यन्ते' इति न्यायेन त्यु इत्यस्यापि युग्रहणेन ग्रहणात्तस्याङ्गात् परत्वं निर्बाधमिति वाच्यम्, 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया योरेवाऽनादेशप्राप्तेः तस्य च तुटा व्यवहितत्वादङ्गात्परत्वाभावादित्यत आह—**तुटः प्रागनादेश इति।** कुत इत्यत आह—**अनद्यतने इत्यादिनिर्देशादिति।** आदिना 'घकालतनेषु-' इत्यत्र तनेति ग्राह्यम्। **सायतनमिति।** 'षो अन्तकर्मणि' इति धातोर्घञि सायशब्दो दिवसावसाने रूढः, तस्माट्ट्युट्युलौ, तयोरनादेशे तुट् प्रकृतेर्मान्तत्वं निपात्यते। यत्तु सायमिति स्वरादिपठितमव्ययम्, तस्याव्ययत्वादेव ट्युट्युलौ सिद्धौ। **चिरंतनमिति।** अत्रापि प्रकृतेर्मान्तत्वं निपात्यते। अस्मादेव लिङ्गाच्चिरमित्यस्याव्ययेषु पाठः अप्रामाणिक

प्रत्ययतया अङ्गसंज्ञानिमित्तं यो युस्तस्य विधीयमानोऽनादेशो न स्यात्। न चैवं तुगेव क्रियतामिति वाच्यम्, तस्य पूर्वान्तत्वेन विसर्गाभावात्प्रातस्तनमित्यत्र सत्त्वाभावप्रसङ्गात्, अत आह—**तुटः प्रागिति। इत्यादीति।** आदिशब्देन 'घकालतनेषु-' इति ग्राह्यम्। **सायंतनमिति।** स्यतेर्घञि सायशब्दोऽकारान्तो दिवसावसाने रूढः, तस्य प्रत्ययसंनियोगेन मान्तत्वं निपात्यत इति वार्तिककृन्मतम्। भाष्यकृता तु 'मान्ताव्ययम्' इत्याश्रित्य सायंग्रहणं प्रत्याख्यातम्। न चैवं सायशब्दात्कालाट्ठञि अनिष्टरूपप्रसङ्गः। तस्य कालवाचित्वाभावादनभिधानादित्याहुः। **चिरंतनमिति।** चिरशब्दस्यापि प्रत्ययसंनियोगेन मान्तता निपात्यत इति भावः। अत्र वदन्ति—स्वरादौ पाठादव्ययत्वादेव सिद्धे सूत्रे चिरमित्येतदर्थम्। न चादन्ताच्चिरशब्दाट्ठञ् स्यादिति वाच्यम्, अनेन बाधादिति। **एदन्तत्वमिति।** प्राह्णः सोढोऽस्य प्राह्णेतनम् इत्याद्यर्थम्। तत्र हि सप्तमी नास्ति। जातार्थे 'घकालतनेषु-'

प्राह्णेतनम् । प्रगेतनम् । दोषातनम् । दिवातनम् । 'चिरपरुत्परारिभ्यस्त्नो वक्तव्यः' (वा २८४२) । चिरत्नम् । परुत्नम् । परारित्नम् । 'अग्रादिपश्चाड्डिमच्' (वा २८४४) । अग्रिमम् । आदिमम् । पश्चिमम् । 'अन्ताच्च' (वा २८४५) अन्तिमम् । **१३६२ विभाषा पूर्वाह्णापराह्णाभ्याम्** (४-३-२४) आभ्यां ट्युट्युलौ वा स्तः, तयोस्तुट् च । पक्षे ठञ् । पूर्वाह्णेतनम् । अपराह्णेतनम् । 'घकालतनेषु—' (सू ९७५) । इत्यलुक् । पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनम् । अपराह्णतनम् । पौर्वाह्णिकम् । आपराह्णिकम् । **१३६३ तत्र जातः ।** (४-३-२५) सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः ।

इति गम्यते । **प्राह्णेतनमिति** । प्राह्णः सोढोऽस्येति विग्रहः, 'तदस्य सोढम्' इत्यर्थस्य निर्देक्ष्यमाणत्वात् । प्राह्णे जात इत्याद्यर्थे तु 'घकालतनेषु—' इति अलुकैव एदन्तत्वं सिद्धम् । **प्रगेतनमिति** । प्रगच्छतीति प्रगः, तस्मिन् जातादिरित्यर्थः । यत्तु प्रगे इत्यव्ययमेदन्तं प्रातरित्यर्थे तस्य त्वव्ययत्वादेव सिद्धम् । अव्ययेभ्य उदाहरति—**दोषातनमिति** । दोषेत्याकारान्तमव्ययं रात्रौ । **दिवातनमिति** । दिवेत्याकारान्तमव्ययमह्नि । **चिरपरुदिति** । चिर, परुत्, परारि एभ्यः त्न-प्रत्यय इत्यर्थः । **चिरत्नमिति** । ट्युट्युलोरेव प्राप्तयोर्वचनम् । त्नप्रत्ययपक्षे मान्तत्वं न भवति, ट्युट्युलाभ्यां तस्य संनियोगशिष्टत्वात् । परुदिति परारीति चाव्ययं पूर्वस्मिन् पूर्वतरे च वत्सरे क्रमाद्वर्तते । **अग्रादीति** । वार्तिकमिदम् । अग्र, आदि, पश्चाद् एभ्यो डिमच् स्यादित्यर्थः । **पश्चिममिति** । 'अव्ययानां भमात्रे—' इति टिलोपः । **अन्ताच्च** । इदमपि वार्तिकम् । **विभाषा पूर्वाह्ण** । **पक्षे ठञिति** । तथा सति न तुट्, तस्य ट्युट्युल्भ्यां संनियोगशिष्टत्वादिति भावः । तदेवं 'राष्ट्रावार—' इत्यारभ्य एतदन्तैः सूत्रैः राष्ट्रादिप्रकृतिविशेषेभ्यो घादयः प्रत्ययविशेषा अनुक्रान्ताः । अथ तेषां प्रत्ययानामर्थविशेषान् प्रकृतीनां च विभक्तिविशेषान् दर्शयितुमुपक्रमते । **तत्र जातः । सप्तमीसमर्थादिति ।** सप्तम्यन्तात्कृतसंधेरित्यर्थः । तत्रेत्यनेन सप्तम्यन्तस्यैव प्रथमानिर्दिष्टत्वादिति भावः । **अणादय इति ।**

इत्यलुकापि सिद्धेः । **चिरत्नमिति** । सूत्रे चिरशब्दस्योपादानात् ट्युट्युलावपि स्तः । न चैवं सूत्रे चिरशब्दस्य प्रत्याख्यानं न सम्भवतीति वाच्यम्, मान्ताव्ययादेव ट्युट्युल्विधौ तत्सम्भवात् । परुत् पूर्वस्मिन् वत्सरे । परारि पूर्वतरे । **अग्रादीति** । डिमचो डित्त्वं स्पष्टार्थम् । **तत्र जातः** । ननु शेषे इत्यस्य लक्षणत्वोक्तेः 'चाक्षुषं रूपम्, श्रावणः शब्दः' इत्यादाविव जातादिष्वर्थेष्वणादयः सिद्धाः, अधिकाराच्च घादयो-

स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण इत्यादि। १३६४ **प्रावृषष्ठप्** (४-३-२६) एण्यस्यापवादः। प्रावृषि जातः प्रावृषिकः। १३६५ **संज्ञायां शरदो वुञ्।** (४-३-२७) ऋत्वणोऽपवादः। शारदकाः दर्भविशेषा मुद्गविशेषाश्च। १३६६ **उत्तरपदस्य।** (७-३-१०) अधिकारोऽयम्, 'हनस्तः—' (सू २२७४) इत्यस्मात्प्राक्। १३६७ **अवयवादृतोः।** (७-३-११) अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः। अपरहैमनः। 'अवयवात्' किम्—पूर्वासु वर्षासु भवः पौर्ववर्षिकः। 'ऋतोर्वृद्धिमद्विधावववयवानाम्'

अपत्यादिविकारान्तार्थसाधारणा इत्यर्थः। **घादय इति।** 'राष्ट्रावारपार–' इत्यादिभिः विशेषविहिता इत्यर्थः। **प्रावृषष्ठप्।** ठपः पित्त्वम् 'अनुदात्तौ सुप्पितौ' इति स्वरार्थम्। **एण्यस्येति।** 'प्रावृष एण्यः' इति विहितस्येत्यर्थः। एवं च 'प्रावृष एण्यः' इति सूत्रं जातादन्यार्थमिति पर्यवस्यति। **संज्ञायां शरदो वुञ्।** संज्ञायामित्येतत् 'कृतलब्धक्रीत–' इत्येतत्पर्यन्तमनुवर्तत इति केचिदिति वृत्तिकृतः। **उत्तरपदस्य। अधिकारोऽयमिति।** सप्तमे प्रादिवृद्धिप्रकरणे एतदादिसूत्राणि। **अवयवादृतोः। पूर्वपदादिति।** परस्येति शेषः। **ऋतुवाचिन इति।** उत्तरपदस्येति शेषः। **पूर्ववार्षिक इति।** ऋतुविशेषे वर्षाशब्दो नित्यस्त्रीलिङ्गो बहुवचनान्तः। वर्षाणां पूर्वं पूर्ववर्षाः, तत्र जात इत्यर्थः। 'पूर्वापराधरोत्तरम्–' इत्येकदेशिसमासः। **अपरहैमन इति।** हेमन्तस्यापरम् अपरहेमन्तः। तत्र जातादिरित्यर्थः। एकदेशिसमासः। 'सर्वत्राण्च तलोपश्च' इत्यण् तलोपश्च, उत्तरपदादिवृद्धिः। **पूर्वासु वर्षास्विति।** 'तद्धितार्थे–' इति

ऽपि। न च 'जातादिष्वेवाणादयः' इति नियमार्थं जाताद्यर्थनिर्देश आवश्यकः, अन्यथा 'तत्रास्ते, तत्र शेते' इत्याद्यर्थेऽपि प्रत्ययः स्यादिति वाच्यम्, चाक्षुषमित्याद्यसिद्ध्यापत्तेः। 'स्रुघ्ने आस्ते, स्रुघ्ने शेते' इत्यादौ त्वनभिधानादेव तद्धितो न भविष्यति, अङ्गुल्या खनति, वृक्षमूलादागत इत्यादौ यथा। समर्थविभक्तयस्त्वापेक्षादेव लप्स्यन्ते। चाक्षुषमित्यत्र तृतीया यथा, तस्मात् 'तत्र जातः' इत्याद्यर्थनिर्देशो व्यर्थ इति चेत्। मैवम्, 'प्रावृषष्ठप्' इत्याद्यपवादार्थं तदावश्यकत्वात्। ये तु निरपवादा अर्थनिर्देशाः 'कृतलब्धक्रीतकुशलाः' इत्यादयः, ते तु व्यर्था एवेति दिक्। **संज्ञायां शरदः।** समुदायेन चेत्संज्ञा गम्यत इत्यर्थः। संज्ञायां किम्, शारदं सस्यम्। 'संज्ञायाम्' इत्येतत् 'कृतलब्ध–' इत्येतत्पर्यन्तं केचिदनुवर्तयन्तीति वृत्तिकृत्। **पूर्ववार्षिक इत्यादि।** वर्षाणां पूर्वः, हेमन्तस्यापर इति विग्रहे 'पूर्वापराधरोत्तरम्–'

(वा २६०) इति तदन्तविधिः पूर्वत्र । इह तु न, अवयवत्वाभावात् । १३६८ **सुसर्वार्धाज्जनपदस्य** । (७-३-१२) उत्तरपदस्य वृद्धिः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः । 'जनपदतदवध्योः–' (सू १३४८) इति वुञ् । 'सुसर्वार्धदिक्छब्देभ्यो जनपदस्य' (वा २२१) इति तदन्तविधिः । १३६६ **दिशोऽमद्राणाम्** । (७-३-१३) दिग्वाचकाज्जनपदवाचिनो वृद्धिः ।

समासः । आदिवृद्धिरेव, न तु उत्तरपदादिवृद्धिः, पूर्वपदस्य अवयववृत्तित्वाभावात् । ननु कथमिह 'वर्षाभ्यष्ठक्' इति ठक्, प्रत्ययविधौ तदन्तविधिप्रतिषेधात्, तत्राह—**ऋतोरिति** । अवयववाचकानां शब्दानामुपरि स्थिताद् ऋतुवाचकाद् वृद्धिनिमित्तकप्रत्ययविधाने कर्तव्ये तदन्तविधिर्वाच्य इत्यर्थकेन 'येन विधिः–' इति सूत्रभाष्यस्थितवचनेन पूर्वत्र पूर्वमुदाहृते उदाहरणे तदन्तविधिरित्यर्थः । तथा च पूर्ववार्षिक इत्यत्र पूर्वहैमन इत्यत्र चोदाहरणे 'वर्षाभ्यष्ठक्' इति ठक्, 'सर्वत्राण् च तलोपश्च' इत्यण्तलोपौ च सिध्यन्ति । **इह तु नेति** । प्रत्युदाहरणे तु तदन्तविधिर्नास्ति । पूर्वासु वर्षास्विति सामानाधिकरण्येन पूर्वशब्दस्य अवयववृत्तित्वाभावादित्यर्थः । ततश्च प्रत्युदाहरणे पौर्ववर्षिक इत्यत्र 'कालाट्ठञ्' इति ठञेव, नतु ठक्, स्वरे विशेषः । पौर्वहैमन्तिक इत्यत्रापि ठञेवेति भावः । **सुसर्वार्धाज्जनपदस्य** । सु, सर्व, अर्ध इत्येतत्पूर्वस्य जनपदवाचिन इत्यर्थः । **उत्तरपदस्य वृद्धिरिति** । शेषपूरणम् । **सुपाञ्चालक इति** । सुपञ्चालेषु जात इत्यर्थः । **जनपदेति** । 'जनपदतदवध्योः' इत्यनुवृत्तौ 'अवृद्धादपि बहुवचनविषयात्' इति वुञित्यर्थः । ननु 'अवृद्धादपि–' इति प्रत्ययविधौ कथं तदन्तविधिरित्यत आह–**सुसर्वेति** । सु, सर्व, अर्ध, दिक्शब्द एभ्यः परस्य जनपदवाचिन उपरि प्रत्ययविधौ तदन्तविधिरित्यर्थकेन 'येन विधिः–' इति सूत्रभाष्यपठितवचनेन तदन्तविधिरित्यर्थः । **दिशोऽमद्राणाम्** । अमद्राणामिति च्छेदः । **दिग्वाचकादिति** । परस्येति शेषः । **जनपदवाचिन इति** । मद्रवाचिभिन्नस्येत्यपि बोध्यम् । **वृद्धि-**

इत्येकदेशिसमासः । **पूर्वास्विति** । तद्धितार्थे समासः । **ऋतोर्वृद्धिमद्विधाविति** । ऋतुवाचिनः शब्दाद् वृद्धिनिमित्तकप्रत्ययविधाने तदन्तविधिर्वाच्यः, स चेदृतुवाची शब्दोऽवयवेभ्यः पर इत्यर्थः । **पूर्वत्रेति** । पूर्ववार्षिकः, अपरहैमन इत्यत्र । तथा च 'वर्षाभ्यष्ठक्', 'सर्वत्राण् च तलोपश्च' इत्याभ्यां क्रमेण ठगणौ भवतः । वृद्धिमद्विधौ किम्, पूर्वप्रावृषम् । 'प्रावृष एण्यः' इत्यत्र तदन्तविध्यभावादिह ऋत्वणेव । **इह त्विति** । पौर्ववार्षिक इत्यत्र । तथा चेह 'कालाट्ठञ्' इति ठञेवेति भावः । **अवयवत्वाभावादिति** । अन्यथा पूर्वासु वर्षास्विति सामानाधिकरण्यं न संगच्छेतेति भावः । **जनपदतदवध्योरितीति** । तस्मिन्ननुवर्तमाने 'अवृद्धादपि बहुवचनविषयात्'

पूर्वपाञ्चालकः। 'दिशः' किम्-पूर्वपञ्चालानामयं पौर्वपञ्चालः। 'अमद्राणाम्' किम्-पौर्वमद्रः। योगविभाग उत्तरार्थः। **१४०० प्राचां ग्रामनगराणाम्।** (७-३-१४) दिशः परेषां ग्रामवाचिनां नगरवाचिनां चाङ्गानामवयवस्य च वृद्धिः। पूर्वैषुकामशम्यां भवः पूर्वैषुकामशमः। नगरे पूर्वपाटलिपुत्रकः। **१४०१ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन्।** (४-३-२८) पूर्वाह्णकः। अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः। अवस्करकः। **१४०२ पथः पन्थ च।** (४-३-२९) पथि जातः पन्थकः। **१४०३ अमावास्याया वा**

रिति। आदेरिति शेषः। **पौर्वपञ्चाल इति।** अत्र पूर्वशब्दः कालवाचीति भावः। **पौर्वमद्र इति।** 'मद्रेभ्योऽञ्' इत्यञ्। ननु 'सुसर्वार्धादिशो जनपदस्यामद्राणाम्' इत्येकसूत्रमेवास्त्वित्यत आह—**योगविभाग उत्तरार्थ इति।** 'प्राचां ग्रामनगराणाम्' इत्युत्तरसूत्रे दिश एव संबन्धो यथा स्यादित्येवमर्थमित्यर्थः। एकसूत्रत्वे तु सुसर्वादिभ्यः परस्यापि मद्रशब्दस्य पर्युदासः प्रसज्येतेति इहार्थोऽपीत्येके। **प्राचां ग्रामनगराणाम्। दिश इति।** दिशः परे ये प्राच्यग्रामवाचिनः प्राच्यनगरवाचिनश्च तेषामवयवस्यादेर्वृद्धिः स्यादित्यर्थः। **पूर्वैषुकामशम्यामिति।** 'दिक्संख्ये संज्ञायाम्' इति समासः। अण्। संज्ञात्वाद् 'दिक्पूर्वपदात्–' इति ञो न। समुदायस्य ग्रामनामत्वेऽपि उत्तरपदस्यापि तन्नामत्वमस्तीति उत्तरपदादिवृद्धिः। **नगरेति।** उदाहरणसूचनम्। **पूर्वपाटलिपुत्रक इति।** 'पूर्वापरप्रथम–' इति समासः। 'अवृद्धादपि–' इति वुञ्। यद्यपि पाटलीपुत्रशब्दे उत्तरपदे आदिवृद्धिरेव। तथापि पूर्वपदस्य वृद्धिनिवृत्तिः फलम्। **पूर्वाह्णापराह्ण। पूर्वाह्णकः, अपराह्णक इति।** पूर्वाह्णे अपराह्णे च जात इत्यर्थः। 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इत्यस्यापवादः। ट्युट्युलोः ठञश्च विकल्पस्तु जातादन्यार्थे सावकाश इति भावः। **आर्द्रकः। मूलक इति।** आर्द्रायां मूले च जात इत्यर्थः। नक्षत्राणोऽपवादः। **प्रदोषक इति।** 'निशाप्रदोषाभ्याम्' इत्यस्यापवादः। **अवस्करक इति।** औत्सर्गिकस्याणोऽपवादः। **पथः पन्थ च।** पथिन्शब्दाद् वुन् स्यात् प्रकृतेः पन्थादेशश्च। **अमावास्याया वा।** वुनेति शेषः। पक्षे

इत्यनेनेत्यर्थः। **पौर्वमद्र इति।** 'मद्रेभ्योऽञ्' इत्यञ्। **पूर्वाह्णक इति।** 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इत्यस्यापवादः। **आर्द्रकः। मूलक इति।** नक्षत्राणोऽपवादः। **प्रदोषक इति।** 'निशाप्रदोषाभ्यां च' इत्यस्यापवादः। **अवस्करक इति।** औत्सर्गिकस्याणोऽपवादः। ये तु 'संज्ञायाम्' इत्येतत् 'कुलल्ब्ध–' इत्येतत्पर्यन्तमनुवर्तयन्ति तन्मते असंज्ञायां यथायथमणादयो घादयश्च बोध्याः। **अमावास्याया वा।**

(४-३-३०) अमावास्यकः, अमावास्यः। १४०४ अ च। (४-३-३१) अमावास्यः। १४०५ सिन्ध्वपकराभ्यां कन्। (४-३-३२) सिन्धुकः। कच्छाद्यणि मनुष्यवुञि च प्राप्ते, अपकरकः। औत्सर्गिकेऽणि प्राप्ते। १४०६ अणञौ च। (४-३-३३) क्रमात्स्तः। सैन्धवः। आपकरः। १४०७ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्। (४-३-३४) एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक्

संधिवेलादित्वादण्। एकदेशविकृतन्यायादमावस्याशब्दादप्ययं विधिः। **अ च।** अ इति लुप्तप्रथमाकम्। अमावास्याशब्दादकारः प्रत्ययोऽपीत्यर्थः। आदिवृद्ध्यभावः प्रयोजनम्। **सिंध्वपकाराभ्यां कन्। सिन्धुक इति।** सिंधौ जात इत्यर्थः। **कच्छादीति।** 'कच्छादिभ्यश्च' इत्यणि 'मनुष्यतत्स्थयोश्च' इति वुञि च प्राप्ते अयं कन्विधिरित्यर्थः। **अपकरक इति।** अपकरे जात इत्यर्थः। **अणि प्राप्त इति।** कन्विधिरिति शेषः। **अणञौ च क्रमात् स्त इति।** सिन्ध्वपकाराभ्यामिति शेषः। **श्रविष्ठा। एभ्य इति।** श्रविष्ठा, फल्गुनी, अनुराधा, स्वाति, तिष्य, पुनर्वसु, हस्त, विशाखा, अषाढा, बहुला एतेभ्य इत्यर्थः। **जातार्थेति।** प्रकरणलभ्यमिदम्। स्वातिशब्दो ह्रस्वान्त इति कैयटहरदत्तौ। दीर्घान्त इति

सन्धिवेलाद्यणोऽपवादः। 'अमावस्यदन्यतरस्याम्' इति सूत्रेणामापूर्वाद्वसेरर्थेति वृद्धौ पक्षे ह्रस्वत्वं निपात्यत इति ह्रस्वमध्यस्याप्यमावस्याशब्दस्येह ग्रहणम्, प्रकृतिग्रहणे विकृतेरपि ग्रहणात्। अमावस्यकः। आमावस्यः। ये त्विह सूत्रे सन्धिवेलादिषु च ह्रस्वोपधं पठन्ति, तेषां तु दीर्घोपधस्य न स्याद् विकृतिग्रहणेन प्रकृतेरग्रहणादिति हरदत्तादयः। वस्तुतस्तु वृद्धिप्रकृतिभूतस्यानुकरणमिदमित्याश्रित्य ह्रस्वोपधपाठोऽपि समर्थयितुं शक्यत इत्यन्ये। **अ च।** अमावास्याशब्दादकारप्रत्ययः स्यात्। अयमपि पूर्ववदुभाभ्यां बोध्यः। **अमावास्य इति।** ह्रस्वमध्यात्तु अमावस्यः। **अणञौ च।** यथासंख्यार्थो योगविभागः। **श्रविष्ठा।** इह सूत्रे स्वातिशब्दो ह्रस्वान्त इति कैयटहरदत्तादयः। माधवस्तु 'दीर्घान्तः' इति 'अत सातत्यगमने' इति धातावाह। एवं चात्र स्वातीतिष्येति ङीषन्तग्रहणादङीषन्तस्य सौवात इति रूपं भवार्थ इव जातार्थेऽपि माधवमते सिध्यत्येव। कैयटादिमते तु जातार्थे न सिध्यति। लुग्विधायकेऽस्मिन् ङीषन्तग्रहणेऽपि लिङ्गविशिष्टपरिभाषया ङीषन्तादपि अणो लुकः प्रवृत्तेः। **उपसर्जनेति।** अप्रधानमिहोपसर्जनं गृह्यते, न शास्त्रीयमसम्भवात्। ननु 'गोस्त्रियोः–' इति सूत्रेऽप्यप्रधानलक्षणमेवोपसर्जनं गृह्यताम्, 'एकविभक्ति च–' इति शास्त्रीयं न न गृह्यताम्। मैवम्, हरीतक्याः फलानि हरीतक्य इत्यत्र ह्रस्वप्रसङ्गात्। उपसर्जनस्य

स्यात्। १४०८ लुक्तद्धितलुकि। (१-२-४९) तद्धितलुकि सत्युपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात्। अविष्ठासु जातः अविष्ठः। फल्गुन इत्यादि। 'चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्' (वा २८४७)। चित्रायां जाता चित्रा। रेवती रोहिणी आभ्यां 'लुक्तद्धितलुकि' इति लुकि कृते पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीष्। 'फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ' (वा २८४८)। स्त्रियामित्येव। फल्गुनी। अषाढा। 'श्रविष्ठाषाढाभ्यां छण्वक्तव्यः' (वा २८४९)।

'अत सातत्यगमने' इति धातौ माधवः। कृत्तिकावाचिबहुलाशब्दष्टाबन्तः। समाहारद्वन्द्वे ह्रस्वनिर्देशः। **लुक् तद्धितलुकि**। प्रथमस्य द्वितीये इदं सूत्रम्। **उपसर्जनस्त्रीप्रत्ययस्येति**। 'गोस्त्रियोरुपसर्जनस्य' इत्यतस्तदनुवृत्तेरिति भावः। **अविष्ठ इति**। अत्वणो लुकि स्त्रीप्रत्ययस्य निवृत्तिः। 'लुक् तद्धितलुकि' इत्यत्र अप्रधानमेवोपसर्जनम्, नतु शास्त्रीयम्, असंभवादिति भावः। **फल्गुन इति**। फल्गुन्योः जात इत्यर्थः। अणो लुकि स्त्रीप्रत्ययनिवृत्तिः। **इत्यादीति**। अनुराधासु जातः अनुराधः। नक्षत्राणो लुकि स्त्रीप्रत्ययनिवृत्तिः एवमग्रेऽपि। "अनुराधान् हविषा वर्धयन्तः' इत्यादौ छान्दसं पुंस्त्वम्। स्वात्यां जातः स्वातिः। तिष्ये जातः तिष्यः। पुनर्वस्वोर्जातः पुनर्वसुः। हस्ते जातो हस्तः। विशाखयोर्जातो विशाखः। अषाढासु जातः अषाढः। बहुलासु जातः बहुलः। **चित्रेति**। चित्रादिभ्यः परस्य स्त्रीरूपजातार्थकप्रत्ययस्य लुगित्यर्थः। **रेवतीरोहिणीति**। जातायां नक्षत्राणो लुकि सति प्रकृतेर्गौरादिस्त्रीप्रत्ययनिवृत्तौ जातार्थगतस्त्रीत्वे पुनर्ङीश्। ननु रेवती नक्षत्रे रोहिणी नक्षत्रे इति गौरादौ पाठादिह जातार्थवृत्तिभ्यां कथं ङीषित्यत आह—**आभ्यामिति**। रेवतीरोहिणीशब्दाभ्यामित्यर्थः। परस्य स्त्रीत्वविशिष्टजातार्थप्रत्ययस्येति शेषः। **आकृतिगणत्वादिति**। स्त्रीत्वविशिष्टजातार्थवृत्त्योरनयोः पिप्पल्यादौ निवेशे भाष्योदाहरणमेव प्रमाणम्। **स्त्रियामित्येवेति**। तथा भाष्यादिति भावः। फल्गुनी, अषाढा इत्याभ्यां क्रमात् टः अन् च स्त्रीत्वविशिष्टजातार्थे वक्तव्यावित्यर्थः। **फल्गुनीति**। फल्गुन्योर्जातेत्यर्थः। नक्षत्राणोऽपवादः टप्रत्ययः। 'यस्येति च' इति इकारलोपः। जातार्थस्त्रीत्वे टित्त्वाद् ङीप्। **अषाढेति**। अषाढासु जातेत्यर्थः। नक्षत्राणोऽपवादः अन्, 'यस्येति च'

किम्, अवन्ती, कुन्ती, कुरूः। **श्रविष्ठास्विति**। श्रविष्ठा, धनिष्ठा। **इत्यादीति**। आदिशब्दादनुराधः, स्वातिः, तिष्यः, पुनर्वसुः, हस्तः, विशाखः, अषाढः, बहुलः। कृत्तिकावाची बहुलाशब्दष्टाबन्तः, तस्य समाहारद्वन्द्वेन ह्रस्वनिर्देशः सूत्रे। **उपसंख्यानमिति**। लुक इति शेषः। **चित्रेति**। 'लुक्तद्धित–' इति लुकि पुनष्टाप्।

अस्त्रियामपि । आविष्ठीयः । आषाढीयः । १४०९ **ञे प्रोष्ठपदानाम्** । (७-३-१८) प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे ञिति णिति किति च । प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः । 'ञे' इति किम्-प्रोष्ठपदासु भवः प्रौष्ठपदः । बहुवचननिर्देशात्पर्यायोऽपि गृह्यते । भद्रपादः । १४१० **स्थानान्तगोशालखरशालाच्च** । (४-३-३५) एभ्यो जातार्थप्रत्ययस्य लुक् स्यात् । गोस्थाने जातो गोस्थानः । गोशालः । खरशालः । 'विभाषा सेना-' (सू ८२८) इति नपुंसकत्वे ह्रस्वत्वम् । १४११ **वत्सशालाभिजिदश्वयुक्छतभिषजो वा** । (४-३-३६) एभ्यो जातार्थस्य लुग्वा स्यात् । वत्सशाले जातो वत्सशालः, वात्सशाल इत्यादि । 'जातार्थे प्रतिप्रसूतो-

---

इत्याकारलोपः । जातार्थे स्त्रीत्वे टाप् । 'श्रविष्ठाफल्गुनी-' इत्यादिना टानोर्लुक् तु न, विधानसामर्थ्यात् । **छण्वक्तव्य इति** । नक्षत्राणोऽपवादः । विधिसामर्थ्यादस्यापि न लुक् । **अस्त्रियामपीति** । अत्र स्त्रियामिति न संबध्यते, भाष्ये तथोदाहरणादिति भावः । **आविष्ठीय इति** । श्रविष्ठासु जात इत्यर्थः । छण्, ईयः, 'यस्येति च' इत्याकारलोपः । णित्त्वादादिवृद्धिः । **आषाढीय इति** । अषाढासु जात इत्यर्थः । **ञे प्रोष्ठपदानाम्** । आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम् , तदाह—**प्रोष्ठपदानामिति** । ञशब्देन जातार्थप्रत्ययो विवक्षितः, तदाह—**जातार्थ इति** । प्रोष्ठपदानामिति बहुवचनस्य प्रयोजनमाह—**बहुवचनेति** । **भद्रपाद इति** । भद्रपदासु जात इत्यर्थः । **स्थानान्तगोशाल** । **एभ्य इति** । स्थानान्त, गोशाल, खरशाल एतेभ्य इत्यर्थः । **गोस्थान इति** । गोस्थाने जात इत्यर्थः । **गोशाल इति** । गोशाले जात इत्यर्थः । एवं खरशालः । सर्वत्र अणो लुकि नादिवृद्धिः । ननु शालाशब्दस्य स्त्रीलिङ्गत्वाद् ह्रस्वनिर्देशोऽनुपपन्न इत्यत आह—**विभाषा सेनेति** । लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गादपि लुक् । **वत्सशालाभिजित्** । **एभ्य इति** । वत्सशाला, अभिजित् , अश्वयुज् , शतभिषज् इत्येभ्य इत्यर्थः । परस्येति शेषः । **इत्यादीति** । अभिजिति जात आभिजितः, अभिजित् । अश्वयुजो-

---

टानाविति । विधानसामर्थ्यादेतयोर्न लुक् । **स्थानान्त** । गोशालेत्यत्र 'विभाषा सेना-' इति नपुंसकत्वे ह्रस्वत्वं तत्साहचर्यात्खरशालेऽप्येवमेव । न चैवं स्त्रीत्वपक्षे लुङ् न स्यादिति शङ्क्यम् , लिङ्गविशिष्टपरिभाषया तत्रापि लुक्सिद्धेरित्याहुः । यद्यपि टाबन्तयोः पाठेऽप्येकदेशविकृतन्यायेन क्लीबेऽपीष्टं सिध्यति, तथापि लाघवार्थं ह्रस्वपाठः । **नपुंसकत्वे ह्रस्वत्वमिति** । सूत्र इति शेषः । **वत्सशाले जात इति** । वत्सशालायामित्यपि बोध्यम् । **इत्यादीति** । आदिशब्दादभिजित् , आभिजितः,

ऽथवा डिद्वक्तव्यः (वा २६६०)। शातभिषजः, शातभिषः, शतभिषक्। **१४१२ नक्षत्रेभ्यो बहुलम्।** (४-३-३७) जातार्थप्रत्ययस्य बहुलं लुक् स्यात्। रोहिणः, रौहिणः। **१४१३ कृतलब्धक्रीतकुशलाः।** (४-३-३८) 'तत्र' इत्येव। स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः। **१४१४ प्रायभवः।** (४-३-३९) 'तत्र' इत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। **१४१५ उपजानूपकर्णोपनीवेष्ठक्।** (४-३-४०) औपजानुकः। औप-

---

जाते आश्वयुजः, अश्वयुक्। शतभिषजि जातः शातभिषजः, शतभिषक्। **जातार्थ इति।** 'कालाट्ठञ्' इति ठञा निवर्तित औत्सर्गिकोऽण् सन्धिवेलादिसूत्रेण पुनरुत्थितो डिद्वा वक्तव्य इत्यर्थः। 'दृष्टं साम' इति सूत्रभाष्ये इदं वार्तिकं दृष्टम्। **शातभिष इति।** अणि डित्वपक्षे टिलोपः। **नक्षत्रेभ्यो बहुलम्। रोहिण इति।** रोहिण्यां जात इत्यर्थः। नक्षत्राणो लुकि आदिवृद्धिनिवृत्तौ 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययनिवृत्तिः। नच तथा सति तकारस्य नकारोऽपि निवर्तेतेति वाच्यम्, न हि रोहितशब्दोऽयं वर्णविशेषवाचकः, येन 'वर्णादनुदात्तात्--' इति ङीपो निवृत्तौ तकारोऽपि निवर्तेत। किंतु रोहिणीशब्दोऽयमव्युत्पन्नो नक्षत्रविशेषे रूढः। 'रोहिणी नक्षत्रे' इति गौरादिपाठाद् ङीष्। अत एव 'रोहिणी नक्षत्रं प्रजापतिर्देवता' इत्यादौ अन्तोदात्तत्वं श्रूयमाणं न विरुध्यते। अन्यथा 'वर्णानां तणतिनितान्तानाम्' इति आद्युदात्तत्वं स्यादित्यलम्। **कृतलब्ध। तत्रेत्येवेति।** 'तत्र जातः' इत्यतस्तत्रेत्येवानुवर्तते। जात इति तु निवृत्तमित्यर्थः। तथा च कृतो लब्धः क्रीतः कुशलो वेत्यर्थे सप्तम्यन्तादणादयो घादयश्च यथायथं स्युरित्यर्थः। **स्रौघ्न इति।** औत्सर्गिकोऽण्। राष्ट्रे कृतो राष्ट्रिय इत्याद्यप्युदाहार्यम्। **प्रायभवः। तत्रेत्येवेति।** प्रायभव इत्यर्थे सप्तम्यन्तादणादयो घादयश्च यथायथं स्युरित्यर्थः। प्रायशब्दस्य व्याख्यानम्—**बाहुल्येनेति।** तत्र भव इत्येव सिद्धत्वात् प्रत्याख्यातमिदं भाष्ये। **उपजानूपकर्णे।** प्रायभव इत्यर्थे उपजानु उपकर्ण उपनीवि इत्येभ्यः ठगित्यर्थः।

अश्वयुक्, आश्वयुजः। **प्रतिप्रसूत इति।** कालाट्ठञा निवर्तमानो य औत्सर्गिकोऽण् 'सन्धिवेलादि-' सूत्रेण पुनरभ्यनुज्ञात इत्यर्थः। **कृतलब्ध।** ननु कृतक्रीतत्वे जातलब्धत्वयोर्व्याप्ये इति किमनयोर्ग्रहणेन। सत्यम्, कृतत्वक्रीतत्वप्रकारकबोधेऽपि प्रत्ययार्थं तद्ग्रहणम्। अतएव जाते लुग्भाजामपि कृते न लुक्। **प्राय।** कादाचित्कभवनाश्रयः प्रायभवः। तेन 'तत्र भवः' इत्यनेन न गतार्थतेत्याहुः। भाष्ये तु प्रत्याख्यातमेतत्। **'प्रायभवग्रहणमनर्थकं तत्र भवेन कृतत्वात्'** इति। **उपजानूप।** त्रयोऽप्यमी सामीप्येऽव्ययीभावाः। तेषां समाहारद्वन्द्वे सौत्रं पुंस्त्वम्।

कर्णिकः। औपनीविकः। १४१६ संभूते। (४-३-४१) स्रुघ्ने संभवति स्रौघ्नः। १४१७ कोशाड्ढञ्। (४-३-४२) कौशेयं वस्त्रम्। १४१८ कालात्साधुपुष्प्यत्पच्यमानेषु। (४-३-४३) हेमन्ते साधुर्हैमनः प्रावारः। वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः। शरदि पच्यन्ते शारदाः शालयः। १४१९ उप्ते च। (४-३-४४) हेमन्ते उप्यन्ते हैमन्ता यवाः। १४२० आश्वयुज्या वुञ्। (४-३-४५) ठञोऽपवादः। आश्वयुज्यामुप्ता आश्वयुजका माषाः।

उपजान्वादिषु सामीप्येऽव्ययीभावः। **औपजानुक इति**। जानुनः समीपमुपजानु। तत्र प्रायभव इत्यर्थः। उगन्तात्परत्वात् ठस्य कः। **औपकर्णिक इति**। कर्णस्य समीपमुपकर्णम्, तत्र प्रायभव इत्यर्थः। **औपनीविक इति**। नीवेः समीपमुपनीवि, तत्र प्रायभव इत्यर्थः। **संभूते**। तत्रेत्येव। सप्तम्यन्तात्सम्भूतेऽर्थे अणादयो घादयश्च यथायथं स्युरित्यर्थः। संभवः संभावना। **कोशाड्ढञ्। कौशेयं वस्त्रमिति**। कृमिविशेषकोशस्य विकार इत्यर्थः, 'विकारे कोशाड्ढञ्' इति वार्तिकात्। **कालात्साधुपुष्प्यत्**। तत्रेत्येव। साधुः, पुष्प्यत्, पच्यमानम् इत्यर्थेषु सप्तम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः 'पुष्प विकसने' इति दैवादिकाल् लटः शतरि पुष्प्यदिति भवति। **हैमनः प्रावार इति**। 'सर्वत्राण् च तलोपश्च' इत्यणि तलोपः। **वासन्त्य इति**। 'टिड्ढ–' इति ङीप्। शारदा इत्यत्र ऋत्वण्। 'तत्र भवः' इति यावत् कालादित्यनुवर्तते। **उप्ते च**। तत्रेत्येव। कालवाचिनः सप्तम्यन्तादुप्तेऽर्थे यथाविहितं प्रत्ययाः स्युः। **उप्यन्त इति**। 'डुवप् बीजसन्ताने' भूतकालस्त्वविवक्षित इति भावः। **आश्वयुज्या वुञ्**। तत्रोप्त इत्येव। सप्तम्यन्तादाश्वयुजीशब्दाद् उप्तेऽर्थे वुञ् स्यादित्यर्थः। **ठञोऽपवाद इति**। 'कालाट्ठञ्' इति विहितस्येत्यर्थः। **आश्वयुजका माषा इति**। अश्वयुग्भ्यां युक्ता पौर्णमासी

संभूते। इह तन्त्रादिना सम्भावना, आधारपरिमाणादाधेयस्यानतिरेकश्चेति द्वयमप्याश्रीयते। **स्रौघ्न इति**। स्रुघ्ने सम्भाव्यते तत्परिमाणानतिरिक्तो वा सेनादिरित्यर्थः। **कोशात्। कौशेयमिति**। वस्त्रविशेषे योगरूढोऽयम्। कोशे सम्भवस्तु सत्कार्यवादाभिप्रायेण। मतान्तरे तु विकारप्रकरणे 'एण्या ढञ्' इत्यस्यानन्तरं 'कोशाच्च' इति पठितव्यम्। तथा च वार्तिकं 'विकारे कोशाड्ढञ् संभूते ह्यर्थानुपपत्तिः' इति। **कालात्**। पुष्प्यदिति दैवादिकः शत्रन्तस्तदाह—**पुष्प्यन्तीति**। **उप्ते च**। कालादित्येव। योगविभाग उत्तरार्थः। **उप्यन्त इति**। सूत्रे भूतकालोऽतन्त्रमिति भावः। **आश्वयुज्या वुञ्**। ञकारः स्वरार्थ उत्तरत्र वृद्ध्यर्थश्च। **आश्वयुज्यामिति**। अश्विनीनक्षत्रपर्यायः अश्वयुक्, तद्युक्ता पौर्णमासी आश्वयुजी तत्रेत्यर्थः।

१४२१ ग्रीष्मवसन्तादन्यतरस्याम्। (४-३-४६) पक्षे ऋतवण्। ग्रैष्मकम्, ग्रैष्मम्। वासन्तकम्, वासन्तम्। **१४२२ देयमृणे।** (४-३-४७) 'कालात्' इत्येव। मासे देयमृणं मासिकम्। **१४२३ कलाप्यश्वत्थयवबुसाद् वुन्।** (४-३-४८) यस्मिन्काले मयूराः कलापिनो भवन्ति स उपचारात्कलापी। तत्र देयमृणं कलापकम्। अश्वत्थस्य फलमश्वत्थः। तद्युक्तः कालोऽप्यश्वत्थः। यस्मिन्काले अश्वत्थाः फलन्ति, तत्र देयमृणमश्वत्थकम्। यस्मिन्यवबुसमुत्पद्यते तत्र देयमृणं यवबुसकम्। **१४२४ ग्रीष्मावरसमाद् वुञ्।** (४-३-४९) ग्रीष्मे देयमृणं ग्रैष्मकम्। आवरसमकम्। **१४२५ संवत्सराग्रहायणीभ्यां ठञ्च।** (४-३-५०) चाद् वुञ्। सांवत्सरिकम्, सांवत्सरकम्। आग्रहायणिकम्, आग्रहायणकम्। **१४२६ व्याहरति मृगः।** (४-३-५१) कालवाचिनः

आश्वयुजी, तत्रोप्ता इत्यर्थः। **ग्रीष्मवसन्तात्।** ग्रीष्माद् वसन्ताच्च सप्तम्यन्तादुप्ते वुञ् वेत्यर्थः। **देयमृणे। कालादित्येवेति।** तत्रेत्यप्यनुवर्तते। वुञिति निवृत्तम्। सप्तम्यन्तात्कालवाचिनो देयमित्यर्थे यथाविहितं प्रत्ययाः स्युः। तस्मिन् देयद्रव्ये ऋणे सतीत्यर्थः। **मासिकमिति।** 'कालाट्ठञ्'। **कलाप्यश्वत्थ।** कलापिन्, अश्वत्थ, यवबुस एभ्यः कालवाचिभ्यः सप्तम्यन्तेभ्यो देयमृणमित्यर्थे वुन् स्यादित्यर्थः। **कलापकमिति।** वुन्, अकादेशः, 'नस्तद्धिते' इति टिलोपः। **अश्वत्थस्य फलमश्वत्थ इति।** विकारप्रत्ययस्य फले लुगिति भावः। अश्वत्थशब्दस्य प्लक्षादित्वे तु ततः 'प्लक्षादिभ्योऽण्' इति फले अणो विधानसामर्थ्यात् लुगभावे अश्वत्थशब्दः फले लाक्षणिक इति भावः। **ग्रीष्मावरसमाद्वुञ्।** समाशब्दो वत्सरे नित्यस्त्रीलिङ्गबहुवचनः। ग्रीष्म अवरसमा अनयोः समाहारद्वन्द्वात्पञ्चमी। तत्र देयमृणमित्यर्थे आभ्यां वुञित्यर्थः। **आवरसमकमिति।** अवरासु समासु देयमृणमित्यर्थः। 'तद्धितार्थ–' इति समासः। **संवत्सराग्रहायणीभ्यां ठञ् च।** देयमृणमित्यर्थे सप्तम्यन्तादिति शेषः। सन्धिवेलादिगणे 'संवत्सरात् फलपर्वणोः' इति पठितम्। तत्र फले देयर्णत्वेन विवक्षिते प्राप्तः अण् अनेन ठञा बाध्यते।

देयमृणे। ऋणे किम्, मासे देया भिक्षा। **अश्वत्थ इति।** 'फले लुक्'। इह पुँल्लिङ्गनिर्देशो यद्यप्ययुक्तः, तथापि फले अश्वत्थशब्द औपचारिक इत्याशयेन पुँल्लिङ्गप्रयोग इत्याहुः। **ठञ्चेति।** 'संवत्सराग्रहायणीभ्यां वा' इत्येव सुवचम्। न च 'वा' इति वक्तव्ये ठञ्ग्रहणं व्यर्थम्, सन्धिवेलादिषु 'संवत्सरात्फलपर्वणोः' इति पठ्यते, तत्र फले ऋणत्वेन विवक्षिते अणं बाधित्वा ठञेव यथा स्यादिति काशिकादावुक्तमिति वाच्यम्, तस्मै हितास्तद्धिता इत्यन्वर्थसंज्ञाकरणबलेनात्राणप्रत्ययो न भवेदिति वक्तुं

सप्तम्यन्ताच्छब्दायते इत्यर्थे अणादयः स्युः, यो व्याहरति स मृग । निशायां व्याहरति नैशो मृगः, नैशिकः। १४२७ तदस्य सोढम्। (४-३-५२) 'कालात्' इत्येव। निशासहचरितमध्ययनं निशा, तत्सोढमस्य नैशिकः, नैशः। १४२८ तत्र भवः। (४-३-५३) स्रुघ्ने भवः स्रौघ्नः। राष्ट्रियः। १४२९ दिगादिभ्यो यत्। (४-३-५४) दिश्यम्। वर्ग्यम्। १४३० शरीरावयवाच्च। (४-३-५५) दन्त्यम्। कण्ठ्यम्। १४३१ प्राचां नगरान्ते (७-३-२४) प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्य चाचामादेरचो वृद्धि-

व्याहरति मृगः। तत्र कालादित्येव। देयमृणे इति निवृत्तम्। तदस्य सोढम्। अस्मिन्नर्थे प्रथमान्ताद्यथाविहितं प्रत्ययाः स्युः। सोढमित्यस्य अभ्यस्त मित्यर्थः। नैशिकः, नैश इति। 'निशाप्रदोषाभ्यां च' इत्यणठञौ। तत्र भवः। कालादिति निवृत्तम्। अस्मिन्नर्थे सप्तम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः। भवनं सत्ता, जननमुत्पत्तिरिति भेदः। स्रौघ्न इति। औत्सर्गिकोऽण्। राष्ट्रिय इति। 'राष्ट्रावार–' इति घ। दिगादिभ्यो यत्। भव इत्यर्थे सप्तम्यन्तेभ्य इति शेषः। दिश्यमिति। दिशि भवमित्यर्थः। शरीरावयवाच्च। भव इत्यर्थे सप्तम्यन्तेभ्य इति शेषः। दन्त्यमिति। दन्ते भवमित्यर्थः। 'यस्येति च' इत्यकारलोपः। एवं कण्ठ्यम्। प्राचां नगरान्ते। अङ्गस्येत्यधिकृतं नगरान्ते इति सप्तम्यनुरोधेन सप्तम्या विपरिणम्यते। 'उत्तरपदस्य' इत्यधिकृतम्। 'हृद्भगसिन्ध्वन्ते–' इति सूत्रात् 'पूर्वपदस्य' इत्यनुवर्तते। तदयमर्थः—प्राचां यन्नगरं तदन्ते अङ्गे पूर्वपदस्योत्तरपदस्य च अचामादेरचो वृद्धिः स्याद् ञिति णिति किति च तद्धित इति। सुह्मनगरमिति पुण्ड्रनगरमिति च प्राग्देशस्य पूर्वा-

शक्यत्वादिति नव्याः। नैशिक इति। 'निशाप्रदोषाभ्यां च' इति वा ठञ्। तत्र भवः। 'कालात्' इति निवृत्तम्। कालसम्बद्धस्य 'तत्र' इत्यस्य निवृत्तये पुनस्तत्रग्रहणात्। न च पूर्वसूत्रस्थस्य 'तत्' इत्यस्य व्यावृत्तये तत्रग्रहणमस्त्विति वाच्यम्, 'तदस्य–' इति सूत्रस्येत उत्तरत्रापि सुपठत्वात्। यद्यपि भूधातुरुत्पत्तावपि वर्तते तथापीह सत्तार्थ एव वर्तते, 'तत्र जातः' इति पृथग्ग्रहणादिति बोध्यम्। दिगादिभ्यो। 'दिश्, वर्ग, पूग, पक्ष, रहस्, उखा, साक्षिन्, आदि, अन्त, मुख, जघन, मेघ, यूथ, 'उदकात्संज्ञायाम्' न्याय, वंश, कालेत्यादिदिगादिः। मुखजघनयोः पाठोऽत्राशरीरावयवार्थः। सेनाया मुखे जघने च भवं मुख्यम्, जघन्यम्, प्राचां नगरान्ते। सप्तमीनिर्देशाद् 'अङ्गस्य' इत्यधिकृतमपि सप्तम्यन्तेन विपरिणम्यते,

१ 'पूर्वान्तावयवः' इति क.।

ञिति णिति किति च। सुह्मनगरे भवः सौह्मनागरः। पौण्ड्रनागरः। 'प्राचाम्' किम्—मद्रनगरम् उदक्षु, तत्र भवो माद्रनगरः। १४३२ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्। (७-३-२५) जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य तु वा ञिति णिति किति च। कुरुजङ्गले भवं कौरुजङ्गलम्, कौरुजाङ्गलम्। वैश्वधेनवम्, वैश्वधैनवम्। सौवर्णवलजम्, सौवर्णवालजम्। १४३३ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। (४-३-५६) दार्तेयम्। कौक्षेयम्। कलशिर्घटः, तत्र भवं कालशेयम्। १४३४ ग्रीवाभ्योऽण् च। (४-३-५७) चाड्ढञ्। ग्रैवेयम्, ग्रैवम्। १४३५ गम्भीराञ्ञ्यः।

न्तावधिः। मद्रनगरम्। उदग्दिशति। उदग्देशे मद्रनगरं नाम किञ्चिन्नगरमस्तीत्यर्थः। जङ्गलधेनु। जङ्गलाद्यन्तस्याङ्गस्येति। जङ्गल, धेनु, वलज इत्यन्तस्येत्यर्थः। कुरुजङ्गल इति। भवमिति शेषः। कुरुजङ्गलादिशब्दा देशविशेषेषु। दृतिकुक्षि। भव इत्यर्थे दृति, कुक्षि, कलशि, वस्ति, अस्ति, अहि इत्येभ्यः सप्तम्यन्तेभ्य इति शेषः। दार्तेयमिति। दृतौ भवमित्यर्थः। ढञ्, एयः, आदिवृद्धिः, रपरत्वम्। दृतिश्चर्मभस्त्रिका। कौक्षेयमिति। धूमादित्वाद् वुञि प्राप्ते ढञ्। कलशिर्घट इति। 'कलशिर्मथनपात्रम्' इत्यमरव्याख्यातारः। 'वस्तिर्नाभेरधो द्वयोः' इत्यमरः। तत्र भवो वास्तेयः। अस्तीति विभक्तिप्रतिरूपकमव्ययम्। सत्तायां धने चेति न्यासकारो हरदत्तश्च। तत्र भव आस्तेयः। अहिः सर्पः, तत्र भव आहेयः। ग्रीवाभ्योऽण् च। 'शरीरावयवाच्च' इति यतोऽपवादः। ग्रीवाशब्दोऽयं धमनीसंघे वर्तते। तत्र उद्भूतावयवभेदसंघविवक्षायां बहुवचनान्तात्प्रत्यय इति सूचयितुं बहुवचनम्। तिरोहितावयवभेदविवक्षायां तु एकवचनान्तादप्यण्ढञौ स्त एव। गम्भीराञ्ञ्यः। गाम्भीर्यमिति। यञ्विधौ तु स्त्रियां 'प्राचां

तदाह—नगरान्तेऽङ्ग इति। दृतिकुक्षि। दृतिश्चर्मविकारः, शरीरावयवविशेषश्च। कुक्षिशब्दो धूमादिस्ततो 'धूमादिभ्यश्च' इति वुञि प्राप्ते अनेन ढञ्। कलशिर्मन्थपात्रम् 'कलशिमुदधिगुर्वीं बल्लवा लोडयन्ति' इति माघः। 'वस्तिर्नाभेरधो द्वयोः' इत्यमरः। तत्र भवं वास्तेयम्। 'अस्ति' इति तिङन्तप्रतिरूपको निपातः। स च तिङन्तेन समानार्थो भिन्नार्थश्च। आद्यो यथा—अस्तिक्षीरा गौः। द्वितीयो यथा—अस्तिमान्। धनवानित्यर्थः। तदिहाविशेषादुभयोरपि ग्रहणमास्थेयमिति हरदत्तः। अहौ भवमाहेयम्। 'त्रिष्वाहेयं विषास्थ्यादि' इत्यमरः। ग्रीवाभ्योऽण् च। 'शरीरावयवाच्च' इति यतोऽपवादः। ग्रीवाशब्दो धमनीसङ्घाते वर्तते, तत्र उद्भूतावयवसङ्घातविवक्षया सूत्रे बहुवचनम्। तिरोहितावयवसंघातविवक्षायां त्वेकवचनान्तादप्यण्ढञौ स्त

(४-३-५८) गम्भीरे भवं गाम्भीर्यम्। 'पञ्चजनादुपसंख्यानम्' (वा २८९८) पाञ्चजन्यम्। **१४३६ अव्ययीभावाच्च।** (४-३-५९) परिमुखं भवं पारिमुख्यम्। 'परिमुखादिभ्य एवेष्यते' (वा २८९९)। नेह—औपकूलः। **१४३७ अन्तःपूर्वपदाट्ठञ्।** (४-३-६०) 'अव्ययीभावात्' इत्येव। वेश्मनीत्यन्तर्वेश्मम्। तत्र भवमान्तर्वेश्मिकम्। आन्तर्गणिकम्। 'अध्यात्मादेष्ठञिष्यते' (वा २८९९) अध्यात्मं भवं आध्यात्मिकम्। **१४३८ अनुशतिकादीनां च**

ष्फ तद्धितः' इति ष्फः स्यात्। **अव्ययीभावाच्च।** ञ्य इति शेषः। **परिमुखादिभ्य इति।** यद्यपीदं वार्तिकं भाष्ये न दृष्टम्, तथापि दिगादिगणपाठानन्तरं परिमुखादिगणपाठसामर्थ्यादिहाव्ययीभावपदं परिमुखादिपरमिति गम्यते। न ह्यष्टाध्याय्यां परिमुखादिगणस्य कार्यान्तरमस्ति। **औपकूल इति।** उपकूलं भव इत्यर्थः। अव्ययीभावत्वेऽपि परिमुखाद्यनन्तर्भावाद् न ञ्यः। **अन्तःपूर्वपदाट्ठञ्। वेश्मनीत्यन्तर्वेश्ममिति।** विभक्त्यर्थे अव्ययीभावः। 'अनश्च' इति टच्। **आन्तर्वेश्मिकमिति।** ठञ्, इकः, सुब्लुक्, टिलोपः, आदिवृद्धिः। **आन्तर्गणिकमिति।** गणे इत्यन्तर्गणम्। तत्र भवमित्यर्थः। **आध्यात्मिकमिति।** आत्मनीत्यध्यात्मम्। तत्र भवमित्यर्थः। **अनुशतिकादीनां च।**

एव। **ग्रैवेयमित्यादि।** ग्रीवासु भवं ग्रीवायामिति वा विग्रहः। **गम्भीराञ्ञ्यः। पञ्चजनादुपसंख्यानमिति।** पाञ्चजन्यम्। **परिमुखमिति।** यदि परिशब्दादिह वर्जनं गम्यते, तदा 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावः। यदि तु सर्वतोभावः, तदा तस्मादेव निपातनादव्ययीभाव इत्याहुः। **परिमुखादिभ्य एवेति।** अयं भावः—दिगादिगणानन्तरं परिमुख, परिहनु, पर्योष्ठ, पर्युलूखलेत्यादि परिमुखादिगणः पठ्यते, तत्साहचर्यादिह सूत्रे अव्ययीभावशब्देन परिमुखादिरेव गृह्यते। तस्य गणस्य कार्यान्तराभावादिति। नन्वेवं 'परिमुखादेः' इति सूत्रं विशिष्यैव क्रियताम्, किमनेन प्रयासेन। उत्तरत्र 'अव्ययीभावात्' इत्यस्यापेक्षायामपि तत्रैव तत्करणौचित्यादिति चेत्। अत्राह हरदत्तः—'परिमुखादेः' इत्युच्यमाने बहुव्रीहितत्पुरुषेभ्योऽपि ञः स्यात्, अव्ययीभावग्रहणात्तु तेभ्योऽणेव भवतीति। परिमुखादिगणे प्रतिशाखशब्दोऽपि बोध्यः। तथा च 'शाखृ व्याप्तौ' इति धातौ प्रतिशाखं भवं प्रातिशाख्यम्, 'अव्ययीभावाच्च' इति भवार्थे ञ्य इति माधवः। **अन्तर्वेश्ममिति।** 'नपुंसकादन्यतरस्याम्' इति समासान्तष्टच्। **अध्यात्ममिति।** 'अनश्च' इति टच्।

१ आदिपदात् प्रतिशाखं भवं प्रातिशाख्यं व्याकरणम्, तच्च शौनकीयं तैत्तिरीयं कात्यायनीयम् आथर्वणिकं च तत्तच्छाखायां नियतं वर्तते।

(७-३-२०) एषामुभयपदवृद्धिः स्याद् ञिति णिति किति च। आधिदैविकम्। आधिभौतिकम्। ऐहलौकिकम्। पारलौकिकम्। अध्यात्मादिराकृतिगणः। **१४३९ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्।** (७-३-१) एषां पञ्चानां वृद्धिप्राप्तावादेरच आद् ञिति णिति किति च। दाविकम्। देविकाकूले भवा दाविकाकूलाः शालयः। शिंशपाया विकारः शांशपश्चमसः 'पलाशादिभ्यो वा' (सू १५२१) इत्यञ्। दित्यौह इदं दात्यौहम्। दीर्घसत्रे भवं दार्घसत्रम्। श्रेयसि भवं श्रायसम्। **१४४० ग्रामात्पर्यनुपूर्वात्।** (४-३-६१) ठञ् स्यात्। 'अव्ययीभावात्' इत्येव। पारिग्रामिकः। आनुग्रामिकः। **१४४१ जिह्वामूलाङ्गुलेश्छः।** (४-३-६२) जिह्वामूलीयम्। अङ्गुलीयम्। **१४४२ वर्गान्ताच्च।** (४-३-६३) कवर्गीयम्। **१४४३ अशब्दे यत्खावन्यतरस्याम्।** (४-३-६४) पक्षे पूर्वेण छः। मद्वर्ग्यः, मद्वर्गीणः, मद्वर्गीयः। अशब्दे किम्—कवर्गीयो वर्णः। **१४४४ कर्णललाटात्कनलङ्कारे।** (४-३-६५) कर्णिका। ललाटिका। **१४४५ तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः।** (४-३-६६) सुपां

आदिवृद्धिप्रकरणे उत्तरपदस्य, पूर्वपदस्य चेत्यधिकारे इदं सूत्रम्, तदाह—**एषामिति। आधिदैविकमिति।** देवेष्वित्यधिदेवम्, तत्र भवमित्यर्थः। ठञि उभयपदवृद्धिः। **आधिभौतिकमिति।** भूतेष्वित्यधिभूतम्। तत्र भवमित्यर्थः। **ऐहलौकिकमिति।** इह लोके भवमित्यर्थः। **पारलौकिकमिति।** परलोके भवमित्यर्थः। सर्वत्र ठञि उभयपदवृद्धिः। **देविका।** आदिवृद्धिप्रकरणे इदं सूत्रम्। **एषामिति।** देविका, शिंशपा, दित्यवाह्, दीर्घसत्र, श्रेयस इत्येषामित्यर्थः। **वृद्धिप्राप्ताविति।** आदिवृद्धिप्राप्तौ तदपवादत्वेन आदेरच आकारः स्यादित्यर्थः। **दाविकमिति।** देविका नाम नदी, तस्यां भवमित्यर्थः। **दाविकाकूला इति।** उत्तरपदवृद्धिभ्रमनिरासाय इदमुदाहरणम्, अस्य सूत्रस्य तदधिकारबहिर्भूतत्वादिति भावः। **शांशप इति।** इकारस्य आकारः, अञि वृद्धिः, शिंशपाशब्दस्य पलाशादौ पाठात् पाक्षिकोऽञ्। तदभावेऽणित्यर्थः। **दात्यौहमिति।** दित्यवाहशब्दात् 'तस्येदम्' इत्यणि 'वाह ऊठ्' इति संप्रसारणम्, पूर्वरूपम् 'एत्येधत्यूठ्सु' इति वृद्धिः। इकारस्य आदिवृद्ध्यपवाद आकारः। **दार्घसत्रमिति।** 'तस्येदम्' इत्यण्, आदेरीकारस्य आकारः। **श्रायसमिति।** तत्र भव इत्यणि एकारस्य आकारः। **ग्रामात्पर्यनुपूर्वात्। ठञ् स्यादिति।** 'अन्तःपूर्वपदात्—' इत्यतः तदनुवृत्तेरिति भावः। **जिह्वामूलाङ्गुलेश्छः।** 'शरीरावयवाच्च' इति यतोऽ-

---

कर्णललाटात्। यतोऽपवादः। अलङ्कारे किम्, कर्ण्यं ललाट्यम्। **तस्य व्याख्यान**

व्याख्यानः सौपो ग्रन्थः । तैङः । कार्तः । सुप्सु भवं सौपम् । १४४६ **बह्वचोऽन्तोदात्ताट्ठञ्** । (४-३-६७) षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वम् । तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः । १४४७ **क्रतुयज्ञेभ्यश्च** । (४-३-६८) सोमसाध्येषु यागेष्वेतौ प्रसिद्धौ । तत्रान्यतरोपादानेन

पवादः । **वर्गान्ताच्च** । **कवर्गीयमिति** । कादिवर्गे भवमित्यर्थः । **अशब्दे** । वर्गान्तात् छ इति शेषः । **मद्वर्ग्यः, मद्वर्गीण इति** । मत्पक्षे भव इत्यर्थः । **कर्णललाटात्** । 'शरीरावयवाच्च' इति यतोऽपवादः । **कर्णिका ललाटिकेति** । कर्णे ललाटे भवोऽलङ्कार इत्यर्थः । स्त्रीत्वं लोकात् । टापि 'प्रत्ययस्थात्–' इति इत्त्वम् । **तस्य व्याख्यान इति च** । व्याख्यायते अनेनेति व्याख्यानो ग्रन्थः, करणे ल्युट् । तस्य व्याख्यान इति विग्रहे व्याख्यातव्यग्रन्थप्रतिपादकात् षष्ठ्यन्ताद् भव इत्यर्थे च सप्तम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । चकारः 'तत्र भवः' इत्यस्य समुच्चयार्थः । **सौप इति** । औत्सर्गिकोऽण् । **तैङ इति** । तिङां व्याख्यानो ग्रन्थ इत्यर्थः । **कार्त इति** । कृतां व्याख्यान इत्यर्थः । अणि आदिवृद्धौ रपरत्वम् । भवार्थे उदाहरति—**सुप्सु भवं सौपमिति** । नच 'तस्येदम्' 'तत्र भवः' इत्याभ्यामेव सिद्धत्वादिदं सूत्रं व्यर्थमिति वाच्यम्, अर्थद्वयनिर्देशस्य अपवादभूतवक्ष्यमाणठञादिविधानायावश्यकत्वादिति भाष्ये स्पष्टम् । **बह्वचोऽन्तोदात्ताट्ठञ्** । अन्तोदात्ताद्बह्वच उक्तविषये ठञ् स्यात् । अणोऽपवादः । **क्रतुयज्ञेभ्यश्च** । **सोमेति** । सोमलताद्रव्यकयागेषु क्रतुशब्दो यज्ञशब्दश्च प्रसिद्ध इत्यर्थः । तर्ह्यन्यतरग्रहणं व्यर्थम्, बहुवचनेन स्वरूपग्रहणनिवृत्तेरित्यत आह—**तत्रेति** ।

इति च । व्याख्यायते येन स व्याख्यानः । करणे ल्युट् । इतिशब्दो वाक्यार्थं परामृशति । तत्समीपे श्रूयमाणश्चकारः 'तत्र भवः' इति वाक्यार्थमाक्षिपति । नाम प्रतिपादकम्, तच्च शक्त्या लक्षणया वेत्यत्र नाग्रहः । तथा च 'षष्ठ्यन्ताद्व्याख्यानकरणार्थे, सप्तम्यन्तात्तु भवार्थे, व्याख्यातव्यस्य ग्रन्थस्य प्रतिपादकात्प्रत्ययाः स्युः' इति सूत्रार्थः । व्याख्यातव्यनाम्नः किम्, पाटलीपुत्रस्य व्याख्यानी सुकोसला । पाटलीपुत्रो हि तया व्याख्यायते 'ईदृक्सन्निवेशविशिष्टम्' इति । न त्विदं व्याख्यातव्यस्य नाम । ग्रन्थेष्वेव व्याख्येयत्वस्य सुप्रसिद्धत्वात्, नामग्रहणं हि प्रसिद्ध्युपसंग्रहार्थमेव सूत्रे कृतम् । **बह्वचो** । अणोऽपवादः । बह्वचः किम्, द्व्यच्कं वक्ष्यतीत्येकाच् प्रत्युदाहार्यः । सौपम् । तैङम् । अन्तोदात्तात्किम्, संहितायाः संहितम् । 'गतिरनन्तरः' इत्याद्युदात्तोऽयम् । अन्तग्रहणं स्पष्टप्रतिपत्त्यर्थम् । उदात्तादित्युक्तेऽपि वर्णग्रहणे तदन्तग्रहणाद् 'वर्णादनुदात्तात्–' इत्यत्र यथा । **क्रतुयज्ञेभ्यश्च** ।

सिद्धे उभयोरुपादानसामर्थ्यादसोमका अपीह गृह्यन्ते। अग्निष्टोमस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः। वाजपेयिकः। राजसूयिकः। पाकयज्ञिकः। नावयज्ञिकः। बहुवचनं स्वरूपविधिनिरासार्थम्। अनन्तोदात्तार्थ आरम्भः। १४४८ अध्यायेष्वेवर्षेः। (४-३-६९) ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रन्थवृत्तिभ्यो भवे व्याख्याने चाध्याये ठञ् स्यात्। वसिष्ठेन दृष्टो मन्त्रो वसिष्ठः, तस्य व्याख्यानः तत्र भवो वा वासिष्ठिकोऽध्यायः। 'अध्यायेषु' किम्-वासिष्ठी ऋक्। १४४९

गृह्यन्त इति। ततश्च इह क्रतुशब्देन सोमयागाः, यज्ञशब्देन तदितरयागाः विवक्षिता इति भावः। एवं च सोमयागविशेषवाचिभ्यः, तदितरयागविशेषवाचिभ्यश्च उक्तविषये ठञित्यर्थः। **पाकयज्ञिक इति।** औपासनाग्निसाध्याः पार्वणस्थालीपाकादयः पाकयज्ञाः। तेषां व्याख्यानो ग्रन्थः, तेषु भव इति वार्थः। **नावयज्ञिक इति।** नूतनद्रव्यक आग्रयणाख्यो यज्ञो नवयज्ञः। ननु पूर्वसूत्रेण सिद्धे किमर्थमिदमित्यत आह—**अनन्तोदात्तार्थं इति।** वाजपेयशब्दो मध्योदात्तः तैत्तिरीयादौ प्रसिद्धः। यद्यपि अग्निष्टोमशब्दः अन्तोदात्त एव तैत्तिरीये दृष्टः। नवयज्ञशब्दोऽपि षष्ठी-समासत्वात् समासस्वरेणान्तोदात्त एव। तथापि अन्यार्थमिदमन्तोदात्तेष्वपि परत्वात् प्रवर्तत इति न दोषः। **अध्यायेष्वेवर्षेः। वसिष्ठेन दृष्टो मन्त्रो वसिष्ठ इति।** लक्षणयेति भावः। **वासिष्ठिकोऽध्याय इति।** कश्चिद् ग्रन्थविशेषोऽयम्।

अग्निष्टोमस्य व्याख्यान इति। अग्निष्टोमाद्यर्थेषु मन्त्रब्राह्मणकल्पेषु वर्तमाना अग्निष्टोमादिशब्दा इहोदाहरणम्, ग्रन्थानामेव व्याख्येयतया उक्तत्वादित्याहुः। स्तुतिः स्तोमः। अग्नेः स्तोमोऽस्मिन्निति बहुव्रीहिः। 'परादिश्च परान्तश्च' इत्यन्तोदात्तोऽयम्। पीयतेऽस्मिन्निति पेयः। 'कृत्यल्युटो बहुलम्' इत्यधिकरणे यत्। वाजो नाम यवागू-भेदस्तस्य पेयो वाजपेयः। अयं हि कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तः। पेयशब्दस्य 'यतो नावः' इत्युदात्तत्वात्। राज्ञा क्षत्रियेण सूयते, राजा सोमः सूयते अत्रेति वा राजसूयः। 'राजसूयसूर्य-' इति क्यप्। तत एव निपातनात्समासः षष्ठीसमासो वा। अयमप्युत्तरपदप्रकृतिस्वरेण मध्योदात्त एव, धातुस्वरेण सूयशब्दस्याद्युदात्त-त्वात्। असोमकेभ्य उदाहरति—**पाकेति।** अल्पपर्यायः पाकशब्दः। पाकश्चासौ यज्ञश्चेति कर्मधारयः। स च समासस्वरेणान्तोदात्तः। नवैर्व्रीहिभिर्यजनं नवयज्ञः आग्रयणम्। 'यजयाचयतविच्छ-' इति नङ्। 'कर्तृकरणे कृता-' इति समासः। कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। **अनन्तोदात्तार्थं इति।** वाजपेयराजसूयार्थतया अस्मिन्नारब्धे सत्यन्तोदात्तादपि यज्ञाभिधायिनः परत्वादनेनैव भाव्यमित्याग्निष्टोमिक इत्याद्युदाहृतमिति भावः। **अध्यायेष्वेवर्षेः।** एवकारः स्पष्टप्रतिपत्त्यर्थः।

पौरोडाशपुरोडाशात्ष्ठन् । (४-३-७०) पुरोडाशसहचरितो मन्त्रः पुरोडाशः, स एव पौरोडाशः, ततः ष्ठन् । पौरोडाशिकः । पुरोडाशिकः । १४५० **छन्दसो यदणौ** । (४-३-७१) छन्दस्य, छान्दसः । १४५१ **द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्** । (४-३-७२) द्व्यचः—ऐष्टिकः (शैषिकः), पाशुकः । ऋतः—चातुर्होतृकः । ब्राह्मणिकः । आर्चिक इत्यादि । १४५२ **अणृगयनादिभ्यः**

वासिष्ठी ऋगिति । ऋचः अध्यायसमाख्याभावाद् न ठञिति भावः । **पौरोडाश** । उक्तविषय इति शेषः । **पुरोडाशेति** । पुरोडाशशब्दसहितो मन्त्रो लक्षणया पुरोडाश इत्युच्यत इत्यर्थः । **स एव पौरोडाश इति** । प्रज्ञादित्वात्स्वार्थेऽणिति भावः । **पौरोडाशिक इति** । पौरोडाशात् ष्ठनि रूपम् । **पुरोडाशिक इति** । पुरोडाशशब्दात् ष्ठनि रूपम् । षित्त्वाद् ङीष् । पौरोडाशिकी, पुरोडाशिकी । **छन्दसो यदणौ** । तस्य व्याख्याने तत्र भवे चेति शेषः । **छन्दस्यः, छान्दस इति** । छन्दसां व्याख्यानः, तत्र भवो वेत्यर्थः । द्व्यज्लक्षणस्य वक्ष्यमाणस्य ठकोऽपवादः । **द्व्यजृद्ब्राह्मण** । द्व्यच्, ऋत्, ब्राह्मण, ऋक्, प्रथम, अध्वर, पुरश्चरण, नामन्, आख्यात एभ्यष्ठक् स्यात् तस्य व्याख्याने तत्र भवे च । **शैषिक इति** । शेषस्य व्याख्यानः तत्र भवो वेत्यर्थः । **पाशुक इति** । पशुयागप्रतिपादकग्रन्थः पशुः, तस्य व्याख्यानः तत्र भवो वेत्यर्थः । उकः परत्वात् ठस्य कः । **ऋत इति** । उदाह्रियत इत्यर्थः । **चातुर्होतृक इति** । 'चित्तिः स्रुक्' इत्यादयो मन्त्राश्चतुर्होतारस्तैत्तिरीये प्रसिद्धाः । तेषां व्याख्यानः तत्र भवो वेत्यर्थः । **ब्राह्मणिक आर्चिक इति** । ब्राह्मणानि मन्त्रव्यतिरिक्तवेद भागाः, तेषामृचां वा व्याख्यानः तत्र भवो वेत्यर्थः । **इत्यादीति** । प्राथमिकः, आध्वरिकः, पौरश्चरणिकः, नामिकः, आख्यातिकः । **अणृगयनादिभ्यः** । तस्य

वासिष्ठीति । भवार्थेऽण् । **पौरोडाश** । षित्वान्ङीष् । पौरोडाशिकी, पुरोडाशिकी । पुरोदाश्यते इति पुरोडाशः । 'दाशृ दाने' कर्मणि घञ् । इहैव निपातनाद्दस्य डत्वम् । **छन्दसो** । छन्दःशब्दाद्भवव्याख्यानयोरर्थयोर्यदणौ स्तः, द्व्यज्लक्षणस्य ठकोऽपवादः । **छन्दस्य इत्यादि** । इहार्थद्वये यदणभ्यां यथासंख्यं भवत्यस्वरितत्वादिति बोध्यम् । **द्व्यजृत्** । अणोऽपवादः । **चातुर्होतृक इति** । 'पृथिवी होता द्यौरध्वर्युः' इत्यादिमन्त्रस्य चतुर्होतेति नामधेयम् । **इत्यादीति** । आदिशब्दात्प्राथमिकः । आध्वरिकः । पौरश्चरणिकः । **'नामाख्यातग्रहणं सङ्घातविगृहीतार्थम्'** इति वार्तिकम् । तत्र नामशब्दाद् द्व्यच्त्वादेव सिद्धे विगृहीतग्रहणमाख्यातार्थमिति ज्ञेयम् । नामिकः । आख्यातिकः । नामाख्यातिकः । **अणृगयन** । ऋगयना-

(४-३-७३) ठञादेरपवादः। आर्गयनः। औपनिषदः। वैयाकरणः। १४५३ तत आगतः। (४-३-७४) स्रुघ्नादागतः स्रौघ्नः। १४५४ ठगायस्थानेभ्यः। (४-३-७५) शुल्कशालाया आगतः शौल्कशालिकः। १४५५ शुण्डिकादिभ्योऽण्। (४-३-७६) आयस्थानठकश्छादीनां चापवादः। शुण्डिकादागतः शौण्डिकः। कार्कणः। तैर्थः। औदपानः। १४५६ विद्यायोनिसंबन्धेभ्यो वुञ्। (४-३-७७) औपाध्यायकः, पैतामहकः। १४५७ ऋतष्ठञ्।

व्याख्याने तत्र भवे चेति शेषः। **आर्गयन इति**। ऋगयनम् ऋक्संहिता, तस्य व्याख्यानः तत्र भवो वेत्यर्थः। 'बह्वचोऽन्तोदात्तात्' इति ठञि प्राप्ते अण्। **औपनिषद इति**। उपनिषदो व्याख्यानस्तत्र भवो वेत्यर्थः। एवं वैयाकरणः। 'न य्वाभ्याम्–' इत्यैच्। अण्ग्रहणं तु छबाधनार्थम्। अन्यथा परत्वात् मुक्ते छो दुर्वारः स्यादित्याहुः। **तत आगतः**। अस्मिन्नर्थे पञ्चम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः। **स्रौघ्न इति**। औत्सर्गिकोऽण्। **ठगायस्थानेभ्यः**। तत आगत इत्यर्थे इति शेषः। हट्टादिषु स्वामिग्राह्यो भाग आयः। स यस्मिन् गृह्यते तदायस्थानम्, तद्वाचिभ्य इत्यर्थः। **शुण्डिकादिभ्योऽण्**। तत आगत इत्येव। शुण्डिकमायस्थानविशेषः। पूर्वसूत्रविहितठगपवादः। **कार्कण इति**। कृकणादागत इति शेषः। 'कृकणपर्णाद्भारद्वाजे' इति छस्यापवादः। **तैर्थ इति**। धूमादित्वाद्वुञोऽपवादः। **औदपान इति**। अत्र उत्सादित्वादञ् प्राप्तो न भवति, पुनरण्ग्रहणात्। अन्यथा यथाप्राप्तविधाने आयस्थानठकं बाधित्वा अञेव स्यात्। **विद्यायोनि**। तत आगत इत्येव। **औपाध्यायकः, पैतामहक इति**। उपाध्यायात्पितामहाच्च आगत इत्यर्थः। **ऋतष्ठञ्**। ऋदन्ताद्विद्यायोनिसम्बन्धवाचिन इत्यर्थः। तत आगत

दिभ्यो भवव्याख्यानयोरर्थयोरण् स्यात्। **ठञादेरिति**। आदिशब्दाट्ठक्छयोः। **आर्गयन इति**। अयनशब्दो भावसाधनः, तेन समासे 'अनो भावकर्मवचनः' इत्यन्तोदात्तः, अभेदोपचाराद्भाववचनोऽपि ग्रन्थे वर्तते। इह 'बह्वचोऽन्तोदात्तात्' इति ठञ् प्राप्तः। औपनिषद इत्यत्राप्येवम्। विद्यान्यायशिक्षाशब्देभ्यो 'ध्वजृद्ब्राह्मण–' इति ठक् प्राप्तः। व्याकरणशब्दात्तु 'वृद्धाच्छः'। **ठगाय**। एत्यैनं स्वामी, स्वामिनमयमेतीति वाऽऽयः स्वामिग्राह्यो भागः। स यस्मिन्नुत्पद्यते तदायस्थानम्। बहुवचननिर्देशः स्वरूपग्रहणनिरासार्थः। वृद्धाच्छं परत्वादयं बाधते। आपणिकः। आकरिकः। **छादीनां चेति**। कार्कण इत्यत्र 'कृकणपर्णाद्भारद्वाजे' इति छः प्राप्तः। तीर्थशब्दात्तु धूमादित्वाद् वुञ् प्राप्तः। उदपानशब्दस्योत्सादित्वादञ् प्राप्त इत्यर्थः। **विद्यायोनि**। विद्यायोनिकृतः सम्बन्धो येषां तेभ्यो वुञ् स्यादणोऽपवादः। छं तु

(४-३-७८) वुञोऽपवादः । हौतृकम् । भ्रातृकम् । **१४५८ पितुर्यच्च ।** (४-३-७९) चाट्ठञ् । 'रीङृतः' (सू १२३४) 'यस्येति च' (सू ३११) इति लोपः । पित्र्यम्, पैतृकम् । **१४५९ गोत्रादङ्कवत् ।** (४-३-८०) विदेभ्य आगतं बैदम् । गार्गम् । दाक्षम् । औपगवकम् । **१४६० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ।** (७-३-३०) नञः परेषां शुच्यादिपञ्चानामादेरचो वृद्धिः, पूर्वपदस्य तु वा ञिदादौ परे । आशौचम्, अशौचम् । आनैश्वर्यम्,

---

इत्येव । **हौतृकम्, भ्रातृकमिति ।** उकः परत्वात् ठस्य कः । **पितुर्यच्च ।** यति प्रक्रियां दर्शयति—**रीङृत इति । गोत्रादङ्कवत् ।** अङ्के ये प्रत्ययाः ते तत आगत इत्यर्थेऽपि भवन्तीत्यर्थः । **बिदेभ्य आगतमिति ।** विग्रहप्रदर्शनम् । अत्र 'यञञोश्च' इति बहुत्वे अञो लुकि बिदेभ्य इति निर्देशः । **बैदमिति ।** 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' इत्युक्तेरञन्तादिहाप्यर्थे अणि विवक्षिते 'गोत्रेऽलुगचि' इत्यञो लुङ्निवृत्तौ बैदशब्दादण् । 'वृद्धाट्ठक्' इति प्राप्तस्य ठकोऽपवादः । **गार्गमिति ।** यञन्तादण् । **दाक्षमिति ।** इञन्तादण् । **औपगवकमिति ।** उपगोरपत्यमौपगवः, तस्मादागतमित्यर्थः । 'गोत्रचरणाद् वुञ्' इति वुञ् । यद्यपि तस्येदमित्यर्थे अयं वुञ् विहितः, तथाप्यञ्यञिञन्तादङ्केऽपि स दृष्ट इति तस्याप्यत्रार्थे अतिदेशो भवति । न हि 'संघाङ्क–' इति प्रतिपदोक्तस्याण एवात्रातिदेशः । किं तु अङ्के दृष्टस्य सर्वस्यापि, व्याख्यानादिति भावः । **नञः शुचीश्वर ।** आदिवृद्धिप्रकरणे उत्तरपदस्य पूर्वस्य तु वेत्यनुवृत्ताविदं सूत्रम् । **आशौचम्, अशौचम् इति ।**

परत्वाद्बाधते । आचार्यकः । मातामहकः । मातुलकः । **ऋतष्ठञ् ।** 'विद्यायोनिसम्बन्धेभ्यः' इति वर्तते, तदाह—**वुञोऽपवाद इति ।** 'उष्कञ्' इति वक्तव्ये तपरकरणं ठञ्ग्रहणं च चिन्त्यप्रयोजनमिति प्राञ्चः । पैतृकी विद्येत्यत्र ङीबर्थं ठञ्ग्रहणमिति तु तत्त्वम् । न च 'टिड्ढा–' इति सूत्रे कञ्ग्रहणाद् ङीप् सिध्यतीति वाच्यम्, यादृशीतादृशीत्याद्यसिद्धेः । तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणात् 'त्यदादिषु दृशः–' इति कञो द्व्यनुबन्धकत्वात् । तपरकरणं विहाय 'उष्ठञ्' इत्येव सुवचमित्याहुः । **गोत्रादङ्कवत् ।** 'अपत्याधिकारादन्यत्र लौकिकं गोत्रम्' इत्युक्तम् । अपत्यप्रत्ययान्तात् 'तत आगतः' इत्यस्मिन्नर्थे अङ्कवत्प्रत्ययाः स्युः । अङ्के दृष्टस्य सर्वस्यायमतिदेशः, न तु साक्षाद्विहितस्यैवेत्याग्रहः तेन 'गोत्रचरणाद् वुञ्' इति वुञपि लभ्यते । स हि 'तस्येदम्' इति सामान्येन विधीयमानोऽपि अञ्यञिञन्तादन्यत्र अङ्केऽपि दृष्टः । **बैदमित्यादि ।** 'सङ्घाङ्क–' इत्यादिना अङ्कार्थेऽण् विहित इतीहाप्यञ्यञिञन्तादण् । **औपगवकमिति ।** 'गोत्रचरणात्–' इति वुञ् । अङ्के

अनैश्वर्यम् । आक्षैत्रज्ञम्, अक्षैत्रज्ञम् । आकौशलम्, अकौशलम् । आनैपुणम्, अनैपुणम् । **१४६१ हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।** (४-३-८१) समादागतं समरूप्यम् । विषमरूप्यम् । पक्षे गहादित्वाच्छः । समीयम् । विषमीयम् । देवदत्तरूप्यम्, दैवदत्तम्, देवदत्तीयम् । **१४६२ मयट् च ।** (४-३-८२) सममयम् । विषममयम् । देवदत्तमयम् । **१४६३ प्रभवति ।** (४-३-८३) तत इत्येव । हिमवतः प्रभवति हैमवती गङ्गा । **१४६४ विदूराञ्ञ्यः ।** (४-३-८४) विदूरात्प्रभवति

अशुचेरागतमित्यर्थः । तत आगत इत्यणि पूर्वपदस्यादिवृद्धिविकल्पः । उत्तरपदस्य तु नित्या आदिवृद्धिः । एवमग्रेऽपि अक्षेत्रज्ञाद् अकुशलाद् अनिपुणाच्च आगतमित्यर्थो बोध्यः । आनैश्वर्यमित्यत्र तु ब्राह्मणादित्वाद् भावे ष्यञ् । **हेतुमनुष्येभ्यः ।** तत आगत इत्येव । हेतुभ्य उदाहरति—**समादागतमित्यादि** । मनुष्यवाचिन उदाहरति—**देवदत्तरूप्यमिति । मयट् च ।** उक्तविषय इति शेषः । **प्रभवति । तत इत्येवेति ।** आगत इति तु निवृत्तम् । प्रभवतीत्यर्थे पञ्चम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । प्रभवः प्रथमप्रकाशः । **हिमवतः प्रभवतीति ।** हिमवति प्रथमं प्रकाशत इत्यर्थः । 'भुवः प्रभवः' इत्यपादानत्वम् । **विदूराञ्ञ्यः ।** ततः

दृष्ट इतीह्याध्यरणण्न्ताद् वुञ् । **हेतुमनुष्येभ्यो ।** मनुष्यग्रहणमहेत्वर्थम्, बहुवचनं तु स्वरूपविधिनिरासार्थम् । **समरूप्यमिति ।** 'विभाषा गुणे—' इत्यत्र 'विभाषा' इति योगविभागादगुणवचनादपि पञ्चमी । योगविभागे तु 'बाहुलकं प्रकृतेस्तदनुदृष्टेः' इति लिङ्गम् । **मयट् च ।** योगविभागो यथासंख्यनिरासार्थः । टो ङीबर्थः । **हैमवतीति ।** हिमवतः प्रकाशते । तत्र प्रथमं दृश्यत इत्यर्थः । उत्पत्तिवचनस्तु प्रभवतिर्न गृह्यते, 'तत्र जातः' इत्यतो भेदेन निर्देशात् । **वैदूर्यं इति ।** दन्त्यमध्योऽयं शाद्वलवत्, न तु नड्वलवन्मूर्धन्यमध्यः । नन्वत्रार्थासंगतिः । बालवायपर्वतादसौ प्रभवति, विदूरनगरे तु संस्क्रियते । सत्यम्, अतएव समाहितं भाष्ये—'बालवायो विदूरं च प्रकृत्यन्तरमेव वा । न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत्' इति । अस्यार्थः—बालवायशब्दः प्रत्ययं लभते विदूरादेशं च, सूत्रे पठितेनादेशेनानुरूपः स्थानी बालवायशब्द आक्षिप्यते । यथा शिवादिषु पठिताभ्यां विश्रवणरवणादेशाभ्यामनुरूपः स्थानी विश्रवश्शब्द आक्षिप्यते, यथा वा 'पद्दन्—' इत्यादौ पादाद्यादेशानुरूपः स्थानी पाददन्तादिराक्षिप्यते, तद्वत् । **प्रकृत्यन्तरमेवेति ।** विदूरशब्दो नगरस्येव पर्वतस्यापि वाचकोऽस्तीत्यर्थः । एवं चास्मिन्पक्षे 'बालवायात्प्रभवति' इति विग्रहे विदूरशब्दात्प्रत्यय इति व्याख्यानक्लेशो नेति भावः । **न वा इति** वैशब्दोऽक्षमां

वैदूर्यो मणिः । १४६५ तद्गच्छति पथिदूतयोः । (४-३-८५) स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा । १४६६ अभिनिष्क्रामति द्वारम् । (४-३-८६) तद् इत्येव । स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् । १४६७ अधिकृत्य कृते ग्रन्थे । (४-३-८७) तद् इत्येव । शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः । 'शारीरकं भाष्यम्' इति त्वभेदोपचारात् । १४६८ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः । (४-३-८८) शिशूनां क्रन्दनं शिशुक्रन्दः, तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः । यमस्य सभा यमसभम् ।

प्रभवतीत्येव । विदूरशब्दो दन्त्यमध्यः बालवायाख्यदेशपर्यायो विदूरशब्द इति भाष्ये स्पष्टम् । **तद् गच्छति पथिदूतयो**। गच्छतीत्यर्थे द्वितीयान्तात्प्रत्ययाः स्युः, स चेद् गन्ता पन्था दूतो वा इत्यर्थः । **अभिनिष्क्रामति द्वारम्** । **कान्येति** । कान्यकुब्जाख्यजनपदस्य द्वारमित्यर्थः । **अधिकृत्य** । **तदित्येवेति** । अधिकृत्य कृतो ग्रन्थ इत्यर्थे द्वितीयान्तात्प्रत्ययाः स्युरित्यर्थः । **शारीरकमिति** । शरीरस्यायं शारीरो जीवात्मा, तमित्यर्थः । 'तस्येदम्' इत्यणन्तात् स्वार्थे कः । **शारीरकीय इति** । वृद्धत्वाच्छः । **शिशुक्रन्द** । शिशुक्रन्द, यमसभ, द्वन्द्व, इन्द्रजननादि

द्योतयति । तत्र पर्वते विदूरशब्दोऽप्रसिद्ध इति चेद् अयाजित्वरीवध्यवहरेत् । नियतपुरुषापेक्षो हि व्यवहारो दृश्यते, यथा वणिज एव वाराणसीं जित्वरीति व्यवहरन्ति एवं वैयाकरणा एवाद्रिं विदूर इति । **तद्गच्छति** । द्वितीयान्ताद्गच्छतीत्यर्थे प्रत्ययः स्यात्स चेद्गन्ता पन्था वेत्यर्थः । तत्र साध्वसिश्छिनत्ति, काष्ठानि पचन्तीत्यादाविव करणस्य स्वातन्त्र्यविवक्षया पन्थाः कर्ता । **अभिनिष्क्रामति** । द्वितीयान्तात्प्रत्ययः स्याधन्निष्क्रामति तच्चेद् द्वारमित्यर्थः । **स्रौघ्नं कान्यकुब्जद्वारमिति** । स्रुघ्नाभिमुखनिष्क्रमणे करणीभूतमिति फलितोऽर्थः । पूर्ववत्करणस्य कर्तृत्वम् । **तदित्येवेति** । 'अधिकृत्य' इत्येतदपेक्षयात्र द्वितीया । **शारीरकीय इति** । कुत्सितं शरीरं शरीरकं तत्सम्बन्धी शारीरको जीवात्मा तमधिकृत्य प्रस्तुत्य कृतो ग्रन्थः शारीरकीयः चतुर्लक्षणीसूत्रसन्दर्भः । वृद्धाच्छः । अत्र वार्तिकम्— 'लुबाख्यायिकाभ्यो बहुलम्' इति । तादर्थ्ये एषा चतुर्थी । आख्यायिका नाम गद्यरूपो ग्रन्थविशेषः । अतएवाख्यानाख्यायिकयोस्तत्र तत्र भेदेनोपादानम् । आख्यायिकाभिधानाय यः प्रत्यय उत्पन्नस्तस्य बहुलं लुगित्यर्थः । वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता । सुमनोहरा । क्वचिन्न, भैमरथी । अभेदोपचारेण गतार्थत्वान्नेदं वार्तिकमावश्यकमिति मूले नोक्तम् । **शिशुक्रन्द** । अत्र वार्तिकम्—'द्वन्द्वे देवासुरादिभ्यः

क्लीबत्वं निपातनात्। यमसभीयः। किरातार्जुनीयम्। इन्द्रजननादिराकृतिगणः। इन्द्रजननीयम्। विरुद्धभोजनीयम्। **१४६९ सोऽस्य निवासः।** (४-३-८९) स्रुघ्नो निवासोऽस्य स्रौघ्नः। **१४७० अभिजनश्च।** (४-३-९०) स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। यत्र स्वयं वसति स निवासः। यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः। **१४७१ आयुधजीविभ्यश्छः पर्वते।** (४-३-९१) पर्वतवाचिनः प्रथमान्तादभिजनशब्दादस्येत्यर्थे छः स्यात्। हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते हृद्गोलीयाः। 'आयुध' इति किम्—ऋक्षोदः पर्वतोऽभिजनो येषां

एभ्यः छः स्यादधिकृत्य कृते ग्रन्थ इत्यर्थः। **निपातनादिति।** 'सभा राजा' इति तु नपुंसकत्वं न भवति। तत्र 'अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह' इत्युक्तेरिति भावः। **सोऽस्य निवासः।** अस्मिन्नर्थे प्रथमान्तात्प्रत्ययाः स्युरित्यर्थः। 'यत्र संप्रत्युष्यते स निवासः' इति भाष्यम्। **अभिजनश्च।** स इत्यनुवर्तते। पूर्ववद्व्याख्येयम्। 'यत्र पूर्वैरुषितं सोऽभिजनः' इति भाष्यम्। **यत्र स्वयमिति।** उदाहृतभाष्यस्यायमर्थ इति भावः। **आयुधजीविभ्यः।** पर्वतादिति पाठान्तरम्। **अभिजनशब्दादिति।** अभिजनदेशवाचिन इत्यर्थः। आयुधजीविनोऽभिधातुमिति शेषः। सूत्रे 'क्रियार्थोपपदस्य—' इति चतुर्थी। **हृद्गोल इति।** पर्वतविशेषो-

---

प्रतिषेधः'। दैवासुरम्। राक्षोसुरम्। **निपातनादिति।** 'सभा राजा—' इति सूत्रे 'अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह' इत्युक्तत्वात्तेन सूत्रेण क्लीबत्वं न सिध्यतीति भावः। **सोऽस्य निवासः।** स इति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितः प्रत्ययः स्याद्यः प्रथमान्तार्थः स निवासश्चेत्। **स्रुघ्नो निवास इति।** निवासाधिकरणमित्यर्थः। नन्वस्येति कृद्योगे कर्तरि षष्ठी। तथा च विशेषणविशेष्यभावव्यत्यासात् स्रुघ्नाधिकरणवासकर्तेह वृत्त्यर्थः, तथा च 'तत्र भवः' इत्येव सिद्धं किमनेनेति चेत्। अत्राहुः—वासस्य चेतनमात्रकर्तृकतया प्रसिद्धत्वात्प्रकारकृतो भेदोऽस्तीति नास्ति वैयर्थ्यम्। 'वसन्ति हि प्रेम्णि गुणा न वस्तुनि' इत्यादौ तूपचारो बोध्य इति। **अभिजनश्च।** योगविभाग उत्तरार्थः। 'अभिजनाः पूर्वबान्धवाः' इति वृत्तिः। अभिजायते येभ्य इति व्युत्पत्तेरिति भावः। पूर्वबान्धवाः पित्रादयः। प्रज्ञादिः बन्धुशब्दः। पूर्वसूत्रादिह 'निवासः' इत्यनुवृत्तम्। तत्सामानाधिकरण्यादभिजनशब्दस्य तत्सम्बन्धिनि लक्षणा। एवं स्थिते फलितमाह—**यत्र पूर्वैरिति।** **आयुधजीविभ्यः।** तादर्थ्ये एषा चतुर्थी। आयुधजीविभ्य आयुधजीव्यर्थम्, आयुधजीविनोऽभिधातुं प्रत्ययः स्यादित्यर्थः। 'सोस्याभिजनः' इत्यनुवर्तते, पर्वत इति प्रकृतिविशेषणं तदाह—**पर्वतवाचिन इत्यादि।** पर्वत इति किम्, सांकाश्यकाः

ते आर्क्षोदा द्विजाः । १४७२ शण्डिकादिभ्यो ञ्यः । (४-३-९२) शण्डिकोऽभिजनोऽस्य शाण्डिक्यः । १४७३ सिन्धुतक्षशिलादिभ्योऽणञौ । (४-३-९३) सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेऽर्थे । सैन्धवः । तक्षशिला नगरी अभिजनोऽस्य ताक्षशिलः । १४७४ तुदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः । (४-३-९४) तुदी अभिजनोऽस्य तौदेयः । सालातुरीयः । वार्मतेयः । कौचवार्यः । १४७५ भक्तिः । (४-३-९५) 'सोऽस्य' इत्यनुवर्तते । भज्यते सेव्यत इति भक्तिः, स्रुघ्नो भक्तिरस्य स्रौघ्नः । १४७६ अचित्ताददेशकालाट्ठक् । (४-३-९६) अपूपा भक्तिरस्य आपूपिकः । पायसिकः । 'अचित्तात्' किम्-दैवदत्तः । 'अदेशात्' किम्-स्रौघ्नः । 'अकालात्' किम्-ग्रैष्मः । १४७७ महाराजाट्ठञ् । (४-३-९७) माहाराजिकः । १४७८ वासुदेवार्जुनाभ्यां वुन् । (४-३-९८) वासुदेवकः । अर्जुनकः ।

ऽयम् । **आर्क्षोद इति** । अयमपि पर्वतविशेषः । **शण्डिकादिभ्यो ञ्यः** । सोऽभिजन इत्यर्थे प्रथमान्तेभ्य इति शेषः । **सिन्धुतक्ष** । **सैन्धव इति** । सिन्धुर्देशविशेषः, अभिजनोऽस्येति विग्रहः । **तुदीसलातुर** । तुदी, सलातुर, वर्मति, कूचवार एभ्यः प्रथमान्तेभ्यो ढक्, छण्, ढञ्, यक्, एते स्युः अस्याभिजन इत्यर्थे । **भक्तिः** । **अनुवर्तत इति** । सोऽस्य भक्तिरित्यर्थे प्रथमान्तात्प्रत्ययाः स्युरित्यर्थः । **अचित्ताददेश** । देशकालव्यतिरिक्तादप्राणिवाचिनः ठक् स्यादुक्तविषये । **अपूपा भक्तिरिति** । सामान्याभिप्रायं भक्तिरित्येकवचनं वेदाः प्रमाणमितिवत् । **पायसिक इति** । पयो भक्तिरस्येति विग्रहः । **महाराजाट्ठञ्** । सोऽस्य भक्तिरित्यर्थ इति शेषः । **माहाराजिक इति** । महाराजो भक्तिरस्येतिविग्रहः । **वासुदेव** । सोऽस्य भक्तिरित्येव । **वासुदेवक इति** । वासुदेवो भक्तिरस्येति विग्रहः । एवमर्जुनकः । ननु

आयुधजीविनः । 'योपधात्-' इति वुञ् । **शण्डिकादिभ्यो ञ्यः** । शण्डिका सर्वसेनशकेत्यादि । **सिन्धुतक्ष** । सिन्धु वर्णु गन्धार कम्बोजादयः सिन्ध्वादयः, ते तु प्रायेण कच्छादिष्वपि पठ्यन्ते । तेभ्योऽणि सत एव सिद्धे मनुष्यवुञो बाधनार्थं वचनम् । तक्षशिला वत्सोद्धरण बर्बरेत्यादयस्तक्षशिलादयः । **वासुदेवार्जुनाभ्यां वुन्** । छाणोरपवादः । 'अजाद्यदन्तम्' 'अल्पाच्तरम्' इति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तस्याकरणं 'सर्वतोऽभ्यर्हितं पूर्वं निपतति' इति ज्ञापनार्थम् । ननु वसुदेवस्यापत्यमित्यर्थे 'ऋष्यन्धक-' इत्यणि वासुदेवशब्दो निष्पन्नः । तथा च तत्र 'गोत्रक्षत्रियाख्येभ्यः-' इत्युत्तरसूत्रेण वुञेवास्तु, किमनेन वुना । न ह्यत्र वृद्धौ विशेषः, प्रागेव वृद्धत्वात् । न च 'वृद्धिनिमित्तस्य-' इति पुंवद्भावनिषेधो दोषः स्यादिति

१४७९ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्। (४-३-९९) अणोऽपवादः। परत्वाद् वृद्धाच्छं बाधते। ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः। नाकुलकः। बहुलग्रहणान्नेह। पाणिनो भक्तिरस्य पाणिनीयः। **१४८० जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने।** (४-३-१००) जनपदस्वामिवाचिनां बहुवचने जनपदवाचिनां समानश्रुतीनां जनपदवत्सर्वं

वसुदेवस्यापत्यमित्यर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति वाण्ेयत्वादपि वासुदेवशब्दाद् 'गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्' इति वुञैव सिद्धत्वाद्वासुदेवग्रहणं व्यर्थमिति चेत्, सत्यम्—अणन्तो वासुदेवशब्दोऽत्र न गृह्यते। किं तु यस्मिन् समस्तं वसति यो वा समस्ते वसति स वासुः, स चासौ देवश्चेति व्युत्पत्त्या वासुदेवशब्दोऽयं भगवति योगरूढ एवेति न दोषः। उक्तं च भाष्ये—'नैषा क्षत्रियाख्या संज्ञैषा तत्रभवतः' इति। **गोत्रक्षत्रिय**। गोत्रप्रत्ययान्तेभ्यः क्षत्रियवाचिभ्यश्च उक्तविषये बहुलं वुञ् स्यादित्यर्थः। इह न पारिभाषिकं गोत्रम्। **छं बाधत इति**। औपगवक इत्यादाविति शेषः। **ग्लुचुकायनिरिति**। 'प्राचामवृद्धात्–' इति फिनि ग्लुचुकायनिशब्दः। **नाकुलक इति**। क्षत्रियाख्योदाहरणम्। **जनपदिनाम्**। बहुवचने परे ये जनपदेन समानशब्दाः–जनपदवाचिशब्देन समानः शब्दः श्रवणं येषां तथाविधाः,तेषां जनपदिनाम्–जनपदस्वामिवाचिनाम्, जनपदवद्–जनपदे इव सर्वं स्यादित्यर्थः। 'जनपदतदवध्योश्च' इति प्रकरणे ये प्रत्यया विहिताः, ते भवन्ति। प्रकृतयोऽपि तथैव भवन्तीति तु सर्वशब्दाल्लभ्यते। तदाह—**जनपदस्वामिवाचिनामित्यादिना**। **अङ्गा जनपद इति**। दृष्टान्तार्थमिदम्। अङ्गनाम्नां राज्ञां निवासो जनपदः अङ्गाः, 'जनपदे लुप्' इति चातुरर्थिकस्य लुप्। स जनपदो भक्तिरस्येत्यर्थे 'जनपदतदवध्योश्च'

वाच्यम्, वुन्यपि 'न कोपधायाः' इति निषेधस्येष्यमाणत्वात्। न वा स्वरे विशेषः, 'ञ्नित्यादिर्नित्यम्' इति तुल्यस्वरत्वात्। नापि 'अभ्यर्हितं पूर्वम्' इति ज्ञापनमेव तत्फलमिति वाच्यम्, तथात्वे हि पूर्वनिपातप्रकरणे 'अभ्यर्हितम्' इत्येव लाघवात्कुर्यादिति चेत्। अत्र भाष्यम्—'संज्ञैषा तत्र भगवतः' इति। अयं भावः—'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते॥' इति स्मृतेः परमात्मा इह वासुदेवः, सर्वत्रासौ वसति, सर्वमत्र वसतीति वा व्युत्पत्त्या वासुः, बाहुलकादुण्, वासुश्चासौ देवश्चेति विग्रहः। तथा च नायं गोत्राख्या, नापि क्षत्रियाख्येति युक्त एव वुन्विधिः। 'अभ्यर्हितं पूर्वम्' इति तु प्रसङ्गाज्ज्ञापितम्, तदप्यनित्यम्, 'श्वयुवमघोनाम्–' इत्यादिलिङ्गादित्यवधेयम्। **वृद्धाच्छं बाधत इति**। औपगवो भक्तिरस्य औपगवकः। **जनपदिनाम्**। स्वस्वामिभावसम्बन्धे मत्वर्थीयं

स्यात्प्रत्ययः प्रकृतिश्च । 'जनपदतदवध्योश्च' (सू १३४८) इति प्रकरणे ये प्रत्यया उक्तास्तेऽत्रातिदिश्यन्ते । अङ्गा जनपदो भक्तिरस्य आङ्गकः । अङ्गाः क्षत्रियाः भक्तिरस्य आङ्गकः । 'जनपदिनाम्' किम्—पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालः । 'जनपदेन' इति किम्—पौरवो राजा भक्तिरस्य पौरवीयः । १४८१ **तेन प्रोक्तम्** । (४-३-१०१) पाणिनिना प्रोक्तं पाणिनीयम् । १४८२

इति वुञ्प्रत्यये आङ्गक इति यथा, तथा अङ्गदेशस्वामिनः क्षत्रिया अङ्गा भक्तिरस्येत्यर्थे क्षत्रियवाचकादङ्गशब्दाद् वुञि आङ्गक इति रूपमित्यर्थः । **पञ्चाला ब्राह्मणा इति** । अभेदोपचारादिह ब्राह्मणेषु पञ्चालशब्दः । तत्रातिदेशाभावादणेव भवति । **पौरव इति** । पौरवशब्दो न जनपदवृत्तिरिति भावः । 'बहुवचने' किम् ? एकवचनद्विवचनयोः सत्यपि शब्दभेदे अतिदेशो भवति । यथा आङ्गो वा आङ्गौ वा भक्तिरस्य आङ्गक इति । 'प्रकृतिश्चेति' किम् ? मद्राणां राजा माद्रः, 'द्व्यञ्मगध–' इत्यण् । माद्रो भक्तिरस्येत्यर्थे अतिदेशान्माद्रस्य मद्रत्वे सति 'मद्रवृज्योः–' इति कनि माद्रक इति सिध्यति । **तेन प्रोक्तम्** । अस्मिन्नर्थे तृतीयान्ताद् यथाविहितं प्रत्ययाः स्युरित्यर्थः । **पाणिनीयमिति** । व्याकरणमिति शेषः । वृद्धाच्छः । प्रथमं प्रकाशितं प्रोक्त-

---

दर्शयति—**जनपदस्वामिवाचिनामिति । प्रत्ययः प्रकृतिश्चेति** । अनेन सर्वशब्दस्यार्थो दर्शितः । असति सर्वग्रहणे प्राधान्यात्प्रत्ययस्यैवातिदेशः स्यात्, न तु प्रकृतेरिति हरदत्तः । अत्र वार्तिककारः सर्वशब्दस्य प्रयोजनमाह—सर्ववचन प्रकृतिनिर्ह्रासार्थम्, तच्च मद्रवृज्यर्थमिति । अयं भावः—वृद्धिनिमित्तेषु वुञादिष्वतिदिष्टेऽपि प्रकृतिरूपे पुनर्वृद्ध्या भाव्यमिति विशेषस्य तत्र दुर्लभत्वान्मद्रवृज्योः कनि विशेषो बोध्यः । सोऽप्यबहुत्व एवेति निर्ह्रासोपचयोल्पता । तथा हि, मद्राणां राजा 'द्व्यञ्मगध–' इत्यण् । माद्रः । वृजिशब्दाद् 'वृद्धेत्कोशला–' इति ञ्यङ् । वार्ज्यः । स भक्तिरस्येति प्रकृतिनिर्ह्रासे मद्रकः, वृजिकः । 'मद्रवृज्योः कन्' । अन्यथा माद्रकः वार्ज्यक इति स्यात् । **आङ्गक इति** । 'जनपदतदवध्योश्च' । 'अवृद्धादपि–' इति वुञ् । अङ्गशब्दात्स्वामिवाचिनो बहुवचनान्तादणि प्राप्ते वुञतिदिश्यते । **पञ्चाला ब्राह्मणा इति** । अभेदोपचाराद्ब्राह्मणेषु पञ्चालशब्दस्य वृत्तिः । बहुवचनग्रहणं किम्, एकवचनद्विवचनयोः सत्यपि शब्दभेदे अतिदेशो यथा स्यात् । आङ्ग आङ्गौ वा भक्तिरस्य आङ्गकः । इह वृद्धाच्छे प्राप्ते वुञ् । **तेन प्रोक्तम्** । प्रकर्षेणोक्तं प्रोक्तमित्युच्यते, न तु कृतम्, 'कृते ग्रन्थे' इत्यनेन गतार्थत्वात् । **पाणिनिना प्रोक्तमिति** । स्वयमन्येन वा कृतं व्याकरणमध्यापनेनार्थव्याख्यानेन वा प्रकाशितमित्यर्थः । प्रेति किम्, देवदत्तेनाध्यापितं प्रख्यातस्यैव ग्रन्थस्याध्यापनमिति नेहानेन प्रत्ययः ।

तित्तिरिवरतन्तुखण्डिकोखाच्छण् । (४-३-१०२) 'छन्दोब्राह्मणानि-' (सू १२७८) इति तद्विषयता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः। **१४८३ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः** । (४-३-१०३) काश्यपेन प्रोक्तमधीयते काश्यपिनः । **१४८४ कलापिवैशम्पायनान्तेवासिभ्यश्च** । (४-३-१०४) कलाप्यन्तेवासिभ्यः—हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः।

म् । नेह—देवदत्तेनाध्यापितम् । **तित्तिरिवरतन्तु** । तेन प्रोक्तमित्येव । तित्तिरि, वरतन्तु, खण्डिक, उख[1] एभ्य उक्तविषये छण् स्यादित्यर्थः । इत आरभ्य 'तैनैकदिक्' इतिपर्यन्तं प्रोक्ते वेदे भवन्ति, 'शौनकादिभ्यः छन्दसि' इति छन्दोग्रहणस्य ततः पूर्वं तत उत्तरं चापकर्षानुवृत्त्योरभ्युपगमात् । अत्र छणादिप्रत्ययान्तानामेषां केवलानां न प्रयोगः । किंत्वध्येतृवेदितृप्रत्ययशिरस्कानामेवेत्याह— **छन्दोब्राह्मणानीति । तद्विषयतेति** । अध्येतृवेदितृप्रत्ययशिरस्कत्वनियम इत्यर्थः। **तैत्तिरीया इति** । प्रोक्ते वेदे छण् , ईयः । तैत्तिरीयः शाखाभेदः, तमधीयते विदन्ति वेत्यर्थे अण् । 'प्रोक्ताल्लुक्' इति तस्य लुगिति भावः । वारतन्तवीयाः, खाण्डिकीयाः । औखीयाः । तित्तिरिणा प्रोक्तः श्लोक इत्यत्र तु न, छन्दसीत्यनुवृत्तेः । छन्दःशब्देन च कल्पसूत्राणामपि ग्रहणम् , तेषां सर्वशाखागतविधिवाक्यसंग्रहात्मकत्वात् । **काश्यप** । तेन प्रोक्तमित्येव । छस्यापवादः । **काश्यपिन इति** । काश्यपशब्दाद् णिनिः । णकार इत् , नकारादिकार उच्चारणार्थः । काश्यपिन्शब्दात् 'प्रोक्ताल्लुक्' इत्यध्येतृप्रत्ययस्याणो लुगिति भावः । एवं कौशिकिनः । 'ऋषिभ्यां' किम् ? इदानींतनेन काश्यपेन प्रोक्तं काश्यपीयम् । **कलापि** । तेन प्रोक्तमित्येव । कलापिशिष्यवाचिभ्यो वैशम्पायनशिष्यवाचिभ्यश्च णिनिः स्यादित्यर्थः। **कलाप्यन्तेवासिभ्य इति** । उदाह्रियत इति शेषः । **हारिद्रविण**

तित्तिरिवर । अणोऽपवादः । **तद्विषयतेति** 'शौनकादिभ्यश्छन्दसि' इत्यत्रास्यानुवृत्तेस्तित्तिरिणा प्रोक्ताः श्लोका इत्यत्र न भवतीति भावः । **तैत्तिरीया इति** । 'प्रोक्ताल्लुक्' इत्यध्येतृप्रत्ययस्य लुक् । एवमग्रेऽपि । **काश्यप** । छस्यापवादः । णकार उत्तरत्र वृद्ध्यर्थः । ननु 'वृद्धिनिमित्तस्य-' इति पुंवद्भावनिषेधोऽत्र फलमस्तीति चेत् । अत्राहुः—णिन्यन्तस्याध्येतृवेदितृविषयत्वेन स्त्रियामप्रवृत्तेः । प्रवृत्तावपि 'जातेश्च' इति सिद्धत्वात्, चरणत्वेन जातित्वादिति । ऋषिभ्यामिति किम्, इदानींतनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयम्। **कलापिवैशम्पायन** । अणोऽपवादः । छं तु परत्वाद्बाधते । कलाप्यन्तेवासिनश्चत्वारः । हरिद्रु, छगली, तुम्बुरु,

1 'उखा' इति क.

वैशम्पायनान्तेवासिभ्यः—आलम्बिनः । १४८५ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । (४-३-१०५) तृतीयान्तात्प्रोक्तार्थे णिनिः स्याद् यत्प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मण-कल्पास्ते भवन्ति । पुराणेन चिरन्तनेन मुनिना प्रोक्ताः । भल्लु, भाल्लविनः । शाट्यायन–शाट्यायनिनः । कल्पे, पिङ्ग–पैङ्गी कल्पः । 'पुराण' इति किम्–

इति । हरिद्रुर्नाम कलापिनः शिष्यः । ततः प्रोक्ते णिनिः, ओर्गुणः, आदिवृद्धिः । हारिद्रविन्शब्दादध्येतृणः 'प्रोक्ताल्लुक्' इति लुगिति भावः । हरिद्रुः, छगली, तुम्बुरुः, उलप इति चत्वारः कलापिशिष्याः । तुम्बुरुणा प्रोक्तमधीयते तौम्बुरविणः । छगलिनस्तु ढिनुग्वक्ष्यते, औलपिनः । **वैशम्पायनान्तेवासिभ्य इति ।** उदाह्रियत इति शेषः । **आलम्बिन इति ।** आलम्बिः, कलिङ्गः, कमलः, ऋचाभः, आरुणिः, ताण्ड्यः, श्यामायनः, कठः, कलापी इति नव वैशम्पायनशिष्याः । तत्र आलंबिशब्दाद् अध्येतृणः प्रोक्ते णिनिः । आलम्बिन्शब्दादध्येतृणः 'प्रोक्ताल्लुक्' इति लुक् । आलम्बिनः, कालिङ्गिनः, कामलिनः, आर्चाभिनः, आरुणिनः, ताण्डिनः । अत्र 'आपत्यस्य-' इति यलोपः । श्यामायनिनः । कठात्तु लुग्वक्ष्यते । कलापिनस्त्वण् वक्ष्यते । वैशम्पायनशिष्यः कलापी । तथा च कलाप्यन्तेवासिनां वैशम्पायनशिष्यत्वादेव सिद्धे पृथग्ग्रहणात् तच्छिष्यशिष्याणां न ग्रहणमिति भाष्ये स्पष्टम् । **पुराणप्रोक्तेषु ।** 'तेन प्रोक्तम्' इति 'णिनिः' इति चानुवर्तते । मन्त्र-व्यतिरिक्तवेदभागा ब्राह्मणानि । बोधायनादिकल्पसूत्राणि कल्पाः । तथाभूतेषु पुरातनमुनिप्रोक्तेषु ग्रन्थेषु वाच्येषु तृतीयान्ताण्णिनिः स्यादित्यर्थः । तदाह—**तृतीयान्तादिति । यत्प्रोक्तमिति ।** सामान्याभिप्रायमेकवचनम् । प्रत्ययाभिधेयं यत्प्रोक्तं तत्पुरातनमुनिप्रोक्तब्राह्मणकल्पात्मकं चेदिति यावत् । पुराणप्रोक्तमित्येतद् व्याचष्टे । **पुराणेनेति ।** ब्राह्मणे उदाहरति—**भल्लु-भाल्लविन इति ।** भल्लु इति प्रकृतिनिर्देशः । भल्लुना पुरातनमुनिना प्रोक्तान् ब्राह्मणभागानधीयते इत्यर्थे प्रोक्तार्थणिनिः । भाल्लविन्शब्दादध्येतृणो लुकि भाल्लविन इति रूपमिति भावः । ब्राह्मणे उदाहरणान्तरमाह—**शाट्यायन-शाट्यायनिन इति ।** शाट्यायनेति प्रकृतिनिर्देशः । शाट्यायनेन पुरातनमुनिना प्रोक्तान् ब्राह्मणभागान् अधीयते इत्यर्थे प्रोक्तार्थणिनिप्रत्यये शाट्यायनिन्शब्दादध्येतृणो लुकि शाट्यायनिन इति रूपमित्यर्थः । **कल्प इति ।** उदाहियत इति शेषः । **पिङ्ग-पैङ्गी कल्प इति ।**

उलप इति । वैशम्पायनान्तेवासिनस्तु नव । आलम्बिः, कलिङ्गः, कमलः, ऋचाभः, आरुणिः, ताण्ड्यः, श्यामायनः, कठः, कलापी इति । **हारिद्रविण इति ।** एवं तौम्बुरविणः, औलपिनः । छगलिनस्तु ढिनुकं वक्ष्यति । **आलम्बिन इति ।**

याज्ञवल्कानि ब्राह्मणानि। आश्मरथः कल्पः। अणि 'आपत्यस्य–' (सू १०८२) इति यलोपः। **१४८६ शौनकादिभ्यश्छन्दसि** । (४-३-१०६) छन्दस्यभिधेये एभ्यो णिनिः । शौनकेन प्रोक्तमधीयते शौनकिनः । **१४८७ कठचरकाल्लुक्** । (४-३-१०७) आभ्यां प्रोक्तप्रत्ययस्य लुक्स्यात्। कठेन प्रोक्तमधीयते कठाः । चरकाः। **१४८८ कलापिनोऽण्** (४-३-१०८) कलापिना प्रोक्तमधीयते कालापाः। 'नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम्' (वा ४१८३) इत्युपसंख्यानाट्टिलोपः । **१४८९ छगलिनो ढिनुक्**।

पिङ्गेति प्रकृतिनिर्देशः। पिङ्गेन पुरातनमुनिना प्रोक्त इत्यर्थे णिनौ रूपम्। 'छन्दोब्राह्मणानि च तद्विषयाणि' इत्यध्येतृप्रत्ययान्तत्वनियमस्तु कल्पेषु न सर्वत्र प्रवर्तत इति 'छन्दोब्राह्मणानि–' इति सूत्रे भाष्ये स्पष्टम्। **याज्ञवल्कानि ब्राह्मणानीति**। याज्ञवल्क्येन प्रोक्तानीत्यर्थः। **आश्मरथः कल्प इति**। आश्मरथ्येन प्रोक्त इत्यर्थः। **यलोप इति**। यज्ञवल्काश्मरथशब्दौ कण्वादी। ताभ्यां यञन्ताभ्याम् अणि 'आपत्यस्य च–' इति यलोप इत्यर्थः। याज्ञवल्क्याश्मरथ्यावाधुनिकावित्यभिमानः। भाष्ये तु शाट्यायनादितुल्यकालत्वाद् याज्ञवल्क्यादिभ्यो णिनिप्रतिषेध इति तद्विषयता च नेति वचनद्वयमारब्धमित्यास्तां तावत । **कठचरकाल्लुक्** । **प्रोक्तप्रत्ययस्येति**। प्रकरणलभ्यम् । **कठा इति** । वैशम्पायनान्तेवासित्वलक्षणणिनेर्लुक् । अध्येत्रणस्तु 'प्रोक्ताल्लुक्' इति लुक् । **चरका इति** । चरकेण प्रोक्तमधीयत इत्यर्थः। प्रोक्ताणोऽनेन लुकि अध्येत्रणः प्रोक्ताल्लुक् । **कलापिनोऽण्**। 'तेन प्रोक्तम्' इत्येव। वैशम्पायनशिष्यत्वात् प्राप्तस्य णिनेरपवादः। **कालापा इति**। कलापिन्शब्दादणि टिलोपे कालापशब्दादध्येतृप्रत्ययस्य छस्य

एवं कालिङ्गिनः, कामलिनः, आर्चाभिनः, आरुणिनः, ताण्डिनः, श्यामायनिनः। कठाल्लुकं वक्ष्यति कलापिनश्चाणम्। याज्ञवल्क्याश्मरथ्यशब्दौ कण्वादी, तेन ताभ्यां यञन्ताभ्यां वृद्धाच्छो न भवतीत्याशयेनाह—**अणि आपत्यस्येति**। 'याज्ञवल्क्यादयो ह्यचिरकालाः' इति भारतादिषु व्यवहारः, स एवानुसृतः सूत्रकृता। **कठचरकाल्लुक्**। कठशब्दस्य वैशम्पायनान्तेवासित्वाण्णिनिः। चरकादण् । तयोर्लुक् । छन्दसीत्येव । काठाः चारकाः श्लोकाः । **कलापिनोऽण्**। वैशम्पायनान्तेवासित्वात्प्राप्तस्य णिनेरपवादः। 'इनण्यनपत्ये' इति प्रकृतिभावे प्राप्त आह—**नान्तस्य टिलोप इति** । 'कलापिनः' इत्युक्तेऽप्यौत्सर्गिकेऽणि सिद्धे पुनरण्ग्रहणमधिकविधानार्थं सद्बाधकबाधनार्थं भवति । तेन माथुरेण प्रोक्ता माथुरी वृत्तिः। मौदाः पैप्पलादाः शाकलाः इति सिद्धम् । मुद पिप्पलाद शाकल्य एभ्यः 'पुराणप्रोक्तेषु–'

(४-३-१०६) छगलिना प्रोक्तमधीयते छागलेयिनः । **१४६० पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । (४-३-११०)** णिनिः स्यात् । पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः । **१४६१ कर्मन्दकृशाश्वादिनिः । (४-३-१११)** 'भिक्षुनटसूत्रयोः' इत्येव । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः । **१४६२ तेनैकदिक् ।**

लुगिति भावः । 'इनण्यनपत्ये' इति प्रकृतिभावमाशङ्क्याह—**नान्तस्येति । छगलिनो ढिनुक् ।** छगलिन्शब्दादुक्तविषये ढिनुक्प्रत्ययः स्यादित्यर्थः । कलाप्यन्तेवासित्वात् प्राप्तस्य णिनेरपवादः । **छागलेयिन इति ।** ककार इत् , उकार उच्चारणार्थः । ढिन् शिष्यते । ढस्य एय् , टिलोपः । ततोऽध्येतृप्रत्ययस्य लुगिति भावः । **पाराशर्य । णिनिः स्यादिति ।** उक्तविषय इति शेषः । मण्डूकप्लुत्या णिनिरेवानुवर्तत इति भावः । पाराशर्येण प्रोक्तं भिक्षुसूत्रमित्यर्थे, शिलालिना प्रोक्तं नटसूत्रमित्यर्थे च तृतीयान्ताण्णिनिः स्यादिति यावत् । भिक्षवः संन्यासिनः, तदधिकारिकं सूत्रं भिक्षुसूत्रं व्यासप्रणीतं प्रसिद्धम् । **पाराशर्येणेति ।** पराशरशब्दाद्गर्गादित्वाद् गोत्रे यञि पाराशर्यो व्यासः । इह त्वनन्तरापत्ये गोत्रत्वारोपायञ् । तेन प्रोक्ते भिक्षुसूत्रे णिनिः, ततोऽध्येतृप्रत्ययस्य छस्य लुक् । **पाराशरिण इति ।** जसि रूपम् । **शैलालिन इति ।** शिलालिन्शब्दाद् नटसूत्रे प्रोक्ते णिनौ टिलोपे शैलालिन्शब्दादध्येतृप्रत्ययस्याणो लुकि शैलालिन इति जसि रूपमिति भावः । **कर्मन्द ।** कर्मन्देन प्रोक्तं भिक्षुसूत्रमित्यर्थे कृशाश्वेन प्रोक्तं नटसूत्रमित्यर्थे च तृतीयान्तादिनिः स्यादिति यावत् । प्रत्यये अन्त्य इकार उच्चारणार्थः । कर्मन्दशब्दादिनिः, ततोऽध्येत्रणो लुक् । एवं कृशाश्विनः । **तेनैकदिक् ।** सहार्थे तृतीया । एका दिक् अधिकरणात्मिका यस्य तदेकदिक् । तेन सह एकस्यां

इति णिनेरपवादोऽयम्[1] । **छगलिनो ढिनुक् ।** कलाप्यन्तेवासित्वात्प्राप्तस्य णिनेरपवादोऽयम् । **पाराशर्य ।** मण्डूकप्लुत्या णिनिरिह सम्बध्यत इत्याह—**णिनिः स्यादिति ।** तद्विषयताऽत्रेष्यते । तदर्थं छन्दोग्रहणमनुवर्त्यम् । सूत्रयोश्छन्दस्त्वं तु गौण्या वृत्त्या बोध्यम् । **भिक्षुसूत्रमिति ।** चतुर्लक्षणीरूपम् । **पाराशरिण इति ।** पाराशर्यो व्यासः । अनन्तरापत्येऽपि गोत्रत्वेनोपचाराद् 'गर्गादिभ्यः–' इति यञ्, 'आपत्यस्य च–' इति यलोपः । अध्येत्रणस्तु 'प्रोक्तात्–' इति लुक् । भिक्षुनटसूत्रयोः किम्, पाराशरम् । शैलालम् । **कर्मन्द ।** इहापि छन्दोनुवृत्त्यादि प्राग्वत् । भिक्षुनटसूत्रयोः किम्, कार्मन्दम् । कार्शाश्वम् । **तेनैकदिक् ।** तृतीयान्तादेक-

---

१ 'अयम्' इति पाठः क्वचिन्नास्ति ।

(४-३-११२) सुदाम्ना अद्रिणा एकदिक् सौदामनी । १४९३ तसिश्च । (४-३-११३) स्वरादिपाठादव्ययत्वम् । पीलुमूलेन एकदिक् पीलुमूलतः । १४९४ उरसो यच्च । (४-३-११४) चात्तसिः । अणोऽपवादः । उरसा एकदिक् उरस्यः, उरस्तः । १४९५ उपज्ञाते । (४-३-११५) तेन इत्येव । पाणिनिनोपज्ञातं पाणिनीयम् । १४९६ कृते ग्रन्थे । (४-३-११६) वररुचिना कृतो वाररुचो ग्रन्थः । १४९७ संज्ञायाम् । (४-३-११७) तेन इत्येव । अग्रन्थार्थमिदम् । मक्षिकाभिः कृतं माक्षिकं मधु । १४९८ कुलालादिभ्यो वुञ् । (४-३-११८) तेन कृते संज्ञायाम् । कुलालेन कृतं कौलालकम् । वारुडकम् । १४९९ क्षुद्राभ्रमरवटरपादपादञ् । (४-३-११९) तेन कृते संज्ञायाम् । क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् । १५०० तस्येदम् (४-३-१२०) उपगोरिदमौपगवम् 'वहेस्तुरणिट् च'

दिशि विद्यमानमित्यर्थे तृतीयान्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । **सौदामनीति** । अणि 'अन्' इति प्रकृतिभावाच्च टिलोपः । **तसिश्च** । 'तेनैकदिक्' इत्यर्थे तृतीयान्तात्तसिश्च स्यादित्यर्थः । इकार उच्चारणार्थः । **स्वरादिपाठादिति** । 'स्वरादिनिपातमव्ययम्' इति प्रकरणे 'तद्धितश्चासर्वविभक्तिः' इत्यत्र 'तसिलादयः—' इति परिगणने तसेः पाठादित्यर्थः । **उरसो यच्च** । उरसा एकदिगित्यर्थे तृतीयान्तादित्यर्थः । **उपज्ञाते** । तेनोपज्ञातमित्यर्थे तृतीयान्ताद् यथाविहितं प्रत्ययाः स्युरित्यर्थः । उपज्ञातं प्रथमज्ञातम् । **कृते ग्रन्थे** । तेन कृतो ग्रन्थ इत्यर्थे तृतीयान्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । **संज्ञायाम्** । **तेनेत्येवेति** । तेन कृतमित्यर्थे संज्ञायां तृतीयान्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । ग्रन्थे इति नानुवर्तते । तदाह—**अग्रन्थार्थमिति** । **कुलालादिभ्यो वुञ्** । तेन कृते संज्ञायामिति शेषपूरणम् । **वारुडकमिति** । वरुडो जातिविशेषः । **क्षुद्राभ्रमर** । तेन कृते संज्ञायामिति शेषपूरणम् । क्षुद्रा मधुमक्षिकाः । **तस्येदम्** । इदमित्यर्थे षष्ठ्यन्तादणादयः साधारणप्रत्यया । राष्ट्रावारेत्यादि-

---

दिगित्यर्थे अणादयः स्युः । एका दिक् समाना दिगित्यर्थः । पुनस्तेनेत्युक्तिश्छन्दोऽधिकारनिवृत्त्यर्था । **सौदामनीति** । 'अन्' इति प्रकृतिभावाच्च टिलोपः । 'तडित्सौदामनी विद्युत्' इत्यमरः । **तसिश्च** । पूर्वोक्तविषये । **उपज्ञाते** । विनोपदेशं ज्ञातमुपज्ञातम् । **कुलालादिभ्यो** । कुलाल वरुड चण्डाल निषाद कुम्भकार श्वपाकादयः कुलालादयः । **क्षुद्राभ्रमर** । पादपशब्दाच्छे प्राप्ते, 'अन्येभ्योऽपि अणि अञ् विधीयते । **तस्येदम्** । अणादयः पञ्च महोत्सर्गाः, घादयश्च षष्ठ्यन्तात्सम्ब-

(वा २६१०) । संवोढुः स्वं सांवहित्रम् । 'अग्नीधः शरणे रण् भत्वं च' (वा २६११)। अग्निमिन्द्धे अग्नीत्, तस्य स्थानमाग्नीध्रम् । तात्स्थ्यात्सोऽप्याग्नीध्रः । 'समिधामाधाने षेण्यण्' (वा २६१२)। सामिधेन्यो मन्त्रः, सामिधेनी

भिर्विशिष्य विहिता घादयश्च प्रत्यया यथाविहितं स्युरित्यर्थः। अत्र शेषे इत्यनुवृत्तम् । ततश्च अपत्यादिचतुरर्थ्यन्तार्थेभ्योऽन्येषां शेषभूतसर्वविशेषाणां सामान्यविशेषरूपेण प्रत्ययार्थत्वं लभ्यते । अपत्यादीनां तु न केनापि रूपेण इदंशब्दार्थत्वमिति 'तस्यापत्यम्' इत्यत्रोक्तम् । **वहेस्तुरणिट् चेति** । वार्तिकमिदम् । तुरिति तृन्तृचोः सामान्येन ग्रहणम् । वहधातोर्विहितो यः तृप्रत्ययः तस्मादण् स्यात् तृप्रत्ययस्य इडागमश्च । तत्र अण् पूर्वेण सिद्ध इड्विध्यर्थमनूद्यते। **संवोढुःस्वमिति**। विग्रहप्रदर्शनम् । वहेस्तृच्, तृन् वा । वहेरनुदात्तत्वाद् 'एकाच उपदेशे–' इति नेट् । ढत्वधत्वष्टुत्वढलोपाः। 'सहिवहोरोदवर्णस्य' इत्योत्वम्। **सांवहित्रमिति**। ढत्वादीनामसिद्धत्वादलौकिक एव विग्रहवाक्ये पूर्वमिट्। ततो निमित्ताभावान्न ढत्वादि । **अग्नीधः शरणे रण् भत्वं चेति**। वार्तिकमिदम् । शरणमित्यर्थे अग्नीच्छब्दात् षष्ठ्यन्ताद्रण्, तस्मिन्परे भत्वं च वक्तव्यमित्यर्थः। शरणं गृहम् । **अग्निमिन्द्धे अग्नीदिति** । ऋत्विग्विशेषोऽयम्। इन्धेः क्विप्, 'अनिदिताम्–' इति नलोपः। **आग्नीध्रमिति** । सोमे महावेदेरुत्तरार्धे पश्चारत्निचतुरश्रस्थानविशेषसंज्ञेयम्। भत्वान्न जश्त्वम्। प्रत्ययस्वरेणान्तोदात्तोऽयं शब्दः। तैत्तिरीये 'एतद्वै यज्ञस्यापराजितं यदाग्नीध्रम्' इत्यादावाद्युदात्तत्वं तु 'आग्नीध्रसाधारणादञ् वक्तव्यः' इति स्वार्थिके अञि बोध्यम् । नन्वेवम् 'आग्नीध्रः प्रत्याश्रावयेत्' इत्यादौ कथमृत्विग्विशेष आग्नीध्रशब्दः । तत्राह—**तात्स्थ्यादिति** । आग्नीध्राख्यदेशस्थ-

न्धिनि स्युः । अनन्तरादिष्वनभिधानान्न, देवदत्तस्यानन्तरमिति। **वहेस्त्विति**। इडर्थमिदमुपसंख्यानम्, अण् तु सिद्ध एवानूद्यते। तुरिति तृन्तृचोः सामान्यग्रहणम्। ढत्वादीनामसिद्धत्वादलौकिके प्रक्रियावाक्ये पूर्वमिट् ततो निमित्ताभावान्न ढत्वादीत्याशयेनोदाहरति—**सांवहित्रमिति** । **अग्नीदिति**। क्विप्। ऋत्विग्विशेषोऽयम्। 'त्वमग्निदितायते' इत्यत्र तु छान्दसं ह्रस्वत्वम्। **आग्नीध्रमिति**। भत्वविधानाद्धस्य जश्त्वं नेति भावः। **सोऽपीति**। अग्नीदपीत्यर्थः। ननु 'पिबाग्नीध्रात्तव' इत्यादावाद्युदात्तं प्रयुज्यते । वार्तिके 'तुरण्' इति पाठादयमन्तोदात्त इति चेत्। अत्राहुः—'आग्नीध्रसाधारणादञ्' इति वार्तिकेन विहितो यः स्वार्थेऽञ् तत्पक्षे तत्राद्युदात्तत्वं बोध्यमिति । **समिधामिति** । कर्मणि षष्ठीयम् । आधानमिति करणे ल्युट्।

१ क्वचित् पुस्तके 'भम्' इति पाठः ।

ञक् । **१५०१ रथाद्यत्** । (४-३-१२१) रथ्यं चक्रम् । **१५०२ पत्त्रपूर्वादञ्** । (४-३-१२२) पत्त्रं वाहनम् । अश्वरथस्येदम् आश्वरथम् । **१५०३ पत्त्राध्वर्युपरिषदश्च** । (४-३-१२३) अञ् । 'पत्त्राद्वाह्ये' (वा २१०८) । अश्वस्येदं वहनीयमाश्वम् । आध्वर्यवम् । पारिषदम् । **१५०४ हलसीराट्ठक्**

त्वाद् ऋत्विग्विशेषे आग्नीध्रशब्दो गौण इति भावः । **समिधामिति** । आधीयते अनेनेत्याधानो मन्त्रः । आधानो मन्त्र इत्यर्थे षष्ठ्यन्तात् समिच्छब्दात् षेन्यण्प्रत्ययो वाच्य इत्यर्थः । षित्वं ङीषर्थमित्याह—**सामिधेनी ऋगिति** । सामिधेन्यशब्दाद् ङीष् 'हलस्तद्धितस्य' इति यलोपः । **रथाद्यत्** । 'तस्येदम्' इत्येव । **रथ्यं चक्रमिति** । 'रथाद्रथाङ्गे' इति वचनाच्चक्रमिति विशेष्यम् । **पत्त्रपूर्वादञ्** । रथादित्येव । **पत्त्रं वाहनमिति** । 'पत्त्रं वाहनपक्षयोः' इति कोशः । **पत्त्राध्वर्युपरिषदश्च** । **अञिति** । शेषपूरणम् । **पत्त्रादिति** । पत्त्राद्वाह्य एवेति वक्तव्यमित्यर्थः । **आश्वमिति** । पत्त्रेत्यर्थग्रहणमिति भावः । **आध्वर्यवं पारिषदमिति** ।

कर्मणि षष्ठ्यन्तादाधानकरणे षेन्यण् स्यात् । **सामिधेन्य इति** । यया अग्निः समिध्यते सा समित्, सम्पदादित्वात्करणे क्विप्, तस्या आधान इति विग्रहः । **सामिधेनीति** । षित्वान्ङीष्, 'हलस्तद्धितस्य' इति यलोपः । यया ऋचा समिदाधीयते सा सामिधेनीत्यर्थः । 'प्रवो वाजा अभिद्यवः' इत्याद्याः 'आजुह्वोता दुवस्यत' इत्यन्ताः सामिधेन्य इति व्यवह्रियन्ते । **रथाद्यत्** । अणोऽपवादः । **'रथाद्रथाङ्गे'** इति वार्तिकमभिप्रेत्याह—**रथ्यं चक्रमिति** । 'रथसीताहलेभ्यो यद्विधौ' इति तदन्तविधिरुपसंख्यायते । परमरथ्यम् । उत्तमरथ्यम् । द्वयो रथयोरङ्गं द्विरथम् । इह 'द्विगोर्लुगनपत्ये' इति यतो लुक् । ननु यत्प्रत्ययोऽत्र रथाङ्ग एव यदीष्यते कथं तर्हि 'रथस्य वोढा रथ्यः' इति । 'तद्वहति–' इत्यनेनेति चेत् एवं तर्हि अयमेव यद्रथाङ्ग इव वोढर्यपीष्यताम्, 'तद्वहति रथयुगप्रासङ्गम्' इत्यत्र रथग्रहणं त्यज्यतामिति चेत् । मैवम् । द्वौ रथौ वहति द्विरथ्य इत्यत्र 'द्विगोर्लुगनपत्ये' इति प्राग्दीव्यतीयस्य लुक्प्रसङ्गात् । 'तद्वहति–' इति यत्प्रत्ययस्य तु प्राग्दीव्यतीयत्वाभावान्न लुगिति द्विरथ्य इति सिध्यतीति । ननु 'द्विगोर्लुगनपत्ये' इत्यत्राचीत्यस्यापकर्षणात्कथमत्र यतो लुक्प्रसक्तिरिति चेत् । अत्राहुः—'तद्वहति–' इत्यत्र रथग्रहणमेव ज्ञापकमेतस्य यतो हलादेरपि लुग् भवतीति । अन्यथा तत्र रथग्रहणं व्यर्थमेव स्यात्, तथा च द्वयो रथयोरङ्गमिति विग्रहे द्विरथमिति प्रयोगः सुस्थ इति । **पत्त्रपूर्वादञ्** । पूर्वस्य यतोऽपवादः । **पत्त्रमिति** । पतन्त्यनेनेति विग्रहे 'दाम्नी–' इत्यादिना ष्ट्रन् । रथादित्येव सम्बध्यत इत्याह—**अश्वरथस्येदमिति** । अश्वयुक्तो रथोऽश्वरथस्तस्या-

(४-३-१२४) हालिकम्। सैरिकम्। १५०५ द्वन्द्वाद् वुन्वैरमैथुनिकयोः। (४-३-१२५) काकोलूकिका। कुत्सकुशिकिका। 'वैरे देवासुरादिभ्यः प्रतिषेधः' (वा २११४)। दैवासुरम्। १५०६ गोत्रचरणाद् वुञ्। (४-३-१२६) औपगवकम्। 'चरणाद्धर्माम्नाययोरिति वक्तव्यम्' (वा २११५)। काठकम्। १५०७ सङ्घाङ्कलक्षणेष्वञ्यञिञामण्। (४-३-१२७) 'घोषग्रहणमपि

अध्वर्योरिदम्, परिषद इदमिति विग्रहः। **हलसीराट्ठक्**। तस्येदमित्येव। **हालिकम्। सैरिकमिति**। हलस्येदम्, सीरस्येदमिति विग्रहः। **द्वन्द्वाद् वुन्**। वैरे मैथुनिकायां च इदन्त्वेन विवक्षिते द्वन्द्वात् षष्ठ्यन्ताद् वुन् स्यादित्यर्थः। **काकोलूकिकेति**। काकोलूकस्य वैरमित्यर्थः। वुनि स्त्रीत्वं लोकात्। **कुत्सकुशिकिकेति**। कुत्सकुशिकयोर्विवाह इत्यर्थः, वुनि स्त्रीत्वं लोकात्। मिथुनं दम्पती। तस्य कर्म मैथुनिका। मनोज्ञादित्वाद् वुञ्। स्त्रीत्वं लोकात्। **वैरे देवासुरेति**। वार्तिकमिदम्। **दैवासुरमिति**। देवासुरयोर्वैरमित्यर्थः। वुनभावे अण्। मैथुनिकायां तु देवासुरिकेत्येव। 'द्वन्द्वे देवासुर—' इति त्वपपाठः, अत्र भाष्ये वैर इत्येव वार्तिकपाठात्। 'शिशुक्रन्द—' इति सूत्रभाष्ये तु 'द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः' इति पठितम्, दैवासुरम् राक्षोऽसुरमित्युदाहृतं च। देवासुराद्यधिकृत्य कृतमाख्यानमित्यर्थः। **गोत्रचरणाद्वुञ्**। गोत्रप्रत्ययान्तात् शाखाध्येतृवाचिनश्च षष्ठ्यन्तादिदमित्यर्थे, वुञित्यर्थः। प्रवराध्यायप्रसिद्धमिह गोत्रमित्यभिप्रेत्योदाहरति— **औपगवकमिति**। औपगवस्येदमित्यर्थः। वस्तुतस्तु औपगवः प्रवरसूत्रेषु न दृष्टः। ग्लौचुकायनकमिति वृत्त्यादौ उदाहृतम्। **चरणादिति**। चरणाद्यो वुञ् विहितः स धर्मे आम्नाये च वाच्ये भवति, नान्यत्रेत्यर्थः। **काठकमिति**। कठेन प्रोक्तमधीयते कठाः, तेषां धर्म आम्नायो वेत्यर्थः. आम्नायो वेदाभ्यासः। **सङ्घाङ्क**।

ङ्गमित्यर्थः। **पत्त्राध्वर्यु**। अणोऽपवादः। वार्तिकमाह—**पत्त्राद्वाह्य इति**। इह पत्त्रेत्यर्थग्रहणे, इतरयोस्तु स्वरूपग्रहणे व्याख्यानमेव शरणम्। **द्वन्द्वाद् वुन्**। अणोऽपवादः। छं तु परत्वाद्बाधते। **काकोलूकिकेति**। काकोलूकस्य वैरमित्यर्थः। वुन्नन्तं स्त्रियाम्। 'वैरमैथुनिकादिवुन्' इति स्त्र्यधिकारे अमरः। **कुत्सकुशिकिकेति**। कुत्सकुशिकयोर्मैथुनिका विवाहरूपः सम्बन्ध इत्यर्थः। मिथुनं हि दम्पती तस्य कर्म क्रियानिष्पादनम्, मनोज्ञादित्वाद् वुञ्। वुञन्तं चेदं स्त्रियाम्, स्वभावात्। अत्र वदन्ति—कुत्साश्च कुशिकाश्च कुत्सकुशिकास्तेषां मैथुनिकेत्यपि विग्रहः। इह कुत्सश्च कुशिका चेति द्वयोरेव मैथुनिकायां वुनिति नाग्रहः कार्यः। 'यूनि लुक्' इति सूत्रे कैयटेन अत्रिभरद्वाजिकेत्यादिकं प्रसङ्गादुदाहृत्य बहुवचनान्तद्वन्द्वाद् वुनो व्याख्या-

कर्तव्यम्' (वा २११२)। अञ्। बैदः, सङ्घोऽङ्को घोषो वा। बैदं लक्षणम्। यञ्-गार्गः, गार्गम्। इञ्-दाक्षः, दाक्षम्। परम्परासम्बन्धोऽङ्कः। साक्षात्तु लक्षणम्। १५०८ शाकलाद्वा। (४-३-१२८) अस्त्रोक्तेऽर्थे। पक्षे चरणत्वाद् वुञ्। शकलेन प्रोक्तमधीयते शाकलाः, तेषां सङ्घोऽङ्को घोषो वा शाकलः, शाकलकः। लक्षणे क्लीबता। १५०९ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः। (४-३-१२९) छन्दोगानां धर्मं आम्नायो वा छान्दोग्यम्। औक्थिक्यम्। याज्ञिक्यम्। बाह्वृच्यम्। नाट्यम्। 'चरणाद्धर्माम्नाययोः' (वा २११३) इत्युक्तम्। तत्साहचर्यान्नटशब्दादपि तयोरेव। १५१० न दण्डमा-

---

अणन्तात्, यञन्तात्, इञन्ताच्च सङ्घे अङ्के लक्षणे च इदन्त्वेन विवक्षिते अणित्यर्थः। छस्यापवादः। **घोषेति**। 'सङ्घाङ्कलक्षणघोषेषु' इति सूत्रं कर्तव्य मित्यर्थः। तथा च तिस्रः प्रकृतयः प्रत्ययार्थाश्चत्वार इति न यथासंख्यम्। **गार्ग इति**। सङ्घः अङ्को घोषो वेति शेषः। **गार्गमिति**। लक्षणमिति शेषः। एवं दाक्षो दाक्षमित्यत्रापि। नन्वङ्कलक्षणशब्दयोः पर्यायत्वात् पृथग्ग्रहणं व्यर्थमित्यत आह—**परमपरेति**। यथा गवादिनिष्ठस्तप्तमुद्राविशेषः अङ्कः। तस्य हि गोद्वारा स्वामिसम्बन्धः। **साक्षादिति**। विद्याविशेषस्तु देवदत्ते साक्षाद्विद्यमानत्वात्तस्य लक्षणमित्यर्थः। बैदी विद्या। 'घोष आभीरपल्ली स्यात्' इत्यमरः। **शाकलाद्वा**। **शकलेनेति**। शकलशब्दात्प्रोक्ताणन्तादध्येतृप्रत्ययस्य लुकि शाकलशब्दाद् 'गोत्रचरणात्-' इति धर्माम्नाययोर्वुञोऽपवादः अण्। तदभावे वुञ्। **छन्दोगौक्थिक**। संघादयो निवृत्ताः। छन्दोगादीनां चरणत्वाद् धर्माम्नाययोरिति संबध्यते। छन्दोग, औक्थिक, याज्ञिक, बह्वृच, नट एभ्यो धर्मे आम्नाये च इदंत्वेन विवक्षिते ञ्यः स्यादित्यर्थः। ननु नटस्य अचरणत्वात्तत्र धर्माम्नाययोः कथमन्वय इत्याशङ्कते—**चरणाद्ध-**

त्वादिति। **सङ्घाङ्क**। पूर्वस्य वुञोपवादः। **घोषग्रहणमिति**। एवं च प्रकृतयस्तिस्रः प्रत्यार्थविशेषणानि चत्वारीति वैषम्याद्यथासंख्यमपि न प्रवर्तते। **गार्ग इति**। 'आपत्यस्य-' इति यलोपः। यद्यप्यङ्कलक्षणयोः पर्यायत्वं प्रसिद्धं 'कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्' इत्यमरः, तथापि पृथग्ग्रहणसामर्थ्यादिह विशेषपरतेत्याह—**परम्परासम्बन्ध इति**। यथा गवादिनिष्ठः स्वामिना गोद्वारा सम्बन्धः। **साक्षादिति**। यथा बिदानां विद्या। घोष आभीरस्थानम्। णित्त्वं ङीबर्थं पुंवद्भावनिषेधार्थं च। बैदी विद्या यस्य बैदीविद्यः। बिदानामसाधारणी या विद्या तद्वानित्यर्थः। **छन्दोगौक्थिक**। सङ्घादयो निवृत्ताः, एभ्यो ञ्यः स्य तस्येदमित्यर्थे। चरणशब्देभ्यो वुञोऽपवादः न त्वौत्सर्गिकस्याणः। धर्माम्नाययोरित्युक्तेर्नेह। छन्दोगं

णवान्तेवासिषु । (४-३-१३०) दण्डप्रधाना माणवा दण्डमाणवाः, तेषु शिष्येषु च वुञ्न स्यात् । दाक्षा दण्डमाणवाः शिष्या वा । १५११ रैवतिकादिभ्यश्छः । (४-३-१३१) तस्येदमित्यर्थे । वुञोऽपवादः । रैवतिकीयम् । बैजवापीयम् । १५१२ कौपिञ्जलहास्तिपदादण् । (४-३-१३२) (वा २४१८) । कुपिञ्जलस्यापत्यम् । इहैव निपातनादण् । तदन्तात्पुनरण् । कौपिञ्जलः । गोत्रवुञोऽपवादः । हस्तिपादस्यापत्यं हास्तिपदः, तस्यायं हास्तिपदः । १५१३ आथर्वणिकस्येकलोपश्च । (४-३-१३३) अण्स्यात् । आथर्व-

---

मम्नाययोरित्युक्तमिति । यद्यपीति शेषः । परिहरति—तत्साहचर्यादिति । तथापि छन्दोगादिसाहचर्यान्नटशब्दादपि धर्माम्नाययोरेव प्रत्यय इत्यर्थः । न दण्ड । दण्डमाणवाश्च अन्तेवासिनश्च तेष्विति द्वन्द्वः । दाक्षा इति । दक्षस्यापत्यं दाक्षिः, तस्येमे दण्डमाणवाः शिष्या वेत्यर्थे गोत्रत्वलक्षणो वुञ् न भवति, किन्त्वौत्सर्गिकोऽणेव । रैवतिकादिभ्यश्छः । तस्येदमित्यर्थं इति । शेषपूरणम् । वुञ इति । गोत्रत्वलक्षणवुञोऽपवाद इत्यर्थः । रैवतिकीयमिति । रेवत्या अपत्यं रैवतिकः । रेवत्यादिभ्यष्ठक् । रैवतिकस्येदमिति विग्रहः । बैजवापीयमिति । बीजवापस्यापत्यं बैजवापिः, तस्येदमिति विग्रहः । कौपिञ्जलहास्तिपदादण् । कुपिञ्जलस्यापत्यमित्यनन्तरम् 'इत्यर्थे' इति शेषः । इहेति । अस्मिन् वार्तिके कौपिञ्जलेति निर्देशाद् अत इञं बाधित्वा अणित्यर्थः । तदन्तादिति । अणन्ताद् 'तस्येदम्' इत्यर्थे अनेन वार्तिकेन पुनरणित्यर्थः । हस्तिपादस्येति । हस्तिन इव पादौ अस्येति विग्रहः, 'पादस्य लोप–' इति न भवति, अहस्त्यादिभ्य इति प्रतिषेधात् । हस्तिपादस्यापत्यं हास्तिपदः । अत इञं बाधित्वा अत एव निपातनादण् पद्भावश्च । हास्तिपदस्यायमित्यर्थे अनेन अणिति भावः । गोत्रवुञोऽपवादः । आथर्वणिकस्येकलोपश्च । इदं सूत्रमिति कैयटः । वार्तिकमित्यन्ये । अण् स्यादिति । आथर्वणिकशब्दात्तस्येदमित्यर्थे अण् स्यात् । प्रकृतेरि-

---

कुलमित्यादि । न दण्ड । 'तस्येदम्' इत्यनुवर्तते तेषु शिष्येषु चेति प्रत्ययार्थविशेषणेष्विति शेषः । दाक्षा इति । 'इतश्च' इत्यण् । रैवतिकादिभ्यश्छः । रैवतिकशब्दो 'रेवत्यादिभ्यष्ठक्' इति ठगन्तः । रैवतिक, औदमेधि, बैजवापीत्यादिरैवतिकादयोऽमी गोत्रप्रत्ययान्ताः, ततः पूर्वेण वुञि प्राप्ते छविधानार्थमिदमित्याह—वुञोपवाद इति । अत इञमाशङ्क्याह—इहैव निपातनादिति । हस्तिनः पाद इव पादो यस्य हस्तिपादः । पादस्य लोपो न भवति अहस्त्यादिभ्य इति वचनात्तदाह—हस्तिपादस्येति । हास्तिपद

णिकस्यायमाथर्वणो धर्म आम्नायो वा। चरणाद् वुञोऽपवादः।

इति तद्धितेषु शैषिकप्रकरणम्।

अथ तद्धितेषु प्राग्दीव्यतीयप्रकरणम्। २६।

१५१४ तस्य विकारः। (४-३-१३४) 'अश्मनो विकारे टिलोपो वक्तव्यः' (वा ४१८२)। अश्मनो विकार आश्मः। भास्मनः। मार्त्तिकः।

कस्य लोपश्चेत्यर्थः। **आथर्वणिकस्येति**। अथर्वणा प्रोक्तो वेदः अथर्वेत्युपचर्यते, तमधीते आथर्वणिकः। वसन्तादित्वाट्ठक्। आथर्वणिकस्यायमित्यर्थे अनेन अणि, इको लोपे 'दाण्डिनायन–' इति टिलोपाभावे, आथर्वण इति रूपमित्यर्थः। **धर्म आम्नायो वेति**। 'चरणाद्धर्माम्नाययोः' इत्युक्तेरिति भावः। ननु तस्येदमित्येव सिद्धे अणिवधिर्व्यर्थ इत्यत आह—**चरणाद् वुञोऽपवाद इति**। आथर्वणिकशब्दस्य अथर्वणवेदाध्येतृवाचित्वादिति भावः।

इति तद्धितेषु शैषिकप्रकरणम्।

अथ विकारार्थप्रत्यया निरूप्यन्ते। **तस्य विकारः**। विक्रियते इति विकारः, कर्मणि घञ्। प्रकृतेरवस्थान्तरात्मिकां विक्रियां प्राप्त इत्यर्थः। विकार इत्यर्थे षष्ठ्यन्तादणादयः साधारणा वक्ष्यमाणाश्च वैशेषिका यथाविहितं स्युरित्यर्थः। **अश्मनो विकार इति**। विकारार्थकप्रत्यये परे अश्मन्शब्दस्य टिलोपो वक्तव्य इत्यर्थः। अनिति प्रकृतिभावापवादः। **आश्म इति**। अणि टिलोपे

इति। अस्मादेव निपातनादण् पद्भावश्चेति भावः। **आथर्वणिकस्य**। अथर्वणा प्रोक्तो वेदोऽथर्वा, अभेदोपचारात् 'तमधीते' वसन्तादित्वाट्ठक् 'दाण्डिनायन–' आदिसूत्रे निपातनाट्टिलोपाभावः। अन्ये त्वाहुः—अथर्वणा प्रोक्तमधीते आथर्वणिकः। इह प्रोक्तेऽण्, ततः 'छन्दोब्राह्मणानि–' इति तद्विषयतयाथर्वणशब्दस्यापि वसन्तादिषु पाठादध्येतरि ठक्, तस्य विधानसामर्थ्यात्प्रोक्तात्लुङ् नेति।

इति तत्त्वबोधिन्यां शैषिकप्रकरणम्।

तस्य विकारः। षष्ठ्यन्ताद्विकारे अणादयः स्युः। घादिसम्बद्धस्य तस्य ग्रहणस्य निवृत्तये पुनस्तस्येत्युक्तम्। अणादयस्तु न निवर्तन्ते 'प्राग्दीव्यतः–' 'प्राग्भवनात्' इति विशिष्टावधिपरिच्छेदेनाधिकृतत्वात्। इह प्राणिरजतादिभ्योऽञ्, ओरञ्, अनुदात्तादेश्च, मयड्वैतयोः, नित्यं वृद्धशरादिभ्यः, पिष्टाच्च, इत्यादिभिरपवादानां वक्ष्यमाणत्वादणि आद्युदात्तम् अवृद्धं प्रतिपदमवक्ष्यमाणप्रत्ययं चोदाहरणमिति पर्यालोच्य तथैवोदाहरति—**आश्म इत्यादि**। अश्मन्–भस्मन्शब्दौ

१५१५ अवयवे च प्राण्योषधिवृक्षेभ्यः । (४-३-१३५) चाद्विकारे । मयूरस्यावयवो विकारो वा मायूरः । मौर्वं काण्डं भस्म वा । पैप्पलम् । **१५१६ बिल्वादिभ्योऽण् । (४-३-१३६)** बैल्वम् । **१५१७ कोपधाच्च ।**

रूपम् । एवं चर्मणो विकारः चार्मः कोशः । 'चर्मणः कोशे' इत्युपसंख्यानाट्टिलोपः । **भास्मन इति** । भस्मनो विकार इत्यर्थः । अणि 'अन्' इति प्रकृतिभावान्न टिलोपः । **मार्त्तिक इति** । मृत्तिकाया विकार इत्यर्थः । अत्र 'प्राणिरजतादिभ्योऽञ्' 'ओरञ्' 'अनुदात्तादेश्च' इत्यादिवक्ष्यमाणापवादविषयभिन्नमुदाहरणम् । तत्र अश्मन् , भस्मन् , चर्मन् इति त्रयं मनिन्प्रत्ययान्तं नित्स्वरेणाद्युदात्तम् । मृत्तिकाशब्दोऽपि 'मृदस्तिकन्' इति तिकन्नन्तः । नित्स्वरेणाद्युदात्तः । **अवयवे च प्राण्योषधि** । प्राणिवाचिन ओषधिवाचिनो वृक्षवाचिनश्च षष्ठ्यन्तेभ्यः अवयवे विकारे च अणादयः साधारणा उक्ता वक्ष्यमाणाश्च प्रत्यया यथाविहितं स्युः । अन्येभ्यस्तु विकारमात्र इत्यर्थः । प्राणिन उदाहरति—**मायूर इति** । 'लघावन्ते–' इति मयूरशब्दो मध्योदात्तः । ततः 'प्राणिरजतादिभ्यः–' इत्यञ् । ओषधेरुदाहरति—**मौर्वमिति** । मूर्वा ओषधिविशेषः । तस्या अवयवो विकारो वेत्यर्थः । औत्सर्गिकोऽण् । 'अनुदात्तादेश्च' इत्यञ् तु वक्ष्यमाणो न भवति, 'तृणधान्यानां च द्व्यषाम्' इत्याद्युदात्तत्वात् । वृक्षस्योदाहरति—**पैप्पलमिति** । पिप्पलः अश्वत्थः, तस्यावयवो विकारो वेत्यर्थः । 'लघावन्ते–' इति मध्योदात्तः पिप्पलशब्दः । 'अनुदात्तादेश्च' इति वक्ष्यमाणाञोऽभावे औत्सर्गिकोऽण् । **बिल्वादिभ्योऽण्** । एषु प्राण्योषधिवृक्षेभ्यः अवयवे विकारे च, इतरेभ्यस्तु विकारे अण् स्यादित्यर्थः । **बैल्वमिति** । बिल्वस्यावयवो विकारो वेत्यर्थः । बिल्व, व्रीहि, काण्ड, मुद्ग, मसूर, गोधूम, इक्षु, वेणु, गवेधुक, कार्पासी, पाटली, कर्कन्धू, कटीर इति बिल्वादयः । तत्र गवेधुकस्य 'कोपधाच्च' इत्यणि सिद्धे मयटो बाधनार्थमिह पाठः । इतरेषां तु 'अनुदात्तादेश्च' इत्यञो बाधनार्थमिति

मनिन्प्रत्ययान्तौ, 'मृदस्तिकन्' नित्स्वरेण त्रयोऽप्याद्युदात्ताः । प्राचीनस्य तस्येत्यस्य निवृत्तत्वादधिकारोक्तप्रत्यया न प्रवर्तन्त इति नेह ठक् । हालः, सैरः । **चाद्विकार इति** । तेन वक्ष्यमाणप्रत्ययाः प्राण्यादिभ्यस्त्रिभ्योऽर्थद्वये भवन्त्यन्येभ्यस्तु विकार एवेति फलितम् । **मायूर इति** । 'प्राणिरजतादिभ्यः–' इत्यञ् । अनुदात्तादेरञः सिद्धत्वादुदात्ताद्यर्थं वृद्धेषु मयड्बाधनार्थं चावश्यकमिदं परत्वादनुदात्तादिष्वपि प्रवर्तते । ओषधिभ्य उदाहरति—**मौर्वमिति** । मूर्वाशब्दः 'तृणधान्यानां च द्व्यषाम्' इत्याद्युदात्तः । पिप्पलशब्दस्तु 'लघावन्ते–' इत्यनेनाद्युदात्तः । **बिल्वा-**

(४-३-१३७) अण् । अणोऽपवादः । तर्कु—तार्कवम् । तैत्तिडीकम् । १५१८ त्रपुजतुनोः षुक् । (४-३-१३८) आभ्यामण् स्याद्विकारे, एतयोः षुगागमश्च । त्रापुषम् । जातुषम् । १५१९ ओरञ् । (४-३-१३९) दैवदारवम् । भाद्रदारवम् । १५२० अनुदात्तादेश्च । (४-३-१४०) दाधित्थम् । कापित्थम् । १५२१ पलाशादिभ्यो वा । (४-३-१४१) पालाशम् । खादिरम् ।

कौस्तुभे विस्तर । **कोपधाच्च** । अणिति शेषः । तत्र प्राण्योषधिवृक्षेभ्योऽवयवे विकारे च, इतरेभ्यस्तु विकारे एव । **तर्कु—तार्कवमिति** । तर्कु इति प्रकृतिनिर्देशः । तर्कुर्नाम वृक्षविशेषः, तस्यावयवो विकारो वेत्यर्थः । 'ओरञ्' इत्यस्यापवादः अण् । तित्तिडीकशब्दो 'लघावन्ते—' इति मध्योदात्तः । 'अनुदात्तादेश्च' इत्यञोऽपवादः अण् । **त्रपुजतुनोः षुक्** । **त्रापुषम्** । **जातुषमिति** । त्रपुणो जतुनश्च विकार इत्यर्थः । **ओरञ्** । उवर्णान्तादञ् स्यादित्यर्थः । प्राण्योषधिवृक्षेभ्यः अवयवे विकारे च, इतरेभ्यस्तु विकारे । **दैवदारवम्** । **भाद्रदारवमिति** । देवदारोर्भद्रदारोश्चावयवो विकारो वेत्यर्थः । 'पीतद्र्वर्थानाम्' इत्याद्युदात्तावेतौ । ततश्च 'अनुदात्तादेश्च' इत्यनेन गतार्थता न । **अनुदात्तादेश्च** । विकारे अञिति शेषः । 'अवयवे च' इति सूत्रमप्यत्र संबध्यते । **दाधित्थमिति** । दधित्थस्यावयवो विकारो वेत्यर्थः । एवं कापित्थम् । 'कपित्थे तु दधित्थग्राहिमन्मथाः' इत्यमरः । अव्युत्पन्नप्रातिपदिकत्वात् फिट्स्वरेणान्तोदात्तावेतौ । **पलाशादिभ्यो वा** । अञिति शेषः । अवयवे वेत्येव । पलाशखदिरशिंशपास्यन्दनानामनुदात्तादित्वाद् नित्यं प्राप्ते इतरेषाम् अप्राप्ते विकल्पोऽयम् ।

दिभ्योऽण् । अञ्मयटोरपवादः । बिल्व, व्रीहि, काण्ड, मुद्ग, मसूर, गोधूम, इक्षु, कर्पासी, वेणवादयो बिल्वादयः । **त्रपुजतनोः** । 'बिल्वादिभ्योऽण्' इत्यतोऽनुवर्तनादाह—**अण् स्यादिति** । 'ओरञ्' इत्यस्यायमपवादः । अप्राण्यादित्वादवयवे न भवतीत्याशयेनाह—**विकार इति** । **त्रापुषमिति** । त्रपुणो विकारः । एवं जतुनो विकारो जातुषम् । **ओरञ्** । अनुदात्तादेरन्यदिहोदाहरणम् । **दैवदारवमिति** । देवदारु—भद्रदारुशब्दौ 'पीतद्र्वर्थानाम्' इत्याद्युदात्तौ । **दाधित्थमिति** । दधनि तिष्ठतीति 'सुपि स्थः' इति कः । उपपदसमासः । पृषोदरादित्वात्सकारस्य तकारः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम् । एवं कपित्थेऽपि बोध्यम् । **पलाशादिभ्यो वा** । उभयत्र विभाषेयम् । पलाशखदिरशिंशपास्यन्दनानामनुदात्तादित्वान्नित्यं प्राप्ते, करीरशिरीषविकङ्कतपूलाकयवासशब्दानामप्राप्ते विधानात् । **पालाशमिति** । पलाशशब्दो घृतादित्वादन्तोदात्तः । खदिरशब्दः 'अजिरशिशिर—' इत्यादौ किरच्प्रत्ययान्तो

कारीरम्। १५२२ शम्याः ष्लञ्। (४-३-१४२) शामीलं भस्म । षित्त्वा-न्ङीष्। शामीली स्रुक्। १५२३ **मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः।** (४-३-१४३) प्रकृतिमात्रान्मयड् वा स्याद्विकारावयवयोः। अश्ममयम्, आश्मनम्। 'अभक्ष्य–' इत्यादि किम्—मौद्गः सूपः । कार्पासमाच्छादनम्। १५२४

शम्याः ष्लञ् । शमीशब्दो गौरादिङीषन्तः । तस्मात्षष्ठ्यन्तादवयवे विकारे च ष्लञ् स्यादित्यर्थः। षकारलकाराविती। 'अनुदात्तादेश्च' इत्यञोऽपवादः। **शामीलं भस्मेति**। शम्या विकार इत्यर्थः। **शामीली स्रुगिति**। शम्या विकार इत्यर्थः। वरुणप्रघासेषु शमीमय्यः स्रुचः प्रसिद्धाः । अवयवे तु शामीली शाखा। **मयड्वैतयोः**। 'अधिकारादेव विकारावयवयोरिति सिद्धेरेतयोरिति वचनम् उत्कवक्ष्यमाणापवादविषयेष्वपि पक्षे मयडर्थम्' इति भाष्ये स्पष्टम् । तेन बिल्वमयं बैल्वमित्यादि सिध्यतीत्यभिप्रेत्य आह—**प्रकृतिमात्रादिति** । सर्वस्याः प्रकृतेरित्यर्थः। **अश्ममयमिति**। मयटि अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वम्, नलोपः। **आश्मनमिति** । कल्माषाङ्घ्रिर्नाम कश्चिद्राजा तत्पत्न्यां वसिष्ठेनोत्पा-

---

निपातितः। शिंशपाशब्दः 'अथ द्वितीयं प्राग्रीषात्' इति वर्तमाने 'पान्तानां गुर्वादीनाम्' इति मध्योदात्तः। 'स्पदि किंचिच्चलने' 'अनुदात्तेतश्च हलादेः' इति युच्। **कारीरमिति**। 'किरतेरीरन्' । नित्स्वरेण करीरशब्दोऽयमाद्युदात्तः। 'कॄगॄभ्यामीषन्' 'शॄपॄभ्यां किच्च' पूर्ववत्किरीषशब्दोऽप्याद्युदात्तः । विकङ्कतपूलाकयवासशब्दाः 'ग्रामादीनां च' इत्याद्युदात्ताः । **षित्त्वान्ङीषिति**। टित्त्वान्ङीबिति तु माधवः। **मयड्वैतयोः** । भाषायां किम्, खादिरो यूप इति वृत्तिकारः। ननु मयटो वैकल्पिकत्वात्सिद्धमिदमिति चेत् । अत्राहुः—वेदे बह्वृचः परस्य मयटोऽर्थान्तरपरत्वमेवेति तात्पर्यग्रहणार्थमेवेदम् । 'द्व्यचश्छन्दसि' इति सूत्रस्य 'द्व्यच एव' इति नियमार्थत्वे यद्यपीदं गतार्थम्, तथापि 'द्व्यचश्छन्दस्येव' इति विपरीतनियमशङ्कानिवृत्त्यर्थं भाषाग्रहणं कृतमिति । अधिकारादेव विकारावयवयोर्लाभे एतयोरिति वचनं ये विशेषप्रत्ययाः 'प्राणिरजतादिभ्योऽञ्' इत्येवमादयस्तद्विषयेऽपि यथा स्यादित्येवमर्थम् । कपोतमयम्, लोहमयम् । इह विकारावयवाभ्यां सह प्रत्येकम् 'अभक्ष्याच्छादनयोः' इति सम्बध्यते समासनिर्देशादतो यथासंख्यं न। **आश्मनमिति**। 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः' इति वचनादश्मभेदशब्दे भेदशब्दस्य लोपे अश्मन्निति नान्तमवशिष्यते, तथा कल्माषाङ्घ्रे राज्ञो भार्यायां मदयन्त्यां वसिष्ठेनोत्पादितः सुतोऽश्मको नाम, तत्र संज्ञात्वद्योतकस्य कप्रत्ययस्याभावे अश्मन्निति नाम भवति, तस्यावयवे आश्मनं विकारेऽप्याश्मनमित्येव भवति। न च

नित्यं वृद्धशरादिभ्यः। (४-३-१४४) आम्रमयम्। शरमयम्। 'एकाचो नित्यम्' (२०९२)। त्वङ्मयम्। वाङ्मयम्। कथं तर्हि 'आप्यम्, अम्मयम्' इति—'तस्येदम्' (१२००) इत्यणन्तात्स्वार्थे ष्यञ्। **१५२५ गोश्च पुरीषे।** (४-३-१४५) गोः पुरीषं गोमयम्। **१५२६ पिष्टाच्च।** (४-३-१४६)

दितः अश्मक इति। अश्मन्शब्दात् स्वार्थे कप्रत्ययः, तदभावे अश्मेत्यपि नाम, तस्य विकारो अवयवो वेत्यर्थः। 'अन्' इति प्रकृतिभावाच्च टिलोपः। नच विकारार्थकत्वे 'अश्मनो विकारे–' इति टिलोपः शङ्क्यः। तत्र पाषाणवाचकत्वेन प्रसिद्धस्याश्मन्शब्दस्यैव ग्रहणादिति भावः। **नित्यं वृद्धशर।** मयडिति शेषः। उक्तविकल्पस्यापवादः। **एकाचो नित्यमिति।** नित्यमिति योगविभागलब्ध-मिदम्। **अणन्तादिति।** अपामिदमापम्, 'तस्येदम्' इत्यण्। ततः स्वार्थे चतुर्वर्णादित्वात् ष्यञि आप्यमिति रूपमित्यर्थः। **गोश्च पुरीषे।** नित्यं मयडि-त्यनुवर्तते। **गोमयमिति।** यद्यपि पुरीषं न गोर्विकारो नाप्यवयवः। तथापि

'अश्मनो विकारे–' इति टिलोपः स्यादिति वाच्यम्, प्रसिद्धतरत्वेन पाषाणवाचकस्यैव तत्र ग्रहीतुमुचितत्वात्। वस्तुतस्तु 'तस्येदम्' इति सामान्यविवक्षायां पाषाणवाचक-स्याप्यश्मन्शब्दस्याश्मनमिति भविष्यति, पैष्टी सुरेतिवत्। **मौद्गः सूपः। कार्पास-मिति।** मुद्गशब्दो घृतादित्वादन्तोदात्तः। 'कृञः पासः' इति पासप्रत्यये गुणे रपरे च कर्पासीशब्दो जातिलक्षणङीषन्तस्ताभ्यां 'अनुदात्तादेश्च' इत्यञं बाधित्वा बिल्वा-दित्वादण्। **नित्यं वृद्धः।** इह 'भाषायामभक्ष्याच्छादनयोः' इत्यनुवर्तत इति वृत्तिः। नन्वेवमानन्दमयाधिकरणे शङ्कराचार्यैः 'अन्योन्तर आत्मानन्दमयः' इति श्रुतौ 'आनन्दमय इति विकारे मयट्' इत्युक्तं तत्कथं संगच्छताम्, 'प्राचुर्ये मयट्' इति तु वक्तुमुचितमिति चेत्। अत्राहुः—प्राचुर्ये मयट्यपि प्रकृत्यर्थविरोधिनो दुःखस्य लेशतोऽनुवृत्तिलाभात्प्रकृते विकारार्थः पर्यवस्यतीति तेषामाशयः। यद्वा 'नित्यं वृद्ध–' इत्यत्र भाषाग्रहणं नानुवर्तते अनुवृत्तावपि 'भाषायां नित्यम्, अन्यत्र क्वाचित्कः' इत्याश्रित्य मयट् सुसाधः। अथवा 'हेतुमनुष्येभ्यः–' इत्यनुवर्तमाने 'मयट् च' इति सूत्रेण आगतार्थे मयट्। विकार इति स्वार्थिकार्थकथनमेवातः शङ्कर-भगवत्पादोक्तिरनवद्यैवेति। **शरमयमिति।** शर दर्भ मृत् कुटी तृण सोम बिल्वज इति शरादिः। **एकाचो नित्यमिति।** आरम्भसामर्थ्यादेव सिद्धे 'नित्यं वृद्ध–' इति नित्यग्रहणं योगविभागेनान्यत्रापि क्वचिद्विधानार्थम्, तेनैतल्लभ्यत इति भावः। एकाच्त्वादेव सिद्धे शरादिषु मृच्छब्दपठनं विस्पष्टार्थमित्याहुः। **गोश्च पुरीषे।** पुरीषं न विकारो, नाप्यवयवः। तथापि 'तस्येदम्' इत्यर्थेऽयं प्रत्ययः विकारावयवयोस्तु

मयट् स्याद्विकारे । पिष्टमयम् भस्म । कथं पैष्टी सुरेति । सामान्यविवक्षायां तस्येदम्' (सू १२००) इत्यण् । **१५२७ संज्ञायां कन्** । (४-३-१४७) 'पिष्टात्' इत्येव । पिष्टस्य विकारविशेषः पिष्टकः । 'पूपोऽपूपः पिष्टकः स्यात्' । **१५२८ व्रीहेः पुरोडाशे** । (४-३-१४८) मयट् स्यात् । बिल्वाद्यणोऽपवादः । व्रीहिमयः पुरोडाशः । व्रैहमन्यत् । **१५२९ असंज्ञायां तिलयवाभ्याम्** । (४-३-१४९) तिलमयम् । यवमयम् । संज्ञायां तु तैलम् । यावकः । **१५३० तालादिभ्योऽण्** । (४-३-१५२) अञ्मयटोरपवादः । 'तालाद्धनुषि' (ग सू १६४) तालं धनुः । अन्यत्तालमयम् । ऐन्द्रायुधम् । **१५३१ जातरूपेभ्यः परिमाणे** । (४-३-१५३) अण् । बहुवचनात्पर्यायग्रहणम् ।

तस्येदमित्यर्थेऽयं प्रत्ययः । **पिष्टाच्च** । शेषपूरणेन सूत्रं व्याचष्टे—**मयट् स्याद्विकार इति** । **संज्ञायां कन्** । **विकारविशेष इति** । अपूप इत्यर्थः । तदाह—**पूपोऽपूपः पिष्टकः स्यादिति** । अमरकोशोऽयम् । पुरोडाशस्तु न पिष्टकः, तस्यानपूपत्वात् । 'अतुङ्गमनपूपाकृतिमश्वशफमात्रं पुरोडाशं करोति' इति श्रुतेः । **व्रीहेः पुरोडाशे** । पुरोडाशात्मके विकारे नित्यं मयट् स्यादित्यर्थः । तर्हि बिल्वादिगणे पाठः किमर्थमित्यत आह—**व्रैहमन्यदिति** । **असंज्ञायां तिलयवाभ्याम्** । नित्यं मयडिति शेषः । **यावक इति** । यवशब्दाद्विकारे अण् । ततः 'यावादिभ्य-' इति स्वार्थे कन् । **तालादिभ्योऽण्** । **तालाद्धनुषीति** । गणसूत्रमिदम् । **तालं धनुरिति** । 'नित्यं वृद्ध-' इति मयटोऽपवादः । **ऐन्द्रायुधमिति** । 'अनुदात्तादेश्च' इत्यञोऽपवादः, समासस्वरेणान्तोदात्तत्वात् । **जातरूपेभ्यः** । **अणिति** । शेषपूरणम् । जातरूपं सुवर्णम्, तद्वाचिभ्योऽण् स्यात्परिमाणे विकारे गम्य इत्यर्थः । ननु जातरूपशब्दस्यैव कुतो न ग्रहणमित्यत

'गोपयसोर्यत्' वक्ष्यति । पुरीषे किम्, गव्यं पयः । **यावक इति** । यवशब्दाद्विकारेऽण्, तदन्ताद् 'यवादिभ्यः' इति स्वार्थे कन् । **तालादिभ्योऽण्** । **अञ्मयटोरिति** । तालश्यामाकशब्दाभ्यां वृद्धत्वान्मयट् प्राप्तः । बर्हिणां विकारो बार्हिणम् । 'प्राणिरजतादिभ्योऽञ्' ततो 'ञितश्च तत्प्रत्ययात्' इत्यञ् प्राप्तः, शेषेभ्यस्त्वनुदात्तादित्वादञ् प्राप्तः । तथाहि विशिदशिभ्यामिन्द्रशब्द उपपदे मूलविभुजादित्वात्कः । 'अन्येषामपि-' इति दीर्घः । इन्द्राविशः, इन्द्रादशः । 'चप सान्त्वने' पचाद्यच् । चपापीयूक्षाशब्दो 'लघावन्ते-' इति मध्योदात्तः 'फिषः' इत्यधिकारादापः प्रागेव स्वरप्रवृत्तेः । इन्द्रायुधशब्दः समासस्वरेणान्तोदात्तः । अण्ग्रहणं बाधकबाधनार्थम् । यथाविहितप्रत्ययविधौ बर्हिणशब्दाद् वृद्धलक्षणो मयट् स्याद्, 'ञितश्च तत्प्रत्ययात्' इत्यञो बाधनेन वचनस्य

हाटकः तापनीयः सौवर्णो वा निष्कः । 'परिमाणे' किम्-हाटकमयी यष्टिः । १५३२ प्राणिरजतादिभ्योऽञ् । (४-३-१५४) शौकम् । बाकम् । राजतम् । १५३३ ञितश्च तत्प्रत्ययात् । (४-३-१५५) ञितो विकारावयवप्रत्ययः तदन्तादञ्स्यात्तयोरेवार्थयोः। मयटोऽपवादः। शामीलस्य शामीलम्। दाधित्थस्य दाधित्थम् । कापित्थम् । ञितः किम्-बैल्वमयम् । १५३४ क्रीतवत्परिमाणात् । (४-३-१५६) 'प्राग्वहतेष्ठक्' (सू १५४८) इत्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्ते तथैव विकारेऽतिदिश्यन्ते ।

आह—बहुवचनादिति । हाटक इत्यादि । हाटकस्य तपनीयस्य सुवर्णस्य वा निष्कपरिमाणको विकार इत्यर्थः । तापनीय इति । 'नित्यं वृद्धशरादिभ्यः' इति मयटोऽपवादः । इतरत्र तु 'अनुदात्तादेश्च' इत्यञोऽपवादः । 'गुञ्जाः पञ्चाद्यमाषकः । ते षोडशाक्षः' इत्यमरः । 'सुवर्णविस्तौ हेम्नोऽक्षे' इति च । प्राणिरजतादिभ्योऽञ् । शौकम् । बाकमिति । शुकस्य बकस्य वा अवयवो विकारो वेत्यर्थः । 'प्राणिनां कुपूर्वम्' इत्याद्युदात्तत्वाद् 'अनुदात्तादेश्च' इत्यञो न प्राप्तिः । राजतमिति । अनुदात्तादित्वादञि सिद्धे मयड्बाधनार्थोऽञ्विधिः । ञितश्च तत्प्रत्ययात् । तयोर्विकारावयवयोः प्रत्ययः तत्प्रत्ययः । तदाह—ञिद्य इति । तयोरेवेति । विकारावयवयोरेवेत्यर्थः । शामीलस्येति । शम्या विकारः अवयवो वा शामीलम् । 'शम्याः ष्लञ्' । शामीलस्य विकारः अवयवो वेत्यर्थे अञि शामीलमिति भवतीत्यर्थः । 'नित्यं वृद्ध-' इति मयटोऽपवादः । दाधित्थमिति । दधित्थस्य विकारोऽवयवो वा दाधित्थम् । अनुदात्तादित्वादञ् । दाधित्थस्य विकारो दाधित्थम् , मयडपवादोऽञ् । बैल्वमयमिति । 'बिल्वादिभ्योऽण्' इति बिल्वशब्दादणि बैल्वः, तस्य विकार इत्यर्थे मयडेव, न त्वञ् । अणो ञित्त्वाभावादिति भावः । भाष्ये तु 'विकारावयवप्रत्ययान्तात् पुनस्तत्प्रत्यया अनभिधानाद् न' इत्याश्रित्य सूत्रमिदं प्रत्याख्यातम् । क्रीतवत्परिमाणात् । उपाधिनेति । प्रकृत्यादिविशेषणे-

---

चरितार्थत्वादित्याहुः । तालाद्धनुषीति । गणसूत्रमिदम् । हाटक इति । इह वृद्धलक्षणो मयट् प्राप्तः, तपनीयादेः 'अनुदात्तादेश्च' इत्यञ् प्राप्तः । प्राणि । अनुदात्तादेरञः सिद्धत्वात्परिशिष्टमिहोदाहरणं तदाह—शौकम् । बाकमिति । शुकबकशब्दौ 'प्राणिनां कुपूर्वम्' इत्याद्युदात्तौ । राजतमिति । रजत सीस लोह उदुम्बर कण्टकारेत्यादयो रजतादयस्तेषु अनुदात्तादीनां पुनः पाठो मयड्बाधनार्थः। अन्यथा हि परत्वान्मयट् स्यादेव । शामीलमिति । शामीलशब्दः 'शम्याः ष्लञ्' इति ष्लञन्तः । दधित्थाद् 'अनुदात्तादेश्च' इत्यञ् । दाधित्थस्य दाधित्थम् । बैल्व-

अणादीनामपवादः । निष्केण क्रीतं नैष्किकम् । एवं निष्कस्य विकारोऽपि नैष्किकः। शतस्य विकारः शत्यः, शतिकः । १५३५ उष्ट्राद् वुञ् । (४-३-१५७) प्राण्यञोऽपवादः । औष्ट्रकः । १५३६ उमोर्णयोर्वा । (४-३-१५८) औमकम्, औमम् । और्णकम्, और्णम् । वुञभावे यथाक्रममञणौ । १५३७ एण्या ढञ् । (४-३-१५९) ऐणेयम् । एणस्य तु ऐणम् । १५३८ गोपयसोर्यत् । (४-३-१६०) गव्यम् । पयस्यम् । १५३९ द्रोश्च । (४-३-१६१) द्रुर्वृक्षः, तस्य विकारोऽवयवो वा द्रव्यम् । १५४० माने वयः । (४-३-१६२) द्रोः इत्येव । द्रुवयम् । 'यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्' इत्यमरः ।

नेत्यर्थः । **नैष्किक इति** । 'असमासे निष्कादिभ्यः' इति क्रीते ठक् । **शत्यः, शतिक इति** । 'शताच्च ठन्यतौ–' इति क्रीते ठन्यतौ । **उष्ट्राद्वुञ्** । **प्राण्यञ इति** । 'प्राणिरजतादिभ्योऽञ्' इत्यस्यापवाद इत्यर्थः । **उमोर्णयोर्वा** । वुञिति शेषः । **औमकमिति** । उमा सस्यविशेषः । 'उमा स्यादतसी क्षुमा' इत्यमरः । उमाया विकारोऽवयवो वेत्यर्थः । **औममिति** । 'तृणधान्यानां च' इत्युमाशब्द आद्युदात्तः, ततो वुञभावे 'अनुदात्तादेश्च' इत्यञभावादौत्सर्गिकोऽण् । ऊर्णाशब्दस्तु फिट्स्वरेणान्तोदात्तः । ततो वुञभावे अनुदात्तादित्वादञित्यर्थः । 'ऊर्णा मेषादिलोम्नि स्यात्' इत्यमरः । 'स्थूणोर्णे नपुंसके च' इति लिङ्गानुशासनसूत्रम् । **एण्या ढञ्** । एण्या अवयवो विकारो वा ऐणेयम् । ढस्य एयादेशः । 'यस्येति च' इति ईकारलोपः । स्त्रीलिङ्गनिर्देशस्य प्रयोजनमाह—**एणस्य त्विति** । **गोपयसोर्यत्** । **गव्यमिति** । गोर्विकारोऽवयवो वेत्यर्थः । 'वान्तो यि–' इत्यवादेशः । **पयस्यमिति** । पयसो विकार इत्यर्थः । 'सर्वत्र गोरजादिप्रसङ्गे यत्' इत्येव सिद्धे यद्विधानं 'मयड्वैतयोः–' इति पाक्षिकमयटो बाधनार्थम् । **द्रोश्च** । यदिति शेषः । 'एकाचो नित्यम्' इति मयटः 'ओरञ्' इत्यस्य चापवादः । **माने वयः** । **द्रोरित्येवेति** । माने विकारे

मयमिति । बिल्वशब्दोऽणन्तः । **नैष्किकमिति** । 'तेन क्रीतम्' इति ठक् । **शत्यः** । **शतिक इति** । 'शताच्च ठन्यतौ–' । **अणञाविति** । उमाशब्दः 'तृणधान्यानां च' इत्याद्युदात्तः । ऊर्णाशब्दस्तु प्रातिपदिकस्वरेणान्तोदात्त इति भावः । **एण्या ढञ्** । प्राण्यञोऽपवादः । स्त्रीलिङ्गनिर्देशादाह—**एणस्य त्विति** । **गोपयसोः** । यद्यपि सर्वत्र गोरजादिप्रसङ्गे यदुक्तस्तथापि 'मयड्वैतयोः–' इति पक्षे प्राप्तं मयटं बाधितुं पुनरयं यद्विधिः । **द्रोश्च** । ओरञः, 'एकाचो नित्यम्' इति मयटश्चापवादोऽयम् । **द्रव्यमिति** । 'ओर्गुणः' 'वान्तो यि प्रत्यये' 'द्रव्यगुणकर्म–' इत्यादिषु प्रयुज्यमानद्रव्यशब्दस्तु गुणैर्द्रूयते–आश्रीयते इति द्रुधातोः 'अचो यत्'

१५४१ फले लुक्। (४-३-१६३) विकारावयवप्रत्ययस्य लुक्स्यात्फले। आमलक्याः फलमामलकम्। **१५४२ प्लक्षादिभ्योऽण्। (४-३-१६४)** विधानसामर्थ्यान्न लुक्। प्लाक्षम्। **१५४३ न्यग्रोधस्य च केवलस्य। (७-३-५)** अस्य न वृद्धिरैजागमश्च। नैयग्रोधम्। **१५४४ जम्ब्वा वा। (४-३-१६५)** जम्बूशब्दात्फलेऽण्वा स्यात्। जाम्बवम्। पक्षे ओरञ्, तस्य लुक्, जम्बु। **१५४५ लुप् च। (४-३-१६६)** जम्ब्वाः फलप्रत्ययस्य लुब्वा

गम्ये द्रुशब्दाद्वयप्रत्ययः स्यादित्यर्थः। **फले लुक्। आमलकमिति।** फलितस्य वृक्षस्य फलमवयवो विकारश्च, तस्मिन्मयटो लुकि 'लुक्तद्धितलुकि' इति ङीषो लुक्। **प्लक्षादिभ्योऽण्।** विकारे अवयवे चेति शेषः। तत्र शिग्रुकर्कन्धूशब्दयोरुवर्णान्तत्वादञि प्राप्ते प्लक्षन्यग्रोधादीनाम् अनुदात्तादित्वादञि प्राप्ते अण्विधिः। नन्वस्य फले अणो लुक् कुतो नेत्यत आह—**विधानेति। न्यग्रोधस्य च केवलस्य।** 'न य्वाभ्याम्–' इत्युत्तरसूत्रमिदम्। **अस्येति।** केवलस्य न्यग्रोधस्येत्यर्थः। केवलत्वं पदान्तरविहीनत्वम्। न्यग् रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे यद्यपि 'न य्वाभ्याम्–' इत्येव सिद्धम्, यकारस्य पदान्तत्वात्। तथापि केवलस्यैव इति नियमार्थं सूत्रम्। अव्युत्पत्तिपक्षे तु यकारस्य अपदान्तत्वाद् विध्यर्थमेव। 'केवलस्य' किम्? न्याग्रोधमूलाः शालयः। **जम्ब्वा वा। जम्ब्विति।** जम्ब्वाः फलमित्यर्थः। अञो लुकि विशेष्यानुसारेण नपुंसकत्वाद् ह्रस्व इति भावः।

इति यत्प्रत्ययान्तः। **माने वयः।** यतोऽपवादः। **द्रुवयमिति।** द्रोर्विकारभूतं प्रस्थादिपरिमाणमित्यर्थः। **फले लुक्। विकारावयवेति।** फलितस्य वृक्षस्य फलमवयवो विकारश्च, तेनान्यतरस्मिन् प्रत्ययः। **आमलकमिति।** मयटो लुक्, 'लुक्तद्धितलुकि' इति ङीषो लुक्। न चात्र स्थानिवद्भावेन 'यस्येति च' इति लोपः शङ्क्यः। 'लुका लुप्ते न स्थानिवत्' इत्यभ्युपगमात्। अतएव पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुरित्यत्र 'अध्यर्धपूर्व–' इति ठञो लुकि कृते 'लुक्तद्धित–' इति ङीपो लुका लुप्तत्वेन स्थानिवत्त्वाभावादुकारस्य यणादेशो न भवति। **प्लक्षादिभ्योऽण्।** अञोऽपवादः। शिग्रुकर्कन्धूशब्दाभ्याम् 'ओरञ्' इति, अन्येभ्यस्त्वनुदात्तादित्वादञः प्राप्तिः। प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु कर्कन्धू बृहती। तत्र प्लक्षशब्दः 'फिषः' इत्यन्तोदात्तः। न्यग्रोधशब्दो 'लघावन्ते–' इति मध्योदात्तः। अश्वत्थशब्दस्तु घृतादित्वादन्तोदात्तः। इङ्गुदीबृहतीशब्दौ गौरादिङीषन्तौ। 'आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले' इत्यमरः। **न्यग्रोधस्य च।** केवलस्येति किम्, न्यग्रोधमूले भवा न्याग्रोधमूलाः शालयः।। न्यग् रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम्, अव्युत्पत्ति-

स्यात् । 'लुपि युक्तवत्–' (सू १२१४) जम्ब्वाः फलं जम्बूः । 'फलपाकशुषामुपसङ्ख्यानम्' (वा २१४१) । व्रीहयः । मुद्गाः । 'पुष्पमूलेषु बहुलम्' (वा २१५०) मल्लिकायाः पुष्पं मल्लिका । जात्याः पुष्पं जाती । विदार्या मूलं विदारी । बहुलग्रहणादिह । पाटलानि पुष्पाणि । साल्वानि मूलानि । बाहुलकात्क्वचिल्लुक् । अशोकम् । करवीरम् । **१५४६ हरीतक्यादिभ्यश्च ।** (४-३-१६७) एभ्यः फलप्रत्ययस्य लुप्स्यात् । हरीतक्यादीनां लिङ्गमेव प्रकृतिवत् । हरीतक्याः फलानि

लुप् च । लुकैव सिद्धे लुब्विधेः फलमाह—**लुपि युक्तवदिति** । **जम्बूरिति** । जम्ब्वाः फलमित्यर्थः । फलप्रत्ययस्य लुपि युक्तवत्त्वेन विशेष्यलिङ्गवचने बाधित्वा स्त्रीत्वमेकवचनं चेत्यर्थः । तथा च जम्ब्वाः फलान्यपि जम्बूरेव । **फलपाकेति** । फलपाकेन शुष्यन्तीति फलपाकशुष ओषधयः, तद्वाचिभ्यः परस्य फलप्रत्ययस्य लुप उपसंख्यानमित्यर्थः । 'फले लुक्' इत्यस्यापवादः । **व्रीहय इति** । व्रीह्याख्यानामोषधीनां फलानीत्यर्थः । एवं मुद्गाः । बिल्वाद्यणो लुप् । युक्तवद्भावात्पुंस्त्वम्, नतु विशेष्यनिघ्नत्वम् । **पुष्पमूलेषु बहुलमिति** । वार्तिकमिदम् । विकारावयवप्रत्ययस्य लुप् स्यादिति शेषः । **पुष्पं मल्लिकेति** । 'अथ द्वितीयं प्रागीषात्' इत्यनुवृत्तौ 'मादीनां च' इति फिट्सूत्रेण मध्योदात्तो मल्लिकाशब्दः । ततः 'अनुदात्तादेश्च' इत्यञो लुप् । युक्तवत्त्वात्स्त्रीत्वम् । **जातीति** । 'लघावन्ते–' इत्यन्तोदात्तो जातिशब्दः । ततः 'अनुदात्तादेश्च' इत्यञोऽनेन लुप् । युक्तवत्त्वात्स्त्रीत्वम् । **विदारीति** । जातिङीषन्तमिदं प्रत्ययस्वरेणान्तोदात्तम् । अनुदात्तादित्वादञि तस्य लुप्, युक्तवत्त्वात्स्त्रीत्वम् । **पाटलानीति** । बिल्वादित्वादण् । एवं साल्वानि । ननु अशोकस्य पुष्पम् अशोकम्, करवीरस्य पुष्पं करवीरम्, इत्यत्रापि 'पुष्पमूलेषु बहुलम्' इति लुपि युक्तवत्त्वात् पुंस्त्वे अशोकः पुष्पं करवीरः पुष्पमिति स्यादित्यत आह—**बहुलग्रहणात् क्वचिल्लुगिति** । तथा च युक्तवत्त्वस्याप्रवृत्तेः विशेष्यनिघ्नत्वमेवेति भावः । **हरीतक्यादिभ्यश्च** । **हरीतक्यादीनामिति** । वार्तिकमिदम् । एषां प्रकृतिलिङ्गमेव लुप्तप्रत्ययार्थे अतिदिश्यते, नतु प्रकृतिवचनमपीत्यर्थः । **हरीतक्य**

पक्षे तु विध्यर्थम् । **जम्ब्विति** । नपुंसकह्रस्वः । 'फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम्' । **फलपाकेति** । फलपाकेन शुष्यन्तीति फलपाकशुषः । **व्रीहयः** । **मुद्गा इति** । बिल्वाद्यणो लुक् । **मल्लिकेति** । अनुदात्तलक्षणस्याञो लुप् । 'मालादीनां च' इति फिट्सूत्रान्मल्लिकाशब्दे द्वितीयमुदात्तम् । जातीविदारीशब्दौ गौरादिङीषन्तौ । **पाटलानीति** । बिल्वादित्वादण् । साल्वशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । **हरीतक्यादिभ्यश्च** । इह द्राक्षाप्रभृतिभ्यो 'नित्यं वृद्ध–' इति प्राप्तस्य

हरीतक्यः । **१५४७ कंसीयपरशव्ययोर्यञञौ लुक्च** । (४-३-१६८) कंसीयपरशव्यशब्दाभ्यां यञञौ स्तश्छयतोश्च लुक् । कंसाय हितं कंसीयम्, तस्य विकारः कांस्यम् । परशवे हितं परशव्यम्, तस्य विकारः पारशवः ।

इति तद्धितेषु चतुर्थस्य तृतीयपादे प्राग्दीव्यतीयप्रकरणम् ।

अथ तद्धितेषु प्राग्वहतीयप्रकरणम् । ३० ।

१५४८ प्राग्वहतेष्ठक् । (४-४-१) तद्वहतीत्यतः प्राक् ठगधिक्रियते । 'तदाहेति माशब्दादिभ्य उपसङ्ख्यानम्' (वा २८५१) मा शब्दं कार्षीः

इति । जातिङीषन्तः प्रत्ययस्वरेणान्तोदात्तो हरीतकीशब्दः । ततोऽनुदात्तादित्वादञि तस्य 'फले लुक्' इति लुकि प्राप्ते लुपि युक्तवद्भावात्स्त्रीत्वे विशेष्यानुरोधाद्बहुवचनम् । **कंसीयपरशव्य** । अत्र यञञोर्न लुक्, विधिवैयर्थ्यात् । नापि प्रकृत्योः, प्रत्ययादर्शनस्यैव लुक्त्वात् । अतः परिशेषात् प्रकृत्येकदेशयोः छयतोरिति लभ्यते । तदाह—**छयतोरिति** । **कंसीयमिति** । कंसो नाम धातुर्लोहविशेषः । **तस्मै** हितमिति छः । **कांस्यमिति** । कंसीयशब्दाद् यञि छस्य लुकि आदिवृद्धौ 'यस्येति च' इत्यकारलोपः । **परशव्यमिति** । 'तस्मै हितम्' इत्यधिकारे 'उगवादिभ्यो यत्' इति यति, ओर्गुणे 'वान्तो यि—' इत्यवादेशः । **पारशव इति** । परशव्यशब्दादञि यतो लुकि ओर्गुणे पारशवः । 'हलस्तद्धितस्य' इति तु न, ईतीत्यनुवृत्तेः । अनापत्यत्वाद् 'आपत्यस्य च—' इत्यपि लोपो न प्रसज्यत इति भावः ।

इति तद्धितेषु चतुर्थस्य तृतीयपादे प्राग्दीव्यतीयप्रकरणम् ।

अथ चतुर्थस्य चतुर्थः पादः प्रारभ्यते—प्राग्वहतेष्ठक् । वहतीत्येकदेशेन 'तद्वहति रथयुगप्रासङ्गम्' इति सूत्रं परामृश्यते इत्यभिप्रेत्याह—**तद्वह**-

---

मयटो लुप्, अनुदात्तादिभ्योऽञः, इतरेभ्यस्त्वणः । **लिङ्गमेवेति** । वचनं तु विशेष्यवदेव । 'हरीतक्यादिषु व्यक्तिः' इत्युक्तत्वादिति भावः । **कंसीयमिति** । 'प्राक्क्रीताच्छः' इत्यधिकारे 'तस्मै हितम्' इति छः । तस्यैव छस्यापवादतया 'उगवादिभ्यो यत्' परशव्यं दारु । परशव्यशब्दस्यानुदात्तादित्वादञि सिद्धे तत्संनियोगेन यतो लुगर्थं वचनम् । न च 'यस्येति—' यलोप कृते 'हलस्तद्धितस्य' इति यलोपेन सिद्धमिष्टमिति भ्रमितव्यम् । ईतीत्यनुवृत्तेः ।

इति तत्त्वबोधिन्यां प्राग्दीव्यतीयप्रकरणम् ।

तदाहेतीति । वाक्यादयं प्रत्ययविधिः, शब्दो माकारीति यो निषेधति स माशब्दिक इत्युच्यते । तथा नित्यः शब्द इति य आह स नैत्यशब्दिकः ।

इति य आह स माशब्दिकः । १५४६ स्वागतादीनां च । (७-३-७) ऐज्न स्यात् । स्वागतमित्याह स्वागतिकः । स्वाध्वरिकः । स्वङ्गस्यापत्यं स्वाङ्गिः । व्यङ्गस्यापत्यं व्याङ्गिः । व्यडस्यापत्यं व्याडिः । व्यवहारेण चरति व्यावहारिकः । स्वपतौ साधु स्वापतेयम् । 'आहौ प्रभूतादिभ्यः' (वा २१५२) । प्रभूतमाह

तीत्यत इति । तदाहेति । इतिशब्दो व्युत्क्रमेण तच्छब्दानन्तरं द्रष्टव्यः । तदित्याहेत्यर्थे माशब्दस्वागतइत्यादिशब्देभ्यः ठक् उपसंख्यानमित्यन्वयः । तदित्यनेन वाक्यार्थो विवक्षितः । इतिशब्दस्तस्य वाक्यार्थस्य कर्मत्वं गमयति । 'मा शब्दं कार्षीः' इत्याहेत्याद्यर्थे तद्वाक्यावयवाद् 'माशब्द' इत्यादिशब्दात् ठगिति यावत् । **मा शब्दं कार्षीः इति य आह स माशब्दिक इति** । शब्दं मा कार्षीरित्यन्वयः । 'माङि लुङ्' इति लोडर्थे लुङ् । 'न माङ्योगे' इत्यडागमनिषेधः । शब्दं न कुरु इत्यर्थः । अत्र आहेति ब्रूञ्धात्वर्थव्यक्तवचनक्रियां प्रति मा शब्दं कार्षीरिति वाक्यार्थः कर्म । तद्वाक्यैकदेशो माशब्देति समुदायः । तस्मान्निर्विभक्तिकादयं प्रत्ययः । न हि माशब्देति समुदायाद्विभक्तिरस्ति । एवं च माशब्देति समुदायाट्ठकि माशब्दिक इति रूपम् । 'मा शब्दः कारि' इति पाठे तु कारीति कर्मणि लुङ् । शब्दो न कार्य इत्यर्थः । नच तदाहेत्यर्थे माशब्दादिभ्यः ठगिति यथाश्रुतम् अभ्युपगम्य माशब्दमाहेत्याद्यर्थे माशब्देत्यादिशब्देभ्यो द्वितीयान्तेभ्यः ठगित्येव कुतो न व्याख्यायत इति वाच्यम्, एवं सति 'आहौ प्रभूतादिभ्यः' इत्युत्तरवार्तिकारम्भवैयर्थ्यापत्तेरिति भावः । स्वागतादिगणे स्वागत, स्वध्वर इति पठितम्, तत्र विशेषमाह—**स्वागतादीनां च** । 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति प्रकरणे 'कर्मव्यतिहारे' इत्यस्मादुत्तरं सूत्रमिदम् । **ऐज्न स्यादिति** । शेषपूरणमिदम् । 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति प्राप्त ऐज् न स्यादित्यर्थः । **स्वाध्वरिक इति** । स्वध्वर इत्याहेत्यर्थः । अथ स्वागतादिगणशेषमुदाहरति—**स्वङ्गस्येति** । **व्याङ्गिरिति** । व्यङ्गस्यापत्यमिति विग्रहः । **व्यडस्येति** । न विद्यते डो यस्य सः अडः, विगतः अडः व्यडः । **स्वापतेयमिति** । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' । द्वारादित्वादैच् प्राप्तो निषिध्यते । **आहाविति** । 'आह' इति पदैकदेशादिकारस्य उच्चारणार्थो निर्देशः । 'तत्'

कार्यशब्दिकः । इह वाक्याद् द्वितीया न सम्भवत्यप्रातिपदिकत्वात् । तेन तच्छब्देन कर्ममात्रं निर्दिश्यते, तच्च वाक्यार्थरूपमित्याहुः । **ऐज् न स्यादिति** । 'न य्वाभ्याम्—' इति प्राप्त ऐजागमोऽनेन निषिध्यते । 'न कर्म—' इत्यतो नञनुवर्तनादिति भावः । **स्वापतेयमिति** । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' । स्वशब्दस्य द्वारादित्वादैजागमस्य

प्राभृतिकः। पार्यासिकः। 'पृच्छतौ सुस्नातादिभ्यः' (वा २६५३)। सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। अनुशतिकादिः। 'गच्छतौ परदारादिभ्यः' (वा २६५४)। पारदारिकः। गौरुतल्पिकः। **१५५० तेन दीव्यति खनति जयति जितम्।** (४-४-२) अक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितमाक्षिकम्। **१५५१ संस्कृतम्।** (४-४-३) दध्ना संस्कृतं दाधिकम्। मारीचिकम्। **१५५२ कुलत्थकोपधादण्।** (४-४-४) ठकोऽपवादः। कुलत्थैः संस्कृतं कौलत्थम्। तैन्तिणीकम्। **१५५३ तरति।** (४-४-५) उडुपेन तरति औडुपिकः। **१५५४ गोपुच्छाट्ठञ्।** (४-४-६) गौपुच्छिकः। **१५५५ नौद्व्यचष्ठन्।** (४-४-७)

इति पूर्ववार्तिकादनुवर्तते। आहेत्यर्थे द्वितीयान्तेभ्यः प्रभृतादिभ्यष्ठग्वाच्य इत्यर्थः। **पार्यासिक इति।** पर्यासमाहेत्यर्थः। **पृच्छताविति।** 'तत्' इत्यनुवर्तते। पृच्छतीत्यर्थे द्वितीयान्तेभ्यः सुस्नातादिभ्यः ठग्वाच्य इत्यर्थः। **सौखशायनिक इति।** सुखशयनं पृच्छतीत्यर्थः। **अनुशतिकादिरिति।** सुखशयनशब्द इति शेषः। ततश्च 'अनुशतिकादीनां च' इति पूर्वोत्तरपदयोरादिवृद्धिरिति भावः। **गच्छताविति।** 'तत्' इत्यनुवर्तते। गच्छतीत्यर्थे परदारादिभ्यो द्वितीयान्तेभ्यः ठगित्यर्थः। **पारदारिक इति।** परदारान्गच्छतीत्यर्थः। **गौरुतल्पिक इति।** गुरुतल्पं गच्छतीत्यर्थः। गुरुतल्पो गुरुस्त्री। **तेन दीव्यति खनति जयति जितम्।** तेन दीव्यति, तेन खनति, तेन जयति, तेन जितम् इति विग्रहेषु तृतीयान्ताट्ठगित्यर्थः। अभ्रिः कुद्दालः। देवदत्तेन जितमित्यत्र तु न ठक्। करणतृतीयान्तादेव तद्विधेः। **संस्कृतम्।** तेनेत्येव। संस्कृतमित्यर्थे तृतीयान्ताट्ठगित्यर्थः। 'संस्कृतं भक्षाः' इत्यत्र तु सप्तम्यन्तादणादिविधिः। **मारीचिकमिति।** मरीचिभिः संस्कृतमित्यर्थः। **कुलत्थकोपधादण्।** संस्कृतमित्यर्थे तृतीयान्तादिति शेषः। **तैन्तिणीकमिति।** तिन्तिणीकेन संस्कृतमित्यर्थः। **तरति।** तरतीत्यर्थे तृतीयान्ता-

---

प्राप्तिः। द्वारादिफलं तु स्वस्येदं सौवमिति ज्ञेयम्। **आहाविति।** उपसंख्यानमित्यनुषज्यते। आहेतिपदे एकदेशस्य प्रकृतिभागस्यागन्तुकेनेकारेण आहावित्यनुकरणम्। **प्राभृतिक इति।** क्रियाविशेषणाद्वक्तरि प्रत्ययः। **तेन दीव्यति।** इह कालपुरुषसंख्या न विवक्षिताः। तेनाक्षैरदेवीद् देविष्यति वा आक्षिक इति भवति। एवमक्षैर्देविष्यसि देविष्यामि वा आक्षिकः, दीव्यन्ति दीव्यथ दीव्यामो वा आक्षिकाः। कारकं तु विवक्षितमेव 'जयति, जितम्' इति कर्तृकर्मणोः पृथगुपादानात्। तेनाक्षैर्द्यूतः, अक्षैः खातः, इति कर्माद्यर्थे आक्षिक इति न भवति। **अभ्र्येति।** 'अभ्रिः स्त्री

नाविकः । घटिकः । बाहुभ्यां तरति बाहुका स्त्री । १५५६ चरति । (४-४-८) तृतीयान्ताद्गच्छतिभक्षयतीत्यर्थयोष्ठक्स्यात् । हस्तिना चरति हास्तिकः । शाकटिकः । दध्ना भक्षयति दाधिकः । १५५७ आकर्षात्ष्ठल् । (४-४-९) आकर्षो निकषोपलः । 'आकषात्' इति पाठान्तरम् । तेन चरति आकर्षिकः । षित्त्वान्ङीष् आकर्षिकी । १५५८ पर्पादिभ्यः ष्ठन् । (४-४-१०) पर्पेण चरति पर्पिकः, पर्पिकी । येन पीठेन पङ्गवश्चरन्ति स पर्पः । अश्विकः । रथिकः । १५५९ श्वगणाट्ठञ् च । (४-४-११) चात्ष्ठन् । १५६० श्वादेरिञि । (७-३-८) ऐज्न । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । श्वादंष्ट्रिः । तदादिविधौ चेदमेव ज्ञापकम् ।

ट्ठगित्यर्थः । गोपुच्छाट्ठञ् । तरतीत्यर्थे तृतीयान्तादिति शेषः । नौद्व्यचष्ठन् । ठनिति च्छेदः । ष्टुत्वकृतः सस्य षकारः । तरतीत्यर्थे नौशब्दाद् द्व्यचश्च तृतीयान्तात् ठनित्यर्थः । नाविक इति । नावा तरतीत्यर्थः । घटिक इति । घटेन तरतीत्यर्थः । बाहुका स्त्रीति । उकः परत्वात् ठस्य कः । अदन्ताट्टाप् । चरति । गच्छति भक्षयतीति । 'चर गतिभक्षणयोः' इति चरधातोरर्थद्वये वृत्तेरिति भावः । हास्तिक इति । ठनि इके 'नस्तद्धिते' इति टिलोपः । आकर्षात्ष्ठल् । तेन चरतीत्यर्थे तृतीयान्तादाकर्षशब्दात् ष्ठलित्यर्थः । पर्पादिभ्यः ष्ठन् । ष्ठन् इति च्छेदः । चरतीत्यर्थे तृतीयान्तेभ्य इति शेषः । षित्त्वं ङीषर्थमित्याह—पर्पिकीति । अश्विक इति । अश्वेन चरितीत्यर्थः । श्वगणाट्ठञ् च । उक्तविषय इति शेषः । श्वगणशब्दात्तृतीयान्ताच्चरतीत्यर्थे ठञ् ष्ठन् च स्यादित्यर्थः । श्वागणिक इत्युदाहरणं वक्ष्यति । तत्र श्वन्शब्दस्य द्वारादित्वादैजागमे प्राप्ते । श्वादेरिञि । 'न कर्मव्यतिहारे' इत्यतो 'न' इत्यनुवर्तते । अङ्गस्य इत्यधिकृतम् । श्वन्शब्द आदिर्यस्येति विग्रहः । श्वन्शब्दपूर्वपदस्याङ्गस्य इञि परे

काष्ठकुद्दालः' इत्यमरः । संस्कृतम् । योगविभाग उत्तरार्थः । बाहुकेति । सूत्रे षकारः सांहितिकः, न त्वनुबन्ध इति न ङीष् । तथा च 'आकर्षात् पर्पादेः' इत्यादि श्लोकवार्तिकं षित्त्वविवेचनाय प्रकरणान्ते पठिष्यति । निकषोपल इति । सुवर्णपरीक्षार्थः । पाठान्तरमिति । एतच्च भ्वादौ 'कषखष–' इत्यादिदण्डके 'आकर्षात्ष्ठल्' इति माधवेनोपन्यस्तम् । किंतु 'आकर्षात्पर्पादेः' इति वार्तिकस्याननुगुणम् । तत्र हि नीरेफपाठे वृत्तासङ्गतिप्रसङ्गात् । पर्प इति । 'पर्प गतौ' । 'हलश्च' इति करणे घञ् । इहान्तर्गणसूत्रं 'पादः पच्च' इति पादाभ्यां चरति पदिकः । यत्तु वार्तिकं 'पद्भाव इके चरतावुपसंख्यानम्' इति सोऽस्यैव प्रपञ्चः । पर्प, अश्व, अश्वत्थ, रथ, जाल, न्याय, व्याल, 'पादः पच्च' । श्वगणाट्ठञ्च । ठकोऽपादः । इदमेव ज्ञापक-

'इकारादाविति वाच्यम्' (वा ४२१२)। श्वगणेन चरति श्वागणिकः, श्वागणिकी श्वगणिकः, श्वगणिकी। **१५६१ पदान्तस्यान्यतरस्याम्।** (७-३-९) श्वादेरङ्गस्य पदशब्दान्तस्यैज् वा। श्वापदस्येदं श्वापदम्, शौवापदम्। **१५६२ वेतनादिभ्यो जीवति।** (४-४-१२) वेतनेन जीवति वैतनिकः। धानुष्कः। **१५६३ वस्नक्रयविक्रयाट्ठन्।** (४-४-१३) वस्नेन मूल्येन जीवति वास्निकः।

नैजागम इत्यर्थः। **श्वाभस्त्रिरिति।** अत इञ्। **श्वादंष्ट्रिरिति।** श्वदंष्ट्रस्यापत्यमित्यर्थः। ननु श्वन्शब्द एव द्वारादौ पठ्यते नतु श्वभस्त्रशब्दः। ततश्च तस्य द्वारादित्वाभावादैजागमप्रसक्तिरेव नेत्यत आह—**तदादिविधिरिति।** द्वारादिगणे श्वन्शब्दस्य पाठेऽपि अस्मादेव प्रतिषेधात् श्वन्शब्दपूर्वकस्याङ्गस्य द्वारादिगणे ग्रहणं विज्ञायत इत्यर्थः। तत्फलं तु श्ववहनस्येदं शौववाहनं नाम नगरम्। ननु प्रकृते श्वागणिके इञभावात्कथमयं निषेध इत्यत आह—**इकारादाविति वाच्यमिति।** इञीति परित्यज्य इकारादाविति वाच्यमित्यर्थः। इञि तु व्यपदेशिवत्त्वेन इकारादित्वम्। **श्वागणिक इति।** ठञि आदिवृद्धिः। **श्वागणिकीति।** ठञन्तात् 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' इति ङीप्। **श्वगणिक इति।** ष्ठनि रूपम्। **श्वगणिकीति।** षित्त्वाद् ङीष्। प्रसङ्गादाह—**पदान्तस्यान्यतरस्याम्।** 'श्वादेरिञि' इत्यस्मादुत्तरं सूत्रमिदम्। पदं पदशब्दः अन्तो यस्येति विग्रहः। तदाह—**पदशब्दान्तस्येति।** ऐज्वेति। निषेधविकल्पे सति विधिविकल्पः फलित इति भावः। **श्वापदस्येति।** शुनः पदमिव पदं यस्येति विग्रहः। 'शुनो दन्तदंष्ट्रा—' इत्यादिना दीर्घः। **शौवापदमिति।** 'तस्येदम्' इत्यण्। 'वृद्धाच्छः' इति तु न, अनभिधानादित्याहुः। अन्ये तु श्वपुच्छवद्दीर्घाभावे अणमाहुः। **वेतनादिभ्यो जीवति।** जीवतीत्यर्थे तृतीयान्तेभ्यः ठगिति शेषः। **वैतनिक इति।** वेतनेन जीवतीत्यर्थः। **धानुष्क इति।** धनुषा जीवतीत्यर्थः। उसन्तात्परत्वाट्ठस्य कः। 'इणः षः' इति षत्वम्। **वस्नक्रयविक्रयाट्ठन्।** जीवतीत्यर्थे तृतीयान्तेभ्यो वस्नादिभ्यः ठन् स्यादित्यर्थः। **सङ्घातविगृहीता-**

मिति। द्वारादिगणे श्वन्शब्दः पठ्यते, न तु श्वभस्त्रः श्वदंष्ट्रत्यादि तथा च 'श्वादेरिञि' इति निषेधसूत्रमेव व्यर्थं सद् द्वारादिषु तदादिविधिं ज्ञापयतीत्यर्थः। फलं तु द्वारपालस्यायं दौवारपाल इत्यादावैजागमस्य प्रवृत्तिः। **इकारादाविति।** सूत्रे इञीत्यपनीय इकारादाविति पठनीयमित्यर्थः। अन्ये तु इञीति स्थाने इतीति पठनीयम्। तथा चाङ्गाक्षिप्तप्रत्ययस्य विशेष्यत्वाद् 'यस्मिन्विधिस्तदादौ—' इत्यनेन इकारादिर्लभ्यत इत्याह—**श्वगणिकीति।** ष्ठनः षित्त्वान्ङीष्। **श्वापदस्येति।** 'अन्येषामपि दृश्यते' इति दीर्घः। **धानुष्क इति।** वेतनादिगणे धनुर्दण्डेति पठ्यते, तच्च सङ्घातविगृही-

क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम् । क्रयविक्रयिकः, क्रयिकः, विक्रयिकः। **१५६४ आयुधाच्छ च । (४-४-१४)** चाट्ठन् । आयुधेन जीवति आयुधीयः, आयुधिकः । **१५६५ हरत्युत्सङ्गादिभ्यः । (४-४-१५)** उत्सङ्गेन हरत्यौत्सङ्गिकः । **१५६६ भस्त्रादिभ्यः ष्ठन् । (४-४-१६)** भस्त्रया हरति भस्त्रिकः । षित्त्वाद् भस्त्रिकी । **१५६७ विभाषा विवधात् । (४-४-१७)** विवधेन हरति विवधिकः । पक्षे ठक् । वैवधिकः । एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन् । वीवधिकः, वीवधिकी । विवधवीवधशब्दौ उभयतो बद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तेते । **१५६८ अण् कुटिलिकायाः । (४-४-१८)** कुटिलिका व्याधानां गतिविशेषः, कर्मारोपकरणभूतं लोहं च । कुटिलिकया हरति मृगानङ्गारान्वा कौटिलिको व्याधः कर्मारश्च । **१५६९ निर्वृत्तेऽक्षद्यूतादिभ्यः । (४-४-१९)** अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् । **१५७० क्त्रेर्मम्नित्यम् । (४-४-२०)** त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेऽर्थे

र्थमिति । व्याख्यानादिति भावः । **आयुधाच्छ च ।** जीवतीत्यर्थे तृतीयान्ताद् आयुधशब्दात् छः स्यात् ठन् चेत्यर्थः । **हरत्युत्सङ्गादिभ्यः ।** हरतीत्यर्थे तृतीयान्तेभ्यः उत्सङ्गादिभ्य ठक् स्यादित्यर्थः । **भस्त्रादिभ्यः ष्ठन् ।** ष्ठनिति छेदः । हरतीत्यर्थे तृतीयान्तेभ्यो भस्त्रादिभ्यः ष्ठन् स्यादित्यर्थः । **षित्त्वादिति ।** ङीष् इति शेषः । **विभाषा विवधात् ।** हरतीत्यर्थे तृतीयान्तात् ष्ठनिति शेषः । **अण् कुटिलिकायाः ।** हरतीत्यर्थे तृतीयान्तात् कुटिलिकाशब्दादण् स्यादित्यर्थः । कर्मारो लोहकारः तस्य यद् अङ्गारतप्तलोहादिग्रहणसाधनं लोहविकारभूतं सन्दंशापरनामधेयम्, तदपि कुटिलिकेत्यर्थः । **निर्वृत्तेऽक्षद्यूतादिभ्यः ।** निर्वृत्तमित्यर्थे तृतीयान्तेभ्योऽक्षद्यूतादिभ्यः ठगित्यर्थः । **क्त्रेर्मम्नित्यम् ।** तेन निर्वृत्तमित्यर्थे 'ड्वितः क्त्रिः' इति क्त्रिप्रत्ययान्तान्नित्यं मप्प्रत्ययः स्यादि-

---

तार्थम् । तथा च धानुर्दण्डिकः, दाण्डिक इत्यप्युदाहार्यम् । **आयुधाच्छ च ।** आयुध्यन्ते अनेनेति आयुधम्, 'घञर्थे कविधानम्' इति कः। **हरत्युत्सङ्गादिभ्यः ।** एभ्यस्तृतीयान्तेभ्यष्ठक् स्यादुपादत्ते नयति वेत्यर्थे । उत्सङ्ग, उडुप, उत्थित, पिटक, पिटाक । **भस्त्रादिभ्यः ष्ठन् ।** भस्त्रा चर्मविकारः । शीर्षभारशब्दोऽत्र पठ्यते निपातनाच्छीर्षभावः सप्तमीसमासश्च, 'तत्पुरुषे कृति-' इति वा अलुक् । पक्षे शीर्षभारः । **एकदेशविकृतस्येति ।** 'वीवधाच्चेति वक्तव्यम्' इति वार्तिकं न्यायसिद्धार्थकथनपरमिति भावः । वृत्तिकृत्तु सूत्रे वीवधशब्दं प्रक्षिप्य 'विभाषा विवधवीवधात्' इति पपाठ । **क्त्रेर्मम्नित्यम् ।** नित्यग्रहणं स्वातन्त्र्येण प्रयोगं वारयितुम्।

मप्स्यादित्यम् । कृत्या निर्वृत्तं कृत्रिमम् । पक्त्रिमम् । 'भावप्रत्ययान्तादिमब्वक्तव्यः' (वा २११२६) पाकेन निर्वृत्तं पाकिमम् । त्यागिमम् । १५७१ अपमित्ययाचिताभ्यां कक्कनौ । (४-४-२१) अपमित्येति ल्यबन्तम् । अपमित्य निर्वृत्तमापमित्यकम् । याचितेन निर्वृत्तं याचितकम् । १५७२ संसृष्टे । (४-४-२२) दध्ना संसृष्टं दाधिकम् । १५७३ चूर्णादिनिः । (४-४-२३) चूर्णैः संसृष्टा-

---

त्यर्थः । 'समर्थानां प्रथमाद्वा' इति महाविकल्पनिवृत्त्यर्थं नित्यग्रहणम् । ततश्च अस्मिन्नर्थे मप्प्रत्ययं विना क्त्रिप्रत्ययान्तस्य प्रयोगो नेति भाष्ये स्पष्टम् । एवं चात्र अस्वपदविग्रहं दर्शयति—**कृत्या निर्वृत्तमिति** । अत्र विग्रहवाक्ये 'स्त्रियां क्तिन्' इति क्तिन्नन्तोऽयं कृतिशब्दः । **कृत्रिममिति** । 'डुकृञ् करणे' इति धातोः 'ड्वितः क्त्रिः' इति क्त्रिप्रत्ययान्तान्मप् । **पक्त्रिममिति** । पक्त्या निर्वृत्तमित्यस्वपदविग्रहः । 'डुपचष् पाके' इत्यस्मात् क्त्रिप्रत्ययान्तान्मप् । **इमब्वक्तव्य इति** । निर्वृत्तमित्यर्थे तृतीयान्तादिति शेषः । अत्र नित्यमिति न संबध्यते इत्यभिप्रेत्य लौकिकस्वपदविग्रहं दर्शयति—**पाकेन निर्वृत्तमिति । अपमित्ययाचिताभ्याम् । ल्यबन्तमिति** । 'मेङ् प्रणिदाने' इत्यस्माद् विनिमयार्थकाद् 'उदीचां माङो व्यतिहारे' इति क्त्वाप्रत्यये गतिसमासे ल्यपि 'मयतेरिदन्यतरस्याम्' इति इत्वे 'ह्रस्वस्य पिति–' इति तुगागमे अपमित्येत्यव्ययम्, 'क्त्वातोसुन्कसुनः' इत्युक्तेरित्यर्थः । निर्वृत्तमित्यर्थे अपमित्येत्यव्ययात्प्रथमान्ताद्याचितशब्दाच्च तृतीयान्तात् कक् कन् च यथासंख्यं स्यातामित्यर्थः । अपमित्येत्यंशे तृतीयान्तत्वासंभवात् प्रथमान्तादिति लभ्यते । **संसृष्टे** । संसृष्टमित्यर्थे तृतीयान्तात् ठग् इत्यर्थः । **चूर्णादिनिः** ।

अतएव लौकिके विग्रहवाक्ये क्तिन्नादीनां प्रयोगः, न तु क्त्रेः, तदाह—**कृत्या निर्वृत्तमिति** । एवमग्रेऽपि पाकेन निर्वृत्तमिति विग्रहो बोध्यः । संख्यावाची त्रिशब्दो नेह गृह्यते, प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणात्, 'णिजां त्रयाणाम्–' इति लिङ्गाच्च । ननु नित्यग्रहणेन निर्वृत्तार्थविवक्षायां मपं विना त्रिप्रत्ययान्तस्य प्रयोगनिवारणेऽपि तदविवक्षायां तस्य स्वातन्त्र्येण प्रयोगो दुर्वार इति चेत्, न। नित्यमिति योगं विभज्य तत्सामर्थ्यादर्थविशेषानादरेणैव स्वातन्त्र्यवारणात् । **इमबिति** । एवं च मप् न कर्तव्यः । तथा हि 'भावप्रत्ययान्तादिमप्' । ततः 'त्रेः' । पूर्वेण सिद्धे नियमार्थमिदं त्रिप्रत्ययान्त इमब्विषय एवेति । तेन त्रिप्रत्ययान्तप्रयोगो निवर्तते । ततो 'नित्यम्' अनेन निर्वृत्तार्थविवक्षायामपि त्र्यन्तस्य स्वातन्त्र्यं वार्यते । एवं च संख्यावाचित्रिशब्दस्य ग्रहणशङ्कैव नास्ति, भावप्रत्ययान्तादित्यनुवृत्तेः । स्वरेऽपि विशेषो नास्ति, उदात्तनिवृत्तिस्वरेण इमप इकारस्योदात्तत्वात् । **अपमित्येति** ।

*चूर्णिनोऽपूपाः । १५७४ लवणाल्लुक् । (४-४-२४) लवणेन संसृष्टो लवणः सूपः । लवणं शाकम् । १५७५ मुद्गादण् । (४-४-२५) मौद्ग ओदनः । १५७६ व्यञ्जनैरुपसिक्ते । (४-४-२६) ठक् । दध्ना उपसिक्तं दाधिकम् । १५७७ ओजःसहोऽम्भसा वर्तते । (४-४-२७) ओजसा वर्तते औजसिकः शूरः । साहसिकश्चौरः । आम्भसिको मत्स्यः । १५७८ तत्प्रत्यनुपूर्वमीपलोमकूलम् । (४-४-२८) द्वितीयान्तादस्माद्वर्तते इत्यस्मिन्नर्थे ठक्स्यात् । क्रियाविशेषणत्वाद् द्वितीया । प्रतीपं वर्तते प्रातीपिकः । आन्वीपिकः ।

संसृष्टमित्यर्थे तृतीयान्तादिति शेषः । **लवणाल्लुक्** । पूर्वसूत्रविहितस्येति शेषः । **मुद्गादण्** । तेन संसृष्टमित्यर्थे तृतीयान्तादिति शेषः । **मौद्ग ओदन इति** । मुद्गैः संसृष्ट इत्यर्थः । **व्यञ्जनैरुपसिक्ते** । उपसिक्तमित्यर्थे तृतीयान्तेभ्यो व्यञ्जनवाचिभ्यः ठगित्यर्थः । सेचनेन मृदूकरणमुपसेकः । संसृष्ट इत्येव सिद्धे नियमार्थं सूत्रम्—व्यञ्जनवाचिभ्य उपसिक्त एवेति । तेनेह न—सूपेन संसृष्टा स्थाली । **ओजःसहो** । वर्तते व्याप्रियते इत्यर्थे ओजस्, सहस्, अम्भस् एभ्यः तृतीयान्तेभ्यः ठक् स्यादित्यर्थः । **औजसिक इति** । ओजसा बलेन वर्तते, युद्धे व्याप्रियत इत्यर्थः । **साहसिक इति** । सहसा प्राणवियोगाभ्युपगमेन स्तेये व्याप्रियत इत्यर्थः । **आम्भसिक इति** । अम्भसा हेतुना संचारे व्याप्रियत इत्यर्थः । **तत्प्रत्यनुपूर्व** । तदिति द्वितीयान्तानुकरणम् । प्रत्यनुपूर्वेभ्यो द्वितीयान्तेभ्य ईपलोमकूलशब्देभ्यो वर्तते इत्यर्थे ठक् स्यादित्यर्थः । ननु प्रतीपं वर्तते इत्यादिवक्ष्यमाणविग्रहेषु वर्ततेरकर्मकत्वात् कथं द्वितीयेत्यत आह—**क्रियाविशेषणत्वादिति** । इदं च कारकनिरूपणे निरूपितम् । 'क्रियाविशेषणानां प्रथमान्तत्वमेव' इति तु शब्देन्दुशेखरे । **प्रतीपमिति** । प्रतिगता आपो यस्मिन्निति बहुव्रीहिः । 'ऋक्पूः—' इत्यकारः समासान्तः । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इति ईत्त्वम् । अनुगता

'उदीचां माङः—' इति क्त्वाप्रत्यये अपेत्यनेन सह गतिसमासः, क्त्वो ल्यप् । 'मयतेरिदन्यतरस्याम्' इति इत्वम्, 'ह्रस्वस्य—' इति तुक् । ल्यबन्तादस्मात्तृतीयान्तात्प्रत्ययो न भवति, किं तु वचनात्प्रथमान्तादेवेति बोध्यम् । **व्यञ्जनैरुप** । व्यज्यते अनेन ओदनादिरस इति व्यञ्जनं तद्वाचिभ्य उपसिक्त इत्यर्थे ठक् स्यात् । **तत्प्रत्यनु** । वृत्तेरकर्मकत्वात्कथं तस्य द्वितीयान्तेन प्रतीपमित्यादिना सम्बन्ध इत्याशङ्कायामाह—**क्रियाविशेषणत्वादिति** । **प्रतीपमिति** । प्रतिगता आपोऽस्मिन्निति बहुव्रीहिः । 'ऋक्पूः—' इत्यकारः समासान्तः । 'द्व्यन्तरुपसर्गेभ्यः—' इति ईत्वम् । व्युत्पत्तिमात्रमिदम् । प्रतिकूलानुकूलपर्याया ह्यमे रूढिशब्दाः । **आन्वीपिक इति** । अन्वीप-

प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः। **१५७९ परिमुखं च।** (४-४-२९) परिमुखं वर्तते पारिमुखिकः। चात्पारिपार्श्विकः। **१५८० प्रयच्छति गर्ह्यम्।**(४-४-३०) द्विगुणार्थं द्रव्यं द्विगुणम्, तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। 'वृद्धेर्वृधुषिभावो वक्तव्यः' (वा २९६९)। वार्धुषिकः। **१५८१ कुसीददशैकादशात्ष्ठन्ष्ठचौ।** (४-४-३१) गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छतीत्यर्थे। कुसीदं वृद्धिः, तदर्थं द्रव्यं कुसीदम्, तत्प्रयच्छतीति

आपो यस्मिन् तदन्वीपम्। 'ऊदनोर्देशे' इत्यूत्वं तु न, अदेशत्वात्। प्रतीपान्वीपशब्दौ हि प्रतिकूलानुकूलशब्दपर्यायौ रूढौ। अवयवार्थेषु तु नाभिनिवेष्टव्यम्। **परिमुखं च।** अस्माद् द्वितीयान्ताद् वर्तते इत्यर्थे ठगित्यर्थः। **चादिति।** चकारादनुक्तसमुच्चयार्थात् परिपार्श्वमित्यस्मादपि ठकि पारिपार्श्विक इति भवतीत्यर्थः। पारिमुखिक इत्यस्य यतो यतः स्वामिनो मुखं तत्र वर्तते इत्यर्थः। एवं पारिपार्श्विकः। **प्रयच्छति गर्ह्यम्।** 'तत्' इति द्वितीयान्तमनुवर्तते। गर्ह्यं प्रयच्छतीत्यर्थे द्वितीयान्ताट्ठगित्यर्थः। **द्विगुणार्थं द्रव्यं द्विगुणमिति।** द्वैगुणिक इति वक्ष्यमाणोदाहरणे द्विगुणशब्देन द्विगुणार्थं द्रव्यं विवक्षितमित्यर्थः। **तत्प्रयच्छति द्वैगुणिक इति।** द्विगुणीभवितुं स्वद्रव्यमृणं प्रयच्छतीत्यर्थः 'अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धकः' इत्यादिधर्मशास्त्रविरुद्धत्वादिदं गर्ह्यमिति भावः। **वृद्धेरिति।** वृद्धिशब्दाद् उक्तार्थे ठकि प्रकृतेर्वृधुषि इत्यादेशो वाच्य इत्यर्थः। इकारान्त आदेशः। **वार्धुषिक इति।** वृद्ध्यर्थं द्रव्यं वृद्धिः, तत्प्रयच्छतीत्यर्थे वृद्धिशब्दात् ठक इकादेशे प्रकृतेर्वृधुष्यादेश इति भावः। 'वृद्ध्याजीवस्तु वार्धुषिः' इति तु प्रमाद एव। **कुसीद। गर्ह्यार्थाभ्यामिति।** कुसीद, दशैकादश आभ्यां द्वितीयान्ताभ्यां गर्ह्यार्थकाभ्यां प्रयच्छतीत्यर्थे क्रमात् ष्ठन्ष्ठचौ स्त इत्यर्थः। षित्त्वम्

मित्यत्र 'ऊदनोर्देशे' इत्युत्वं तु न भवत्यदेशत्वात्। **परिमुखमिति।** 'अपपरी वर्जने' इति परेः कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी, 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावः, ततष्ठक्। स्वामिनो मुखं वर्जयित्वा यः सेवको वर्तते स पारिमुखिकः। यदा तु सर्वतोभावे परिशब्दः प्रादिसमासश्च, तदा यतो यतः स्वामिनो मुखं ततस्ततो यो वर्तते स एवमुच्यते। एवं पारिपार्श्विकोऽर्थद्वये बोध्यः। **प्रयच्छति।** द्वितीयान्तात्प्रयच्छतीत्यर्थे ठक् स्यात् यत्प्रच्छति गर्ह्यं चेत्तत्। **द्विगुणार्थे-द्विगुणमिति।** तादर्थ्यात्ताच्छब्द्यमिति भावः। बहुवृद्ध्युद्देश्यकदानकर्मतयास्य द्रव्यस्य गर्ह्यत्वम्। **वार्धुषिक इति।** वृद्ध्यर्था वृद्धिः तां प्रयच्छतीति विग्रहः। अथ कथं 'वृद्ध्याजीवश्च वार्धुषिः' इत्यमरः। ठक्संनियोगेनैव वृधुषिभाव-

कुसीदिकः, कुसीदिकी। एकादशार्थत्वादेकादश, ते च ते वस्तुतो दश चेति विग्रहेऽकारः समासान्त इहैव सूत्रे निपात्यते, दशैकादशिकः, दशैकादशिकी। दशैकादशान्प्रयच्छतीत्युत्तमर्ण एवेहापि तद्धितार्थः। १५८२ उञ्छति। (४-४-३२) बदराण्युञ्छति बादरिकः। १५८३ रक्षति। (४-४-३३) समाजं रक्षति सामाजिकः। १५८४ शब्ददर्दुरं करोति। (४-४-३४) शब्दं करोति शाब्दिकः। दार्दुरिकः। १५८५ पक्षिमत्स्यमृगान्हन्ति। (४-४-३५)

ङीषर्थमित्याह—**कुसीदिकीति**। निस्त्वचित्त्वयोस्तु स्वरे विशेषः। अथ छच्प्रकृतिं दशैकादशशब्दं व्युत्पादयति—**एकादशार्थत्वादित्यादिना**। यत्र एकादश निष्कान् अधिकान् प्रत्यर्पयेति समयं कृत्वा दश निष्का ऋणत्वेन दीयन्ते, तत्र ऋणत्वेन गृहीता दश निष्का एकादशार्थत्वाद् एकादशशब्देन उपचर्यन्ते। ततश्च एकादश च ते दश चेति कर्मधारये 'संख्याया अल्पीयस्याः' इति दशन्शब्दस्य पूर्वनिपातः। इहैव निपातनादकारः समासान्तः, टिलोपः, दशैकादशा इति रूपमित्यर्थः। **दशैकादशिक इति**। एकादश निष्कानधिकान् ग्रहीतुं दश निष्कान् अधमर्णाय प्रयच्छतीति यावत्। अथ लौकिकविग्रहवाक्यं दर्शयति—**दशैकादशान् प्रयच्छतीति**। **इहापीति**। विग्रहवाक्ये यथा उत्तमर्णः प्रधानत्वेन निर्दिश्यते, तथा समासेऽपि उत्तमर्ण एव ऋणदातैव तद्धितार्थः प्रधानभूत इत्यर्थः। **उच्छति**। 'तत्' इति द्वितीयान्तमनुवर्तते। उञ्छतीत्यर्थे द्वितायान्ताट्ठगित्यर्थः। भूम्यां निपतितस्य व्रीह्यादेः कणश आदानमुञ्छः। **रक्षति**। अस्मिन्नर्थे द्वितीयान्ताट्ठगित्यर्थः। **शब्ददर्दुरं करोति**। शब्दं करोति दर्दुरं करोतीति विग्रहे द्वितीयान्ताट्ठगित्यर्थः। इह शब्दविषये प्रकृतिप्रत्ययविभागपूर्वकज्ञाने करोतिर्वर्तते, व्याख्यानात् तेनेह न—शब्दं करोति खरः। **दार्दुरिक इति**। 'दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चण्डिकायां स्यात्ग्रामजाले तु दर्दुरम्।'

स्वीकारात्। अत्राहुः—निरङ्कुशाः कवय इति। गर्ह्यमिति किम्, द्विगुणं त्रिगुणं वा वृद्धिं प्रयच्छत्यधमर्ण इत्यर्थे द्वैगुणिक इत्यादि माभूत्। **निपात्यत इति**। अतएव व्याख्यातृप्रयोगोऽप्युपपद्यत इत्याशयेनोदाहरति—**दशैकादशानीति**। 'संख्याया अल्पीयस्याः' इति पूर्वनिपातः। **उत्तमर्ण एवेति**। दश दत्त्वा एकादश गृह्णातीति तस्यैव गर्ह्यत्वादिति भावः। **उञ्छति**। भूमौ पतितस्यैकैकस्योपादानमुञ्छः। **सामाजिक इति**। समजन्ति अस्मिन्निति समाजः समूहः। **शब्दं करोतीति**। प्रकृतिप्रत्ययविभागेन व्युत्पादयतीत्यर्थः। अभिधानस्वाभाव्याद् व्युत्पादन एवायं प्रत्ययः। नेह शब्दं करोति बर्बरः खरो वा। **दार्दुरिक इति**। कुलालः।

'स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम्' (वा २२१)। 'मत्स्यपर्यायेषु मीनस्यैव'। पक्षिणो हन्ति पाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यिकः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारङ्गिकः। **१५८६ परिपन्थं च तिष्ठति।** (४-४-३६) अस्माद् द्वितीयान्तात्तिष्ठति हन्ति चेत्यर्थे ठक्स्यात्। पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः। निपातनात् पन्थादेशः। परिपन्थं हन्ति पारिपन्थिकः। **१५८७ माथोत्तरपदव्यनुपदं**

इति विश्वः। इह यथायोग्यमन्वयः। **पक्षिमत्स्यमृगान्हन्ति**। अस्मिन्नर्थे पक्ष्यादिशब्देभ्यो द्वितीयान्तेभ्यः ठगित्यर्थः। **स्वरूपस्येति**। पक्षिमत्स्यमृगशब्दैः तत्तत्स्वरूपाणां तत्तत्पर्यायाणां तद्विशेषवाचिनां च ग्रहणमित्यर्थः, 'स्वं रूपम्–' इति सूत्रभाष्ये तथोक्तेरिति भावः। **मीनस्यैवेति**। मत्स्यपर्यायेषु मीनस्यैव ग्रहणम्, न त्वनिमिषादिशब्दानामित्यर्थः। इदमपि 'स्वं रूपम्–' इत्यत्र भाष्ये स्थितम्। **पाक्षिक इति**। स्वरूपस्योदाहरणम्। शाकुनिक इति तु पक्षिपर्यायस्य। **मायूरिक इति**। पक्षिविशेषस्य। तथा मात्स्यिकः, मैनिकः, शाकुलिक इति क्रमेण स्वरूपपर्यायविशेषाणामुदाहरणम्। तथा मार्गिकः, हारिणिकः, सारङ्गिक इति क्रमेण स्वरूपपर्यायविशेषाणामुदाहरणम्। **परिपन्थं च तिष्ठति अस्मादिति**। परिपन्थशब्दादित्यर्थः। चकाराद् 'हन्ति' इत्यनुकृष्यते। तदाह— **तिष्ठति हन्ति चेति। पन्थानं वर्जयित्वेति**। एतेन 'अपपरी वर्जने' इति परेः कर्मप्रवचनीयत्वे 'पञ्चम्यपाङ्परिभिः' इति पञ्चम्याम् 'अपपरिबहिरञ्चवः पञ्चम्या' इति अव्ययीभावसमासः सूचितः। **व्याप्य चेति**। एतेन सर्वतःशब्दपर्यायस्य परे परिगतः पन्था इति प्रादिसमासे परिपन्थशब्द इति सूचितम्। अव्ययीभावः प्रादिसमासो वेत्यपि बोध्यम्। उभयथापि क्रियाविशेषणत्वाद् द्वितीयान्तत्वम्। **निपातनात् पन्थादेश इति**। नेदं प्रत्ययसंनियोगेन निपातनम्। किंतु ततोऽन्यत्रापि परिपन्थशब्दोऽस्ति इदमेव सूचयितुं प्रकृतेरपि द्वितीयोच्चारणमिति

वाद्यभाण्डवाचीह दर्दुरशब्दः। **मात्स्यिक इति**। 'मत्स्यस्य ङ्याम्' इति परिगणनात् 'सूर्यतिष्या–' इति यलोपाभावः। **हारिणिक इति**। नन्विदं पर्यायस्योदाहरणं न भवति हरिणस्य मृगविशेषत्वात्तथा चात्र पर्यायस्योदाहरणं किमिति न प्रदर्शितमिति चेत्। अत्राहुः—आरण्यकचतुष्पात्सु हरिणे च मृगशब्दो वर्तते। यदा हरिणवाची मृगशब्दः, तदा मृगपर्यायस्योदाहरणं भवत्येवेति। **परिपन्थं च**। परिमुखवदयमव्ययीभावस्तत्पुरुषो वा क्रियाविषयत्वात्तिष्ठतेरकर्मकत्वेऽपि परिपन्थस्य कर्मत्वमस्त्येवेत्याह। **द्वितीयान्तादिति**। चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनो-

धावति। (४-४-३७) दण्डाकारो माथः पन्था दण्डमाथः। दण्डमाथं धावति दाण्डमाथिकः। पादविकः। आनुपदिकः। १५८८ आक्रन्दाट्ठञ् च। (४-४-३८) अस्माट्ठञ्स्यात्, चाट्ठक् धावतीत्यर्थे। आक्रन्दं दुःखिनां रोदनस्थानं धावति आक्रन्दिकः। १५८९ पदोत्तरपदं गृह्णाति। (४-४-३९) पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः। १५९० प्रतिकण्ठार्थललामं च। (४-४-४०) एभ्यो गृह्णात्यर्थे ठक्स्यात्। प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः। आर्थिकः। लालामिकः। १५९१ धर्मं चरति। (४-४-४१) धार्मिकः। 'अधर्माच्चेति वक्तव्यम्' (वा २९९६)। आधर्मिकः। १५९२ प्रतिपथमेति ठंश्च। (४-४-४२) प्रतिपथमेति प्रतिपथिकः, प्रातिपथिकः। १५९३

वृत्तिकृतः। इदमेवाभिप्रेत्य विग्रहं दर्शयति—**परिपन्थं तिष्ठतीति। माथोत्तर।** माथोत्तरपद, पदवी, अनुपद एभ्यो द्वितीयान्तेभ्यो धावतीत्यर्थे ठगित्यर्थः। माथपदं व्याचष्टे—**माथः पन्था इति।** मथ्यते गन्तृभिराहन्यते इति व्युत्पत्तेरिति भावः। **दण्डमाथ इति।** शाकपार्थिवादिः। पन्थानं धावतीति धावतेर्गत्यर्थत्वात् सकर्मकत्वम्। **पादविक इति।** पदवीं धावतीति विग्रहः। **आनुपदिक इति।** अनुपदं धावतीति विग्रहः। **आक्रन्दाट्ठञ् च। अस्मादिति।** आक्रन्दशब्दाद् द्वितीयान्तादित्यर्थः। आक्रन्दन्ति अस्मिन्नित्याक्रन्दः, तदाह—**आक्रन्दो दुःखिनां रोदनस्थानमिति। पदोत्तरपदम्।** पदशब्द उत्तरपदं यस्य तस्माद् द्वितीयान्ताद् गृह्णातीत्यर्थे ठक् स्यादित्यर्थः। **प्रतिकण्ठार्थ। एभ्य इति।** प्रतिकण्ठ, अर्थ, ललाम इत्येभ्य इत्यर्थः। **आर्थिक इति।** अर्थं गृह्णातीत्यर्थः। **लालामिक इति।** ललामं चिह्नं तद् गृह्णातीत्यर्थः। 'लिङ्गं ललामं च ललाम च' इत्यमरः। **धर्मं चरति।** चरतीत्यर्थे द्वितीयान्ताद् धर्मशब्दाट्ठगित्यर्थः। **अधर्माच्चेतीति।** 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति तदन्ताग्रहणादप्राप्ते आरम्भः। **प्रतिपथमेति**

तीत्याह। **तिष्ठति हन्ति चेति। माथ इति।** मथ्यते गन्तृभिरिति माथः। 'मथे विलोडने' कर्मणि घञ्। **पदोत्तरपदम्।** पदशब्द उत्तरपदं यस्य तत्पदोत्तरपदम्। पदान्तमिति तु नोक्तम्, बहुच्पूर्वान्मा भूदिति। **प्रतिकण्ठमिति।** कण्ठं कण्ठं प्रतीति यथार्थेऽव्ययीभावः, 'लक्षणेनाभिप्रती अभिमुख्ये' इत्यनेन वा। यस्तु प्रतिगतः कण्ठं प्रतिकण्ठ इति प्रादिसमासः, तस्येह न ग्रहणं व्याख्यानादित्याहुः। **धर्मं चरति।** चरतिरिहासेवायां न त्वनुष्ठानमात्रे। तेन दैववशाद्धर्मे प्रवृत्तो दुर्वृत्तो धार्मिक इति नोच्यते। आसेवा हि स्वारसिकी प्रवृत्तिः। एवं दैववशादधर्मे प्रवृत्तः यः सद्वृत्त आधर्मिक इति नोच्यते। **प्रतिपथमिति।** वीप्सायामाभिमुख्ये वा

समवायान्समवैति । (४-४-४३) सामवायिकः । सामूहिकः । **१५६४ परिषदो ण्यः** । (४-४-४४) परिषदं समवैति पारिषद्यः । **१५६५ सेनाया वा** । (४-४-४५) ण्यः स्यात् । पक्षे ठक् । सैन्याः, सैनिकाः । **१५६६ संज्ञायां ललाटकुक्कुट्यौ पश्यति** । (४-४-४६) ललाटं पश्यति लालाटिकः सेवकः । कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते। कौक्कुटिको भिक्षुः । **१५६७ तस्य धर्म्यम्** । (४-४-४७) आपणस्य धर्म्यमापणिकम् । **१५६८ अण् महिष्यादिभ्यः** । (४-४-४८) महिष्या

ठंश्च । प्रतिपथमित्यव्ययीभावाद् एतीत्यर्थे ठन् ठक् च स्यादित्यर्थः । प्रतिपथमिति 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । 'ऋक्पूः–' इति समासान्तः । **समवायान् समवैति** । द्वितीयान्तेभ्यः समवायवाचिशब्देभ्यः समवैतीत्यर्थे ठगित्यर्थः । बहुवचनात्तदर्थवाचिशब्दग्रहणम् । समवैति मेलयतीत्यर्थः । **परिषदो ण्यः** । द्वितीयान्तात्परिषच्छब्दात्समवैतीत्यर्थे ठगपवादो ण्य इत्यर्थः । **सेनाया वा । ण्यः स्यादिति** । शेषपूरणमिदम् । द्वितीयान्तात्सेनाशब्दात्[*] समवैतीत्यर्थे ण्यो वा स्यादित्यर्थः । **सैन्याः, सैनिका इति** । सेनां मेलयन्तीत्यर्थः । **संज्ञायाम्** । ललाटकुक्कुटीशब्दाभ्यां पश्यतीत्यर्थे ठक् स्यात्संज्ञायामित्यर्थः । संज्ञा रूढिः, न त्वाधुनिकः संकेतः । **लालाटिकः सेवक इति**। दूरे स्थित्वा प्रभोर्ललाटं पश्यति, नतु कार्ये प्रवर्तत इत्यर्थः । 'लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः' इत्यमरः । **कौक्कुटिक इति** । कुक्कुटीपतनार्हदेशं पश्यतीत्यर्थः । **तस्य धर्म्यम्** । धर्मादनपेतं धर्म्यम्, आचरितुं योग्यमित्यर्थः ।

अव्ययीभावः । 'ऋक्पूः–' इति समासान्तः । **समवायान्** । समूहवाचिभ्यो द्वितीयान्तेभ्यष्ठक् स्यात्समवैतीत्यर्थे । इह समवपूर्वस्येणोऽर्थः प्रविश्यैकदेशीभवनम् । तत्र गुणभूतप्रवेशापेक्षया समवायानिति द्वितीयानिर्देशः । विशेष्यापेक्षया तु लोके सप्तमी प्रायेण प्रयुज्यते 'कुरुक्षेत्रे समवेताः' इति यथा । 'एत्येधति–' इति वृद्धिरिह न भवति, एजादित्वाभावात । **सैन्याः, सैनिका इति** । द्वितीयान्तात्ण्यठकौ । यत्तु, 'सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते' इति निघण्टुसूक्तं तत्फलितार्थकथनपरं बोध्यम् । **संज्ञायाम** । ललाटकुक्कुटीशब्दाभ्यां द्वितीया । ताभ्यां पश्यतीत्यर्थे ठक् स्यात् । सम्यग्ज्ञानं संज्ञा प्रसिद्धिस्तस्याम्, प्रसिद्धिविषयभूतेऽर्थे इत्यर्थः । **लालाटिक इति** । दूरे स्थित्वा प्रभोर्ललाटं पश्यति न तु कार्येषूपतिष्ठत इत्यर्थः । 'लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः' । **कौक्कुटिको भिक्षुरिति** । संन्यासी

---

१ एतदग्रे द्वितीयान्ताभ्यामित्यधिकः पाठः क. ख. ।

धर्म्यं माहिषम्। याजमानम्। १५९९ ऋतोऽञ्। (४-४-४९) यातुर्धर्म्यं यात्रम्। 'नराच्चेति वक्तव्यम्' (वा २९९७)। नरस्य धर्म्या नारी। 'विशसितुरिड्लोपश्चाञ्च वक्तव्यः' (वा २९९८)। विशसितुर्धर्म्यं वैशस्त्रम्। 'विभाजयितुर्णिलोपश्चाञ्च वाच्यः' (वा २९९९)। विभाजयितुर्धर्म्यं वैभाजित्रम्। १६०० अवक्रयः। (४-४-५०) षष्ठ्यन्ताट्ठक्स्यादवक्रयेऽर्थे। आपणस्यावक्रयः आपणिकः। राजग्राह्यं द्रव्यमवक्रयः। १६०१ तदस्य पण्यम्। (४-४-५१) अपूपाः पण्यमस्य आपूपिकः। १६०२ लवणाट्ठञ्। (४-४-५२) लावणिकः। १६०३ किसरादिभ्यः ष्ठन्। (४-४-५३) किसरं पण्यमस्य किसरिकः। षित्त्वान्ङीष्। किसरिकी। किसर, उशीर, नलद इत्यादिकिसरादयः सर्वे सुगन्धिद्रव्यविशेषवाचिनः। १६०४ शलालुनोऽन्यतरस्याम्। (४-४-५४) ष्ठन् स्यात्, पक्षे ठक्। शलालुकः, शलालुकी। शालालुकः, शालालुकी। शलालुः सुगन्धिद्रव्यविशेषः। १६०५ शिल्पम्। (४-४-५५) मृदङ्गवादनं

धर्म्यमित्यर्थे षष्ठ्यन्ताट्ठगित्यर्थः। **अण् महिष्यादिभ्यः**। षष्ठ्यन्तेभ्यो धर्म्यमित्यर्थे इति शेषः। **ऋतोऽञ्**। ऋदन्तात्षष्ठ्यन्ताद् धर्म्यमित्यर्थे अञित्यर्थः। **नारीति**। अञन्तत्वाद् ङीबिति भावः। **इड्लोप इति**। इटो लोप इत्यर्थः। **वैशस्त्रमिति**। विशसितृशब्दादञि इटो लोपे ऋकारस्य यणि आदिवृद्धिः। **वैभाजित्रमिति**। विभाजयितृशब्दादञि णिलोपः। **अवक्रयः**। 'तस्य' इत्यनुवर्तते, तदाह—**षष्ठ्यन्तादिति**। **तदस्य पण्यम्**। अस्मिन्नर्थे प्रथमान्तात् ठगित्यर्थः। विक्रेतव्यं द्रव्यं पण्यम्। **लवणाट्ठञ्**। 'तदस्य पण्यम्' इत्येव। **लावणिक इति**। लवणमस्य पण्यमित्यर्थः। **किसरादिभ्यः ष्ठन्**। 'तदस्य पण्यम्' इत्येव। ष्ठनिति च्छेदः, तदाह—**षित्त्वान्ङीषिति**। **शलालुनोऽन्यतरस्याम्**। ष्ठनिति शेषः। 'तदस्य पण्यम्' इत्येव। **शलालुक इति**। शलालुः पण्यमस्येति विग्रहः। उकः परत्वाट्ठस्य कः। षित्त्वस्य फलमाह—**शलालुकीति**। **शिल्पम्**। तदस्य शिल्पमित्यर्थे प्रथमान्तात् ठगित्यर्थः। क्रियासु कौशलं शिल्पम्। ननु मार्दङ्गिक इत्युदाहरणं वक्ष्यति, तत्र मृदङ्गः शिल्पमिति कथं विग्रहः, मृदङ्गस्य शिल्पत्वासंभवात्, तत्राह—**मृदङ्गवादनमिति**। मृदङ्गवादनविषयकमित्यर्थः।

हि पादविक्षेपपर्याप्तदेशपर्यन्तमेव चक्षुः संयम्य गच्छतीति भावः। **धर्म्यमिति**। धर्मादनपेतं धर्म्यम्। 'धर्मपथ्यर्थन्यायादनपेते' इति यत्। **अवक्रयः**। अवक्रीयते अनेनेति करणे 'एरच्'। **पण्यमिति**। पणितव्येऽर्थे 'अवद्यपण्य—' इति यदन्तो निपातितः। **शलालुक इति**। 'इसुसुक्तान्तात्कः'। ठक्पक्षे त्वादिवृद्धिः। शालालुकः।

शिल्पमस्य मार्दङ्गिकः । १६०६ मड्डुकझर्झरादणन्यतरस्याम् । (४-४-५६) मड्डुकवादनं शिल्पमस्य माड्डुकः, माड्डुकिकः । झार्झरः, झार्झरिकः । १६०७ प्रहरणम् । (४-४-५७) 'तदस्य' इत्येव । असिः प्रहरणमस्य आसिकः । धानुष्कः । १६०८ परश्वधाट्ठञ्च । (४-४-५८) पारश्वधिकः । १६०९ शक्तियष्ट्योरीकक् । (४-४-५९) शाक्तीकः । याष्टीकः । १६१० अस्ति नास्ति दिष्टं मतिः । (४-४-६०) 'तदस्य' इत्येव । अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः । नास्तीति मतिर्यस्य स नास्तिकः । दिष्टमिति मतिर्यस्य स दैष्टिकः । १६११ शीलम् । (४-४-६१) अपूपभक्षणं शीलमस्य आपूपिकः । १६१२ छत्रादिभ्यो णः । (४-४-६२)

मृदङ्गशब्दो लक्षणया मृदङ्गवादनविषयक इति भावः । मड्डुकझर्झरात् । 'तदस्य शिल्पम्' इत्येव । पक्षे ठक् । मड्डुकझर्झरौ वाद्यविशेषौ । प्रहरणम् । 'तदस्य' इत्येव । प्रहरणवाचिनः प्रथमान्तात्तदस्येत्यर्थे ठगित्यर्थः । प्रह्रियतेऽनेनेति प्रहरणम्, आयुधम् । धानुष्क इति । धनुः प्रहरणमस्येति विग्रहः । उसन्तात्परत्वाट्ठस्य कः । 'इणः षः' इति षः । परश्वधाट्ठञ् च । 'तदस्य प्रहरणम्' इत्येव । चात् ठक् । 'परशुश्च परश्वधः' इत्यमरः । शक्तियष्ट्योरीकक् । शक्तियष्टिशब्दाभ्यां प्रथमान्ताभ्यां प्रहरणवाचिभ्यामस्येत्यर्थे ईकक् स्यादित्यर्थः । अस्ति नास्ति । तदस्येत्येवेति । अस्तीति मतिरस्यास्ति, नास्तीति मतिरस्यास्ति, दिष्टमिति मतिरस्यास्तीत्यर्थेषु क्रमेण अस्तीत्यस्माद् नास्तीत्यस्माद् दिष्टमित्यस्माच्च प्रथमान्ताट्ठगित्यर्थः । अस्तिनास्तिशब्दौ निपातौ । यद्वा वचनादेव अख्यातात्प्रत्ययः । 'दैवं दिष्टम्-' इत्यमरः । शीलम् । अस्येत्यर्थे शीलवाचिनः प्रथमान्ताट्ठगित्यर्थः । शीलं स्वभावः । अपूपभक्षणमिति । अपूपशब्द-

---

मार्दङ्गिक इति । मृदङ्गशब्देन मृदङ्गवादनं लक्ष्यते । मुख्यार्थे तु प्रयोगो न भवति, अनभिधानादिति भावः । शिल्पं कौशलम् । तच्च मृदङ्गवादनविषयकम्, तेन मृदङ्गवादनविषयके मृदङ्गशब्दस्य लक्षणेति निष्कर्षः । प्रहरणम् । प्रह्रियते अनेनेति प्रहरणमायुधम् । धानुष्क इति । 'इसुसुक्तान्तात्कः' 'इणः षः' इति विसर्गस्य षः । परश्वधाट्ठञ् । चाट्ठक् । 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' । परलोक इति । एतच्चाभिधानशक्तिस्वाभाव्याल्लभ्यते । आस्तिक इति । अस्तिनास्तिशब्दौ निपातौ । यद्वा वचनसामर्थ्यादस्तीत्याख्यातात्, नास्तीति निपाताख्यातसमुदायाच्च प्रत्ययः । दिष्टमिति । 'दैवं दिष्टं भागधेयम्' इत्यमरः । 'नालम्बते दैष्टिकताम्' इति माघः । 'प्रमाणानुगा मतिर्दिष्टा' इति प्राचोक्तिस्तूपेक्ष्या । दिष्टशब्दस्य

गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्य छात्रः। **१६१३ कार्मस्ताच्छील्ये।** (६-४-१७२) कार्म इति ताच्छील्ये णे टिलोपो निपात्यते। कर्मशीलः कार्मः। 'नस्तद्धिते' (सू ६७९) इत्येव सिद्धे 'अणकार्यं ताच्छीलिके णेऽपि'। तेन चौरी, तापसी इत्यादि सिद्धम्। ताच्छील्ये किम्—कार्मणः। **१६१४ कर्माध्ययने वृत्तम्।** (४-४-६३) प्रथमान्तात्षष्ठ्यर्थे ठक्स्यादध्ययने वृत्ता

स्तद्वृत्तत्वे लाक्षणिक इति भावः। **छत्रादिभ्यो णः।** एभ्यः प्रथमान्तेभ्यः अस्य शीलमित्यर्थे णप्रत्ययः स्यादित्यर्थः। छत्रं शीलमस्य छात्रः, इत्युदाहरणं वक्ष्यति। तत्र छत्रस्य शीलत्वानुपपत्तेः छत्रपदं गुरुदोषावरणे गौणमित्याह—**गुरोरिति।** शीलमित्यर्थे छत्रादित्वाद् णप्रत्यये कृते। **कार्मस्ताच्छील्ये।** तत् शीलं यस्य स तच्छीलः, तस्य भावः ताच्छील्यम्। तस्मिन्वाच्ये कार्म इति भवतीत्यर्थः। णप्रत्यये परे टिलोपः स्यादिति यावत्, तदाह—**टिलोपो निपात्यत इति।** णेऽपीत्यनन्तरम् इति ज्ञापनार्थमिदमिति शेषः। अत्र टिलोपविधिर्हि 'अन्' इति प्रकृतिभावनिवृत्त्यर्थः। ततश्च अणि विहितस्य प्रकृतिभावस्य णप्रत्यये परतः प्रतिषेधादणकार्यकारित्वं णप्रत्ययस्य ज्ञाप्यत इति भावः। **तेनेति।** चुरा शीलमस्याः, तपः शीलमस्या इति विग्रहे चुरातपःशब्दाभ्यां छत्रादित्वाण्णप्रत्यये सति तदन्ताभ्यामणन्तकार्ये ङीपि चौरी तापसीति सिद्धमित्यर्थः। **कार्मण इति।** 'तस्येदम्' इत्यणि 'कार्मस्ताच्छील्ये' इत्यस्याप्रवृत्त्या 'अन्' इति प्रकृतिभावान्न टिलोप इति भावः। **कर्माध्ययने वृत्तम्।** 'तदस्य पण्यम्' इत्यतः 'तदस्य' इत्यनुवर्तते। 'तदस्य कर्माध्ययने वृत्तम्' इत्यर्थनिर्देशः। तत्र तदित्यनेन विशेष्येण कर्म वृत्तमित्यन्वेति। कर्मशब्दः क्रियापरः। वृत्तमित्यस्य जातमित्यर्थः। वृत्तं कर्म प्रति विशेष्यसमर्पकं तदिति प्रथमोच्चारितम्। ततश्च अस्य अध्ययनविषये तत्कर्म वृत्तमित्यर्थे तच्छब्दगम्यविशेष्यवाचकात् प्रथमान्ताट्ठक् स्यादित्यर्थः। तदाह—**प्रथमान्तादिति।** वृत्तं कर्म प्रति विशेष्यसमर्पकादिति शेषः। **अध्ययने वृत्तेति।** विषयसप्तम्येषा। **या क्रियेति।** अनेन कर्मशब्दः क्रियापर इति सूचितम्। **प्रथमान्तस्यार्थ इति।** अनेन कर्म वृत्तमित्येतत् तदित्यस्य प्रथमान्तस्य विशेषणमिति सूचितम्।

स्त्रीत्वे प्रमाणानुगमात्स्त्रीवाचकत्वे चोक्तकोशविरोधादिति दिक्। **छत्रादिभ्यो णः।** 'छत्रादिभ्योऽण्' इत्येव सुवचमिति 'कार्मस्ताच्छील्ये' इति सूत्रे कैयटः। **ताच्छील्ये ण इति।** कर्मन्शब्दस्य छत्रादित्वादिति भावः। **चौरीत्यादि।** चुरा शीलमस्याः, तपः शीलमस्या इति विग्रहे णप्रत्यये सति तदन्तान्ङीप् सिध्यतीत्यर्थः। **कर्माध्ययने।**

या क्रिया सा चेत्प्रथमान्तस्यार्थः। एकमन्यद् वृत्तमस्य ऐकान्यिकः। यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातम् सः। १६१५ **बह्वच्पूर्वपदाट्ठच्।** (४-४-६४) प्राग्विषये। द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः। द्वादशापपाठा अस्य जाता इत्यर्थः। १६१६ **हितं भक्षाः।** (४-४-६५) अपूपभक्षणं हितमस्मै आपूपिकः। १६१७ **तदस्मै दीयते नियतम्।** (४-४-६६) अग्रभोजनं नियतं दीयते अस्मै आग्रभोजनिकः। १६१८ **श्राणामांसौदनाट्टिठन्।** (४-४-६७) श्राणा नियतं दीयतेऽस्मै श्राणिकः, श्राणिकी। मांसौदनग्रहणं सङ्घातविगृहीतार्थम्। मांसौ-

---

तदित्यननुवृत्तौ कर्मशब्दस्यैव सूत्रे प्रथमानिर्दिष्टत्वात् तत एव प्रत्ययः स्यात्, न तु तद्विशेष्यवाचकात्, तस्य प्रथमानिर्दिष्टत्वाभावादित्यभिप्रेत्योदाहरति-**एकमन्यद्वृत्तमस्य ऐकान्यिक इति।** 'तद्धितार्थ-' इति समासे एकान्यशब्दाट्ठगिति भावः। द्वैयन्यिकः, त्रैयन्यिकः। ऐजागमो विशेषः। **बह्वच्पूर्वपदाट्ठच्।** 'तदस्य कर्माध्ययने वृत्तम्' इत्यनुवर्तते। तदाह-**प्राग्विषय इति। द्वादशान्यिक इति।** 'तद्धितार्थ-' इति समासः। एवं त्रयोदशान्यिकः। चित्त्वान्नादिवृद्धिः। **हितं भक्षाः।** 'तदस्य' इत्यनुवृत्तम्। तत्र षष्ठी चतुर्थ्या विपरिणम्यते, हितयोगात्। तद् अस्मै हितमित्यर्थे प्रथमान्ताट्ठक् स्याद् यद् हितं भक्षाश्चेत् ते स्युरित्यर्थः। संस्कृतं भक्षाः इतिवद्व्याख्येयम्। **अपूपभक्षणमिति।** अनेन अपूपशब्दः अपूपभक्षणे लाक्षणिक इति सूचितम्। अपूपो हितमित्यर्थे तु न ठक्, अभिधानस्वाभाव्यादिति भावः। **तदस्मै दीयते नियतम्।** अस्मिन्नर्थे प्रथमान्ताट्ठगित्यर्थः। नियुक्तमिति पाठान्तरम्, नियतमित्यर्थः। **श्राणामांस।** तदस्मै दीयते नियतमित्येव। श्राणा यवागूः। 'यवागूरुष्णिका श्राणा विलेपी

'तदस्य' इत्यनुवर्तते, ठगिहाधिक्रियत एव तदाह—**प्रथमान्तादित्यादि। ऐकान्यिक इति।** एकमन्यदिति विगृह्य 'तद्धितार्थ-' इति समासः, ततष्ठक्। एवं द्वैयन्यिकः, त्रैयन्यिक इत्युदाहार्यम्। इह तु वृद्धिं बाधित्वा 'न य्वाभ्याम्-' इत्यैच्। **हितं भक्षाः।** 'अस्य' इति प्रकृतमपीह हितयोगाच्चतुर्थ्या विपरिणम्यते, 'तदस्मै-' इत्यस्यापकर्षो वेत्याशयेनाह—**अपूपभक्षणं हितमस्मा इति।** अपूपशब्दस्तद्भक्षणे लाक्षणिक इति भावः। **श्राणा।** 'यवागूरुष्णिका श्राणा विलेपी तरला

---

१ इह 'ठच्' इति पाठो बालमनोरमासंमतः। काशिकायामपि तथैवोपलभ्यते। कौमुदीपुस्तकान्तरेषु तु 'ठञ्' इति पाठ उपलभ्यते, मुद्रितेष्वष्टाध्यायीपुस्तकेष्वपि प्रायेण 'ठञ्' इत्येवोपलभ्यते।

दनिकः, मासकः, औदनिकः। १६१९ भक्ताद्णन्यतरस्याम्। (४-४-६८) पक्षे ठक्। भक्तमस्मै नियतं दीयते भाक्तः, भाक्तिकः। १६२० तत्र नियुक्तः। (४-४-६९) आकरे नियुक्त आकरिकः। १६२१ अगारान्ताट्ठन्। (४-४-७०) देवागारे नियुक्तो देवागारिकः। १६२२ अध्यायिन्यदेशकालात्। (४-४-७१) निषिद्धदेशकालवाचकाट्ठक्स्यादध्येतरि। श्मशानेऽधीते श्माशानिकः। चतुर्दश्यामधीते चातुर्दशिकः। १६२३ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। (४-४-७२) 'तत्र' इत्येव। वंशकठिने व्यवहरति वांशकठिनिकः। वंशा वेणवः कठिना यस्मिन्देशे स वंशकठिनः। तस्मिन्देशे या क्रिया यथा अनुष्ठेया तां तथैवानुतिष्ठतीत्यर्थः। प्रास्तारिकः। सांस्थानिकः। १६२४ निकटे वसति। (४-४-७३) नैकटिको भिक्षुः। १६२५

तरला च सा' इत्यमरः। ठित्त्वं ङीबर्थम्, तदाह—**आणिकीति**। **संघातविगृहीतार्थमिति**। ठकैव सिद्धे ओदनिक इत्यत्र आदिवृद्ध्यभावार्थं प्रत्ययान्तरविधानमिति भावः। **भक्ताद्णन्यतरस्याम्**। तदस्मै दीयते नियतमित्येव। **तत्र नियुक्तः**। अस्मिन्नर्थे सप्तम्यन्तात्ठक् स्यादित्यर्थः। नियुक्तः अधिकृतः। संरक्षणादौ प्रेरित इति यावत्। **आकरिक इति**। आकरो रत्नाद्युद्भवस्थानम्। **अगारान्ताट्ठन्**। तत्र नियुक्त इत्येव। नित्त्वादादिवृद्धिः। तदाह—**देवागारिक इति**। **अध्यायिन्यदेशकालात्**। **निषिद्धेति**। अदेशकालेत्यत्र 'नञ्' निषिद्धे वर्तत इति भावः। **श्माशानिकः**। **चातुर्दशिक इति**। देशकालभिन्नादिति व्याख्याने तु इह न स्यादिति भावः। **कठिनान्तप्रस्तार**। अस्मिन्नर्थे कठिनान्त, प्रस्तार, संस्थान एभ्यः सप्तम्यन्तेभ्यः ठगित्यर्थः। वंशकठिनशब्दं विवृणोति—**वंशा इति**। व्यवहरणम् उचितक्रिया, तदाह—**यस्मिन्देश इति**। प्रस्तारसंस्थानशब्दौ अवयवसंनिवेशपर्यायौ। **निकटे वसति**। अस्मिन्नर्थे सप्तम्यन्तान्निकटशब्दाट्ठगित्यर्थः। **नैकटिको भिक्षुरिति**। 'ग्रामात्क्रोशे भिक्षुणा वस्तव्यम्' इति शास्त्रमुल्लङ्घ्य निकटे यो भिक्षुर्वसति तत्रैवायं ठगिति भावः।

च सा' इत्यमरः। **टिठनिति**। इकार उच्चारणार्थः। टो ङीबर्थः। **सङ्घातविगृहीतार्थमिति**। ओदनिक इत्यत्र हि वृद्धिनिवारणाय टिठन्नारब्धः। अन्यथा लाघवाट्ठञमेव ब्रूयादिति भावः। **आकरिक इति**। 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः। **अध्यायिन्य**। अदेशकालात् किम्, काश्यामधीते, पूर्वाह्णे अधीते। **कठिनान्त**। प्रस्तारसंस्थानशब्दौ संनिवेशपर्यायाविति बहवः। प्रस्तारो यज्ञः। 'प्रे स्त्रोऽयज्ञे' इति घञ्। संस्थानं संनिवेश इत्येके। **नैकटिको भिक्षुरिति**। संन्यासी हि ग्रामस्य

आवसथात् ष्ठल् । (४-४-७४) आवसथे वसति आवसथिकः। षित्वा-न्ङीष्। आवसथिकी।

'आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च।
आवसथात्किसरादेः षितः षडेते ठगधिकारे॥'

(वा २१५५) षडिति सूत्रषट्केन विहिता इत्यर्थः। प्रत्ययास्तु सप्त।

इति तद्धितेषु ठगधिकारप्रकरणम्।

अत्र व्याख्यानमेव शरणम्। **आवसथात्ष्ठल्**। 'तत्र' 'वसति' इत्यर्थे आवसथात् सप्तम्यन्तात् ष्ठलित्यर्थः। आवसथं गृहम्। षित्त्वं ङीषर्थम्। तदाह—**आवसथिकीति**। **आकर्षादित्यादि**। श्लोकवार्तिकमिदम्—'प्राग्वहतेष्ठक्' इत्यादौ ठगिति वा ष्ठगिति छेद इति संशयनिवृत्त्यर्थम् 'आकर्षात्ष्ठल्' इति सूत्रभाष्ये पठितम्। तत्र आकर्षादित्यनेन 'आकर्षात्ष्ठल्' इति सूत्रं विवक्षितम्। पर्पादिभ्य इत्यनेन 'पर्पादिभ्यः ष्ठन्' इति सूत्रं विवक्षितम्। भस्त्रादिभ्य इत्यनेन 'भस्त्रादिभ्यः ष्ठन्' इति सूत्रं विवक्षितम्। कुसीदसूत्रादित्यनेन 'कुसीददशैकादशात् ष्ठन्ष्ठचौ' इति सूत्रं विवक्षितम्। आवसथादित्यनेन 'आवसथात् ष्ठल्' इति सूत्रं विवक्षितम्। किसरादेरित्यनेन 'किसरादिभ्यः ष्ठन्' इति सूत्रं विवक्षितम्। 'प्राग्वहतेष्ठक्' इत्यधिकारे एतैः सूत्रैर्विहिताः षट् प्रत्ययाः षित इत्यर्थः। ननु 'कुसीद—' इति सूत्रे प्रत्ययद्वयविधानाद् एतत्सूत्रषट्कविहिताः सप्त प्रत्ययाः लभ्यन्त इति षट् षित इति कथमित्यत आह—**षडितीति**। षडित्यनेन सूत्राभिप्रायं षट्त्वं विवक्षितमिति भावः।

इति तद्धितेषु प्राग्वहतीयप्रकरणम्॥

निकटे वसन् भिक्षार्थमेव ग्रामे प्रविशति, न तु तत्र वसतीति भावः। **आवसथात्**। लकारः स्वरार्थः। आवसन्त्यस्मिन्नित्यावसथः। 'उपसर्गे वसेः' इत्यथप्रत्ययः। **कुसीदसूत्रादिति**। 'कुसीददशैकादशात्—' इति सूत्रोपात्ताभ्यां प्रकृतिभ्यामित्यर्थः। इह 'नौ द्व्यचष्ठन्' इत्यत्रेव येषां षकारः सांहितिक इति सम्भाव्यते तेषामेव गणने ष्ठलादेः षित्त्वमनार्षमिति भ्रमः स्यादतः श्लोकवार्तिककारः षित्प्रत्ययान्सर्वानपि पर्यगीगणत्।

इति तत्त्वबोधिन्यां ठगधिकारप्रकरणम्।

अथ तद्धितेषु प्राग्घितीयप्रकरणम्। ३१।

१६२६ प्राग्घिताद्यत्। (४-४-७५) 'तस्मै हितम्' (सू १६६१) इत्यतः प्राग्यदधिक्रियते। १६२७ तद्वहति रथयुगप्रासङ्गम्। (४-४-७६) रथं वहति रथ्यः। युग्यः। वत्सानां दमनकाले स्कन्धे यत्काष्ठमासज्यते स प्रासङ्गः, तं वहति प्रासङ्ग्यः। १६२८ धुरो यड्ढकौ (४-४-७७) 'हलि च' (सू ३५४) इति दीर्घे प्राप्ते। १६२९ न भकुर्छुराम्। (८-२-७९) भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्। धुर्यः, धौरेयः। १६३० खः सर्वधुरात्। (४-४-७८) सर्वधुरां वहतीति सर्वधुरीणः। १६३१ एकधुराल्लुक्च।

अथ प्राग्घितीयप्रकरणं निरूप्यते—**प्राग्घिताद्यत्**। हितशब्दः तद्धित-सूत्रपरः। तदाह—**तस्मै हितमिति**। **तद्वहति रथ**। रथादि वहतीत्यर्थे द्वितीयान्ताद् रथ युग प्रासङ्ग इति त्रयाद् यत्स्यादित्यर्थः। **युग्य इति**। रथादिवहन-काले अश्वादिस्कन्धेषु तिर्यग् यत् काष्ठमीषत्प्रोतमासज्यते तद्युगम्, तद्वहतीत्यर्थः। **दमनकाल इति**। रथादि वहने सुशिक्षितावश्वौ नियुज्य तत्स्कन्धवाह्ययुगे यद्युगा-न्तरमासज्य तस्मिन्नशिक्षिता अश्वादयो वहनशिक्षार्थं नियुज्यन्ते स प्रासङ्ग इत्यर्थः। 'प्रासङ्गो ना युगाद्युगे' इत्यमरः। **धुरो यड्ढकौ**। धुरशब्दाद् द्वितीयान्ताद् वहतीत्यर्थे यत् ढक् च स्यादित्यर्थः। यड्ढञाविति पाठान्तरम्। **हलि चेतीति**। 'धुर्वी हिंसा-याम्' 'भ्राजभास-' इति क्विप्। 'राल्लोपः' इति लोपः। अश्वादिस्कन्धवाह्यप्रदेशो युगा-वयवो धूः। धुर्शब्दाद् यति 'हलि च' इति दीर्घे प्राप्ते सतीत्यर्थः। **न भकु-र्छुराम्**। 'र्वोरुपधायाः-' इत्यत 'उपधायाः' इति 'दीर्घः' इति चानुवर्तते, तदाह—**भस्येत्यादिना**। 'धूर्वहे धुर्यधौरेयधुरीणाः' इत्यमरः। **खः सर्वधुरात्**। सर्वा धूः सर्वधुरा। 'पूर्वकाल-' इति तत्पुरुषः। 'ऋक्पूः-' इति समासान्तः। 'परवल्लि-ङ्गम्-' इति स्त्रीत्वाट्टाप्। इह तु शब्दस्वरूपापेक्षया नपुंसकनिर्देशः। द्वितीयान्ता-त्सर्वधुराशब्दाद् वहतीत्यर्थे खः स्यादित्यर्थः। **सर्वधुरीण इति**। सर्वधुरां

युग्य इति। युगं रथाङ्गं वहतीत्यर्थः। **प्रासङ्ग इति**। प्रासज्यते असाविति कर्मणि घञ्। **धुरो**। 'धुरो ढक् च' इत्येव सुवचम्। **न भ**। **उपधाया इति**। 'उपधायां च' इति पूर्वसूत्रादेतल्लभ्यत इति भावः। उपधायाः किम्, प्रतिदीव्नः। इह नान्तस्य भत्वेऽपीकारस्यानुपधात्वान्निषेधो न प्रवर्तते। **खः सर्वधुरात्**। सर्वधुराया इति वक्तव्ये नपुंसकनिर्देशः शब्दस्वरूपापेक्षया 'बन्धुनि बहुव्रीहौ' इतिवत्। **सर्व-धुरामिति**। 'पूर्वकालैक-' इति समासः। 'ऋक्पूरब्धूः-' इति समासान्ते अप्रत्यये

(४-४-७९) एकधुरां वहति एकधुरीणः, एकधुरः। १६३२ शकटादण्। (४-४-८०) शकटं वहति शाकटो गौः। १६३३ हलसीराट्ठक्। (४-४-८१) हलं वहति हालिकः। सैरिकः। १६३४ संज्ञायां जन्याः। (४-४-८२) जनी वधूः। तां वहन्ति प्रापयन्ति जन्याः। १६३५ विध्यत्यधनुषा। (४-४-८३) द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्यात्, न चेत्तत्र

वहतीत्यर्थः। 'स तु सर्वधुरीणो यो भवेत् सर्वधुरावहः' इत्यमरः। **एकधुराल्लुक् च**। एकधुराशब्दाद् द्वितीयान्ताद्वहतीत्यर्थे खः स्यात्। तस्य पक्षे लुगित्यर्थः। **एकधुरीणः, एकधुर इति**। एकधुरां वहतीत्यर्थः। **शकटादण्**। द्वितीयान्ताच्छकटशब्दाद् वहतीत्यर्थे अण् स्यादित्यर्थः। यतोऽपवादः। **हलसीराट्ठक्**। आभ्यां द्वितीयान्ताभ्यां वहतीत्यर्थे ठगित्यर्थः। **संज्ञायां जन्याः**। जनीशब्दाद् द्वितीयान्ताद् वहतीत्यर्थे यत्स्यात्संज्ञायामित्यर्थः। **जनी वधूरिति**। जायतेऽस्यां गर्भ इत्यर्थे जनिघसिभ्यामिति जनधातोः इणि 'जनिवध्योश्च' इति वृद्धिप्रतिषेधे 'कृदिकारात्—' इति ङीषि जनीशब्दस्य निष्पत्तेरिति भावः। 'समाः स्नुषाजनीवध्वः' इत्यमरः। वहन्तीत्यस्य विवरणं प्रापयन्तीति। वरगृहमिति शेषः। **जन्या इति**। जामातुर्वयस्या इति शेषः। 'जन्याः स्निग्धा वरस्य ये' इत्यमरः। **विध्यत्यधनुषा**। 'तद् इति' द्वितीयान्तमनुवर्तते। 'अधनुषा' इति सप्तम्यर्थे तृतीया। धनुषः

टाप्। **एकधुराल्लुक् च**। चात्खः। एवं च प्राकरणिकस्य यतो लुक्, खस्य तु विधानसामर्थ्याच्छ्रवणमिति फलितम्, तदाह—**एकधुरीण इत्यादि**। **शाकटो गौरिति**। ननु 'तस्येदम्' इत्यणा सिद्धम्। यो हि शकटं वहति शाकटस्यासौ भवति। अत्राहुः—आरम्भसामर्थ्यादत्र तदन्तविधिः। तेन द्वे शकटे वहति द्वैशकट इत्यत्र 'द्विगोर्लुगनपत्ये' इति प्राग्दीव्यतीयो लुङ् न भवति, 'तस्येदम्' इत्यणि तु स्यादेव लुगिति। **हलसीरात्**। ननु 'तस्येदम्' इत्युपक्रमे 'हलसीराट्ठक्' इति पठितम्। तथा च तेनैव शैषिकेण हालिकः सैरिक इति सिद्धौ किमनेनेति चेत्। सत्यम्, आरम्भसामर्थ्यादत्रापि तदन्तविधिः, तेन द्वैहलिको द्वैसीरिक इति भवति, शैषिके ठकि तु प्राग्दीव्यतीयो लुक् स्यात्। **संज्ञायां जन्या**। जायते ध्यस्यां गर्भ इति व्युत्पत्तिमाश्रित्य आह—**जनी वधूरिति**। 'जनिघसिभ्यामिण्'। 'जनिवध्योश्च' इति न वृद्धिः। 'कृदिकारात्–' इति ङीष्। ततोऽनेन सूत्रेण यति जन्या जामातुर्वयस्याः। सा हि विवाहादिषु वधूं जामातृसमीपं प्रापयति। कालिदासस्तु वध्वा यानवांश्ष्वपि प्रायुङ्क्त—

---

१ 'जन्या' इति निर्विसर्गः पाठः क्वचिदुपलभ्यते।

२ 'मातुर्वयस्या' इति क्वचित्।

धनुः करणम् । पादौ विध्यन्ति पद्याः शर्कराः । **१६३६ धनगणं लब्धा ।** (४-४-८४) तृन्नन्तमेतत् । धनं लब्धा धन्यः । गणं लब्धा गण्यः । **१६३७ अन्नाण्णः ।** (४-४-८५) अन्नं लब्धा आन्नः । **१६३८ वशं गतः** (४-४-८६) वश्यः परेच्छानुसारी **१६३९ पदमस्मिन्दृश्यम् ।** (४-४-८७) पद्यः कर्दमः । नातिशुष्क इत्यर्थः । **१६४० मूलमस्याबर्हि ।** (४-४-८८)

अभावः अधनुः, तस्मिन्सतीत्यर्थः । अर्थाभावे नञ्तत्पुरुषः । अर्थाभावे अव्ययीभावेन अयं विकल्प्यत इत्युक्तत्वात् । द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्याद्धनुषः करणस्याभावे सतीत्यर्थः । **न चेत्तत्रेति ।** तत्र वेधने धनुः करणं न चेदित्यर्थः । **पद्या इति ।** पादशब्दाद्यति 'पद्यत्यतदर्थे' इति पद्भावः । 'अधनुषा' इति किम् ? धनुषा चोरं विध्यति देवदत्तः । अत्र चोराद्यन्न भवति । न चासामर्थ्यादेवात्र यन्नेति वाच्यम्, विध्यतीत्यस्य प्रत्ययार्थत्वेन प्रधानतया तस्य सापेक्षत्वेऽपि सामर्थ्याविघातात् । अन्यथा औपगवो देवदत्त उपगुनप्तृत्वाद् इत्यादौ अणादिकं न स्यात् । प्रत्ययार्थैकदेशस्य व्यधनस्य करणविशेषनित्यसापेक्षत्वाच्च इति शब्देन्दुशेखरे विस्तरः । **धनगणं लब्धा ।** धनशब्दाद् गणशब्दाच्च द्वितीयान्ताल्लब्धेत्यर्थे यत्स्यादित्यर्थः । ननु लब्धृशब्दस्य तृजन्तस्य कृदन्तत्वात्तद्योगे कर्मणि षष्ठी स्यादित्यत आह—**तृन्नन्तमेतदिति ।** तथा च 'न लोक–' इति निषेधान्न षष्ठीति भावः । **अन्नाण्णः ।** लब्धेत्यर्थे द्वितीयान्तादिति शेषः । **वशं गतः ।** वशशब्दाद् द्वितीयान्ताद्गत इत्यर्थे यदित्यर्थः । **वश्य इति ।** वशं गत इति विग्रहः । 'वश कान्तौ' । कान्तिरिच्छा । वशनं वशः । 'वशिरण्योरुपसंख्यानम्' इत्यप् । वशम् इच्छां गतः प्राप्तः, इच्छाधीन इत्यर्थः । वशधातुः छान्दस इति लुग्विकरणे वक्ष्यते, तत्प्रायिकमिति भावः । सर्वस्यापि स्वेच्छानुसारित्वादाह—**परेच्छानुसारीति । पदमस्मिन्दृश्यम् ।** प्रथमान्तात्पदशब्दाद् दृश्यत इत्यर्थे यदित्यर्थः । अत्र 'तत्' इति द्वितीयान्तमनुवृत्तं प्रथमया विपरिणम्यते । **मूल-**

'यातेति जन्यानवदत्कुमारी' इति । जनीं वहन्तीति जन्यास्तानित्यर्थः । **पद्या इति ।** 'पद्यत्यतदर्थे' इति पद्भावः । अधनुषा किम्, चोरं विध्यति । सम्भाव्यते हि चोरव्यधने धनुषः करणता । यदा तु धनुषेति प्रयुज्यते तदा सापेक्षत्वादेव न भवति । एवं च 'न चेत्तत्र धनुः करणम्' इत्यत्र 'सम्भाव्यते' इति शेषो बोध्यः । **तृन्नन्तमिति ।** एवं च 'न लोका–' इत्यादिना कृद्योगषष्ठ्या निषेधाद् धनगणम्–' इति प्रयोगो निर्बाध इति भावः । **वशं गतः ।** वशनं वश इच्छा । 'वशिरण्योरुपसंख्यानम्' इत्यप् । **मूलमस्याबर्हि ।** प्रथमान्तादाबर्हि इत्युपाधिकान्मूलशब्दा-

आवर्हणमावर्हं उत्पाटनम्, तदस्यास्तीत्यावर्हि, मूलमावर्हि येषां ते मूल्या मुद्गाः।
१६४१ संज्ञायां धेनुष्या (४-४-८९) धेनुशब्दस्य षुगागमो यप्रत्ययश्च स्वार्थे निपात्यते, संज्ञायाम्। 'धेनुष्या बन्धके स्थिता'। १६४२ गृहपतिना संयुक्ते ञ्यः। (४-४-९०) गृहपतिर्यजमानः, तेन संयुक्तो गार्हपत्योऽग्निः। १६४३ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु। (४-४-९१) नावा तार्यं नाव्यम्। वयसा तुल्यो

मस्यावर्हि। आवर्हणमिति। उत्पाटनमित्यर्थः। उपसर्गवशाद् 'वृहू उद्यमने' इति धातोरुत्पाटने वृत्तिः। मूल्या मुद्गा इति। मूलत उत्पाटनीया इत्यर्थः। संज्ञायां धेनुष्या। यप्रत्ययश्चेति। यति तु तित्स्वरः स्यादिति भावः। धेनुष्येति। या धेनुर्दोहनार्थमुत्तमर्णाय अधमर्णेन दीयते तस्या इयं संज्ञा, तदाह— बन्धके स्थितेति। अमरवाक्यमिदम्। संज्ञायामित्यापादपरिसमाप्तेरधिकारः। संज्ञा हि रूढिर्विवक्षिता। गृहपतिना। अस्मिन्नर्थे गृहपतिशब्दात् तृतीयान्ताद् ञ्यः स्यादित्यर्थः। गार्हपत्योऽग्निरिति। अग्निविशेष इत्यर्थः। तत्र पत्नीसंयाजेषु अग्निहोत्रे च गृहपतिदेवताकहोमस्य क्रियमाणत्वाद् गृहपतियोगः। यद्यपि देवसूहविःषु 'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति' इति हविर्होम आहवनीये क्रियते, तथापि संज्ञाधिकारादाहवनीये नास्य प्रयोगः। नौवयोधर्म। नौ, वयस्, धर्म, विष, मूल, मूल, सीता, तुला एभ्योऽष्टभ्यः क्रमात् तार्ये, तुल्ये, प्राप्ये, वध्ये, आनाम्ये, समे, समिते संमिते चार्थे यत्स्यादित्यर्थः। तृतीयान्तेभ्य इत्यर्थाद् गम्यते। तार्यादियोगे करणे कर्तरि हेतौ तुल्यादियोगे च तस्या एव संभवात्। अत्र मूलशब्दयोर्यथासंख्यप्रवृत्तये नैकशेषः। अन्यथा

दस्येति षष्ठ्यर्थे यत्स्यात्। आवर्ह इति। 'वृहू उद्यमने' दन्त्योष्ठ्यादिरयम्, न तु पवर्गादिः। 'उद्वृह रक्षः सहमूलमिन्द्र' इत्यादिप्रयोगदर्शनात्। मूल्या मुद्गा इति। मूलोत्पाटनं विना संग्रहीतुमशक्याः, मध्यतो लूयमानेषु कोशस्था अपि यस्यामवस्थायां पतेयुस्तामवस्थां प्राप्ताः। सुष्ठु शुष्का इति यावत्। यप्रत्यय इति। तेन धेनुष्याशब्दोऽन्तउदात्तः। यति तु तित्स्वरः स्यादिति भावः। संज्ञायामिति। ऋणप्रत्यर्पणाय या धेनुर्दोहनार्थमुत्तमर्णाय दीयते तस्याः संज्ञेयम्। गार्हपत्य इति। 'गृहपतिना–' इति निर्देशादेव तृतीयान्तात्प्रत्ययः। 'संज्ञायाम्' इत्यनुवृत्तेराहवनीयादौ नातिप्रसङ्गः। नौवयोधर्म। नावादिभ्योऽष्टभ्यो यथासंख्यं तार्यादिष्वष्टस्वर्थेषु यत्स्यात्। इह तार्यादियोगे यथासम्भवं करणे कर्तरि हेतौ तुल्यार्थयोगे च तृतीया भवतीति सैवेह समर्थविभक्तिरर्थाल्लभ्यते। अत्र प्रथमं मूलान्तानां पञ्चानां द्वन्द्वं कृत्वा

वयस्यः। धर्मेण प्राप्यं धर्म्यम्। विषेण वध्यो विष्यः। मूलेनानाम्यं मूल्यम्। मूलेन समो मूल्यः। सीतया समितं सीत्यं क्षेत्रम्। तुलया संमितं तुल्यम्।
१६४४ धर्मपथ्यर्थन्यायादनपेते। (४-४-९२) धर्मादनपेतं धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम्। १६४५ छन्दसो निर्मिते। (४-४-९३)

समानां प्रकृतीनाम् एकैकस्या अष्टस्वप्यर्थेषु प्रत्यय इति भ्रमः स्यात्। **तार्यमिति**। तरीतुं शक्यमित्यर्थः। 'ऋहलोर्ण्यत्'। **वयसा तुल्य इति**। मित्रे एवायं प्रत्ययो नतु शत्रौ, संज्ञाधिकारात्। **मूलेनानाम्यमिति**। पटादेरुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं द्रव्यं मूलम्। तेन सह यदधिकं द्रव्यम् आनम्यते विक्रेतुः संमतीकरणेन लभ्यते तन्मूल्यमित्यर्थः। लोकास्तु विक्रेतुर्लब्धं सर्वं द्रव्यं मूल्यमिति व्यवहरन्ति। तत्र लक्षणा बोध्या। सा च सांप्रतिकी निरूढा वा। **सीतयेति**। सीता लाङ्गलपद्धतिः। तया समितं संगतमित्यर्थः। कृष्टमिति यावत्। **तुलयेति**। तुला घटा, तया उन्मितमित्यर्थः। **धर्मपथ्यर्थ**। धर्म, पथिन्, अर्थ, न्याय एभ्यः अनपेतमित्यर्थे यदित्यर्थः। औचित्यात्पञ्चम्यन्तेभ्य इति लभ्यते। **धर्मादनपेत**-

---

द्वितीयमूलादिद्वन्द्वेन सह समाहारद्वन्द्वः। मूलान्तानां द्वित्राणां वा मूलादीनामेव वा द्वन्द्वं कृत्वा नावादिषु द्वन्द्वः। तेन सारूप्याभावादेकशेषो न भवति। **नावा तार्यमिति**। शक्यार्थे 'ऋहलोर्ण्यत्' करणे तृतीया। **वयस्य इति**। 'स्निग्धो वयस्यः सवयाः' इत्यमरः। 'वयसा तुल्यः शत्रुः' इत्यत्र तु न भवति, संज्ञाधिकारात्। **विषेण वध्य इति**। विषेण वधमर्हतीत्यर्थः। 'दण्डादिभ्यः–' इति सूत्रेण वधशब्दादर्हार्थे यद्विधानात्। **मूलेनानाम्यमिति**। मूलं नाम पटादीनामुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं द्रव्यम्। तेन स्वस्मादतिरिक्तं लाभाख्यं यद् द्रव्यमात्मानं प्रति शेषीक्रियते आत्मन उपकारकं क्रियते तद् आनाम्यम्। आङ्पूर्वको नमिरभिभवे वर्तते, तस्मात् 'पोरदुपधात्' इति यति प्राप्ते अतएव निपातनाण्ण्यत्, तथा चानाम्यमभिभवनीयम् आत्मानं प्रति शेषीकर्तव्यम्। स च लाभाख्यो भाग एव। लोके तु यावता द्रव्येण पटादिकं विक्रीयते तत्रैव समुदाये मूल्यशब्दः प्रसिद्धः, न तु मूलातिरिक्तभागमात्रे व्युत्पादितः। एवं च लाभमात्रे व्युत्पादितस्य मूल्यशब्दस्य तद्घटिते सङ्घाते निरूढलक्षणा बोध्या। **सीतेति**। सीता हलाग्रम्। सम्पूर्वादिणः क्तः, समितं संगतं निम्नोन्नतादिरहितं कृतमित्यर्थः, समीकृतमिति यावत्। 'रथसीताहलेभ्यो यद्विधौ' इति तदन्तविधिः। परमसीत्यम्। द्वाभ्यां सीताभ्यां समितमिति तद्धितार्थे समासस्ततो यत्। द्विसीत्यम्। **तुलया संमितमिति**। सम्मितं परिच्छिन्नम्। रूढिशब्दोऽयम्, 'संज्ञायाम्' इत्यधिकारात्। अतएव 'तुल्यम्' इति सदृशमात्रे प्रयुज्यते, न तु

छन्दसा निर्मितं छन्दस्यम्। इच्छया कृतमित्यर्थः। **१६४६ उरसोऽण् च।** (४-४-९४) चाद्यत्। उरसा निर्मितः पुत्र औरसः, उरस्यः। **१६४७ हृदयस्य प्रियः।** (४-४-९५) हृद्यो देशः। 'हृदयस्य हृल्लेख-' (सू १८८) इति हृदादेशः। **१६४८ बन्धने चर्षौ।** (४-४-९६) हृदयशब्दात्षष्ठ्यन्ताद्बन्धने यत्स्याद्वेदेऽभिधेये। हृदयस्य बन्धन हृद्यो वशीकरणमन्त्रः। **१६४९ मतजनहलात्करणजल्पकर्षेषु।** (४-४-९७) मतं ज्ञानम्, तस्य करणं भावः साधनं वा मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। **१६५० तत्र**

मिति। अप्रच्युतमित्यर्थः। **पथ्यमिति।** पथः अनपेतमित्यर्थः। **न्याय्यमिति।** न्यायादनपेतमित्यर्थः। **छन्दसो निर्मिते।** छन्दश्शब्दात्तृतीयान्ताद् निर्मितेऽर्थे यदित्यर्थः। **इच्छयेति।** छन्दःशब्द इच्छावाचीति भावः। 'छन्दः पद्येऽभिलाषे च' इत्यमरः। **उरसोऽण् च।** तृतीयान्तान्निर्मित इत्यर्थ इति शेषः। **उरस्य इति।** 'अङ्गादङ्गात्संभवसि हृदयादधिजायसे' इति श्रुतेरिति भावः। पुत्र इति संज्ञाधिकाराल्लब्धम्। **हृदयस्य प्रियः।** षष्ठ्यन्ताद् हृदयशब्दात् प्रिय इत्यर्थे यत्स्यादित्यर्थः। **बन्धने चर्षौ।** **मतजनहलात्।** यथासंख्यम् एभ्यः एष्वर्थेषु यदिति शेषः। **मतं ज्ञानमिति।** मनधातोः भावे क्त इति भावः। **करणं भावः साधनं वेति।** कृञ्धातोर्भावे करणे वा ल्युटि करणशब्दः। तेन जननक्रिया वा जननसाधनं वा विवक्षितमित्यर्थः। **मत्यमिति।** ज्ञानस्य जननक्रिया

तुलायामाग्रहः क्रियते। **पथ्यमिति।** संज्ञाधिकारादभिधेयनियमः, तेन शास्त्रीयात्पथोऽनपेतमेव पथ्यम्। न तु मार्गादनपेतश्चोरोऽपि। **छन्दसो।** 'छदि संवरणे' इति चुरादिरिच्छायामपि वर्तते, धातूनामनेकार्थत्वात्। ततो घञि इच्छापर्यायश्छन्दःशब्दः प्रसिद्ध एव 'स्वच्छन्दोच्छलदच्छकच्छ-' इत्यादौ। असुनि तु यः सान्तः सोऽत्र प्रकृतिस्तत्र निर्माणे इच्छायाः करणत्वात्सामर्थ्यात्तृतीयान्तात्प्रत्ययः। **इच्छया कृतमिति।** यद्यपि वेदे त्रिष्टुबादिषु च सान्तश्छन्दःशब्दोऽस्ति, तथापीह न गृह्यते संज्ञाधिकारात्, किं त्विच्छापर्याय एव स गृह्यत इति भावः। **पुत्र इति।** संज्ञाधिकारान्नेह। उरसा निर्मितं सुखम्। **हृदयस्य।** प्रीणातीति प्रियः, 'इगुपध-' इति कः। कृद्योगात्कर्मणि षष्ठी, अलौकिके तद्धितप्रकृतिभागे तु वचनसामर्थ्यादेव। एवमन्यत्रापि बोध्यम्। **बन्धने।** बध्यतेऽनेनेति बन्धनः। करणे ल्युट्। **वशीकरणमन्त्र इति।** तेन हि परहृदयं वशीक्रियते। संज्ञाधिकाराद्वसिष्ठादावृषौ नायं यत्। **मत।** **तस्य करणमिति।** कर्मणि षष्ठी। कृतिः करणम्, क्रियतेऽनेनेति वा करणमित्याशयेनाह—**भावः साधनं वेति।** जल्पशब्दो भावसाधनः। कर्तरि

साधुः। (४-४-९८) अग्रे साधुः अग्र्यः। सामसु साधुः सामन्यः। 'ये चाभावकर्मणोः' (सू ११५४) इति प्रकृतिभावः। कर्मण्यः। शरण्यः। **१६५१ प्रतिजनादिभ्यः खञ्।** (४-४-९९) प्रतिजनं साधुः प्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वैश्वजनीनः। **१६५२ भक्ताण्णः।** (४-४-१००) भक्ते साधवो भाक्ताः शालयः। **१६५३ परिषदो ण्यः।** (४-४-१०१) पारिषद्यः। परिषद इति योगविभागाण्णोऽपि। पारिषदः[१]। **१६५४ कथादिभ्यष्ठक्** (४-४-१०२) कथायां साधुः काथिकः। **१६५५ गुडादिभ्यष्ठञ्।** (४-४-१०३) गुडे साधुर्गौडिक इक्षुः। साक्तुको यवः। **१६५६ पथ्यतिथिवसतिस्वपतेर्ढञ्।** (४-४-१०४) पथि साधु पाथेयम्। आतिथेयम्। वसनं वसतिः, तत्र साधुर्वासतेयी रात्रिः।

जननसाधनं वेत्यर्थः। **तत्र साधुः।** सप्तम्यन्तात्साधुरित्यर्थे यत्स्यादित्यर्थः। **अग्र्य इति।** अग्रे साधुरित्यर्थः। साधुरत्र प्रवीणो गृह्यते, नतु हितः, तत्र 'तस्मै हितम्' इति वक्ष्यमाणत्वात्। **प्रतिजनादिभ्यः खञ्।** 'तत्र साधुः' इत्येव। सप्तम्यन्तेभ्य एभ्यः साधुरित्यर्थे खञ् स्यादित्यर्थः **प्रातिजनीन इति।** प्रतिजनमिति वीप्सायामव्ययीभावः। तत्र साधुरित्यर्थः। एवं वैश्वजनीनः। **भक्ताण्णः।** सप्तम्यन्तादस्मात् साधुरित्यर्थ इति शेषः। **परिषदो ण्यः।** सप्तम्यन्तात्साधुरित्यर्थे इति शेषः। **योगेति।** 'परिषदः' इति प्रथमो योगः। परिषदो णः स्यादित्यर्थः। ततः 'ण्यः' इति द्वितीयो योगः। परिषदो ण्यः स्यादित्यर्थः। **कथादिभ्यष्ठक्।** इत्यादि स्पष्टम्। **गुडादिभ्यष्ठञ्। साक्तुको यव इति।** सक्तुषु साधुः इत्यर्थः। गुडादित्वाट्ठञ्, उगन्तत्वाट्ठस्य कः। **पथ्यतिथि।** इत्यादि

षष्ठी। **हलस्येति।** कर्षणं कर्षस्तद्योगात्कर्मणि षष्ठी। करणस्य कर्तृत्वविवक्षायां कर्तरि षष्ठी वा। 'रथसीता-' इति तदन्तविधिः। द्विहल्यः। त्रिहल्यः। **तत्र साधुः।** साधुरिह प्रवीणो योग्यो वा गृह्यते, नोपकर्ता। तत्र हि परत्वात् 'तस्मै हितम्' इत्यनेन भाव्यम्। संज्ञाधिकारादुपकर्ता न गृह्यत इत्यन्ये। **प्रतिजनमिति।** जनो जन इति प्रतिजनम्। वीप्सायामव्ययीभावः। प्रतिजन, इदयुग, संयुग, पापकुल, परस्यकुल, अमुष्यकुल, सर्वजन, विश्वजन, पञ्चजन। 'परस्यामुष्य-' इति षष्ठ्योर्निपातनादलुक्। **भक्त इति।** 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः। **गुडादिभ्यष्ठञ्।** गुड, कुल्माष, सक्तु, अपूप, माष, ओदन, इक्षु, वेणु, संग्राम, सङ्घात, प्रवास, निवास, वृत्। **वसतिरिति।** 'वसेश्च' इत्यतिप्रत्ययः। स्वस्य पतिः

१ 'स पार्षदैरम्बरमापुपूरे' इति जाम्बवतीजये पाणिनिस्तु पृषोदरादित्वात्समाधेयः।

स्वापतेयं धनम्। **१६५७ सभाया यः।** (४-४-१०५) सभ्यः। **१६५८ समानतीर्थे वासी।** (४-४-१०७) 'साधुः' इति निवृत्तम्। वसतीति वासी। समाने तीर्थे गुरौ वसतीति सतीर्थ्यः। **१६५९ समानोदरे शयित ओ चोदात्तः।** (४-४-१०८) समाने उदरे शयितः स्थितः समानोदर्यो भ्राता। **१६६० सोदराद्यः।** (४-४-१०९) सोदर्यः, अर्थः प्राग्वत्।

इति तद्धितेषु चतुर्थस्य चतुर्थपादे प्राग्घितीयप्रकरणम्।

स्पष्टम्। **समानतीर्थे वासी।** समानतीर्थशब्दात्सप्तम्यन्ताद् वसतीत्यर्थे यत्स्यादित्यर्थः। **वसतीति वासीति।** ग्रह्यादेराकृतिगणत्वाणिनिः। तीर्थ-शब्दस्य विवरणं 'गुरौ' इति। **सतीर्थ्य इति।** समानतीर्थशब्दाद्यति 'तीर्थे ये' इति समानस्य सभावः। **समानोदरे शयितः।** समानोदरशब्दात् सप्तम्यन्तात् शयित इत्यर्थे यत्स्याद् ओकारश्च उदात्त इत्यर्थः। शयित इत्यस्य विवरणं 'स्थितः' इति। कुशेशयं जलेशयम् इत्यादौ तथा दर्शनादिति भावः। **समानोदर्य इति।** समानमुदरमिति विग्रहे 'पूर्वापरप्रथम-' इत्यादिना समासाद्यति कृते तित्स्वरापवाद ओकारस्योदात्तः। 'विभाषोदरे-' इति सभावे असति रूपम्। **सोदराद्यः।** सप्तम्यन्तात् शयित इत्यर्थ इति शेषः। तित्त्वाभावात्प्रत्ययस्वरे-

---

स्वपतिराढ्यस्तास्मिन्साधु स्वापतेयम्। **सभाया यः।** यति तु तित्स्वरः स्यात् 'क्रतु-र्भवत्युक्थ्यः' इतिवत्। न च 'यतो नावः' इत्याद्युदात्तता शङ्क्या। 'यदुत्पत्तिवेलायां द्व्यच्कस्य यदन्तस्यादिरुदात्तः' इति वेदभाष्ये स्थापितत्वात्। पक्षान्तरे तु 'नमः शष्प्याय च फेन्याय च' इत्यादिवदाद्युदात्तः स्यात्। एवं च व्याख्यानद्वयस्याप्या-वश्यकत्वे लक्ष्यानुरोधेन क्वचित्किंचिद्व्याख्येयमिति तत्त्वम्। **समानतीर्थे वासी।** निपातनाणिणिनिः, ग्रहादेराकृतिगणत्वान्नन्दिग्रहीत्यनेन वा। **सतीर्थ्य इति।** 'तीर्थे ये' इति समानस्य सभावः। तरन्त्यनेनेति तीर्थम्। 'तरतेस्थक्'। 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु। योनौ जलावतारे च' इति विश्वः। इह तूपाध्याय-वाचिन एवं ग्रहणं नान्यस्य, संज्ञाधिकारात्। **शयितः स्थित इति।** शीधातुः स्थित्यर्थे वर्तते। 'जलाशयः' 'कुशेशयम्' इति प्रयोगादिति भावः। समानमुदरमिति 'पूर्वापरप्रथम-' इत्यादिना तत्पुरुषः, ततो यत्, तित्स्वरापवाद ओकारस्योदात्तः। **सोदराद्यः।** 'ओ चोदात्तः' इति नानुवर्तते। 'विभाषोदरे' इति समानस्य सभावः। तत्र 'तीर्थे ये' इत्यतोऽनुवृत्तं ये इत्येतद्विषयसप्तमी। तेन सोदर इत्यस्माद्यः प्रत्ययः। **प्राग्वदिति।** समानोदरे शयित इत्येवार्थ इत्यर्थः। कथं तर्हि 'अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति' इति मुरारिरिति चेत्। अत्राहुः—सह समानमुदरं यस्य सोदरः।

अथ तद्धितेषु छयद्विधिप्रकरणम्। ३२।

१६६१ प्राक् क्रीताच्छः। (५-१-१) 'तेन क्रीतम्' (सू १७०२) इत्यतः प्राक्छोऽधिक्रियते। १६६२ उगवादिभ्यो यत्। (५-१-२) 'प्राक् क्रीतात्' इत्येव। उवर्णान्ताद्गवादिभ्यश्च यत्स्याच्छस्यापवादः। 'नाभि नभं च'

णान्तोदात्तोऽयम्। 'विभाषोदरे—' इति सभावः। 'अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति' इत्यत्र तु समानपर्यायसहशब्दस्य बहुव्रीहौ 'वोपसर्जनस्य' इति सभावो बोध्यः। एवं 'यत्र भ्राता सहोदरः' इत्याद्यपि सिद्धम्।

इति तद्धितेषु चतुर्थस्य चतुर्थः पादः।

अथ पञ्चमाध्यायः। **प्राक्क्रीताच्छः**। क्रीतशब्दस्तद्घटितसूत्रपरः। तदाह—**तेनक्रीतमिति**। 'तेन क्रीतम्' इत्यतः प्राग् येषु सूत्रेषु अर्था एव निर्दिश्यन्ते नतु प्रत्ययाः, तेषु छ इत्युपस्थितं भवतीति यावत्। **उगवादिभ्यो यत्**। उश्च गवादयश्च इति द्वन्द्वात् पञ्चमी। **उवर्णान्तादिति**। प्रातिपदिक-

'वोपसर्जनस्य' इति सहस्य सभावः। तस्य च वैकल्पिकत्वाद् 'यत्र भ्राता सहोदरः' इत्याद्यपि सिद्धमिति।

इति तत्त्वबोधिन्यां प्राग्घितीयप्रकरणम्।

प्राक् क्रीताच्छः। इत्यतः प्रागिति। इहार्थोऽवधित्वेन गृह्यते, न तु प्रत्ययः प्रकृतिर्वा। तेनार्था एवावधिमन्त इति प्राक्क्रीतायेऽर्था हितादयस्तेष्वस्योपस्थानम्। अवधिसजातीयो ह्यवधिमान् भवति। यथा 'मासान्त्यः' इति कालः प्रतीयते, 'ग्रामात्पूर्वः' इति देशः, 'अलोऽन्त्यात्पूर्व—' इत्यलेव। एवं च समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानो यदादिः प्रकृत्यन्तरे सावकाशं छं तक्कौण्डिन्यन्यायेन बाधते। अन्यथा छस्य यदादेश्च संनिधानाविशेषात्तव्यत्तव्यानीयरामिव पर्यायः स्यात्। अतोऽत्रार्थोऽवधित्वेन गृह्यते। ननु यदादिविषये छो न भविष्यति 'विभाषा हविरपूपादिभ्यः' इति विभाषाग्रहणाल्लिङ्गात्। तथा च प्रत्ययस्य प्रकृतेर्वा अवधित्वस्वीकारेऽपि न क्षतिः। उक्तज्ञापकेनोगवादिप्रभृतिभ्यश्छस्यातिप्रसङ्गनिरासादिति चेत्। अत्राहुः—एवं सति 'छः' इत्येवाधिकारोऽस्तु नार्थोऽवधिनिर्देशेन। 'प्राग्वतेष्ठञ्' इत्यादिके तु प्रकरणे नास्याधिकारः, अधिकारान्तरेणोपष्टब्धत्वात्। स्पष्टप्रतिपत्त्यर्थमवधिनिर्देशः। अन्यथा प्रतिपत्तिगौरवं स्यादिति चेत्। तर्हि 'विभाषा हवि—' इत्यादिज्ञापकाश्रयणे प्रतिपत्तिगौरवादर्थ एवावधित्वेन निर्देष्टुमुचित इति। **उगवादिभ्यो**। उवर्णादेर्गवशब्दादेश्च यत्स्यादित्यर्थो न भवति, गवादिगणपाठात्। गवाद्यन्त-

(ग सू १५) । नभ्योऽक्षः । नभ्यमञ्जनम् । रथनाभावेवेदम् । 'शुनः सम्प्रसारणं वा च दीर्घत्वम्' (ग सू १६) शून्यम्, शुन्यम् । 'ऊधसोऽनङ् च' (ग सू १७) । ऊधन्यः । **१६६३ कम्बलाच्च संज्ञायाम्** । (५-१-३)

विशेषणत्वात् तदन्तविधिः । 'उगिद्वर्णग्रहणवर्जम्' इत्युक्तेः प्रत्ययविधावपि तदन्तविधिरिति भावः । इदमपि सूत्रं प्राक्क्रीताद्वक्ष्यमाणसूत्रेषु प्रत्ययविशेषानुपादान उपतिष्ठते । **नाभि नभं चेति** । गवादिगणसूत्रम् । नाभिशब्दो नभादेशं यत्प्रत्ययं च प्राप्नोतीत्यर्थः । **नभ्योऽक्ष इति** । यत्र अक्षदण्डः प्रवेश्यते तच्चक्रमध्यगतच्छिद्रं नाभिरित्युच्यते । तस्मै हितः अक्षदण्डः, न हि अनुगुणत्वाद् नाभये हितः । **नभ्यमञ्जनमिति** । अञ्जनं तैलसेकः । नाभेरञ्जने कृते तत्र प्रोतं चक्रं सुपरिवर्तनं भवतीति नाभेः परिवर्तनारम्भकार्यक्षमताधायकत्वादञ्जनं नाभये हितम् । अत्र शरीरावयवविशेषवाचिनाभिशब्दो न गृह्यते, भाष्ये रथनाभेरेव ग्रहणादित्यभिप्रेत्य आह—**रथनाभावेवेदमिति** । शरीरावयवविशेषवाचिनाभिशब्दात्तु 'शरीरावयवाद्यत्' इति वक्ष्यमाणः केवलो यत् न तु नभादेश इति भावः । **शुनः संप्रसारणमिति** । गवादिगणसूत्रम् । श्वन्शब्दाद्यत्स्यात् प्रकृतेः संप्रसारणम्, तस्य संप्रसारणस्य पाक्षिकं दीर्घत्वमित्यर्थः । **शून्यम्, शुन्यमिति** । शुने हितमित्यर्थः । **ऊधसोऽनङ् चेति** । इदमपि गणसूत्रम् । ऊधश्शब्दाद् यत्स्यात् प्रकृतेरनङादेशश्चेत्यर्थः । आदेशे ङकार इत्, नकारादकार उच्चारणार्थः, ङित्त्वादन्तादेशः । **कम्बलाच्च** । कम्बलशब्दाद् यत्स्यात् प्राक्क्रीतीयेष्वर्थेषु संज्ञायामित्यर्थः ।

गणसूत्राण्याह—**नाभि नभं चेति** । नाभिशब्दो यतं लभते नभादेशं चेत्यर्थः । **नभ्योऽक्ष इति** । रथाङ्ग सच्छिद्रं नाभिः । तदनुप्रविष्टः काष्ठविशेषोऽक्षः । स च तदनुगुणत्वात्तस्मै हितः । अञ्जनं तैलाभ्यङ्गः, तदपि स्नेहनत्वान्नाभये हितम् । **रथनाभावेवेति** । शरीरावयवे तु नाभ्यमित्येव, परेण 'शरीरावयवाद्यत्' इत्यनेनास्य बाधादिति भावः । **शून्यमिति** । चकारस्यानुक्तसमुच्चयार्थत्वाद् 'नस्तद्धिते' इति टिलोपो न भवति । 'ये चाभावकर्मणोः' इति प्रकृतिभावस्तु दुर्लभः, संप्रसारणे पूर्वरूपे च कृते अन्रूपाभावात् । दीर्घपक्षे तु तद्विधानसामर्थ्यादपि टिलोपाभाव सुपरिहरः । **नङ् चेति** । चाद्यत् । 'नश्च' इति सुवचमिति मनोरमा । आर्ये त्वाहुः—ऊधन्यशब्दात् 'तत्करोति तदाचष्टे' इति णिचि 'णाविष्ठवत्' इति टिलोपे णिजन्तात्कर्तरि क्विपि णिलोपयलोपयोः कृतयोः 'अनुनासिकस्य क्वि–' इति दीर्घे ततः क्विबन्तादाचारक्विपि ऊधानते इत्यादाव नेपदार्थं नङो ङित्करणमावश्यकमिति । **ऊधन्यमिति** । 'ये चा–' इति प्रकृतिभावः । **कम्बलाच्च संज्ञायाम्** । प्राक्क्रीतीयेष्वर्थेषु यत्स्यात् ।

यत्स्यात् । कम्बल्यमूर्णापलशतम् । 'संज्ञायाम्' किम्-कम्बलीया ऊर्णा । १६६४ **विभाषा हविरपूपादिभ्यः** । (५-१-४) आमिक्ष्यं दधि, आमिक्षीयम् । पुरोडाश्यास्तण्डुलाः, पुरोडाशीयाः । अपूप्यम्, अपूपीयम् । १६६५ **तस्मै हितम्** । (५-१-५) वत्सेभ्यो हितो वत्सीयो गोधुक् । शङ्कवे हितं शङ्कव्यं दारु । गव्यम् । हविष्यम् । १६६६ **शरीरावयवाद्यत्** । (५-१-६) दन्त्यम् । कण्ठ्यम् । 'नसासिकायाः' (वा ३४३७) । नस्यम् । नाभ्यम् । १६६७ **ये च तद्धिते** । (६-१-६१) यादौ तद्धिते परे

कम्बल्यम् ऊर्णापलशतमिति । कम्बलाय हितमित्यर्थः । **विभाषा हविः** । हविर्विशेषवाचिभ्यः अपूपादिभ्यश्च प्राक्क्रीतीयेष्वर्थेषु यद्वा स्यादित्यर्थः । पक्षे छः । **आमिक्ष्यं दधीति** । आमिक्षायै हितमित्यर्थः । तप्ते पयसि दध्नि निक्षिप्ते सति यद् घनीभूतं निष्पद्यते सा आमिक्षेत्युच्यते । **तस्मै हितम्** । अस्मिन्नर्थे चतुर्थ्यन्ताद्यथाविहितं प्रत्ययाः स्युः । **वत्सीय इति** । छे रूपम् । यो गोधुग् वत्सेभ्यः पयः शिष्ट्वा दोग्धि स एवमुच्यते । **शङ्कव्यमिति** । शङ्कवे हितमित्यर्थः । उवर्णान्तत्वाद्यत् । **गव्यमिति** । गोभ्यो हितं तृणादिकमित्यर्थः । गवादिलक्षणो यत् । **हविष्यमिति** । हविषे हितमित्यर्थः । हविःशब्दो गवादिः । 'विभाषा हविः–' इत्यत्र तु हविर्विशेषवाचिनामेव ग्रहणम्, व्याख्यानात् । **शरीरावयवाद्यत्** । शरीरावयवविशेषवाचकात् चतुर्थ्यन्ताद् हितमित्यर्थे यत्स्यादित्यर्थः । छस्यापवादः । **नस्यमिति** । नासिकायै हितमित्यर्थः । 'पद्दन्–' इति नस्, प्रभृतिग्रहणस्य प्रकारार्थत्वात् । भाष्ये तु 'नासिकाया यत्तसक्षुद्रेषु नस्' इति पठितम् । **नाभ्यमिति** । नाभये

छस्यापवादः । **विभाषा हविरपूपादिभ्यः** । गवादिषु हविःशब्दस्य पाठादिह हविर्विशेषाणां ग्रहणम् । न च गवादिष्वेव हविर्विशेषाणां ग्रहणं किं न स्यादिति वाच्यम्, असंजातविरोधित्वेन तत्र स्वरूपग्रहणस्य न्याय्यत्वात् । **अपूप्यमिति** । अपूपेभ्यो हितं चूर्णमित्यर्थः । अपूप, तण्डुल, पृथुक, मुसल, कर्णवेष्टकेत्याद्यपूपादिगणे 'अन्नविकारेभ्यश्च' इति पठ्यते । अन्नविकारा अन्नप्रकारा अदनीयविशेषास्तेभ्यो यद्वा स्यादिति तदर्थः । ओदन्या ओदनीयास्तण्डुलाः । एवं चानेनैव गणसूत्रेण सिद्धे अपूपादीनां केषांचिद्गणे पाठः प्रपञ्चार्थः । 'हविरपूपादिभ्यो विभाषया उगवादिभ्यो यत्पूर्वविप्रतिषेधेन' । सक्तव्या धानाः । चरव्यास्तण्डुलाः । चरुर्नाम हविरिति काशिका । स्थालीवचनस्य चरुशब्दस्य तत्रस्थे हविषि उपचाराद् वृत्तिरिति कैयटादयः । **नस्यमिति** । नासिकायै हितम् । 'नासिकायां भवम्' इति विग्रहे तु 'शरीरावयवाच्च' इति यत् । नस्यम् । तस्युदाहरणं नस्तः । 'अपादाने चाहीयरुहोः' इति तसिः । क्षुद्रे तु

शिरःशब्दस्य शीर्षन्नादेशः स्यात्। शीर्षण्यः। 'तद्धिते' किम्—शिर इच्छति शिरस्यति। 'वा केशेषु' (वा ३४१३)। शीर्षण्याः शिरस्या वा केशाः। 'अचि शीर्ष इति वाच्यम्' (वा ३४१४) अजादौ तद्धिते शिरसः शीर्षादेशः। स्थूलशिरस इदं स्थौलशीर्षम्। **१६६८ खलयवमाषतिलवृषब्रह्मणश्च।** (५-१-७) खलाय हितं खल्यम्। यव्यम्। माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मण्यम्। चाद्रथ्या। **१६६९ अजाविभ्यां थ्यन्।** (५-१-८) अजथ्या

हितमित्यर्थः। नाभिरत्र शरीरावयवः। रथावयवत्वे तु नभादेश उक्तः। **ये च तद्धिते। शीर्षन्नादेश इति।** 'शीर्षन् छन्दसि' इत्यतः तदनुवृत्तेरिति भावः। **शीर्षण्य इति।** शिरसे हित इत्यर्थः। शरीरावयवत्वाद्यति शीर्षन्नादेशे 'ये चाभावकर्मणोः' इति प्रकृतिभावान्न टिलोपः। **शिरस्यतीति।** शिर आत्मन इच्छतीत्यर्थे 'सुप आत्मनः–' इति क्यचि, 'नः क्ये' इति नियमात् पदत्वाभावान्न रुत्वम्। **वा केशेषु।** केशेषु वाच्येषु यो यकारादिस्तद्धितः तस्मिन्परे शिरसः शीर्षन्नादेशो वा स्यादित्यर्थः। प्रसङ्गादाह—**अचीति। खलयव।** खलादिभ्यश्चतुर्थ्यन्तेभ्यो हितमित्यर्थे यत्स्यादित्यर्थः। वृषशब्दोऽत्र अकारान्त एव गृह्यते, नतु नकारान्तः। तेन वृष्णे हितमिति वाक्यमेव। ब्रह्मन्शब्दो ब्राह्मणवाच्येव गृह्यते, नतु वेदादिवाची। तेन ब्रह्मणे वेदाय हितमिति वाक्यमेवेति भाष्ये स्पष्टम्। ब्रह्मण्यमित्यत्र 'ये चाभावकर्मणोः' इति प्रकृतिभावान्न टिलोपः। **चाद्रथ्येति।** चकारस्यानुक्तसमुच्चयार्थत्वादिति भावः। **अजाविभ्यां थ्यन्।** अजश्च अविश्चेति द्वन्द्वः। अविशब्दस्य

नासिकायाः क्षुद्रो नःक्षुद्रः। 'सुप्सुपा' इति समासः। **नाभ्यमिति।** 'नाभि नभं च' इति नभादेशो रथनाभावेव प्रवर्तते। तस्य गवादियता सांनियोगशिष्टत्वादिति भावः। 'शीर्षश्छन्दसि' इत्यतोऽनुवर्तनादाह—**शीर्षन्नादेश इति। शीर्षण्य इति।** 'ये चाभाव–' इति प्रकृतिभावः। **शिरस्यतीति।** 'नः क्ये' इति नियमेन पदत्वाभावाद्रुत्वाभावः। **खलयव।** अत्र वृषशब्दोऽकारान्तो गृह्यते न तु नकारान्तः। अन्यथा ह्यसन्देहार्थं नलोपमकृत्वैव निर्दिशेत्। 'आत्मन्विश्वजन–' इति यत्। वृषाय हितम् वृष्यम्। नान्तायति तु वृषण्यमिति स्यात्। **ब्रह्मण्यमिति।** ब्रह्मन्शब्दो ब्राह्मणपर्यायः। प्रकृतिभावस्तु 'ये चा–' इत्यनेन पूर्ववत्। इह वृषन्शब्दाद्ब्राह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति। छोऽप्यनभिधानान्नेत्याकरः। तेन वृष्णे हितं ब्राह्मणेभ्यो हितमिति वाक्यमेव। **चाद्रथ्येति।** गवादिषु रथशब्दो न पठितः। हितार्थ एव रथ्येति यथा स्यात्, अर्थान्तरे मा भूदिति। **अजाविभ्याम्।** अजशब्द इह पुँल्लिङ्ग उपात्तः, अतएव 'द्वन्द्वे घि' इत्यविशब्दस्य पूर्वनिपातं बाधित्वा

यूथिः । अविथ्या । १६७० आत्मन्विश्वजनभोगोत्तरपदात्खः। (५-१-९) १६७१ आत्माध्वानौ खे। (६-४-१६९) एतौ खे प्रकृत्या स्तः । आत्मने हितमात्मनीनम् । विश्वजनीनम् । कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव । विश्वजनीयम् । 'पञ्चजनादुपसंख्यानम्' (वा २११६) पञ्चजनीनम् । 'सर्वजनाट्ठञ् खश्च' (वा २११७) । सार्वजनिकः, सर्वजनीनः । 'महाजनाट्ठञ्' (वा २११८) । माहाजनिकः । मातृभोगीणः ।

धित्वेऽपि 'अजाद्यदन्तम्' इत्यजशब्दस्य पूर्वनिपातः । **अजथ्या यूथिरिति।** अजेभ्यः अजाभ्यो वा हितेत्यर्थः । लिङ्गविशिष्टपरिभाषया अजाशब्दादपि थ्यन् । 'तसिलादिषु–' इति पुंवत्त्वम् । **अविथ्येति।** अविभ्यो हितेत्यर्थः । स्त्रीत्वं लोकात् । **आत्मन्विश्वजन** । आत्मन् । विश्वजन, भोगोत्तरपद एभ्यो हितमित्यर्थे खः स्यादित्यर्थः । आत्मनीनमित्युदाहरणं वक्ष्यति । तत्र टिलोपे प्राप्ते— **आत्माध्वानौ खे । प्रकृत्या स्त इति ।** 'प्रकृत्यैकाच्' इत्यतस्तदनुवृत्तेरिति भावः । **कर्मधारयादेवेति ।** विश्वजनशब्दादिति शेषः । अत्र व्याख्यानमेव शरणम् । **विश्वजनीयमिति ।** विश्वस्य जनो विश्वजनः साधारणो वैश्यादिः । विश्वो जनो यस्येति बहुव्रीहिर्वा, तस्मै हितमिति विग्रहः । **पञ्चजनीनमिति ।** ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा रथकारजातिश्चेत्येते पञ्च जनाः । तेभ्यो हितमिति विग्रहः । **सर्वजनाट्ठञ् खश्चेति** । वक्तव्य इति शेषः । 'समानाधिकरणादिति वक्तव्यम्' इति वार्तिकं भाष्ये स्थितम् । **महाजनाट्ठञिति ।** वक्तव्य इति शेषः । विश्वजनप्रसङ्गादिदं वार्तिकद्वयमुपन्यस्तम् । अथ भोगोत्तरपद-

---

'अजाद्यदन्तम्' इति अजशब्दस्य पूर्वनिपातः कृतः । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि–' इति स्त्रीलिङ्गादपि थ्यन् । तसिलादिषु थ्यनः परिगणनात्पुंवद्भावे रूपं तुल्यम् । **अजथ्येति ।** अजेभ्यो अजाभ्यो वा हितेति विग्रहः । **कर्मधारयादेवेति ।** व्याख्यानादिति भावः । **विश्वजनीयमिति ।** विश्वस्य जनः सर्वसाधारणो वैश्यादिः; विश्वो जनोऽस्येति बहुव्रीहावपि स एवान्यपदार्थस्तस्मै हितमिति विग्रहः । **पञ्चजनीनमिति ।** रथकारपञ्चमाश्चत्वारो वर्णाः पञ्चजनास्तेभ्यो हितम् । 'दिक्संख्ये संज्ञायाम्' इति समासः 'पञ्चजनात्' इत्येतत्प्रभृति वार्तिकत्रयमपि कर्मधारयविषयमेव, तेन षष्ठीसमासाद्बहुव्रीहेश्छ एव, पञ्चजनीयः । **सर्वजनीन इति ।** सर्वो जनः सर्वजनः । 'पूर्वकालैक–' इति तत्पुरुषः, तस्मै हितमिति विग्रहः । साध्वर्थे तु

---

१ तेन 'सर्वेषां जनाय (सर्वसाधारणाय वैश्यादिजनाय) हितः सर्वजनीयः' इत्यादौ न । इति भा० ।

पितृभोगीणः। राजभोगीनः। 'आचार्यादणत्वं च' (ग सू १८४) आचार्यभोगीनः।

१६७२ सर्वपुरुषाभ्यां णढञौ। (५-१-१०) 'सर्वाण्णो वेति वक्तव्यम्' (वा २१११)। सर्वस्मै हितं सार्वम्, सर्वीयम्। 'पुरुषाद्वधविकारसमूहतेनकृतेषु' (वा ३०००) भाष्यकारप्रयोगात्तेनेत्यस्य द्वन्द्वमध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। 'तस्येदम्' (सू १५००) इत्यणि प्राप्ते। पुरुषस्य विकारः पौरुषेयः, 'प्राणिरजतादिभ्योऽञ्' (सू १५३२) इत्यञि प्राप्ते। समूहेऽप्यणि प्राप्ते। एकाकिनोऽपि परितः पौरुषेयवृता इव' इति माघः। तेन कृते ग्रन्थेऽणि प्राप्ते,

---

स्योदाहरति—**मातृभोगीण इति**। मातृभोगाय हित इत्यर्थः। **आचार्यादिति**। आचार्यशब्दात्परस्य भोगीनशब्दस्य नस्य णत्वाभावो वाच्य इत्यर्थः। नच असमानपदस्थत्वादेवात्र णत्वस्याप्रसक्तेस्तन्निषेधो व्यर्थ इति वाच्यम्, मातृभोगीणादौ णत्वज्ञापनार्थत्वात्। **सर्वपुरुषाभ्यां णढञौ**। सर्व, पुरुष आभ्यां चतुर्थ्यन्ताभ्यां क्रमाद् णढञौ स्तो हितमित्यर्थे इत्यर्थः। **सर्वाण्ण इति**। अत्र सर्वशब्दस्य स्वरूपपरत्वान्न सर्वनामकार्यम्। **पुरुषाद्वधेति**। वार्तिकमिदम्। पुरुषशब्दाद्वधादिष्वेवार्थेषु ढञ् स्यात्, न हितार्थे इत्यर्थः। ननु तेन कृतमिति समुदायस्य असुबन्तत्वात् कथं समासे निवेश इत्यत आह—**भाष्येति**। **अणि प्राप्त इति**। अनेन ढञिति शेषः। **प्राणीति**। रजतादित्वादञि प्राप्ते अनेन ढञित्यर्थः। **समूहेऽप्यणि प्राप्त इति**। पुरुषाणां समूह इत्यर्थे 'तस्य समूहः' इत्यणि प्राप्ते अनेन ढञित्यर्थः। **पौरुषेयवृता इवेति**। पुरुषसमूहवृत इवेत्यर्थः। परित आदर्शप्रतिफलनादिति भावः। **तेन कृत इति**। पुरुषेण कृतो ग्रन्थ इत्यर्थे

'प्रतिजनादिभ्यः खञ्' इति खञि सार्वजनीनवैश्वजनीनशब्दौ व्युत्पादितौ। **मातृभोगीण इति**। इहाखण्डपदत्वाभावेऽपि 'अट्कुप्वाङ्—' इत्यनेन यथा णत्वं भवति तथा प्रागेवोपपादितम्। मातुर्भोगः शरीरं तस्मै हित इति विग्रहः। यद्यपि 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरेण अहेरित्युक्तम्, तथापि प्रयोगबाहुल्याभिप्रायं तत्, शक्तिस्तु शरीरमात्र इत्याकरः। मातृपितृशब्दाभ्यामौत्सर्गिकश्छ एव। मात्रीयः। पित्रीयः। राजाचार्याभ्यां त्वौत्सर्गिकः छोऽपि न भवत्यनभिधानात्। किं तु राज्ञे हितम्, आचार्याय हितमिति वाक्यमेवेत्याकरः। **सर्वपुरुषाभ्याम्**। आभ्यां शब्दाभ्यां यथासंख्यं णढञौ स्तस्तस्मै हितमित्यर्थे 'प्राक्क्रीतात्—' इति छस्यापवादादिति सूत्रार्थः। **सर्वादिति**। अनुकरणत्वात्सर्वनामकार्याभावः **पुरुषाद्वधविकारेति**। योग्यताबलादिह षष्ठी समर्थविभक्तिर्लभ्यते, 'तेन कृते' इत्यत्र तु उपात्तैव तृतीया, तदाह—**पुरुषस्य वध इति**। **समूहेऽप्यणीति**। 'तस्य समूहः'

अग्रन्थे तु प्रासादादावप्राप्त एवेति विवेकः । **१६७३ माणवचरकाभ्यां खञ् ।** (५-१-११) माणवाय हितं माणवीनम् । चारकीणम् । **१६७४ तदर्थं विकृतेः प्रकृतौ ।** (५-१-१२) विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां प्रत्ययः स्यात् । अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि । प्राकारीया इष्टकाः । शङ्कव्यं दारु । **१६७५ छदिरुपधिबलेर्ढञ् ।** (५-१-१३)

'कृते ग्रन्थे' इत्यणि प्राप्ते, पुरुषेण कृतः प्रासाद इत्यर्थे तु कस्मिन्नपि प्रत्यये अप्राप्ते अनेन ढञित्यर्थः । **माणव ।** आभ्यां चतुर्थ्यन्ताभ्यां हितमित्यर्थे खञ् स्यादित्यर्थः । **माणवीनमिति ।** मनोः कुत्सितमपत्यं माणवः, 'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकोऽण् स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः' । इत्यपत्याधिकारवार्तिकात् । माणवाय हितमिति विग्रहः । **चारकीणमिति ।** चरतीति चरः पचाद्यच् । ततः स्वार्थिकः कः, चरकाय हितमिति विग्रहः । **तदर्थं विकृतेः प्रकृतौ ।** तदर्थमिति सामान्ये नपुंसकम् । तस्मै इदं तदर्थम् । तच्छब्देन विकृतिः परामृश्यते । सप्तम्यर्थे प्रथमा । विकृत्यर्थायां प्रकृताविति लभ्यते । एवं च तच्छब्देन चतुर्थ्यन्तेन विकृतिरेव प्रथमं निर्दिश्यते । तथा च चतुर्थ्यन्ताद् विकृतिवाचकादिति लभ्यते । तदाह—**विकृतिवाचकादित्यादिना । प्रत्ययः स्यादिति ।** यथाविहितमिति शेषः । **अङ्गारेभ्य एतानीति ।** अङ्गारार्थानीत्यर्थः । अर्थेन नित्यसमासविधानादस्वपदविग्रहः । अत्र काष्ठानि प्रकृतिद्रव्याणि, अङ्गारा विकृतयः । तद्वाचकादङ्गारशब्दाच्छप्रत्यये अङ्गारीयाणीति रूपम् । **प्राकारीया**

इत्यनेन । **ग्रन्थेऽणीति ।** 'कृते ग्रन्थे' इत्यनेन । **अप्राप्त इति ।** पौरुषेयः प्रासाद इत्यादौ न कस्याप्यपवादोऽयं ढञिति भावः । **माणव ।** खञो ञित्करणं वृद्ध्यर्थं स्वरार्थं च । यद्यपि माणवे वृद्धिः स्वतःसिद्धैव, तथापि माणवीनाभार्य इत्यत्र 'वृद्धिनिमित्तस्य च-' इति पुंवद्भावप्रतिषेधार्थमिति ज्ञेयम् । **माणवायेति ।** मनोः कुत्सितमपत्यं माणवः । 'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ॥' इत्यपत्याधिकारस्थवार्तिकाण्णत्वम्, तच्च वार्तिकमेतत्सूत्रस्थनिर्देशसिद्धार्थकथनपरमित्याहुः । **चारकीणमिति ।** चरतीति चरः पचाद्यच् । 'चरिचलिपतिवदीनाम्-' इति द्विर्वचनं विकल्पितत्वादिह न भवति । ततः संज्ञायां कनि चरकः । **तदर्थं विकृतेः ।** 'तस्मै हितम्' इत्यतस्तस्मा इत्यनुवर्तते तदाह—**चतुर्थ्यन्तादिति ।** 'तदर्थम्' इति 'सामान्ये नपुंसकम्' व्यत्ययेन सप्तमीस्थाने प्रथमेत्याशयेनाह—**तदर्थायामिति ।** विकृत्यर्थायामित्यर्थः । तदिति सर्वनाम्ना हि विकृतिः परामृश्यते । एवं च विकृतिरेव प्रथमानिर्दिष्टेति 'समर्थानां प्रथमात्-'

च्छादिषेयाणि तृणानि । बालेयास्तण्डुलाः । 'उपधिशब्दात्स्वार्थे इष्यते' (वा २००३)। उपधीयते इत्युपधिः रथाङ्गम्, तदेव औपधेयम्। १६७६ ऋषभोपानहो ञ्यः । (५-१-१४) छस्यापवादः। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। चर्मण्यप्ययमेव पूर्वविप्रतिषेधेन। औपानह्यं चर्म। १६७७

इष्टका इति। प्राकारेभ्य इमा इति विग्रहः। प्राकारार्था इत्यर्थः। **शङ्कव्यमिति**। शङ्कवे इदमिति विग्रहः। शङ्क्वर्थमित्यर्थः। 'उगवादिभ्यः—' इति यत्। **छदिरुपधिबलेर्ढञ्**। छदिष्, उपधि, बलि एषां समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। एभ्यः तादर्थ्यचतुर्थ्यन्तेभ्यः प्रकृतौ वाच्यायां ढञित्यर्थः। **छादिषेयाणीति**। छदिः तृणपटलः। तस्मै इमानीति विग्रहः। छदिरर्थानीत्यर्थः। ढञि एयादेशे षात्परत्वाण्णत्वम्। **बालेयास्तण्डुला इति**। बलये इमे इति विग्रहः। बल्यर्था इत्यर्थः। 'करोपहारयोः पुंसि बलिः' इत्यमरः। 'भागधेयः करो बलिः' इति च **उपधिशब्दादिति**। वार्तिकमिदम्। **उपधीयत इति**। अक्षदण्डाग्रे उपधीयते प्रोतं क्रियते इत्युपधिः। 'उपसर्गे घोः किः' इति धाञः किप्रत्ययः। 'आतो लोप इटि च' इत्याल्लोपः। **उपधिः रथाङ्गमिति**। तथा भाष्यादिति भावः। **ऋषभोपानहो ञ्यः**। ऋषभ उपानह् अनयोः समाहारद्वन्द्वात्पञ्चमी। ऋषभशब्दादुपानह्शब्दाच्च तादर्थ्यचतुर्थ्यन्तात् प्रकृतौ वाच्यायां ञ्यप्रत्ययः स्यादित्यर्थः। **आर्षभ्य इति**। ऋषभाय अयमिति विग्रहः। ऋषभार्थ इत्यर्थः। यो वत्स ऋषभात्वप्राप्त्यर्थं पोष्यते स एवमुच्यते। **औपानह्यो मुञ्ज इति**। उपानहे अयमिति विग्रहः। उपानदर्थो मुञ्ज इत्यर्थः। क्वचिद्देशे मुञ्जतृणैरुपानत्

इत्याधिकारोऽप्यत्र निर्बाध एव। **शङ्कव्यमिति**। 'उगवादिभ्यः—' इति यत्। **छदिरुपधि**। समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। छस्यापवादोऽयम्। **छादिषेयाणीति**। छाद्यतेऽनेनेति छदिः। 'अर्चिशुचिहुसृपिछादिच्छर्दिभ्य इसिः'। 'इस्मन्त्रन्क्विषु च' इति ह्रस्वत्वम्। यदा तु चर्मविकारः छदिस्तदा परत्वात् 'चर्मणोऽञ्' इत्यञ् प्राप्नोति। पूर्वप्रतिषेधेन तु ढञेवेष्यते। छादिषेयं चर्म। आह च 'यज्ञयावरः पूर्वविप्रतिषिद्धम्' 'ढञ् च' इति। यत उदाहरणं सनह्यम्, सनहश्चर्मविकारस्तदर्थं चर्म, 'उगवादिभ्यः—' इति यत्। ञ्यस्योदाहरणमौपानह्यमिति अनुपदं वक्ष्यते। **बालेया इति**। 'करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्' इत्यमरः। **उपधेरिति**। 'उपसर्गे घोः किः' इति धाञः किः। 'आतो लोप इटि च' इत्यालोपः। **विप्रतिषेधेनेति**। 'यज्ञयावरः-' इत्यादिवार्तिकेनेत्यर्थः। ननु ढञ्विधौ छदिरित्यस्य, ञ्यविधौ उपानहश्च विशिष्य ग्रहणेन 'प्रतिपदोक्तं बलीयः' इति सिद्धे किमनेन पूर्वविप्रतिषेधेन। अत्राहुः—

चर्मणोऽञ् (५-१-१५) चर्मणो या विकृतिस्तद्वाचकादञ्स्यात् वध्र्यै इदं वार्ध्रं चर्म। वारत्रं चर्म। **१६७८ तदस्य तदस्मिन्स्यादिति।** (५-१-१६) प्राकार आसामिष्टकानां स्यात्प्राकारीया इष्टकाः। प्रासादीयं दारु। प्राकारोऽ-

---

क्रियते। **चर्मण्यपीति।** चर्मणि प्रकृतित्वेन वाच्येऽपि अयं ञ्य एव 'चर्मणोऽञ्' इत्यञं परमपि पूर्वविप्रतिषेधेन बाधित्वा भवतीत्यर्थः। एतच्च 'उगवादिभ्यः-' इति सूत्रभाष्ये स्थितम्। **औपानह्यमिति।** उपानदर्थं चर्मेत्यर्थः। **चर्मणोऽञ्।** चर्मण इति षष्ठ्यन्तं विकृतावन्वेति। तदाह—**चर्मणो या विकृतिः तद्वाचकादिति।** तादर्थ्यचतुर्थ्यन्तादिति शेषः। **अञ् स्यादिति।** प्रकृतौ वाच्यायामिति शेषः। **वध्र्यै इदमिति।** वृधेरौणादिके ष्ट्रनि वध्रशब्दः। टित्वाद् ङीप्, वध्री चर्मरज्जुः। 'नध्री वध्री वरत्रा स्यात्' इत्यमरः। वाध्र्यै इदमिति पाठान्तरम्। 'वृधिवपिभ्यां रन्' इति वृधे रनि लघूपधगुणे रपरत्वे वर्ध्रशब्दश्चर्मवाचकः, तस्माद्विकारे अणि ङीपि वार्ध्री रज्जुः। **तदस्य तदस्मिन् स्यादिति।** 'तदर्थं विकृतेः प्रकृतौ' इति निवृत्तम् इति कैयटः। तदस्य स्यादिति, तदस्मिन् स्यादिति चार्थे प्रथमान्ताद्यथाविहितं प्रत्ययः स्यादित्यर्थः। स्यादित्यत्र 'संभावनेऽलमिति' इति संभावने लिङ्। **प्राकार आसामिति।** करणत्वस्य सम्बन्धसामान्यविवक्षायां षष्ठी। आभिरिष्टकाभिः प्राकारः कर्तुं शक्यत इति विग्रहवाक्यस्य फलितोऽर्थः। **प्राकारीया इति।** प्राकार-शब्दात्प्रथमान्तात् छः। इष्टकाः प्रत्ययार्थः। प्राकारपर्याप्ता इष्टका इति यावत्। **प्रासादीयं दार्विति।** प्रासादोऽस्य स्यादिति विग्रहः। प्रासादपर्याप्तमिति यावत्।

'निरवकाशत्वे सत्येव प्रतिपदविधित्वं बलीयस्त्वे प्रयोजकम्, न तु सावकाशत्वे' इत्यनेन मुनिवचनेनानुमीयते। तेन 'स्वम्पि तटाकानि' इत्येव युक्तम्, परत्वान्नुम्प्रवृत्तेः। प्रतिपदोक्तत्वाद्दीर्घमाश्रित्य स्वाम्पि तटाकानीति मतं दुर्बलम्। 'अप्तृन्-' इति दीर्घस्य आपस्तिष्ठन्तीत्युदाहरणे सावकाशतया प्रतिपदोक्तत्वस्याबलीयस्त्वादिति। **चर्मणोऽञ्।** 'तदर्थम्' इत्यादिपूर्वोक्ते अञ् स्यात् छस्यापवादः। 'चर्मणः' इति षष्ठी न तु पञ्चमी। पञ्चम्यां तु चर्मशब्दाच्चर्मार्थायां प्रकृतौ प्रत्ययः स्यात् 'चर्मणो द्वीपी-' इत्यादौ। न चेष्यते चार्मणो द्वीपीति तदाह—**चर्मणो या विकृतिरिति। वध्र्यै इति।** 'वृधिवपिभ्याम्' इति रन्प्रत्यये वर्ध्रशब्द आद्युदात्तश्चर्मवाची, 'तस्य विकारः' इत्यण्। 'टिड्ढा-' इति ङीप्। वार्ध्री रज्जुः, तस्यै। वधेरौणादिके ष्ट्रनि तु वध्रीति भवति ततोऽणि तु वाध्रम्। 'नध्री वध्री वरत्रा स्यात्' इत्यमरः। 'चध्राः पश्य, वध्रिकाः पश्य' इति भाष्यम्। **तदस्य।** प्रथमासमर्थात्प्रातिपदिकात्षष्ठ्यर्थे सप्तम्यर्थे च यथा-

स्मिन्स्यात्प्राकारीयो देशः । इतिशब्दो लौकिकीं विवक्षामनुसारयति । तेनेह न—प्रासादो देवदत्तस्य स्यादिति । १६७९ परिखाया ढञ् । (५-१-१७) पारिखेयी भूमिः ।

इति तद्धितेषु छयतोः पूर्णोऽवधिः ।

अथ तद्धितेष्वार्हीयप्रकरणम् । ३२ ।

१६८० प्राग्वतेष्ठञ् । (५-१-१८) 'तेन तुल्यम्–' (सू १७७८)

प्राकारीयो देश इति । प्रायेण प्राकारोऽस्मिन्देशे संभाव्यत इत्यर्थः । देशस्य तद्योग्यपाषाणेष्टकादिबहुलत्वादिति भावः । अनेन 'तदर्थं विकृतेः' इत्यनुवृत्ताविह न स्यादिति सूचितम् । ननु प्रासादो देवदत्तस्य स्यादित्यत्रातिप्रसङ्गः स्यादित्यत आह—**इतिशब्दो लौकिकीं विवक्षामिति ।** शिष्टव्यवहारमित्यर्थः । **परिखाया ढञ् ।** पूर्वसूत्रविषये इति शेषः । **पारिखेयी भूमिरिति ।** परिखा अस्या अस्ति, अस्यामस्तीति वा विग्रहः । परिखायोग्येत्यर्थः । **छयतोः पूर्णोऽवधिरिति ।** 'प्राग्वतेष्ठञ्' इत्यारभ्य 'द्वित्रिपूर्वादण् च' इत्यन्तैः सूत्रैः प्रत्ययविशेषेष्वनुक्रान्तेषु 'तेन क्रीतम्' इति पठितम् । ततश्च 'प्राक्क्रीतात्–' इत्युक्तेस्तेष्वपि सूत्रेषु छयतोरनुवृत्तिः कुतो नेति न शङ्क्यम्, प्रत्ययविशेषाणां श्रवणे तयोरनुवृत्त्यसंभवादिति भावः ।

इति तद्धितेषु छयतोरवधिः ।

अथ आर्हीयाः । **प्राग्वतेः ।** वतिशब्दस्तद्घटितसूत्रपर । तदाह—**तेन तुल्यमिति ।** 'तेन तुल्यम्–' इत्यतः प्राग् येषु सूत्रेषु अर्था एव निर्दिश्यन्ते ननु

विहितं प्रत्ययः स्याद् इति, 'सम्भावनेऽलमिति च' इत्यादिना सम्भावने लिङ् । इष्टकानां बहुत्वेन प्राकार आसां स्यादिति तत्सम्भाव्यते । देशस्य हि गुणेन प्राकारोऽस्मिन्स्यादिति सम्भाव्यते । इह प्रकृतिविकारभावस्तादर्थ्यं च न विवक्षितम्, किं तु योग्यतामात्रम्, तेन पूर्वस्यायमविषयः । द्विस्तच्छब्दस्य ग्रहणं स्पष्टप्रतिपत्त्यर्थम् । 'तदस्यास्त्यस्मिन्–' इतिवत्सकृत्तच्छब्दग्रहणेनैवेष्टसिद्धेः ।

इति तत्त्वबोधिन्यां छयद्विधिप्रकरणम् ।

प्राग्वतेष्ठञ् । 'ठञ्' इत्येव वक्तव्ये 'प्राग्वतेः' इति वचनं मध्ये योऽधिकारवानपवादः, 'सर्वभूमिपृथिवीभ्यामणञौ' 'शीर्षच्छेदाद्यच्च' इत्येवमादि, तेन विच्छेदेऽपि 'पारायण–' इत्यादौ ठञेव यथा स्यादित्येवमर्थम् । न चैवं 'पारायण–' आदिसूत्र एव ठञ् निर्दिश्यतामिति वाच्यम् । उत्तरसूत्रे येषां पर्युदासः क्रियते गोपुच्छादीनां

इति वर्तिं वक्ष्यति। ततः प्राक्ठञधिक्रियते। १६८१ **आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्**। (५-१-१९) 'तदर्हति' (सू१७२८) इत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा। १६८२ **असमासे निष्कादिभ्यः**। (५-१-२०) 'आर्हात्' इत्येतत् 'तेन क्रीतम्' (सू १७०२)

प्रत्ययाः, तत्र ठञित्युपतिष्ठत इति यावत्। **आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्**। तदर्हतीति सूत्रगते अर्हतिशब्दे एकदेशानुकरणमर्हेति, तच्च तद्धटितसूत्रपरम्, आङभिव्याप्तौ, व्याख्यानात्। तदाह—**तदर्हतीति**। **इत्येतदभिव्याप्येति**। इदमपि सूत्रं प्रत्ययविशेषाश्रवणे उपतिष्ठते। अत्र संख्यापरिमाणयोः पृथग्ग्रहणात्संख्या न परिमाणम्। तथा च वार्तिकम्—'ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥' इति। तुलायामारोप्य द्रव्यगुरुत्वं येन परिच्छिद्यते तदुन्मानं गुञ्जामाषनिष्कसुवर्णपलादि। येन काष्ठादिनिर्मितेन आयतविस्तृतोच्छ्रितेन पात्रविशेषेण व्रीह्यादि परिच्छिद्यते पात्रगतायामविस्तारोच्छ्रायैः, तत्परिमाणं प्रस्थादि। आयामो दैर्घ्यं येन परिच्छिद्यते तत्प्रमाणम् अरत्निप्रादेशादि। संख्या तु उक्तत्रितयापेक्षया

तेभ्यष्ठञः प्रकृतसूत्रं विनालाभात्। तथा च गौपुच्छिकः सामातिक इत्यादौ ठञर्थमिदं सूत्रमत्र प्रदेशे आरब्धमिति बोध्यम्। **आर्हादगोपुच्छ**। **तदर्हतीति**। इह 'तदर्हम्' इति सूत्रान्तर्गतमच्प्रत्ययान्तं नानुक्रियते, किं तु तिङन्तस्यैकदेशः शबन्त एव, व्याख्यानादिति भावः। **अभिव्याप्येति**। तेन श्वेतच्छत्रिक इत्यत्रार्हत्यर्थे ठग् भवतीति भावः। ननु परिमाणात्पृथक्संख्याग्रहणं व्यर्थम्, परिमीयते परिच्छिद्यते येन तत्परिमाणं संख्ययापि च परिच्छिद्यत इति सापि परिमाणमेवेति चेत्। अत्र श्लोकवार्तिकम्—'उर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः'। अस्यार्थः—तुलादावारोप्य येन द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना सुवर्णादेर्गुरुत्वमुन्मीयते तदुन्मानम्। आरोह उच्छ्रायः, परिणाहो विस्तारः, ताभ्यामारोहपरिणाहाभ्यां स्वगताभ्यां यन्ने काष्ठादिनिर्मितेन व्रीह्यादिः परिमीयते तत्परिमाणं प्रस्थादि। परिः सर्वतोभावे, आयामो दैर्घ्यम्, स येन मीयते तत्प्रमाणम्। तच्च क्वचित्तिर्यगवस्थितस्य वस्तुनो भवति—यथा वस्त्रादेर्हस्तादिः। क्वचिदूर्ध्वाधोभागावस्थितस्य भवति—यथा हास्तिनमुदकम्। ऊरुद्वयसमुदकमिति। संख्या तु उन्मानपरिमाणप्रमाणेभ्यः पलादिप्रस्थादिहस्तादिभ्यस्त्रिभ्यो बहिर्भूता एकत्वद्वित्वादिरिति इह संख्यापरिमाणयोरेव प्रकृतत्वेऽप्युन्मानप्रमाणयोर्विवेचनं प्रसङ्गात्कृतमिति बोध्यम्। **असमासे निष्कादिभ्यः**। निष्क

इति यावत्सप्तदशसूत्र्यामनुवर्तते । निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थेषु । नैष्किकम् । समासे तु ठञेव । १६८२ **परिमाणान्तस्यासंज्ञाशाणयोः** । (७-३-१७) उत्तरपदवृद्धिः स्याद् ञिदादौ परमनैष्किकः । 'असंज्ञा' इति किम्–पञ्च कलापाः परिमाणमस्य पाञ्चकलापिकम् । 'तदस्य परिमाणम्' (सू १७२३) इति ठञ् । असमासग्रहणं ज्ञापकं भवति 'इतः प्राक्तदन्तविधिः' इति । तेन सुगव्यम्—यवापूप्यमित्यादि । इत ऊर्ध्वं तु

बाधा भिन्ना एकत्वद्वित्वादीत्यर्थः । **असमासे । इति यावदिति** । 'तेन क्रीतम्' इत्येतत्पर्यन्तमित्यर्थः । **ठगिति** । पूर्वसूत्रात्तदनुवृत्तेरिति भावः । **आर्हीयेष्विति** । 'तदर्हति' इत्येतत्पर्यन्तमनुक्रान्तेषु 'तेन क्रीतम्' इत्याद्यर्थेष्वित्यर्थः । **नैष्किकमिति** । निष्केण क्रीतमित्यर्थः । यथायोगं क्रीताद्यर्थान्वयः । **समासे तु ठञेवेति** । परमनिष्कादिशब्दादित्यर्थः । **परिमाणान्तस्यासंज्ञाशाणयोः** । आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकार इदं सूत्रम् । शेषपूरणेन व्याचष्टे—**उत्तरपदवृद्धिः स्यादिति** । उत्तरपदस्य आदेरचो वृद्धिः स्यादित्यर्थः । **ञिदादाविति** । ञिति णिति किति चेत्यर्थः । **परमनैष्किक इति** । परमनिष्केण क्रीत इत्यर्थः । समासत्वाट्ठगभावे औत्सर्गिकष्ठञ् । स्वरे विशेषः । ननु निष्कादिभ्य एव ठको विधानात्तदन्तात् समासाट्ठकोऽप्रसक्तेरसमासग्रहणं व्यर्थम् । न च प्रातिपदिकग्रहणस्यापञ्चमाध्यायसमाप्तेरधिकृतत्वात्प्रातिपदिकविशेषणतया तदन्तविधौ समासादपि ठकः प्रसक्तिरस्तीति वाच्यम् , 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति निषेधात् । निष्कादीनां च विशिष्य गृहीतत्वेन ग्रहणवत्त्वादित्यत आह-**असमासग्रहणमिति** । **सुगव्यमिति** । सु शोभना गौः सुगौः, 'न पूजनात्' इति निषेधाद् 'गोरतद्धितलुकि' इति न टच् । 'उगवादिभ्यः–' इति गोशब्दान्ताद्यत् । **यवापूप्यमिति** ।

पण, पाद, माष, वाह, द्रोण, षष्टि, इति सप्त निष्कादयः । तत्र द्रोणशब्दः परिमाणवाची, षष्टिशब्दः संख्यावाची, ताभ्यां ठञि प्राप्ते वचनम् । इतरेषां तु पञ्चानामुन्मानवाचित्वेन पूर्वसूत्रेणैव ठकि सिद्धे समासप्रतिषेधार्थं वचनमित्येके । अन्ये त्वाहुः—पूर्वसूत्रे परिच्छेदकमात्रं संख्याभिन्नं परिमाणशब्देन गृह्यते । तेन सर्वेभ्यष्ठञि प्राप्ते ठग्विधानार्थं वचनम् । न चैवं 'परिमाणं तु सर्वतः' इति भेदेन व्युत्पादनं व्यर्थमिति वाच्यम् , 'प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये' इत्यादावस्योपयोगादिति पक्षद्वयमप्येतत्पदमञ्जर्यां स्पष्टम् । अथ किमर्थम् 'असमासे' इत्युच्यते, प्रातिपदिकग्रहणे तदन्तग्रहणाभावादेवेष्टसिद्धेरत आह—**असमासग्रहणमिति** । **सुगव्यमिति** । 'उगवादिभ्यो यत्' । **यवापूप्यमिति** । 'विभाषा हविरपूपादिभ्यः' इति

'संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते, तच्चालुकि-' (वा ३०१८)। पारायणिकः। द्वैपारायणिकः। 'अलुकि' इति किम्—द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीते 'शूर्पादञ्-' (सू १६६१) मा भूत्, किं तु ठञ्। द्विशौर्पिकम्। **१६८४ अर्धात्परिमाणस्य पूर्वस्य तु वा।** (७-३-२६) अर्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः, पूर्वपदस्य तु वा ञिति णिति किति च। अर्धद्रोणेन क्रीतम् अर्धद्रौणिकम्, आर्धद्रौणिकम्। **१६८५ नातः परस्य।**

'विभाषा हविरपूपादिभ्यः' इत्यपूपान्तत्वाद्यत्। नन्वसमासग्रहणाज् ज्ञापकाद् इत ऊर्ध्वमपि तदन्तविधिः किं न स्यात्। ततश्च परमपारायणं वर्तयतीत्यत्रापि 'पारायणतुरायणचान्द्रायणं वर्तयति' इति ठञ् स्यादित्यत आह—**इत ऊर्ध्वं त्विति।** वार्तिकमिदम्। नन्वेवमपि द्विशूर्पेण क्रीतमित्यर्थे शूर्पशब्दान्तादपि 'शूर्पादञन्यतरस्याम्' इति अञ् स्यादित्यत आह—**तच्चालुकीति।** इत ऊर्ध्वं संख्यापूर्वपदानां तदन्तग्रहणमिति यदुक्तं तत्तद्धितलुकि सति न भवतीत्यर्थः। इदमपि वार्तिकमेव। **द्विशूर्पमिति।** 'तद्धितार्थ-' इति द्विगुरयम्। तद्धितप्रकृतिभूतः शब्दो न लुगन्तः। अतः संख्यापूर्वपदात् शूर्पान्तादस्मात् 'शूर्पादञन्यतरस्याम्' इति प्राप्तस्य अञ्ठञो वा 'अध्यर्ध-' इति लुक्। द्विशूर्पशब्दो लुगन्तः। ततश्च तस्मात् क्रीतेऽर्थे 'शूर्पादञ्-' इति न भवति। लुकि सति तदन्तग्रहणाभावादित्यर्थः। **द्विशौर्पिकमिति।** 'तेन क्रीतम्' इति ठञि 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्युत्तरपदवृद्धिः। अस्य ठञो लुक् तु न भवति, तस्य द्विगुनिमित्तत्वाभावात्। **अर्धात्परिमाणस्य।** 'परिमाणान्तस्य-' इत्यस्मादुत्तरमिदं सूत्रम्। **अर्धद्रौणिकम्, आर्धद्रौणिकमिति।** द्रोणशब्दस्य निष्कादित्वेऽपि असमासग्रहणाञ्च

यत्। अन्नविकारत्वादेव सिद्धे 'अपूपादीनां प्रतिपदपाठसामर्थ्यात्तदन्तविधिर्नेति न्यासग्रन्थस्तूपेक्ष्यः, वृत्त्यादिग्रन्थविरोधादिति भावः। अत एव तत्सूत्रे 'अपूपादीनां केषांचित्पाठः प्रपञ्चार्थः' इत्यवोचाम। **इत ऊर्ध्वमिति।** ज्ञापकेन तदन्तविधौ लब्धेऽपि विशेषव्यवस्थार्थमिदम्। संख्यापूर्वपदानामिति किम्, इह मा भूत्—परमपारायणं वर्तयति। **द्विशूर्पमिति।** तद्धितार्थे द्विगुरयम्। एषा हि प्रकृतिर्लुगन्ता न भवति इति संख्यापूर्वपदादप्यस्मात् 'शूर्पादञन्यतरस्याम्' इति प्राप्तस्याञ्ठञो वा 'अध्यर्धपूर्व-' इति लुक्। **द्विशौर्पिकमिति।** 'परिमाणान्तस्य-' इत्युत्तरपदवृद्धिः। ठञो द्विगुं प्रति निमित्तत्वाभावाल्लुगभावः। यद्यपि 'अध्यर्ध-' इति सूत्रे द्विगोः परस्यार्हीयस्य लुगित्येव मूले व्याख्यायते, तथापि द्विगोर्निमित्तस्येति व्याख्येयमेव। अन्यथा अत्रैव ठञो लुक् स्यात्। एतच्च 'अध्यर्ध-' इति सूत्रे स्फुटीकरिष्यते।

(७-३-२७) अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न पूर्वपदस्य तु वा ञिदादौ अर्धप्रस्थिकम्, आर्धप्रस्थिकम्। 'अतः' किम्–आर्धकौडविकम्। 'तपरः' किम्–अर्धखार्यां भवा अर्धखारी। अर्धखारीभार्य इत्यत्र 'वृद्धिनिमित्तस्य–' (सू ८४०) इति पुंवद्भावनिषेधो न स्यात्। **१६८६ शताच्च ठन्यतावशते।** (५-१-२१) शतेन क्रीतं शतिकम्, शत्यम्। 'अशते' किम्–शतं परिमाणमस्य शतकः सङ्घः। इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्न भिद्यते, तेन ठन्यतौ न, किं तु कनेव। 'असमासे' इत्येव, द्विशतेन क्रीतं द्विशतकम्। **१६८७ संख्याया अतिशदन्तायाः**

ठञ्। किंतु ठञेव। **नातः परस्य परिमाणाकारस्येति** परिमाणवाचकावयवस्य अकारस्येत्यर्थः। **पूर्वपदस्य तु वेति।** पूर्वपदस्यादेरचस्तु वृद्धिर्वेत्यर्थः। **आर्धकौडविकमिति।** अर्धकुडवेन क्रीतमित्यर्थः। 'तेन क्रीतम्' इति ठञ्। अत्र कुडवशब्दस्य परिमाणविशेषवाचिन आदेरचः अकारत्वाभावान्न वृद्धिनिषेधः। किन्तु 'अर्धात्परिमाणस्य–' इत्युत्तरपदवृद्धिरिति भावः। **तपरः किमिति।** दीर्घस्याकारस्य वृद्धिनिषेधे फलाभावाद्ध्रस्वस्येति सिद्धमिति प्रश्नः। **अर्धखार्यां भवा अर्धखारीति। निषेधो न स्यादिति।** पूर्वपदस्य वृद्ध्यभावपक्षे वृद्धिं प्रति फलोपहितनिमित्तत्वाभावादिति भावः। पूर्वपदस्य वृद्धिपक्षे तु वृद्धिं प्रति फलोपहितनिमित्तत्वसत्त्वात् स्यादेव उत्तरपदाकारस्य वृद्धिनिषेधेऽपि पुंवत्त्वनिषेधः। परिमाणान्तस्येत्यारभ्य एतदन्तं साप्तमिकम्। अथ प्रकृतं पाञ्चमिकम्। **शताच्च ठन्यतावशते।** आर्हीयेष्वर्थेषु शताट्ठन्यतौ स्तः, नतु शतेऽर्थे इत्यर्थः। उत्तरसूत्रप्राप्तकनोऽपवादः। **शतकः संघ इति।** उत्तरसूत्रेण कन्निति भावः। नन्विह संघस्यैव प्रत्ययार्थत्वात् कथम् 'अशते' इति निषेध इत्यत आह–इहेति। प्रत्ययार्थः संघः प्रकृत्यर्थात् शतात्परिमाणाद् न भिद्यते। गुणगुणिनोरभेद एव हि पारमार्थिकः। भेदस्तु काल्पनिक एवेति भावः। यत्र तु शतं प्रत्ययार्थः प्रकृत्यर्थाद्भिद्यते तत्र नायं निषेधः। शतेन क्रीतं शत्यं शाटकशतम्। अत्र हि निष्कशतं प्रकृत्यर्थः। शाटकशतं तु प्रत्ययार्थः। एतत्सर्वं भाष्ये स्पष्टम्। **असमास इत्येवेति।** चकारस्य

तपरः किमिति। दीर्घाकारस्य वृद्धौ कृतायामपि रूपे विशेषो नास्तीति प्रश्नः। **निषेधो न स्यादिति।** तथा च वृद्धिनिषेधाभावाय तपरकरणमावश्यकमिति भावः। इदं च पुंवद्भावनिषेधाभावापादनं पूर्वपदस्य वृद्ध्यभावपक्षे क्रियते। यदा तु पूर्वपदस्य पाक्षिकी वृद्धिः क्रियते, तदा फलोपधानवृद्धिनिमित्तं तद्धित इत्युत्तरपदाकारस्य वृद्धिनिषेधेऽपि स्यादेव पुंवद्भावनिषेध इति बोध्यम्। **शताच्च।** अशतेऽभिधेये आर्हीयेष्वर्थेषु ठन्यतौ स्तः। उत्तरसूत्रेण प्राप्तस्य कनोऽपवादः। चकारः 'असमासे'

कन्। (५-१-२२) संख्यायाः कन्स्यादार्हीयेऽर्थे, न तु त्यन्तशदन्तायाः। पञ्चभिः क्रीतः पञ्चकः। बहुकः। त्यन्तायास्तु साप्ततिकः। शदन्तायाः चात्वारिंशत्कः। १६८८ **वतोरिड्वा**। (५-१-२३) वत्वन्तात्कन इड् वा स्यात्। तावतिकः, तावत्कः। १६८९ **विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्**। (५-१-२४) योगविभागः कर्त्तव्यः। आभ्यां कन्स्यात्। असंज्ञायां ड्वुन् स्यात्।

तदनुकर्षणार्थत्वादिति भावः। **द्विशतेनेति**। द्विगुणशतेनेत्यर्थः। द्विगुसमासे तु द्विशतशब्दस्य लुगन्ततया लुकि तदन्तविधिनिषेधात् प्राप्तिरेव नेति बोध्यम्। **संख्यायाः**। तिश्च शश्च तिशतौ, तौ अन्ते यस्याः सा तिशदन्ता, न तिशदन्ता अतिशदन्ता, द्वन्द्वगर्भबहुव्रीहिगर्भो नञ्तत्पुरुषः। **साप्ततिक इति**। सप्तत्या क्रीत इत्यर्थः। 'तेन क्रीतम्' इति ठञ्। **चात्वारिंशत्क इति**। चत्वारिंशता क्रीतमित्यर्थः। 'तेन क्रीतम्' इति ठञष्ठस्य तकारात्परत्वात्कः। **वतोरिड् वा**। वतोरित्यनेन प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते। कन्निति प्रथमान्तमनुवृत्तम्। 'वतोः' इति पञ्चमी 'तस्मादित्युत्तरस्य' इति परिभाषया षष्ठ्यन्तं प्रकल्पयति। तदाह—**वत्वन्तादिति**। **तावतिक इति**। तावता क्रीत इत्यर्थः। 'यत्तदेतेभ्यः—' इति वतुप्। 'बहुगणवतु—' इति संख्यासंज्ञायां 'संख्याया अतिशदन्तायाः—' इति कन्, तस्य इट्, ठित्वादाद्यवयवः। **विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्**। नन्वेकसूत्रत्वे विंशतित्रिंशद्भ्यां ड्वुनेव स्यात्, कन् तु न स्यात्। अतिशदन्ताया इति निषेधादित्यत आह—**योगेति**। 'विंशतित्रिंशद्भ्याम्' इत्येकं सूत्रम्, 'ड्वुन्नसंज्ञायाम्' इत्यपरमित्यर्थः। आद्यं व्याचष्टे—**आभ्यां कन् स्यादिति**। 'संख्याया अतिशदन्तायाः' इत्यतः कन् इत्यनुवर्तत इति भावः। द्वितीयसूत्रे

इत्यस्यानुकर्षणार्थः। **द्विशतकमिति**। द्वौ च शतं च तेषां समाहारो द्विशतम्। ततः कन्—'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इत्यनया इष्ट्या समासादपि प्राप्नोतीति 'असमासे' इत्येतस्यानयनमुचितमिति भावः। **त्यन्तशदन्ताया इति**। त्यन्तसहिता शदन्तेत्युत्तरपदलोपी समासः। **पञ्चक इति**। लौकिक्याः संख्याया उदाहरणम्। **बहुक इति**। तु पारिभाषिक्याः। **साप्ततिक इति**। ठञो ञित्त्वादादिवृद्धिः। ठस्यैकादेशे 'यस्येति च' इतीकारलोपः। अर्थवतस्तिशब्दस्य ग्रहणाद् डत्यवयवस्य तिशब्दस्य पर्युदासो न भवति, कतिकः। **चात्वारिंशत्क इति**। 'इसुसुक्तान्तात्कः'। **वतोरिड्वा**। 'वतोः' इति पञ्चमी, सा च 'कन्' इति प्रथमायाः षष्ठीं कल्पयतीत्याह—**वत्वन्तात्कन इति**। **तावतिक इति**। 'यत्तदेतेभ्यः—' इति वतुप्। 'आ सर्वनाम्नः' इत्यात्वम्। **कर्तव्य इति**। अन्यथा त्यन्तशदन्तयोः

कनोऽपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः। १६६० कंसाट्टिठन्। (५-१-२५) टो ङीबर्थः, इकार उच्चारणार्थः। कंसिकः, कंसिकी। 'अर्धाच्चेति वक्तव्यम्' (वा ३०१८)। अर्धिकः, अर्धिकी। 'कार्षापणाट्टिठन्वक्तव्यः प्रतिरादेशश्च वा' (वा ३०१९) कार्षापणिकः, कार्षापणिकी। प्रतिकः, प्रतिकी। १६६१ शूर्पादञन्यतरस्याम्। (५-१-२६) शौर्पम्, शौर्पिकम्। १६६२ शतमानविंशतिकसहस्रवसनादण् । (५-१-२७) एभ्योऽण्स्यात्। ठञ्ठक्कनामपवादः। शतमानेन क्रीतं शातमानम्। वैंशतिकम्। साहस्रम्। वासनम्। १६६३ अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्। (५-१-२८)

विंशतित्रिंशद्भ्याम् इत्यनुवृत्तिमभिप्रेत्याह—**असंज्ञायामिति**। आभ्यामिति शेषः। **विंशक इति**। विंशत्या क्रीत इत्यर्थः। ड्वुन् अकादेशः। 'तिविंशतेर्डिति' इति तिशब्दस्य लोपः। **त्रिंशक इति**। ड्वुन्, अकादेशः, 'टेः' इति टिलोपः। आद्यसूत्रं परिशेषात् संज्ञायामित्यभिप्रेत्याह—**संज्ञायां त्विति**। **कंसात्** इत्यादि स्पष्टम्। **शूर्पादञ्**। आर्हीयेष्वर्थेष्विति शेषः। शूर्पशब्दस्य परिमाणवाचित्वात् ठञि प्राप्ते तदपवादोऽञ् पक्षे विधीयते। पक्षे ठञ्। **शतमान**। **शातमानमिति**। अत्र ठञ् प्राप्तः। **वैंशतिकमिति**। विंशत्या क्रीतं विंशतिकम्। संज्ञाशब्दोऽयम्। 'विंशतित्रिंशद्भ्याम्' इति योगविभागात् कन्। विंशतिकेन क्रीतमिति विग्रहः। तत्र परिमाणविशेषस्य संज्ञा चेट्ठञ् प्राप्तः, अन्यस्य संज्ञा चेट्ठक् प्राप्तः। **साहस्रमिति**। सहस्रेण क्रीतमिति विग्रहः। 'संख्याया अतिशदन्तायाः—' इति कन् प्राप्तः। **वासनमिति**। वसनेन क्रीतमिति विग्रहः। अत्र ठक् प्राप्तः। **अध्यर्धपूर्व**। अध्यर्धशब्दः पूर्वो यस्य सः अध्यर्धपूर्वः, स च द्विगुश्चेति

पर्युदासाद्विंशतित्रिंशद्भ्यां कन् दुर्लभ इति भावः। **विंशक इति** 'तिविंशतेर्डिति' इति तिशब्दस्य लोपः। **अर्धिक इति**। अर्धशब्दस्य कार्षापणार्धे रूढत्वाद्भागवदपेक्षयाऽत्रासामर्थ्यं नाशङ्क्यम्। प्रकरणादिवशेन भागविशेषे विज्ञाते सति नास्यास्यासामर्थ्यमिति बोध्यम्। एतेनार्धशब्दस्य सापेक्षत्वात्तदन्तादेव ठिठन्, द्रोणार्धिकः, प्रस्थार्धिक इति केषांचिदुक्तिः परास्ता। **शूर्पादञ्**। शूर्पशब्दस्य परिमाणवाचित्वाट्ठञि प्राप्ते तदपवादत्वेनाञ् पक्षे विधीयते। **ठञ्ठक्कनामिति**। शतमानं परिमाणं ततष्ठञ् प्राप्तः, विंशत्या क्रीतं विंशतिकम्। संज्ञाशब्दोऽयम्। असंज्ञायां हि विंशतित्रिंशद्भ्याम्—' इति ड्वुन् स्यात्। संज्ञा च यदि परिमाणस्य तदा ठञ् प्राप्तः, अर्थान्तरस्य चेत्तर्हि ठक् प्राप्तः। वसनशब्दात्तु ठगेव। सहस्रशब्दस्य संख्यावाचित्वात्ततः 'संख्याया अतिशदन्तायाः—' इति कन्प्राप्त इति विवेकः। **अध्यर्धपूर्व**। अध्यारूढमर्धं

अध्यर्धपूर्वाद् द्विगोश्च परस्यार्हीयस्य लुक्स्यात्। अध्यर्धकंसम्। द्विकंसम्। संज्ञायां

समाहारद्वन्द्वात्पञ्चमी। सौत्रं पुंस्त्वम्, तदाह—**अध्यर्धपूर्वाद् द्विगोश्चेति।** **आर्हीयस्येति।** प्रत्यासत्तिलभ्यम्। **अध्यर्धकंसमिति।** अध्यारुढमर्धं यस्मिन् तद् अध्यर्धम्। 'प्रादिभ्यो धातुजस्य–' इति बहुव्रीहौ पूर्वखण्डे उत्तरपदलोपः। सार्धमित्यर्थः। अध्यर्धेन कंसेन क्रीतमिति विग्रहः। तद्धितार्थे द्विगुः। 'संख्याया अतिशदन्तायाः–' इति कन्। तस्यानेन लुगिति भावः। **द्विकंसमिति।** द्वाभ्यां कंसाभ्यां क्रीतमिति विग्रहः। ठको लुक्। नच अध्यर्धकंसमित्यत्रापि द्विगुत्वादेव सिद्धमिति वाच्यम्, किंचित्सङ्ख्याकार्यं कृत्वसुजादिकमध्यर्धशब्दस्य

यस्मिन् तदध्यर्धम् 'प्रादिभ्यो धातुजस्य–' इत्युत्तरपदलोपः। अध्यर्धशब्दः पूर्वो यस्मिन्निति बहुव्रीहिगर्भबहुव्रीहौ कृते अध्यर्धपूर्वं च द्विगुश्चेति द्वन्द्वः। सौत्रं पुंस्त्वम्। द्विगोरिति पञ्चमी न तु षष्ठीत्याशयेन व्याचष्टे—**अध्यर्धपूर्वादित्यादि।** एतच्च वृत्तिकाररीत्या व्याख्यातम्। अत्र वार्तिकं 'द्विगोर्लुकि तन्निमित्तग्रहणम्'। द्विगोर्निमित्तं यस्तद्धितस्तस्य लुगिति वक्तव्यम्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकमिति। पूर्वोक्तोदाहरणे तु ठञो लुङ् माभूदिति। ननु द्वयोः शूर्पयोः समाहारो द्विशूर्पी तया क्रीतमिति विग्रहे द्विशूर्पमिति रूपं न स्यात्। तद्धितस्यात्र द्विगोरनिमित्ततया 'अध्यर्ध–' इति लुकोऽप्रवृत्तेः। द्विगोः परस्येति व्याख्यायां तु नः सिद्धमिष्टमिति चेत्। मैवम्, 'अर्थविशेषासम्प्रत्यये अतन्निमित्तादपि' इति वचनान्तरस्य वार्तिककृतैवोक्तत्वात्। यत्र तद्धितार्थे द्विगुना सहार्थो न भिद्यते तत्र स तद्धितो यस्य निमित्तं न भवति तस्मादपि द्विगोः परस्य लुगिति वक्तव्यमिति तस्यार्थः। एवं च द्विशूर्पमिति तद्धितार्थद्विगुना सह द्विशूर्प्या क्रीतमित्यस्यार्थो न भिद्यत इति समाहाराद् द्विगोः परस्य तद्धितस्य लुग् भवत्येवेति न काप्यनुपपत्तिः। वस्तुतस्तु सूत्रे द्विगोरिति षष्ठीमाश्रित्य 'द्विगोर्निमित्तं यस्तद्धितः' इति व्याख्याय प्रथमं वार्तिकं प्रत्याख्यातुं शक्यम्। 'द्विशूर्प्या क्रीतम्' इति विग्रहे तु द्विशूर्पादेव प्रत्ययो भवति अजाविकन्यायात्, न तु द्विशूर्पीशब्दाद् इत्याश्रित्य द्वितीयमपि प्रत्याख्यातुं शक्यम्। नन्वध्यर्धशब्दः संख्यावाच्येव। तथा च लोके गण्यते 'एकोऽध्यर्धो द्वौ' इति। अत एव अध्यर्धकमिति कन्, अध्यर्धकंसमिति तद्धितार्थे द्विगुः, अध्यर्धसांवत्सरिकमित्यादौ 'संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिश्च भवति, तत्किमध्यर्धपूर्वग्रहणेनेति चेत्। अत्राहुः—'संख्याकार्यमेतस्य किंचिन्न' इति ज्ञापनार्थमिदम्। तेन कन् द्विगुसमासवृद्धिभ्योऽन्यत्र भवति। तद्यथा—अध्यर्धं करोति। नेह कृत्वसुच्। यः सकृत्फलोपेतां क्रियामभिनिर्वर्त्य पुनस्तामेव कुर्वन् मध्ये निवर्तते स एवमुच्यते

तु पाञ्चकलापिकम्। **१६६४ विभाषा कार्षापणसहस्राभ्याम्।** (५-१-२६) लुग्वा स्यात्। अध्यर्धकार्षापणम्, अध्यर्धकार्षापणिकम्। द्विकार्षापणम्, द्विकार्षापणिकम्। औपसङ्ख्यानिकस्य टिठनो लुक्। पक्षे अध्यर्धप्रतिकम्। द्विप्रतिकम्। अध्यर्धसहस्रम्, अध्यर्धसाहस्रम्। द्विसहस्रम्, द्विसाहस्रम्। **१६६५ द्वित्रिपूर्वान्निष्कात्।** (५-१-३०) लुग्वा स्यात्। द्विनिष्कम्,

---

नेति ज्ञापनार्थत्वात्। **पाञ्चकलापिकमिति।** पञ्च कलापाः परिमाणमस्येति विग्रहे 'तद्धितार्थ' इति द्विगुः। 'तदस्य' इति ठञ्। संख्यासंज्ञासूत्रभाष्ये तु 'अध्यर्धपूर्वात्' इति पाठो दृश्यते। नच द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्, तेन क्रीतं द्विशौर्पिकमिति पूर्वोक्तोदाहरणे ठञो लुक् स्यादिति वाच्यम्, द्विगुनिमित्तस्यार्हीयस्य लुगिति व्याख्यानादित्यलम्। **विभाषा। लुग्वेति।** आर्हीयस्येति शेषः। **औपसंख्यानिकस्येति।** 'कार्षापणाट्टिठन् वक्तव्यः' इत्युक्तस्येत्यर्थः। **अध्यर्धप्रतिकमिति।** प्रत्यादेशस्य टिठन्संनियोगशिष्टत्वात् प्रत्यादेशपक्षे टिठनो न लुगिति भावः। **अध्यर्धसहस्रमिति।** 'शतमान–' इति विहितस्याणो लुक्। लुगभावे तु 'सङ्ख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः। **द्वित्रिपूर्वान्निष्कात्। लुग्वा स्यादिति।** आर्हीयस्येति शेषः। **द्विनिष्कमिति।** ठञो लुक्, समासाट्टकोऽसंभवात्। **बिस्ताच्च।** आर्हीं·

इति। **पाञ्चकलापिकमिति।** पञ्च कलापाः परिमाणमस्येति विग्रहे 'तद्धितार्थ–' इति समासः। 'तदस्य परिमाणम्' इति ठञ्। एवं पाञ्चलोहितिकमपि बोध्यम्। पञ्च लोहिन्यो गुञ्जाः परिमाणमस्येति विग्रहे पूर्ववत्समासतद्धितौ। 'भस्याढे तद्धिते' इति पुंवद्भावाल्लोहिनीशब्दस्यैकारनकारयोरभावः। परिमाणविशेषस्य नामधेये एते। असंज्ञाग्रहणं प्रत्ययान्तस्य विशेषणम्, न तु द्विगोः। एतच्च वृत्तिकृता सूत्राशयमनुरुध्य वर्णितमिति इहापि तथैवोक्तम्। भाष्यवार्तिकयोस्त्वसंज्ञाग्रहणं प्रत्याख्यातम्। तथा हि—द्विगुविशेषणमसंज्ञाग्रहणम्। पञ्चकलापपञ्चलोहितशब्दौ च द्विगू कृततद्धितलुकावेव संज्ञे। यस्तु ताभ्यामुत्पद्यते ठञ् स श्रूयते इति द्विगोर्निमित्तत्वेन तस्य लुगभावादिति। **विभाषा। टिठनो लुगिति।** प्रत्यादेशपक्षे तु लुक् न भवति, प्रत्यादेशस्य प्रत्ययसंनियोगशिष्टत्वादिति बोध्यम्। **अध्यर्धसहस्रमिति।** 'शतमान·विंशतिक–' इति विहितस्याणो लुक्। तदभावपक्षे तु 'संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः। अध्यर्धशब्दः संख्यावाचीत्यधुनैवोक्तत्वात्। **द्वित्रिपूर्वात्।** अध्यर्धग्रहणमुत्तरार्थमनुवृत्तमपीह न संबध्यते। 'द्विगोः' इति तु संबध्यत एव षष्ठीसमासं व्यावर्तयितुम्। अत्र च व्याख्यानमेव शरणम्। 'द्वित्रिभ्यां निष्कात्' इत्येव

द्विनैष्किकम्। त्रिनिष्कम्, त्रिनैष्किकम्। 'बहुपूर्वाच्चेति वक्तव्यम्' (वा ३०२४) बहुनिष्कम्, बहुनैष्किकम्। १६९६ बिस्ताच्च। (५-१-३१) द्वित्रिबहुपूर्वाद्बिस्तादार्हीयस्य लुग्वा स्यात्। द्विबिस्तम्, द्विबैस्तिकम् इत्यादि। १६९७ विंशतिकात्खः। (५-१-३२) अध्यर्धपूर्वाद् द्विगोरित्येव। अध्यर्धविंशतिकीनम्। द्विविंशतिकीनम्। १६९८ खार्या ईकन्। (५-१-३३) अध्यर्धखारीकम्। द्विखारीकम्। 'केवलायाश्चेति वक्तव्यम्' (वा ३०२५)। खारीकम्। १६९९ पणपादमाषशताद्यत्। (५-१-३४) अध्यर्धपण्यम्। द्विपण्यम्।

यस्य लुग्वेति शेषः। **द्विबिस्तं द्विबैस्तिकमिति**। द्वाभ्यां बिस्ताभ्यां क्रीतमिति विग्रहः। ठञः पाक्षिको लुक्। **इत्यादीति**। बहुबिस्तं बहुबैस्तिकमित्युदाहार्यम्। 'बहुपूर्वाच्च' इति वार्तिकस्य अत्राप्यनुवृत्तेः भाष्ये उक्तत्वात्। **विंशतिकात्खः। अध्यर्धपूर्वाद् द्विगोरित्येवेति**। पूर्वसूत्रयोरध्यर्धपूर्वादित्यस्यासंभवाद् द्विगोरित्यस्य प्रयोजनाभावादननुवृत्तावपि इह तदनुवर्तत इति भावः। **अध्यर्धविंशतिकीनमिति**। अध्यर्धविंशत्या क्रीतमध्यर्धविंशतिकम्। 'विंशतित्रिंशद्भ्याम्' इति योगविभागात् कन्। अध्यर्धविंशतिकेन क्रीतमिति विग्रहः। **द्विविंशतिकीनमिति**। द्वाभ्यां विंशतिकाभ्यां क्रीतमिति विग्रहः। **खार्या ईकन्**। 'अध्यर्धपूर्वात्' इति 'द्विगोः' इति चानुवर्तत इत्यभिप्रेत्योदाहरति—**अध्यर्धखारीकम्, द्विखारीकमिति**। 'तदस्य परिमाणम्' इति ठञि तस्य च लुकि प्राप्ते ईकन्। **केवलायाश्चेति**। खार्या इति शेषः। **पणपाद**। 'अध्यर्धपूर्वात्' इति 'द्विगोः' इति चानुवर्तत इत्यभिप्रेत्योदाहरति—**अध्यर्ध-**

सिद्धे पूर्वग्रहणं चिन्त्यप्रयोजनमिति हरदत्तः। **द्विनैष्किकमिति**। 'प्राग्वतेष्ठञ्' मतान्तरे तु ठगिति मनोरमायाम्। 'निष्कादिभ्यः समासे ठगभावात् परिच्छेदकमात्रं गृह्यते' इति मतान्तरेऽपि ठञेव भवति, तन्मते उन्मानस्यापि परिमाणत्वाद् 'असमासे निष्कादिभ्यः' इत्यादिना... 'अगोपुच्छ–' इत्यादिना पर्युदस्तत्वाट्ठगभावे निष्कादिभ्यष्ठञि प्राप्ते असमासे ठग्विधानेऽपि समासे ठञ एव प्राप्तत्वादित्यन्ये। 'परिमाणान्तस्य–' इत्युत्तरपदवृद्धिः। 'द्विगोः' इति सम्बन्धान्नेह लुक्। द्वयोर्निष्कयो द्विनिष्कस्तेन क्रीतं द्विनैष्किकम्। 'अध्यर्धपूर्व–' इत्यसम्बन्धादध्यर्धनैष्किकमित्यत्राप्यनेन लुङ् न भवति। **बिस्ताच्च**। चकारेण 'द्वित्रिपूर्वात्–' इत्यत्र पूर्वादित्यनुकृष्यते, तत्फलं तु 'चानुकृष्टं नोत्तरत्र' इत्युत्तरत्रानुवृत्त्यभावः। **विंशतिकात्खः**। 'शतमानविंशतिक–' इत्यणि प्राप्ते तस्य च लुकि प्राप्ते खोऽत्र विधीयते। **खार्याः**। 'तदस्य परिमाणम्' इति ठञि प्राप्ते तस्य च लुकि प्राप्ते ईकन् विधीयते। कन्विधौ 'केऽणः' इति ह्रस्वः स्यात्। इकन्विधावपि 'यस्येति च' इति लोपादिष्टं

अध्यर्धपाद्यम् । द्विपाद्यम् । इह 'पादः पत्' (सू ४१४) इति न । 'यस्य-' (सू ३११) इति लोपस्य स्थानिवद्भावात् । 'पद्यत्यतदर्थे' (सू ३११) इत्यपि न, प्राण्यङ्गार्थस्यैव तत्र ग्रहणात् । १७०० शाणाद्वा । (५-१-३५) यत्स्यात् । पक्षे ठञ् । तस्य लुक् । अध्यर्धशाण्यम्, अध्यर्धशाणम् १७०१ द्वित्रिपूर्वादण्च । (५-१-३६) 'शाणात्' इत्येव । चाद्यत् तेन त्रैरूप्यम् । 'परिमाणान्तस्यासंज्ञाशाणयोः' (सू १६८३) इति पर्युदासादादिवृद्धिरेव । द्वैशा-

---

पण्यम् । द्विपण्यमिति । अध्यर्धपणेन क्रीतमित्यर्थः । द्विपाद्यमिति । द्वाभ्यां पादाभ्यां चतुर्थांशाभ्यां क्रीतमिति विग्रहः । यति 'यस्येति च' इत्यकारलोपः । स्थानिवद्भावादिति । 'अचः परस्मिन्-' इत्यनेनेति भावः । प्राण्यङ्गार्थस्येति । व्याख्यानादिति भावः । इह सूत्रे पणमाषसाहचर्यात् पादशब्दोऽपि परिमाणविशेषवाची गृह्यते । शाणाद्वा । पक्षे ठञिति । 'आर्हात्' इति ठग्विधौ परिमाणपर्युदासाट्ठञिति भावः । तस्य लुगिति । ठञ इति भावः । अत्र 'अध्यर्धपूर्वात्' इति 'द्विगोः' इति चानुवर्तत इत्यभिप्रेत्य अध्यर्धपूर्वादुदाहरति—अध्यर्धशाण्यम्, अध्यर्धशाणमिति । यति ठञो लुकि च रूपम् । अथ शाणान्तद्विगोरुदाहरणं

न सिध्यतीति भावः । प्राण्यङ्गार्थस्यैवेति । अयं भावः—'पादस्य पदाज्यातिगोपहतेषु' इत्यत्र प्राण्यङ्गस्यैव हि पादस्य ग्रहणम्, तस्यैवाज्यातिनियतिवचनैः संबन्धसंभवात् । तथा च 'पद्यति-' इत्यादावपि तस्यैवानुवृत्तिः । इह तु पणमाषाभ्यां साहचर्यात्परिमाणवाचिनो ग्रहणमिति । पक्षे ठञिति । यद्यपि शाण उन्मानम्, तथापि 'आर्हात्-' इति सूत्रे परिमाणग्रहणेन परिमीयते परिच्छिद्यतेऽनेनेति योगवृत्त्या परिच्छेदकमात्रं गृह्यत इति वादिनां मते अस्यापि पर्युदासाट्ठगभावे ठञिति भावः । मुख्यमते तु ठगेव बोध्यः । 'शाणाद्वा' इति सूत्रे 'शताच्चेति वक्तव्यम्' पूर्वेण नित्यं प्राप्ते विकल्पार्थम् । एवं च पूर्वसूत्रे शतग्रहणमकृत्वा शतशाणाभ्यां वेत्येव वक्तुं युक्तमित्याहुः । अध्यर्धशत्यम्, अध्यर्धशतम् । पञ्चशत्यम्, पञ्चशतम् । यदभावे संख्यालक्षणस्य कनो लुक् । 'शताच्च ठन्यतौ-' इति तु न प्रवर्तते, तत्रासमासग्रहणस्यानुवर्तनात् । द्वित्रिपूर्वादण् च । वार्तिकमिदं वृत्तिकृता सूत्रेषु प्रक्षिप्तम् । भाष्यादिप्रामाण्याच्छतग्रहणमिह न सम्बध्यत इत्याशयेनाह—शाणादित्येवेति । न्यासकृता त्वणिवधायके वार्तिके सूत्रत्वभ्रमेण व्याख्यातम्—'शतशाणाभ्यां वा' इति सूत्रयितव्ये 'पणपाद-' इति पूर्वसूत्रे शतग्रहणं क्रियते तस्येदं फलम्, शतशब्दः स्वरितत्वेनानुवर्तमानोऽपि 'शाणाद्वा' इत्यत्रैव सम्बध्यते, तदुत्तरसूत्रे 'द्वित्रिपूर्वादण् च' इत्यत्र तु न सम्बध्यते, तेन शतशब्दादण् न—इति । तदिदं सामर्थ्यवर्णनमणिवधायकं यदि सूत्रं स्यात्

याम्, द्विशाण्यम्, द्विशाणाम्। इह ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषां समर्थविभक्त्योऽर्थाकाङ्क्षितास्त इदानीमुच्यन्ते। १७०२ तेन क्रीतम्। (५-१-३७) ठञ्। गोपुच्छेन क्रीतं गौपुच्छिकम्। साप्ततिकम्। प्रास्थिकम्।

वक्ष्यन् विशेषमाह—**द्वित्रिपूर्वादण् च**। वार्तिकमिदम्। **चाद्यदिति**। पाक्षिको यत्, चकारेण समुच्चीयत इत्यर्थः। ततश्च यतोऽभावे ठञपि लभ्यते। तदाह—**तेन त्रैरूप्यमिति**। अणा यता ठञा चेत्यर्थः। अणि 'परिमाणान्तस्य–' इत्युत्तरपदवृद्धिमाशङ्क्याह—**परिमाणान्तस्येति**। **ठञादयस्त्रयोदशेति**। 'प्राग्वतेः–' इति ठञ्, 'आर्हात्–' इति ठक्, 'शताच्च–' इति ठन्यतौ, 'संज्ञायाः–' इति कन्, 'विंशतित्रिंशद्भ्याम्–' इति ड्वुन्, 'कंसात्–' इति टिठन्, 'शूर्पात्–' इत्यञ्, 'शतमान–' इत्यण्, 'विंशतिकात्खः' इति खः, 'खार्याः–' इति ईकन्, 'पणपाद–' इति यत्, 'द्वित्रि–' इति वार्तिकोक्ताण्, इत्येवं त्रयोदशेत्यर्थः। **प्रकृता इति**। प्रक्रान्ता इत्यर्थः। **समर्थविभक्त्य इति**। 'समर्थानां प्रथमाद्वा' इति सूत्रलभ्यसमर्थविशेषणीभूतप्रथमोच्चारिततत्तद्विभक्त्य इत्यर्थः। **तेन क्रीतम्**। अस्मिन्नर्थे तृतीयान्ताद्यथाविहितं ठञादयः स्युरित्यर्थः। **ठञिति**। उदाह्रियत इति शेषः। **गोपुच्छेन क्रीतं गौपुच्छिकमिति**। 'अगोपुच्छ' इति पर्युदासाट्ठगभावे औत्सर्गिकष्ठञिति भावः। **साप्ततिकमिति**। सप्तत्या क्रीतमित्यर्थः। 'अगोपुच्छसङ्ख्या–' इति पर्युदासाट्ठगभावे ठञिति भावः। **प्रास्थिकमिति**। प्रस्थेन क्रीतमित्या :। 'अगोपुच्छसङ्ख्यापरिमाणात्'

तदा संगच्छते, नान्यथेत्यास्तां तावत्। **त्रैरूप्यमिति**। तदेतद्दर्शयति—**द्वैशाणमित्यादिना**। अण्येकम्, ठञो लुकि द्वितीयम्, यति तृतीयम्। **ठञादयस्त्रयोदशेति**। ननु एकादशैव प्रत्ययाः प्रकृताः, सूत्रभेदेन विहितत्वात्। यत्प्रत्ययस्य द्विर्गणने तु द्वादश, इति त्रयोदशेत्येतद् दुरुपपादमेव। न च 'शूर्पादञन्यतरस्याम्' इत्यन्यतरस्यांग्रहणलभ्यठञमादाय त्रयोदशत्वं सूपपादमिति वाच्यम्, तुल्यन्यायेन 'शाणाद्वा' इति सूत्रलभ्ययट्ठञोर्ग्रहणेन पञ्चदशत्वप्रसङ्गात्। नापि सूत्रोपात्तैर्द्वादशभिः सह 'द्वित्रिपूर्वादण् च' इति वार्तिकोपात्ताण्प्रत्ययस्य गणनेन निर्वाहः। उक्तरीत्या 'कंसाट्टिठन्' इति सूत्रे 'अर्धाच्चेति वक्तव्यम्', 'कार्षापणाट्टिठन् वक्तव्यः' इत्यादिवार्तिकोक्तटिठन्प्रत्ययस्यापि ग्रहणप्रसङ्गादिति चेत्। अत्राहुः—'कंसाट्टिठन्' इति सूत्रस्थ एव टिठन् अर्धकार्षापणशब्दाभ्यां परामृष्ट इति स न भिद्यते। 'द्वित्रिपूर्वादण् च' इति वार्तिकस्थोऽण् तु भिद्यते, 'शतमानविंशतिक–' इत्यणो दूरस्थत्वेन परामर्ष्टुमशक्यत्वादिति। **तेन क्रीतम्**। तेनेति तृतीयान्तात्क्रीतार्थे यथाविहितं प्रत्ययाः स्युः। **ठञिति**। 'आर्हात्–' इति सूत्रे 'अगोपुच्छ–' इत्यादिपर्युदासाट्ठगभावे गोपुच्छसप्ततिप्रस्थेभ्यष्ठञ्

ठक्। नैष्किकम्। १७०३ **इद्गोण्याः।** (१-२-५०) गोण्या इत्स्यात्तद्धितलुकि। लुकोऽपवादः। पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः। १७०४ **तस्य निमित्तं संयोगोत्पातौ।** (५-१-३८) संयोगः संबन्धः। उत्पातः शुभाशुभसूचकः। शतिकः शत्यो वा धनपतिसंयोगः। शत्यं शतिकं वा दक्षिणाक्षिस्पन्दनम्, शतस्य निमित्तमित्यर्थः। 'वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्' (वा ३०३३)। वातस्य शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्। 'संनिपाताच्चेति वक्तव्यम्' (वा ३०३७) सांनिपातिकम्। १७०५ **गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्।** (५-१-३९) गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः-

---

इति पर्युदासाट्ठगभावे ठगिति भावः। **ठगिति।** उदाह्रियत इति शेषः। **नैष्किकमिति।** निष्केण क्रीतमित्यर्थः। 'असमासे निष्कादिभ्यः' इति ठगिति भावः। **इद्गोण्याः। लुकोऽपवाद इति।** 'लुक्तद्धितलुकि' इति प्राप्तस्येत्यर्थः। **पञ्चगोणिरिति।** आर्हीयस्य ठको लुकि स्त्रीप्रत्ययस्य इकारः। नच उपसर्जनह्रस्वत्वेनैव इदं सिद्धमिति वाच्यम्, इत्त्वविध्यभावे 'लुक्तद्धितलुकि' इति ङीषो निवृत्तावदन्तत्वात् टापि पञ्चगोणेत्यापत्तेः। मूलद्रव्यवाचिन एव तृतीयान्तात्क्रीतार्थे प्रत्यया भवन्ति, नतु देवदत्तेन क्रीतमित्यर्थे, अनभिधानादिति भाष्ये स्पष्टम्। **तस्य निमित्तम्।** तस्य निमित्तं संयोग उत्पातो वेत्यर्थे यथाविहितं षष्ठ्यन्तात् ठञादयः स्युरित्यर्थः। **शत्यः शतिको वेति।** शतस्य निमित्तमित्यर्थः। 'शताच्च—' इति यट्ठनौ **धनपतिसंयोग इति।** याजनशुश्रूषादिसंपर्क इत्यर्थः। उत्पाते उदाहरति—**शत्यं शतिकं वा दक्षिणाक्षिस्पन्दनमिति।** शतस्य निमित्तमित्यर्थः। सूचकत्वमेवात्र निमित्तत्वमिति भावः। **उपसंख्यानमिति।** आर्हीयस्य ठक इति शेषः। कोपनं वृद्धिः। **संनिपाताच्चेति।** 'तस्य निमित्तं संयोगोत्पातौ' इत्यर्थे ठगिति शेषः। **सांनिपातिकमिति।** संनिपातो वातपित्तश्लेष्मणां दोषाणां संकर इति वैद्यके प्रसिद्धः। तस्य निमित्तं [सांनि]पातिकम्, ज्वरप्रकोपादौ अपथ्यभक्षादिसंयोगः संनिपातसूचकं जिह्वाकाष्ण्यादि च। **गोद्व्यचः।** तस्य निमित्तं संयोग उत्पातो वेत्यर्थे गोशब्दाद् द्व्यचश्च षष्ठ्यन्ताद् यत्प्रत्ययः स्यात्, नतु सङ्ख्यायाः परिमाणाद् अश्वादेश्चेत्यर्थः। ठको-

---

भवतीत्यर्थः। ननु देवदत्तेन क्रीतं पाणिना क्रीतं संतोषेण क्रीतमित्यादावतिप्रसङ्ग इति चेत्। अत्राहुः—करणे तृतीयैवेह समर्थविभक्तिः, सापि मूल्यद्रव्यसमर्पकाच्छब्दादुत्पन्ना, न त्वन्यापि, अन्यत्र त्वनभिधानान्न प्रत्ययः। एतच्च 'तद्धिताः' इति महासंज्ञाकरणाल्लभ्यते, तेभ्यः प्रयोगेभ्यो हितास्तद्धिता इति व्याख्यानादिति। **लुकोऽपवाद इति।** 'लुक्तद्धितलुकि' इति प्राप्तस्य स्त्रीप्रत्ययस्य लुकोऽपवाद इत्यर्थः।

यशस्यः। धन्यः। स्वर्ग्यः। 'गोद्व्यचः' किम्-विजयस्य वैजयिकः। 'असंख्या-' इत्यादि किम्-पञ्चानां पञ्चकम्। सप्तकम्। प्रास्थिकम्। खारीकम्। अश्वादि-आश्विकम्। आश्मिकम्। 'ब्रह्मवर्चसादुपसंख्यानम्' (वा ३०३२)। ब्रह्मवर्चस्यम्। १७०६ पुत्राच्छ्च। (५-१-४०) चाद्यत्। पुत्रीयः, पुत्र्यः। १७०७ सर्वभूमिपृथिवीभ्यामणञौ। (५-१-४१) सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिवः। सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते। १७०८ तस्येश्वरः। (५-१-४२)। १७०९ तत्र विदित इति च।

ऽपवादः। द्व्यच इति। उदाह्रियत इति शेषः। धन्य इत्यादि। धनस्य यशसः स्वर्गस्य च निमित्तमित्यर्थः। विजयस्येति। निमित्तमिति शेषः। वैजयिक इति। आर्हीयष्ठक्। पञ्चानामिति। निमित्तमिति शेषः। पञ्चकमिति। 'सङ्ख्यायाः' इति कन्। सप्तकमिति। सप्तानां निमित्तमित्यर्थः। प्रास्थिक इति। प्रस्थस्य निमित्तमित्यर्थः। 'आर्हात्-' इति ठग्विधौ परिमाणपर्युदासात् प्राग्वतीयष्ठञ्। खारीकमिति। खार्या निमित्तमित्यर्थः। खार्या ईकन्। अश्वादीति। प्रत्युदाहरणसूचनमिदम्। आश्विकमिति। अश्वस्य निमित्तमित्यर्थः। आर्हीयष्ठक्। आश्मिकमिति। अश्मनो निमित्तमित्यर्थः। आर्हीयष्ठक्। 'नस्तद्धिते' इति टिलोपः। ब्रह्मवर्चसादिति। 'गोद्व्यचः' इति सूत्रे 'ब्रह्मवर्चसाच' इति वक्तव्यमित्यर्थः। ब्रह्मवर्चस्यमिति। ब्रह्मवर्चसस्य निमित्तमित्यर्थः। पुत्राच्छ्च। तस्य निमित्तमित्येव। कथं तर्हि 'आरेभिरे यतात्मानः पुत्रीयामिष्टिमृत्विजः' इति? नहीष्टिः संयोग उत्पातो वा। उध्यते-संयुज्यतेऽनेनेति संयोगः। इष्ट्या हि पुत्रेण फलेन युज्यते यष्टा। सर्वभूमि। तस्य निमित्तमित्येव। सर्वभूमि, पृथिवी आभ्यां यथासङ्ख्यमणञौ स्तः। सार्वभौम इति। ठञोऽपवादः। अण्। पार्थिव इति। पृथिव्या निमित्तं संयोग उत्पातो वेत्यर्थः। स्त्रियां पार्थिवी। सार्वभौमशब्दे कथमुभयपदवृद्धिरित्यत आह—सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यत इति। तथा च 'अनुशतिकादीनां च' इत्युभयपदवृद्धिरिति भावः। तस्येश्वरः। तत्र विदित इति च। सूत्रद्वयमिदम्। 'सर्वभूमिपृथिवीभ्याम्'

पञ्चकमिति। संख्यालक्षणः कन्। आश्मिकमिति। अश्मनो निमित्तमित्यर्थे ठक्। 'नस्तद्धिते' इति टिलोपः। पुत्राच्छ्च। 'गोद्व्यचः-' इति नित्यं यति प्राप्ते वचनम्। कथं पुत्रीयः क्रतुरिति। नहि क्रतुः संयोगो नाप्युत्पात इति चेत्। अत्राह हरदत्तः—संयुज्यतेऽनेनेति व्युत्पत्त्या क्रतुरपि संयोग एव, यागकरणेन हि पुरुषः फलेन संयुज्यतेऽतो यागादिरपि संयोगः, न केवलं सम्बन्ध एवेत्याग्रह इति। सर्वभूमि।

(५-१-४३)। सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः । पार्थिवः । १७१० लोकसर्वलोकाट्ठञ्। (५-१-४४) 'तत्र विदितः' इत्यर्थे । लौकिकः । अनुशतिकादित्वादुभयपदवृद्धिः सार्वलौकिकः । १७११ तस्य वापः । (५-१-४५) उप्यतेऽस्मिन्निति वापः क्षेत्रम् । प्रस्थस्य वापः प्रास्थिकम् । द्रौणिकम् । खारीकम् । १७१२ पात्रात्ष्ठन् । (५-१-४६) पात्रस्य वापः क्षेत्रं पात्रिकम्, पात्रिकी क्षेत्रभक्तिः । १७१३ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते । (५-१-४७) वृद्धिर्दीयते इत्यादि क्रमेण प्रत्येकं

इत्यनुवर्तते । 'तस्य निमित्तं संयोगोत्पातौ' इति तु निवृत्तम्, पुनः 'तस्य' इत्युक्तेः । तस्येश्वर इत्यर्थे षष्ठ्यन्तात्तत्र विदित इत्यर्थे तु सप्तम्यन्ताद् अण्ञौ स्त इत्यर्थः । योगविभागो यथासंख्यनिवृत्त्यर्थः, उत्तरसूत्रे 'तत्र विदितः' इत्यस्यैवानुवृत्त्यर्थश्च । **लोकसर्व । तत्र विदित इत्यर्थ इति** । योगविभागसामर्थ्यात् 'तस्येश्वरः' इति नानुवर्तत इति भावः । **लौकिक इति** । लोकेषु विदित इत्यर्थः । सर्वलोकशब्दे विशेषमाह—**अनुशतिकादित्वादिति । तस्य वापः** । अस्मिन्नर्थे षष्ठ्यन्ताद्यथाविहितं ठञादयः स्युरित्यर्थः । **प्रास्थिकमिति** । प्रस्थपरिमितबीजवापयोग्यं क्षेत्रमित्यर्थः । 'आर्हात्—' इति ठग्विधौ परिमाणपर्युदासात् प्राग्वतीयष्ठञ् । **द्रौणिकमिति** । निष्कादित्वाट्ठक् । **खारीकमिति** । खार्या ईकन् । द्रोणस्य खार्याश्च वाप इत्यर्थः । **पात्रात् ष्ठन्** । 'तस्य वापः' इत्येव । **पात्रिकमिति** । पात्रस्य वाप इत्यर्थः । षित्त्वं ङीषर्थमित्याह—**पात्रिकीति । तदस्मिन्** । वृद्धि, आय, लाभ, शुल्क, उपदा एषां द्वन्द्वात्प्रथमाबहुवचनम् । ननु तर्हि दीयन्त इति कथमेकवचनमित्यत आह—**वृद्धिर्दीयत इत्यादि क्रमेण** । एवं च तदस्मिन्वृद्धिर्दीयते, तदस्मिन् आयो दीयते, तदस्मिन् लाभो दीयते, तदस्मिन् शुल्को दीयते, तदस्मिन्नुपदा दीयते इत्यर्थेषु, प्रथमान्ताद्यथाविहितं ठञादयः

आभ्यां यथासंख्यमण्ञौ स्तः । **तस्येश्वरः** । 'तस्य निमित्तम्—' इत्यतोऽनुवृत्त्यैव सिद्धे पुनः 'तस्य' इति निर्देशो निमित्तरूपप्रत्ययार्थस्य निवृत्तये । अन्यथा हि संयोगोत्पाताविवेश्वरोऽपि प्रत्ययार्थस्य विशेषणं संभाव्येत । **तत्र विदित इति च** । योगविभाग उत्तरार्थो यथासंख्यनिवृत्त्यर्थश्च । **तस्य वापः** । 'तस्य' इति वापापेक्षया कर्मणि षष्ठीत्याह—**प्रस्थस्येति** । कर्तरि षष्ठ्यां तु देवदत्तस्य वापः क्षेत्रमित्यादौ स्यादिति भावः । **खारीकमिति** । 'खार्या ईकन्' । **तदस्मिन्** । प्रथमासमर्थाद् अस्मिन् इति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति । शुल्कग्रहणं प्रपञ्चार्थम्, तस्याप्यायविशेषत्वात् । तथा च 'ठगायस्थानेभ्यः' इति ठग् भवति, शौल्कशालिक इति

सम्बन्धादेकवचनम् । पञ्च अस्मिन् वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते पञ्चकः । शतिकः, शत्यः । साहस्रः । उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । विक्रेत्रा मूल्यादधिकग्राह्यं लाभः । रक्षानिर्वेशो राजभागः शुल्कः । उत्कोच उपदा । 'चतुर्थ्यर्थे उपसंख्यानम्' (वा ३०३६) । पञ्च असै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः । 'समम-ब्राह्मणे दानम्' इतिवदधिकरणत्वविवक्षा वा । **१७१४ पूरणार्धाट्ठन् ।** (५-१-४८) यथाक्रमं ठक्टिठनोरपवादः । द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयिकः । तृतीयिकः । अर्धिकः । अर्धशब्दो रूपकस्यार्धे रूढः । **१७१५ भागाद्यच्च ।** (५-१-४९) चाट्ठन् । भागशब्दोऽपि रूपकस्यार्धे रूढः ।

स्युरित्यर्थः । **पञ्चक इति** । 'संख्यायाः—' इति कन् । **शतिकः, शत्य इति** । शतमस्मिन्वृद्धिः, आयः, लाभः, शुल्कः, उपदा वा, दीयत इति विग्रहः । 'शताच्च—' ठन्यतौ । **साहस्र इति** । सहस्रमस्मिन्दीयते इत्यादि विग्रहः । 'शतमानसहस्र—' इत्यण् । **रक्षानिर्वेश इति** । रक्षा प्रजापरिपालनम्, तदर्थो निर्वेशो भृतिः, रक्षानिर्वेशः । **उत्कोच इति** । मह्यं किञ्चिद्दत्तं चेत् तव राजद्वारेऽनुकूलो भवामीत्यादि समयं कृत्वा यद् गृह्यते तदुत्कोच इत्युच्यत इत्यर्थः । **चतुर्थ्यर्थे इति** । तदस्मै वृद्ध्यादि दीयते इत्युपसंख्यातव्यमित्यर्थः । **सममब्राह्मणे इति** । एवं च संप्रदानस्यैवाधिकरणत्वविवक्षया इष्टसिद्धेरुपसंख्यानमिदं नादर्तव्यमिति भावः । **पूरणार्धाट्ठन्** । तदस्मिन् वृद्ध्यादि दीयत इत्यर्थे पूरणप्रत्ययान्तादर्धशब्दाच्च प्रथमान्ताट्ठन् स्यादित्यर्थः । **द्वितीयिकः । तृतीयिक इति** । 'आर्हात्—' इति ठकोऽपवादष्ठन् । **अर्धिक इति** । अर्धमस्मिन्वृद्ध्यादि दीयत इत्यर्थः । 'अर्धाच्चेति वक्तव्यम्' इति टिठनोऽपवादष्ठन् । टिठनि सति तु स्त्रियां ङीप् स्यात् । आर्धिकेति तु टाबेवेष्यते । **रूपकस्येति** । रूप्यस्य कार्षापणस्येत्यर्थः । **रूढ इति** । अन्यथा अर्धशब्दस्य रूप्यकसापेक्षत्वादसामर्थ्यं स्यादिति भावः । रूप्यकस्यार्धे रूढ इत्यत्र प्रमाणं मृग्यम् । असामर्थ्ये तु नित्यसापेक्षत्वाद्वारयितुं शक्यमित्याहुः । **भागाद्यच्च** ।

हरदत्तः । **उपदा दीयत इति** । जसः सस्य रुत्वे यत्वे च यलोपः । **साहस्र इति** । 'शतमान—' इत्यादिनाण् । **रक्षानिर्वेश इति** । निर्वेशो भृतिः । रक्षानिमित्तको निर्वेशो रक्षानिर्वेशः । सम्बन्धषष्ठ्या समासः । **सममित्यादि** । एवं च संप्रदानस्यैवाधिकरणत्वविवक्षयेष्टसिद्धौ उपसंख्यानं नादर्तव्यमिति भावः । **पूरणार्धाट्ठन्** । पूर्यतेऽनेनेति पूरणोऽर्थस्तद्वाचिनोऽर्धशब्दाच्च ठन् स्यात् । **अर्धिक इति** । 'अर्धाच्चेति वक्तव्यम्' इति टिठन् प्राप्तः, सति च तस्मिन् स्त्रियां ङीप् स्यात् । इष्यते तु

भागो वृद्ध्यादिरस्मिन्दीयते भाग्यम्, भागिकं शतम्। भाग्या, भागिका विंशतिः।
१७१६ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः । (५-१-५०) वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तत्प्रकृतिकाद् द्वितीयान्तादिस्यर्थः। वंशभारं हरति वहत्यावहति वा वांशभारिकः। ऐक्षुभारिकः। 'भाराद्वंशादिभ्यः' इत्यस्य व्याख्यान्तरं 'भारभूतेभ्यो वंशादिभ्यः' इति। भारभूतान्वंशान्हरति वांशिकः। **१७१७ वस्नद्रव्याभ्यां ठन्कनौ। (५-१-५१)** यथासंख्यं स्तः। वस्नं हरति वहत्यावहति वा वस्निकः। द्रव्यकः। **१७१८ सम्भवत्यवहरति पचति । (५-१-५२)** प्रस्थं सम्भवति प्रास्थिक कटाहः। प्रस्थं

तदस्मिन्वृद्ध्यादि दीयत इत्यर्थे भागशब्दात्प्रथमान्ताद्यत्प्रत्ययश्च स्यादित्यर्थः। **चाट्ठनिति**। पूर्वसूत्रादनुकृष्यत इति शेषः। **भागशब्दोऽपि रूप्यकस्यार्धे इति**। वर्तत इति शेषः। **तद्धरति वहति**। वंशाद्भारादिभ्य इत्येकवचनबहुवचनान्तयोः सामानाधिकरण्यासंभवाद् वैयधिकरण्येनान्वयः स च व्युत्क्रमो व्याख्यानात्, तदाह—**वंशादिभ्यः पर इति**। द्वितीयान्तादित्यनन्तरं हरति वहति आवहतीत्यर्थे यथाविहितं प्रत्ययः स्यादिति शेषः। हरणं कथंचिद्देशान्तरप्रापणं चौर्यं वा। शकटादिना प्रापणं वहनम्। स्वसमीपं प्रापणमावहनम् उत्पादनं वा। **वांशभारिक इति**। 'आर्हात्–' इति ठक्। अत्र पञ्चम्यन्तयोर्व्युत्क्रमेण वैयधिकरण्येन चान्वये प्रमाणाभावादाह—**भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरमिति**। भारात्परेभ्यो वंशादिभ्य इत्यर्थभ्रमव्यावृत्तये व्याख्यान्तरं विशदयति—**भारभूतेभ्यो वंशादिभ्य इतीति**। वंशादिशब्दानां भारभूतत्वं तु भारभूतवंशादिवृत्तिबोध्यम्। अस्मिन्व्याख्याने भारादित्येकवचनमार्षम्। यद्वा प्रत्येकान्वयाभिप्रायम्। वस्तुतो भारभूता ये वंशादयः तद्वाचिभ्य इति यावत्। **वस्नद्रव्याभ्याम्**। 'तद्धरति वहत्यावहति' इत्यनुवर्तत इत्यभिप्रेत्याह—**वस्नं हरतीत्यादि**। **संभवत्यवहरति**। तद् इति द्वितीयान्तमनुवर्तते। द्वितीयान्तात्संभवतीत्याद्यर्थेषु यथाविहितं प्रत्ययः स्यादित्यर्थः। **प्रास्थिक इति**। 'आर्हात्' इत्यत्र परिमाणपर्युदासाट्ठगभावे प्राग्वतीयष्ठञ्। ननु संभवतीत्यस्य उपपद्यत इत्य-

---

टाप्। **रूपकस्येति**। रूपकं कार्षापणम्। **रूढ इति**। तथा च भागवद्द्रव्यसापेक्षत्वेनासामर्थ्यमिह नोद्भावनीयमिति भावः। **भारभूतेभ्यो वंशादिभ्य इति**। ननु वंशादयः शब्दास्ते कथं भारभूता इत्यत आह—**भारभूतानिति**। भारशब्दोऽर्थद्वारा वंशादीनां विशेषणमिति भावः। 'भारेभ्यः' इति वक्तव्ये प्रत्येकं सम्बन्धविवक्षया सूत्रे 'भारात्' इति निर्देशः। **वस्निक इति**। वस्नं मूल्यम्। **सम्भवत्य-**

स्वस्मिन्समावेशयतीत्यर्थः । प्रास्थिकी ब्राह्मणी । प्रस्थमवहरति, उपसंहरति पचति वेत्यर्थः । 'तत्पचतीति द्रोणादण्च' (वा ३०३८) । चाट्ठञ् । द्रोणं पचतीति द्रौणी, द्रौणिकी । १७१९ आढकाचितपात्रात्खोऽन्यतरस्याम् । (५-१-५३) पक्षे ठञ् । आढकं सम्भवति अवहरति पचति वा आढकीना, आढकिकी । आचितीना, आचितिकी । पात्रीणा, पात्रिकी । १७२० द्विगोः ष्ठंश्च । (५-१-५४) 'आढकाचितपात्रात्' इत्येव । आढकाद्यन्ताद् द्विगोः सम्भवत्यादिष्वर्थेषु ष्ठन्खौ वा स्तः । पक्षे ठञ् । तस्य 'अध्यर्ध-' (सू १६६६) इति लुक् । षित्वान्ङीष् । द्व्याढकिकी, द्व्याढकीना । 'द्विगोः' (सू ४७१) इति

र्थकत्वादकर्मकत्वात्प्रस्थं संभवतीति कथं द्वितीयेत्यत आह—**समावेशयतीत्यर्थ इति** । उपसर्गवशादिति भावः । **प्रास्थिकी ब्राह्मणीति** । ठञन्तत्वाद् ङीबिति भावः । अवहरतीत्येतद्व्याचष्टे—**उपसंहरतीति** । किंचिदूनमपि यथा प्रस्थपरिमितं भवति तथा मिमीत इत्यर्थः । **तत् पचतीति द्रोणादण् चेति** । वार्तिकमिदम् । द्वितीयान्ताद् द्रोणशब्दात् पचतीत्यर्थेऽण् च स्यादित्यर्थः । पचतिग्रहणं संभवत्यवहरतिनिवृत्त्यर्थम् । **चाट्ठञिति** । 'आर्हात्' इति ठञ्विधौ परिमाणपर्युदासात् ठगभावे प्राग्वतेष्ठञेव चकारादनुकृष्यत इति भावः । **द्रौणीति** । अणन्तत्वाद् ङीप् । **द्रौणिकीति** । ठञन्तत्वाद् ङीप् । **आढकाचित** । आढक, आचित, पात्र एभ्यो द्वितीयान्तेभ्यः संभवत्यवहरतिपचतीत्यर्थेषु खो वा स्यादित्यर्थः । **पक्षे ठञिति** । 'आर्हात्' इत्यतः परिमाणपर्युदासान्न ठगिति भावः । **द्विगोः ष्ठंश्च** । **ष्ठन्खाविति** । चकारेण खस्यानुकर्षादिति भावः । **वा स्त इति** । अन्यतरस्यामित्यनुवृत्तेरिति भावः । **पक्षे ठञिति** । 'आर्हात्' इत्यत्र परिमाणपर्युदासान्न ठगिति भावः । षित्त्वाद् ङीष् । **द्व्याढकिकीति** । द्वे आढके संभवत्यवहरति पचति वेत्यर्थे 'तद्धितार्थ-' इति द्विगुः, ष्ठन्, षित्त्वाद् ङीषित्यर्थः । अत्र 'न य्वाभ्याम्-' इत्यैज् न, वृद्धिनिषेधसंनियोगशिष्टत्वाद् ञ्णित्कि-

---

वहरति । आधारप्रमाणादाधेयप्रमाणस्य यदनाधिक्यं तदुपसर्जनं धारणं संभवतेरर्थः । तेन सकर्मकत्वात्तदिति द्वितीयान्तानुवृत्तिर्न विरुध्यते तदाह **प्रस्थं स्वस्मिन्निति** । **प्रास्थिकीति** । ठञन्तत्वान्ङीप् । अवहरतीत्येतद्व्याचष्टे **उपसंहरतीति** । **तत्पचतीति** । वार्तिकेऽस्मिन्पचतिग्रहणं संभवत्यवहरतीतिनिवृत्त्यर्थम् । द्रोणपरिमिते व्रीह्यादौ द्रोणशब्दो लाक्षणिकः । **पक्षे ठञिति** । आढकादीनां परिमाणत्वाट्ठक् नेति भावः । **द्विगोः ष्ठंश्च** । ष्ठनिति छेदः, तदाह **षित्वादिति** । **द्व्याढकिकीति** । 'न य्वाभ्याम्-' इत्यैजागमो न शङ्क्यः, वृद्धिनिषेधसंनियोगेन तद्विधानाद

ङीप्। ध्याढकी। ध्याचितिकी, ध्याचितीना। 'अपरिमाण-' (सू ४८०) इति ङीन्निषेधात् ध्याचिता। द्विपात्रिकी, द्विपात्रीणा, द्विपात्री। १७२१ **कुलिजाल्लुक्खौ च।** (५-१-५५) कुलिजान्ताद् द्विगोः सम्भवत्यादिष्वर्थेषु लुक्खौ वा स्तः। चात्ष्ठंश्च। लुगभावे ठञः श्रवणम्। द्विकुलिजी, द्विकुलिजीना, द्विकुलिजिकी, द्वैकुलिजिकी। १७२२ **सोऽस्यांशवस्नभृतयः।** (५-१-५६) अंशो भागः। वस्नं मूल्यम्। भृतिर्वेतनम्। पञ्च अंशो वस्नं भृतिर्वा अस्य पञ्चकः। १७२३ **तदस्य परिमाणम्।** (५-१-५७) प्रस्थं

दभावेन वृद्धेरप्रसक्तेः। **ध्याढकीनेति।** खे रूपम्। **द्विगोः इति ङीप्। ध्याढकीति।** ठञि 'अध्यर्ध-' इति तस्य लुक्। 'द्विगोः' इति ङीबित्यर्थः। प्रत्ययलक्षणमाश्रित्य ठञन्तलक्षणङीप् तु नेति 'अपरिमाणबिस्त-' इत्यत्रोक्तम्। 'अध्यर्ध-' इति लुक् ठञ एव, नतु ठन्खयोरपि, विधिसामर्थ्यात्। **ध्याचितिकी, ध्याचितीनेति।** ष्ठनि खे च रूपम्। अथ ध्याचितशब्दात् ठञो लुकि 'द्विगोः' इति ङीपमाशङ्क्याह—**अपरिमाणेति ङीन्निषेधादिति। द्विपात्रिकीत्यादि। कुलिजाल्लुक्खौ च।** अन्यतरस्यामित्यनुवृत्तिमभिप्रेत्याह—**लुक्खौ वा स्त इति।** 'आर्हात्' इत्यत्र परिमाणपर्युदासाट्ठगभावे प्राग्वहतीयस्य ठञः 'अध्यर्ध-' इति नित्यं लुकि प्राप्ते लुको विकल्पविधिः। **चात् ष्ठंश्चेति।** तथा च ठञो लुक् खश्च ष्ठंश्चेति त्रितयं विकल्प्यते। तत्र ष्ठनः खस्य ठञो लुकश्च भावे ठञः श्रवणं पर्यवस्यति, तदाह **लुगभावे ठञः श्रवणमिति। द्विकुलिजीति।** ठञो लुकि रूपम्। 'द्विगोः' इति ङीप्। **द्विकुलिजीनेति।** खे रूपम्। **द्विकुलिजिकीति।** ष्ठनि रूपम्। **द्वैकुलिजिकीति।** ठञो लुगभावे रूपम्। परिमाणान्तस्येत्यत्र 'असंज्ञाशाणकुलिजानाम्' इत्युक्तेर्नोत्तरपदवृद्धिः। **सोऽस्यांश।** 'स' इति प्रत्येकमंशादिष्वन्वेति। सोऽस्यांशः तदस्य वस्नम्, सास्य भृतिः, इत्यर्थेषु प्रथमान्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः। **पञ्चक इति।** 'संख्यायाः-' इति कन्। **तदस्य परिमाणम्।** अस्मिन्नर्थे प्रथमान्ताद्यथाविहितं

वृद्धेश्च प्राप्त्यभावात्। **अपरिमाणेति।** आचितस्य परिमाणत्वेऽपि तस्मिन् सूत्रे विशिष्यग्रहणादिति भावः। **द्वैकुलिजिकीति।** 'असंज्ञाशाणयोः' इत्यत्र कुलिजशब्दोऽपि इष्यते, तेनोत्तरपदवृद्धिर्नेत्याहुः। **तदस्य परिमाणम्।** इह परिमाणशब्देन परिच्छेदकमात्रं गृह्यते, न तु सर्वतोमानमेव, उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणात्। षष्टिजीवितं परिमाणमस्य षाष्टिकः। 'सोऽस्य' इति वर्तमाने पुनः 'तदस्य' इति ग्रहणात् 'द्वे षष्टी जीवितं परिमाणमस्य द्विषाष्टिकः त्रिषाष्टिकः' इत्यादौ

परिमाणमस्य प्रास्थिको राशिः । १७२४ संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु । (५-१-५८) पूर्वसूत्रमनुवर्तते । तत्र 'संज्ञायां स्वार्थे प्रत्ययो वाच्यः' (वा ३०३१) । यद्वा द्व्येकयोरितिवत्सङ्ख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः । पञ्चैव पञ्चकाः शकुनयः । पञ्च परिमाणमेषामिति वा । सङ्घे पञ्चकः । सूत्रे अष्टकं पाणिनीयम् । सङ्घशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तम् ।

प्रत्ययाः स्युरित्यर्थः । **प्रास्थिक इति** । 'आर्हात्' इत्यत्र परिमाणपर्युदासात् प्राग्वतीयष्ठञ् । अत्र संख्यापि परिमाणम् । यद्यपि 'अगोपुच्छसंख्यापरिमाणात्–' इति पृथग्ग्रहणात् संख्या न परिमाणम् , तथाप्यत्र परिच्छेदकत्वात् संख्यापि परिमाणम् , उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणाल्लिङ्गात् । तेन षष्टिः परिमाणमस्य षाष्टिकमिति सिद्धम् । द्विषष्ट्यादिभ्यस्त्वनभिधानान्नेति भाष्ये स्पष्टम् । **संख्यायाः । अनुवर्तत इति** । तथा च तदस्य परिमाणमित्यर्थे प्रथमान्तात् संख्यात्मकपरिमाणवाचिनो यथाविहितं प्रत्ययाः स्युरित्यर्थः । **संज्ञायां स्वार्थे प्रत्ययो वाच्य इति** । पञ्चकाः शकुनय इत्यत्र पञ्च परिमाणमेषामित्यर्थो न संभवति, 'आ दशतः संख्याः संख्येये' इति पञ्चन् शब्दस्य संख्येयवृत्तित्वेन पञ्च परिमाणमिति सामानाधिकरण्यानुपपत्तेः । अतः संज्ञायां स्वार्थ एव संख्यायाः प्रत्यय इति पर्यवस्यतीति भावः । **यद्वेति** । द्विशब्दस्य एकशब्दस्य च संख्येयवृत्तित्वेऽपि 'द्व्येकयोः–' इति समासवृत्तावेकत्वद्वित्वपरत्वमभ्युपगम्यते । अन्यथा 'द्व्येकयोः–' इति द्विवचनानुपपत्तेः । तद्वत्पञ्चकाः शकुनय इति तद्धितवृत्तावपि पञ्चन्शब्दस्य पञ्चत्वसंख्यापरतया पञ्चत्वं परिमाणमस्येति सामानाधिकरण्यं स्वीकृत्य पञ्चत्ववाचिनः पञ्चन्शब्दात् पञ्चत्वरूपपरिमाणवति प्रत्यय उपपद्यत इत्यर्थः । तत्र संज्ञायां स्वार्थे उदाहरति— **पञ्चैवेति** । परिमाणिनि प्रत्ययमुदाहरति **पञ्च परिमाणमिति** । पञ्चत्वमित्यर्थः । **सङ्घ इति** । उदाहरणं वक्ष्यत इत्यर्थः । **पञ्चक इति** । पञ्चत्वमस्य संघस्य परिमाणमित्यर्थः । संघस्य पञ्चत्वं तु अवयवद्वारा बोध्यम् । **सूत्र इति** । उदाह्रियत इति शेषः । **अष्टकं पाणिनीयमिति** । सूत्रमिति शेषः । अष्टावध्यायाः परिमाणमस्येति विग्रहः । अत्राष्टत्वं अध्यायद्वारा सूत्रेऽन्वेति । सूत्रशब्दश्च सूत्रसंघपरः, एकस्मिन् सूत्रे अष्टकत्वस्यासंभवात् । नन्वेवं सति संघग्रहणेनैव सिद्धे सूत्र-

---

'अध्यर्ध–' इति लुङ् न भवति । स्पष्टं चेदं काशिकादौ । **पूर्वसूत्रमिति** । तेन पञ्च गावः परिमाणस्य पञ्चको गोसङ्घ इत्यादि सिध्यति । यदा तु प्रकृत्यर्थस्यैव परिच्छेदिका संख्या पञ्च गावोऽस्य सङ्घस्येति, तदा तु प्रत्ययो न भवति, परिमाणस्य प्रत्ययार्थत्वाभावात् । एतच्च 'आर्हादगोपुच्छ–' इति सूत्रे कैयटे स्पष्टम् । स्वार्थे उदाहरति—

पञ्चकमध्ययनम्। 'स्तोमे डविधिः' (वा ३०११)। पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः स्तोमः। सप्तदशः। एकविंशः। डप्रत्यये तिलोपः। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठादिसंज्ञिका स्तुतिः स्तोमः। **१७२५ पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्** । (५-१-५९) एते रूढिशब्दा निपात्यन्ते । **१७२६ पञ्चद्शतौ वर्गे वा** । (५-१-६०)

ग्रहणं व्यर्थमित्यत आह—**संघशब्दस्येति । पञ्चकमध्ययनमिति** । पञ्चावृत्तयः परिमाणमस्येति विग्रहः। **स्तोमे डविधिरिति** । तदस्य परिमाणमित्यर्थे संख्यावाचिन उपसंख्यातव्य इति शेषः। सामाधारमन्त्रसमूहे स्तोमशब्दः शक्त इति कैयटः। मनुष्यादिसमूहे तु स्तोमशब्दो लाक्षणिक इति तदाशयः। तदाह—**पञ्चदश मन्त्रा इति । पञ्चदशः स्तोम इति** । पञ्चदश न्शब्दाद् डप्रत्यये 'टेः' इति टिलोपः। सामाधारभूतपञ्चदशमन्त्रसमूह इत्यर्थः। ननु डित्त्वाभावेऽपि 'नस्तद्धिते' इत्येव टिलोपसिद्धेर्डित्त्वं व्यर्थमित्यत आह—**एकविंश इति** । एकविंशतिर्मन्त्राः परिमाणमस्य समूहस्येति विग्रहः। **डप्रत्यय इति** । 'तिविंशतेर्डिति' इति टिलोपः। मीमांसकास्तु पृष्ठरथन्तरादिशब्दवाच्या प्रगीतमन्त्रसाध्या गुणवत्त्वेन वर्णनात्मिका स्तुतिरेव स्तोमः, स एव डप्रत्ययार्थः। प्रगीतपञ्चदशमन्त्रपरिमाणकः स्तोम इत्यर्थः। पञ्चदशत्वसंख्यात्मकपरिमाणं स्तुतौ मन्त्रद्वारा बोध्यम्। एवं च 'पञ्चदशेन स्तुवते' इत्यादौ धात्वर्थभूतस्तुतिसामानाधिकरण्यं पञ्चदशादिशब्दानामुपपद्यत इत्याहुः। तन्मतमवलम्ब्याह—**सोमयागेष्वित्यादि । पङ्क्तिविंशति । रूढिशब्दा निपात्यन्त इति** । तदस्य परिमाणमित्यर्थे इति शेषः। पञ्च पादाः परिमाणमस्येत्यर्थे पञ्चन्शब्दात् तिप्रत्ययः, प्रकृतेष्टिलोपः, चकारस्य कुत्वम्, अनुस्वारपरसवर्णौ, पङ्क्तिरिति रूपम्। 'पञ्चाद्दरा पञ्चपदा पङ्क्तिः'

पञ्चैवेति । स्तोमे डविधिरिति । डित्करणमेकविंश इत्यत्र टिलोपार्थम्। त्रयस्त्रिंशादौ टिलोपार्थं च । **पञ्चदश मन्त्रा इति** । 'साम्ना स्तुवीत', 'एकं साम तृचे क्रियते' इति हि श्रुतिः। तत्र तृचस्य पञ्चकृत्व आवृत्त्या पञ्चदशमन्त्राः। सप्तदशे स्तोमे अन्त्याया ऋचः सप्तकृत्व आवृत्तिः। प्रथममध्यमयोस्तु पञ्चकृत्व एव, एकविंशे स्तोमे तु तृचस्य सप्तकृत्व आवृत्तिरिति ज्ञेयम्। **छन्दोगैरिति** । सामगैरित्यर्थः। **पङ्क्तिविंशति** । 'तदस्य परिमाणम्' इति वर्तते पञ्चन्शब्दस्य टिलोपः, तिप्रत्ययः, 'चोः कुः' इति कुत्वम्। पञ्चपदानि परिमाणमस्य पङ्क्तिश्छन्द इति काशिका। पदशब्दोऽत्र पादपर्याय इति हरदत्तः। **रूढिशब्दा इति** । तथा चात्र नावयवार्थेऽभिनिवेष्टव्यम्। पङ्क्तिशब्दो हि नानार्थः। अस्ति क्रमसंनिवेशे ब्राह्मणपङ्क्तिः पिपीलिका-

पञ्च परिमाणमस्य पञ्चद्वर्गः। दशत्। पक्षे पञ्चकः। दशकः। १७२७ त्रिंशच्च-

इति छन्दःशास्त्रे। दशानां वर्गो दशत्। 'पञ्चद्दशतौ वर्गे वा' इति वक्ष्यते। द्वौ दशतौ परिमाणमस्य संघस्येति विंशतिः, शतिच्प्रत्ययः, प्रकृतेर्विन्भावः, अनुस्वारश्च। अत्र संघग्रहणमनुवर्तते। तथा च गवां विंशतिरिति भवति। संघ-संघिनोस्तादात्म्यविवक्षायां तु विंशतिर्गाव इति भवति। स्वभावादेकवचनं स्त्रीत्वं च। एवं त्रिंशदादावपि। 'विंशत्याद्याः सदैकत्वे संख्याः संख्येयसङ्ख्ययोः' इति, 'तासु चानवतेः स्त्रियः' इति चामरः। त्रयो दशतः परिमाणमस्य संघस्य त्रिंशत्, शत्प्रत्ययः, प्रकृतेः त्रिन्भावश्च। चत्वारो दशतः परिमाणमस्य संघस्य चत्वारिंशत्, शत्प्रत्ययः। प्रकृतेः चत्वारिन्भावश्च। पञ्च दशतः परिमाणमस्य संघस्य पञ्चाशत्, शत्प्रत्ययः प्रकृतेः पञ्चादेशः। षड् दशतः परिमाणमस्य संघस्य षष्टिः। तिप्रत्ययः प्रकृतेः षष्, जश्त्वाभावश्च। सप्त दशतः मरिमाणमस्य संघस्य सप्ततिः, तिप्रत्ययः, प्रकृतेः सप्तादेशः। अष्टौ दशतः परिमाणमस्य संघस्य अशीतिः, तिप्रत्ययः, प्रकृतेः अशी इत्यादेशः। नव दशतः परिमाणमस्य संघस्य नवतिः, तिप्रत्ययः प्रकृतेः नवादेशः। दश दशतः परिमाणमस्य संघस्य शतम्, तप्रत्ययः प्रकृतेः शादेशश्च। एतत्सर्वं भाष्ये स्पष्टम्। 'एतान्यव्युत्पन्नप्रातिपदिकानि' इति तु भाष्यनिष्कर्षः। **पञ्चद्दशतौ**। पञ्च दश वा परिमाणमस्य वर्गस्येत्यर्थे एतौ निपात्येते इत्यर्थः। **पञ्चद्वर्ग इति**। पञ्च परिमाणमस्येत्यर्थे पञ्चन्शब्दाद् डतिप्रत्ययः। तत्र इकार उच्चारणार्थः। 'टेः' इति टिलोपः। **दशदिति**। दश परिमाणमस्य वर्गस्येति

पङ्क्तिरिति। अस्ति च दशसंख्यायां पङ्क्तिरथ इति, दशरथ इत्यर्थः। अस्ति हि छन्दोविशेषे यस्य पञ्चाक्षराः पञ्चपादाः। तथा च छन्दोविशेषे एवावयवार्थो नान्यत्रेति बोध्यम्। द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः अपदत्वं च। द्वौ दशतौ परिमाणमस्य विंशतिः, अपदत्वनिपातनान्नकारस्यानुस्वारः। केचित्तु विन्भावमुक्त्वा अपदत्वं चेति न पठन्ति। त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः। मतान्तरे तु त्रिंभावः। त्रयो दशतः परिमाणमस्य त्रिंशत्। एवं चतुर्णां चत्वारिं। पञ्चानां पञ्चा। आभ्यामपि शत्प्रत्ययः। षण्णां दशतां षष्, तिश्च प्रत्ययः अपदत्वं च। षड् दशतः परिमाण-मस्याः षष्टिः। ततस्त्रिभ्योऽपि तिप्रत्यय एव। सप्तानां दशतां सप्त, अष्टानां दशा-तामशी, नवानां दशतां नव, दशानां दशतां शभावः तश्च प्रत्ययः। दश दशतः परिमाणमस्य शतम्। **पञ्चद्दशतौ**। इमौ व्युत्पन्नत्वेन निपात्येते वर्गेऽभिधेये। 'तदस्य

---

१ 'तिप्रत्ययः'। 'न लोपः' इति नकारलोपः' इति पाठः क.। २ 'न लोपः' इति पाठः क.।

त्वारिंशतोर्ब्राह्मणे संज्ञायां डण्। (५-१-६२) त्रिंशत्संख्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि। चात्वारिंशानि। १७२८ तदर्हति। (५-१-६३) लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्तात्ठञादयः स्युः। श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। १७२९ छेदादिभ्यो नित्यम्। (५-१-६४) नित्यमाभीक्ष्ण्यम्। छेदं नित्यमर्हति छैदिको वेतसः। छिन्नप्ररूढत्वात्। 'विराग विरङ्गं च' (ग सू

विग्रहः। डति डित्त्वाट्टिलोपः। एतदर्थमेव डित्त्वम्। पक्ष इति। डत्वभावपक्षे 'संख्यायाः—' इति कन्नित्यर्थः। त्रिंशच्चत्वारिंशतोः। तदस्य परिमाणमित्यर्थे परिमाणिनि ब्राह्मणे वाच्ये त्रिंशच्चत्वारिंशद्भ्यां डण् स्यादित्यर्थः। ब्राह्मणं वेदेषु मन्त्रव्यतिरिक्तो भागः। त्रैंशानीति। डित्वात् 'टेः' इति टिलोपः। तदर्हति। अर्हतीत्यस्य योग्यो भवतीत्यर्थे अकर्मकत्वात्तदिति द्वितीया न स्यात्। इष्यते तु द्वितीयान्तादेव प्रत्ययः। तत्राह—लब्धुमिति। श्वैतच्छत्रिक इति। आर्हीयष्ठक्। छेदादिभ्यो नित्यम्। आभीक्ष्ण्यमिति। पौनःपुन्यमित्यर्थः। तन्नित्यमर्हतीत्यर्थे द्वितीयान्तेभ्यः छेदादिभ्यो यथाविहितं प्रत्ययः स्यादित्यर्थः। छैदिको वेतस इति। 'आर्हात्' इति ठक्। 'तदर्हति' इत्येव सिद्धे आभीक्ष्ण्य एवेति नियमार्थमिदं सूत्रम्। वस्तुतस्तु नित्यमिति नाभीक्ष्ण्यार्थकं प्रत्ययार्थकोटिप्रविष्टम्, किंतु अपाक्षिकार्थकं 'समर्थानां प्रथमाद्वा' इति वाग्रहणानुवृत्तिनिवृत्त्यर्थमित्यभिप्रेत्य विग्रहवाक्यस्यापि लोके दर्शनान्नित्यग्रहणं न कर्तव्यमित्युक्तं भाष्ये। एवं च छेदादिभ्यः पाक्षिकप्रत्ययस्य 'तदर्हति' इत्येव सिद्धत्वात् सूत्रमेवेदं नारब्धव्यमिति

परिमाणम्' इत्यनुवर्तत एव। दशदिति। दश परिमाणमस्य। पक्ष इति। वाग्रहणात् 'संख्यायाः—' इति कन्नपि भवतीति भावः। त्रिंशच्चत्वारिंशतोः। व्यत्ययेन पञ्चम्यर्थे षष्ठीद्विवचनम्। 'चत्वारिंशतो ब्राह्मणे' इति पाठे तु समाहारद्वन्द्वात्पञ्चम्येकवचनम्। इह 'ब्राह्मणसंज्ञायाम्' इति षष्ठीसमासेन निर्देष्टुमुचितम्। तथा हि सति ब्राह्मणस्य चेत्संज्ञा' इति स्फुटीभवति। अन्यथ तु यस्य कस्यचित् संज्ञायां ब्राह्मणस्थे च प्रयोगे इत्यनिष्टोऽर्थः सम्भाव्येत। ततश्च मन्त्रे भाषायां च डण् न सिध्येत्। इष्यते च सः। तस्मादिष्टानुरोधेन षष्ठ्यर्थे सप्तमीति व्याख्येयम्। 'ब्राह्मणेऽभिधेये' इति तु काशिकायां व्याख्यातम्। ठञादय इति। ठञ उदाहरणं तु प्रस्थमर्हति प्रास्थिकः द्रौणिक इत्यादूह्यम्। आदिशब्दग्राह्यस्य ठक उदाहरणमाह—श्वैतच्छत्रिक इति। एवं खारीकः। शत्यः। शतिक। साहस्रः। इत्यादीन्युदाहर्तव्यानि। छेदादिभ्यो। नित्यग्रहणमिह 'नित्यं क्रीडाजीविकयोः' इत्यत्रेव महाविभाषया प्राप्तस्य वाक्यस्य निवृत्त्यर्थं न भवति, आरम्भसामर्थ्यादेव तन्निवृत्ति-

११) विरागं नित्यमर्हति वैरङ्गिकः। १७३० शीर्षच्छेदाद्यच्च। (५-१-६५) शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः, शैर्षच्छेदिकः। यद्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते। १७३१ दण्डादिभ्यः[1]। (५-१-६६) एभ्यो यत्स्यात्। दण्डमर्हति दण्ड्यः। अर्घ्यः। वध्यः। १७३२ पात्राद्घंश्च। (५-१-६८) चाद्यत्। तदर्हतीत्यर्थे। पात्रियः, पात्र्यः। १७३३ कडङ्कर-दक्षिणाच्छ च। (५-१-६९) चाद्यत् कडं करोतीति विग्रहेऽत एव निपा-

---

फलति। विराग विरङ्ग चेति। गणसूत्रमिदम्। उक्तेऽर्थे विरागशब्दो विरङ्गादेशं लभत इत्यर्थः। चादार्हीयष्ठक्। शीर्षच्छेदाद्यच्च। चादार्हीयष्ठक्। ननु 'शीर्षञ्छन्दसि' इति छन्दस्येव शिरसः शीर्षादेशविधानात् कथमिह शीर्षादेश इत्यत आह यद्ठकोरिति। दण्डादिभ्यः। यदित्यनुवर्तते तदाह यत्स्यादिति। 'दण्डादिभ्यो यः' इति त्वपपाठः, 'अचो यत्' इति सूत्रभाष्ये तथैव दर्शनात्। अर्घ्य इति। मूल्यं पूजाविधिं वार्हतीत्यर्थः। 'मूल्यं पूजाविधावर्घः' इत्यमरः। वध्य इति। वधमर्हतीत्यर्थः। पात्रात् घंश्च। पात्रियः, पात्र्य इति।

सिद्धेः, किं तु प्रत्ययार्थविशेषणमिति ध्वनयति—छेदं नित्यमर्हतीति। भाष्ये तु नित्यग्रहणं प्रत्याख्यातम्, सूत्रमेव मास्त्विति तदाशय इति मनोरमा। अयं भावः— नित्यग्रहणमिह प्रत्ययार्थविशेषणं न भवति, नित्यं छेदमर्हतीत्यस्यार्थस्यासम्भवात्। न हि कश्चित्पदार्थो नित्यं छेदमर्हति। योऽपि वेतसादिरर्धच्छिन्नः प्ररोहति, सोऽपि न नित्यं छेदमर्हति। कालान्तर एव तस्य छेदप्रवर्तनात्। न चात्र नित्यग्रहणत्यागेऽपि छेदमर्ह-तीत्यादिविग्रहवाक्यनिवृत्तये सूत्रस्यावश्यकत्वात्तत्प्रत्याख्यानं न युज्यत इति शङ्क्यम्, विग्रहवाक्यस्य भाष्यादिसम्मतत्वादिति दिक्। छेद भेद द्रोह दोषेत्यादयश्छेदादयः। गण-सूत्रमाह—विरागेति। दण्डादिभ्यः। पूर्वसूत्राद्यदनुवर्तत इत्याह—यत्स्यादिति। केचित्तु 'दण्डादिभ्यो यः' इति पठन्ति, स चापपाठ एव भाष्यादिविरोधादित्याहुः। तथा हि—'अचो यत्' इति सूत्रे भाष्ये उक्तं 'हनो वा यद् वधादेशश्च' वध्यः, घात्यः। 'तद्धितो वा' वधमर्हति वध्य इति। यदि चेह यद्विधीयेत तदैवैतदुपपद्यते, पक्षद्वयेऽपि 'यतोऽनावः' इत्याद्युदात्तत्वात्। यदि त्वत्र यो विधीयेत तदा स्वरो भिद्येत। मनोरमायां तु 'क्यब्विधौ हनो वा' 'वधस्तद्धितो वा' इति भाष्यम्। यदि चेह यद्विधीयेत, तदैवैतदुपपद्येत। क्यप्याद्युदात्तत्वं यत्यपि तद्धिते 'यतोऽनावः' इत्याद्युदात्तत्वमित्यादि

---

१ अयमेव बालमनोरमातत्त्वबोधिनीसंमतः सूत्रपाठः। अष्टाध्यायी-पुस्तकेषु तु क्वचिद् 'दण्डादिभ्यो यत्' इति, क्वचिच्च 'दण्डादिभ्यो यः' इत्युपलभ्यते।

तनात्खञ् । कडङ्करं माषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः । कडङ्कर्यः । दक्षिणामर्हतीति दक्षिणीयः, दक्षिण्यः । १७३४ **स्थालीबिलात्** । (५-१-७०) स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः, स्थालीबिल्याः । पाकयोग्या इत्यर्थः । १७३५ **यज्ञर्त्विग्भ्यां घखञौ** । (५-१-७१) यथासङ्ख्यं स्तः । यज्ञमृत्विजं चार्हति यज्ञियः, आर्त्विजीनो यजमानः । 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसङ्ख्यानम्' (वा १०५२) । यज्ञियो देशः । आर्त्विजीनः ऋत्विक्

इत्यार्हीयाणां ठगादीनां द्वादशानां पूर्णोऽवधिः ।

पात्रमर्हतीत्यर्थः । **कडङ्करदक्षिणाच्छ च** । 'कड मदे' कडनं कडो मदः 'घयर्थे कविधानम्' इति कः । **खञिति** । तथा च 'खित्यनव्ययस्य' इति मुमिति भावः । कडङ्करं च दक्षिणा चेति समाहारद्वन्द्वात्पञ्चमी । **स्थालीबिलात्** । छयतावनुवर्तेते, 'तदर्हति' इति च । **यज्ञर्त्विग्भ्यां घखञौ** । तदर्हतीत्येव । **यज्ञम् ऋत्विजं चेति** । यज्ञमर्हतीति यज्ञियः, ऋत्विजमर्हतीत्यार्त्विजीन इत्यन्वयः । **तत्कर्मेति** । यज्ञकर्मार्हतीत्यर्थे यज्ञशब्दाद् ऋत्विक्कर्मार्हतीत्यर्थे ऋत्विक्छब्दाच्च यथासङ्ख्यं घखञोरुपसङ्ख्यानमित्यर्थः । **यज्ञियो देश इति** । यज्ञानुष्ठानमर्हतीत्यर्थः । **आर्त्विजीन ऋत्विगिति** । ऋत्विक्कर्तव्यं कर्मार्हतीत्यर्थः । यद्यपि यज्ञर्त्विक्छब्द-योस्तत्कर्मणि लक्षणया सिध्यति । तथाप्यत्र प्रकरणे मुख्यार्थेभ्य एव प्रत्यय इति ज्ञापनार्थमिदम् । **ठगादीनां द्वादशानामिति** । 'प्राग्वतेः' इत्यारभ्य 'तेन क्रीतम्' इत्यतः प्राक् त्रयोदश प्रत्यया अनुक्रान्ताः । तत्र 'प्राग्वतेः' इति ठञं विना आर्हादित्यादिविहितानां ठगादीनां द्वादशानां विधिः पूर्ण इत्यर्थः ।

इति तद्धितेषु प्राग्वतीये आर्हीयाणां ठगादीनां द्वादशानां पूर्णोऽवधिः ।

स्थितम् । **कडङ्करदक्षिणाच्छ च** । 'कडङ्कर' इति पाठस्तु पेक्ष्य इति ध्वनयति **कडं करोतीति** । 'कड मदे' कडतीति कडः । **माषमुद्गादिकाष्ठमिति** । अमरश्चाह 'कडङ्करो बुसं क्लीबे' इति । **गौरिति** । 'नीवारपाकादि कडङ्करीयैः' इति रघुः । **स्थालीबिलात्** । छयतावनुवर्तेते । अस्माच्छयतौ स्तः । ठकोऽपवादः । **पाक-योग्या इति** । त्रिफलीकृता इति यावत् । **यज्ञमृत्विजं चार्हतीति** । अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्त इत्यर्थः । देशस्यानेवंविधत्वादुपसंख्यानम्— **यज्ञियो देश इति** । यज्ञानुष्ठाने योग्य इत्यर्थः । **ऋत्विगिति** । स तु ऋत्वि-क्कर्मार्हति, न तु ऋत्विजमिति सूत्रेण खञोऽप्राप्तावुपसंख्यानम् । आर्हीयाणां ठगादीनां द्वादशानां गतोऽवधिः ।

इति तत्त्वबोधिन्यामार्हीयप्रकरणम् ।

अथ ठञधिकारे कालाधिकारप्रकरणम्। ३४।

अतः परं ठञेव । १७३६ पारायणतुरायणचान्द्रायणं वर्तयति । (५-१-७२) पारायणं वर्तयति पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः । तं वर्तयति तौरायणिको यजमानः । चान्द्रायणिकः । १७३७ संशयमापन्नः । (५-१-७३) संशयविषयीभूतोऽर्थः सांशयिकः । १७३८ योजनं गच्छति। (५-१-७४) यौजनिकः। 'क्रोशशतयोजनशतयोरुपसंख्यानम्' (वा ३०२२) क्रोशशतं गच्छति क्रौशशतिकः । यौजनशतिकः । 'ततोऽभिगमनमर्हतीति च वक्तव्यम्' (वा ३०२३)। क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः ।

अथ तद्धितेषु प्राग्वतीये ठञधिकारे कालाधिकारो निरूप्यते—अतः परं ठञेवेति । आर्हीयेष्वर्थेषु प्राग्वतीयठञपवादा आर्हीयाष्ठगादयः । आर्हीयार्थेषु निरूपितेषु तत ऊर्ध्वं ठगादिप्रत्ययानाम् अनुवृत्तेरसंभवात् प्राग्वतीयः ठञेवानुवर्तत इत्यर्थः । पारायण । द्वितीयान्तेभ्यः पारायणादिशब्देभ्यो वर्तयतीत्यर्थे ठञ् स्यादित्यर्थः । पारायणं वर्तयतीति । पारायणं वेदाध्ययनम् । तद्वर्तयति आवर्तयतीत्यर्थः । पारायणिकः छात्र इति । गुरौ त्वध्येतरि नायं प्रत्ययः, अनभिधानादिति भावः । तौरायणिको यजमान इति । ऋत्विजि नायं प्रत्ययः, अनभिधानादिति भावः । चान्द्रायणिक इति । चन्द्रायणं वर्तयतीत्यर्थः । चान्द्रायणं कृच्छ्रविशेषः । संशयमापन्नः । अस्मिन्नर्थे संशयशब्दाद् द्वितीयान्ताट्ठक् स्यादित्यर्थः । अत्र आपन्न इति कर्तरि क्तः । विषयतया प्राप्त इत्यर्थ उपसर्गवशात् । संशयविषयीभूतोऽर्थ इति । तेन समवायेन संशयाधारे संदेग्धरि नायं प्रत्यय इति भावः । अमरस्तु 'सांशयिकः संशयापन्नमानसः' इत्याह । योजनं गच्छति । द्वितीयान्ताद्योजनशब्दाद् गच्छतीत्यर्थे ठञ् स्यादित्यर्थः । क्रोशशतेति । आभ्यामपि द्वितीयान्ताभ्यां गच्छतीत्यर्थे ठञ उपसङ्ख्यानमि-

---

पारायण । आदित आरभ्य आन्तादविच्छेदेन वेदस्याध्ययनं पारायणम् । तच्च गुरुणा शिष्येण वा निर्वर्त्यते, अन्यतरासंनिधौ अध्ययनक्रियाया अनिष्पादनात् । तथापि शिष्ये एव प्रत्यय इष्यते न तु गुराविल्याकरे स्थितम् । तदाह—छात्र इति। यजमान इति । यद्यपि पुरोडाशादिनिर्वर्तनेन ऋत्विगपि यज्ञं वर्तयति, तथापि तत्र तौरायणिक इति न प्रयुज्यते, अनभिधानादिति भावः । चान्द्रायणं व्रतविशेषः । विषयीभूतोऽर्थ इति । 'स्थाणुर्वा पुरुषो वा' इति संशयविषयीभूते स्थाणवादावेव प्रत्यय इष्यते, न तु संदेग्धरीति भावः । कथं तर्हि 'सांशयिकः संशयापन्नमानसः'

यौजनशतिक आचार्यः। १७३९ पथः ष्कन्। (५-१-७५) पो कीषर्थः। पन्थानं गच्छति पथिकः। पथिकी। १७४० पन्थो ण नित्यम्। (५-१-७६) पन्थानं नित्यं गच्छति। पान्थः, पान्था। १७४१ उत्तरपथेनाहृतं च। (५-१-७७) उत्तरपथेनाहृतमौत्तरपथिकम्। उत्तरपथेन गच्छति। औत्तरपथिकः। 'आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानम्' (वा १०२७)। वारिपथिकम्। १७४२ कालात्। (५-१-७८) 'प्रग्वतेष्ठञ्' (सू १७६१) इत्यतः प्रागधिकारोऽयम्। १७४३ तेन निर्वृत्तम्। (५-१-७९)

त्यर्थः। क्रोशशतादिति। ल्यब्लोपे पञ्चमी। क्रोशशतमतीत्येत्यर्थः। पथः ष्कन्। पथः ष्कन् इति छेदः। द्वितीयान्तात् पथिन्शब्दाद् गच्छतीत्यर्थे ष्कन् स्यादित्यर्थः। पन्थो ण नित्यम्। पथ इत्यनुवर्तते गच्छतीति च। नित्यमिति गच्छतीत्यत्रान्वितं प्रत्ययार्थप्रविष्टमेव। नतु विधानान्वितं सत् महाविभाषानिवृत्त्यर्थम्। द्वितीयान्तात् पथिन्शब्दाद् नित्यं गच्छतीत्यर्थे णप्रत्ययः स्यात् प्रकृतेः पन्थादेशश्चेत्यर्थः। भाष्ये तु नित्यग्रहणं प्रत्याख्यातम्। उत्तरपथेनाहृतं च। उत्तरपथशब्दात् तृतीयान्ताद् आहृतमित्यर्थे गच्छतीत्यर्थे च ठञ् स्यादित्यर्थः। वारिजङ्गलेति। वारि, जङ्गल, स्थल, कान्तार एतत्पूर्वात पथिन्शब्दात् तृतीयान्ताद् आहृतमिति गच्छतीति चार्थे ठञित्यर्थः। वारिपथेन गच्छति आहृतं वेत्यर्थः। जाङ्गलपथिकः, स्थालपथिकः। कान्तारपथिकः। कालात्। इत्यतः प्रागिति। व्याख्यानादिति भावः। तेन निर्वृत्तम्। तृतीयान्तान्निर्वृत्तमित्यर्थे ठञ्

इत्यमर इति चेत्। अत्राहुः—संशयापन्नं मानसं यस्मिन्विषये स विषयः संशयापन्नमानस इति। ततोऽभिगमनमिति। अत्र पञ्चम्यन्तात्प्रत्ययः। पन्थो ण। पथः पन्थ इत्ययमादेशः स्याद् णश्च प्रत्ययः। नित्यग्रहणमिह प्रत्ययार्थविशेषणम्, न तु वाक्यनिवृत्त्यर्थमित्याशयेनाह—नित्यं गच्छतीति। नित्यमिति किम्, पथिकः। भाष्ये तु नित्यग्रहणं प्रत्याख्यातम्। अयं हि भाष्याशयः—नित्यं पन्थानं गच्छतीत्यर्थोऽत्र यद्यपि सम्भवति, तथापि नात्रैवार्थे पान्थशब्दस्य प्रयोग इष्यते। कदाचिद् गच्छत्यपि तत्प्रयोगात्। न चैवमपि विग्रहवाक्यनिवृत्त्यर्थं नित्यग्रहणमस्त्विति शङ्क्यम्। शिष्टप्रयोगे विग्रहवाक्यस्य दर्शनादिति। उत्तरपथेन। चकारेण गच्छतीति प्रत्ययार्थः समुच्चीयते। तदाह—उत्तरपथेन गच्छतीति। वारिपथिकमिति। वारिपथेन गच्छतीति वारिपथेनाहृतमिति वा विग्रहः। कालात्। स्वरूपग्रहणमिह न भवति, 'तमधीष्टो भृतो भूतो भावी' इत्यत्यन्तसंयोगे द्वितीयानिर्देशात्। 'मासाद्वयसि—' इत्यादौ मासादीनां कालेन विशेषणाच्च। तेन निर्वृत्तम्। तृतीयान्तात्कालवाचिनष्ठञ्

अह्ना निर्वृत्तम् आह्निकम्। **१७४४ तमधीष्टो भृतो भूतो भावी।** (५-१-८०) अधीष्टः सत्कृत्य व्यापारितः। भृतो वेतनेन क्रीतः। भूतः स्वसत्तया व्याप्तकालः। भावी तादृश एवानागतकालः। मासमधीष्टो मासिकोऽध्यापकः। मासं भृतः। मासिकः कर्मकरः। मासं भूतो मासिको व्याधिः। मासं भावी मासिक उत्सवः। **१७४५ मासाद्वयसि यत्खञौ।** (५-१-८१) मासं भूतो मास्यः, मासीनः। **१७४६ द्विगोर्यप्।** (५-१-८२) 'मासाद्वयसि' इत्यनुवर्तते। द्वौ मासौ भूतो द्विमास्यः। **१७४७ षण्मासाण्ण्यच्च।** (५-१-८३) 'वयसि' इत्येव। यबप्यनुवर्तते, चाट्ठञ्। षण्मास्यः, षाण्मास्यः, षाण्मासिकः। **१७४८ अवयसि ठंश्च।** (५-१-८४) चाण्ण्यत्। षण्मासिको व्याधिः, षाण्मास्यः।

स्यादित्यर्थः। **आह्निकमिति।** 'अह्नष्टखोरेव' इति नियमान्न टिलोपः। **तमधीष्टो।** द्वितीयान्ताद् अधीष्टादिष्वर्थेषु ठञ् स्यादित्यर्थः। **व्यापारित इति।** प्रेरित इत्यर्थः। **तादृश एवेति।** स्वसत्तया व्याप्यमानकाल इत्यर्थः। मासमधीष्ट इत्यादौ 'कालाध्वनोः—' इति द्वितीया। **मासाद्वयसि।** अत्र भूत इत्येवानुवर्तते, व्याख्यानात्। मासशब्दाद् द्वितीयान्ताद् भूत इत्यर्थे यत्खञौ स्तः वयसि गम्य इत्यर्थः। **द्विगोर्यप्। अनुवर्तत इति।** मासान्ताद् द्विगोर्भूत इत्यर्थे यप् स्याद्वयसि गम्य इत्यर्थः। **षण्मासाण्ण्यच्च। वयसीत्येवेति।** षण्मासशब्दाद् भूत इत्यर्थे ण्यच्च स्याद्वयसि गम्य इत्यर्थः। अत्र चकारात्संनिहितस्य यपोऽनुकर्षणे ण्यद्यपावेव स्याताम्, नतु ठञपि। इष्यते तु ठञपि। तत्राह—**यबप्यनुवर्तत इति।** स्वरितत्वादिति भावः। तर्हि चकारः किमर्थ इत्यत आह—**चाट्ठञिति।** तथा च ण्यत् यप् ठञिति त्रयः प्रत्ययाः फलिताः। **अवयसि ठंश्च।**

स्यात्। तेनेति करणे तृतीया। चतुर्थ्यन्तर्गते 'तेन निर्वृत्तम्' इत्यत्र तु कर्तरि तृतीयेति विशेषः। उभयत्राप्यन्तर्भावितण्यर्थाद् वृतेः कर्मणि क्तः। **आह्निकमिति।** 'अह्नष्टखोरेव' इति नियमाद् 'नस्तद्धिते' इति टिलोपो न। **मासाद्वयसि।** खञो ञित्करणं स्वरार्थं पुंवद्भावप्रतिषेधार्थं च। मासीनाभार्यः। अधीष्टानां चतुर्णामधिकारेऽपि सामर्थ्याद् भूत इत्येतदत्र सम्बध्यते। न हि मासमधीष्टो भृतो वेत्याद्युक्तौ काचित्काल-कृता शरीरावस्था गम्यत इत्याशयेनाह—**मासं भूत इति।** एतच्च वृत्तिपदमञ्जर्योः स्पष्टम्। **मासीन इति।** बालकः। **द्विगोर्यप्।** प्राग्वतेः संख्यापूर्वपदानां तदन्त-विधेरभ्युपगमात्पूर्वेण यत्खञोः प्राप्तयोर्यप् विधीयते। पित्त्वादनुदात्तः। तेन 'द्विमास्यः' इत्यादौ 'इगन्तकाल-' इत्यादिना पूर्वपदप्रकृतिस्वरो न तिष्ठते। 'यः' इत्युक्ते तु प्रत्यय-स्योदात्तत्वादन्तोदात्तो द्विमास्यः स्यात्, सति शिष्टस्वरबलीयस्त्वादिति भावः।

१७४९ समायाः खः। (५-१-८५) समामधीष्टो भृतो भूतो भावी वा समीनः। **१७५० द्विगोर्वा।** (५-१-८६) 'समायाः खः' इत्येव। 'तेन परिजय्य–' (सू १७५७) इत्यतः प्राङ् निर्वृत्तादिषु पञ्चस्वर्थेषु प्रत्ययाः। द्विसमीनः, द्वैसमिकः। **१७५१ राज्यहःसंवत्सराच्च।** (५-१-८७) 'द्विगोः' इत्येव। द्विरात्रीणः, द्वैरात्रिकः। द्व्यहीनः, द्वैयह्निकः। समासान्त-

षण्मासशब्दाद् द्वितीयान्ताद् भृते अवयसि ठन् च स्यादित्यर्थः। **समायाः खः।** मण्डूकप्लुत्या 'तमधीष्टो भृतो भूतो भावी' इति कृत्स्नमेव सूत्रमनुवर्तते। समाशब्दाद् द्वितीयान्ताद् अधीष्टादिष्वर्थेषु खः स्यादित्यर्थः। **द्विगोर्वा। समायाः ख इत्येवेति।** तथा च समान्ताद् द्विगोर्द्वितीयान्तात् खो वा स्यात् पक्षे ठञिति फलितम्। 'अप्सुमनःसमासिकतावर्षाणां बहुत्वं च' इति लिङ्गानुशासनसूत्रम्। 'हायनोऽस्त्री शरत्समाः' इत्यमरः। 'समां समां विजायते' इति सूत्रादेकवचनमप्यस्ति। **पञ्चस्विति।** तेन निर्वृत्तम् तमधीष्टो भृतो भूतो भावीति पञ्चस्वित्यर्थः। एषां यथायोगमन्वयः। **द्वैसमिक इति।** खाभावे प्राग्वतीयष्ठञ्। **राज्यहः। द्विगोरित्येवेति।** रात्रि, अहन्, संवत्सर एतदन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु खो वा स्यादित्यर्थः। पक्षे ठञ्। **द्विरात्रीण इति।** द्वाभ्यां रात्रिभ्यां निर्वृत्तः द्वे रात्री अधीष्टो भृतो भूतो भावी वेत्यर्थः। एवमग्रेऽपि यथायोगं ज्ञेयम्। **द्व्यहीन इति।** द्वाभ्यां अहोभ्यां निर्वृत्तो द्वे अहनी अधीष्ट इत्यादिष्वर्थेषु 'तद्धितार्थ–' इति द्विगोः खः, 'अह्नष्टखोः–' इति टिलोपः। समाहार-द्विगोस्तु न खः, टचि कृते अहन्शब्दाभावात्। **द्वैयह्निक इति।** 'अह्नष्टखोरेव' इति नियमाद् न टिलोपः। किंत्वल्लोपः अह्नादेशो वा। 'न य्वाभ्याम्–' इत्यच्। ननु द्व्यहीन इत्यत्र 'तद्धितार्थ–' इति द्विगुसमासे कृते 'राज्यहः संवत्सराच्च' इति खं बाधित्वा परत्वाद् 'राजाहःसखिभ्यः–' इति टचि 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशे तस्य स्थानिवत्त्वेनाहन्शब्दत्वेऽपि टजन्तस्य तदभावाद् 'राज्यहःसंवत्सराच्च' इति

यद्यप्यनुवर्तत इति। व्याख्यानमेवात्र शरणम्। **समायाः खः।** 'हायनोऽस्त्री शरत्समाः' इत्यमरः। **समामधीष्ट इत्यादि।** अधीष्टादयश्चत्वारोऽर्था अत्राप्यनुवर्तन्त इति भावः। **द्विगोर्वा।** 'संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इत्यभ्युपगमात्पूर्वेण नित्ये प्राप्ते विकल्पः। **द्वैसमिक इति।** खेन मुक्ते पक्षे ठञिति भावः। **द्वैयह्निक इति।** 'टखोरेव' इति नियमादिह टिलोपो न। 'अल्लोपोऽनः' 'न य्वाभ्याम्–' इत्यैच्। ननु 'तद्धितार्थ–' इति द्विगुसमासानन्तरं 'राज्यहःसंवत्सराच्च' इत्येवं बाधित्वा परत्वाट्टचा भाव्यम्, न च महाविभाषया टचो विकल्प इति वाच्यम्।

विधेरनित्यत्वान्न टच् । द्विसंवत्सरीणः । **१७५२ सङ्ख्यायाः संवत्सरसङ्ख्यस्य च ।** (७-३-१५) सङ्ख्याया उत्तरपदस्य वृद्धिः स्याद् ञिदादौ । द्विसांवत्सरिकः । द्वे षष्टी भृतो द्विषाष्टिकः । 'परिमाणान्तस्य' इत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम् । तेन द्वैसमिक इत्युत्तरपदवृद्धिर्न । **१७५३ वर्षाल्लुक्च ।** (५-१-८८) वर्षशब्दान्ताद् द्विगोर्वा खः । पक्षे ठञ् वा च लुक् । त्रीणि रूपाणि । द्विवर्षीणो व्याधिः, द्विवार्षिकः, द्विवर्षः । **१७५४ वर्षस्याभविष्यति ।** (७-३-१६) उत्तरपदस्य वृद्धिः स्यात् । द्विवार्षिकः ।

खप्रत्ययो न स्यात् । कृतेऽपि खप्रत्यये द्व्यह्नीन इति स्यादित्यत आह—**समासान्तविधेरनित्यत्वान्न टजिति ।** एवं च टजभावे सति नाह्नादेशः, समासान्ते पर एव तद्विधानादिति भावः । 'समासान्तविधिरनित्यः' इति षष्ठाध्यायस्य द्वितीये पादे 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' इति सूत्रभाष्ये स्पष्टम् । अथ संवत्सरान्तस्य खे उदाहरति—**द्विसंवत्सरीण इति ।** ठञि त्वादिवृद्धौ प्राप्तायाम् । **सङ्ख्यायाः संवत्सर ।** आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकार इदं सूत्रम् । संवत्सरश्च सङ्ख्या चेति समाहारद्वन्द्वात् षष्ठी । **संख्याया उत्तरपदस्येति ।** संख्यायाः परस्य संवत्सरसंख्यस्योत्तरपदस्येत्यर्थः । नन्वत्र संवत्सरग्रहणं व्यर्थम्, संवत्सरस्य द्वादशमासपरिमाणतया 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्येव सिद्धेरित्यत आह—**परिमाणान्तस्येत्येवेति । वर्षाल्लुक् च । वा लुगिति ।** खठञोरिति शेषः । **द्विवर्षीण इति ।** खे रूपम् । **द्विवर्ष इति ।** खठञोर्लुकि रूपम् । ठञि आदिवृद्धौ प्राप्तायाम् । **वर्षस्याभविष्यति ।** आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम् । शेषपूरणेन तद्व्याचष्टे—**उत्तरपदस्य वृद्धिः स्यादिति ।** अभविष्यति यो ञिदादिः तस्मिन्परे इत्यर्थः । निर्वृत्तादिषु पञ्चस्वर्थेषु भविष्यदर्थं वर्जयित्वा तदितरेषु

'बृहतीआत्यन्ताः समासान्ताश्च' इति नित्येषु परिगणनादत आह—**समासान्तविधेरिति ।** यद्यपि टचि कृतेऽप्यह्नादेशेन 'द्वैयह्निकः' इति रूपं सिध्यति, तथापि 'द्व्यहीनः' इति हि रूपं न सिध्यति, टचि सत्यह्नादेशे तस्य स्थानिवत्त्वात्, 'राजाहः—' इति समासान्तस्याहःशब्दान्तसमासग्रहणेनैव ग्रहणाच्च 'रात्र्यहःसंवत्सराच्च' इति खप्रत्यये कृतेऽपि द्व्यह्नीन इति रूपप्रसङ्गादित्याहुः । **उत्तरपदवृद्धिर्नेति ।** एतच्चोपलक्षणम् । द्विवर्षा इत्यत्र 'द्विगोः' इति ङीब्न भवति । परिमाणपर्युदासेन पर्युदासाभावाद् 'अपरिमाणबिस्ताचित—' इतीह निषेधप्रवृत्तेः । द्विवर्षे भृते सति 'तमधीष्टः—' इति ठञ् 'वर्षाल्लुक्च' इति लुक् । **वर्षा ।** 'चित्तवति नित्यम्' इति नित्यलुको वक्ष्यमाणत्वादचित्तवानिह प्रत्ययार्थ इति प्रत्युदाहरति—**द्विवर्षीणो व्याधिरिति ।**

भविष्यति तु द्वैवर्षिकः। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न । गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। 'परिमाणान्तस्यासंज्ञाशाणयोः' (सू १८८३)। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। द्विनैष्किकम्। 'असंज्ञा' इति किम्-पञ्च कलापाः परिमाणमस्य पाञ्चकलापिकम् । तद्धितान्तः संज्ञा। द्वैशाणम् । कुलिजशब्दमपि केचित्पठन्ति । द्वैकुलिजिकः । १७५५ **चित्तवति नित्यम्** । (५-१-८९) वर्षशब्दान्ताद् द्विगोः प्रत्ययस्य नित्यं लुक्स्याच्चेतने प्रत्ययार्थे । द्विवर्षो दारकः । १७५६ **षष्टिकाः षष्टिरात्रेण पच्यन्ते** । (५-१-९०) बहुवचनमतन्त्रम् । षष्टिको धान्यविशेषः । तृतीयान्तात्कन् रात्रशब्दलोपश्च निपात्यते। १७५७ **तेन परिजय्यलभ्यकार्यसुकरम्**। (५-१-९३) मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः।

चतुर्ध्वर्थेषु यस्तद्धितः तस्मिन् परे इति यावत्। **द्विवार्षिक इति**। द्वाभ्यां वर्षाभ्यां निर्वृत्तो द्वे वर्षे अधीष्टो भृतो वेत्यर्थः। अत्यन्तसंयोगे द्वितीया । **द्वैवर्षिक इति** व्याधिरिति शेषः। चित्तवति नित्यलुको वक्ष्यमाणत्वात्। नन्वेव सति द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति द्विवार्षिक इत्यत्र कथमुत्तरपदवृद्धिः। भविष्यत्त्वस्य प्रतीतेरित्याशङ्क्याह—**अधीष्टभृतयोरभविष्यतीति प्रतिषेधो नेति**। कुत इत्यत आह—**गम्यते हि तत्र भविष्यत्तेति**। अध्येषणाभरणयोः क्तप्रत्ययेन भूतत्वमेव शब्दशक्त्या गम्यते। तद्धितप्रत्ययेन च तथाविधाध्येषणभरणकर्मीभूतौ प्रतीयेते। एवंविधाध्येषणभरणविशिष्टयोस्तु भविष्यता कर्माचरणेन सम्बन्धः कर्म करिष्यतीत्यनेनावगत इति न स तद्धितार्थः। एवं च तत्रापि भविष्यदर्थकतद्धितपरकत्वाभावात् स्यादेवोत्तरपदवृद्धिरित्यर्थः। **द्विवार्षिको मनुष्य इति**। 'चित्तवति नित्यम्' इति वक्ष्यमाणस्तु नित्यलुग् न भवति, चित्तवतीत्येवारम्भसामर्थ्याद् नित्यत्वे सिद्धे पुनर्नित्यग्रहणेन भूत एवार्थे नित्यं लुगित्यभ्युपगमादिति हरदत्तः। केचित्तु द्विवार्षिकः अमनुष्य इति छिन्दन्ति । **चित्तवति नित्यम्। प्रत्ययस्येति** । खस्य ठञश्चेत्यर्थः। दारकः बालकः। **षष्टिकाः। तृतीयान्तादिति**। षष्टिरात्रशब्दादिति शेषः। **तेन परिजय्य**। निर्वृत्तादयः पञ्चार्था निवृत्ताः। तेन परिजय्यम्, तेन लभ्यम्, तेन कार्यम्, तेन सुकरम् इत्यर्थेषु

द्विवार्षिको मनुष्य इति। अत्र वदन्ति—मनुष्ये 'चित्तवति-' इति नित्यलुक्प्रसङ्गाद् 'मनुष्यो मनुष्यसदृशः प्रतिमादिः' इति व्याख्याय स्थितस्य गतिः समर्थनीयेति। **दारक इति**। बालकः। 'परिजय्यः' इत्यस्य विवरणं 'जेतुं शक्यः' इति।

मासेन लभ्यं कार्यं सुकरं वा मासिकम्। १७५८ तदस्य ब्रह्मचर्यम्। (५-१-९४) द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात्। अत्यन्तसंयोगे द्वितीया। मासं ब्रह्मचर्यमस्य स मासिको ब्रह्मचारी। आर्धमासिकः। यद्वा प्रथमान्तादस्येत्यर्थे प्रत्ययः। मासोऽस्येति मासिकं ब्रह्मचर्यम्। 'महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्' (वा ३०६४) महानाम्न्यो नाम 'विदामघवन्–' इत्याद्या ऋचः। तासां ब्रह्मचर्यमस्य माहानाम्निकः। हरदत्तस्तु 'भस्याढे–' इति पुंवद्भावान्माहानामिक इत्याह। 'चतुर्मासाण्ण्यो यज्ञे तत्र भव इत्यर्थे' (वा ३०६६)। चतुर्षु मासेषु भवन्ति चातुर्मास्यानि यज्ञकर्माणि। 'अण् संज्ञायाम्' (वा ३०७०)। चतुर्षु मासेषु भवति चातुर्मासी आषाढी

तृतीयान्ताट्ठञित्यर्थः। परिजय्य इत्यस्य विवरणम् जेतुं शक्य इति। **तदस्य ब्रह्मचर्यम्**। ननु द्वितीयान्तादिति कथम्। सूत्रे ब्रह्मचर्यविशेषणस्य तच्छब्दस्य प्रथमान्तत्वादित्यत आह—**अत्यन्तेति**। तथा च कालविशेषाभिव्याप्तं ब्रह्मचर्यमस्येत्यर्थे कालात्प्रत्ययः। इदमर्थं प्रति ब्रह्मचर्यं विशेषणम्। **मासिको ब्रह्मचारीति**। मासाभिव्याप्तब्रह्मचर्यवानित्यर्थः। **आर्धमासिक इति**। 'अर्धात्परिमाणस्य' इत्युभयपदवृद्धिः। अत्र इदंशब्दार्थस्य ब्रह्मचारिणः प्राधान्यम्। मासाभिव्याप्तं ब्रह्मचर्यं तु तद्विशेषणमिति स्थितिः। **यद्वेति**। सूत्रे तदिति प्रथमान्तम्। ब्रह्मचर्यमिति षष्ठ्यर्थे प्रथमा। तथा च प्रथमान्तात्कालवाचिनः अस्य ब्रह्मचर्यस्येत्यर्थे ठञित्यर्थः फलति। तदाह—**प्रथमान्तादिति**। कालवाचिन इति शेषः। **अस्येत्यर्थ इति**। अस्य ब्रह्मचर्यस्येत्यर्थ इत्यर्थः। मासोऽस्येत्यनन्तरं ब्रह्मचर्यस्येति शेषः। अस्मिन्पक्षे ब्रह्मचर्यमेव प्रत्ययार्थत्वात्प्रधानम्। इदमर्थस्तु तद्विशेषणमिति बोध्यम्। **उपसंख्यानमिति**। अस्य ब्रह्मचर्यमित्यर्थे ठञ इति शेषः। **माहानाम्निक इति**। महानाम्नीशब्दस्य ऋग्विशेषेषु रूढस्य नित्यस्त्रीलिङ्गत्वाद् भाषितपुंस्कत्वाभावाद् 'भस्याढे–' इति पुंवत्त्वं नेति भावः। **हरदत्तस्त्विति**। माहानाम्निकमित्येव भाष्ये उदाहृतत्वादिदमुपेक्ष्यमिति भावः। **चतुर्मासाण्ण्यो यज्ञे तत्र भव इति**। वार्तिकमिदम्। तत्र भवो यज्ञ इत्यर्थे

'क्षय्यजय्यौ शक्यार्थे' इत्ययादेशः। **महानाम्न्यो नामेति**। तथा चाभाषितपुंस्कत्वात्पुंवद्भावो नेति भावः। **हरदत्तस्त्विति**। यौगिकोऽयम्, न तु रूढ इति मन्यते। **माहानामिक इति**। पुंवद्भावे कृते 'नस्तद्धिते' इति टिलोप इति। **चतुर्मासादिति**। मासशब्दस्य कालवाचित्वात्कालाधिकारे वार्तिकारम्भः। न च विशिष्टस्य कालवाचित्वाभावादिह संगतिर्दुर्निरूपेति शङ्क्यम्। 'प्राग्वतेः संख्यापूर्व-

पौर्णमासी। अण्यन्तत्वान्ङीप्। **१७५९ तस्य च दक्षिणा यज्ञाख्येभ्यः (५-१-९५)** द्वादशाहस्य दक्षिणा द्वादशाहिकी। आख्याग्रहणादकालादपि। आग्निष्टोमिकी। वाजपेयिकी। **१७६० तत्र च दीयते कार्यं भववत्। (५-१-९६)** प्रावृषि दीयते कार्यं वा प्रावृषेण्यम्। शारदम्।

इति तद्धितेषु प्राग्वतीये ठञधिकारे कालाद् इत्यधिकारः सम्पूर्णः।

चतुर्मासशब्दात्सप्तम्यन्तादण्यो वाच्य इत्यर्थः। **चतुर्ष्विति**। चतुर्षु मासेषु अतीते-ष्वित्यर्थः। **अण् संज्ञायामिति**। वार्तिकमिदम्। चतुर्मासशब्दाद् भवार्थे अण् वाच्यः संज्ञायामित्यर्थः। **चतुर्ष्विति**। फाल्गुनीं पौर्णमासीमारभ्य चतुर्षु मासेष्वतीतेष्वित्यर्थः। **आषाढीति**। आषाढ्याः पौर्णमास्याः चातुर्मासीति संज्ञेति भावः। नन्व 'तत्र भवः' इत्यणेव सिद्धमिति वाच्यम्, 'द्विगोर्लुगनपत्ये' इति लुङ्नि-वृत्त्यर्थत्वात्। **तस्य च दक्षिणा**। तस्य दक्षिणेत्यर्थे यज्ञकालवृत्तिभ्यः ठञ् स्यादि-त्यर्थः। **द्वादशाहस्येति**। द्वादशदिनसाध्यसुत्याकः क्रतुर्द्वादशाहः। तस्येत्यर्थः। कालोपसर्जनक्रतुवाचित्वादयमपि कालवृत्तिरिति भावः। 'कालात्' इत्यधिकारसूत्रे हि यथाकथञ्चित्कालबोधकस्य ग्रहणमिति 'तदस्य परिमाणम्' इति सूत्रे भाष्ये स्पष्टम्। नन्वेवं सति अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकीत्यत्र ठञ् न स्यात्। अग्निष्टोमशब्दस्य कथञ्चिदपि कालवाचित्वाभावादित्यत आह—**आख्याग्रहणा-दकालादपीति**। अन्यथा यज्ञेभ्य इत्येव सिद्धे आख्याग्रहणवैयर्थ्यादिति भावः। वस्तुतस्तु यज्ञेभ्य इत्येवोक्तौ कालादित्यधिकाराद् द्वादशाहादिशब्देभ्य एव स्यात्, नतु अग्निष्टोमादिशब्देभ्यः। आख्याग्रहणे तु अग्निष्टोमादिभ्यो द्वादशाहादिशब्दे-भ्यश्च सर्वेभ्यो यज्ञवाचिभ्य इति भाष्ये स्पष्टम्। **तत्र च दीयते**। तत्र दीयते तत्र कार्यमित्यर्थयोः सप्तम्यन्तात्कालवाचिनो भववत्प्रत्ययाः स्युरित्यर्थः। **प्रावृ-षेण्यमिति**। 'प्रावृष एण्यः' इति भवार्थे विहितम् इहापि भवति। **शारदमिति**।

पदानां तदन्तग्रहणम्' इत्यभ्युपगमादस्यैव संगतिरिति। **संज्ञायामणिति**। 'तत्र भवः' इत्यनेनैव सिद्धे पुनरण्विधिः 'द्विगोर्लुगनपत्ये' इति लुग्मा भूदित्येतदर्थ-मिदमत्रारब्धम्। एवं चास्मिन् वार्तिके 'चतुर्मासात्' इत्यस्यानुवृत्तये पूर्ववार्तिकमत्रै-वारब्धमित्यपि ज्ञेयम्। **चातुर्मासीति**। कस्य संज्ञेत्याकाङ्क्षायामाह—**आषाढीति**। आषाढानक्षत्रयुक्ता पौर्णमासीत्यर्थः। **तस्य च दक्षिणा**। षष्ठ्यन्तेभ्यो यज्ञाख्येभ्यो दक्षिणेत्यस्मिन्नर्थे ठञ् स्यात्। कालाधिकारादेवेह द्वादशाहादिभ्य सिद्धे आख्याग्रहण-व्यर्थमित्याशङ्क्य परिहरति—**आख्याग्रहणादिति**। **तत्र च**। कालवाचिनः सप्तम्यन्ताद्दीयते कार्यमित्येतयोरर्थयोर्भववत्प्रत्ययः स्यात्। **प्रावृषेण्यमिति**।

अथ तद्धितेषु ठञ्विधिप्रकरणम् । ३५ ।

१७६१ व्युष्टादिभ्योऽण् । (५-१-९७) व्युष्टे दीयते कार्यं वा वैयुष्टम् । व्युष्ट तीर्थ संग्राम प्रवास इत्यादि । ['अग्निपदादिभ्य उपसंख्यानम्' (वा ३०७२) अग्निपदे दीयते कार्यं वा आग्निपदम् । पैलुमूलम् ।] १७६२ तेन यथाकथाचहस्ताभ्यां णयतौ । (५-१ ९८) यथाकथाचेत्यव्ययसङ्घातात्तृतीयान्ताद्धस्तशब्दाच्च यथासंख्यं णयतौ स्तः । 'अर्थाभ्यां तु यथासंख्यं नेष्यते' । यथाकथा च दीयते कार्यं वा याथाकथाचम् । अनादरेण देयं कार्यं वेत्यर्थः । हस्तेन दीयते कार्यं वा हस्त्यम् । १७६३ सम्पादिनि । (५-१-९९) 'तेन' इत्येव । कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखम् । कर्णालङ्काराभ्यामवश्यं शोभत इत्यर्थः । १७६४ कर्मवेषाद्यत् । (५-१-१००)

शरदि दीयते कार्यं वेत्यर्थः । सन्धिवेलाद्यण् भवे विहित इहापि भवति । इदं वृत्त्यनुरोधेन । वस्तुतस्तु तत्र कार्यं दीयत इत्यर्थे यज्ञाख्येभ्यो भववत्प्रत्ययाः स्युरित्यर्थः । अग्निष्टोमे दीयते भक्तम् आग्निष्टोमिकम् । कार्यग्रहणादग्निष्टोमे दीयते हिरण्यमित्यत्र न भवति । न ह्यग्निष्टोमे हिरण्यं क्रियत इति भाष्ये स्पष्टम् ।

इति तद्धितेषु प्राग्वतीये ठञधिकारे कालाद् इत्यधिकारः संपूर्णः ।

अथ ठञ्विधिर्निरूप्यते । **व्युष्टादिभ्योऽण्** । 'तत्र च दीयते कार्यम्' इत्यनुवर्तते । दीयते कार्यं वेत्यर्थे सप्तम्यन्तेभ्यो व्युष्टादिभ्यः अण् स्यात् । ठञोऽपवादः । व्युष्टं प्रभातम् । **वैयुष्टमिति** । अणि 'न य्वाभ्याम्–' इत्यैच् । **तेन यथा** । **अर्थाभ्यामिति** । प्रकृत्योः प्रत्यययोश्च यथासंख्यम्, नतु दीयते कार्यमित्यर्थयोरित्यर्थः, व्याख्यानादिति भावः । **संपादिनि** । **तेनेत्येवेति** । संपादः संपत्तिः शोभा अस्यास्तीति संपादी । तस्मिन्नर्थे तृतीयान्ताट्ठगित्यर्थः । **कर्मवेषाद्यत्** । तृतीयान्तात्कर्मन्शब्दाद् वेषशब्दाच्च । संपादिन्यर्थे

'प्रावृष एण्यः' इति भवार्थे विहितः स इहाप्यतिदिश्यत इति भावः । **शारदमिति** । 'संधिवेलाद्यृतुनक्षत्रेभ्योऽण्' ।

इति तत्त्वबोधिन्यां कालिकप्रकरणम् ।

व्युष्टादिभ्योऽण् । व्युष्टशब्दः कालवाची दिवसमुखे वर्तते । **संपादिनि** । गुणोत्कर्षः संपत्तिः । 'आवश्यके णिनिः' इति वृत्तिकृत् । एवं वक्ष्युगेन संपादि

---

१ बन्धनीभूतः पाठः कौमुदीपुस्तकेषु प्रायेण न दृश्यते, टीकाकृता च न व्याख्यातः । क्वचित्तु मूलपुस्तकेषु दृश्यते स केनापि काशिकाया उद्धृत इत्यनुमीयते ।

कर्मणा सम्पादि कर्मण्यं शौर्यम् । वेषेण सम्पादी वेष्यो नटः । वेषः कृत्रिम आकारः। १७६५ तस्मै प्रभवति सन्तापादिभ्यः। (५-१-१०१) सन्तापाय प्रभवति सान्तापिकः। साङ्ग्रामिकः। १७६६ योगाद्यच्च। (५-१-१०२) चाट्ठञ्। योगाय प्रभवति योग्यः, यौगिकः। १७६७ कर्मण उकञ्। (५-१-१०३) कर्मणे प्रभवति कार्मुकम्। १७६८ समयस्तदस्य प्राप्तम्। (५-१-१०४) समयः प्राप्तोऽस्य सामयिकम्। १७६९ ऋतोरण्। (५-१-१०५) ऋतुः प्राप्तोऽस्य आर्तवम्। ['उपवस्त्रादिभ्य उपसंख्यानम्'। उपवस्ता प्राप्तोऽस्य औपवस्त्रम्। प्राशिता प्राप्तोऽस्य प्राशित्रम्।] १७७० कालाद्यत्। (५-१-१०७) कालः प्राप्तोऽस्य काल्यं शीतम्। १७७१ प्रकृष्टे ठञ्। (५-१-१०८) 'कालात्' इत्येव। 'तदस्य' इति च। प्रकृष्टो दीर्घः कालोऽस्येति कालिकं वैरम्। १७७२ प्रयोजनम्। (५-१-१०९) 'तदस्य' इत्येव। इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम्। प्रयोजनं फलं कारणं च।

यत्स्यादित्यर्थः । **तस्मै प्रभवति** । चतुर्थ्यन्तेभ्यः संतापादिभ्यः प्रभवतीत्यर्थे ठञ् स्यादित्यर्थः। **संतापाय प्रभवतीति** । शत्रूणां पीडायै शक्नोतीत्यर्थः। **योगाद्यच्च** । चतुर्थ्यन्तात्प्रभवतीत्यर्थे इति शेषः। **कर्मण उकञ्** । चतुर्थ्यन्तात्प्रभवतीत्यर्थे इति शेषः। **कार्मुकमिति** । उकञि टिलोपः । **समयस्तदस्य** । तदिति प्राप्तमिति च सामान्ये नपुंसकम्। समयः प्राप्तोऽस्येत्यर्थे प्रथमान्तात्समयशब्दात् ठञित्यर्थः। तदित्युत्तरार्थम्। **ऋतोरण्** । 'प्राप्तम्' इत्येव। प्राप्तोऽस्येत्यर्थे प्रथमान्ताद् ऋतोरणित्यर्थः। **आर्तवमिति** । अणि ओर्गुणः, आदिवृद्धिः, रपरत्वम्। **कालाद्यत्** । 'तदस्य प्राप्तम्' इत्येव । प्रथमान्तात्कालशब्दाद् अस्य प्राप्त इत्यर्थे यदित्यर्थः। प्रातःकाले काल्यशब्दस्तु कल्यवदव्युत्पन्नं प्रातिपदिकम्। कल्यमेव काल्यं वा। **प्रकृष्टे ठञ्** । अस्य प्राप्त इत्यर्थे प्रकृष्टवृत्तेः कालशब्दात् ठञित्यर्थः । यतोऽपवादः। प्रकृष्टशब्दस्य विवरणं-दीर्घ इति । **प्रयोजनम्** । **तदस्येत्येवेति** । अस्य प्रयोजनमित्यर्थे प्रथमान्ताट्ठञित्यर्थः। **इन्द्रमह इति** । इन्द्रोत्सव इत्यर्थः।

वाक्युगिकं शरीरमित्यप्युदाहार्यम् । वक्युगेन अवश्यं शोभत इत्यर्थः । **तस्मै प्रभवति** । समर्थः शक्तः प्रभवतीत्युच्यते। **आर्तवमिति** । पुष्पमित्यादि विशेष्यं बोध्यम्। **काल्यं शीतमिति** । 'प्रत्यूषोऽहर्मुखं कल्यम्' इत्यमरः। तत्र प्रातःकाले काल्यशब्दस्य व्युत्पत्त्यन्तरं मृग्यम्। **प्रकृष्टे ठञ्** । प्रकृष्यते अयमिति प्रकृष्टः। कर्मणि क्तः। तेन च प्रकर्षेण कालो विशेष्यत इत्याह—**दीर्घः काल इति** । ठञ्-

---

१ अत्रापि बन्धनीभूतः पाठः पूर्वपृष्ठवदेव।

१७७२ विशाखाषाढादण् मन्थदण्डयोः । (५-१-११०) आभ्यामण् स्यात्प्रयोजनमित्यर्थे क्रमान्मन्थदण्डयोरर्थयोः । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः । 'चूडादिभ्य उपसंख्यानम्' । चूडा—चौडम् । श्रद्धा—श्राद्धम् । **१७७४ अनुप्रवचनादिभ्यश्छः ।** (५-१-१११) अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम् । **१७७५ समापनात्सपूर्वपदात् ।** (५-१-११२) व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयः । **१७७६ ऐकागारिकट् चौरे ।** (५-१-११३) एकमसहायमगारं प्रयोजनमस्य

'मह उद्धव उत्सवः' इत्यमरः । **प्रयोजनं फलं कारणं चेति ।** प्रयुज्यते प्रवृत्त्या निष्पाद्यत इति कर्मणि ल्युटि प्रयोजनशब्दः फलवाची । प्रयुज्यते प्रवर्तते पुरुषोऽनेनेति करणे ल्युटि प्रयोजनशब्दः प्रवर्तकवाचीत्यर्थः । **विशाखाषाढात् ।** विशाखाशब्दाद् आषाढशब्दाच्च प्रथमान्ताद् अस्य प्रयोजनमित्यर्थे अण् स्यात्, समुदायेन मन्थे दण्डे च क्रमाद् गम्ये सतीत्यर्थः, तदाह—**आभ्यामिति ।** स्थूणामेकां निखाय तस्यां रज्जुद्वयमधरोत्तरमासज्ज्य तयोः रज्ज्वोर्मन्थनदण्ड ऊर्ध्वमासज्यते । येन रज्ज्वा भ्रामितेन दधि विलोड्यत इति स्थितिः । तत्र स्थूणा मन्थ इत्युच्यते । मन्थानाख्यदण्डो दण्ड उच्यते । अनयोः वैशाखशब्द आषाढशब्दश्च रूढौ । तत्रावयवार्थाभिनिवेशो न कर्तव्यः । **चूडादिभ्य इति ।** चूडादिभ्यः प्रथमान्तेभ्यः अस्य प्रयोजनमित्यर्थे अणित्यर्थः । **चौडमिति ।** चूडा प्रयोजनमस्येति विग्रहः । डलयोरभेदाच्चौलमित्यपि । **श्रद्धा श्राद्धमिति ।** श्रद्धा प्रयोजनमस्येति विग्रहः । श्रद्धाशब्दादणि श्राद्धमित्यर्थः । अत्र प्रयोजनशब्दः कारणवाची । श्रद्धाहेतुकमिति यावत् । **अनुप्रवचनादिभ्यश्छः ।** प्रथमान्तादनुप्रवचनादिशब्दादस्य प्रयोजनमित्यर्थे छः स्यादित्यर्थः । अनुप्रवचनं नाम उपनयनाङ्गं किञ्चित्कर्म आश्वलायनसूत्रे प्रसिद्धम् । **समापनात्सपूर्वपदात् ।** सपूर्वपदात्समापनशब्दाद् अस्य प्रयोजनमित्यर्थे छः स्यादित्यर्थः । **व्याकरणसमापनीय इति ।** मङ्गलाचार इति शेषः । **ऐकागारिकट् चौरे ।** एकमगारं प्रयोजनं

ग्रहणं विस्पष्टार्थम् । अन्यथा अनन्तरस्य यतोऽनुवृत्तिराशङ्क्येत । **इन्द्रमह इति ।** मह उत्सवः । **वैशाखो मन्थः । आषाढो दण्ड इति ।** वैशाखाषाढशब्दौ रूढिरूपेण मन्थदण्डयोर्वर्तेते । तयोस्तु यथाकथंचिद्व्युत्पत्तिः क्रियत इति हरदत्तः । विलोडनदण्डस्यैवाधारभूतः काष्ठविशेषो मन्थ इत्युच्यते । **अनुप्रवचना ।** अनुप्रवचनं नाम ब्रह्मौदनमुच्यते । **सपूर्वपदादिति ।** विद्यमानपूर्वपदादित्यर्थः । **ऐकागारिकट् ।** टो ङीबर्थः । ऐकागारिकी । किमर्थमिदमुच्यते, यावता 'प्रयो-

मुमुषिषोः स ऐकागारिकश्चौरः । १७७७ आकालिकडाद्यन्तवचने । (५-१-११४) समानकालावाद्यन्तौ यस्येत्याकालिकः । समानकालस्याकाल आदेशः । आशु विनाशीत्यर्थः । पूर्वदिने मध्याह्नादावुत्पद्य दिनान्तरे तत्रैव नश्वर इति वा । 'आकालाट्ठंश्च' (वा ३०७८)। आकालिका विद्युत् ।

इति तद्धितेषु प्राग्वतीयस्य ठञः पूर्णोऽवधिः ।

प्रयोजकमस्य चोरस्येति विग्रह एकागारशब्दादिकट्प्रत्यये ऐकागारिकट् इति निपात्यते । टित्त्वं ङीबर्थम् । प्रयोजनमित्येव सिद्धे चोर एवेति नियमार्थं सूत्रम् । एकमित्यस्य विवरणम्—असहायमिति । 'एके मुख्यान्यकेवलाः' इत्यमरः । **मुमुषिषोरिति** । चौर्यं कर्तुमिच्छोरित्यर्थः । चोरस्य हि असहायमगारमिष्टं गेहान्तरसत्त्वे चौर्यप्रकटनप्रसङ्गादिति भावः । चोरे किम् ? एकागारं प्रयोजनमस्य भिक्षोरिति वाक्यमेव । भाष्ये तु 'एकागाराच्चोरे' इत्येव सुवचम् । प्रकृतत्वाट्ठञ् सिद्ध इत्युक्तम् । **आकालिकट्** । समानकालाविति बहुव्रीहिः । **आद्यन्ताविति** । उत्पत्तिविनाशावित्यर्थः । **समानकालस्येति** । समानकालशब्दस्य इकप्रत्यये परे आकालादेशो निपात्यत इत्यर्थः । ननु उत्पत्तिविनाशयोरेककालिकत्वमसंभवपराहतमित्यत आह—**आशु विनाशीति** । लक्षणां विनैवाह—**पूर्वदिन इति** । **आकालाट्ठंश्चेति** । आकालशब्दादाद्यन्तवचनाट्ठन्प्रत्ययश्च वक्तव्य इत्यर्थः । चात् ठञ् । **आकालिका विद्युदिति** । ठनि टाप् । ठञि तु ङीप्, आकालिकी । अर्थः प्राग्वत् ।

इति तद्धितेषु प्राग्वतीयस्य ठञः पूर्णोऽवधिः ।

जनम्' इत्येव ठञि सिद्धम् । सत्यम्, चौरे नियमार्थमावश्यकमिदं सूत्रम् । अन्यथा एकागारं प्रयोजनं यस्य भिक्षोरित्यत्रापि स्यात् । नन्वेवमपि 'एकागाराच्चौरे' इति ठञेव नियम्यताम्, किमैकागारिक इति निपातनेन टित्करणेन च प्रयोजनमिति चेत् । अत्राहुः—टकारः कार्यविधारणार्थः । ङीबेव भवति न चित्स्वर इति । वृद्धिस्तु निपातनाद्भवत्येवेति । **आकाल आदेश इति** । निपात्यत इति शेषः । **आद्यन्तौ यस्येत्यादि** । अस्येत्यधिकारात्षष्ठ्यर्थे इकट् प्रत्ययो निपात्यत इति भावः । **आकालाट्ठंश्चेति** । वार्तिकमिदम् ।

इति तत्त्वबोधिन्यां ठञधिकारप्रकरणम् ।

अथ तद्धितेषु भावकर्मार्थाः । ३६ ।

१७७८ **तेन तुल्यं क्रिया चेद्वतिः** । (५-१-११५) ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । 'क्रिया चेत्' इति किम्-गुणतुल्ये मा भूत्, पुत्रेण तुल्यः स्थूलः । १७७९ **तत्र तस्येव** । (५-१-११६) मथुरायामिव मथुरावत्स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य भावः । १७८० **तदर्हम्** । (५-१-११७)

अथ भावकर्मार्थो निरूप्यन्ते । **तेन तुल्यं क्रिया चेद्वतिः** । तुल्यमिति क्रियेत्यस्य विशेषणम् । सामान्याभिप्रायं नपुंसकम् । तृतीयान्तात्तुल्यमित्यर्थे वतिप्रत्ययः स्यात् । यत्तुल्यं सा चेत् क्रियेत्यर्थः । तुल्या क्रियेत्यर्थे वतिः स्यादिति यावत् । **ब्राह्मणेन तुल्यं ब्राह्मणवदधीत इति** । अत्र ब्राह्मणवदित्युदाहरणम् । ब्राह्मणेन तुल्यमधीते इति विग्रहवाक्यम् । अत्र ब्राह्मणशब्देन ब्राह्मणकर्तृकाध्ययनं लक्ष्यते । ब्राह्मणकर्तृकाध्ययनतुल्यं क्षत्रियकर्तृकाध्ययनमिति बोधः । **गुणतुल्य इति** । द्रव्यतुल्येऽपीति बोध्यम् । तेन चैत्रेण तुल्यो धनी देवदत्त इत्यादौ न भवति । 'अयमेवं न तद्वत्' इत्यादौ वतेः साधुत्वार्थम् आहेति क्रियापदं प्रयुञ्जते वृद्धाः । **तत्र तस्येव** । तत्रेवेति तस्येवेति चार्थे सप्तम्यन्तात् षष्ठ्यन्ताच्च वतिः स्यादित्यर्थः । अतृतीयान्तार्थ आरम्भः । अस्मादेव निर्देशादिवशब्दयोगे षष्ठ्यर्थे सप्तम्यपीति भाष्यम् । अत्र क्रिया चेदिति नानुवर्तत इत्यभिप्रेत्योदाहरति— **मथुरायामिव मथुरावत्स्रुघ्ने प्राकार इति** । अत्र मथुरायामिवेति नाधिकरणसप्तमी । तथा सति विद्यमानेति क्रियापदसापेक्षतया असामर्थ्यात् । अत एव अस्मादेव सूत्रनिर्देशादिवशब्दयोगे षष्ठ्यर्थे सप्तमीति भाष्यं संगच्छते । मथुरासंबन्धिप्राकार-

---

तेन तुल्यं क्रिया चेद्वतिः । तुल्यमिति सामान्ये नपुंसकम् । तृतीयान्तात्तुल्यमित्यर्थे वतिः स्याद्यत्तुल्यं क्रिया चेत्सा । **ब्राह्मणेन तुल्यमिति** । 'नन्वत्र ब्राह्मणो यथा वर्तते तथा क्षत्रियादिकर्तृकाध्ययनं वर्तते' इति वाक्यार्थोऽसंगत इति चेत् । अत्राहुः—ब्राह्मणशब्दस्तत्कर्तृकाध्ययने लक्षणया वर्तते । 'ब्राह्मणकर्तृकाध्ययन तुल्याध्ययनं वाक्यार्थः' इति न कोऽपि दोषः । **गुणतुल्य इति** । उपलक्षणमिदम् । अक्रियातुल्य इत्यर्थः । एवं च 'ब्राह्मणेन सदृशः क्षत्रियः' इत्यर्थे 'ब्राह्मणवत् क्षत्रियः' इति प्रयोगोऽसाधुरेव । अतएव 'पर्वतो वह्निमान् महानसवत्' इति वाक्ये 'महानससदृशः पर्वतः' इत्यर्थे वतेरसाधुत्वं मत्वा तस्य वतेः साधुत्वरक्षणार्थं 'पर्वतो वह्निमान् भवितुमर्हति' इत्यादि क्रियापदं प्रयुञ्जते वृद्धाः । **तत्र तस्येव** । सप्तम्यन्तात् षष्ठ्यन्ताच्च इवार्थे प्रत्ययः । 'क्रिया चेत्'

विधिमर्हति विधिवत्पूज्यते। क्रियाग्रहणं मण्डूकप्लुत्या अनुवर्तते। तेनेह न—राजानमर्हति छत्रम्। **१७८१ तस्य भावस्त्वतलौ।** (५-१-११९) प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वम्, गोता। 'त्वान्तं क्लीबम्' (लि १२०)

सदृशः सन्नस्य प्राकार इति बोधः। **मैत्रस्य भाव इति।** वृत्तमित्यर्थः। **तदर्हम्।** अर्हतीत्यर्हम्। पचाद्यच्। 'तत्' इति कर्मणि द्वितीयान्तम्। लब्धुं योग्यं भवतीत्यर्थात्। कृद्योगलक्षणषष्ठ्यभावस्तु आर्षः। 'वतिः' इत्यनुवर्तते। द्वितीयान्तादर्हतीत्यर्थे वतिः स्यादित्यर्थः। **विधिमर्हतीति।** विधिं लब्धुं योग्यं भवतीत्यर्थः। **विधिवत्पूज्यत इति।** हरिरिति शेषः। विधिं लब्धु योग्यं हरिपूजनमित्यर्थः। विहितं प्रकारमनतिक्रान्तमिति यावत्। **मण्डूकप्लुत्येति।** पूर्वसूत्रे अननुवृत्तेरिति भावः। **तस्य भावः।** षष्ठ्यन्ताद्भाव इत्यर्थे त्वतलौ स्त इत्यर्थः। भावशब्दस्य अभिप्रायादावपि वृत्तेराह—**प्रकृतिजन्यबोधे प्रकारो भाव इति।** त्वतल्प्रत्ययौ यत उत्पत्स्येते तस्मात्प्रकृतिभूतशब्दाद् व्यक्तिबोधे जायमाने यज्जात्यादिकं विशेषणतया भासते तद्व्यक्तिविशेषणं भावशब्देन विवक्षितमित्यर्थः। यथा—गोशब्दाद्धि व्यक्तिबोधे जायमाने गोत्वं विशेषणत्वेन भासते, गोशब्दस्य गोत्ववतीषु व्यक्तिषु गोत्वे च शक्तिग्रहणात्। न हि गोत्वं विहाय गोव्यक्तिषु गोशब्दस्य शक्तिग्रहः संभवति, अतीतानागतानां वर्तमानानां चानन्तत्वेन युगपदुपस्थित्यसंभवात्, गोशब्दात् प्राणित्वपशुत्वादिरूपेणापि गोव्यक्तिप्रतीत्यापत्तेश्च। ततश्च सर्वासु गोव्यक्तिष्वनुगतं तदितरव्यक्तिभ्यो व्यावृत्तं कञ्चिद्धर्मविशेषं शक्यतावच्छेदकं पुरस्कृत्य गोशब्दः प्रवर्तत इति सिद्धान्तः। एवं घटादिशब्दा अपि घटत्वादितत्तद्धर्मं पुरस्कृत्य प्रवर्तन्ते।

इति नानुवर्तते इति द्रव्यादितुल्ये वत्प्रत्ययो भवति। **मथुरावत्स्रुघ्न इति।** मथुरायां यादृशः प्राकारः तेन तुल्यः प्राकारः स्रुघ्ने इत्यर्थः। **तदर्हम्।** अर्हतीत्यर्हं पचाद्यच्। यद्यपि कृद्योगे कर्मणि षष्ठ्या भवितव्यम्, तथापि अत्र सौत्रो विभक्तिव्यत्यय इत्येके। 'कर्तृकर्मणोः–' इति षष्ठ्या अनित्यत्वज्ञापकमिदम्। तेन च 'धार्यैरामोदमुत्तमम्' इति भट्टिप्रयोगः संगच्छत इति तु कारकेष्ववोचाम। द्वितीयान्तादेव प्रत्यय इति स्फुटीकर्तुं तिङन्तेन विगृह्णाति—**विधिमर्हतीति।** कथं तर्हि 'ततो यथावद्विहिताध्वराय' इति, असत्त्वार्थकस्य कर्मत्वासंभवेन द्वितीयान्तत्वाभावादिति चेत्। अत्राहुः—यथाशब्दो वृत्तिविषये सत्त्वार्थकः, तथात्वमित्यादिषु त्वतलादिदर्शनाद्। अन्यथा षष्ठ्यपि नास्तीति त्वतलौ न स्याताम्। तथा च द्वितीयान्ताद्यथाशब्दादर्हार्थे वतिः, योग्यतामर्हतीति विधानमित्यर्थात् क्रियायोगोऽपि सुलभ इति। **तस्य भावस्त्वतलौ। प्रकृतीति।** न तु यः कश्चिद्धर्मः, घटत्व-

'तलन्तं स्त्रियाम्' (लि १७)। १७८२ आ च त्वात् । (५-१-१२०)
'ब्रह्मणस्त्वः–' इत्यतः प्राक्त्वतलावधिक्रियेते । अपवादैः सह समावेशार्थम्। गुण-वचनादिभ्यः कर्मणि विधानार्थं चेदम्। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । स्त्रिया भावः स्त्रैणम्, स्त्रीत्वम्, स्त्रीता । पौंस्नम्, पुंस्त्वम्, पुंस्ता । १७८३ न

तदिदं शब्दप्रवृत्तिनिमित्तं भावशब्देन विवक्षितमिति भाष्यकैयटयोः स्थितम्। **गोर्भाव इति** । गोशब्दस्य प्रवृत्तिनिमित्तमिति बोधः । **त्वान्तं क्लीबं तलन्तं स्त्रियाम् इति** । लिङ्गानुशासनसूत्रसिद्धमिदम् । **आ च त्वात्** । 'त्वतलौ' इत्यनुवर्तते । आङ्मर्यादायाम्, तदाह **ब्रह्मणस्त्व इत्यतः प्रागिति** । ननु 'तस्य भावस्त्वतलौ इत्यतः त्वतलोरुत्तरसूत्रेष्वनुवृत्त्यैव सिद्धेरधिकारोऽयं व्यर्थ इत्यत आह **अपवादैरिति** । 'पृथ्वादिभ्य इमनिज्वा' इत्यादिविहितैरिमनिजादिभिरपवादैः समुच्चयार्थमित्यर्थः । असति त्वेतस्मिन्नधिकारसूत्रे उत्तरत्र इमनिजादिविधिषु त्वतलोरनुपस्थितिः स्यात् । प्रत्यक्षनिर्दिष्टैरिमनिजादिविशेषैः शान्ताकाङ्क्षत्वात् । अन्यथा 'प्राग्दीव्यतोऽण्' इत्यधिकृतस्य अणः 'अत इञ्' इत्यादावपि प्रवृत्तिः स्यादिति भावः । प्रयोजनान्तरमाह **गुणवचनादिभ्य इति** । अन्यथा भावेऽर्थे सावकाशयोस्त्वतलोः कर्मण्यर्थे गुणवचनादिभ्यो विशेषविहितेन ष्यञा बाधप्रसङ्ग इति भावः । नन्वेवमपि आत्वादित्येवास्तु, स्वरितत्वादेव पूर्वसूत्रादिह त्वतलोरनुवृत्तिसिद्धेस्तदनुकर्षार्थश्चकारो व्यर्थ इत्यत आह—**चकार इति** । अन्यथा त्वतलौ स्त्रीपुंसाभ्यां न स्याताम्, अन्यत्र तयोः सावकाशत्वादिति भावः । **पौंस्नमिति** । संयोगान्तलोपे 'पुमः खय्यम्परे' इति रुत्वम् । पाक्षिकावनुनासिकानुस्वारौ, विसर्गे कृते सत्वम्। एवं पुंस्त्वम् । तत्र 'ह्रस्वात्तादौ–' इति षत्वं तु न भवति, सवनादिषु

मित्यत्र द्रव्यत्वपृथिवीत्वादेरभानात् । **गोर्भाव इति** । इह गोशब्दोऽर्थपरः, शब्दस्वरूपपरो वेति पक्षद्वयम् । यदार्थपरः, तदा धर्मविशेषः प्रत्ययार्थः, स च धर्मत्वेनैव भासते । प्रकृतिजन्येत्यादिस्तु प्रयोगोपाधिः । यदा तु शब्दपरस्तदा तज्जन्यबोधप्रकारः प्रत्ययार्थः, । स च धर्मविशेष एव । पाचकत्वमित्यत्र तु कर्तृत्वरूपसम्बन्धः प्रकारः । पच्यमानत्वमित्यत्र तु कर्मत्वरूपसम्बन्धः । तथा औपगवत्वमित्यत्र जन्यत्वरूपसम्बन्धः प्रकारः । राजपुरुषत्वमित्यत्र तु स्वत्वरूपसम्बन्ध इत्याद्यूह्यम् । एवं स्थिते हरिटीकायां यदुक्तं 'कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेन' इति, तत्र नापूर्वं शक्त्यन्तरं कल्प्यम् । उक्तरीत्यैव तत्राप्युपपत्तेरिति संक्षेपः । **अपवादैः सहेति** । 'पृथ्वादिभ्य इमनिज्वा' इत्यादिभिः । **चकार इति** । अन्यथा त्वतलौ स्त्रीपुंसाभ्यां न स्याताम्, अन्यत्र तयोः सावकाशत्वादिति भावः । **पौंस्नं पुंस्त्वमिति** । संयोगान्तलोपे 'पुमः

नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः। (५-१-१२१) इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा। अपतित्वम्। अपटुत्वम्। नञ्पूर्वात् किम्-बार्हस्पत्यम्। तत्पुरुषात् किम्-नास्य पटवः सन्तीत्यपटुः, तस्य भाव आपटवम्। अचतुर इति किम्-आचतुर्यम्। आसङ्गत्यम्। आलवण्यम्। आवट्यम्। आयुध्यम्। आकत्यम्। आरस्यम्। आलस्यम्।

१७८४ **पृथ्वादिभ्य इमनिज्वा। (५-१-१२२)** वावचनमणादिसमा-

पाठात्। **न नञ्पूर्वात्। इतः परमिति।** त्वतलिवधेरूर्ध्वमित्यर्थः, 'नञ्पूर्वाद् इत्युत्तरस्य प्रतिषेधः' इति भाष्यादिति भावः। **चतुरादीनिति**। चतुर, संगत, लवण, वट, युध, कत, रस, लस एतान् वर्जयित्वेत्यर्थः। **अपतित्वमिति**। इह 'पत्यन्तपुरोहितादिभ्यः' इति यक् न भवति। **अपटुत्वमिति**। इह 'इगन्ताच्च लघुपूर्वात्' इत्यण् न भवति। **बार्हस्पत्यमिति**। 'पत्यन्तपुरोहितादिभ्यः' इति यक्। **आपटवमिति**। 'इगन्ताच्च लघुपूर्वात्' इत्यण्। अपटुशब्दस्य बहुव्रीहित्वात्तत्पुरुषत्वाभावान्नास्याणो निषेध इति भावः। **आचतुर्यमिति**। अचतुरस्य भावः, ब्राह्मणादित्वात्ष्यञ्। **आसंगत्यमिति**। असंगतशब्दात् ष्यञ्। **आलवण्यमिति**। अलवणशब्दात् ष्यञ्। **आवट्यमिति**। न वटः अवटः, तस्मात् ष्यञ्। **आयुध्यमिति**। अयुधशब्दात् ष्यञ् **आकत्यमिति**। अकतशब्दात् ष्यञ्। **आरस्यमिति**। अरसशब्दात् ष्यञ्। **आलस्यमिति**। लसतीति लसः, न लसः अलसः, तस्मात् ष्यञ्। **पृथ्वादिभ्य इमनिज्वा**। 'तस्य भावः' इत्यनुवर्तते। पृथ्वादिभ्यः षष्ठ्यन्तेभ्यो भावे इमनिज् वा स्यादित्यर्थः। ननु 'वा' ग्रहणं व्यर्थम्, 'समर्थानां प्रथमाद्वा' इति महाविभाषयैव वाक्यस्य सिद्धत्वात्। नच इमनिजभावे त्वतलप्रत्ययार्थं वाग्रहणमिति वाच्यम्, आ च त्वादित्येव तत्समावेशसिद्धेरित्यत आह—**वावचनमणादिसमावेशार्थमिति**। पृथुमृदुप्रभृतिषु 'इगन्ताच्च लघुपूर्वात्' इत्यणः, चण्डखण्डादिषु गुणवचनलक्षणष्यञः, बालवत्सादिषु वयोवचनलक्षणस्य अञश्च औत्सर्गिकस्य समावेशार्थमित्यर्थः। अन्यथा महाविभाषावशाद् 'अपवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते' इति 'पारे मध्ये

खयि-' इति रुत्वम्। पाक्षिकावनुनासिकानुस्वारौ, विसर्गे कृते सत्वम्। **अपतित्वमिति**। इह 'पत्यन्त-' इति यग् न भवति। **अपटुत्वमिति**। इह तु 'इगन्ताच्च लघुपूर्वात्' इत्यण् न भवति। **आचतुर्यमित्यादि**। ब्राह्मणादित्वात् ष्यञ्। **पृथ्वादिभ्यः। अणादीति**। इगन्तलघुपूर्वेषु पृथुमृदुप्रभृतिष्वणः समावेशः। चण्डखण्डादिषु गुणवचनेषु ष्यञः। बालवत्सादिषु वयोवचनलक्षणस्याञ

वेशार्थम्। १७८५ र ऋतो हलादेर्लघोः । (६-४-१६१) हलादेर्लघो-र्ऋकारस्य रः स्याद् इष्ठेमेयस्सु। १७८६ टेः। (६-४-१५५) भस्य टेर्लोपः स्यादिष्ठेमेयस्सु। पृथोर्भावः प्रथिमा, पार्थवम्। म्रदिमा, मार्दवम्। १७८७ वर्णदृढादिभ्यः ष्यञ्च। (५-१-१२३) चादिमनिच्। शौक्ल्यम्, शुक्लिमा। दार्ढ्यम्। 'पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्' (वा ४२११)। द्रढिमा। षो ङीषर्थः। औचिती। याथाकामी। १७८८ गुणवचनब्राह्मणादिभ्यः

षष्ठ्या वा' इति सूत्रभाष्ये सिद्धान्तितत्वादिमनिच्त्वतलामभावे तेषां प्रवृत्तिर्न स्यादिति भावः। **र ऋतो हलादेः**। र इति प्रथमान्तम्। इष्ठेमेयस्स्विति शेषपूरणम्। 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः। 'अङ्गस्य' इत्यधिकृतं हलादेरङ्गस्य लघोः ऋकारस्य र इति रेफाकारसंघात आदेशः स्याद् इष्ठनि इमनि ईयसि च परे इत्यर्थः। **टेः**। 'इष्ठेमेयस्सु' इत्यनुवर्तते। 'अल्लोपोऽनः' इत्यतो लोप इति च, तदाह **टेर्लोपः स्यादिष्ठेमेयस्स्विति**। **प्रथिमेति**। पृथुशब्दादिमनिच्, चकार इत्, नकारादिकार उच्चारणार्थः। ऋकारस्य रः, उकारस्य गुणं बाधित्वा टेर्लोपः। **पार्थवमिति**। इमनिजभावे 'इगन्ताच्च लघुपूर्वात्' इत्यण्। **म्रदिमेति**। मृदुशब्दादिमनिचि ऋकारस्य रः, 'टेः' इति टिलोपश्च। **मार्दवमिति**। 'इगन्ताच्च–' इत्यण्। **वर्णदृढादिभ्यः ष्यञ्च**। षष्ठ्यन्तेभ्यो वर्णवाचिभ्यो दृढादिभ्यश्च भावे ष्यञ् च स्यादित्यर्थः। गुणवचनत्वादेव ष्यञि सिद्धे इमनिच्समुच्चयार्थं वचनम्। 'पृथुं मृदुं भृशं चैव कृशं च दृढमेव च। परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत्' इति वार्तिकमर्थतः सङ्गृह्णाति **पृथुमृदुभृशेत्यादि**। तेन कृतयतीत्यादाविष्ठवत्त्वेऽपि रभावो न। **द्रढिमेति**। दृढशब्दादिमनिचि ऋकारस्य रः। भ्रशिमा क्रशिमा द्रढिमा परिव्रढिमा। ननु वर्ण-दृढादीनां ष्यञन्तानां लोकतो नपुंसकत्वात् ष्यञः षित्त्वस्य किं प्रयोजनमित्यत आह **षो ङीषर्थ इति**। **औचितीति**। उचितशब्दाद् ब्राह्मणादित्वात् ष्यञि लोकात् स्त्रीत्वम्। षित्त्वाद् ङीषि 'हलस्तद्धितस्य' इति यलोपः। उचितस्तु न दृढादिः, तद्गणे अदर्शनाद् इमनिच्प्रसङ्गाच्च। अस्यैव ष्यञ उत्तरसूत्रे अनुवृत्तेरिहैव तस्य

इति बोध्यम्। त्वतलौ तु पूर्वसूत्रेणैव लब्धौ। **र ऋतो**। हलादेः किम्, ऋजिष्ठः। ऋजीयान्, लघोः किम्, कृष्णिमा। 'पृथुमृदुभृश–' इति परिगणने तु 'हलादेर्लघोः' इति त्यक्तुं शक्यम्। **वर्णदृढादिभ्यः**। गुणवचनत्वादेव सिद्धे इमनिजर्थं वचनम्। 'पृथुमृदुभृश–' इति परिगणनादिह रभावो न भवति। कृतमाचष्टे कृतयति। णाविष्ठ-वद्भावः। **औचितीति**। ब्राह्मणादेराकृतिगणत्वात् ष्यञ्। 'हलस्तद्धितस्य' इति

कर्मणि च। (५-१-१२४) चाद्भावे। जडस्य कर्म भावो वा जाड्यम्। मूढस्य भावः कर्म वा मौढ्यम्। ब्राह्मण्यम्। 'अर्हतो नुम् च' (वा ३०१२) अर्हतो भावः कर्म वा आर्हन्त्यम्, आर्हन्ती। ब्राह्मणादिराकृतिगणः। १७८६ **यथातथायथापुरयोः पर्यायेण।** (७-३-३१) नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ञिदादौ। अयथातथाभाव आयथातथ्यम्, अयाथा-

---

षित्वप्रयोजनकथनमिति बोध्यम्। **याथाकामीति।** काममनतिक्रम्य यथाकामम्। ततः स्वार्थे चतुर्वर्णादित्वात् ष्यञि लोकात् स्त्रीत्वं षित्वाद् ङीष्। **गुणवचन।** गुणोपसर्जनद्रव्यवाचिभ्यो ब्राह्मणादिभ्यश्च षष्ठ्यन्तेभ्यो भावे कर्मणि च अर्थे ष्यञित्यर्थः। **अर्हतो नुम्चेति।** वार्तिकमिदम्। 'अर्हः प्रशंसायाम्' इति सूत्रेण शतरि अर्हच्छब्दः पूज्यवाचीति कैयटः। अर्हच्छब्दात् ष्यञ् स्यात्प्रकृतेर्नुम् चेत्यर्थः। मित्वादन्त्यादचः परः। अनुस्वारपरसवर्णौ। लोकाद् नपुंसकत्वं स्त्रीत्वं च। तदाह **आर्हन्त्यमार्हन्तीति।** आर्हन्त्यशब्दाद् ङीषि 'हलस्तद्धितस्य' इति यलोपः। यथातथेति निपातसमुदायः। यथापुरमिति पुराशब्देन पदार्थानतिवृत्तावव्ययीभावः। इमौ शब्दौ नञ्पूर्वपदौ ब्राह्मणादौ। तयोः ष्यञि आदिवृद्धौ विशेषमाह **यथातथायथापुरयोः पर्यायेण।** आदिवृद्धिप्रकरणे उत्तरपदस्य पूर्वस्य चेत्यधिकारे इदं सूत्रम्। 'नञः शुचि-' इत्यतो 'नञः' इत्यनुवर्तते, तदाह **नञः परयोरेतयोरिति।** यथातथा यथापुर इत्यनयोरित्यर्थः। **पर्यायेणेति।** कदाचित्पूर्वपदस्य कदाचिदुत्तरपदस्येत्यर्थः।

यलोपः। एवं यथाकामी। दृढ, वृढ, परिवृढ, भृश, कृश, इत्यादि। अत्र द्वे गणसूत्रे— **'वेर्यातलाभमतिमनःशारदानाम्'।** विशब्दादुत्तरे ये यातादयः पञ्च तदन्तानां समासानामनन्तरः ष्यञ् भवतीत्यर्थः। वियातत्वम्, वियातता, वियातिमा, वैयात्यम्। विलाभिमा, वैलाभ्यम्। विमतिमा, वैमत्यम्। इगन्तत्वादणपि—वैमतम्। विमनिमा, वैमनस्यम्। विशारदिमा, वैशारद्यम्। त्वतलोः समावेशेन विलाभत्वम्, विलाभतेत्यादीन्यप्यूह्यानि। **समो मतिमनसोः।** समः परे ये मतिमनसी तदन्तयोः समासयोरनन्तरः ष्यञ् भवतीत्यर्थः। संमतित्वम्, संमतिता, संमतिमा, सांमत्यम्। इगन्तत्वादणि—सांमतम्। संमनस्त्वम्। संमनस्ता। संमनिमा। सांमनस्यम्। **गुणवचन।** ष्यञनुवर्तते, कर्म क्रिया कार्यं च। 'शरीरायासमात्रसाध्यं शौचादि क्रिया। शास्त्रेण विहितो यागादिः कार्यम्' इति तयोर्भेदमाहुः। **अर्हत इति।** 'अर्हः प्रशंसायाम्' इति शत्रन्तोऽर्हच्छब्दः पूजार्थाभिधायीति कैयटः। **आकृतिगण इति।** केषांचित्पाठस्तु कार्यान्तराय। तथा हि—'अर्हतो नुम् च' इति नुमर्थः पाठः। एकभावः, त्रिभावः, अन्यभावः, एषां पाठः स्वार्थे विधानार्थः। तथा च प्रत्याहाराह्निके वार्तिके

तथ्यम्। आयथापुर्यम्,अयाथापुर्यम्,आपादसमासेर्भावकर्माधिकारः। 'चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्' (वा ३०६१)। चत्वारो वर्णाश्चातुर्वर्ण्यम्। चातुराश्रम्यम्। त्रैस्वर्यम्। षाड्गुण्यम्। सैन्यम्। सान्निध्यम्। सामीप्यम्। औपम्यम्। त्रैलोक्यम् इत्यादि। सर्वे वेदाः सर्ववेदास्तानधीते सर्ववेदः। 'सर्वादेः—' (वा२७४८) इति लुक्। स एव सार्ववेद्यः। 'चतुर्वेदस्योभयपदवृद्धिश्च' (ग सू ६३)। चतुरो वेदानधीते चतुर्वेदः। स एव चातुर्वैद्यः। चतुर्विद्यस्य इति पाठान्तरम्। चतुर्विद्य एव चातुर्वैद्यः। **१७६० स्तेनाद्यन्नलोपश्च** । (५-१-१२५) 'न' इति सङ्घातग्रहणम्। 'स्तेन चौर्ये' पचाद्यच्। स्तेनस्य भावः कर्म वा स्तेयम्।

आयथातथ्यमिति । यथातथेति निपातनात् ष्यञि पूर्वपदस्यादिवृद्धिः । **अयाथातथ्यमिति** । उत्तरपदस्यादिवृद्धिः। **आयथापुर्यमिति** । यथापुरशब्दात् ष्यञि पूर्वपदस्यादिवृद्धिः। **अयाथापुर्यमिति** । उत्तपदस्यादिवृद्धिः। **आपादसमासेरिति** । अत्र व्याख्यानमेव शरणम्। **चतुर्वर्णादीनामिति** । चतुर्वर्णादिभ्यः स्वार्थे ष्यञ उपसंख्यानमित्यर्थः। **सर्ववेदा इति** । 'पूर्वकाल—' इति समासः। **लुगिति** । अध्येतृप्रत्ययस्येति शेषः। **स एव सार्ववेद्य इति** । सर्ववेदशब्दात् स्वार्थे ष्यञिति भावः। **चतुर्वेदस्येति** । वार्तिकमिदम्। ष्यञिति शेषः। **चतुर्वेद इति** । 'तद्धितार्थ—' इति द्विगुः। ततोऽध्येतृप्रत्ययस्याणो 'द्विगोर्लुगनपत्ये' इति लुक्। **चतुर्विद्यस्येतीति** । 'चतुर्वेदस्योभयपदवृद्धिश्च' इति वार्तिके 'चतुर्वेदस्य' इत्यस्य स्थाने 'चतुर्विद्यस्य' इति केचित्पठन्तीत्यर्थः। चतस्रो विद्याः अधीते इत्यर्थे 'तद्धितार्थ—' इति द्विगौ 'विद्यालक्षणकल्पान्ताच्च' इति ठकि 'द्विगोर्लुगनपत्ये' इति तस्य लुकि चतुर्विद्यशब्दात् स्वार्थे ष्यञि उभयपदवृद्धौ चातुर्वैद्य इति रूपमिति भावः। **स्तेनाद्यन्नलोपश्च** । यदिति च्छेदः। स्तेनशब्दात् षष्ठ्यन्ताद् भावे कर्मणि चार्थे यत्स्यादित्यर्थः। **नेति सङ्घातग्रहणमिति** । नलोपश्चेत्यत्र नेत्यकार उच्चारणार्थो न भवति। किंतु नकाराकारसंघातग्रहणमित्यर्थः। **स्तेयमिति** । स्तेनशब्दाद् यत्प्रत्यये सति नेति संघातस्य लोप इति भावः। नच

प्रयोगः—'आन्यभाव्यं तु कालशब्दव्यवायाद्' इति। अन्यभाव एव आन्यभाव्यम्। अन्यत्वमित्यर्थः। यत्तु व्याकरणाधिकरणे भट्टपादैरुक्तम् 'आन्यभाव्यमप्रयोगः' इति, तत्त्ववैयाकरणमीमांसकसंतोषार्थमित्यवधेयम् । **सर्ववेदा इति** । 'पूर्वकालैक—' इति समासः । **चतुर्वेद इति** । तद्धितार्थे द्विगुः। 'द्विगोर्लुगनपत्ये' इत्यणो लुक्। **चतुर्विद्य इति** । 'विद्यालक्षणसूत्रान्ताट्ठक्' । तस्य लुक्। **संघातग्रहणमिति** । वर्णग्रहणे तु 'यस्येति च' इत्यकारलोपे सतीष्टं न सिध्यति। 'अचः परस्मिन्—'

'स्तेनात्' इति योगं विभज्य स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति । १७६१ **सख्युर्यः** । (५-१-१२६) सख्युर्भावः कर्म वा सख्यम् । 'दूतवणिग्भ्यां च' दूतस्य भावः कर्म वा दूत्यम् । 'वणिज्यम्' इति काशिका । माधवस्तु 'वणिज्याशब्दः स्वभावात्स्त्रीलिङ्गः । भाव एव चात्र प्रत्ययो न तु कर्मणि' इत्याह । भाष्ये तु 'दूतवणिग्भ्यां च' इति नास्त्येव । ब्राह्मणादित्वाद्वाणिज्यमपि । १७६२ **कपिज्ञात्योर्ढक्** । (५-१-१२७) कापेयम् । ज्ञातेयम् । १७६३ **पत्यन्तपुरोहितादिभ्यो यक्** । (५-१-१२८) सैनापत्यम् । पौरोहित्यम् । 'राजासे'

नकारमात्रलोपेऽपि 'यस्येति च' इत्यकारलोपात् स्तेयमिति सिध्यतीति वाच्यम्, 'अचः परस्मिन्–' इत्यकारलोपस्य स्थानिवत्त्वेन तमाश्रित्य एकारस्य अयादेशप्रसङ्गात् । नच संघातग्रहणेऽपि 'अलोऽन्त्यस्य' इत्यकारस्यैव लोपः स्यादिति शङ्क्यम्, 'यस्येति च' इत्येव अकारस्य लोपसिद्धाविह नलोपविधिवैयर्थ्यात्, 'नानर्थकेऽलोऽन्त्यविधिः–' इति निषेधाच्च । **योगं विभज्येति** । 'स्तेनात्' इति पृथक् सूत्रम् । 'ष्यञ्' इत्यनुवर्तते । स्तेनशब्दाद्भावे कर्मणि च ष्यञित्यर्थः । समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसंख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दरूपं गुणवचनसंज्ञकं भवतीति आकडारसूत्रभाष्यरीत्या स्तेनशब्दस्य पचाद्यजन्तस्य कृदन्तस्य गुणवचनत्वाभावादप्राप्ताविदं वचनम् । अव्युत्पन्नप्रातिपदिकतया गुणवचनत्वेऽपि यत्प्रत्ययेनापवादेन पक्षे समावेशार्थं वचनम् । ततो 'यन्नलोपश्च' इति योगान्तरम् । 'स्तेनात्' इत्यनुवृत्तावुक्तोऽर्थः । **केचिदिति** । भाष्यादृष्टत्वाद् योगविभागोऽयमप्रामाणिक इति भावः । **सख्युर्यः** । सखिशब्दात् षष्ठ्यन्ताद् भावकर्मणोः यः स्यादित्यर्थः । दूतवणिग्भ्यां चेति । वार्त्तिकमिदम् । आभ्यामपि षष्ठ्यन्ताभ्यां भावकर्मणोः यः स्यादिति वक्तव्यमित्यर्थः । **नास्त्येवेति** । वार्तिकत्वे तस्य भाष्ये पाठावश्यकत्वात् पाठस्य चाभावादप्रामाणिकमेवेदं वृत्तिपठितं वार्तिकमिति भावः । तर्हि दूतवणिग्भ्यां भावकर्मणोः कथं यप्रत्यय इत्याशङ्क्य नास्त्येव यप्रत्ययः, किंतु ष्यञेवेत्याह **ब्राह्मणादित्वाद्वाणिज्यमपीति** । अपिना दौत्यसंग्रहः । **कपिज्ञात्योर्ढक्** । पञ्चम्यर्थे षष्ठी । आभ्यां षष्ठ्यन्ताभ्यां भावकर्मणोः ढगित्यर्थः । अत्र कपिज्ञात्योः भावकर्मणोश्च न यथासंख्यम्, व्याख्यानात् । **पत्यन्त** । पत्यन्तेभ्यः पुरोहितादिभ्यश्च षष्ठ्य-

---

इत्यल्लोपस्य स्थानिवद्भावादयादेशप्रसङ्गादिति भावः । ननु संघातग्रहणेऽपि 'अलोऽन्त्यस्य' इत्याकारस्यैव लोपः स्यान्न तु संघातग्रहणस्येति चेत् । मैवम्, आरम्भसामर्थ्याद् 'नानर्थकेऽलोन्त्यविधिः–' इति निषेधाद्वा तत्सिद्धेः । **कपिज्ञात्योः** । इह कपिज्ञाती द्वौ, भावकर्मणी अर्थावपि द्वौ, तयोर्यथासंख्यं न भवत्यस्वरितत्वप्रतिज्ञानात् । एवं

(ग सू १०६) राजन्शब्दोऽसमासे यकं लभत इत्यर्थः। राज्ञो भावः कर्म वा राज्यम्। समासे तु ब्राह्मणादित्वात्ष्यञ्, आधिराज्यम्। **१७६४ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। (५-१-१२९)** प्राणभृज्जाति–आश्वम्। औष्ट्रम्। वयोवचन–कौमारम्, कैशोरम्, औद्गात्रम्। औन्नेत्रम्। सौष्ठवम्। दौष्ठवम्। **१७६५ हायनान्तयुवादिभ्योऽण्। (५-१-१३०)** द्वैहायनम्।

न्तेभ्यो भावकर्मणोर्यक् स्यादित्यर्थः। **राजासे इति**। पुरोहितादिगणसूत्रमिदम्। राजा असे इति च्छेदः। स इति समासस्य प्राचां संज्ञा। तदाह—**राजन्शब्द इति। राज्यमिति**। यकि टिलोपः। 'ये चाभावकर्मणोः' इति प्रकृतिभावस्तु न, अभावकर्मणोरिति पर्युदासात्। **समासे त्विति**। अधिको राजा अधिराजः प्रादिसमासः। असे इति पर्युदासाद्यगभावे ब्राह्मणादित्वात् ष्यञि आधिराज्यमिति रूपमित्यर्थः। यक्ष्यञोः स्वरे विशेषः। **प्राणभृज्जाति**। प्राणभृतः–प्राणिनः, तज्जातिवाचिभ्यो वयोविशेषवाचिभ्य उद्गात्रादिभ्यश्च षष्ठ्यन्तेभ्यो भावकर्मणोः अञित्यर्थः। प्राणभृज्जातीति उदाहरणसूचनम्। एवं वयोवचनेति। **हायनान्त**। हायनान्तेभ्यो युवादिभ्यश्च षष्ठ्यन्तेभ्यो भावकर्मणोः अण् स्यादित्यर्थः। **द्वैहायनमिति**। द्विहायनस्य भावः कर्म वेति विग्रहः। वयोवचन-

'पत्यन्तपुरोहितादिभ्यः–' 'द्वन्द्वमनोज्ञादिभ्यः–' इत्यत्रापि बोध्यम्। **ब्राह्मणादित्वादिति**। यद्यपि ब्राह्मणादिषु राजन्शब्दः केवलः पठितः, तथाप्ययमेव 'असे' इति प्रतिषेधो ज्ञापयति 'अस्त्यत्र प्रकरणे राजन्शब्देन तदन्तविधिः' इति। एवं च ब्राह्मणादिपाठस्य समासे चरितार्थत्वादसमासे विशेषविहितो यगेव भवति। अन्ये तु ब्राह्मणादेराकृतिगणत्वादेव तदन्तात् कथंचित्ष्यञि सिद्धे राजन्शब्दस्य तत्र पाठो यका सह समावेशार्थ इति। तथा चावेष्ट्यधिकरणे शाबरभाष्ये उक्तं 'राज्ञः कर्म राज्यं ब्राह्मणादित्वात् ष्यञ्' इति। पुरोहित, संग्रामिक, पथिक, सारथिकेत्यादयः पुरोहितादयः। **प्राणभृज्जाति**। मुखनासासंचारी वायुः प्राणः। 'प्राणिजाति–' इत्येव सुवचम्। प्राणभृदिति किम्, तृणत्वम्, तृणता। जातीति किम्, देवदत्तत्वम्। **औद्गात्रमिति**। उद्गात्रादिषु ये ऋत्विग्वचनास्तेभ्यो 'होत्राभ्यश्छः' इति छे प्राप्ते अञ् विधीयते। सुष्ठु दुष्ठु द्वाभ्यां गुणलक्षणे ष्यञि प्राप्ते, वधूशब्दादिगन्तलक्षणेऽणि, शेषेभ्यस्त्वतलोः प्राप्तयोः। इह तु '**सुभगं मन्त्रे**' पठ्यते। सुभगमित्येतच्छब्दरूपं मन्त्रविषये प्रयोगे अञमुत्पादयतीत्यर्थः। 'महते सौभगाय'। सर्वविधीनां छन्दसि वैकल्पिकत्वादिह 'हृद्भगसिन्ध्वन्ते–' इत्युत्तरपदवृद्धिर्न भवति। अतएव मन्त्रेऽपि क्वचिदञ् न भवति। 'सौभाग्यमस्यै दत्त्वाय' इह ष्यञ्। **हायनान्त**। अस्मात्त्वतलोः

त्रैहायनम् । यौवनम् । स्थाविरम् । 'श्रोत्रियस्य यलोपश्च' (वा ३०१३)। श्रौत्रम्। कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञा युवादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशल्यम्, कौशलमित्यादि । १७९६ **इगन्ताच्च लघुपूर्वात्** । (५-१-१३१) शुचेर्भावः कर्म वा शौचम् । मौनम् । कथं काव्यम्—कविशब्दस्य ब्राह्मणादित्वा-

---

लक्षणस्य अञोऽपवादः । एवं त्रैहायनमपि । **यौवनमिति** । अनिति प्रकृतिभावान्न टिलोपः । **श्रोत्रियस्येति** । वार्तिकमिदम् । श्रोत्रियशब्दात् षष्ठ्यन्ताद् भावकर्मणोः अण् , प्रकृतेर्यलोपश्चेत्यर्थः । 'य' इति संघातग्रहणम् । **श्रौत्रमिति** । छन्दोऽधीते इत्यर्थे छन्दश्शब्दाद् घप्रत्यये तस्य इयादेशे प्रकृतेः श्रोत्र इत्यादेशे 'यस्येति च' इत्यल्लोपे श्रोत्रियशब्दः । श्रोत्रियस्य भावः कर्म वेत्यर्थे श्रोत्रियशब्दादणि यकाराकारसंघातस्य लोपे रेफादिकारस्य 'यस्येति च' इति लोपे श्रौत्रमिति रूपम् । यकारादकारस्य 'यस्येति च' इति लोपे सति यकारमात्रस्यानेन लोपे तु रेफादिकारस्य यण् स्यात् । नच तस्य 'यस्येति च' इति लोपः शङ्क्यः, लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायात् । अकारलोपस्य स्थानिवत्त्वेन इकारान्तस्य भत्वाभावाच्च । 'श्रोत्रियस्य घलोपश्च' इत्येके पठन्ति । **इगन्ताच्च** । लघुः पूर्वोऽवयवो यस्येति विग्रहः । पूर्वत्वं च इगवधिकमेव गृह्यते, व्याख्यानात् । तथा च लघुपूर्वो य इक् तदन्तात्प्रातिपदिकात् षष्ठ्यन्ताद्भावकर्मणोरण् स्यादित्यर्थः । गुणवचनेत्यादेरपवादः । **कथं काव्यमिति** । कविशब्दस्य लघुपूर्वेगन्तत्वाद्

प्राप्तयोरणिविधानम् । युवस्थविरशब्दाभ्यां वयोवचनलक्षणे अञि प्राप्ते । **यौवनमिति** । अणि परतः 'अन्' इति प्रकृतिभावः । मनोज्ञादिपाठाद् वुञपि । यौवनकम् । 'प्रकृत्याऽके राजन्यमनुष्ययुवानः' इति प्रकृतिभावः । **श्रोत्रियस्येति** । 'श्रोत्रियंश्छन्दोऽधीते' इत्यत्र छान्दसः श्रोत्रभावः घंश्च प्रत्यय इति यदा व्याख्यानम् , तदेह 'घलोपः' इति यथाश्रुतम् । यदा तु 'वाक्यार्थे पदरचनम्' इति पक्षः, तदा घशब्देन इय इति रूपं लक्ष्यते । क्वचित्तु 'यलोपश्च' इति पाठः, तत्र येति संघातग्रहणं व्याख्येयम् । वर्णग्रहणे त्विकारस्य यणादेशः स्यान्न तु 'यस्येति च' इति लोपः । अकारलोपस्य स्थानिवत्त्वेन इकारान्तस्य भत्वाभावात् । एतच्च हरदत्तग्रन्थे स्पष्टम् । मूलपुस्तकेषु 'यलोपः' इति मुख्यपाठ एव प्रायेण दृश्यते, न तु घलोप इति पाठः । **इगन्ताच्च** । लघुः पूर्वोऽवयवो यस्येति प्रातिपदिकविशेषणम् । पूर्वत्वं च संनिधानादिगवधिकमेव । तेनातिपाण्डुशब्दान्न भवति । 'लघुपूर्वेकः' इत्येव सुवचम् । लघुपूर्वश्चासौ इक् च लघुपूर्वेक् तस्य प्रातिपदिकविशेषणात्तदन्तलाभ इति नव्याः । इगन्तात्किम्, घटत्वम् । लघुपूर्वात्किम्, पाण्डुत्वम् । **कथं काव्यमिति** । कुधातोः

ष्यञ्। १७१७ **योपधाद् गुरूपोत्तमाद् वुञ्**। (५-१-१३२) रामणीयकम्। आभिधानीयकम्। 'सहायाद्वा' (वा ३०१४)। साहाय्यम्, साहायकम्। १७१८ **द्वन्द्वमनोज्ञादिभ्यश्च**। (५-१-१३३) शैष्योपाध्यायिका। मानोज्ञकम्। १७१९ **गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु**। (५-१-१३४) अत्याकारोऽधिक्षेपः। तदवेतः ते गोत्रचरणयोर्भावकर्मणी प्राप्तः अवगतवान्वा। गार्गिकया श्लाघते। गार्ग्यत्वेन विकत्थत इत्यर्थः। गार्गिकया अत्याकुरुते।

'गुणवचन–' इति ष्यञं बाधित्वा अणप्रसङ्गात् काव्यमिति कथमित्याक्षेपः। समाधत्ते **कविशब्दस्येति**। ब्राह्मणादित्वादित्यनन्तरं ष्यञि उपपाद्यमिति शेषः। **योपधात्**। योपधाद् गुरुपोत्तमात् प्रातिपदिकात् षष्ठ्यन्ताद्भावकर्मणोर्वुञित्यर्थः। **रामणीयकमिति**। रमणीयशब्दाद् वुञ्। **आभिधानीयकमिति**। अभिधानीयशब्दाद् वुञ्। **सहायाद्वेति**। वुञिति शेषः। पक्षे ब्राह्मणादित्वात् ष्यञ्। इदं तु वार्तिकं भाष्ये क्वचिन्मृग्यम्। **द्वन्द्वमनोज्ञादिभ्यश्च**। द्वन्द्वाद् मनोज्ञादिभ्यश्च षष्ठ्यन्तेभ्यो वुञित्यर्थः। **शैष्योपाध्यायिकेति**। शिष्यश्च उपाध्यायश्चेति द्वन्द्वाद् वुञ्। स्त्रीत्वं लोकात्। यद्यपि 'योपधात्' इत्येव सिध्यति तथापि गौपालपशुपालिकेत्युदाहरणं बोध्यम्। **गोत्रचरणात्**। गोत्रप्रत्ययान्तात् शाखाध्येतृवाचिनश्च षष्ठ्यन्ताद्भावकर्मणोर्वुञ् स्यात् श्लाघादिषु विषयेष्वित्यर्थः। अपत्याधिकारादन्यत्र प्रवराध्यायप्रसिद्धं गोत्रमित्युक्तम्। 'अत्याकार' इत्यस्य विवरणम् **अधिक्षेप इति**। 'तदवेत' इत्येतद्विवृणोति—**ते गोत्रेति**। तच्छब्देन गोत्रचरणयोः भावकर्मणी विवक्षिते। अवपूर्वादिणः प्राप्त्यर्थाद् ज्ञानार्थाद्वा कर्तरि क्तः। ते अवेतस्तदवेत इति विग्रहः। 'द्वितीया' इति योगविभागात् समासः।

'ओरावश्यके' इति रूपसिद्धावपि कवेः कर्मेत्यर्थे काव्यमिति स्यादिति प्रश्नः। **योपधात्**। गुरु उपोत्तमं यस्य प्रातिपदिकस्य तस्मादित्यर्थः। योपधात्किम्, विमानत्वम्। गुरूपोत्तमादिति किम्, क्षत्रियत्वम्। **आभिधानीयकमिति**। अत्र प्रकृतिरभेः परोऽनीयर्प्रत्ययान्तो दधातिः। अभिधानीयस्य भावः कर्म वेत्यर्थः। **सहायाद्वेति**। सूत्रेण नित्ये प्राप्ते विकल्पार्थं वचनम्। **द्वन्द्वमनोज्ञादिभ्यश्च**। मनोज्ञ, प्रियरूप, बहुल, अवश्येत्यादिर्मनोज्ञादिः। **गोत्रचरणात्**। गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद् वुञ् स्याद्भावकर्मणोः। अपत्याधिकारादन्यत्र लौकिकं गोत्रम्, तेनापत्यप्रत्ययान्तेभ्य इत्यर्थः। प्रवराध्याये ये पठितास्तेभ्य इत्यपरे। 'गोत्रं च चरणैः सह' इति जातित्वाद् 'प्राणभृज्जाति–' इत्यादिना अञि प्राप्ते वचनम्। **श्लाघेत्यादि**। श्लाघादिषु विषयभूतेष्वित्यर्थः। **प्राप्त इति**। इणः प्राप्त्यर्थत्वात्। अपूर्वस्येणो ज्ञाने

गार्गिकामवेतः । १८०० **होत्राभ्यश्छः** । (५-१-१३५) होत्राशब्दो ऋत्विग्वाची स्त्रीलिङ्गः । बहुवचनाद्विशेषग्रहणम् । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । मैत्रावरुणीयम् । १८०१ **ब्रह्मणस्त्वः** । (५-१-१३६) होत्रावाचिनो ब्रह्मन्शब्दात्त्वः स्यात् । छस्यापवादः । ब्रह्मत्वम् । नेति वाच्ये त्ववचनं तलो बाधनार्थम् । ब्राह्मणपर्यायाद् ब्रह्मन्शब्दात्तु त्वतलौ । ब्रह्मत्वम्, ब्रह्मता ।

इति तद्धितेषु भावकर्माधिकारप्रकरणम् ।

अवगतवान्वेति । ज्ञातवानित्यर्थः । **गार्गिकयेति** । गार्ग्यशब्दाद् वुञि 'आपत्यस्य–' इति यलोपे 'यस्येति च' इत्यकारलोपे लोकात् स्त्रीत्वे टापि 'प्रत्ययस्थात्–' इति इत्त्वे गार्गिकाशब्दः । काठिकया श्लाघत इति चरणादुदाहार्थम् । अत्र श्लाघादयः पदान्तरोपात्ता एव प्रत्ययार्थान्वयिनः, नतु प्रत्ययवाच्या इति बोध्यम् । **होत्राभ्यश्छः** । **ऋत्विग्वाचीति** । याज्ञिकप्रसिद्धेरिति भावः । ऋत्विग्विशेषवाचिभ्यः षष्ठ्यन्तेभ्यः छः स्याद्भावकर्मणोरित्यर्थः । **अच्छावाकीयमिति** । 'आ च त्वात्' इति त्वतलोरपि सर्वत्र समावेशो बोध्यः । **ब्रह्मणस्त्वः** । होत्राभ्य इत्यनुवृत्तमेकवचनेन विपरिणम्यते । तदाह **होत्रावाचिन इति** । ऋत्विग्वाचिन इत्यर्थः । ननु ब्रह्मणो नेत्येवास्तु । ब्रह्मणश्छो न इत्यर्थलाभे सति छे निषिद्धे आ च त्वादित्यधिकाराद् 'होत्राभ्यश्छः' इत्येव भावकर्मणोस्त्वप्रत्ययः सिध्यतीत्यत आह **नेति वाच्य इति** । **तलो बाधनार्थमिति** । अधिकारवशाद्धोत्राभ्य इति भावकर्मणोः प्राप्तस्य तलो निवृत्त्यर्थमित्यर्थः । एतेन 'तस्य भावस्त्वतलौ' इत्यनेन ब्रह्मणः कर्मणि त्वस्याप्राप्तेस्तदर्थं त्वप्रत्ययविधानमिति न शङ्क्यम्, नापि ब्रह्मणो नेत्युक्ते पूर्वसूत्रविहितानां त्वतल्छानां निषेधः स्यादित्यपि शङ्क्यम्, शब्दोपात्तस्य छस्यैव निषेधात् । अत्र होत्राग्रहणानुवृत्तेः प्रयोजनमाह—**ब्राह्मणपर्यायादिति** ।

इति तद्धितेषु भावकर्माधिकारः ।

प्रसिद्धत्वादाह—**अवगतवान्वेति** । **गार्गिकयेति** । 'आपत्यस्य–' इति यलोपः । चरणाद् वुञ उदाहरणं तु काठिकया श्लाघत इत्यादि बोध्यम् । श्लाघादिष्विति किम्, गार्ग्यत्वम् । कठत्वम् । **होत्राशब्द इति** । जुहोतेस्त्रन् । **नेति वाच्य इति** । छप्रत्यये निषिद्धे 'तस्य भावस्त्वतलौ' इत्यनेनैव त्वप्रत्ययः सिध्यति । विभक्तेरनुच्चारणाल्लाघवं च भवतीति भावः । 'होत्राभ्यः–' इत्यनुवृत्तेः फलं दर्शयति—**ब्राह्मणपर्यायादिति** । इति भावकर्मार्थिकाः ।

इति तत्त्वबोधिन्यां नञ्स्नञ्प्रकरणम् ।

अथ तद्धितेषु पाञ्चमिकप्रकरणम्। ३७।

१८०२ धान्यानां भवने क्षेत्रे खञ्। (५-२-१) भवन्त्यस्मिन्निति भवनम्। मुद्गानां भवनं क्षेत्रं मौद्गीनम्। **१८०३ व्रीहिशाल्योर्ढक्।** (५-२-२) व्रैहेयम्। शालेयम्। **१८०४ यवयवकषष्टिकाद्यत्।** (५-२-३) यवानां भवनं क्षेत्रं यव्यम्। यवक्यम्। षष्टिक्यम्। **१८०५ विभाषातिलमाषोमाभङ्गाणुभ्यः।** (५-२-४) यद्वा स्यात्। पक्षे खञ्। तिल्यम्, तैलीनम्।

अथ पाञ्चमिका निरूप्यन्ते। **धान्यानां भवने।** धान्यवाचिभ्यः षष्ठ्यन्तेभ्यो भवने क्षेत्रेऽर्थे खञित्यर्थः। भवनशब्दस्य भावल्युडन्तत्वे क्षेत्रशब्दसामानाधिकरण्यानुपपत्तेराह—**भवन्त्यस्मिन्निति भवनमिति।** भूधातुरुत्पत्तिवाची। उत्पत्तिस्थानं भवनमिति लभ्यते। धान्योत्पत्तिस्थानं क्षेत्रम्। 'केदारः क्षेत्रम्' इत्यमरः। क्षेत्रशब्दाभावे भूधातोः सत्तावाचित्वमाश्रित्य यत्र विद्यते तद्भवनमिति व्युत्पत्त्या आधारसामान्यं गृहकुसूलादि लभ्येत। अतः क्षेत्रपदम्। भवनपदाभावे तु क्षेत्रशब्देन सेतुबन्धकाश्यादिपुण्यप्रदेशोऽपि लभ्येत। अतो भवनपदम्। उभयोपादाने तु धान्योत्पत्तिप्रदेश एव लभ्यत इति न पौनरुक्त्यम्। **व्रीहिशाल्योर्ढक्।** व्रीहिशब्दात् शालिशब्दाच्च षष्ठ्यन्ताद्भवने क्षेत्रेऽर्थे ढगित्यर्थः। खञोऽपवादः। **यवयवक।** यव, यवक, षष्टिक एभ्यः षष्ठ्यन्तेभ्यो भवने क्षेत्रे यत्स्यादित्यर्थः। खञोऽपवादः। 'धान्यानाम्' इत्यनुवृत्तेरिहापि षष्ठ्येव समर्थविभक्तिः। **विभाषा तिल।** तिल, माष, उमा, भङ्ग, अणु एभ्यो धान्यविशेषवाचिभ्यः षष्ठ्यन्तेभ्यो यद्वा स्यादित्यर्थः। 'उमाभङ्गौ धान्यविशेषौ' इति भाष्यम्। 'उमा स्यादतसी क्षुमा'

धान्यानाम्। 'धिवि प्रीणने' इत्यस्मात् 'कृत्यल्युटो बहुलम्' इति कर्तरि ण्यत्। अस्मादेव निपातनादन्त्यस्य लोप इकारस्य चात्वम्। धिनोतीति धान्यम्। मन्त्रश्च 'धान्यमसि धिनुहि देवान्' इति दृश्यते। धान्यानामिति भवनापेक्षया कर्तरि षष्ठी। सा च निर्देशादेव समर्थविभक्तिः। बहुवचनं तु स्वरूपविधिनिरासार्थम्। अलौकिके प्रक्रियावाक्ये तु षष्ठ्यन्तत्वानुवादेन तद्धितविधिसामर्थ्यादेवेति बोध्यम्। भवतिरिहोत्पत्तिवचनः क्षेत्रग्रहणसामर्थ्याद्। सूत्रे हि सत्तावचनस्यापि भवतेर्ग्रहणं मा भूदिति क्षेत्रग्रहणं कृतम्। अन्यथा 'धान्यानां भवनं कुसूलः' इत्यत्रापि स्यादिति। धान्यानां किम्, तृणानां भवनं क्षेत्रम्। **व्रीहिशाल्योः।** अत्रापि निर्देशादेव षष्ठी समर्थविभक्तिः। सा च भवनापेक्षया कर्तरीत्यादि पूर्ववत्। **यवयवक।** अत्र प्रत्ययार्थसामर्थ्याल्लभ्या षष्ठी समर्थविभक्तिः। **विभाषा।** खञि नित्ये प्राप्ते वचनम्।

माष्यम्, माषीणम्। उम्यम्, औमीनम्। भङ्ग्यम्, भाङ्गीनम्। अणव्यम्, आण-वीनम्। १७०६ **सर्वचर्मणः कृतः खखञौ।** (५-२-५) असामर्थ्येऽपि निपातनात्समासः। सर्वश्चर्मणा कृतः सर्वचर्मीणः, सार्वचर्मीणः। १८०७ **यथामुखसंमुखस्य दर्शनः खः।** (५-२-६) मुखस्य सदृशं यथामुखं प्रतिबिम्बम्। निपातनात्सादृश्येऽव्ययीभावः। समं सर्वं मुखं सम्मुखम्। समशब्दस्यान्तलोपो निपात्यते। यथामुखं दर्शनो यथामुखीनः। सर्वस्य मुखस्य दर्शनः सम्मु-

---

इत्यमरः। **अणव्यमिति।** अणुर्धान्यविशेषः। यति 'ओर्गुणः' 'वान्तो यि–' इत्यवादेशः। **सर्वचर्मणः।** सर्वचर्मन्शब्दात्तृतीयान्तात् चर्मणा सर्वं कृतम् इत्यर्थे खखञौ स्त इत्यर्थः। औचित्यादिह तृतीया समर्थविभक्तिः। नन्विह सर्वशब्दस्य कृते अन्वयात् चर्मण्यन्वयाभावादसामर्थ्याच्चर्मणा समासासंभवात् कथं सर्वचर्मन्शब्दात्प्रत्यय इत्यत आह **असामर्थ्येऽपीति।** सर्वश्चर्मणा कृत इति विग्रहवाक्यम्। चर्मणा कृत्स्नः कृत इत्यर्थः। **सर्वचर्मीण इति।** 'नस्तद्धिते' इति टिलोपः। सर्वेण चर्मणा कृत इत्यर्थे तु न खखञौ व्याख्यानात्। **यथामुख।** यथामुख, संमुख आभ्यां षष्ठ्यन्ताभ्यां दर्शन इत्यर्थे खः स्यादित्यर्थः। दृश्यतेऽस्मिन्निति दर्शन आदर्शादिः। ननु मुखस्य सदृशं यथामुखमिति कथमव्ययीभावः? 'यथाऽसादृश्ये' इति सादृश्ये तन्निषेधादित्यत आह **निपातनादिति।** संमुखशब्दे आभिमुख्यार्थकस्य समित्युपसर्गस्य न प्रवेशः, किंतु समशब्दस्य सर्वपर्यायस्येत्याह **समं सर्वं मुखं संमुखमिति।** सममित्यस्य विवरणं सर्वमिति। समं च तन्मुखं चेति कर्मधारये

औमीनं भाङ्गीनमिति। ननूमाभङ्गयोर्धान्यत्वाभावात्कथमिह खञ्। 'व्रीहयश्च मे यवाश्च मे' इति चमकानुवाके हि द्वादशैव धान्यानि पठितानि, न तूमाभङ्गौ पठितौ इति चेत्। मैवम्, 'शणसप्तदशानि धान्यानि' इति स्मरणात्। तत्र चोमाभङ्गयोरपि पाठाद्धान्यत्वमस्तीति भाष्यादौ स्थितत्वात्। न च चमकानुवाके धान्यपरिगणनेनार्थः, तत्राधान्यानामप्यश्मादीनां पाठात्। धान्यानामपि केषांचित् कोद्रवादीनामपाठात्। तस्मादन्यत एव धान्यनिर्णय इति पूर्वोक्तस्मृत्या तयोर्धान्यत्वमस्तीति ज्ञेयम्। **सर्वचर्मणः।** 'खश्च' इत्येव तु नोक्तम्। यतोऽप्यनुकर्षः संभाव्येतेति। अत्र तृतीया समर्थविभक्तिः। कृत इति प्रत्ययार्थे चर्मणः करणत्वस्योचितत्वात्। **सर्वश्चर्मणेति।** सर्वेण चर्मणा कृत इत्यर्थे तद्धितो नेष्यत इति भावः। **यथामुख।** दृश्यतेऽस्मिन्दर्शन आदर्शादिः। अधिकरणे ल्युट्। 'असादृश्ये' इति प्रतिषेधात्सादृश्ये यथाशब्दस्य कथं समासस्तत्राह–**निपातनादिति।** एतच्च वृत्तिग्रन्थमनुसृत्योक्तम्। भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशब्द आश्रितः। तथा च मायामृगं प्रकम्योक्तम्—'यथामुखीनः सीतायाः

सीनः। १८०८ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति। (५-२-७) सर्वादेः पथ्याद्यन्ताद् द्वितीयान्तात्खः स्यात्। सर्वपथान्व्याप्नोति सर्वपथीनः। सर्वाङ्गीणः। सर्वकर्मीणः। सर्वपत्त्रीणः। सर्वपात्रीणः। १८०९ आप्रपदं प्राप्नोति। (५-२-८) पादस्याग्रं प्रपदम्, तन्मर्यादीकृत्य आप्रपदम्—आप्रपदीनः पटः। १८१० अनुपद्सर्वान्नायानयं बद्धाभक्षयतिनेयेषु। (५-२-९) अनुरायामे सादृश्ये वा। अनुपदं बद्धा अनुपदीना उपानत्। सर्वान्नानि भक्षयति

संमुखशब्द इत्यर्थः। **निपात्यत इति**। इदं च भाष्ये स्पष्टम्। एवं च समित्युपसर्गपूर्वादयं प्रत्ययो नेष्यत इति भावः। **तत्सर्वादेः**। पथिन्, अङ्ग, कर्मन्, पत्र, पात्र एषां समाहारद्वन्द्वात् पञ्चम्यर्थे द्वितीया। प्रातिपदिकविशेषणत्वात्तदन्तविधिः। ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति निषेधस्तु न, केवलानामेषां सर्वादित्वस्यासंभवात्। तदिति तु द्वितीयान्तं व्याप्नोतीत्यत्रान्वेति। ततश्च तद्व्याप्नोतीत्यर्थे सर्वशब्दपूर्वपदकेभ्यः पथ्यङ्गकर्मपत्रपात्रान्तेभ्यः प्रातिपदिकेभ्यो द्वितीयान्तेभ्यः खः स्यादित्यर्थः फलति। तदाह **सर्वादेरित्यादिना। सर्वपथानिति**। 'ऋक्पूः–' इति समासान्तः। **आप्रपदम्**। आप्रपदमित्यव्ययीभावाद् द्वितीयान्तात्प्राप्नोतीत्यर्थे खः स्यादित्यर्थः। **पदस्याग्रं प्रपदमिति**। 'पादाग्रं प्रपदम्' इत्यमरः। **आप्रपदमिति**। 'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः। **अनुपद**। अनुपद, सर्वान्न, अयानय एषां समाहारद्वन्द्वाद् द्वितीया। बद्धा, भक्षयति, नेय एषां द्वन्द्वात् सप्तमी। तिङन्तस्य द्वन्द्वानुप्रवेश आर्षः। अनुपदादिभ्यो द्वितीयान्तेभ्यः क्रमाद्बद्धादिष्वर्थेषु खः

पुप्लुवे बहु लोभयन्' इति। **यथामुखं दर्शन इति**। अव्ययीभावस्यापि यथामुखशब्दस्योन्मत्तगङ्गादिवत्सत्त्ववचनत्वात्कर्मशक्तियोगे सति कृयोगलक्षणा षष्ठी। तस्याः 'नाव्ययीभावात्–' इत्यमादेशः। **सर्वस्य मुखस्येति**। 'संमुखस्य' इति नोक्तम्। प्रत्ययसंनियोगेनैव समशब्दस्यान्त्यलोपनिपातनात्। संशब्दस्तु समशब्दार्थे न दृश्यते, 'संमुखो भव' इत्यत्र 'अभिमुख' इत्यर्थप्रतीतेः। तत्र च खप्रत्ययस्याजनिष्यमाणत्वात्। कथं तर्हि—'संयुगे संमुखीनं तमुद्यन्तं प्रसहेत कः' इति भट्टिः। अभिमुखावस्थानात्सामर्थ्याद्भविष्यतीति हरदत्तः। **तत्सर्वादेः**। तदिति द्वितीया समर्थविभक्तिः। व्याप्नोतीति प्रत्ययार्थः। परिशिष्टं प्रकृतिविशेषणम्। तत्र केवलानां पथ्यादीनां सर्वादित्वासम्भवात्प्रातिपदिकैरपि तैस्तदन्तविधिः। तदाह **पथ्याद्यन्तादिति**। पथ्यङ्गकर्मपत्रपात्रान्तात्प्रातिपदिकादित्यर्थः। **सर्वपथीन इति**। 'पूर्वकालैक–' इति समासः। 'ऋक्पूः–' इति समासान्तः। तस्य पथ्यन्तसमासग्रहणेन ग्रहणाद्भवति खप्रत्ययः। **अनुपदसर्वान्नायानयनम्**। बद्धाभक्षयतीत्यत्र निपातनात्तिङन्तेन सह द्वन्द्वः।

सर्वान्नीनो भिक्षुः। अयानयः स्थलविशेषः। तं नेयः अयानयीनः शारः।
१८११ **परोवरपरम्परपुत्रपौत्रमनुभवति।** (५-२-१०) परांश्चावरांश्चानुभवतीति परोवरीणः। अवरस्योत्त्वं निपात्यते। परांश्च परतरांश्चानुभवति परम्परीणः। प्रकृतेः परंपरभावो निपात्यते। पुत्रपौत्रान् अनुभवति पुत्रपौत्रीणः। परम्पराशब्दस्तु अव्युत्पन्नं शब्दान्तरं लौकिकम्। तस्मादेव स्वार्थे

स्यादित्यर्थः। **अनुरायामे सादृश्ये वेति।** आद्ये 'यस्य चायामः' इत्यव्ययीभावः, द्वितीये सादृश्ये अव्ययीभावः। **अनुपदं बद्धेति।** क्रियाविशेषणत्वाद् द्वितीया। **अनुपदीना उपानदिति।** पदसंबन्धिदैर्घ्योपलक्षितेत्यर्थः। पदेन सदृशीति वा। तत्तुल्यपरिमाणेति यावत्। **अयानय इति।** द्यूते शाराणां प्रदक्षिणपरिवर्तनम् अयः, प्रसव्यपरिवर्तनम् अनयः। अयसहितः अनयः अयानयः। प्रदक्षिणप्रसव्यगामिनां यस्मिन् युग्मादिपदे स्थितानां परकीयैः शारैरनाक्रमणं तत् स्थानमिह अयानयशब्देन लक्षणयोच्यत इत्यर्थः। एतत्सर्वं भाष्ये स्पष्टम्। 'ससहायस्य शारस्य परैर्नाक्रम्यते पदम्। असहायस्तु शारेण परकीयेण बाध्यते ॥' इति द्यूतशास्त्रमर्यादा। विस्तरस्तु कैयटमनोरमादावनुसंधेयः। **तं नेय इति।** तं स्थानविशेषमयानयाख्यं प्रापणीय इत्यर्थः। णीञ् द्विकर्मकः, प्रधाने कर्मणि यत्। 'अप्रधाने द्वितीया' इति भावकर्मलकारप्रक्रियायां वक्ष्यते। **परोवर।** परोवर, परम्पर, पुत्रपौत्र एभ्यो द्वितीयान्तेभ्यः अनुभवतीत्यर्थे खः स्यादित्यर्थः। **परोवरीण इति।** परे च अवरे च परावरे।ताननुभवतीत्यर्थः। **अवरस्योत्त्वमिति।** अवरशब्दस्य आदेरकारस्य खप्रत्ययसंनियोगेन उत्वं निपात्यत इत्यर्थः। एवं च विग्रहवाक्ये इदमुत्वं न भवति। **प्रकृतेरिति।** परपरतरशब्दाद् द्वन्द्वात्खे सति तत्संनियोगेन प्रकृतेः परम्परभावो निपात्यत इत्यर्थः। नन्वेवं सति कल्याणपरम्परेत्यादौ कथं परम्पराशब्दः ? परम्परभावस्य

द्वितीयान्तेभ्योऽनुपदादिभ्यो यथासंख्यं बद्धादिष्वर्थेषु खः स्यात्। **अनुरायाम इत्यादि।** 'यस्य चायामः' इति यथार्थे 'अव्ययम्—' इति वा अव्ययीभाव इत्यर्थः। **सर्वान्नीन इति।** प्रकारकार्त्स्न्ये सर्वशब्दः। यान्यन्नानि लभ्यन्ते उष्णानि शीतलानि सरसानि नीरसानि वा सर्वाणि भक्षयतीत्यर्थः। 'अयः प्रदक्षिणगमनम्। अनयः प्रसव्यगमनम्। प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्परैरसमावेशः सोऽयमयानयः' इति काशिका। **तं नेय इति।** नयतेर्द्विकर्मकत्वादप्रधाने कर्मणि द्वितीया। **अयानयीनः शार इति।** 'फलकशिरसि स्थित इत्यर्थः' इति काशिका। **अवरस्येति।** आदेरिति शेषः। उत्वे कृते 'आद्गुणः'। केचित्तु ओत्वं परशब्दस्य

---

१ 'दैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः' इति क.।

ष्यञि पारम्पर्यम्। कथं पारोवर्यवदिति–असाधुरेव, खप्रत्ययसंनियोगेनैव परोवरेति निपातनात्। **१८१२ अवारपारात्यन्तानुकामं गामी। (५-२-११)** अवारपारं गामी अवारपारीणः। अवारीणः। पारीणः। पारावारीणः। अत्यन्तं गामी अत्यन्तीनः। भृशं गन्तेत्यर्थः। अनुकामं गामी अनुकामीनः। यथेष्टं गन्ता। **१८१३ समां समां विजायते। (५-२-१२)** यल्लोपोऽवशिष्टविभक्तेरलुक्च

खप्रत्ययसंनियोगशिष्टत्वादित्यत आह—**परम्पराशब्दस्त्विति**। **तस्मादेवेति**। परम्परेत्यव्युत्पन्नप्रातिपदिकादेवेत्यर्थः। **कथमिति**। परावरशब्दाद् भावे वा स्वार्थे वा ष्यञि अवरस्यादेरुत्वे पारोवर्यशब्दाद् मतुपि पारोवर्यवदिति कथमित्याक्षेपः, उत्वस्य खप्रत्ययसंनियोगशिष्टत्वादिति भावः। उत्वं दुरुपपादमेवेत्याह—**असाधुरेवेति**। नन्वत्र परोवरेति निर्देशात् खादन्यत्राप्युत्वं किं न स्यादित्यत आह **खप्रत्ययसंनियोगेनैवेति**। अत एव भाष्ये 'परांश्चावरांश्चानुभवति' इत्येव विग्रहो दर्शित इति भावः। **अवारपार**। अवारपार, अत्यन्त, अनुकाम एभ्यो गामीत्यर्थे खः स्यादित्यर्थः। गामीत्यस्य अवश्यं गमिष्यन्नित्यर्थः। 'आवश्यकाधमर्ण्ययोर्णिनिः' इति णिनिः। 'भविष्यति गम्यादयः' इति भविष्यत्कालता। 'बहुलमाभीक्ष्ण्ये' इति वा णिनिः। **अवारपारीण इति**। अवारपारं गामीति विग्रहः। अवारपारशब्दाद्विगृहीताद्विपरीतादपि, व्याख्यानात्। तदाह **अवारीणः**। **पारीण इति**। **अत्यन्तीन इति**। अत्यन्तशब्दोऽत्र भृशवाची। तदाह **भृशं गन्तेति**। **अनुकाममिति**। काम इच्छा। तामनतिक्रम्येत्यर्थः। पदार्थानतिवृत्तावव्ययीभावः। **समां समाम्**। विपूर्वो जनिर्गर्भविमोचने वर्तते। विजायते–गर्भं विमुञ्चतीत्यर्थः। धात्वर्थेनोपसंग्रहादकर्मकः। अतो न कर्मणि द्वितीया। गर्भविमोचनेन कृत्स्नायाः समाया अव्यापनादत्यन्तसंयोगलक्षणा द्वितीयापि न भवति, किंतु सप्तम्येव।

निपात्यते तस्मात्परस्यातः 'एङः पदान्तात्' इति पूर्वरूपादेश इति पक्षान्तरमाहुः। **अवारपार**। **गामीति**। 'गमेरिनिः, आङि णिच्च' इति बहुलवचनात्केवलादपि णिनिः। 'भविष्यति गम्यादयः' इति भविष्यत्कालता। न्यासकारस्तु 'आवश्यके णिनिः सोऽपि भविष्यत्येव' इत्याह। **अवारपारमिति**। 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीप्रतिषेधः। केचित्तु 'गत्यर्थकर्मणि–' इति सूत्रे द्वितीयाग्रहणमपवादविषये विधानार्थम्। तेन कृद्योगषष्ठी न भवति 'ग्रामं गन्ता' इतिवदिति व्याचख्युः। तदसत्, 'अकेनोः–' इति प्रतिषेधे षष्ठीप्रसङ्गस्यैवाभावात्। **अवारीण इत्यादि**। 'विगृहीताद्विपरीतादपीष्यते' इति भावः। **अत्यन्तमिति**। क्रियाविशेषणम्। **अनुकाममिति**। काम इच्छा तस्य सदृशमनुकामम्। कामानुरूपमित्यर्थः। 'अव्ययं

पूर्वपदे निपात्यते। समांसमीना गौः। 'समांसमीना सा यैव प्रतिवर्षं प्रसूयते' इत्यमरः। 'खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः' (वा ३१००)। समां समां विजायते। समायां समायां वा। १८१४ अद्यश्वीनावष्टब्धे। (५-२-१३) अद्य श्वो वा

तत्र सप्तम्यन्तस्य समायामित्यस्य 'नित्यवीप्सयोः' इति द्विर्वचने समायां समायामिति भवितव्यम्। तत्र पदद्वयमपि यकारलोपसहितं निर्दिश्यते–समां समामिति। समायां समायामित्यर्थः। एवं च समायां समायां विजायत इत्यर्थे सप्तम्यन्तद्वयसमुदायाद् विजायत इत्यर्थे खः स्यादिति फलितम्। ननु सप्तम्यन्तद्वयसमुदायात् खप्रत्ययोत्पत्तौ तदन्तस्य समुदायस्य प्रातिपदिकत्वात् तदवयवयोः सप्तम्योर्लुकि समासमीन इति स्यात्, इष्यते तु समांसमीनेति, तत्राह **यलोप इति**। पूर्वपदे विभक्तेः तस्य यकारस्य लोपः, अवशिष्टस्य विभक्त्यंशस्य अलुक्च निपात्यत इत्यर्थः। भाष्ये तु 'यलोपनिपातनादवशिष्टविभक्त्यंशस्य न लुक्' इत्युक्तम्। ननु समां समामिति निर्देशाद् उत्तरपदेऽपि यकारलोपः अवशिष्टविभक्त्यंशस्य अलुक् च स्यादित्यत आह **पूर्वपद इति**। 'पूर्वपदस्य यलोपवचनम्' इति वार्तिकादिति भावः। **खप्रत्ययानुत्पत्ताविति**। पदद्वयेऽपीति शेषः। इह विभाषया कदाचित् खप्रत्ययाभावे सति समायां समायां विजायत इति वाक्यदशायां सप्तम्यन्तद्वये यकारलोपो वा वक्तव्य इत्यर्थः। तत्र पदद्वयेऽपि निपातनादेव यकारलोपः सिद्धः, सूत्रे उभयत्रापि तथोच्चारणात्। विकल्प एव तु यलोपस्य वाक्यदशायां वाचनिक इति बोध्यम्। एतत्सर्वं भाष्ये स्पष्टम्। **अद्यश्वीनाऽवष्टब्धे**। अद्यश्वीनेत्यविभक्तिको निर्देशः। अवष्टब्धम् आसन्नम्। 'अवाच्चालम्बनाविदूर्ययोः' इत्याविदूर्ये स्तम्भेः षत्वविधानात्। अद्य श्वो वा

विभक्ति–' इति यथार्थेऽव्ययीभावः। **समांसमाम्। यलोप इति**। 'समायाम्' इत्यत्र यकारलोप इत्यर्थः। **पूर्वपदे निपात्यत इति**। अन्यथा तद्धिते उत्पन्ने यथोत्तरपदे सुपो लुग् भवति 'सुपो धातुप्रातिपदिकयोः' इति तथा पूर्वपदेऽपि स्यादिति भावः। **समांसमीनेति**। वीप्सायां द्विर्वचनम्। सुबन्तसमुदायः प्रकृतिः। विजायत इत्येतद्व्याचष्टे—**प्रसूयत इति**। विपूर्वको जनिर्गर्भविमोचने वर्तत इति भावः। गर्भविमोचने कृत्स्नायाः समाया व्याप्त्यभावाद् 'अत्यन्तसंयोगे च' इति द्वितीया न भवतीत्याशयेनाह—**समायामित्यादि**। **खप्रत्ययानुत्पत्ताविति**। पदद्वयेऽपीति शेषः। वार्तिकेन समांसमामिति सौत्रप्रयोगस्तूपपन्न इति भावः। **अद्यश्वीना**। अविभक्तिको निर्देशो न तु स्त्रीलिङ्गनिर्देशोऽयम्। अद्यश्वीनो गोसमूहः। अद्यश्वीनं गोमण्डलमित्यादावपीष्टत्वात्। **अद्य श्वो वेति**। निपातनाद् वार्थे समासोऽयमिति भावः। 'अवाच्चालम्बना–' इति सूत्रेण आविदूर्ये स्तम्भेः षत्वविधा-

विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायत इति नानुवर्तयन्ति। अद्यश्वीनं मरणम्। आसन्नमित्यर्थः। १८१५ आगवीनः। (५-२-१४) आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः। १८१६ अनुग्वलं गामी। (५-२-१५) अनुगु—गोः पश्चात्पर्याप्तं गच्छति अनुगवीनो गोपालः। १८१७ अध्वनो यत्खौ। (५-२-१६)

विजायत इत्यर्थे अद्य श्वस् इति समुदायात्खः स्यादासन्नत्वे गम्य इत्यर्थः। **अद्यश्वीना वडवेति**। अद्य वा श्वो वेति वार्थे निपातनात्समासः। खे सति 'अव्ययानां भमात्रे—' इति टिलोपः। सूत्रे अद्यश्वीनेति टाबन्तनिर्देशे तु अद्यश्वीनो गोसमूहः, अद्यश्वीनं गोमण्डलमिति न स्यात्। **आगवीनः। कर्मकर इति।** वार्तिकलभ्यमिदम्। भृतिं गृहीत्वा यः कर्म करोति स कर्मकरः। अत्र गोपालो विवक्षितः। स हि प्रातर्गा गृहीत्वा आसायं चारयित्वा स्वामिनो गृहं नीत्वा प्रत्यर्पयति, तदाह **गोः प्रत्यर्पणेति। आगवीन इति।** गोशब्दो गोप्रत्यर्पणे लाक्षणिकः। 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावे 'गोस्त्रियोः—' इति ह्रस्वत्वे आगुशब्दात् खे 'ओर्गुणः' इति भावः। **अनुग्वलं गामी।** अनुगु इत्यविभक्तिको निर्देशः। गोः पश्चादिति विग्रहे पश्चादर्थे अनोरव्ययीभावे ह्रस्वत्वे अनुगुशब्दः। तस्माद् अलंगामीत्यर्थे खः स्यादित्यर्थः। अत्र अनुगु इत्यस्य क्रियाविशेषणत्वाद् द्वितीयैव समर्थविभक्तिरिति हरदत्तः। कृद्योगषष्ठीत्यन्ये। अलंगामीत्यत्र अलंशब्दस्य विवरणं—पर्याप्तमिति क्रियाविशेषणम्। **अध्वनो यत्खौ।** अध्वन्शब्दाद् अलंगामीत्यर्थे यत्खौ स्त

नादवष्टब्धशब्द आसन्नपरः। 'विजायते' इति हि वर्तते। स च गर्भविमोचनार्थकस्तदाह—**आसन्नप्रसवेत्यर्थ इति। कर्मकर इति।** यस्तु प्रातर्गा गृहीत्वा गच्छति गोपालस्तस्मिन्नित्यर्थः। **गोः प्रत्यर्पणपर्यन्तमिति।** गोशब्दो लक्षणया गोः प्रतिदाने वर्तत इति भावः। **आगवीन इति।** 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावे 'गोस्त्रियो—' इति ह्रस्वे कृते खप्रत्ययः। 'ओर्गुणः'। **अनुग्वलं।** ख इत्यनुवर्तते। अनुगुशब्दाद् 'अलंगामी' इत्यस्मिन्नर्थे खः स्यात्। **गोः पश्चादिति।** पश्चादर्थेऽव्ययीभावः। **पर्याप्तमिति।** क्रियाविशेषणम्। अत्र हरदत्तः—अनुग्वित्यस्य क्रियाविशेषणत्वाद् द्वितीयान्तादिह प्रत्ययः। न चालंगामीत्यस्य 'सुप्यजातौ—' इति णिनिप्रत्ययान्ततया कृद्योगलक्षणा षष्ठी स्यादिति वाच्यम्, क्रियाविशेषणात्तदप्रवृत्तेः शोभनं पाचक इत्यादौ तथादर्शनादित्याह। अत्र केचित्—धातूपात्तव्यापारजन्यफलाश्रयत्वं यत्र तन्मुख्यं कर्म, यत्र तु व्यापारजन्यत्वमात्रं तदौपचारिकम्। ततश्च तण्डुलानां पाचक इत्यत्र मुख्ये कर्मणि कृद्योगलक्षणा षष्ठी भवति। मृदु पाचकः,

अध्वानमलं गच्छति अध्वन्यः, अध्वनीनः। 'ये चाभावकर्मणोः' (सू ११२४) 'आत्माध्वानौ खे' (सू १६७१) इति सूत्राभ्यां प्रकृतिभावः। १८१८ **अभ्यमित्राच्छ च।** (५-२-१७) चाद्यत्खौ। अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः। अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः। १८१९ **गोष्ठात्खञ्भूतपूर्वे।** (५-२-१८) गोष्ठो भूतपूर्वः गौष्ठीनो देशः। १८२० **अश्वस्यैकाहगमः।** (५-२-१९) एकाहेन गम्यते इत्येकाहगमः आश्वीनोऽध्वा। १८२१ **शालीनकौपीने अधृष्टाकार्ययोः।** (५-२-२०) शालाप्रवेशमर्हति शाली-

---

इत्यर्थः। **अध्वानमलंगच्छतीति।** अलंगामीत्यनेन विग्रहे तु अध्वनोऽलङ्गामीत्येव विग्रहः। **अभ्यमित्राच्छ च।** अमित्रः शत्रुः। तमभिमुखो भूत्वेत्यर्थे 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावे अभ्यमित्रशब्दः। तस्माद् अलङ्गामीत्यर्थे छप्रत्ययः स्यादित्यर्थः। **गोष्ठात्खञ्।** 'भूतपूर्वे' इति प्रकृतिविशेषणम्। भूतपूर्वार्थवृत्तेर्गोष्ठशब्दात्स्वार्थे खः स्यादिति वृत्तिकृतः। **अश्वस्यैकाहगमः।** अश्वशब्दात् षष्ठ्यन्ताद् एकाहगम इत्यर्थे खञ् स्यादित्यर्थः। एकाहगमशब्दं व्युत्पादयति— **एकाहेनेति।** अस्मादेव निपातनात्कर्मणि गमेरबिति भावः। 'कर्तृकरणे कृता–' इति समासः। अश्वस्येति कर्तरि षष्ठी। **आश्वीनोऽध्वेति।** अश्वेन कर्त्रा एकाहेन

शोभनं पाचक इत्यत्र तु सा न भवति। फलव्यापारयोः क्रियाकर्मभावव्यवहारे सत्यपि फलस्यौपचारिककर्मत्वात्, तद्विशेषणत्वाच्च मृद्वादेरिति तस्याशय इत्याहुः। अन्ये त्वेवं तर्हि तुल्यन्यायेन क्रियाविशेषणाद् द्वितीयाया अप्यप्रवृत्तिः स्यात्। तस्मात्, 'तदर्हम्' इति निर्देशादनित्या कृद्योगषष्ठीति क्रियाविशेषणात्सा न स्वीक्रियत इति हरदत्ताशयः कथंचिद्वर्णनीय इत्याहुः। वस्तुतस्तु पश्चादर्थेऽव्ययीभावोऽयमिति निर्विवादम्। पश्चादिति चास्तात्यर्थे निपातितम्। तच्च यद्यपि विभक्तित्रयसाधारणम्, तथापीह योग्यताबलात्सप्तम्यर्थवृत्तिः। अतस्तस्य कर्मत्वायोगात्प्रथमान्तादेवेह प्रत्यय इति वक्तुमुचितम्, कृद्योगलक्षणषष्ठीशङ्काप्यत्र एव नेति बोध्यम। **अभ्यमित्रात्।** अभ्यमित्रशब्दो 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः। क्रियाविशेषणत्वाद् द्वितीया समर्थविभक्तिः। **गोष्ठात्खञ्।** गावस्तिष्ठन्त्यस्मिन्निति गोष्ठः। 'घञर्थे कविधानम्' इत्यधिकरणे कः। 'अम्बाम्बगोभूमि–' इति षत्वम्। पूर्वं भूतो भूतपूर्वः 'सुप्सुपा' इति समासः। **अश्वस्य।** कर्तरि षष्ठीयं निर्देशादेव समर्थविभक्तिः। **एकाहगम इति।** 'कर्तृकरणे कृता–' इति समासः। नन्विह 'ग्रहवृदृनिश्चिगमश्च' इत्यपं बाधित्वा 'परिमाणाख्यायां सर्वेभ्यः' इति घञ् प्राप्नोति, अस्ति चात्र परिमाणाख्या 'एकाहेन गम्यते' इति परिच्छेदावगमात्। अत्राहुः—अस्मादेव

नोऽधृष्टः । कूपपतनमर्हति कौपीनं पापम् । तत्साधनत्वात्तद्वद्गोप्यत्वाद्वा पुरुषलिङ्गमपि, तत्सम्बन्धात्तदाच्छादनमपि । **१८२२ व्रातेन जीवति ।** (५-२-२१) व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स व्रातीनः । **१८२३ सात्पदीनं सख्यम् ।** (५-२-२२) सप्तभिः पदैरवाप्यते साप्तपदीनम् । १८२४

गन्तुं शक्य इत्यर्थः । **शालीन ।** 'शालाप्रवेशमर्हत्यधृष्ट इति, कूपावतरणमर्हत्यकार्यमिति चार्थे शालाप्रवेशशब्दात्कूपावतरणशब्दाच्च खञ् । प्रवेशशब्दस्य अवतरणशब्दस्य चोत्तरपदस्य लोपे शालीनकौपीनशब्दौ निपात्येते' इति भाष्यम् । **अधृष्ट इति ।** अप्रगल्भ इत्यर्थः । अप्रागल्भ्यादन्यत्र गन्तुमशक्तः शालाप्रवेशमेवार्हति यः स शालीन इति यावत् । **कूपपतनमिति ।** कूपावतरणशब्दस्य विवरणमिदम् । कूपशब्दो नरकाभिधायी । **कौपीनं पापमिति ।** नरकपतनसाधनमकार्यं पापमित्यर्थः । अनयोरर्थयोरेतौ रूढौ । ननु पुरुषलिङ्गे कथं कौपीनशब्द इत्यत आह— **तत्साधनत्वादिति ।** पापसाधनत्वाद्वा, पापवदाच्छादनीयत्वाद्वा पुरुषलिङ्गे कौपीनशब्दो लाक्षणिक इत्यर्थः । **तत्सम्बन्धादिति ।** कौपीनशब्दस्य लक्ष्यपुरुषलिङ्गसम्बन्धात् तदाच्छादनवस्त्रखण्डे कौपीनशब्दो लक्षितलक्षणया प्रयुज्यत इत्यर्थः । **व्रातेन जीवति ।** व्रातशब्दात्तृतीयान्ताद् जीवतीत्यर्थे खञ् स्यादित्यर्थः । 'नानाजातीयानाम् अलब्धजीवनद्रव्याणां भारवहनादिकष्टकर्मजीविनां सङ्घो व्रातः । तस्य यज्जीवनार्थं कष्टं कर्म तदिह व्रातम्' इति भाष्यम् । तादृशसङ्घवाचिनो व्रातशब्दात् 'तस्येदम्' इत्यणि व्रातशब्दोऽत्र तदीयकर्मणि विवक्षित इति तदाशयः, तदाह **शरीरायासेनेति । साप्तपदीनम् ।** सप्तपदशब्दात् तृतीयान्तादवाप्यं सख्यमित्यर्थे खञि साप्तपदीनमिति भवतीत्यर्थः । **सप्तभिः पदैरिति ।** पदविक्षेपैरित्यर्थः ।

निपातनादप् द्रष्टव्य इति । **शालीनकौपीने ।** इमौ खप्रत्ययान्तत्वेन निपात्येते । रूढिशब्दावेतौ कथंचिद्व्युत्पाद्याविति नात्रावयवार्थेऽभिनिवेशः कार्यः । **शालाप्रवेशमिति ।** अप्रागल्भ्यादन्यत्र गन्तुमशक्तः शालामेव प्रवेष्टुमर्हतीत्यर्थः । **कूपपतनमिति ।** यदकार्यं तत्प्रच्छादनीयत्वात्कूपावतरणमर्हतीत्यर्थः । **तदाच्छादनमिति ।** वासःखण्ड इत्यर्थः । अन्ये त्वाहुः—यदकार्यशब्दे यः करोति स क्रियासामान्यवचनः, तेन लज्जाहेतुत्वेन अद्रष्टव्यत्वात्पुरुषलिङ्गं कौपीनम् ; अस्पृश्यत्वात्तदाच्छादनमिति । **शरीरायासेनेति ।** भारवहनादिनेत्यर्थः । यद्यपि व्रातशब्दो लोके सङ्घातवचनः, तथाप्यत्रत्यभाष्यादिग्रन्थपर्यालोचनया अयमेवार्थ इहोचित इति भावः । **साप्तपदीनम् ।** योग्यतया समर्थविभक्तिस्तृतीयेति दर्शयति—**सप्तभिः पदैरिति ।** पदमिह संभाषणं पादविक्षेपो वा । तद्धितार्थे द्विगुः । अवाप्यत इत्यर्थे

हैयङ्गवीनं संज्ञायाम्। (५-२-२३) ह्योगोदोहस्य हियङ्गुरादेशो विकारार्थे खञ् च निपात्यते। दुह्यत इति दोहः क्षीरम्। ह्योगोदोहस्य विकारो हैयङ्गवीनम्—नवनीतम्। १८२५ **तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ।** (५-२-२४) पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहम्। १८२६ **पक्षात्तिः।** (५-२-२५) मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः। १८२७ **तेन वित्तश्चुञ्चुप्चणपौ।** (५-२-२६) चकारः प्रत्यययोरादौ लुप्तनिर्दिष्टः, तेन चस्य नेत्संज्ञा। विद्यया वित्तो विद्याचुञ्चुः। विद्याचणः।

हैयङ्गवीनम्। ह्यस् इत्यव्ययं पूर्वेद्युरित्यर्थे। तत्रोत्पन्नो गोदोहः—गोपयः, ह्योगोदोहः। तस्मात् षष्ठ्यन्ताद् विकारार्थे खञि ईनादेशे प्रकृतेः हियङ्गु इत्यादेशे ओर्गुणे अवादेशे आदिवृद्धौ हैयङ्गवीनमिति भवति संज्ञायाम् इति भाष्यम्, तदाह **ह्योगोदोहस्येत्यादिना। नवनीतमिति।** भाष्ये तु 'हैयङ्गवीनं घृतम्' इति दृश्यते। 'तत्तु हैयङ्गवीनं स्याद् ह्योगोदोहोद्भवं घृतम्' इत्यमरः। **तस्य पाकमूले।** पाकमूले इति समाहारद्वन्द्वात्सप्तमी। पाकः परिणामः। षष्ठ्यन्तेभ्यः पील्वादिभ्यः पाकेऽर्थे कुणप्। कर्णादिभ्यस्तु मूलेऽर्थे जाहजित्यर्थः। कुणपस्तद्धितत्वात् ककारस्य नेत्संज्ञा। जाहचस्तु जकारस्य प्रयोजनाभावाद् नेत्संज्ञा। **पक्षात्तिः। मूलग्रहणमात्रमिति।** पूर्वसूत्रे पाकमूल इति समासनिर्दिष्टत्वेऽप्येकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। 'तस्य' इत्यप्यनुवर्तते। पक्षशब्दात् षष्ठ्यन्ताद् मूलेऽर्थे तिप्रत्ययः स्यादित्यर्थः। **तेन वित्तः।** तृतीयान्ताद् वित्त इत्यर्थे

खञ्। **हैयङ्गवीनम्। ह्योगोदोहस्येति।** गोर्दोहो गोदोहः षष्ठीसमासः। तेन सह ह्यस्शब्दस्य 'सुप्सुपा' इति समासः। ततो विकारे अनुदात्तलक्षणस्याञोऽपवादः खञ्। ह्यस्शब्देन कालप्रत्यासत्तिर्विवक्षिता। **नवनीतमिति।** यद्यपि वृत्तौ घृतमित्युक्तम्, तथैव चामरेणापि—'तत्तु हैयङ्गवीनं यद् ह्योगोदोहोद्भवं घृतम्' इत्युक्तम्, तथापि घृतशब्देन नवनीतमेव विवक्षितमिति हरदत्तग्रन्थानुरोधेनेदमुक्तम्। **तस्य पाक।** पाकः परिणामः। मूलमुपक्रमः। 'तस्येदम्' इत्यादिषु प्रातिष्विकमारम्भः। जाहचो जकारस्य प्रयोजनाभावान्नेत्त्वम्। पीलु, कर्कन्धु, शर्मी, करीर, कुवल, बदर, अश्वत्थ, खदिर पील्वादिः। कर्ण, अक्षि, नख, मुख, केश, पाद, गुल्फ, भ्रू, शृङ्ग, दन्त, ओष्ठ, पृष्ठ कर्णादिः। **मूलग्रहणमात्रमिति।** एकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। **पक्षातिरिति।** प्रतिपत्, पक्षिणां पक्षमूलं च। **तेन वित्तः।** वित्तः प्रतीतः। 'वित्तो भोगप्रत्यययोः' इति निपातनाद् 'रदाभ्यां निष्ठातो नः—' इति नत्वं न। **लुप्तनिर्दिष्ट इति।** 'चुटूषः प्रत्ययस्य' इति वक्तव्ये पृथग्योगकरणाद्

१८२८ **विनञ्भ्यां नानाञौ नसह**। (५-२-२७) असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ । विना । नाना । १८२९ **वेः शालच्छङ्कटचौ** । (५-२-२८) क्रियाविशिष्टसाधनवाचकात्स्वार्थे । विस्तृतं विशालम् । विशङ्कटम् । १८३० **संप्रोदश्च कटच्** । (५-२-२९) संकटम् । प्रकटम् । उत्कटम् । चाद् विकटम् । 'अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्' (वा ३१०७)। अला-

---

चुञ्चुप्चणपौ भवत इत्यर्थः । वित्तः प्रसिद्धः । **चस्य नेत्संज्ञेति** । उपदेशे आदित्वाभावादिति भावः । **विनञ्भ्याम्** । नसहेति संघातः पृथक्त्वे वर्तते । प्रकृतिविशेषणमिदम् , तदाह **असहार्थे इति** । तस्य विवरणं **पृथग्भाव इति** । वर्तमानाभ्यामित्यनन्तरं विनञ्भ्यामिति शेषः । **स्वार्थे इति** । प्रत्ययार्थस्य अनिर्देशादिति भावः । **प्रत्ययाविति** । यथासङ्ख्यं नानाञाविति शेषः । **विनेति** । वेर्नाप्रत्यये रूपम् । पृथगित्यर्थः । **नानेति** । नञो नाञि आदिवृद्धौ रूपम् । पृथगित्यर्थः । नसहेत्यस्य प्रत्ययार्थत्वे तु 'ना' इत्यनेन न सहेति गम्येत । एवं सति नाना-न न सह, किंतु सहैवेत्यर्थः स्यात् , 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायाद् इति भाष्ये स्पष्टम् । **वेः शालच्छङ्कटचौ** । **क्रियाविशिष्टेति** । क्रियाविशिष्टकारकवाचकात्स्वार्थे शालच्शङ्कटच्प्रत्ययौ स्त इति यावत् । इदं च भाष्ये स्पष्टम् । **संप्रोदश्च कटच्** । सं, प्र, उत् एभ्यश्च क्रियाविशिष्टसाधनवाचिभ्यः स्वार्थे कटच् स्यादित्यर्थः । चाद्वेरपि । संकटं संहतमित्यर्थः । निबिडीकृतमिति यावत् । **प्रकटमिति** । प्रज्ञातमित्यर्थः । प्रकाशमिति यावत् । **उत्कटमिति** । उन्नतमित्यर्थः । अधिकमिति यावत् । रूढशब्दा एते कथञ्चिद्व्युत्पाद्याः । **अलाबूति-**

'चुञ्चू' इत्येतदनित्यमिति समाधानान्तरमप्याहुः । **नानाञाविति** । नाञो ञकारो वृद्ध्यर्थः स्वरार्थश्च । 'न सह' इति प्रकृतिविशेषणम् , न प्रत्ययार्थ इत्याशयेनाह— **असहार्थे इत्यादि** । यदि प्रत्ययार्थः स्यात्ततो 'द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः' इति सहार्थो गम्येत 'न न सह, अपि तु सहैव' इति । तस्मात्प्रकृतिविशेषणम् । एतच्च व्याख्यानाल्लभ्यते । यद्येवं सहेत्येव प्रत्ययार्थोऽस्तु, विनञोः प्रतिषेधार्थत्वादिष्टसिद्धेः 'विगर्दभरथकः' इत्यादौ विशब्दस्यापि प्रतिषेधवृत्तिर्दृष्टैवेति । सत्यम् , क्रियावाचिनो विशब्दात्सहार्थे प्रत्ययो विज्ञायेत । विगतेन सह विकृतेन सहेति । तस्माद्यथोक्तमेव न्याय्यम् । एतच्च हरदत्तग्रन्थे स्पष्टम् । **स्वार्थे इति** । विनिर्दिष्टार्थत्वादिति भावः । **संप्रोदश्च** । क्रियाविशिष्टसाधनवाचकात्स्वार्थे प्रत्ययः । संकटं संहृतम् , संबाध इत्यर्थः । प्रकटं प्रज्ञातम् , प्रकाशत इत्यर्थः । उत्कटं उद्भूतम् , विकटं विकृतम् , रूढशब्दाश्चैते कथंचिद्व्युत्पाद्यन्ते । **अलाबूतिलेत्यादि** । एभ्यः पञ्चभ्यो रजस्यभिधेये

चूर्णो रजः अलाबूकटम् । 'गोष्ठजादयः स्थानादिषु पशुनामभ्यः' (वा ३१०९)। गवां स्थानं गोगोष्ठम्। 'सङ्घाते कटच्' (वा ३११०) । अवीनां सङ्घातः अविकटः । 'विस्तारे पटच्' (वा ३११२) । अविपटः । 'द्वित्वे गोयुगच्' । (वा ३११६)। द्वौ वृषौ वृषगोयुगम्। 'षट्त्वे षड्गवच्' (वा ३११७) अश्वषड्गवम्। 'स्नेहे तैलच्' (वा ३११८)। तिलतैलम् सर्षपतैलम्। 'भवने क्षेत्रे शाकटशाकिनौ' (वा ३११९) इक्षुशाकटम्, इक्षुशाकिनम्। १८३१ अवात्कुटा-

---

लेति । अलाबू, तिल, उमा, भङ्गा—इत्येभ्यः षष्ठ्यन्तेभ्यो रजसि अभिधेये कटचः उपसंख्यानमित्यर्थः । विकारप्रत्ययानामपवादोऽयम् । रजः चूर्णरेणुः । गोष्ठजादय इति । पशुनामभ्यः स्थानादिष्वर्थेषु गोष्ठजादयः प्रत्यया वक्तव्या इत्यर्थः । गोष्ठजादीनां प्रत्ययानां स्थानादीनां चार्थानां प्रपञ्चनपराणि 'सङ्घाते कटच्' इत्यादीनि 'शाकटशाकिनौ' इत्यन्तानि षड् वार्तिकानि । तेषु चतुर्षु 'पशुनामभ्यः' इत्यनुवर्तते । अप्रसृतावयवः समूहः संघातः । प्रसृतावयवस्तु विस्तारः । द्वित्व इति । प्रकृत्यर्थगतद्वित्व इत्यर्थः । द्वौ वृषौ वृषगोयुगमिति । अवयवकसंघाताभिप्रायमेकवचनम् । द्वयं युगमित्यादिवत् । केचित्तु द्वौ वृषावित्यर्थे वृषगोयुगमिति स्वभावादेकवचनं विंशतिरित्यादिवदित्याहुः । एवमुष्ट्रगो-

---

कटच् प्रत्ययो भवति । रजसो विकारत्वाद्विकारे प्रत्ययानामपवादोऽयम् । अलाबूकटमिति । 'ओरञ्' 'मड्वैतयोः–' इति मयड् वेह प्राप्तः । तिलकटमिति । 'असंज्ञायां तिलयवाभ्याम्' इति मयट् प्राप्तः । उमाशब्दाद् घृतादित्वादन्तोदात्ताद् 'अनुदात्तादेश्च–' इत्यञ्, 'उमोर्णयोर्वा' इति वुञ्च प्राप्तः । भङ्गाशब्दात् 'तृणधान्यानां च द्व्यषाम्' इत्याद्युदात्तत्वादण्मयड्वा प्राप्त इत्येवं यथासंभवं प्रत्ययप्राप्तिरूह्या । हरदत्तस्तु—तिलशब्दस्य घृतादित्वादन्तोदात्तत्वमङ्गीकृत्य ततः 'अनुदात्तादेश्च' इत्यञ्, 'असंज्ञायां तिलयवाभ्याम्' इति मयड् वा प्राप्त इत्याह । तत्र तिलशब्दस्य घृतादित्वकल्पने बीजं चिन्त्यम् । 'तृणधान्यानां च द्व्यषाम्' इति फिट्सूत्रेणाद्युदात्तस्यैव न्याय्यत्वात् । 'तिलाश्च मे' इत्यत्र तथैव वेदे पाठाच्च । गोष्ठजादय इति । 'संघाते कटच्' इत्यादीन्यस्यैव प्रपञ्चः । इहोभयत्रादिशब्दः प्रकारे । पशुनामभ्य इति । 'पशुनामादिभ्यः' इति भाष्ये प्रचुरः पाठः । गवां स्थानमिति । 'तस्येदम्' इत्यत्रार्थे 'सर्वत्र गोरजादिप्रसङ्गे–' इति यति प्राप्ते गोष्ठच् । संघात इति । अप्रसृतावयवः समूहः संघातः । प्रसृतावयवस्तु विस्तारः । कटच्पटचौ द्वावपि सामूहिकानामपवादौ । द्वित्व इति । प्रकृत्यर्थस्य द्वित्वे द्योत्य इत्यर्थः । उष्ट्रगोयुगमिति । द्वयं युगमित्यादिवद् अवयवसङ्घातप्राधान्यादेकवचनम् । एवमग्रेऽपि ।

रच। (५-२-३०) चात्कटच्। अवाचीनोऽवकुटारः, अवकटः। १८३२ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः (५-२-३१) अवाद् इत्येव। नतं नमनम्। नासिकाया नतं अवटीटम्, अवनाटम्, अवभ्रटम्। तद्योगान्नासिका अवटीटा। पुरुषोऽप्यवटीटः। १८३३ नेर्बिडज्बिरीसचौ। (५-२-३२) निबिडम्, निबिरीसम्। १८३४ इनच्पिटच्चिकचि च। (५-२-३३) नेः इत्येव। नासिकाया नतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिक चि इत्यादेशौ च। 'कप्रत्ययचिकादेशौ च वक्तव्यौ' (वा ३१२१)। चिकि-

सुगमम्। अवषड्वम् **अवात्कुटारच्च**। क्रियाविशिष्टसाधनवाचकादवात्स्वार्थे कुटारच्च स्यादित्यर्थः। **अवाचीन इति**। अवाचीने विद्यमानादवात् कुटारचि अवकुटार इत्यर्थः। **नते नासिकायाः**। **अवादित्येवेति**। अवशब्दाद् नासिकाया अवनतेऽर्थे टीटच्, नाटच्, भ्रटच् एते प्रत्ययाः स्युरित्यर्थः। 'णमु प्रह्वत्वे' इति धातोर्भावे क्तप्रत्यये नतशब्द इत्यभिप्रेत्याह **नतं नमनमिति**। प्रह्वत्वमित्यर्थः। ननु यदि नासिकाया नमनमवटीटं तर्हि अवटीटा नासिकेति कथमित्यत आह **तद्योगादिति**। नमनयोगात्तत्र लाक्षणिकमिति भावः। **पुरुषोऽप्यवटीट इति**। तादृशनासिकायोगादिति भावः। **नेर्बिडज्बिरीसचौ**। 'नते नासिकायाः संज्ञायाम्' इत्यनुवर्तते। नेः नासिकाया नतेऽर्थे बिडच्, बिरीसच् द्वौ प्रत्ययौ स्त इत्यर्थः। निबिडा वृक्षाः इति तु उपमानादित्याहुः। **इनच्पिटच्**। इनच्पिटच् इति समाहारद्वन्द्वात्प्रथमैकवचनम्। चिकचि इत्यपि चिक चि इत्यनयोः समाहारद्वन्द्वात्प्रथमैकवचनम्। **प्रकृतेरिति**। नेरित्यर्थः। तत्र इनचि परे चिक इत्यादेशः। तत्र अकार उच्चारणार्थः। पिटचि तु परे चि इत्यादेशः।

नतमिति। नपुंसके भावे क्तः। **नमनमिति**। नीचैस्त्वमित्यर्थः। **अवटीटमिति**। नासिकासाधनके नमने वर्तमानादवशब्दात्स्वार्थे प्रत्ययः। कथं तर्हि नासिकायां पुरुषे चावटीटशब्दस्य प्रयोग इत्यत आह—**तद्योगादिति**। **नेर्बिडच्**। 'नते नासिकायाः संज्ञायाम्' इति वर्तते। निशब्दान्नासिकाया नतेऽभिधेये बिडज्बिरीसचौ स्तः। **निबिडमिति**। तद्योगान्निबिडा नासिका, निबिरीसा। कथं तर्हि 'निबिडाः केशाः, निबिडं वस्त्रम्' इति। उपमानाद्भविष्यति। एतच्च काशिकायां स्पष्टम्। केचित्तु उक्तप्रयोगानुरोधेनेह सूत्रे 'नते नासिकायाः-' इति नानुवर्तत इति व्याचक्षते। **प्रकृतेरिति**। निशब्दस्येत्यर्थः। **आदेशौ चेति**। प्रत्ययौ तत्संनियोगेन यथा-

१ 'निबिडाः केशा इति प्रयोगात् 'नते नासिकाया-' इत्यादेरत्रासम्बन्धः' इति तु शब्देन्दुशेखरे।

नम्। चिपिटम्। चिक्कम्। 'क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी' (वा ३१२२) क्लिन्ने चक्षुषी अस्य चिल्लः। पिल्लः। 'चुल् च' (वा ३१२३)। चुल्लः।

१८३५ उपाधिभ्यां त्यकन्नासन्नारूढयोः। (५-२-३४) 'संज्ञायाम्' इत्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्यका। आरूढं स्थलमधित्यका।

१८३६ कर्मणि घटोऽठच्। (५-२-३५) घटत इति घटः। पचाद्यच्। कर्मणि

कप्रत्ययेति। उक्तेः कप्रत्ययः प्रकृतेः चिकादेशश्चेत्यर्थः। अयमपि ककारान्त एवादेशः। **चिकिनमिति।** इनचि प्रत्यये कृते नेः चिकादेशे रूपम्। **चिपिटमिति।** पिटचि कृते नेः चि इत्यादेशे रूपम्। **चिक्कमिति।** कप्रत्यये नेः चिकादेशे रूपम्। **क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी इति।** वार्तिकमिदम्। चिल्पिल् इति समाहारद्वन्द्वात्प्रथमैकवचनम्। क्लिन्ने अस्य चक्षुषी इति विग्रहे क्लिन्नशब्दाद् अस्य चक्षुषी इत्यर्थे लप्रत्ययः, प्रकृतेः चिल् पिल् एतावादेशौ स्त इत्यर्थः। **क्लिन्ने इति।** नेत्रामयप्रयुक्तजलनिष्यन्दवती इत्यर्थः। **चिल्लः। पिल्ल इति।** क्लिन्नचक्षुष्क इत्यर्थः। **चुल् चेति।** उक्तविषये क्लिन्नस्य चुल् आदेशश्च लप्रत्ययसंनियोगेन वक्तव्य इत्यर्थः। **उपाधिभ्याम्।** उप, अधि आभ्यां यथासंख्यमासन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन्प्रत्ययः स्यादित्यर्थः। आसन्नं समीपम्। आरूढम् उच्चम्। **अनुवर्तत इति।** 'नते नासिकायाः-' इत्यस्मादिति भावः। कस्य समीपं कस्योच्चम् इत्याकाङ्क्षायां संज्ञाधिकारात् पर्वतस्येति लभ्यत इत्यभिप्रेत्याह **पर्वतस्येति। उपत्यका। अधित्यकेति।** स्त्रीत्वं लोकात्। अत्र 'प्रत्ययस्थात्-' इति इत्त्वं तु न, 'त्यकनश्च' इत्युक्तेः। **कर्मणि घटोऽठच्।** सप्तम्यन्तात् कर्मशब्दाद् घट इत्यर्थे अठच्स्यादित्यर्थः। घटशब्दस्य कलशपर्या-

---

संख्यमिमावादेशौ च स्त इत्यर्थः। **चिकिनमिति।** इनच्प्रत्ययसंनियोगेन चिकादेशः। **चिपिटमिति।** पिटच्प्रत्ययसंनियोगेन चि इत्यादेशः। **क्लिन्नस्येति।** चिल् पिल् इत्येतावादेशौ भवतो लश्च प्रत्ययः 'अस्य चक्षुषी' इत्येतस्मिन्नर्थे। **चुल् चेति।** चाल्लप्रत्ययः। **चुल्ल इति।** क्लिन्ने अस्य चक्षुषी इति पूर्वोक्त एव विग्रहः। कथं तर्हि 'स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्षिण चाप्यमी' इत्यमर इति चेत्। अत्राहुः— पुरुषे व्युत्पादितानां तदवयवे लक्षणा बोध्या। अन्ये त्वाहुः—अस्य चक्षुषी इत्यत्र 'अस्य' इति न वक्तव्यम्। क्लिन्ने चक्षुषी चिल्ले पिल्ले। पुरुषे तु मत्वर्थेऽच् अर्श-आदिषु 'स्वाङ्गाद्धीनात्' इति सूत्रितत्वादिति। **उपाधिभ्याम्।** संज्ञाधिकारादिह नियतविषयमासन्नारूढं गृह्यत इत्याशयेनाह—**पर्वतस्येति।** आसन्नं समीपम्। आरूढमुच्चस्थानम्। **उपत्यकेति।** 'प्रत्ययस्थात्-' इतीत्वं तु न भवति, 'त्यकनश्च

घटते कर्मठः पुरुषः । **१८३७ तदस्य सञ्जातं तारकादिभ्य इतच् ।** (५-२-३६) तारकाः सञ्जाता अस्य तारकितं नभः । आकृतिगणोऽयम् । **१८३८ प्रमाणे द्वयसज्दघ्नञ्मात्रचः ।** (५-२-३७) तदस्य इत्यनुवर्तते । ऊरू प्रमाणमस्य ऊरुद्वयसम्, ऊरुदघ्नम्, ऊरुमात्रम् । 'प्रमाणे लः' (वा ३१२८) शमः । दिष्टिः । वितस्तिः । 'द्विगोर्नित्यम्' (वा ३१२९) । द्वौ शमौ प्रमाणमस्य

यत्वभ्रमं वारयति । **कर्मणि घटत इति** । व्याप्रियत इत्यर्थः । तथा चात्र घटशब्दो यौगिको घटमाने वर्तत इति भावः । **कर्मठ इति** । अठचि 'नस्तद्धिते' इति टिलोपः । अठचि ठस्य अङ्गात्परत्वाभावादिकादेशाभाव इति भावः । **तदस्य ।** प्रथमान्तेभ्यस्तारकादिभ्यः अस्य तत्संजातमित्यर्थे इतच् स्यादित्यर्थः । **तारकितं नभ इति ।** संजातनक्षत्रमित्यर्थः **आकृतिगणोऽयमिति** । तेन पुष्पितो वृक्षः फलित इत्यादिसंग्रहः । **प्रमाणे । अनुवर्तत इति** । ततश्च अस्य प्रमेयस्य तत्प्रमाणमित्यर्थे प्रमाणे विद्यमानात्प्रथमान्ताद् द्वयसच्, दघ्नच्, मात्रच् एते प्रत्ययाः स्युः । 'प्रमाणवानिदमर्थोऽत्र प्रत्ययार्थः' इति भाष्ये स्पष्टम् । तत्र 'प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम' इति भाष्ये उक्तम् । प्रमाणमिह परिच्छेदकमात्रम्, तत्र मात्रच्—प्रस्थमात्रमूरुमात्रमित्यादि इति कैयटः । वस्तुतस्तु 'यत्तदेतेभ्यः–' इति सूत्रभाष्यस्वरसादायामपरिच्छेदकमेवात्र प्रमाणम् इति शब्देन्दुशेखरे विस्तरः । **प्रमाणे ल इति ।** लुको ल इति पूर्वाचार्यशास्त्रसिद्धा संज्ञा । प्रमाणे वर्तमानाद्विहितस्य द्वयसजादेर्लुग्वक्तव्य इत्यर्थः । **शमो दिष्टिर्वितस्तिरिति** । शमः प्रमाणमस्येत्यादिविग्रहः । शमादयः अनूर्ध्वमानविशेषाः । तेभ्यो मात्रचो लुक्, इतरयोरसंभवात् । अत्र 'आया-

---

निषेधः' इत्युक्तत्वात् । **कर्मणि घटो** । सप्तम्यन्तात्कर्मन्शब्दाद् 'घटते' इत्यर्थेऽठच् स्यात् । **कर्मठ इति** । 'ठस्येकः' इतीह न भवति । अठचि ठस्याप्रत्ययत्वेनाङ्गसंज्ञानिमित्तत्वाभावात् । **तारकितमिति** । एवं पुष्पितं फलितं पुलकितं रोमाञ्चितमित्याद्युदाहार्यम् । **प्रमाणे द्वयसज्** । प्रमाणे विद्यमानात्प्रथमान्ताद् 'अस्य' इति निर्दिष्टे प्रमेयेऽर्थे त्रयः प्रत्ययाः स्युः । प्रमाणमिह परिच्छेदकमात्रम् । तत्र मात्रच् । द्वयसच्दघ्नचौ तूर्ध्वमान एव भवतः । 'प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम' इति भाष्यात् । ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानम् ऊर्वादि । तेन तिर्यङ्मानादौ 'दण्डद्वयसं क्षेत्रम्' इत्यादि न प्रयुज्यते, यथोत्तरं मुनीनां प्रामाण्यात् । अतएव 'द्विकाण्डा क्षेत्रभक्तिः' इत्यत्र 'द्वयसचो लुक्' इति प्राचोक्तं नादर्तव्यमित्यवोचाम । **प्रमाणे ल इति ।** लुक एषा पूर्वाचार्यसंज्ञा । प्रमाणत्वेन ये प्रसिद्धास्ततः परस्यैवायं लुगित्युदाहरति—**शमः । दिष्टिः । वितस्तिरिति** । शमः प्रमाणमस्येत्यादि-

द्विशमम्। 'प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः' (वा ३१२३) शममात्रम्। प्रस्थमात्रम्। पञ्चमात्रम्। 'वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम्' (वा ३१२४)। तावदेव तावद्द्वयसम्। तावन्मात्रम्। १८३९ **पुरुषहस्तिभ्यामण्च।** (५-२-३८) पुरुषः प्रमाणमस्य पौरुषम्, पुरुषद्वयसम्। हास्ति-

मस्तु प्रमाणं स्यात्' इत्येव गृह्यते। एवं च ऊरुद्वयसमित्यादौ न लुक्। **द्विगोर्नित्यमिति**। प्रमाणान्ताद् द्विगोः परस्य द्वयसजादेर्नित्यं लुक् स्यादित्यर्थः। प्रमाणान्तस्य द्विगोः प्रमाणत्वाभावात् सामर्थ्यादिह तदन्तविधिः। पूर्ववार्तिकेन तु नात्र प्राप्तिरस्ति, द्विगोः प्रमाणत्वाभावात्। **द्विशममिति**। तद्धितार्थे द्विगुः। ततो मात्रचः अनेन लुक्। 'विकल्पस्याप्रकृतत्वादेव सिद्धे नित्यग्रहणं संशये वक्ष्यमाणस्य मात्रचो लुगर्थम्। अन्यथा शममात्रमित्यत्रेव द्विशमशब्दादपि स मात्रच् न लुप्येत' इति भाष्ये स्पष्टम्। **प्रमाणेति**। प्रमाणवाचिनः परिमाणवाचिनः संख्यावाचिनश्च संशये मात्रज्वक्तव्य इत्यर्थः। अत्र प्रमाणमायाम एव गृह्यते, 'आयामस्तु प्रमाणं स्यात्' इति वचनात्। अत एव परिमाणग्रहणमर्थवत्। **शममात्रमित्यादि**। शमः स्यान्न वेत्यादिर्विग्रहः। **वत्वन्तादिति**। वार्तिकमिदम्। **पुरुषहस्तिभ्यामण्**

विग्रहः। एषु मात्रचो लुक्, इतरयोरसंभवात्, शमादीनामप्रमाणत्वात्। **द्विगोर्नित्यमिति**। द्विगोरप्रमाणत्वात्तदन्तविध्यभावाच्च पूर्वेणाप्राप्तो लुग्विधीयते। ननु विकल्पस्याप्रकृतत्वान्नित्यग्रहणमिह निरर्थकमिति चेत्। अत्राहुः—अनुपदं संशये वक्ष्यमाणो मात्रच् शममात्रमित्यादौ यथा न लुप्यते, 'प्रमाणे लः' इत्यस्य 'प्रमाणे द्वयसच्–' इति यः पूर्वविधिस्तद्विषयत्वात्, एवं द्विगोरपि न लुप्येत। इष्यते च लुक्। द्वौ शमौ स्यातां न वा द्विशम इति। तथा चाधिकसंग्रहार्थं नित्यग्रहणमिति। अत्र केचित्—'द्विगोर्लः' इत्युक्तेऽपि पुनर्लग्रहणं नित्यार्थमधिकसंग्रहार्थमिति व्याख्यातुं शक्यत इति वैचित्र्यार्थं नित्यग्रहणमित्याहुः—**शममात्रमित्यादि**। शमः स्यान्न वेत्यादिविग्रहः। **पुरुषहस्तिभ्यामण्च**। 'इनण्यनपत्ये' इति प्रकृतिभावः। हस्ती प्रमाणमस्य हास्तिनम्। अत्र काशिकायामुक्तं 'द्विगोर्नित्यं लुक्, द्विपुरुषमुदकम्' इत्यादि। व्याख्यातं च हरदत्तेन—यद्यपि 'प्रमाणे लो द्विगोर्नित्यम्' इत्यस्य नायमनुवादः, पुरुषहस्तिनोः शमादिवदप्रमाणत्वेनाप्रसिद्धत्वात्, अत एव हि पुरुषद्वयसमित्यादौ 'प्रमाणे लः' इति लुङ् न भवति। तथाप्यपूर्वोऽत्र लुग्विधीयत इति। एतच्चासंगतम्, 'द्विगोर्नित्यं लुक्' इत्यपूर्ववचनस्य मुनित्रयानुक्तत्वात्। वस्तुतस्तु विधीयत इत्यस्यानुनीयत इत्यर्थः। अयं भावः—'द्विगोः' 'तद्धितलुकि' इत्यनुवर्तमाने 'पुरुषात्प्रमाणेऽन्यतरस्याम्' इति ङीब्विकल्प्यते तदेव लुकमनुमापयतीति।

नम्, हस्तिद्वयसम्। १८४० यत्तदेतेभ्यः परिमाणे वतुप्। (५-२-३९) यत्परिमाणमस्य यावान्। तावान्। एतावान्। १८४१ किमिदम्भ्यां वो घः।

च। उक्तविषय इति शेषः। चाद् द्वयसजादयस्त्रयः। **यत्तदेतेभ्यः**। तदस्येत्यनुवर्तते। अस्य तत्परिमाणमित्यर्थे परिमाणवाचिभ्यः प्रथमान्तेभ्यः किम्, यद्, तद्, एतद् एभ्यो वतुप् स्यादित्यर्थः। **यावानिति**। यच्छब्दाद्वतुप्, उपावितौ। 'आ

यत्तदेतेभ्यः। **यावानित्यादि**। 'आ सर्वनाम्नः' इत्यात्वे 'उगिदचाम्–' इति नुम् 'अत्वसन्तस्य च–' इति दीर्घः। हल्ङ्यादिलोपसंयोगान्तलोपौ। 'प्रमाणे' इत्यनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात्कृतम्। तथा च वार्तिकम्—'डावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते। मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोः' इति। अस्यार्थः—इह शास्त्रे वतुपं विधाय तस्मिन् परे आत्वं विहितम्। पूर्वाचार्यास्तु डावतुं विदधिरे, तद्रीत्या निर्देशोऽयं डावताविति। विशेष्यत इति विशेषस्तस्य भावो वैशेष्यं तस्मात्, अर्थभेदादित्यर्थः। अर्थभेदस्तु 'परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्' इति प्रागेवोक्त इति भावः। नन्वनयोरर्थभेदे सति यावानध्वा यावती रज्जुरित्यादि न सिध्येत्, अत्र ह्यायाममात्रं गम्यते। यद्युपमानाद्भविष्यतीति ब्रूषे, तर्हि प्रमाणग्रहणमेवानुवर्त्यताम्, यावानध्वेत्यादिप्रयोगाश्च मुख्याः सन्तु। ये तु परिमाणे प्रयोगाः 'यावान् धान्यराशिः' इत्यादयः, त एवोपमानाद्भवन्तु तत्राह—'मात्रादीति'। 'यत्तदेतेभ्यः–' इति विशेषविहितो हि वतुप् सामान्यविहितान् मात्रजादीन् बाधेत, तेन तन्मात्रमित्यादि न स्यात्। परिमाणग्रहणे सति तु भिन्नोपाधिकत्वाद्वतुपः प्रमाणे विहितमात्रजादिभिः सह बाध्यबाधकभावो नेति भावः। नन्वेवमपि बाधः स्यादेव। 'प्रमाणे द्वयसच्–' इत्यत्र प्रस्थमात्रमित्यादिसिद्धये प्रमाणग्रहणस्य परिच्छेदकमात्रपरतया व्याख्यातत्वेन वतुपो यत्तदेतेभ्यो विहितत्वेन विशेषविहितत्वानपायात्। तस्माद् 'यत्तदेतेभ्यो वतुप् च' इत्येव सूत्र्यताम्, मास्तु परिमाणग्रहणम्, अस्तु च प्रमाणे इत्यर्थाधिकारः, तेन यावती रज्जुर्यावान् धान्यराशिरित्यादिप्रयोगाः सर्वेऽप्युपचारं विनैव निर्वहन्तीत्यपरमनुकूलमत आह— 'भावः सिद्धश्चेति'। डावतोरिति पञ्चम्यन्तम्। अर्थभेदे सति वत्वन्तान्मात्रजादीनामुत्पत्तिः सिध्यति। तत्परिमाणमस्य तावद्धान्यं राशीकृतम्, तावत्प्रमाणमस्य कुड्यादेः, तावन्मात्रम्। यादृग्राशीकृतस्य धान्यादेर्दैर्घ्यं तादृशं कुड्यादेरपीत्यर्थः। एकविषयत्वे तु वतुपैव विशिष्टस्य प्रमेयस्योक्तत्वाद्वतुबन्तान्मात्रजादयो न स्युः। यस्य हि तावत्प्रमाणं तस्य तदपि प्रमाणम्। जानुप्रमाणकं जलादि यस्य प्रमाणं तदपि जानुप्रमाणकमिति वक्तुं शक्यत्वात्। एवं च तावच्छब्द एव प्रयुज्येत, न तु तावन्मात्रमित्यादि। अन्यथा तत्प्रमाणमस्य तन्मात्रम्। तन्मात्रं प्रमाणमस्य तन्मात्रमात्रमित्येवं मात्रजा-

(५-२-४०) आभ्यां वतुप् स्याद्वस्य च घः। कियान्। इयान्।
१८४२ किमः संख्यापरिमाणे डति च। (५-२-४१) चाद्वतुप्।
वस्य च वस्य घः स्यात्। का संख्या एषां ते कति कियन्तः, क्षेपे तु न, का

सर्वनाम्नः' इत्यात्त्वम्, सुः, 'उगिदचाम्-' इति नुम्, 'अत्वसन्तस्य-' इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। एवं तावान्, एतावान्। किमिदंभ्यां वो घः। 'तदस्य' इति 'परिमाणे वतुप्' इति चानुवर्तते। तदाह—आभ्यां वतुप् स्यादिति। आभ्यां प्रथमान्ताभ्याम् अस्य तत्परिमाणमित्यर्थे वतुप् स्यादित्यर्थः। वस्य च घ इति। वकारस्य घकार इत्यर्थः। कियानिति। किं परिमाणमस्येति विग्रहः। किंशब्दाद् वतुप्, उपावितौ, वकारस्य घकारः, इयादेशः, किम् इयत् इति स्थिते 'इदङ्किमोरीश्की' इति किमः कीभावे 'यस्येति च' इति ईकारलोपे कियत्शब्दात्सौ 'उगिदचाम्-' इति नुमि 'अत्वसन्तस्य-' इति दीर्घे, हल्ङ्यादिसंयोगान्तलोपाविति भावः। इयानिति। इदंशब्दाद् वतुपि वकारस्य घकारे इयादेशे इदम् इयत् इति स्थिते 'इदङ्किमोरीश्की' इति शित्त्वादिदम ईकारे सर्वादेशे 'यस्येति च' इति ईकारस्य लोपे इयत् इति प्रत्ययमात्रं शिष्यते। ततः सौ नुमादि पूर्ववत्। किमः संख्या। 'तदस्य' इत्यनुवर्तते। संख्यायाः परिमाणं परिच्छेदः। किंशब्दः प्रश्ने वर्तते। का अस्य संख्येत्येवं संख्यापरिच्छेदविषयकप्रश्ने विद्यमानात् किंशब्दात् प्रथमान्ताद् अस्येत्यर्थे डतिप्रत्ययश्च स्यादित्यर्थः। का संख्या एषां ते कतीति। का संख्या अस्येति, का संख्या अनयोरिति च प्रश्नो न संभवति, अस्येत्यनेन एक-

दिभ्यः प्रत्ययमालाप्रसङ्गात्। किमिदंभ्याम्। वतुप्स्यादिति। वकारस्य घविधिसामर्थ्याद्वतुपमनुवर्त्य सोऽप्यत्र विधीयत इति भावः। 'आदेः परस्य' इत्येव सिद्धे 'वः' इति वचनमादेशप्रतिपत्त्यर्थम्। इतरथा घः प्रत्ययान्तरं विज्ञायेत। कियानिति। 'इदंकिमोरीश्की'। 'यस्येति च' इति लोपः। इयानिति। ईशादेशस्य 'यस्य' इति लोपे प्रत्ययमात्रमवशिष्यते। पठन्ति च—'उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ गतवति विलयं च प्राकृतेऽपि प्रपञ्चे। सपदि पदमुदीतं केवलः प्रत्ययो यत् तदियदिति मिमीते को हृदा पण्डितोऽपि।' वैयाकरणानामौपनिषदानां च प्रक्रियामाश्रित्य प्रवृत्तो ह्यर्थोऽयं श्लोकः। किमः संख्या। 'तदस्य-' इत्यनुवर्तत एव। संख्यायाः परिमाणं परिच्छेदः, तस्मिन् कर्तव्ये यः प्रश्नस्तस्मिन्वर्तमानात्किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डति स्यात्। संख्यापरिमाणे किम्, क्षेपे माभूत्। का संख्येयमेषां दशानाम्। 'अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। सहस्रशः समेतानां परिषत्त्वं न विद्यते॥' इत्येवं संख्येयद्वारेणात्र संख्यायाः

संख्या एषां दशानाम् । १८४३ **संख्याया अवयवे तयप्** । (५-२-४२) पञ्च अवयवा अस्य पञ्चतयं दारु । १८४४ **द्वित्रिभ्यां तयस्यायज्वा** । (५-२-४३) द्वयम्, द्वितयम् । त्रयम्, त्रितयम् । १८४५ **उभादुदात्तो नित्यम्** । (५-२-४४) उभशब्दात्तयप आदेशोऽयच् स्यात्, स चोदात्तः । उभयम् ।

इति तद्धितेषु पाञ्चमिकाः ।

त्वस्य अनयोरित्यनेन द्वित्वस्य च ज्ञातत्वात्, ज्ञाते च प्रश्नासम्भवात् । का संख्या एषामिति तु प्रश्नः संभवति, तत्र एषामित्यनेन बहुत्वस्य ज्ञातत्वेऽपि तद्व्याप्यत्रित्व-चतुष्ट्वादिसंख्यानामज्ञातत्वात् । उक्तं च भाष्ये—'न ह्येकयोः प्रश्नोऽस्ति' इति । ततश्च नित्यबहुवचनान्तोऽयं कतिशब्दः । 'डति च' इति षट्संज्ञकत्वात् 'षड्भ्यो लुक्' इति जश्शसोर्लुक् । **कियन्त इति** । कियानितिवत्प्रक्रिया । बहुवचनं विशेषः । संख्यापरिमाणे इत्युक्तेः किमः क्षेपार्थकत्वे डतिर्न भवति । **का संख्या एषां दशानामिति** । दशावरा परिषदित्यत्र ब्राह्मणब्रुवाणां मेलने इदं वाक्यं प्रवृत्तम् । संख्येयद्वारा संख्यायाः कुत्सात्र गम्यते, 'अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥' इति स्मरणात् । **संख्यायाः** । तदस्येत्यनुवर्तते । द्वित्र्यादिसंख्याका अवयवा अस्यावयविन इति विग्रहे अवयवीभूतसंख्यावाचिनः प्रथमान्ताद् अस्यावयविन इत्यर्थे तयबित्यर्थः । **पञ्चतयमिति** । पञ्चावयवकः समुदाय इत्यर्थः । **द्वित्रिभ्याम्** । द्वित्रिभ्यां परस्य तयपः अयज्वा स्यादित्यर्थः । **द्वयमिति** । द्विशब्दात्तयपः अयचि 'यस्येति च' इति इकारलोपः । द्व्यवयवकसमुदाय इत्यर्थः । एवं त्रयम् । **उभादुदात्तो नित्यम्** ।

कुत्सा बोध्या । **संख्यायाः** । अवयवे वर्तमाना या संख्या तद्वाचिनः प्रथमान्तात् षष्ठ्यर्थे तयप् स्यात् । यं प्रत्यवयवः सोऽवयवी प्रत्ययार्थः । 'अस्य' इत्यधिकारात् । यथा द्वयसजादिषु प्रमाणे प्रकृत्यर्थे प्रमेयं प्रत्ययार्थस्तद्वत् । **त्रयमिति** । ननु 'त्रयोऽवयवाः तन्तवो यस्य त्रयं सूत्रम्' इति प्रयोगे संभवत्यपि 'मुनित्रयम्' इति प्रयोगो न संगच्छते, अन्यपदार्थस्यावयविनोऽभावादिति चेन् । अत्राहुः—अवयवी त्वत्र समुदाय एव । स चातिरिक्तो वाऽनतिरिक्तो वेति विचारान्तरम् । एवं च समुदायस्यातिरिक्तत्वपक्षेऽपि समुदायघटकत्वेन मुनीनां प्रत्यभिज्ञानान्मुनित्रयनमस्कारस्य विघ्नविघातकत्वमस्त्येवेति । **उभादुदात्तो नित्यम्** । इह 'चितः' इत्यनेनैवान्तोदात्तत्वं सिद्धम् । सर्वोदात्तत्वं तु 'अनुदात्तं पदमेकवर्जम्' इति वचनाद्बाधितम् । न च हे उभयेति संबुद्ध्यन्ते आमन्त्रिताद्युदात्तत्वं बाधितुं वचनमिति शङ्क्यम्, पुरस्तादपवादन्यायेन चित्स्वरस्यैव बाध्यता, न त्वामन्त्रिताद्युदात्तत्वस्येति सुवचत्वात् । तस्मादुदात्तवचन-

अथ तद्धितेषु मत्वर्थीयप्रकरणम् । ३८ ।

१८४६ तदस्मिन्नधिकमिति दशान्ताड्डः । (५-२-४५) एकादश अधिका अस्मिन्नेकादशम् । 'शतसहस्रयोरेवेष्यते' (वा ३१४१) । नेह—एकादश अधिका अस्यां विंशतौ । 'प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते' (वा ३१४०) । नेह—एकादश माषा अधिका अस्मिन्सुवर्णशते । १८४७ शदन्तविंशतेश्च । (५-२-४६) डः स्यादुक्तेऽर्थे । त्रिंशदधिका अस्मिन् त्रिंशं शतम् । विंशम् । १८४८ संख्याया गुणस्य निमाने मयट् । (५-२-४७)

स चोदात्त इति । आद्युदात्त इत्यर्थः । 'अन्तोदात्तत्वस्य चित्त्वेनैव सिद्धेः' इति भाष्ये स्पष्टम् । 'अत्र अयच्प्रत्यय एव विधीयते, न तु तयप आदेशः' इति स्थानिवत्सूत्रभाष्ये स्पष्टम् । तयप आदेश इति मूलं तु वार्तिकानुरोधेन ।

इति तद्धितेषु प्राग्घितीयाः ।

अथ मत्वर्थीयाः—**तदस्मिन्नधिकम्** । तदधिकमस्मिन् इति विग्रहे प्रथमान्ताद् दशन्शब्दान्तात् समासाद् अस्मिन्नित्यर्थे डप्रत्ययः स्यादित्यर्थः । प्रत्ययविधौ तदन्तविधिप्रतिषेधादन्तग्रहणम् । अत एव निर्देशात् पञ्चम्यर्थे सप्तमीत्याहुः । 'औपश्लेषिकेऽधिकरणे सप्तमी' इति भाष्यम् । 'सामीपिकमधिकरणम्' इति कैयटः । **एकादश माषा अधिका अस्मिन्निति** । अस्मादित्यर्थः । अस्मिन् उपश्लिष्टा इति वा । न च व्यपदेशिवत्त्वेन केवलदशन्शब्दादपि स्यादिति शङ्क्यम्, 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्युक्तेः । **शदन्तविंशतेश्च** । शेषपूरणेन सूत्रं व्याचष्टे । **डः स्यादुक्तेऽर्थे इति** । दशान्तत्वाभावात्पूर्वेणाप्राप्तिः । **त्रिंशं शतमिति** । डे सति 'टेः' इति टिलोपः । **विंशमिति** । विंशतिः अस्मिन्नधिका इति विग्रहः । 'ति विंशतेः—' इति तिशब्दस्य लोपः । अन्तग्रहणादेकत्रिंशं शतमिति सिद्धम् ।

सामर्थ्यादादेरेवायम् । प्रयुज्यते च तथा 'उभयं शृणवच्च न' इति । तदेतत्सकलमभिप्रेत्याह—**स चेति** ।

तदस्मिन् । पुनस्तद्ग्रहणम् 'अस्य' इति षष्ठ्यन्तसंबद्धतद्ग्रहणनिरासार्थम् । प्रत्ययविधौ तदन्तविध्यभावादाह—**दशान्तादिति** । अन्तग्रहणं किम्, दश अधिका अस्मिन् शते । न चेह व्यपदेशिवद्भावेन दशान्तत्वमस्तीति वाच्यम्, 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्यभ्युपगमात् । **शदन्त** । प्रत्ययग्रहणपरिभाषया तदन्तविधौ सति 'यस्मात्प्रत्ययविधिस्तदादेस्तदन्तस्य' इति परिभाषया तदादिनियमः स्यात् । तं वारयितुमन्तग्रहणम् । तेन एकत्रिंशं शतम्,

भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम् । 'गुणस्य' इति किम्—द्वौ व्रीहियवौ निमानमस्योदश्वितः । 'निमाने' किम्—द्वौ गुणौ क्षीरस्य एकस्तै-

---

अन्यथा प्रत्ययग्रहणपरिभाषया तदादिनियमः स्यात् । 'विंशतावप्यन्तग्रहणम्' इति वार्तिकाद् एकविंशं शतमित्यादि सिद्धम् । **संख्याया गुणस्य** । 'तदस्य' इत्यनुवर्तते । गुणो भागः अंशः । निमीयते क्रीयतेऽनेनेति निमानं मूल्यद्रव्यम् । 'मेङ् प्रणिदाने' करणे ल्युट् । तदाह—**भागस्य मूल्य इत्यादि । षष्ठ्यर्थ इति** । अस्येत्यर्थे इत्यर्थः । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्येति विग्रहवाक्यम् । द्वाभ्यां यवप्रस्थाभ्याम् एक उदश्वित्प्रस्थः क्रीयते यत्र तत्रेदं वाक्यं प्रयुज्यते । द्विमयमुदश्विद्यवानामित्युदाहरणम् । यवानामिति संबन्धसामान्ये षष्ठी । यवप्रस्थद्वयेन क्रेतव्यमुदश्विदित्यर्थः । द्विशब्दस्य भागवृत्तेर्नित्यसापेक्षत्वाद्यवानामित्येतत्सापेक्षत्वेऽपि प्रत्ययः । **द्वौ व्रीहियवौ निमानमस्योदश्वित इति** । द्वित्वसंख्याविशिष्टौ व्रीहियवराशी यौ तौ अस्य उदश्वितो निमानमित्यर्थः । अत्र उदश्वियावत्, तदपेक्षया व्रीहियवराश्यो-

---

एकचत्वारिंशमित्यादि सिद्धम् । नन्वेवं गोत्रिंशदधिका अस्मिन् गोशते इत्यादावतिप्रसङ्गः शङ्क्यः, 'संख्याया अवयवे तयप्' इत्यतः संख्याग्रहणानुवृत्तेः । अन्तग्रहणमिह विंशतिशब्दानन्तरं कर्तव्यम्—'षड्विंशत्यन्ताच्च' इति । तेन एकविंशं शतमित्यादि सिध्यति । अन्यथा 'ग्रहणवता–' इति तदन्तविधिप्रतिषेधादिह न स्यात् । **संख्याया गुणस्य** । गुणो भागः । निमीयते क्रीयतेऽनेनेति निमानं मूल्यम्, 'मेङ् प्रणिदाने' इत्यस्मान्निपूर्वात्करणे ल्युट् । तदाह—**भागस्य मूल्य इति । षष्ठ्यर्थ इति** । यद्यपि 'तदस्मिन्नधिकम्–' इत्यतः 'तद्' इत्यनुवृत्तौ प्रथमान्तादित्ययमेवार्थो लभ्यते, तथापि मण्डूकप्लुत्या 'तदस्य संजातम्' इत्यतः 'तदस्य' इत्यनुवर्तनात् 'षष्ठ्यर्थे' इत्येतदपि लभ्यत इति भावः । **द्विमयमिति** । द्विशब्दस्य सम्बन्धिशब्दत्वेन नित्यसापेक्षत्वाद् 'यवानाम्' इति पदे सत्यपि तद्धितोत्पत्तिरिहाविरुद्धेति ज्ञेयम् । नन्वेवमपि प्रत्ययान्तस्योदश्विच्छब्देन सामानाधिकरण्यं दुर्लभम् । यावतोदश्विद्भागे प्रत्ययो विहितः, नोदश्विति । अत्राहुः—भागेऽपि विधीयमानः प्रत्ययः अभिधानस्वाभाव्याद् भागवन्तमाचष्टे । तेन सामानाधिकरण्यं भवतीति । 'गुणनिमाने' इति वक्तव्ये व्यस्तोच्चारणाद् 'एकत्वं गुणस्य' इत्यत्र विवक्षितम् । तेनेह न भवति—यवानां द्वौ भागौ निमानमेषामुदश्वितस्त्रयाणां भागानामिति । 'भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते' । इह न भवति । एको भागो निमानमस्येति । भूयस इति च

---

१ 'विक्रीयते' इति क. २ 'विक्रीयते' इति क. ३. 'विक्रेतव्यम्' इति क. ।

यस्य द्विगुणं क्षीरं पच्यते तैलेन। **१८४९ तस्य पूरणे डट्।** (५-२-४८) एकादशानां पूरण एकादशः। **१८५० नान्तादसंख्यादेर्मट्।** (५-२-४९) डटो मडागमः स्यात्। पञ्चानां पूरणः पञ्चमः। 'नान्तात्' किम्-विंशः। 'असं-

---

द्विगुणत्वं न विवक्षितम्। किंतु राशिद्वित्वमेव विवक्षितमिति द्विशब्दस्य भागवृत्तित्वाभावान्न प्रत्ययः। **तस्य पूरणे डट्।** 'संख्यायाः' इत्यनुवर्तते। संख्येयार्थकसंख्यावाचिनः षष्ठ्यन्तात्प्रवृत्तिनिमित्तसंख्यायाः पूरणे वाच्ये डट्प्रत्ययः स्यादित्यर्थः। पूर्यते अनेनेति पूरणः अवयवः, स प्रत्ययार्थः। **एकादश इति।** एकादशत्वसंख्यायाः पूरकोऽवयव इत्यर्थः। यस्मिन् अनुपात्ते एकादशत्वसंख्या न संपद्यते, यस्मिन्नुपात्ते तु सा पूर्यते, सोऽवयव एकदेश इति यावत्। प्रवृत्तिनिमित्तेति किम्? पञ्चानां घटानां पूरणं जलादि। **नान्तादसंख्यादेर्मट्। डटो मडागमः स्यादिति।** शेषपूरणमिदम्। डटि टकार इत्। अकार उच्चारणार्थः। **पञ्चम इति।** पञ्चन्शब्दाद् डटि तस्य मडागमे सति नलोपः। यद्यपि मटः प्रत्ययत्वेऽपि

प्रत्ययार्थादाधिक्यमात्रं प्रकृत्यर्थस्य विवक्षितम्, न तु बहुत्वम्। तेन द्विशब्दादपि भवत्येव। **तस्य पूरणे।** 'तस्य' इति षष्ठ्यन्तानुकरणम्। एकत्वं त्वविवक्षितम्, एकस्य पूरणासम्भवात्। पूर्यतेऽनेनेति पूरणः, णयन्तात्करणे ल्युट्। **एकादशानामिति।** उद्भूतावयवभेदः समुच्चयः प्रकृत्यर्थः। अवयव इह प्रत्ययार्थः। यस्मात्संख्यावाचिनः प्रत्ययविधिस्तदीयप्रवृत्तिनिमित्तस्य एकादशत्वादेः पूरणे प्रत्ययः। यथा 'अतिशायने-' 'याप्ये-' इत्यादिषु प्रवृत्तिनिमित्तस्यैवातिशयादिकं गृह्यते, अन्तरङ्गत्वात्, तथेहापि। तेन 'एकादशानां घटानां पूरणो जलादिः' इत्यत्र नातिप्रसङ्गशङ्कालेशोऽपीति भावः। ननु यदि प्रवृत्तिनिमित्तस्य पूरणे प्रत्ययः, तर्ह्यत्र एकादशत्वस्य पूरण इति विग्रहो वक्तुं युक्त इति चेत्। अत्राहुः—'वैयाकरणपाशः' इत्यत्र यथा 'याप्यो वैयाकरणः' इति विग्रहः। न तु 'याप्यं वैयाकरणत्वम्' इति, तथेहापि बोध्यमिति। एवं च व्युत्क्रमेणाध्यायेषु गम्यमानेषु 'वृद्धिरादैच्' इत्यध्यायो यदा चरमं गण्यते तदा सोऽप्यष्टमो भवत्येव। **नान्तादसंख्यादेः। डट इति।** 'डट्' इति प्रथमान्तस्यानुवृत्तस्य 'नान्तात्-' इति पञ्चम्या षष्ठी कल्प्यत इति भावः। यद्यपीह मटः प्रत्ययत्वेऽपि न क्षतिः, तथाप्युत्तरत्र तमट आगमत्वमेवाभ्युपगन्तव्यम्। अनुदात्तता यथा स्यात्। प्रत्ययत्वे ह्याद्युदात्तः स्यात्। तथा चैकरूप्येणैव संदर्भव्याख्यानमुचितम्। अन्येऽप्याहुः—मटः प्रत्ययत्वे अकारसहितो मकारो विधेयः। आगमत्वे तु मकारमात्रमिति लाघवमस्तीति। **विंश इति।** विंशतेः पूरणः। 'तिविंशतेर्डिति' इति तिलोपः।

---

१. 'प्रत्ययनिर्मित' इति क.।

क्यादेः' किम्-एकादशः । १८५१ षट्कतिकतिपयचतुरां थुक् । (५-२-५१) एषां थुगागमः स्याड्डटि । षण्णां पूरणः षष्ठः । कतिथः । कतिपयशब्दस्यासंख्यात्वेऽप्यत एव ज्ञापकाड्डट् । कतिपयथः । चतुर्थः । 'चतुरश्छयतावाद्यक्षरस्य लोपश्च' (वा ३१२८) । तुरीयः, तुर्यः । १८५२ बहुपूगगणसङ्घस्य तिथुक् । (५-२-५२) 'डटि' इत्येव । पूगसङ्घयोरसंख्यात्वेऽप्यत एव डट् । बहुतिथ इत्यादि । १८५३ वतोरिथुक् । (५-२-५३) 'डटि' इत्येव । यावतिथः । १८५४ द्वेस्तीयः । (५-२-५४) डटोऽपवादः । द्वयोः पूरणो द्वितीयः । १८५५ त्रेः सम्प्रसारणं च । (५-२-५५) तृतीयः ।

न रूपभेदः । तथापि 'स्वरविशेषार्थं मडागमाश्रयणम्' इति भाष्ये स्पष्टम् । **षट्कति** । थुकि ककार इत् । उकार उच्चारणार्थः । कित्त्वादन्त्यादचः परः । **षष्ठ इति** । अपदान्तत्वात् षस्य न जश्त्वम् । **चतुर्थ इति** । अपदान्तत्वान्न रेफस्य विसर्गः । **चतुर इति** । वार्तिकमिदम् । चतुर् शब्दात् षष्ठ्यन्तात्पूरणे छयतौ स्तः । **आद्यक्षरस्य लोपश्चेति** । 'च' इति संघातस्य लोपश्चेत्यर्थः । **बहुपूगगण** । बहु, पूग, गण, संघ एषां डटि तिथुगागमः स्यादित्यर्थः । ककार इत् । उकार उच्चारणार्थः । कित्त्वादन्त्यादचः परः । **इत्यादीति** । पूगतिथः, गणतिथः, संघतिथः । **वतोरिथुक् । डटीत्येवेति** । वतुबन्तस्य इथुगागमः स्याद् डटीत्यर्थः । **यावतिथ इति** । यावतां पूरण इति विग्रहः । 'बहुगण -' इति संख्यात्वात् 'तस्य पूरणे—' इति डटि प्रकृतेरिथुक् । **द्वेस्तीयः** । द्विशब्दात् षष्ठ्यन्तात् पूरणे तीयप्रत्ययः स्यादित्यर्थः । **त्रेः**

षट्कति । इह षष्ठीनिर्देशबलात् षडादीनामागमित्वं स्पष्टमिति तदानुकूल्येनानुवृत्तो डट् सप्तम्या विपरिणम्यते, तदाह **डटीति** । डट एव थुट् तु न कृतः, षष्ठे षकारस्य जश्त्वप्रसङ्गात् । चतुर्थे रेफस्य विसर्गप्रसङ्गाच्च । न चैवं 'नान्तात्—' इति सूत्रेऽपि डति परे मुगेव विधीयतामिति वाच्यम्, पञ्चमः सप्तम इत्यादौ नलोपाभावापत्तेः । **चतुरश्छयतावििति** । विशेषविहिताभ्यामपि छयद्भ्यां डट्प्रत्ययो न बाध्यते, थुग्विधानसामर्थ्यात् । तेन चतुर्थ इति सिद्धम् । **आद्यक्षरेति** । अचसहितं व्यञ्जनमक्षरशब्देनोच्यते अच्सहितस्यादेर्व्यञ्जनस्येत्यर्थः । व्यञ्जनसहितस्यादेरच इति व्याख्याने तु द्विर्वचनन्यायेन तकारस्यापि लोपः स्यादिति हरदत्तः । आदेर्व्यञ्जनस्येति व्याख्याने प्रमाणं तु 'द्वितीयतृतीय—' इति सूत्रे 'तुर्याणि' इति निर्देशो बोध्यः । **द्वेस्तीयः । डटोऽपवाद इति** । डट आदेशस्तु न भवति, 'डिति' 'टिड्ढा—' इति ङीपः प्रसक्त्या 'द्वितीयाश्रिता—' इति निर्देशानुपपत्तेः । अतएव निर्देशाद् द्विशब्दस्या-

---

१ क्वचित्पुस्तकेषु 'वाद्यक्षरलोपश्च' इति पाठः ।

१८५६ विंशत्यादिभ्यस्तमडन्यतरस्याम् । (५-२-५६) एभ्यो डटस्तमडागमो वा स्यात् । विंशतितमः, विंशः । एकविंशतितमः, एकविंशः ।
१८५७ नित्यं शतादिमासार्धमाससंवत्सराच्च । (५-२-५७) शतस्य पूरणः शततमः । एकशततमः । मासादेरत एव डट् । मासतम । अर्धमासतमः ।

संप्रसारणं च । त्रेस्तीयः स्यात्प्रकृतेः संप्रसारणं चेत्यर्थः । **तृतीय इति** । त्रयाणां पूरण इति विग्रहः । तीयप्रत्यये सति रेफस्य संप्रसारणम ऋकारः । 'संप्रसारणाच्च' इति पूर्वरूपम् । 'हलः' इति दीर्घस्तु न भवति, 'ढ्रलोपे ' इत्यतः अण इत्यनुवृत्तेः । **विंशत्यादिभ्यः** । तमटि टकार इत्, मकारादकार उच्चारणार्थः । 'अत्र 'पङ्क्तिविंशति–' इति सूत्रानुक्रान्ता एव विंशत्यादयो गृह्यन्ते, नतु लोकप्रसिद्धा एकविंशत्यादयोऽपि विप्रकर्षात्' इति कैयटः । एकविंशतितम इत्यत्र तु तदन्तविधिना तमडित्यग्रे वक्ष्यते । **नित्यं शतादिमासार्धमाससंवत्सराच्च** । शतादिभ्यः मासाद् अर्धमासात् संवत्सराच्च परस्य डटो नित्यं तमडागमः स्यादित्यर्थः । ननु 'षष्ठ्यादेश्च–' इत्युत्तरसूत्रेण शततमः सिध्यतीत्यत आह—**एकशततम इति** ।

प्यादेशो न भवति । **तृतीय इति** । रेफस्य ऋकारः संप्रसारणम् । 'हलः' इह दीर्घस्तु न भवति, 'ढ्रलोपे–' इति सूत्रादण इत्यनुवृत्तेः । 'त्रेस्तृ च' इति नोक्तम्, प्रत्ययो मा विज्ञायीति । **विंशत्यादिभ्यः** । इह प्रत्यासत्त्या 'पङ्क्ति–' इत्यादिसूत्रे निपातिता विंशत्यादयो गृह्यन्ते, न लोकप्रसिद्धा, विप्रकृष्टत्वादिति भाष्यमतम् । वृत्तिकृता तु विंशत्यादयो लौकिका एव संख्याशब्दा गृह्यन्ते, न 'पङ्क्ति–' आदिसूत्रनिर्दिष्टाः । तद्ग्रहणे ह्येकविंशतिप्रभृतिभ्यो न स्यात्, ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् । एवं च सति 'षष्ठ्यादेश्चासंख्यादेः' इति पर्युदासो युज्यत एवेत्युक्तम् । **एकविंशतितम इति** । यद्यपि भाष्यमते तदन्तविधिर्दुर्लभस्तथापि 'षष्ठ्यादेश्च–' इति सूत्रे संख्यादिपर्युदासो ज्ञापयति 'इह प्रकरणे तदन्तानामपि ग्रहणम्' इति । एवं च सति एकान्नविंशतेः पूरण एकान्नविंशतितम इत्यपि सिध्यति । 'लौकिकानां ग्रहणम्' इति वृत्तिमते तु नैतत्सिध्येत् । विंशतिसंख्यातः प्राग्भावित्वादस्याः संख्यायाः । एतच्च कैयटहरदत्तग्रन्थयोः स्पष्टम् । ननु 'अनारम्भो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु' इति वदता कात्यायनेन 'पङ्क्ति–' आदिसूत्रस्य प्रत्याख्यातत्वात् तत्सूत्रे निपातिता विंशत्यादयो गृह्यन्ते, इति भाष्यमतमयुक्तमिति चेत् । अत्राहुः—यद्यपि प्रत्याख्यातं तथापीहार्थमावश्यकं तत् । अतएव तत्र भाष्यकृता 'नासूया कर्तव्या यत्रानुगमः क्रियते' इत्युक्तम् । अतः कात्यायनोक्तप्रत्याख्यानं नादर्तव्यमिति । **शततम इति** । यद्यपीदं 'षष्ठ्यादेश्च–' इत्युत्तरसूत्रेणैव सिध्यति, तथापि संख्याद्यर्थं

संवत्सरतमः। १८५८ **षष्ट्यादेश्चासंख्यादेः।** (५-२-५८) षष्टितमः। संख्यादेस्तु 'विंशत्यादिभ्यः–' (सू १८२९) इति विकल्प एव। एकषष्टः, एकषष्टितमः। १८५९ **मतौ छः सूक्तसाम्नोः।** (५-२-५९) मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम्। वारवन्तीयं साम। १८६० **अध्यायानुवाकयोर्लुक्।** (५-२-६०) मत्वर्थस्य छस्य। अत

'असंख्यादेः' इति पर्युदासादुत्तरसूत्रस्य नात्र प्रवृत्तिरिति भावः। ननु मासार्धमाससंवत्सरशब्दानां संख्यावाचित्वाभावात् तेभ्यो डट एवाप्रसक्तेः तस्य कथं तमड्विधिरित्यत आह **मासादेरिति। मासतम इति।** मासस्य पूरणः अर्धमासादिरवयवः। **अर्धमासतम इति।** अर्धमासस्य पूरणः तिथ्यादिरवयवः। **संवत्सरतम इति।** संवत्सरस्य पूरणः मासादिरवयवः। **षष्ट्यादेश्चासंख्यादेः।** असंख्यापूर्वपदात् षष्ट्यादेः परस्य डटो नित्यं तमडागमः स्यादित्यर्थः। 'विंशत्यादिभ्यः–' इति विकल्पस्यापवादः। **एकषष्टः, एकषष्टितम इति।** संख्यादित्वान्नित्यस्य तमटोऽभावे 'विंशत्यादिभ्यः–' इति डटस्तमड्विकल्पः। तमडभावे डटि 'यस्येति च' इति इकारलोपे एकषष्ट इति रूपम्। ननु केवलात् षष्ट्यादेर्विहितस्य नित्यतमटः संख्यादेः कथं प्रसक्तिः, तमडागमविधेरप्रत्ययविधित्वेऽपि 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति निषेधादिति चेत्, मैवम्—असंख्यादेरिति हि इह प्रकरणे ग्रहणवता प्रातिपदिकेन तदन्तविधिं ज्ञापयति। तेन 'विंशत्यादिभ्यः–' इति पूर्वसूत्रम् एकविंशतितम इत्यादावपि प्रवर्तत इति भाष्ये स्पष्टम्। एवं च एकान्नविंशतितम इत्यपि सिद्धम्। **मतौ छः सूक्तसाम्नोः।** मतुशब्दो मत्वर्थे लाक्षणिक इत्याह–**मत्वर्थ इति। अच्छावाकीयं सूक्तमिति।** अच्छावाकशब्दः अस्यास्ति अस्मिन्नस्तीति वा विग्रहः। अच्छावाकशब्दयुक्तमित्यर्थः। अच्छावाकशब्दात् शब्दस्वरूपपरात् प्रथमान्ताच्छः। **वारवन्तीयं सामेति।** 'अश्वं नत्वा वारवन्तम्' इत्यस्याम् ऋच्यध्यूढमित्यर्थः। एवमस्यवामीयमित्यपि। 'अस्यवामस्य' इत्यस्य एकदेशानुकरणमस्यवामेति। तस्माच्छः। अस्यवामशब्दसंयुक्तमित्यर्थः। प्रकृतिवदनुकरणमित्यस्यानित्यत्वात्सुपो लुक्। **अध्यायानुवाकयोर्लुक्।** नन्वध्यायानुवाकयोरभिधेयत्वे छस्य

'नित्यं शतादि–' इत्यावश्यकमिति ध्वनयन्नुदाहरति—**एकशततम इति। मासादेरिति।** संख्यावाचित्वाभावेऽपीति भावः। **षष्ट्यादेश्चेति।** 'विंशत्यादिभ्यः–' इति विकल्पे प्राप्ते नित्यार्थोऽयमारम्भः। **संख्यादेस्त्विति।** एतच्च प्राक् शताद्बोध्यम्, 'नित्यं शतादि–' इत्युक्तत्वात्। **मतौ छः। मत्वर्थ इति।** मतोर्विषय इत्यर्थः। तेन 'तत्' इति प्रथमा समर्थविभक्तिः, अस्यास्मिन्निति प्रत्ययार्थश्चेह लभ्यते।

एव ज्ञापकात्तत्र लुक्। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभाण्डः, गर्दभाण्डीयः। **१८६१ विमुक्तादिभ्योऽण्।** (५-२-६१) मत्वर्थेऽण् स्यादध्यायानुवाकयोः। विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः। दैवासुरः। **१८६२ गोषदादिभ्यो वुन्।** (५-२-६२) मत्वर्थेऽध्यायानुवाकयोः। गोषदकः। इषेत्वकः। **१८६३ तत्र कुशलः पथः।** (५-२-६३) वुन् स्यात्। पथि कुशलः पथकः। **१८६४ आकर्षादिभ्यः कन्।** (५-२-६४) आकर्षे कुशल आकर्षकः। 'आकषादिभ्यः' इति रेफरहितो मुख्यः पाठः। आकषो निकषः। **१८६५ धनहिरण्यात्कामे।** (५-२-६५) काम इच्छा। धने कामो धनको देवदत्तस्य। हिरण्यकः। **१८६६ स्वाङ्गेभ्यः प्रसिते।** (५-२-६६) केशेषु प्रसितः

कथं प्राप्तिः? 'सूक्तसाम्नोः' इति नियमादित्यत आह **अत एवेति।** **विधानेति।** 'मतुप्प्रकरण एवास्मिन्सूत्रे कर्तव्ये अत्र प्रकरणे छस्य लुग्विधानसामर्थ्यात्' इति कैयटः। ज्ञापकसिद्धविधानसामर्थ्यादित्यन्ये। भाष्ये तु 'अध्यायानुवाकयोर्वा लुग्वक्तव्यः' इति वचनमेवारब्धम्। **गर्दभाण्ड., गर्दभाण्डीय इति।** गर्दभाण्डशब्दसंयुक्तोऽध्यायोऽनुवाको वेत्यर्थः। भाष्योदाहरणमिव क्वचिदेतन्नामकोऽध्यायोऽनुवाको वा अन्वेष्यः। **विमुक्तादिभ्योऽण्। वैमुक्त इति।** विमुक्तशब्दयुक्तोऽध्यायोऽनुवाको वेत्यर्थः। **गोषदादिभ्यो वुन्। गोषदक इति।** गोषदशब्दसंयुक्तोऽध्यायोऽनुवाको वेत्यर्थः। **इषेत्वक इति।** 'इषे त्वा' इति शब्दयुक्त इत्यर्थः। अस्यवामीयमित्यत्रोक्तरीत्या सुपो न लुक्। **तत्र कुशलः पथः। वुन् स्यादिति।** सप्तम्यन्तात्पथिन्शब्दात्कुशल इत्यर्थे वुनित्यर्थः। **पथक इति।** अकादेशे 'नस्तद्धिते' इति टिलोपः। **आकर्षादिभ्यः कन्। आकर्षक इति।** यद्यपि वुनैवानुवृत्तेनेदं सिध्यति। तथापि शकुनिक इत्याद्यर्थं कन्ग्रहणम्। **धनहिरण्यात्कामे।** 'तत्र' इत्यनुवर्तते। धनशब्दाद् हिरण्यशब्दाच्च सप्तम्यन्तात् कामे वाच्ये कन् स्यादित्यर्थः। **काम इच्छेति।** ननु कामयिता, व्याख्यानादिति भावः। **स्वाङ्गेभ्यः प्रसिते।** 'तत्र' इत्यनुवर्तते। स्वाङ्गेभ्यः सप्तम्यन्तेभ्यः

विधानसामर्थ्यादिति। मतुप्प्रकरण एवास्मिन् सूत्रे कर्तव्ये यदत्रास्य लुग्विधानं तत्पाक्षिकं लुकमनुमापयतीति कैयटः। **तत्र कुशलः।** सप्तमीसमर्थात्पथिन्शब्दात् कुशल इत्यर्थे वुन्स्यात्। **आकर्षादिभ्यः कन्।** वुना सिद्धे कन्ग्रहणम् इदुदन्तार्थम्। अशनिकः। शकुनिकः। त्सरुकः। **मुख्यः पाठ इति।** आकषन्त्यस्मिन् सुवर्णादिकमित्याकषः। 'पुंसि संज्ञायां घः-' इति व्याख्याय, ये तु 'आकर्षादिभ्यः' इति सरेफं पठन्ति, तेषाम् 'आकर्षं इति घञि रूपम्' इति हरदत्तेनोक्तत्वादिति भावः। **धने**

केशकः। तद्रचनायां तत्पर इत्यर्थः। १८६७ **उदराट्ठगाद्यूने**। (५-२-६७) अविजिगीषौ ठक् स्यात्कनोऽपवादः। बुभुक्षयात्यन्तपीडित उदरे प्रसित औदरिकः। 'आद्यूने' किम्-उदरकः। उदरपरिमार्जनादौ प्रसक्त इत्यर्थः। १८६८ **सस्येन परिजातः**। (५-२-६८) कन् स्वर्यते, न तु ठक्। सस्यशब्दो गुणवाची न तु धान्यवाची। 'शस्येन' इति पाठान्तरम्। सस्येन गुणेन परिजातः संबद्धः सस्यकः साधुः। १८६९ **अंशं हारी**। (५-२-६९) 'हारी' इत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः। १८७० **तन्त्रादचिरापहृते**। (५-२-७०) तन्त्रकः पटः। प्रत्यग्र इत्यर्थः। १८७१

प्रसितेऽर्थे कन् स्यादित्यर्थः। प्रसित उत्सुकः। **तद्रचनायामिति**। केशयादिप्रथने इत्यर्थः। अत्रैवार्थे अस्य साधुत्वम्, व्याख्यानादिति भावः। **उदराट्ठगाद्यूने**। 'तत्र' 'प्रसित' इत्यनुवर्तते। सप्तम्यन्तादुदरशब्दाद् आद्यूने प्रसितेऽर्थे ठगित्यर्थ इत्यभिप्रेत्य आद्यूनशब्दं विवृण्वन्नाह—**अविजिगीषाविति**। 'दिवोऽविजिगीषायाम्' इत्यविजिगीषायामेव दिवो निष्ठानत्वविधानादिति भावः। **बुभुक्षयेति**। क्षुधा पीडित एव सन् उदरपरिमार्जने प्रसितः, न तु मल्लयुद्धे विजिगीषयेत्यर्थः। **उदरक इति**। मल्ल इति शेषः। स हि युद्धे विजिगीषया उदरपरिमार्जनादौ उत्सुको भवति। तदाह **उदरपरिमार्जनादौ प्रसक्त इति**। विजिगीषयेति शेषः। **सस्येन परिजातः**। तृतीयान्तात् सस्यशब्दात्परिजात इत्यर्थे कन् स्यादित्यर्थः। संनिहितष्ठगेव कुतो नानुवर्तते इत्यत आह **कन् स्वर्यते न तु ठगिति**। स्वरितत्वप्रतिज्ञायां तु पाणिनीयपरंपरैव प्रमाणम्। **सस्यशब्दो गुणवाचीति**। व्याख्यानमेवात्र शरणम्। **शस्येनेतीति**। 'शंसु स्तुतौ' इति धातोः कर्मणि यति शस्यशब्दः स्तुत्यपर्यायः। स्तुत्यश्च गुण एवेति भावः। परिजात इत्यस्य विवरणं संबद्ध इति। **अंशं हारी**। द्वितीयान्ताद् अंशशब्दाद् हारीत्यर्थे कन् स्यादित्यर्थः। ननु कृद्योगषष्ठीप्रसङ्गाद्अंशमिति कथं द्वितीयेत्यत आह **आवश्यके णिनिरिति**। 'आवश्यकाधमर्ण्ययोः—' इत्यनेनेति शेषः। **षष्ठी नेति**। 'अकेनोः—' इति तन्निषेधादिति भावः। **तन्त्रादचिरापहृते**। तन्त्रशब्दात् पञ्चम्यन्ताद् अचि

काम इति। 'तत्र' इत्यनुवर्तनात्सप्तम्यन्तात्प्रत्यय इति भावः। **उदरात्**। आद्यूनशब्दार्थमाह **अविजिगीषाविति**। 'दिवोऽविजिगीषायाम्' इति तत्रैव निष्ठानत्वविधानात्। **सस्येन**। कर्मकर्तरि तृतीयेयम्। परितो जातः परिजातः। फलितमाह **संबद्ध इति**। **अतएवेति**। 'अकेनोः—' इति निषेधादिति भावः। **तन्त्रात्**। तन्यन्ते तन्तवोऽस्मिन्निति व्युत्पत्त्या तन्त्रं तन्तुवायशलाका। अचिरः

ब्राह्मणकोष्णिके संज्ञायाम् । (५-२-७१) आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः। अल्पमन्नं यस्यां सा उष्णिका यवागूः । अल्पान्न-शब्दस्योष्णादेशो निपात्यते । १८७२ **शीतोष्णाभ्यां कारिणि** । (५-२-७२) शीतं करोतीति शीतकोऽलसः। उष्णं करोतीत्युष्णकः शीघ्रकारी । १८७३ **अधिकम्** । (५-२-७३) अध्यारूढशब्दात्कनुत्तरपदलोपश्च । १८७४ **अनुकाभिकाभीकः कमिता**। (५-२-७४) अन्वभिभ्यां कन्, अभेः

रापहृतेऽर्थे कनित्यर्थः। तन्त्रं तन्तुवायशलाका। अचिरेण कालेन अपहृतः अचिरापहृतः। 'कालाः परिमाणिना' इति समासः । **प्रत्यग्र इति** । नूतन इत्यर्थः । **ब्राह्मणकोष्णिके** । आयुधजीविविषयब्राह्मणशब्दात् प्रथमान्ताद् अस्मिन्नित्यर्थे कन निपात्यत इत्यर्थः । **अल्पान्नशब्दस्येति** । अल्पान्नशब्दात् प्रथमान्ताद् अस्मिन्नित्यर्थे कन्प्रत्ययः प्रकृतेरुष्णादेशश्च निपात्यत इत्यर्थः । **शीतोष्णाभ्यां कारिणि** । शीतमिव शीतं मन्दमित्यर्थः । उष्णमिव उष्णं शीघ्रमित्यर्थः । आभ्यां क्रियाविशेषणाभ्यां द्वितीयान्ताभ्यां कन् स्यादित्यर्थः । 'य आशुकर्तव्या-नर्थान् चिरेण करोति स शीतक उच्यते यस्तु अनाशुकर्तव्यान् आश्वेव करोति स उष्णक उच्यते' इति भाष्ये । 'संज्ञायामित्यनुवृत्तेरयमर्थो लभ्यते' इति कैयटः । तदाह **शीतकोऽलस इति** । **उष्णकः शीघ्रकारीति** च । **अधिकम्** । **अध्यारूढशब्दादिति** । व्युत्पादनमात्रमिदम् । शुद्धरूढ एवायमिति बोध्यम् ।

कालोऽपहृतस्येत्यचिरापहृतस्तस्मिन् । 'कालाः परिमाणिना' इति समासः । **प्रत्यग्र इति** । नूतन इत्यर्थः । **ब्राह्मणकोष्णिके** । ब्राह्मणशब्दादायुधजीवित्वोपाधिकात् प्रथमान्तात् सप्तम्यर्थे कन् प्रत्ययो निपात्यते । अन्नशब्दात्तु अल्पत्वोपाधिकात् । तदाह **आयुधेत्यादि** । **शीतोष्णाभ्याम्** । शीतमिव शीतम् , मन्दमित्यर्थः । शीते सति कार्यकरणे पाटवाभावात् । उष्णमिवोष्णम् , शीघ्रमित्यर्थः । क्रियाविशेषणाभ्यां द्वितीयान्ताभ्यां प्रत्ययः । कर्मयोगलक्षणा षष्ठी तु क्रियाविशेषणानेत्युक्तम् । मुख्यार्थ-वृत्तिभ्यां तु प्रत्ययो न भवत्यनभिधानात् । **अधिकम्** । **अध्यारूढशब्दादिति** । 'गत्यर्थाकर्मक–' इत्यादिना रुहेः कर्तरि कर्मणि वा क्तो विहितः । आद्ये क्तप्रत्ययेन कर्मणोऽनभिहितत्वाद् अध्यारूढशब्दयोगे द्वितीया । अध्यारूढो द्रोणः खारीमिति ग्रामं गत इतिवत् । तथा अधिकशब्देनापि योगे द्वितीयायां प्राप्तायां 'यस्मादधिकम्–' 'तदस्मिन्नधिकम्–' इति च निर्देशद्वयात् पञ्चमीसप्तम्यौ भवतः । अधिको द्रोणः खार्याः, अधिको द्रोणः खार्यामिति । द्वितीये तु क्तेन कर्मणोऽभिहितत्वात्प्रथमा । अधिका खारी द्रोणेन । कर्मणोऽभिहितत्वादेव पञ्चमीसप्तम्याविह न शङ्कनीये ।

पार्श्विको दीर्घश्च । अनुकामयते अनुकः । अभिकामयते अभिकः, अभीकः ।
१८७५ पार्श्वेनान्विच्छति । (५-२-७५) अनृजुरुपायः पार्श्वम्, तेनान्विच्छति पार्श्वकः । १८७६ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । (५-२-७६) तीक्ष्णोपायोऽयःशूलम्, तेनान्विच्छति आयःशूलिकः साहसिकः । दण्डाजिनं दम्भः, तेनान्विच्छति दाण्डाजिनिकः । १८७७ तावतिथं ग्रहणमिति लुग्वा । (५-२-७७) कन् स्यात्पूरणप्रत्ययस्य च लुग्वा । द्वितीयकम्,

---

अनुकाभिक । अनुक, अभिक, अभीक एषां समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् । पार्श्वेनान्विच्छति । तृतीयान्तात्पार्श्वशब्दाद् अन्विच्छतीत्यर्थे संज्ञायां कन् स्यादित्यर्थः । अन्वेषणं मार्गणम् । पार्श्वमिव पार्श्वम् । अनृजुरुपायः । 'ऋजूपायेन अन्वेष्टव्यान् अर्थान् यः अनृजुना उपायेनान्विच्छति स पार्श्वकः' इति भाष्यम् । तदाह अनृजुरित्यादि । अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । अयःशूल, दण्डाजिन आभ्यां तृतीयान्ताभ्यां अन्विच्छतीत्यर्थे संज्ञायां ठक्ठञौ स्त इत्यर्थः । अयःशूलमिव अयःशूलम्, साहसमित्यर्थः । 'यो मृदुनोपायेन अन्वेष्टव्यानर्थान् तीक्ष्णोपायेनान्विच्छति स आयःशूलिकः' इति भाष्यम् । तदाह तीक्ष्णोपाय इत्यादि । दण्डाजिनं दम्भ इति । दम्भार्थत्वाद्दण्डाजिनशब्दो दम्भे लाक्षणिक इति भावः । तावतिथम् । तावतां पूरणं तावतिथमिति पूरणप्रत्ययान्तानां सामान्यनिर्देशः । तृतीयार्थे प्रथमा । ग्रहणमिति भावे ल्युडन्तम् । तथाच तृतीयान्तात्पूरणप्रत्ययान्ताद् ग्रहणमित्यर्थे कन् स्यात्पूरणप्रत्ययस्य च लुग्वेत्यर्थं इत्यभिप्रेत्याह कन् स्यादित्यादि । पूरणप्रत्ययान्तस्य तु प्रकृतिभूतस्य न लुक् । किंतु पूरणप्रत्ययमात्रस्य,

---

अनुका । समाहारद्वन्द्वे सौत्रं पुंस्त्वम् । सूत्रत्वाल्लिङ्गव्यत्यय इति फलितोऽर्थः । अन्वभिभ्यां कन्निति । क्रियाविशिष्टसाधनवाचिभ्यां स्वार्थे निपात्यत इत्यर्थः । पार्श्वेनान्विच्छति । 'आकर्षादिभ्यः कन्' इत्यतः कननुवर्तते । अनृजुरिति । तिर्यगवस्थानात्पार्श्वमनृजु, तत्साधर्म्यादुपायोऽपि । इह शीतोष्णपार्श्वायःशूलदण्डाजिनशब्दा गौणा एव गृह्यन्ते । मुख्यार्थेभ्यस्तु प्रत्ययो न भवत्यनभिधानात् । तावतिथं ग्रहणमिति लुग्वा । तावतां पूरणं तावतिथम्, 'वतोरिथुक्' । यथा 'तस्यापत्यम्' इत्यत्र तस्येति षष्ठ्यन्तानां सामान्यनिर्देशस्तथात्र 'तावतिथम्' इति पूरणप्रत्ययान्तानां सामान्यनिर्देशः । अनन्तरावपि ठक्ठञौ नानुवर्तेते, अस्वरितत्वादित्यभिप्रेत्याह कन्स्यादिति । पूरणप्रत्ययस्येति । न तु कनो लुक्, वाग्रहणानर्थक्यप्रसङ्गात् । पञ्चमं पञ्चमकमित्यादिरूपं हि तेन साध्यम् । तच्च महाविभाषाधिकाराद्विकल्पेन कन उत्पत्त्यापि सिद्धमेव, तस्मात्पूरणप्रत्ययस्यैव लुक्सूत्रकारस्याभिमत इति व्याचष्टे—

द्विकं वा ग्रहणं देवदत्तस्य। द्वितीयेन रूपेण ग्रहणमित्यर्थः। 'तावतिथेन गृह्णातीति कन्वक्तव्यो नित्यं च लुक्' (वा ३१७२)। षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः। पञ्चकः। १८७८ स एषां ग्रामणीः। (५-२-७८) देवदत्तो मुख्य एषां देवदत्तकाः। त्वत्काः। मत्काः। १८७९ शृङ्खलमस्य बन्धनं करभे। (५-२-७९) शृङ्खलकः करभः। १८८० उत्क उन्मनाः। (५-२-८०) उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन्। उत्कः उत्कण्ठितः। १८८१ कालप्रयोजनाद्रोगे। (५-२-८१) कालवचनात्प्रयोजनवचनाच्च कन् स्याद्रोगे। द्वितीयेऽहनि भवो द्वितीयको ज्वरः। प्रयोजनं कारणं रोगस्य फलं

'षष्ठेन गृह्णाति षट्क' इति भाष्योदाहरणात्। **द्वितीयेन रूपेणेति**। अनेन तृतीयैव समर्थविभक्तिरिति सूचितम्। इतिना लोकानुसारित्वं गम्यते। एवं च ग्रन्थविषयकमेव ग्रहणमिह फलति। तेन द्वितीयं ग्रहणं देवदत्तेन दण्डस्येत्यादौ न भवति। **तावतिथेनेति**। ग्रहणेऽर्थे विहितं ग्रहीतरि न प्राप्नोतीत्यारम्भः। **षट्को देवदत्त इति**। भाष्ये एवमेवोदाहृतत्वात् पूरणप्रत्ययस्यैव लुगिति गम्यते, न तु मदन्तस्य। **स एषां ग्रामणीः**। ग्रामणीविशेषवाचकात् शब्दात्प्रथमान्ताद् अस्येत्यर्थे कन् स्यादित्यर्थः। **देवदत्तो मुख्य एषामिति**। एतेन ग्रामणीशब्दो मुख्यपर्याय इति सूचितम्। 'ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु' इत्यमरः। **त्वत्का मत्का इति**। त्वमहं वा मुख्य एषामिति विग्रहः। 'प्रत्ययोत्तरपदयोश्च इति त्वमौ। **शृङ्खलमस्य**। करभ इति षष्ठ्यर्थे सप्तमी। बन्धनमिति करणे ल्युट्। अस्य करभस्य शृङ्खलं बन्धनमिति विग्रहे बन्धनविशेषणात् शृङ्खलशब्दात् प्रथमान्ताद् अस्य करभस्येत्यर्थे कन् स्यादित्यर्थः। **शृङ्खलकः करभ इति**। शृङ्खलेन बद्ध इति यावत्। करभो बाल उष्ट्रः। **उत्क उन्मनाः**। **उद्गतमनस्कवृत्तेरिति**। उत्कण्ठितवृत्तेरित्यर्थः **कालप्रयोजनाद्रोगे**। काल, प्रयोजन अनयोः समाहारद्वन्द्वः, तदाह **कालवचनात् प्रयोजनवचनाच्चेति**। यथोचितविभक्त्यन्तादिति शेषः। कालशब्देनात्र कालवृत्तिः पूरणप्रत्ययान्तो द्वितीयादिशब्द एव गृह्यते, न तु मासादिशब्दः, व्याख्यानात्। तदाह **द्वितीयेऽहनीति**। प्रयुज्यतेऽनेनेति करणे ल्युटि प्रयोजनं साधनम्।

द्विकमिति। वार्तिककारस्तु कन एव लुगिति व्याख्यामभिप्रेत्य 'तावतिथं ग्रहणमिति लुग्वा वचनानर्थक्यं विभाषाग्रहणात्' इत्याह। तन्मते द्वितीयकं द्वितीयमित्येव रूपं न तु द्विकमिति बोध्यम्। **तावतिथेनेति**। पूरणप्रत्ययान्ताद् ग्रहणोपाधिकात् स्वार्थे विधीयमानो ग्रहीतरि न प्राप्नोतीति वचनमिति कैयटः। **स एषां ग्रामणीः**। 'ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु' इत्यमरः। **करभ इति**। उष्ट्रबालकः।

वा । विषपुष्पैर्जनितो विषपुष्पकः । उष्णं कार्यमस्य उष्णकः । 'रोगे' किम्-द्वितीयो दिवसोऽस्य । १८८२ **तदस्मिन्नन्नं प्राये संज्ञायाम्** । (५-२-८२) प्रथमान्तात्सप्तम्यर्थे कन्स्याद्यत्प्रथमान्तमन्नं चेत्प्रायविषयं तत् । गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी । 'वटकेभ्य इनिर्वाच्यः' (वा ३१८१) वटकिनी । १८८३ **कुल्माषादञ्** । (५-२-८३) कुल्माषाः प्रायेणान्नमस्यां कौल्माषी । १८८४ **श्रोत्रियंश्छन्दोऽधीते** । (५-२-८४) श्रोत्रियः । 'वा' इत्यनुवृत्तेश्छान्दसः । १८८५ **श्राद्धमनेन भुक्तमिनिठनौ** । (५-२-८५) श्राद्धी,

---

कर्मणि ल्युटि तु फलम् । तदाह **प्रयोजनं कारणं रोगस्य फलं वेति** । **तदस्मिन्नन्नम्** । प्रथमान्तादन्नवाचकाद् अस्मिन्नित्यर्थे कन् स्याद् अन्नस्य बाहुल्ये गम्ये संज्ञायामित्यर्थः । **वटकेभ्य इति** । संज्ञायामित्येव । **वटकिनीति** । वटकाः प्रायेण अन्नमस्यां पौर्णमास्यामिति विग्रहः । **कुल्माषादञ्** । कनोऽपवादः । 'स्याद्यावकस्तु कुल्माषः चणको हरिमन्थकः' इत्यमरः । **श्रोत्रियंश्छन्दोऽधीते** । द्वितीयान्ताच्छन्दश्शब्दाद् अधीते इत्यर्थे घन्, प्रकृतेः श्रोत्रादेशश्च निपात्यते । अध्येतृ-णोऽपवादः । **वेत्यनुवृत्तेरिति** । 'तावतिथम्' इति सूत्रान्मण्डूकप्लुत्येति शेषः । ततश्च घनभावे अध्येतृणीति भावः । वाग्रहणाननुवृत्तौ तु घना अध्येतृणो बाधः स्यादिति बोध्यम् । **श्राद्धमनेन** । प्रथमान्तात् श्राद्धशब्दाद् भुक्तमनेनेत्यर्थे इनिठनौ

द्वितीयेऽहनीति । यद्यपि द्वितीयशब्दः कालवाची न भवति, तथाप्यर्थप्रकरणा-दिना वृत्तिविषये काले वर्तत इति भावः । ननु साक्षात्कालवाचिभ्यो मासादिभ्यो न भवति, द्वितीयादिभ्यस्तु भवतीत्यत्र किं मानमिति चेत् । अत्राहुः—उत्तरसूत्रस्थ-संज्ञापकर्षणाच्छन्दसामान्याद्वा तद्बोध्यमिति । **वटकेभ्य इति** । कनि प्राप्ते वचनम् । ननु संज्ञाग्रहणात्कश्च भविष्यतीति चेत् । किं ततः ? इनेरप्राप्तत्वात्तदर्थं वचनमवश्य-कार्यमेव । 'अत इनिठनौ' इत्येव कथंचिदिनिः सिध्यतीत्याशा न कार्या । 'एकाक्षरात्कृतो जात्याः सप्तम्यां च न तौ स्मृतौ' इति वचनात् । **श्रोत्रियं** । यश्छन्दोऽधीते स श्रोत्रियो भवति । अत्र भाष्ये 'छन्दोऽधीते इत्यस्य वाक्यस्यार्थे श्रोत्रियन्नित्येतत्पदं निपात्यते' इति वाक्यार्थे पदवचनपक्षः । छन्दसो वा श्रोत्रभावो निपात्यते 'तदधीत इत्येतस्मिन्नर्थे घँश्च प्रत्ययः' इति पक्षान्तरं च स्थितम् । व्याख्यातं च कैयटेन 'वाक्यार्थस्य संबन्ध-रूपस्य क्रियारूपस्य वाऽसत्त्वरूपत्वात् । श्रोत्रियशब्दस्य च सत्त्वरूपार्थाभिधायित्वा-द्वाक्यार्थग्रहणेन तदाश्रयश्छन्दोऽध्यायी अभिधीयत इति । एकां शाखामधीत्य श्रोत्रियो भवतीति धर्मशास्त्रम् । **वेत्यनुवृत्तेरिति** । 'तावतिथं ग्रहणमिति लुग्वा' इत्यतः । **श्राद्धमनेन** । श्रद्धास्मिन्नस्तीति श्राद्धम् । 'प्रज्ञाश्रद्धार्चाभ्यो णः' । यद्यपि

श्राद्धिकः। **१८८६ पूर्वादिनिः।** (५-२-८६) पूर्वं कृतमनेन पूर्वी। **१८८७ सपूर्वाच्च।** (५-२-८७) कृतपूर्वी कटम्। **१८८८ इष्टादिभ्यश्च।** (५-२-८८) इष्टमनेन इष्टी। अधीती। **१८८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि।** (५-२-८९) लोके तु परिपन्थिशब्दो

एतौ स इत्यर्थः। श्राद्धसाधनद्रव्ये श्राद्धशब्दो लाक्षणिकः। इनिप्रत्यये नकारादिकार उच्चारणार्थः। **पूर्वादिनिः।** अनेनेति कर्तृतृतीयान्तमनुवर्तते। कां क्रियां प्रति कर्तेत्याकाङ्क्षायां भुक्तं पीतमित्यादि यत्किञ्चित्क्रियापदमध्याहार्यम्। उपस्थितत्वात् कृदर्थभूतं क्रियासामान्यमेव प्रतीयते। ततश्च पूर्वं कृतमनेनेति विग्रहे कृतमित्यादिक्रियाविशेषणात्पूर्वशब्दाद् अनेनेत्यर्थे इनिः स्यादित्यर्थः। **सपूर्वाच्च।** विद्यमानपूर्वादपि पूर्वशब्दादुक्तविषये इनिः स्यादित्यर्थः। पूर्वान्तादिति यावत्। प्रातिपदिकविशेषणत्वेऽपि प्रत्ययविधौ तदन्तविधिप्रतिषेधादप्राप्ते सूत्रमिदम्। **कृतपूर्वी कटमिति।** अत्र यद्वक्तव्यं तत्कर्तृकर्मणोः कृतीत्यत्रोक्तम्। **इष्टादिभ्यश्च।** इष्टादिभ्यः तृतीयान्तेभ्यः अनेनेत्यर्थे इनिः स्यादित्यर्थः। **छन्दसि परिपन्थि।** परिपन्थिन्, परिपरिन् एतौ शब्दौ छन्दसि निपात्येते पर्यवस्थातरि वाच्ये। पर्यवस्थातृशब्दादिनिप्रत्यये अवस्थातृशब्दस्य पन्थादेशे परिपन्थिन्शब्दः। पर्यवस्थातृशब्दादिनिप्रत्यये अवस्थतृशब्दस्य पर इत्यादेशे परिपरिनशब्दः। 'मा त्वा

पित्र्यं कर्म श्राद्धशब्देनोच्यते, तथापीह तत्साधनद्रव्यमुच्यते। मुख्यश्राद्धस्य भोक्तुमशक्यत्वात्। **श्राद्धी। श्राद्धिक इति।** 'अद्यतन एवेष्यते' अद्य भुक्ते श्वः श्राद्धिक इति मा भूत्। **पूर्वादिनिः।** पूर्वमिति क्रियाविशेषणाद् द्वितीयान्तात् प्रत्ययः। 'अनेन' इति कर्तृवाचकमनुवर्तते। न च क्रियामन्तरेण कर्ता संभवतीति काञ्चित्क्रियामध्याहृत्य प्रत्ययो विधेयस्तदाह **पूर्वं कृतमनेनेति। सपूर्वाच्च।** 'अनेन' इति पूर्वसूत्रं चानुवर्तते। विद्यमानपूर्वकात्पूर्वशब्दादनेनेत्यस्मिन्नर्थे इनिः स्यात्। 'पूर्वान्ताच्च' इत्येतत्फलितम्। **कृतपूर्वीति।** कृतपूर्वशब्दयोः 'सुप्सुपा' इति समासः। इह प्रातिपदिकाधिकारात् 'पूर्वादिनिः' इत्यनेनैव पूर्वशब्दान्तप्रातिपदिकात् कृतपूर्वशब्दादिनौ सिद्धे 'सपूर्वाच्च' इत्येतद् 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' इति परिभाषां ज्ञापयति। कृतपूर्वीत्येतत्सिद्धये 'पूर्वान्ताच्च' इति स्वीकृते तेनैव व्यपदेशिवद्भावेन पूर्वीत्यपि रूपे सिद्धे 'पूर्वादिनिः' इत्येतद् 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति परिभाषां ज्ञापयति। **छन्दसि।** पर्यवस्थातृशब्दाच्छत्रुपर्यायात्स्वार्थे इनिप्रत्ययः, अवस्थातृशब्दस्य च पन्थ पर एतावादेशौ निपात्येते। अपत्यं परिपन्थिनम्', 'मा त्वा परि परिणो विदन्'। उभयत्रापि परिशब्देऽवग्रहः। **लोके त्विति।** 'अनुपस्थित-

न भ्यास्यः। १८९० अनुपद्यन्वेष्टा । (५-२-९०) अनुपदमन्वेष्टा गवा-मनुपदी । साक्षाद्द्रष्टरि संज्ञायाम् । (५-२-९१) साक्षाद् द्रष्टा साक्षी। १८९२ क्षेत्रियच् परक्षेत्रे चिकित्स्यः । (५-२-९२) क्षेत्रियो व्याधिः, शरीरान्तरे चिकित्स्यः, अप्रतिकार्य इत्यर्थः। १८९३ इन्द्रियमिन्द्र-लिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा । (५-२-९३)

विदन्परिपन्थिनः, मा वा परिपरिणो विदन्' इति श्रुतौ उदाहरणम्। इदं सूत्रं वैदिक-प्रक्रियायामेव व्याख्यातुमुचितम् । **अनुपद्यन्वेष्टा** । पदस्य पश्चादनुपदम् । पश्चादर्थे अव्ययीभावः। सप्तम्या अम्भावः । अनुपदमित्यस्माद् अन्वेष्टरि अर्थे इनिप्रत्ययो निपात्यते । **साक्षाद्द्रष्टरि संज्ञायाम्** । साक्षादित्यव्ययम्, इह शब्दस्वरूपपरं लुप्तपञ्चमीकम् । साक्षादित्यव्ययाद् द्रष्टर्यर्थे इनिः स्यादित्यर्थः । **साक्षीति**। यः कर्मणि स्वयं न व्याप्रियते, किन्तु कर्म क्रियमाणं पश्यति सोऽयं साक्षीत्युच्यते । साक्षादित्यव्ययादिनिप्रत्ययः 'अव्ययानां भमात्रे–' इति टिलोपः । **क्षेत्रियच्** । परम् अन्यत् क्षेत्रं शरीरम् परक्षेत्रम्। चिकित्स्यः प्रतिकार्यः, 'कितेर्व्याधिप्रतीकारे' इत्युक्तेः। परक्षेत्रशब्दात् सप्तम्यन्तात् चिकित्स्य इत्यर्थे घच्, परशब्दस्य लोपश्च निपात्यते। **शरीरान्तर इति**। भाविनि शरीरे चिकित्स्यः, नतु वर्तमाने शरीर इत्यर्थः । फलितमाह **अप्रतिकार्य इति** । **इन्द्रियम्** ।

परिपन्थिभिः पार्थिवैः' इत्यादौ । **अनुपद्यन्वेष्टा**। अन्वेष्टरि इनिः प्रत्ययो निपात्यते। **अनुपदमिति**। पदस्य पश्चात्, पश्चादर्थेऽव्ययीभावः। **अनुपदी गवामिति**। पदापेक्षया षष्ठी । गोपदात्पश्चादन्वेषणं गवामेव। तेन हिरण्यादावन्वेष्ये न भवतीति हरदत्तः । **साक्षाद्द्रष्टरि** । द्रष्टर्यर्थे इनिः स्यात्। साक्षाच्छब्दोऽव्ययम्, तेन 'प्रकृतिवदनुकरणम्' इत्यतिदेशादिह सूत्रे पञ्चम्या लुक् । 'उदः स्थास्तम्भो–', 'अवाच्चालम्बना– इत्यादौ तु 'प्रकृतिवत्–' इत्यतिदेशस्य वैकल्पिकत्वेनाव्ययत्वाभावात्। पञ्चम्या लुङ् न भवतीति बोध्यम्। **साक्षीति**। 'अव्यानां भमात्रे–' इति टिलोपः। यद्यपि साक्षाद्द्रष्टारस्त्रयो भवन्ति दाता ग्रहीता उपद्रष्टा च, तथापीह संज्ञाग्रहणात् साक्षिशब्देनोपद्रष्टैवोच्यत इत्याहुः । **क्षेत्रियच्** । 'परक्षेत्रशब्दात्सप्तम्यन्ताद्घच् परशब्दस्य लोपश्च निपात्यते' इति मनोरमा। अन्ये तु 'परक्षेत्रे चिकित्स्यः' इत्यर्थे 'क्षेत्रियच्' इति निपात्यते । वाक्यार्थे पदवचनं श्रोत्रियवदित्यप्याहुः । एवमन्यत्रा-प्यूह्यम् । **क्षेत्रियो व्याधिरिति** । किंच क्षेत्रियं विषम्, यत्परशरीरे संक्रमय्य चिकित्स्यते । अपि च क्षेत्रियाणि तृणानि, यानि सस्यार्थक्षेत्रे जातानि चिकित्स्यानि विनाशयितव्यानि। किं च क्षेत्रियः पारदारिकः, परदाराः परक्षेत्रम्।

इन्द्र आत्मा, तस्य लिङ्गम्, करणेन कर्तुरनुमानात्। इतिकरणं प्रकारार्थम्। इन्द्रेण दुर्जयमिन्द्रियम्। **१८९४ तदस्यास्त्यस्मिन्निति मतुप्।** (५-२-९४) गावोऽस्यास्मिन्वा सन्ति गोमान्।

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥' (वा ३१८३)

इन्द्रलिङ्गमित्याद्यर्थेषु इन्द्रियमिति भवति। इन्द्रशब्दाद् यथायोगं षष्ठीतृतीयान्ताद् लिङ्गमित्याद्यर्थेषु घच् निपात्यत इति यावत्। **इन्द्र आत्मेति**। 'स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति। तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तामिन्द्रमित्याचक्षते' इति श्रुतेरिति भावः। **तस्य लिङ्गमिति**। आत्मनोऽनुमापकमित्यर्थः। लिङ्गत्वमुपपादयति **करणेनेति**। चक्षुरादीन्द्रियं किञ्चित्कर्त्रधिष्ठितं भवितुमर्हति, करणत्वात्, घटकरणदण्डादिवदित्यनुमानादित्यर्थः। मम चक्षुरित्येवमिन्द्रेण दृष्टं ज्ञातमिन्द्रियम्। इन्द्रेण सृष्टमिन्द्रियम्। इन्द्रेण जुष्टं सेवितं प्रीणितं वा इन्द्रियम्। रूढशब्दोऽयं कथञ्चिद्व्युत्पादितः। इन्द्रेण दुर्जयमिन्द्रियमिति साधयितुमाह **इतिकरणमिति**। इतिशब्द इत्यर्थः। **तदस्यास्त्यस्मिन्निति मतुप्**। तदस्यास्तीति तदस्मिन्नस्तीति विग्रहे अस्तिसमानाधिकरणात्प्रथमान्ताद् अस्य अस्मिन्निति चार्थे मतुप् स्यादित्यर्थः। उपावितौ। इतिशब्दो विषयविशेषलाभार्थः।

तत्र चिकित्स्यो निग्रहीतव्यः। सर्वेऽप्येते पक्षा आकरे स्थिताः। **इन्द्रियमिन्द्र**। इन्द्रशब्दाद्घच्। इन्द्रेण दृष्टं ज्ञातं 'मम चक्षुः, मम श्रोत्रम्' इत्यादिक्रमेण सृष्टमदृष्टद्वारा, जुष्टं प्रीणितं सेवितं वा। दत्तं यथायथं विषयेभ्यः। रूढिशब्दोऽयं यथाकथंचिद्व्युत्पादितः। **तदस्यास्त्यस्मिन्निति मतुप्**। तदिति प्रथमासमर्थात्प्रत्ययः। अस्तीति पुरुषवचने अविवक्षिते, कालस्तु विवक्षितः, धने गते भाविनि वा 'धनवानयम्' इति प्रतीत्यभावात्। इतिशब्दो विषयविशेषलाभार्थः। तथाहि—'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥' अस्तिविवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु विषयेषु भवन्तीति वार्तिकार्थः। भूमा बहुत्वम्। तच्चापेक्षिकम्। यस्य हि यावदुचितं तावदेव बहुत्वबोधकबहुशब्देनापि प्रतीयते। तथा पञ्चषाभिरपि गोभिर्देवदत्तस्य बह्वयो गाव इति व्यवहारः। राज्ञस्तु सहस्रगोरपि गावोऽल्पा इति व्यवहारः। गोमान्। यवमान्। यस्य खार्यादिभिः परिच्छिन्ना यवाः सन्ति स एवमुच्यते, न तु सहस्रेणापि यवैर्यवमानिति। कथं तर्हि 'यवमतीभिरद्भिर्यूपं प्रोक्षति' इति। अत्राहुः—जातिमात्रसम्बन्धस्य विवक्षितत्वाद् भूमाभावेऽप्यत्र मतुप्। भूमादिग्रहणं तु प्रायेण भूमादयः प्रतीयन्त

१८९५ रसादिभ्यश्च । (५-२-९५) मतुप् । रसवान् । रूपवान् । अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम् । रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव । 'गुणात्' (ग. सू. ११२) । 'एकाचः' (ग. सू. ११३) । स्ववान् । गुणग्रहणं रसादीनां विशेषणम् । १८९६ तसौ मत्वर्थे । (१-४-१९) तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । 'वसोः सम्प्रसारणम्' (सू ४३५) । विदुष्मान्

तदाह **भूमनिन्देति** । श्लोकवार्तिकमिदम् । भूमा बहुत्वम् , यथा गोमान्, यवमान् । निन्दायाम् ककुदावर्तिनी कन्या । प्रशंसायाम्—रूपवान् । नित्ययोगे - क्षीरिणो वृक्षाः । अतिशायने—उदरिणी कन्या । संसर्गे—दण्डी छत्री । वृत्तिनियामकः संसर्गविशेषो विवक्षितः, तेन पुरुषी दण्ड इति नास्ति । **रसादिभ्यश्च । मतुबिति** । शेषपूरणमिदम् । उक्तविषय इति शेषः । पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह **अन्यमत्वर्थीयेति** । 'अत इनिठनौ' इत्यादिनिवृत्त्यर्थमित्यर्थः । रसादीन् पठति **रसरूपेत्यादि भावेत्यन्तम् । गुणादिति । एकाच इति** । गणसूत्रम् । उदाहरति **स्ववानिति । गुणग्रहणमिति** । गुणादित्येतद् रसादीनां षण्णां विशेषणमित्यर्थः । तेन गुणवाचकानामेव एषां ग्रहणाद् जलादिवाचकानां रसादिशब्दानां द्रव्यवाचिनां च गन्धादिशब्दानाम् इह न ग्रहणमिति भावः । 'रसिको नटः, स्पर्शिकं वारि' इत्यादिप्रयोगदर्शनाद् इदं सूत्रं भाष्ये प्रत्याख्यातम् । ननु विद्वच्छब्दान्मतुपि यजादिस्वादिपरकत्वाभावेन भत्वाभावाद् 'वसोः संप्रसारणम्' इति कथं संप्रसारणमित्यत आह **तसौ मत्वर्थे** । मत्वर्थप्रत्ययाक्षिप्तप्रातिपदिकविशेषणत्वात्तदन्तविधिमभिप्रेत्याह **तान्तसान्ताविति** । तकारसकारान्ता-

---

इत्येवंपरमिति । **निन्दायां** ककुदावर्तिनी कन्या । **प्रशंसायां** रूपवान् । **नित्ययोगे** क्षीरिणो वृक्षाः । **अतिशायने** उदरिणी कन्या । **संसर्गे** दण्डी । संसर्गः संयोगः, तेन संयुक्तदण्ड एवोच्यते, न तु गृहावस्थितदण्डोऽपि । इह दण्डपुरुषयोः संयोगे सत्यपि दण्डी पुरुष इत्यादिवत् 'पुरुषी दण्डः' 'पुरुषवान् दण्डः' इति न प्रयुज्यते । वृत्तिनियामकस्य विलक्षणसम्बन्धस्याभावात् । संयोगे समानेऽपि प्रतीतिबलाद्वैलक्षण्यं कल्प्यत इत्याहुः । एवं च यवसंयोगमात्रेण यवमत्य आपो न भवन्ति, किं तु यवमज्जलवच्च पात्रमेवेत्याशयेन 'कथं यवमतीभिरद्भिः' इत्याक्षेपो भूमादिग्रहणं प्रायिकमित्याद्युत्तरं च संगच्छत एव । **अन्यमत्वर्थीयेति** । कथं तर्हि 'रूपिणी कन्या' 'रसिको नटः' इति । अत्राहुः—रसादिगणे 'गुणात्' इति पठ्यते । तेन गुणवाचिभ्य एवान्यमत्वर्थीयस्य निषेधः, रूपिणीत्यत्र तु रूपशब्देन सौन्दर्यं गृह्यते । तच्च न गुणः । रसिक इत्यत्र तु रसशब्देन भावो गृह्यते न तु रसनाग्राह्यो

'गुणवचनेभ्यो मतुपो लुगिष्टः' (वा ३१८२) शुक्लो गुणोऽस्यास्तीति शुक्लः पटः। कृष्णः। १८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः। (८-२-९) मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान्। १८९८ झयः। (८-२-१०) झयन्तान्मतोर्मस्य वः स्यात्। अपदान्तत्वाच्च जश्त्वम्। विद्युत्वान्। १८९९ संज्ञायाम्। (८-२-११)

वित्यर्थः। **गुणवचनेभ्य इति**। वार्तिकमिदम्। गुणे गुणवति च ये प्रसिद्धाः शुक्लादिशब्दाः त एव गृह्यन्ते, न तु रूपादिशब्दा अपि। तेन रूपं वस्त्रमित्यादि न भवति। अत्र यद्वक्तव्यं तदध्वरमीमांसाकौतूहले अरुणाधिकरणे प्रपञ्चितमस्माभिः। **मादुपधायाश्च**। मात् उपधायाश्चेति च्छेदः। मादिरयावर्तते। म् च अश्चेति समाहारद्वन्द्वात्पञ्चम्येकवचनम्। मतुप्प्रत्ययाक्षिप्तप्रातिपदिकविशेषणत्वा-त्तदन्तविधिः। मवर्णान्तादवर्णान्तात्प्रातिपदिकात्परस्य मतोः मस्य व स्यादित्येकोऽर्थः। मादित्युपधाविशेषणम्। मकारात्मिका अकारात्मिका च या उपधा ततः परस्य मतो-र्मस्य वः स्यादित्यन्योऽर्थः। फलितमाह **मवर्णेत्यादिना**। मान्तादुदाहरति—**किंवानिति**। किमस्यास्मिन्वास्तीति विग्रहः। एवमग्रेऽपि। अकारान्तादुदाहरति—**ज्ञानवानिति**। अत्र तपरकरणाभावादाकारस्यापि ग्रहणमिति मत्वाह **विद्यावा-निति**। मोपधादुदाहरति—**लक्ष्मीवानिति**। अदुपधादुदाहरति—**यशस्वानिति**। 'तसौ मत्वर्थे' इति भत्वाच्च रुत्वम्। आकारोपधादुदाहरति—**भास्वानिति**। अथ विद्युत्वानित्यत्र मकाराकारान्तत्वाभावान्मकाराकारोपधत्वाभावाच्च मादुपधाया इति वत्वाप्राप्तावाह **झयः**। **अपदान्तत्वादिति**। 'तसौ मत्वर्थे' इति भत्वेन पदत्वबाधादिति भावः। **संज्ञायाम्**। अहीवतीत्यादि नदीविशेषस्य नग-

---

गुण इति। **गुणवचनेभ्य इति**। गुणे तद्वति च प्रसिद्धा ये शुक्लादयस्त एव गृह्यन्ते, न तु रूपादयोऽपि। तेन रूपं वस्त्रमित्यादिप्रयोगो न भवति। **मादुपधाया**। मूच अश्च मं समाहारे द्वन्द्वः। तेन मतुप्प्रत्ययाक्षिप्तं प्रातिपदिकं विशेष्यते, तदाह **मवर्णावर्णान्तादिति**। 'उपधायाश्च' इति वाक्यान्तरम्। उपधाभूतन्मात्परस्य मतोरित्यर्थः। 'येन नाव्यवधान-' न्यायेनान्त्यालव्यवहितेऽपि भवतीति। एवमक्षरार्थे स्थिते फलितमाह **मवर्णावर्णोपधादिति**। **झयः**। इदमपि मतुबाक्षिप्तस्य प्रातिपदिकस्य विशेषणम्, तदाह **झयन्तादिति**। **विद्युत्वानिति**। एतेन 'वह्निमद्वान्' इति नैयायिकप्रयोगो निरस्तः। उक्तरीत्या जश्त्वस्याप्रवृत्तेः। मत्वन्ता-न्मतुपो निषेधाच्च। ननु गोधुक्मान् मधुलिण्मानित्यत्र हस्य घत्वे ढत्वे च कृते 'झयः'

मतोर्मस्य वः स्यात्। अहीवती। मुनीवती। शरादित्वाद् दीर्घः। १६०० **आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। (८-२-१२)** एते षट् संज्ञायां निपात्यन्ते। आसनशब्दस्यासन्दीभावः। आसन्दीवान्ग्रामः। अन्यत्रासनवान्। अस्थिशब्दस्याष्ठीभावः। अष्ठीवान्। अस्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र। कक्ष्यायाः सम्प्रसारणम्। कक्षीवान्नामर्षिः। कक्ष्यावानन्यत्र। लवणशब्दस्य रुमण्भावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो नलोपाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र। १६०१ **उदन्वानुदधौ च। (८-२-१३)** उदकस्योदन्भावो मतावुदधौ संज्ञायां च। उदन्वान्समुद्र ऋषिश्च। १६०२ **राजन्वान्सौराज्ये। (८-२-१४)** राजन्वती[1] भूः। राजवानन्यत्र। १६०३ **प्राणिस्थादातो लजन्यतरस्याम्। (५-२-९६)** चूडालः, चूडावान्। 'प्राणिस्थात्' किम्–शिखावान्दीपः। 'आतः' किम्–हस्तवान्। 'प्रत्ययङ्गादेव' (वा ३१८६)

रीविशेषस्य वा संज्ञा। **शरादित्वादिति।** 'शरादीनां च' इति दीर्घ इत्यर्थः **आसन्दीवत्।** समाहारद्वन्द्वे ह्रस्वत्वम्। **निपात्यन्त इति।** आसन्दीभावादिकमेवात्र निपात्यते, वत्वं तु संज्ञायामिति सिद्धम्। **कक्ष्यायाः सम्प्रसारणमिति।** निपात्यत इति शेषः। 'न सम्प्रसारणे–' इति सूत्रभाष्ये तु 'कक्ष्याया संज्ञायां मतौ सम्प्रसारणं वक्तव्यम्' इत्यारब्धम्। अतोऽत्र सूत्रे कक्षीवच्छब्दपाठः अनार्ष इत्याहुः। **उदन्वानुदधौ च। उदधौ संज्ञायां चेति।** वस्तुतस्तु 'उदन्वांश्च' इत्येव सूत्रयितुमुचितम्, 'संज्ञायाम्'इत्यनुवृत्त्यैव समुद्रेऽपि उदन्वच्छब्दस्य सिद्धत्वात्। **राजन्वान् सौराज्ये।** सु शोभनो राजा यस्य देशस्य स सुराजा, तस्य भावः सौराज्यम्। तस्मिन्नर्थे राजन्शब्दाद् मतुपि 'मादुपधायाः–' इति वत्वं सिद्धम्। नलोपाभावो निपात्यते। **प्राणिस्थात्।** आदन्तात्प्राणिस्थवाचिनः शब्दाद् मत्वर्थे लच् वा स्यादित्यर्थः। **शिखावान् दीप इति।** अत्र शिखाशब्दस्य

इति वत्वप्रवृत्त्याऽनुनासिकपरत्वाभावात् 'प्रत्यये भाषायां नित्यम्' इत्यनेन घकारढकारयोरनुनासिकाप्रवृत्तेर्गोधुग्वान् मधुलिड्वानित्यनिष्टं प्रसज्येत। नैवम्, घत्वढत्वयोरसिद्धत्वेन 'झयः' इति वत्वाप्रवृत्तेः। **प्राणिस्थात्। शिखावान्दीप इति।** प्रत्युदाहरणदिगियं दर्शिता। शिखाशब्दस्य व्रीह्यादिपाठेन लचोऽप्रसक्तत्वात् 'चूडावान् वृक्षः' इति प्रत्युदाहार्यमिति हरदत्तः। न च वृक्षस्य प्राणित्वमस्तीति शङ्क्यम्,

---

1 कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः॥ रघु. ६–२२।

नेह—मेधावान्। प्रत्ययस्वरेणैव सिद्धे अन्तोदात्तत्वे चूडालोऽसीत्यादौ 'स्वरितो वानुदात्ते पदादौ' (सू १६९१) इति स्वरितबाधनार्थश्चकारः। १९०४ **सिध्मादिभ्यश्च**। (५-२-९७) लच्वा स्यात्। सिध्मलः, सिध्मवान्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थम्, न तु प्रत्ययविकल्पार्थम्। तेन अकारान्तेभ्य इनि-

---

दीपाप्रवाचिनः प्राणिस्थवाचित्वाभावाद् न लजिति भावः। **प्राण्यङ्गादेवेति**। भाष्ये तथा वचनादिति भावः। ननु लचश्चित्करणं व्यर्थम्, 'चितः' इत्यन्तोदात्तत्वस्य प्रत्ययस्वरेणैव सिद्धेरित्यत आह **प्रत्ययस्वरेणेति। चूडालोऽसीति**। तत्र असीत्येतत् 'तिङ्ङतिङः' इति निहतम्। चूडालात्सो रुत्वे उत्वे तस्य सुप्त्वेनानुदात्तस्याद्गुणस्य 'एकादेश उदात्तेन–' इत्युदात्तत्वे तस्य परेण पूर्वरूपैकादेशे तस्य पदाद्यनुदात्तेन सहैकादेशत्वात् 'स्वरितो वाऽनुदात्ते' इत्यस्य प्राप्तौ तन्निवृत्त्यर्थं चित्करणमित्यर्थः। **सिध्मादिभ्यश्च। लच्वा स्यादिति**। मत्वर्थे इति शेषः। **अन्यतरस्यामिति**। पूर्वसूत्रादन्यतरस्यामित्यनुवृत्तं न लच्प्रत्ययविकल्पार्थकम्, किन्तु मतुप्प्रत्ययसमुच्चयार्थकमेव अन्यतरस्यामित्यस्याव्ययत्वेनानेकार्थकत्वात्। ततश्च सिध्मादिभ्यो लज् मतुप् च स्यादिति लभ्यते। नचान्यतरस्यामित्यस्यात्र लच्प्रत्ययविकल्पार्थकत्वेऽपि तदभावे मतुप् सिद्ध इति वाच्यम्, लजभावे मतुबेव भवति, न तु 'अत इनिठनौ' इत्येतदर्थं समुच्चयविधानात्। तदाह **तेनेति**। सिध्मादिषु ये अकारान्ताः। तेभ्य इनिठनौ नेत्यर्थः। एतत्सर्वं भाष्ये स्पष्टम्। सिध्म, गडु, मणि, विजय, पांसु, हनु, पार्ष्णि इत्यादयः सिध्मादिषु

मुखनासासंचारी वायुः प्राणः, तद्वानेव प्राणीति तदाशयात्। **प्राण्यङ्गादेवेति**। एतच्चेति करणानुवृत्त्या लभ्यते। **चूडालोऽसीति**। असीत्यस्य 'तिङ्ङतिङः' इति निघातः। चूडालशब्दात्सोरुत्वे तस्य 'अतो रोरप्लुतात्–' इत्युकारे कृते हलां स्रंसनधर्मत्वात्तत्स्थानिकोऽकारोऽनुदात्तः। सुप्स्थानिकस्यापि सुप्त्वाद् 'अनुदात्तौ सुप्पितौ' इत्यनुदात्त इत्यन्ये। पूर्वेण सह आद्गुणे सति 'एकादेश उदात्तेन–' इत्योकार उदात्तः। ततः 'एङः पदान्तादति' इति पूर्वरूपमेकादेशस्तस्य 'स्वरितो वानुदात्ते–' इत्यादिना स्वरिते प्राप्ते तद्बाधनाय चकार इत्यर्थः। **सिध्मादिभ्यश्च**। सिध्म, गडु, मणि, विजय, निष्पाव, पांसु, हनु, पार्ष्ण्यादयः सिध्मादयः। **समुच्चयार्थमिति**। निपातानामनेकार्थत्वादिति भावः। न च इनिठनावप्यन्यतरस्यांग्रहणेन समुच्चीयेतामिति शङ्क्यम्, तयोरप्रकृतत्वात्। मतुप्प्रत्ययस्तु समुच्चीयते। तस्य प्रकृतत्वात्। अस्ति चेह लिङ्गं 'केशाद्वः' इत्यत्रान्यतरस्यांग्रहणम्। तद्धि इनिठनोः प्राप्त्यर्थं क्रियते। प्रकृतस्यान्यतरस्यांग्रहणस्य विकल्पार्थत्वे तदनुवृत्त्यैव सिद्धौ किं

ठनौ न । 'वातदन्तबलललाटानामूङ् च' (ग सू ११९) । वातूलः । १९०५ **वत्सांसाभ्यां कामबले** । (५-२-९८) आभ्यां लच् स्याद्यथासङ्ख्यं कामवति बलवति चार्थे । वत्सलः । अंसलः । १९०६ **फेनादिलच्च** । (५-२-९९) चाल्लच् । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते । फेनिलः, फेनलः, फेनवान् ।

पठिताः । एवं च लज्वा स्यादिति विवरणवाक्ये वाशब्दश्चार्थे । इदमन्यतरस्यांग्रहणमुत्तरसूत्रेषु सर्वत्र मत्वर्थीयविधिष्वनुवर्तते, न तु रूढशब्देषु । अतो न तेषु मतुप्समुच्चय इत्यास्तां तावत् । **वातदन्तबलललाटानामूङ् चेति** । सिध्मादिगणसूत्रमिदम् । एभ्यो लच् प्रकृतेरूङ् चादेशः । ङकारस्तु आदेशत्वसूचनार्थः । अन्यथा प्रत्ययत्वशङ्का स्यात् । वातूलः, एवं दन्तूलः, बलूलः, ललाटूलः । **वत्सांसाभ्यां कामबले । लच् स्यादिति** । मत्वर्थे इति शेषः । कामबलशब्दौ तद्वति लाक्षणिकावित्यभिप्रेत्याह **कामवति बलवति चेति । फेनादिलच्च** । मत्वर्थे इति शेषः । **चाल्लजिति** । संनिहितत्वादिति भावः । नन्वेवं सति मतुब् नैव स्यादित्यत आह **अन्यतरस्यांग्रहणमिति** । सिध्मादिसूत्रे

तेन । क्रियमाणं तु पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थतां ज्ञापयत्येव । तथा च वार्तिकम्—'लजन्यतरस्यामिति समुच्चयः' इति । अयं भावः—'प्राणिस्थात्–' इति सूत्रेण लचि विकल्पिते पक्षे मतुबिति चूडालश्चूडावानिति रूपद्वयं यद्यपि सिध्यति तथापि सिध्मादिषु येऽदन्तास्तेषु इनिठनोः प्रवृत्त्या दोषः । समुच्चयार्थत्वे तु न दोष इति । एवं च 'लज्वा स्यात्' इति वृत्तौ वाशब्दः समुच्चये बोध्यः । 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इत्यमरः । **वातदन्तेत्यादि** । सिध्माद्यन्तर्गणसूत्रम् । **ऊङ् चेति** । ङित्वादन्तादेशः । ऊकारमात्रोक्तावन्तादेशत्वसिद्धावपि प्रत्ययत्वशङ्कानिवारणाय ङानुबन्धः कृतः । न च षष्ठ्यन्ताद्विहितस्य प्रत्ययत्वं नेति शङ्क्यम् । 'अहंशुभमोर्युस्' 'गोपयसोर्यत्' इत्यादौ प्रत्ययत्वाभ्युपगमात् । **वातूल इति** । अन्तोदात्तमिदम् । प्राचा तु 'बलादूलः' 'वाताच्च' इति पठित्वा वातुल इत्युक्तम् । तदुपेक्ष्यम्, अन्त्यस्वरेण मध्योदात्तत्वप्रसङ्गात् । गणसूत्रबलेनान्तोदात्तमेवेष्यत इत्याहुः । पार्ष्णिधमन्योर्दीर्घश्च' 'क्षुद्रजन्तूपतापाच्च' इत्यपि गणे पठ्यते । पार्ष्णीलः । धमनीलः । क्षुद्रजन्तुः—यूकालः । मक्षिकालः । उपतापो रोगः विपादिकालः । **वत्सांसाभ्याम् । कामवतीति** । कामबलशब्दौ सूत्रे अर्शआद्यजन्ताविति भावः **वत्सल इति** । स्नेहवानित्यर्थः । ननु वत्सांसशब्दौ वयोविशेषे प्राण्यङ्गविशेषे च रूढौ, न कामबलयोः । तत्कथं ताभ्यां लजन्ताभ्यां कामवान् बलवांश्चोच्यत इति चेत् । अत्राहुः—वृत्तिविषये वत्सांसशब्दौ स्नेहबलयोर्वर्तेते इति । अस्मिंस्तु प्रकरणे

१६०७ लोमादिपामादिपिच्छादिभ्यः शनेलचः । (५-२-१००)
लोमादिभ्यः शः—लोमशः, लोमवान् । रोमशः, रोमवान् । पामादिभ्यो नः—पामनः । 'अङ्गात्कल्याणे' (ग सू ११८) । अङ्गना । 'लक्ष्म्या अच्च' (ग सू १२१) लक्ष्मणः । 'विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः' (वा ३१६४) विषुणः । पिच्छादिभ्य इलच्—पिच्छिलः, पिच्छवान् । उरसिलः, उरस्वान् ।

व्याख्यातमिदम् । **लोमादि** । श, न, इलच् एते त्रिभ्यो गणेभ्यो यथासंख्यं स्युर्मत्वर्थे । **अङ्गात्कल्याण इति** । पामादिगणसूत्रम् । कल्याणं सुन्दरम् , तद्विशेषणकादङ्गशब्दाद् मत्वर्थे नप्रत्यय इत्यर्थः । **अङ्गनेति** । कल्याणानि अङ्गानि अस्या इति विग्रहः । 'लक्ष्म्या अच्च' इत्यपि पामादिगणसूत्रम् । लक्ष्मीशब्दाद् मत्वर्थे नप्रत्ययः स्यात् प्रकृतेरकारोऽन्तादेशश्च । **लक्ष्मण इति** । लक्ष्मीरस्यास्तीति विग्रहः । नप्रत्यये प्रकृतेरकारे अन्तादेशे णत्वम् । **विष्वगिति** । इदमपि पामादिगणसूत्रमिति केचित् । भाष्ये तु नप्रकरणे इदं वार्तिकं पठितम् । विषु इत्यव्ययं सर्वत इत्यर्थे । विषु अञ्चतीति विष्वङ् । सर्वतो गामीत्यर्थ इति धूर्तस्वामी । विषु इति तिर्यगर्थे इति भवस्वामी । पराङ्मुख इति भट्टभास्करः । विषु अञ्च् इत्यस्माद् अकृतसन्धेर्मत्वर्थे नप्रत्ययः स्यात्, उत्तरपदलोपश्चेत्यर्थः । **विषुण इति** । विष्वङ् अस्यास्तीति लौकिकविग्रहः । विषु अञ्च् इत्यलौकिकविग्रहवाक्यम् । कृतसन्धेर्नप्रत्यये तु विष्वक्शब्दस्य उत्तरपदस्य लोपे 'लोपो व्योः–' इति वलोपे 'विष्ण'

सर्वत्र समुच्चीयमानोऽपि मतुबिह नेष्यते । मतुबन्तेनोक्तार्थस्याप्रतीतेः । किं त्वर्थान्तरमेव तेन प्रतीयते । वत्सवती गौः । अंसवान् दुर्बल इति । **लोमादि** । इह 'नन्दिग्रहिपचादिभ्यः–' इति वत् लोमपामपिच्छादिभ्यः' इति सुपठम् । 'अङ्ग कल्याणे' इति गणसूत्रमर्थतः पठति **अङ्गादिति** । शाकीपलालीदद्र्वा ह्रस्वत्वं च । चान्नप्रत्ययः । महच्छाकं शाकी, तद्वत् शाकिनम् । महत्पलालं पलाली, तद्वत् पलालिनम् । 'दरिद्रातेरालोपश्च' इत्युणादिसूत्रेण इकाराकारयोर्लोपश्चाद्रूप्रत्ययः । दद्रूस्त्वग्रोगविशेषः । तद्वान् दद्रुणः । **विष्वगिति** । 'समर्थानाम्–' इत्यस्यापवादोऽयम् । अकृतसन्धेरकृतयणादेशस्याञ्चतेर्लोपः । चकारान्नप्रत्यय इत्यर्थः । यदि तु कृते यणादेशे उत्तरपदलोपः स्यात्, तदा वलिलोपे सति विष्ण इति स्यात् । **विषुण इति** । विषु नाना अञ्चन्तीति विष्वञ्चि, तान्यस्य सन्ति विषुणः, विषुवदाख्यः कालः । तस्य हि नानागतानि दिनानि सन्ति । दिनान्तराणां न्यूनाधिकभावस्य तन्मूलत्वात् । अयं भावः—विषुवति दिनानां समतायां जातायामग्रे न्यूनान्यधिकानि च दिनानि भवेयुरिति नानागतदिनवत्त्वं यद्यपि विषुवति नास्ति तथापि नानागतदिनमूलभूत-

१९०८ प्रज्ञाश्रद्धार्चाभ्यो णः। (५-२-१०१) प्राज्ञो व्याकरणम्। प्राज्ञा। श्राद्धः। आर्चः। 'वृत्तेश्च' (वा ३११९) वार्त्तः। **१९०९ तपःसहस्राभ्यां विनीनी।** (५-२-१०२) विनीन्योरिकारो नकारपरित्राणार्थः। तपस्वी सहस्री। असन्तत्वाददन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधो मा भूदिति। सहस्रात्तु

इति स्यादिति भावः। समर्थानामित्यस्यापवादोऽयम्। **प्रज्ञाश्रद्धार्चाभ्यो णः।** प्रज्ञा, श्रद्धा, अर्चा एभ्यो मत्वर्थे णप्रत्ययः स्यादित्यर्थः। **प्राज्ञो व्याकरणमिति।** प्रज्ञानं प्रज्ञा। स्त्रियामित्यधिकारे प्रपूर्वकाद् ज्ञाधातोः 'आतश्चोपसर्गे' इति भावे अङ्। प्रज्ञा अस्यास्तीति विग्रहः। उपसर्जनभूतामपि प्रज्ञानक्रियां प्रति व्याकरणस्य कर्मत्वाद् द्वितीया। कृद्योगषष्ठी नात्र प्रवर्तते, 'कर्तृकर्मणोः कृति' इत्यत्र कृद्ग्रहणेन तद्धितयोगे तन्निषेधात्। अत्र यद्वक्तव्यं तत्कर्तृकर्मणोः कृतीत्यत्र प्रपञ्चितम्। न च प्रजानातीति प्रज्ञः। 'इगुपध-' इति कः। प्रज्ञ शब्दात् स्वार्थे अणि प्राज्ञ इति सिध्यतीति शङ्क्यम्, तथा सति स्त्रियां ङीप्प्रसङ्गात्, तदाह **प्राज्ञेति। श्राद्ध इति।** श्रद्धा अस्यास्तीति विग्रहः। **आर्च इति।** अर्चा अस्यास्तीति विग्रहः। **वृत्तेश्चेति।** वार्तिकमिदम्। मत्वर्थे णप्रत्यय इति शेषः। **वार्त्त इति।** वृत्तिरस्यास्तीति विग्रहः। **तपःसहस्राभ्याम्।** विनिश्च इनिश्चेति द्वन्द्वः। मत्वर्थे इति शेषः। यथासंख्यमन्वयः। विनिप्रत्यये इनिप्रत्यये च नकारादिकारौ उच्चारणार्थौ। ननु नकारयोः इत्संज्ञा कुतो न स्यात्। न च प्रयोजनाभावः, नित्स्वरस्यैव फलत्वादित्यत आह **विनीन्योरिकारो नकारपरित्राणार्थ इति।** तथा च उपदेशे अन्त्यत्वाभावान्नेत्संज्ञेति भावः। यद्यपि 'अस्मायामेधा-' इत्यसन्तत्वादेव तपःशब्दाद्विन्सिद्धः। सहस्रशब्दात्तु 'अत इनिठनौ' इत्येवेन्सिद्धः। तथापि विशिष्य उत्तरसूत्रविहितेन अणा असन्तादन्तलक्षणयोः विनीन्योः सामान्यविहितयोः बाधो मा भूदिति विशिष्येह तपस्सहस्रशब्दाभ्यां तयोः विधानम्। सहस्रशब्दात्तु अदन्तलक्षणठनोऽपि बाधनार्थमिह इन्विधानम्। एतत्समाधानं क्वचिन्मूलपुस्त-

---

दिनानां सत्त्वात्तयोच्यत इति। तथा नानागमनस्वान्मृत्युर्वायुरव्यवस्थितचित्तश्च विगुणशब्देनोच्यते। **प्रज्ञाश्रद्धा। प्राज्ञो व्याकरणमिति।** गुणभूतया क्रियया कर्मत्वेन सम्बन्धः। कृद्ग्रहणात्तद्धितप्रयोगे षष्ठी न कृतपूर्वीकटमितिवत्। ननु प्रकर्षेण जानातीति प्रज्ञः। स एव प्रज्ञावान्। तथा च प्रज्ञ एव प्राज्ञ इत्यणि कृते सिद्धमिष्टं किमत्र प्रज्ञाग्रहणेनेत्याशङ्कां निराकुर्वन्नाह **प्राज्ञेति।** स्त्रियां टाप्। 'प्रज्ञादिभ्यश्च' इत्यणि तु ङीप् स्यादिति भावः। **वृत्तेश्चेति।** वार्तिकमिदम्। काशिकाकृता तु वृत्तिशब्दः सूत्रे प्रक्षिप्तः। विच्छिन्नस्य प्रतिविधानं वृत्तिः। **तपस्वी। सहस्रीति।**

ठनोऽपि बाधनार्थम् । **१९१० अण् च।** (५-२-१०३) योगविभाग उत्तरार्थः। तापसः। साहस्रः। 'ज्योत्स्नादिभ्य उपसंख्यानम्' (वा ३१९७)। ज्यौत्स्नः। तामिस्रः। **१९११ सिकताशर्कराभ्यां च।** (५-२-१०४) सैकतो घटः। शार्करः। **१९१२ देशे लुबिलचौ च।** (५-२-१०५) चादण्मतुप् च। सिकताः सन्त्यस्मिन्देशे सिकताः, सिकतिलः, सैकतः, सिकता-

---

केषु दृश्यते। **अण् च।** तपस्सहस्राभ्यां मत्वर्थ इति शेषः। ननु 'तपःसहस्राभ्यां विनीन्यणः' इत्येकमेव सूत्रमस्तु। नच तपःसहस्राभ्यां विनीन्योर्यथासंख्यार्थं पृथक्सूत्रकरणम्, अन्यथा त्रयोऽपि प्रत्यया द्वाभ्यां स्युरिति वाच्यम्, 'तपःसहस्राभ्यामण्विनीनी' इति सूत्रकरणे भिन्नविभक्त्युच्चारणादेव अणा उभयसम्बन्धस्य विनीन्योर्यथासंख्यत्वस्य च सिद्धेरित्यत आह **योगविभाग उत्तरार्थ इति।** उत्तरसूत्रे अण एवानुवृत्त्यर्थ इत्यर्थः। **ज्यौत्स्न इति।** शुक्लपक्ष इति शेषः। ज्योत्स्ना चन्द्रिका, सा अस्यास्तीति विग्रहः। **तामिस्र इति।** कृष्णपक्ष इति शेषः। तमिस्राः तमोयुक्ता रात्रयः, ता अस्य सन्तीति विग्रहः। ज्योत्स्नादित्वादण्। **सिकताशर्कराभ्यां च।** मत्वर्थे अणिति शेषः। **सैकतो घट इति।** सिकता अस्य सन्तीति विग्रहः। देशे लुपो वक्ष्यमाणत्वाद् घट इति विशेष्यम्। 'अप्सुमनःसमासिकतावर्षाणां बहुत्वं च' इति लिङ्गानुशासनसूत्रात् सिकताशब्दो नित्यं बहुवचनान्तः। **देशे लुबिलचौ च।** पूर्वसूत्रविहितस्याणो लुप् इलच स्यादित्यर्थः। **चादणिति।** संनिहितत्वादिति भावः। तर्हि अपवादेन मुक्ते उत्सर्गस्याप्रवृत्तेर्मतुव् नैव स्यादित्यत आह **मतुप् चेति।** समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्तेरिति भावः। **सिकता इति।** सिकताशब्दात् नित्यं बहुवचनान्तादणो लुपि

असन्तत्वाददन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा माभूदिति। सहस्रात्तु ठनोऽपि बाधनार्थम्। एतच्च समाधानं मूलपुस्तकेष्वपि क्वचिद् दृश्यते। **उत्तरार्थ इति।** विनीन्योर्यथासंख्यप्रवृत्त्यर्थश्चेत्यपि बोध्यम्। **ज्यौत्स्न इति।** शुक्लपक्षः। **तामिस्र इति।** कृष्णपक्षः नरकविशेषश्च। तमःसमूहस्तमिस्रम्। 'ज्योत्स्नातमिस्रा—' इति निपातनान्मत्वर्थीयो रः। तत्र ह्यवयवभूतानि तमांसि विद्यन्ते। तदस्मिन्नस्तीति विग्रहे रान्तादण्। स्त्रियां तामिस्री। 'तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता' इत्यमरोक्तौ तु तमिस्रेत्येतद्रान्तं न त्वणन्तमिति न विरोधः। एवं च तमिस्रा रात्रयः अस्मिन् सन्ति तामिस्रः पक्ष इत्यपि व्याख्यातुं शक्यम्। **सिकताशर्करा।** देशविशेषस्य वक्ष्यमाणत्वादाह **घट इति। मतुप् चेति।** अन्यतरस्यांग्रहणेन सर्वत्र मतपः समुच्चयादिति भावः। **सिकता इति।** लुपि युक्तवद्भावः। अत्र

वान्। एवं शर्करेत्यादि। **१९१३ दन्त उन्नत उरच्।** (५-२-१०६) उन्नता दन्ताः सन्त्यस्य दन्तुरः। **१९१४ ऊषसुषिमुष्कमधो रः।**(५-२-१०७) ऊषरः। सुषिरः। मुष्कोऽण्डः, मुष्करः। मधु माधुर्यम्, मधुरः। 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्' (वा ३११८)। खरः। मुखरः। कुञ्जो हस्तिहनुः, कुञ्जरः। 'नगपांसुपाण्डुभ्यश्च' (वा ३११९)। नगरम्। पांसुरः। पाण्डुरः। पाण्डरशब्दस्त्वव्युत्पन्न एव। 'कच्छ्वा ह्रस्वत्वं च' (वा ३२००)।

प्रातिपदिकावयवत्वात् सुपो लुकि युक्तवद्भावाद्विशेष्यस्य देशस्य एकत्वेऽपि बहुवचनमिति भावः। 'हयवरट्' इति सूत्रे 'एका च सिकता तैलदाने असमर्था' इति भाष्ये प्रयोगात् सिकताशब्द एकवचनान्तोऽप्यस्तीति लिङ्गानुशासने मूलकारो वक्ष्यति। **दन्त उन्नत उरच्।** उन्नतविशेषणकाद्दन्तशब्दाद् मत्वर्थे उरच् स्यादित्यर्थः। उन्नत इति प्रकृतिविशेषणम्। दन्त इति सप्तमी पञ्चम्यर्थे। **ऊषसुषि।** ऊष, सुषि, मुष्क, मधु एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। सौत्रं पुंस्त्वम्। एभ्यो मत्वर्थे रप्रत्ययः स्यादित्यर्थः। **ऊषर इति।** ऊषः क्षारमृत्तिकाविशेषोऽस्यास्तीति विग्रहः। **सुषिर इति।** सुषिः बिलम्, अस्यास्तीति विग्रहः। मधुशब्दः क्षौद्रे द्रव्ये माधुर्यात्मकरसविशेषे च गुणे वर्तते। तत्र रसविशेषवाचिन एवात्र ग्रहणमित्याह **मधु माधुर्यमिति।** तथा भाष्यादिति भावः। अन्यथा मधुद्रव्यवति घटेऽपि मधुरपदप्रयोगः स्यात्। खरो गर्दभः, धिष्ण्यो वा। मुखरः शब्दं कुर्वन्। कुञ्जरो हस्ती। रूढशब्दा एते। **नगपांस्विति।** वार्तिकमिदम्। नगरमिति जातिविशेषवाची। अत एव नगरीति ङीष्। **पांसुर इति।** पांसुः अस्यास्तीति विग्रहः। **पाण्डुर इति।** पाण्डुः शुक्लवर्णः, सः अस्यास्तीति विग्रहः। कथं पाण्डरशब्द इत्यत आह **पाण्डरशब्दस्त्विति।** 'हरिणः पाण्डरः पाण्डुः' इत्यमरः। **कच्छ्वा इति।** वार्तिकमिदम्

सूत्रद्वयस्योदाहरणान्यमरः संजग्राह—'स्त्री शर्करा शर्करिलः शार्करः शर्करावति। देश एवादिमावेवमुन्नेयाः सिकतावति' इति। **दन्त उन्नत।** उन्नत इति किम्, दन्तवान्। **ऊषसुषि।** समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। 'स्यादूषः क्षारमृत्तिका। 'ऊषवानूषरः' इत्यमरः। सुषिश्छिद्रम्। **खर इति।** महत्कण्ठविवरं खं तद्वानित्यर्थः। गर्दभे रूढोऽयम्। मुखरो वाचाल इति हरदत्तः। **नगरमिति।** नगा वृक्षाः पर्वताश्च। जातिशब्दोऽयम्। तथा च नगरीत्यत्र ङीष् भवति। नगशब्दोऽयमश्मादिषु पठ्यते इति 'वुञ्छण्–' आदिसूत्रेणास्य सिद्धत्वादस्यादोऽयं न वक्तव्य इति हरदत्तः। **पाण्डुर इति।** पाण्डुः शुक्लो वर्णस्तद्वान्। **अव्युत्पन्न एवेति।** गुणमात्रे गुणिनि च वर्तते। 'हरिणः पाण्डरः पाण्डुः' इत्यमरः। 'गुणे शुक्लादयः

कच्छुरः। **१९१५ द्युद्रुभ्यां मः। (५-२-१०८)** द्युमः। द्रुमः। **१९१६ केशाद्वोऽन्यतरस्याम्। (५-२-१०९)** प्रकृतेनान्यतरस्याग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थम्। केशवः, केशी, केशिकः, केशवान्। **'अन्येभ्योऽपि दृश्यते'** (वा ३२१०)। **मणिवो** नागविशेषः। हिरण्यवो निधिविशेषः। **'अर्णसो लोपश्च'** (वा ४०४३)। अर्णवः। **१९१७ गाण्ड्यजगात्संज्ञायाम्। (५-२-११०)** ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डि-

---

कच्छूशब्दाद्रप्रत्ययः, प्रकृतेर्ह्रस्वश्च अन्तादेश इत्यर्थः। कच्छुरः पुमां रोगविशेषः। **द्युद्रुभ्यां मः।** 'दिव उत्' इति कृतोत्वस्य दिव्शब्दस्य द्यु इति निर्देशः। दिव्शब्दाद् द्रुशब्दाच्च मप्रत्ययः स्यादित्यर्थः। **द्युमः। द्रुम इति।** रूढशब्दावेतौ। **केशाद्वोऽन्यतरस्याम्।** मत्वर्थे इति शेषः। नन्विहान्यतरस्यांग्रहणं व्यर्थम्, समर्थानामिति वाग्रहणेनैव वाक्यस्य सिद्धत्वात्। न च महाविभाषया अपवादेन मुक्ते औत्सर्गिकस्याप्रवृत्तेः 'पारेमध्ये षष्ठ्या वा' इत्यत्रोक्तत्वादिह मतुपोऽप्रवृत्त्यापत्तौ तत्प्रवृत्त्यर्थमन्यतरस्यांग्रहणमिति वाच्यम्, प्राणिस्थादिति सूत्रान्यतरस्यांग्रहणस्य समुच्चयार्थकस्यानुवृत्त्यैव तत्सिद्धेरित्यत आह **प्रकृतेनेति। इनिठनोरिति।** इनिठनोरपीत्यर्थः। अन्यथा 'सिध्मादिभ्यश्च' इत्यत्रेव मतुबेव समुच्चीयेत, नत्विनिठनाविति भावः। तथा च वप्रत्यये इनिठनोर्मतुपि च चत्वारि रूपाणीत्याह **केशव इत्यादि। अन्येभ्योऽपीति।** वार्तिकमिदम्। केशादन्येभ्योऽपि मत्वर्थे वो दृश्यत इत्यर्थः। **अर्णस इति।** वार्तिकमिदम्। अर्णसो वप्रत्ययः प्रकृतेः सकारस्य लोपश्चेत्यर्थः। **अर्णव इति।** अर्णः जलम्। तत्प्रभूतमस्मिन्नस्तीति विग्रहः। इदं तु वार्तिकं भाष्ये न दृश्यते। **गाण्ड्यजगात्संज्ञायाम्। ह्रस्वदीर्घयोरिति।** गाण्डिशब्दस्य गाण्डीशब्दस्य च कृतयणोः गाण्ड्य इति युगपन्निर्देशः। 'ख्यत्यात्परस्य' इत्यत्र खितिशब्दयोः खीतीशब्दयोश्च यथेत्यर्थः। ततश्च गाण्डिशब्दाद् गाण्डीशब्दाद् अजगशब्दाच्च मत्वर्थे

पुंसि गुणिलिङ्गास्तु तद्वति' इति च। **कच्छ्वा इति।** कच्छूस्त्वग्रोगविशेषः। **द्युद्रुभ्यां मः। द्युम इति।** द्यौरस्यास्ति 'दिव उत्' इत्युत्वम्। द्रुर्वृक्षः। सोऽस्यास्ति जनकतयेति द्रुमोऽपि वृक्ष एव। 'पलाशी द्रुद्रुमागमाः' इत्यमरः। इह सर्वत्र समुच्चीयमानोऽपि मतुप् रूढशब्देषु नेष्यते। तदर्थस्य मतुपा अभिधातुमशक्यत्वात्। **दृश्यत इति।** व इत्यनुवर्तते। **अर्णव इति।** अर्तेरसुन् नुट् च। अर्णो जलं तद्वान्। **संज्ञायामिति।** 'तदस्यास्ति–' इति सूत्रस्थेतिशब्दस्यैवायं प्रपञ्चः। **यणेति।** 'ख्यत्यात्–' इतिवत्कृतयणादेशस्यानुकरणं न भवति। लक्ष्ये यणोऽ-

वम्, गाण्डीवमर्जुनस्य धनुः । अजगवं पिनाकः । १९१८ काण्डाण्डादीरन्नीरचौ । (५-२-१११) काण्डीरः । आण्डीरः । १९१९ रजःकृष्यासुतिपरिषदो वलच् । (५-२-११२) रजस्वला स्त्री । कृषीवलः । 'वले' (सू १०४० इति दीर्घः । आसुतीवलः शौण्डिकः । परिषद्वलः । 'पर्षत्' इति पाठान्तरम् । पर्षद्वलम् । 'अन्येभ्योऽपि दृश्यते' (वा ३२१०) भ्रातृवलः । पुत्रवलः । शत्रुवलः । 'वले' (सू १०४०) इत्यत्र 'संज्ञायाम्' इत्यनुवृत्तेर्नेह दीर्घः । १९२० दन्तशिखात्संज्ञायाम् । (५-२-११३) दन्तावलो हस्ती । शिखावलः केकी । १९२१ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः । (५-२-११४) मत्वर्थे निपात्यन्ते । ज्योतिष

वप्रत्ययः स्यादित्यर्थः । रूढशब्दत्वादिह न मतुप्समुच्चयः । **काण्डाण्डादीरन्नीरचौ** । काण्ड, आण्ड आभ्याम् ईरन्, ईरच् इति प्रत्ययौ मत्वर्थे स्त इत्यर्थः । **रजः कृषिः** । रजस्, कृषि, आसुति, परिषद् एभ्यो मत्वर्थे वलच् स्यादित्यर्थः । **आसुतीवल इति** । 'षुञ् अभिषवे' आङ्पूर्वात् स्त्रियां क्तिन् । 'वले' इति दीर्घः । **अन्येभ्योऽपीति** । वार्तिकमिदम् । 'रजः कृषि-' इत्यादिसूत्रोपात्तादन्येभ्योऽपि वलच् दृश्यत इत्यर्थः । भ्रातृवलः । 'ड्लोपे-' इत्यतः अण इत्यनुवृत्तेः 'वले' इति न दीर्घः । पुत्रवल इत्यादौ 'वले' इति दीर्घमाशङ्क्याह **वल इत्यत्रेति** । **दन्तशिखात् संज्ञायाम्** । समाहारद्वन्द्वात्पञ्चमी । दन्तशब्दात् शिखाशब्दाच्च मत्वर्थे वलच् स्यात्संज्ञायामित्यर्थः । **ज्योत्स्ना । ज्योतिष इति** । ज्योत्स्नावयवा ज्योतींषि, तान्यस्यां सन्तीति विग्रहे ज्योतिष्शब्दाद् नप्रत्यय उपधा-

---

भावात् । किंतु सूत्रे सांहितिकोऽयं यणिति भावः । प्रयुज्यते चोभयथा । 'अधिरोहति गाण्डिवं महेषौ' । 'गाण्डीवी कनकशिलानिभं भुजाभ्याम्' इति च । **आसुतीवल इति** । 'षुञ् अभिषवे' क्तिन् । आसुतिरभिषवः । **परिषद्वल इति** । परितः सीदतीति परिषत् 'सत्सूद्विष-' इत्यादिना क्विप्, 'सदिरप्रतेः' इति षत्वम् । **पाठान्तरमिति** । 'शृदृभसोऽदिः' इत्यदिप्रत्ययो बाहुलकात् पृषेरपि भवति । तथा च भाष्यम्—'पार्षदकृतिरेषा तत्रभवताम्' 'सर्ववेदपार्षदं हीदं शास्त्रम्' इति च । भट्टिस्त्वाह—'पर्षद्वलान्महाब्रह्मैराटनैकटिकाश्रमान्' इति । 'पर्षदेषा दशावरा' इति मनुः । **भ्रातृवल इति** । 'वले' इत्यत्राण्ग्रहणानुवृत्तेर्नेह दीर्घः । पुत्रवलादौ तु स्यात्तत्राह **संज्ञायामित्यनुवृत्तेरिति** । 'वनगिर्योः-' इति सूत्रादिति भावः । ज्योत्स्ना चन्द्रप्रभा । तत्रावयवीभूतं ज्योतिरस्तीति मत्वर्थीयोपपत्तिः । एतेन तमःसमूहे तमिस्राशब्दो व्याख्यातः । निघण्टुषु तमःपर्यायस्तमिस्रशब्दः पठितः । तत्र

उपधालोपो नश्च प्रत्ययः। ज्योत्स्ना। तमस उपधाया इत्वं रश्च, तमिस्रा। स्त्रीत्वमतन्त्रम्, तमिस्रम्। शृङ्गादिनच्, शृङ्गिणः। उर्जसो वलच्, तेन बाधा माभूदिति विनिरपि, ऊर्जस्वी। ऊर्जस्वलः। 'ऊर्जोऽसुगागमः' इति वृत्तिस्तु चिन्त्या, 'ऊर्जस्वतीः' इतिवदसुगन्तत्वेनैवोपपत्तेः। गोशब्दान्मिनिः, गोमी। मलशब्दादिनच्, मलिनः। ईमसश्च, मलीमसः। १६२२ अत इनिठनौ।

भूतस्य इकारस्य लोपश्च निपात्यते। सति च इकारस्य लोपे इणः परत्वाभावात् षत्वनिवृत्तौ ज्योत्स्नेति रूपम्। 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः। **तमस इति।** तमः अस्यास्तीति विग्रहे तमस्शब्दाद् रक्प्रत्ययः, उपधाभूतस्य मकारादकारस्य इत्वं च निपात्यत इत्यर्थः। 'तमिस्रा तामसी रात्रिः' इत्यमरः। ननु 'तमिस्रा' इति स्त्रीलिङ्गनिर्देशात् तमिस्रं गृहमिति कथमित्यत आह **स्त्रीत्वमतन्त्रमिति। शृङ्गादिनजिति।** निपात्यत इति शेषः। **शृङ्गिण इति।** शृङ्गमस्यास्तीति विग्रहः। इनचि णत्वम्। **ऊर्जसो वलजिति।** निपात्यत इति शेषः। ऊर्जस् इत्यसुगन्तं प्रातिपदिकम्। ननु 'अस्मायामेधा-' इति विनिना सिद्धेरूर्जस्विन्निति निपातनं व्यर्थमित्यत आह **तेनेति।** विशेषविहितेन वलचा अस्मायेति सामान्यविहितस्य विनो निवृत्तिर्मा भूदित्येतदर्थं विनो निपातनमित्यर्थः। **ऊर्ज इति।** ऊर्जशब्दाद्वलचि प्रकृतेरसुगागम इति वृत्तिग्रन्थः अनुपपन्न इत्यर्थः। कुत इत्यत आह **ऊर्जस्वतीरितिवदिति।** ऊर्जस्वतीरित्यत्र वलप्रत्ययाभावेन तत्सन्नियोगशिष्टस्य असुगागमस्याप्रसक्तेः तत्र ऊर्जस् इत्यसुगन्तं प्रातिपदिकमवश्यमभ्युपेयम्, तेनैव ऊर्जस्विन्नूर्जस्वलयोः विनिवलज्मात्रनिपातनोपपत्तेरित्यर्थः। **ईमसश्चेति।** मलशब्दाद् निपात्यत इति शेषः। **अत इनिठनौ।** अदन्तान्मत्वर्थे इनि ठन् एतौ स्त इत्यर्थः। समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्तेर्मतुबपि भवति। 'एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ' इति भाष्यम्। एकाक्षरात् स्ववान्, कृतः कारकवान्, जातेः वृक्षवान्, सप्तम्यां दण्डा अस्यां शालायां सन्ति दण्डवती। इदं प्रायिकम्। तेन कार्यी, कार्यिकः, तण्डुली

समूहसमूहिनोरभेदोपचार इति हरदत्तः। **स्त्रीत्वमतन्त्रमिति।** व्याख्यानमत्र शरणम्। ऊर्जस्विन्गोमिन्नित्यत्र नान्तत्वाभिव्यक्तये नलोपो न कृतः। **अत इनिठनौ।** तपकरणं किम्, खट्वावान्। 'एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ'। एकाक्षरात्—स्ववान्। कृतः—कारकवान्। जातेः—व्याघ्रवान्, सिंहवान्। सप्तम्यां—दण्डा अस्यां सन्ति दण्डवती शाला। 'तदस्यास्ति-' इति सूत्रस्थेतिकरणो विषयनियमार्थः सर्वत्रापि संबध्यत इति। क्वचित्कृतोऽपि भवति—कार्यी, कार्यिकः।

(५-२-११५) दण्डी, दण्डिकः। १९२३ व्रीह्यादिभ्यश्च। (५-२-११६) व्रीही, व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते, किं तर्हि— 'शिखामालासंज्ञादिभ्य इनिः, यवखलादिभ्य इकः' (वा ३२०१) । अन्येभ्य उभयम्। १९२४ तुन्दादिभ्य इलच्च। (५-२-११७) चादिनिठनौ मतुप् च। तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान्। उदर, पिचण्ड, यव, व्रीहि। 'स्वाङ्गाद्विवृद्धौ' (ग. सू. १२४) विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः। विवृद्धौ कर्णौ यस्य स कर्णिलः, कर्णी, कर्णिकः, कर्णवान्। १९२५ एकगोपूर्वाट्ठञ्नित्यम्। (५-२-११८) एकशतमस्यास्तीति ऐकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः। १९२६ शतसहस्रान्ताच्च निष्कात्। (५-२-११९)

तण्डुलिक इत्यादि सिद्धम् इति भाष्ये स्पष्टम्। **व्रीह्यादिभ्यश्च**। मत्वर्थे इनिठनौ इति शेषः। **शिखामालेत्यादि**। वार्तिकमिदम्। शिखा, माला, संज्ञा, वीणा, वडवा, बलाका, पताका, वर्मन्, शर्मन् एभ्य इनिरेव, न तु ठनित्यर्थः। **यवखलेति**। यवखल, नौ, कुमारी एभ्यः ठनेव, न त्विनिरित्यर्थः। अवशिष्टेभ्यस्तु व्रीह्यादिगणपठितेभ्य उभावित्यर्थसिद्धम्। इदं वृत्तौ स्पष्टम्। **तुन्दादिभ्य इलच्च**। **मतुप्चेति**। समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्तेरिति भावः। उदरादयश्चत्वारस्तुन्दादिगणपठिताः। **स्वाङ्गाद्विवृद्धाविति**। गणसूत्रमिदम्। वृद्धविषयात् स्वाङ्गादिलच्, इनिठनौ मतुप् चेत्यर्थः। **कर्णिल इति**। वृद्धौ कर्णौ अस्येति विग्रहः। **एकगोपूर्वाट्ठञ्नित्यम्**। एकपूर्वाद् गोपूर्वाच्च नित्यं ठञ् स्यादित्यर्थः। यद्यपि नित्यग्रहणाभावेऽपि ठञा इनिठनोर्निवृत्तिः सिध्यति, तथापि समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्त्या मतुप् समुच्चीयेत। तन्निवृत्त्यर्थं नित्यग्रहणम्। **ऐकशतिक इति**। 'पूर्वकाल-' इति समासः। 'संख्यायाः संवत्सर-'

क्वचित्तु जातेरपि—तण्डुली, तण्डुलिकः। एतच्च काशिकादौ स्पष्टम्। **तुन्दादिभ्य इलच्च**। अन्यतरस्यामित्यनुवर्तनादाह—**मतुप्चेति**। अत्र 'स्वाङ्गाद् विवृद्धौ' इति पठ्यते। विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः। विवृद्धौ कर्णावस्य कर्णिलः, कर्णी, कर्णिकः, कर्णवान्। **एकगोपूर्वात्**। **ऐकशतिक इति**। एकं च तच्छतं चेति 'पूर्वकाल-' इत्यादिना कर्मधारयः। षष्ठीतत्पुरुषाद्बहुव्रीहेर्द्वन्द्वाच्च न भवत्यनभिधानादिति हरदत्तादयः। अत इत्येव, नेह—एकविंशतिरस्यास्तीति। नित्यग्रहणं मतुपो बाधनार्थम्। अन्यथा ठञा इनिठनोर्बाधे कृते ऽन्यतरस्यांग्रहणानुवृत्त्या मतुप् स्यादेवेत्याहुः। कथम् एकद्रव्यवान् इति, असाधुरेवायम्। एकेन द्रव्यवानिति वा विग्रहीतव्यम्। कथम् एकदण्डी इति, 'एकदेशिनैकाधिकरणे' इति निर्देशो ज्ञापयति

निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे। नैष्कशतिकः। नैष्कसहस्रिकः । **१९२७ रूपादाहतप्रशंसयोर्यप्** । (५-२-१२०) आहतं रूपमस्यास्तीति रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्तीति रूप्यो गौः । 'आहत' इति किम्-रूपवान् । 'अन्येभ्योऽपि दृश्यते' (वा ३२१०) । हिम्याः पर्वताः । गुण्या ब्राह्मणाः । **१९२८ अस्मायामेधास्रजो विनिः** । (५-२-१२१) यशस्वी, यशस्वान् । मायावी । व्रीह्यादिपाठादिनिठनौ, मायी,

---

इत्युत्तरपदवृद्धिस्तु न, तत्र प्रतिपदोक्ततद्धितार्थसमासस्यैव ग्रहणात्। **शतसहस्र** । **निष्कात् परात्रिति** । असामर्थ्येऽपि सौत्रत्वात् , समास इति भावः । **रूपादाहत** । आहतेति भावे क्तः । आहतविशेषणकात् प्रशंसाविशेषणकाच्च रूपशब्दाद् मत्वर्थे यप् स्यादित्यर्थः । **आहतं रूपमिति** । आहतेन निष्पन्नं स्वरूपं यस्येति विग्रहे रूपशब्दाद् यपि रूप्यशब्द इत्यर्थः । **रूप्यः कार्षापण इति** । परिमाण-विशिष्टः रजतसुवर्णादिर्मुद्रिकाविशेषयुक्तः कार्षापण इत्युच्यते । तत्स्वरूपं च स्वर्ण-कारकृता हननिष्पाद्यमिति बोध्यम् । **रूप्यो गौरिति** । प्रशस्तरूपसम्पन्न इत्यर्थः । **अन्येभ्योऽपीति** । वार्तिकमिदम् । रूपशब्दादन्येभ्योऽपि यप् दृश्यत इत्यर्थः । **हिम्याः पर्वता इति** । भूम्नि यप् , बहुलं हिममेष्वस्तीति विग्रहः । **गुण्या ब्राह्मणा इति** । प्रशंसायां यप् । प्रशस्तगुणसम्पन्ना इत्यर्थः । **अस्मायामेधास्रजो विनिः** । असित्यनेन असन्तं विवक्षितम् । असन्त, माया, मेधा, स्रज् एभ्यो विनि-प्रत्ययः स्यादित्यर्थः । प्रत्यये नकारादिकार उच्चारणार्थः । **यशस्वीति** । 'तसौ मत्वर्थे' इति भत्वान्न रुत्वमिति भावः । **यशस्वानिति** । 'एकगोपूर्वात्–' इति सूत्रे नित्यग्रहणेन निवृत्तमपि समुच्चयार्थमन्यतरस्यांग्रहणमिह मण्डूकप्लुत्या अनुवर्तते । 'तसौ मत्वर्थे' इति सूत्रे यशस्वानिति भाष्योदाहरणादिति भावः । स्रग्वीत्यत्र 'व्रश्च–'

'इनिरपि क्वचिद्भवति' इति । **रूपादाहत** । आहतप्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूप-शब्दान्मत्वर्थे यप् स्यात् । **आहतमिति** । आहननमाहतं हननमित्यर्थः । ततो निष्पन्नं यत्कार्षापणादिरूपं तदपि कार्ये कारणोपचारादाहतमित्युच्यते इत्याहतरूपयोः सामानाधिकरण्यमुपपद्यते । **हिम्या इति** । भूम्नि यप् । **पर्वता इति** । हिमवान् तत्पर्यन्तवर्तिनश्च । **गुण्या इति** । दृशिग्रहणादिनिरपि । तथा च माघः— 'गुणगुणय इति न व्यजीगणत्' । गुणी अगुणय इति पदच्छेदः । **अस्मायामेधा । यशस्वीति** । 'तसौ मत्वर्थे' इति भत्वाद्रुत्वं न । **यशस्वानिति** । नित्यग्रहणात् पूर्वत्रासम्बद्धमप्यन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमिह संबध्यत एव । 'तसौ मत्वर्थे' इति सूत्रे यशस्वानिति भाष्योदाहरणादिति भावः । 'चोः कुः' इत्यनेन सिद्धे

मायिकः । किन्नन्तत्वात्कुः, स्रग्वी । "आमयस्योपसंख्यानं दीर्घश्च" (वा ३२१३) आमयावी । 'शृङ्गवृन्दाभ्यामारकन्' (वा ३२१४) शृङ्गारकः । वृन्दारकः । 'फलबर्हाभ्यामिनच्' (वा ३२१५) । फलिनः । बर्हिणः । 'हृदयाच्चालुरन्यतरस्याम्' (वा ३२१६) । इन्ठनौ मतुप् च । हृदयालुः, हृदयी, हृदयिकः, हृदयवान् । 'शीतोष्णतृप्रेभ्यस्तदसहने–' (वा ३२१७) । शीतं न सहते शीतालुः । उष्णालुः 'स्फायितञ्चि' (उ सू १७०) इति रक् । तृप्रः पुरोडाशः, तं न सहते तृप्रालुः । 'तृप्रं दुःखम्' इति माधवः । 'हिमाच्चेलुः' (वा ३२१८) । हिमं न सहते हिमेलुः । 'बलादूलः' (वा ३२१९) बलं न सहते बलूलः । 'वातात्समूहे च' (वा ३२२०) वातं न सहते वातस्य समूहो वा वातूलः । 'तप्पर्वमरुद्भ्याम्' (वा ३२२१) ।

इति षत्वमाशङ्क्याह **किन्नन्तत्वादिति । आमयस्येति** । आमयशब्दाद् मत्वर्थे विनिः प्रकृतेर्दीर्घश्चेत्यर्थः । **शृङ्गवृन्दाभ्यामिति । फलबर्हाभ्यामिति । हृदयाच्चालुरन्यतरस्यामिति** । वार्तिकत्रयमिदम् । **मतुप्चेति** । वक्तव्य इति शेषः, भाष्ये तथोक्तत्वात । 'चुटू' इति चकारस्येत्संज्ञा । अन्यतरस्यांग्रहणाच्चालोरभावे इनिठनौ । समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्तेर्मतुबपि । तथा चात्र चत्वारः प्रत्ययाः । तदाह **हृदयालुरित्यादि** । 'शीतोष्णतृप्रेभ्यः तन्न सहते' इति वार्तिकमर्थतः संगृह्णाति—**शीतेति** । शीत, उष्ण, तृप्र एभ्यो द्वितीयान्तेभ्यो न सहते इत्यर्थे चालुर्वक्तव्य इत्यर्थः । **तृप्रः पुरोडाश इति** । मन्त्रभाष्ये तथोक्तत्वादिति भावः । **हिमाच्चेलुरिति** । वार्तिकमिदम् । हिमशब्दाद् द्वितीयान्ताद् न सहत इत्यर्थे चेलुः स्यादित्यर्थः । चकार इत् । **बलादूल इति** । तन्न सहते इत्यर्थे वक्तव्य इति शेषः । **वातात्समूहे चेति** । षष्ठ्यन्ताद्वातशब्दात् समूहेऽर्थे, द्वितीयान्ताद् न सहते इत्यर्थे च, ऊलप्रत्ययो वाच्य इत्यर्थः । **तप्पर्वमरुद्भ्यामिति** । वार्तिकमिदम् । पर्वमरुद्भ्यां तप् वक्तव्य इत्यर्थः । तन्वक्तव्य इति वृत्तिकृत्, हरदत्तश्च ।

व्रश्चादिषत्वमाशङ्क्याह—**किन्नन्तत्वादिति । हृदयाच्चालुरन्यतरस्याम्** । अन्यतरस्यांग्रहणम् इनिठनोः प्राप्त्यर्थम् । मतुप् सर्वत्र समुच्चीयत एव । चकारस्य 'चुटू' इतीत्संज्ञा । तेन हृदयालुशब्दोऽन्तोदात्त इत्याहुः । **शीतोष्णेति** । इह चालुरनुवर्तते । **पुरोडाश इति** । 'न तृप्रा उरुव्यचसम्' इति मन्त्रस्य भाष्ये तथा व्याख्यातत्वादिति भावः । **माधव इति** । सुब्धातुवृत्तौ स्थितमिदम् । **हिमाच्चेलुरिति** । एकारादिरयं प्रत्यय इति माधवः । **बलादिति** । सिध्मादिषु बलूलवातूलशब्दौ मत्वर्थे प्रकारान्तरेण व्युत्पादितौ । **तप्पर्वमरुद्भ्याम्** । पित्त्वमनुदात्तत्वार्थम् । काशिकायां तु 'पर्वमरुद्भ्यां तन्वक्तव्यः' इति स्थितम् । हरदत्तेन तु तन्निति प्रतीकमुपादाय

पर्वतः। मरुत्तः। १९२९ ऊर्णाया युस्। (५-२-१२३) सित्त्वात्पदत्वम्। ऊर्णायुः। अत्र 'छन्दसि' इति केचिदनुवर्तयन्ति। युक्तं चैतत्। अन्यथा हि 'अहंशुभमोः–' (सू १९४६) इत्यत्रैवोर्णाग्रहणं कुर्यात्। १९३० **वाचो ग्मिनिः।** (५-२-१२४) वाग्मी। १९३१ **आलजाटचौ बहुभाषिणि।** (५-२-१२५) 'कुत्सित इति वक्तव्यम्' (वा ३२२३) कुत्सितं बहु भाषते वाचालः, वाचाटः। यस्तु सम्यग्बहु भाषते स वाग्मीत्येव। १९३२ **स्वामिन्नैश्वर्ये।** (५-२-१२६) ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच्। स्वामी। १९३३ **अर्शआदिभ्योऽच्।** (५-२-१२७) अर्शांस्यस्य विद्यन्ते

प्रौढमनोरमायां तु नित्त्वं निराकृतम्। शब्देन्दुशेखरे तु हरदत्तसंमतं नित्त्वमेव स्थापितम्। रूढत्वादवयवार्थाभावान्न मतुप्। **ऊर्णाया युस्।** ऊर्णायुशब्दे 'यस्येति च' इति लोपमाशङ्कयाह **सित्त्वादिति। अनुवर्तयन्तीति।** 'बहुलं छन्दसि' इत्यस्मादिति शेषः। **वाचो ग्मिनिः।** वाच्शब्दाद् मत्वर्थे ग्मिनिप्रत्ययः स्यादित्यर्थः। नकारादिकार उच्चारणार्थः। अतद्धित इति पर्युदासाद् गकारस्य नेत्संज्ञा। **वाग्मीति।** वाच्शब्दाद् ग्मिनिप्रत्यये कुत्वम्, जश्त्वम्। प्रत्यये गकारोच्चारणं तु 'प्रत्यये भाषायाम्–' इत्यनुनासिकाभावार्थम्। **आलजाटचौ।** वाच्शब्दाद् आलच्, आटच् एतौ मत्वर्थे बहुभाषिणीत्यर्थः। ग्मिनोऽपवादः। **यस्तु सम्यगिति।** नच अबहु, अकुत्सितं च यो वदति तत्रापि वाग्मीति कुतो न भवतीति वाच्यम्, 'यो हि सम्यग् बहु भाषते वाग्मीत्येव स भवति' इति भाष्यबलेन पूर्वसूत्रस्य सम्यग् बहुभाषिण्येव प्रवृत्तेरभ्युपगमादिति भावः। **स्वामिन्नैश्वर्ये।** ऐश्वर्ये इति प्रकृतिविशेषणमित्यभिप्रेत्याह **ऐश्वर्यवाचकादिति। आमिनजिति।** निपात्यत इति शेषः। **स्वामीति।** स्वम् ऐश्वर्यम्, तद्वानित्यर्थः। नियन्तेति यावत्। ऐश्वर्ये-

---

आद्युदात्तत्वार्थो नकार इत्युक्तम्। तच्च मनोरमायां महता प्रबन्धेन दीक्षितैर्निराकृतं तत एव तदवधार्यम्। **पदत्वमिति।** तेन 'यस्येति च' इति लोपो न प्रवर्तत इति भावः। **अनुवर्तयन्तीति।** 'बहुलं छन्दसि' इत्यतः। **वाचो ग्मिनिः।** इकारो नकारपरित्राणार्थः। चकारस्य कुत्वे जश्त्वे च कृते वाग्मी वाग्मिनावित्यादौ द्वयोर्गकारयोः श्रवणं भवति। द्वित्वं तु त्रयाणाम्। 'मिनिः' इत्युक्ते तु द्वित्वे सति द्वयोर्गकारयोः श्रवणम्। द्वित्वाभावे त्वेकस्यैव श्रवणं स्यात्। किंच 'यरोऽनुनासिके–', 'प्रत्यय भाषायां नित्यम्' इति वाङ्मयमित्यत्रेव नित्यमनुनासिकः प्राप्नोति। तच्चानिष्टमिति ग्मिनिः कृतः। **स्वामिन्नैश्वर्ये। ऐश्वर्यवाचकादिति।** स्वशब्दस्यैश्वर्यवाचित्वमेतद्वृत्तिविषयकमेवेति बोध्यम्। ईशिता हि ईश्वरः। स तु स्वामीत्युच्यते। यथा

अर्शसः। आकृतिगणोऽयम्। १८३४ **द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः।** (५-२-१२८) द्वन्द्वः। कटकवलयिनी। शङ्खनूपुरिणी। उपतापो रोगः। कुष्ठी। किलासी। गर्ह्यं निन्द्यम्। ककुदावर्ती। काकतालुकिनी। 'प्राणिस्थात्' किम्–पुष्पफलवान्घटः। 'प्राण्यङ्गान्न'। पाणिपादवती। 'अतः' इत्येव। चित्रकललाटिकावती। सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम्। १८३५ **वातातीसाराभ्यां कुक्च।** (५-२-१२९) चादिनिः। वातकी। अतीसारकी। **'रोगे चायमिष्यते'।** नेह। वातवती गुहा। **'पिशाचाच्च'** (वा ३२२४)। पिशाचकी। १८३६ **वयसि पूरणात्।** (५-२-१३०) पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्याद्वयसि द्योत्ये। मासः संवत्सरो वा पञ्चमोऽस्यास्तीति पञ्चमी उष्ट्रः। ठनादिबाधनार्थमिदम्। 'वयसि' किम्–पञ्चमवान् ग्रामः। १८३७ **सुखादिभ्यश्च।**

त्युक्तेर्धनवानित्यर्थे स्वामीति न भवति। **अर्शआदिभ्योऽच्।** अर्शस्शब्द आदिः एषामिति विग्रहः। **अर्शस इति।** अर्शो गुदरोगविशेषः। **द्वन्द्वोपताप।** द्वन्द्वसमासाद् उपतापवाचकाद् गर्ह्यवाचकाच्च प्राणिस्थविषयेभ्यो मत्वर्थे इनिः स्यादित्यर्थः। द्वन्द्वेति उदाहरणसूचनम्। **कटकवलयिनीति।** कटकवलयोः कश्चिदाकृतिभेदं परिकल्प्य द्वन्द्व उपपाद्यः। उपताप इत्यस्य विवरणम्—रोग इति। किलासः कुष्ठभेदः। गर्ह्यमित्यस्य विवरणम्—निन्द्यमिति। **ककुदावर्तीति।** ककुदं ग्रीवाया अधस्तात्पृष्ठभागः। तत्र आवर्तः ककुदावर्तः, सः अस्यास्तीति विग्रहः। **काकतालुकिनीति।** काकस्येव तालुके काकतालुके, ते अस्याः स्त इति विग्रहः। **प्राण्यङ्गान्नेति।** व्याख्यानमेवात्र शरणम्, एवंविधवार्तिकस्य भाष्ये अदर्शनात्। **अत इत्येवेति।** 'समासान्त' इति सूत्रभाष्यरीत्या मण्डूकप्लुत्या तदनुवृत्तेरिति भावः। **चित्रकललाटिकावतीति।** चित्रकं च ललाटिका चेति द्वन्द्वः। अदन्तत्वाभावादिनिर्नेति भावः। ननु 'अत इनिठनौ' इत्यतोऽनुवृत्त्यैव सिद्धे पुनरिह इनिग्रहणं किमर्थमित्यत आह **सिद्धे प्रत्यय इति।** **ठनादीति।** आदिना मतुपः संग्रहः। **वातातीसाराभ्यां कुक्च।** **चादिनिरिति।** वात, अतीसार आभ्यां मत्वर्थे इनिः स्यात् प्रकृतेः कुक् चेत्यर्थः। कुकि ककार इत्। उकार उच्चारणार्थः। कित्त्वादन्तावयवः। **वातकीति।** वातरोगवानित्यर्थः। **अतीसारकीति।** अतीसाररोगवानित्यर्थः। **रोगे चायमिति।** व्याख्यानादिति भावः। रोग एवेत्यर्थः। **वातवती गुहेति।** अत्र रोगस्याप्रतीतेरिनिकुकौ नेति भावः। **पिशाचाच्चेति।** वार्तिकमिदम्। पिशाचादिनिः प्रकृतेः कुक्चेत्यर्थः। **वयसि**

वागीश एव वाचस्पतिः वाचः स्वामीति। ऐश्वर्ये किम्, स्ववान्। **अर्शआदि-**

(५-२-१३१) इनिर्मत्वर्थे। सुखी। दुःखी। 'माला क्षेपे' (ग. सू. ११६)। माली। १९३८ **धर्मशीलवर्णान्ताच्च**। (५-२-१३२) धर्माद्यन्तादिनिर्मत्वर्थे। ब्राह्मणधर्मी। ब्राह्मणशीली। ब्राह्मणवर्णी। १९३९ **हस्ताज्जातौ**। (५-२-१३३) हस्ती। 'जातौ' किम्-हस्तवान्पुरुषः। १९४० **वर्णाद्ब्रह्मचारिणि**। (५-२-१३४) वर्णी। १९४१ **पुष्करादिभ्यो देशे**। (५-२-१३५) पुष्करिणी। पद्मिनी। 'देशे' किम्-पुष्करवान्करी। 'बाहूरुपूर्वपदाद्बलात्' (वा ३२२५) बाहुबली। ऊरुबली। 'सर्वादेश्च' (वा ३२२६)। सर्वधनी। सर्वबीजी। 'अर्थाच्चासन्निहिते' (वा ३२२७)। अर्थी। सन्निहिते तु अर्थवान्। 'तदन्ताच्च' (वा ३२२८)। धान्यार्थी। हिरण्यार्थी। १९४२ **बलादिभ्यो मतुबन्यतरस्याम्**। (५-२-१३६) बलवान्, बली। उत्साहवान्, उत्साही। १९४३ **संज्ञायां मन्माभ्याम्**। (५-२-१३७) मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे। मन्-प्रथिमिनी। दामिनी। म-होमिनी। सोमिनी।

पूरणात्। 'अत इनिठनौ' इत्येव इनिसिद्धेः किमर्थमिदमित्यत आह **ठनादिबाधनार्थमिति**। **सुखादिभ्यश्च**। **इनिर्मत्वर्थ इति**। इनिरेव, नतु ठनित्यर्थः। **मालाक्षेप इति**। सुखादिगणसूत्रमिदम्। **धर्मशील**। **धर्माद्यन्तादिति**। धर्म, शील, वर्ण एतदन्तादिनिरेवेत्यर्थः। **हस्ताज्जातौ**। हस्तान्मत्वर्थे इनिरेव समुदायेन जातिविशेषे गम्य इत्यर्थः। **वर्णाद्ब्रह्मचारिणि**। वर्णशब्दान्मत्वर्थे इनिरेव समुदायेन ब्रह्मचारिणि गम्य इत्यर्थः। **वर्णीति**। वर्णो ब्राह्मणादितत्तद्वर्णोचितवसन्तादिकालमुपनयनम्, सोऽस्यास्तीति विग्रहः। **पुष्करादिभ्यो देशे**। पुष्करशब्दान्मत्वर्थे इनिरेव स्याद् देशे गम्ये। **बाहूरुपूर्वपदाद्बलादिति**। वार्तिकमिदम्। बाहु, ऊरु एतत्पूर्वपदकाद् बलशब्दान्तान्मत्वर्थे इनिरेवेत्यर्थः। **सर्वादेश्चेति**। वार्तिकमिदम्। इनिरेवेति शेषः। **अर्थाच्चासंनिहित इति**। वार्तिकमिदम्। असंनिहितविषयकादर्थशब्दाद् इनिरेवेत्यर्थः। **अर्थीति**। असंनिहितः अर्थः अस्येति विग्रहः। अर्थी नास्तीति यावत्। अत्र विरोधादस्तीति न संबध्यते। अर्थोऽसंनिहितोऽस्येत्यर्थे अप्राप्त एव इनिर्विधीयत इति कैयटः। प्रत्ययविधौ तदन्तविधिनिषेधादाह **तदन्ताच्चेति**। अर्थशब्दान्तादपि इनिर्वक्तव्य इत्यर्थः। **बलादिभ्यो**। मतुबभावपक्षे संनिहित इनिरित्यभिप्रेत्योदाहरति— **बलवान्, बलीति**। **संज्ञायां मन्माभ्याम्**। **प्रथिमिनीति**। 'पृथ्वादिभ्य

भ्योऽच्। इह 'स्वाङ्गाद्धीनात्' इति गणे पठ्यते। खञ्जः पादोऽस्यास्तीति खञ्जः। काणं चक्षुर्यस्यास्तीति काणः। **प्रथिमिनीति**। 'पृथ्वादिभ्यः–' इतीमनिचि 'टेः'

'संज्ञायाम्' किम्-सोमवान् । १९४४ **कंशंभ्यां बभयुस्तितुतयसः ।** (५-२-१३८) कम्, शम् इति मान्तौ । 'कम्' इत्युदकसुखयोः । 'शम्' इति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युस्यसोः सकारः पदत्वार्थः । कंवः । कंभः । कंयुः । कंतिः । कंतुः । कंतः । कंयः । शंवः । शंभः । शंयुः । शंतिः । शंतुः । शंतः । शंयः । अनुस्वारस्य वैकल्पिकः परसवर्णः । वकारयकारपरस्यानुनासिकौ वयौ । १९४५ **तुन्दिवलिवटेर्भः ।** (५-२-१३९) वृद्धा नाभिस्तुन्दिः । 'मूर्धन्योपधोऽयम्' इति माधवः । तुन्दिभः । वलिभः । वटिभः । पामादित्वाद्द्-लिनोऽपि । १९४६ **अहंशुभमोर्युस् ।** (५-२-१४०) अहम् इति मान्तम-

---

इमनिज्वा' इमनिजन्तः प्रथिमन्शब्दः । अत्र मनोऽनर्थकत्वेऽपि 'अनिनस्मन्–' इति तदन्तविधिना इमनिजन्तोऽपि गृह्यते । प्रथिमन्शब्दादिनिप्रत्यये टिलोपे नान्तलक्षण-ङीपि प्रथिमिनीशब्दः । **दामिनीति** । दामन्शब्दादिनौ टिलोपे ङीबिति भावः । **मेति** । मान्तोदाहरणसूचनमिदम् । **होमिनी सोमिनीति** । होमशब्दात्सोम-शब्दाच्च इनौ ङीबिति भावः । **कंशंभ्याम्** । व, भ, युस्, ति, तु, त, यस्, एषां सप्तानां द्वन्द्वात् प्रथमाबहुवचनम् । **सप्त प्रत्ययाः स्युरिति** । मत्वर्थ इति शेषः । **पदत्वार्थ इति** । अन्यथा कम् इत्यस्माद् युप्रत्यये यप्रत्यये च कृते भत्वात् पदत्वा-भावादनुस्वारो न स्यादिति भावः । **वकारयकारपरस्येति** । बहुव्रीहिः । वकार-परकस्य यकारपरकस्य चानुस्वारस्येत्यर्थः । **तुन्दिवलि** । तुन्दि, वलि, वटि एभ्यो मत्वर्थे भप्रत्ययः स्यादित्यर्थः । समाहारद्वन्द्वात्पञ्चम्येकवचनम् । पुंस्त्वमा-र्षम् । **वटिभ इति** । 'वट वेष्टने' वटनं वटिः अस्यास्तीति विग्रहः । **अहंशुभ-**

इति टिलोपः । 'र ऋतः–' इति रभावः । 'अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इति मन्नन्तादिनौ कृते 'नस्तद्धिते' इति टिलोपे नान्तत्वा-न्ङीप् । **दामिनीति** । दाधातोर्मनिन् । **होमिनी** । **सोमिनीति** । 'अर्तिस्तुसुहु-सृधृक्षि–' इत्यौणादिके मनि नित्वाद्धोमसोमशब्दौ मन्प्रत्ययान्तौ । **कंशंभ्याम्** । **पदत्वार्थ इति** । अन्यथा 'कम्युः, काम्यः, शम्युः, शाम्यः' इति स्यादिति भावः । **वकारयकारपरस्येति** । बहुव्रीहिरयम् । **अनुनासिकौ वयाविति** । एतेन प्रथमप्रत्ययो दन्त्योष्ठ्यादिः, न तु पवर्गतृतीय इति ध्वनितम् । **माधव इति** । 'तुडि तोडने' इति धातौ तेनोक्तम्—'वृद्धा नाभिस्तुण्डिः' । इन् । तुण्डिरस्यास्तीति तुण्डिलः । 'तुन्दादिभ्य इलच्च' इत्यत्र 'स्वाङ्गाद्विवृद्धौ' इति गणसूत्रेण इलच् । तुण्डिल एव तुण्डिभः । 'तुण्डिवलिवटेर्भ' इति मत्वर्थीयो भ इति । **वटिभ इति** । 'वट वेष्टने' इन् । वटिशब्दः पामादिषु पठ्यते । तेन वटिन इत्यपि भवति ।

व्ययमहङ्कारे। 'शुभम्' इति शुभे। अहंयुः, अहङ्कारवान्। शुभंयुः, शुभान्वितः।

इति तद्धितेषु मत्वर्थीयाः।

अथ तद्धितेषु प्राग्दिशीयप्रकरणम्। ३६।

१६४७ प्राग्दिशो विभक्तिः। (५-३-१) 'दिक्छब्देभ्यः' इत्यतः प्रागवक्ष्यमाणाः प्रत्ययाः विभक्तिसंज्ञाः स्युः। अथ स्वार्थिकाः प्रत्ययाः। 'समर्थानाम्' इति 'प्रथमात्' इति च निवृत्तम्। 'वा' इति त्वनुवर्तत एव। **१६४८ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः।** (५-३-२) किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते। **१६४९ इदम इश्।** (५-३-३) प्राग्दिशीये परे। **१६५० एतेतौ रथोः।** (५-३-४) इदंशब्दस्य 'एत'

मोर्युस्। अहंयुः शुभंयुरित्यत्र सुब्लुकमाशङ्क्याह **अहमित्यादीति।** सित्त्वं पदत्वार्थम्। तेन पदत्वादनुस्वारे परसवर्णः सिध्यति।

इति तद्धितेषु पञ्चमाध्यायस्य द्वितीयपादे मत्वर्थीयप्रकरणम्।

अथ पञ्चमाध्यायस्य तृतीयपादे प्राग्दिशीयप्रकरणं निरूप्यते। **प्राग्दिशो विभक्तिः।** दिक्छब्देन तद्घटितं सूत्रं विवक्षितमित्यभिप्रेत्याह **दिक्छब्देभ्य इत्यत इति। विभक्तिसंज्ञका इति।** तत्फलं तु 'न विभक्तौ तुस्माः' इति निषेधः, त्यदाद्यत्वम्, इदम 'ऊडिदंपदादि' इति स्वरश्च। **स्वार्थिका इति।** स्वीय-प्रकृत्यर्थे भवा इत्यर्थः। तसिलादिष्वर्थनिर्देशाभावाद् 'अतिशायने' इत्यादीनां प्रकृत्यर्थ-विशेषणत्वाच्चेति भावः। **निवृत्तमिति।** अत्रोपपत्तिः 'समर्थानाम्' इत्यत्रोक्ता। **अनुवर्तत एवेति।** व्याख्यानमेवात्र शरणम्। **किंसर्वनाम।** 'अद्व्यादिभ्यः' इति च्छेदः। 'प्राग्दिश' इत्यनुवर्तते। तदाह **प्राग्दिशोऽधिक्रियत इति।** विधेयानिर्देशादधिकारोऽयमिति भावः। किमः सर्वनामत्वेऽपि द्व्यादिपर्युदासात् पृथग्ग्रहणम्। द्व्यादिषु किंशब्दपाठस्तु त्वं च कश्च कौ, अहं च कश्च कौ, इत्यत्र 'त्यदादीनां मिथः सहोक्तौ' इति किमः शेषत्वार्थः। अथ वक्ष्यमाणतसिलादिप्रत्यये परे कार्यविशेषानाह **इदम इश् इत्यादिना। इदम इश्।** प्राग्दिशीये परे इति शेषपूरणम्। प्रकरणलभ्यमिदम्। शित्त्वात् सर्वादेशः। इत इत्युदाहरणम्।

अहंयुः। शुभंयुरिति। पूर्ववदनुस्वारपरसवर्णौ।

इति तत्त्वबोधिन्यां मत्वर्थीयप्रकरणम्।

किंसर्वनाम। द्व्यादिपर्युदासात्किमः पृथग्ग्रहणम्। द्व्यादिषु किम्, शब्द-पाठे प्रयोजनं तु त्वं च कश्च कौ। अहं च कश्च कौ इत्यत्र किमः शेषः। 'त्यदादीनां

'इत्' इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोऽपवादः। १९५१ एतदोऽन्। (५-३-५) योगविभागः कर्तव्यः । 'एतदः' एतेतौ स्तो रथोः। 'अन्'। एतदः इत्येव। अनेकाल्त्वात्सर्वादेशः। 'नलोपः प्रातिपदिकान्तस्य' (सू २३६)। १९५२ सर्वस्य सोऽन्यतरस्यां दि।(५-३-६) प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात्। १९५३ पञ्चम्यास्तसिल्। (५-३-७) पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल्वा स्यात्। १९५४ कु तिहोः। (७-२-१०४) किमः कुः स्यात्तादौ हकारादौ च विभक्तौ परतः।

एतेतौ रथोः। 'इदमः' इत्यनुवर्तते। एतश्च इश्चेति द्वन्द्वात्प्रथमाद्विवचनम्। रश्च थ् च तयोरिति द्वन्द्वः। रेफादकार उच्चारणार्थः। रेफथकाराभ्यां प्राग्दिशीयं प्रकरणलभ्यं विशेष्यते। 'यस्मिन्विधिः' इति तदादिविधिः। तदाह **इदंशब्दस्येत्यादिना**। तत्र रेफादौ परे एतः, थादौ तु इदिति यथासंख्यं बोध्यम्। एतर्हि, इत्थम्। **एतदोऽन्**। प्राग्दिशीये प्रत्यये परे एतद्शब्दस्य **अन्** स्यादित्यर्थः प्रतीयते। एवं सति एतच्छब्दस्य अनेव स्यात्। नत्वेतेतौ। तत्राह **योगविभाग इति। एतद् इति**। प्रथमसूत्रमिदम्। तस्य शेषपूरणम् 'एतेतौ रथोः' इति। एतच्छब्दस्य एतेतौ स्तो रेफथकारादौ प्रत्यये परे इत्यर्थः। एतर्हि, इत्थम् इत्युदाहरणम्। अन्निति द्वितीयं सूत्रम्। **एतद इत्येवेति**। 'रथोः' इति तु नानुवर्तते इति भावः। तथा च एतद इत्यस्य अन् स्यात्प्राग्दिशीये परे इति फलति। अतः अत्र इत्युदाहरणम्। ननु अनादेशे नकारस्य इत्संज्ञायाम् अकारोऽन्तादेशः स्यादित्यत आह **अनेकाल्त्वादिति**। नकारस्य प्रयोजनाभावाद् नेत्संज्ञा, नित्स्वरस्य प्रत्ययविषयत्वादिति भावः। तर्हि अत इत्यादौ नकारस्य श्रवणं स्यादित्यत आह **नलोप इति। सर्वस्य सोऽन्यतरस्यां दि**। दि इति सप्तम्येकवचनं प्राग्दिशीयविशेषणम्। 'यस्मिन्विधिः' इति तदादिविधिः। तदाह **प्राग्दिशीये दकारादाविति**। सदा इत्युदाहरणम्। तदेवं तसिलादिप्रत्ययेषु प्राग्दिशीयेषु परेषु कतिपयान् आदेशान् विधाय तसिलादिप्रत्ययान्वक्तुमुपक्रमते। **पञ्चम्यास्तसिल्। किमादिभ्य इति**। किंसर्वनामबहुभ्य इत्यर्थः। **वा स्यादिति**। 'समर्थानाम्-' इत्यतो वाग्रहणस्यानुवृत्तेरिति भावः। **कुतिहोः**।

मिथः सहोक्तौ यत् परं तच्छिष्यते' इत्युक्तत्वात्। **एतदोऽन्**। भाष्यरूढोऽयं पाठः। वृत्तिकारस्तु 'एतदोऽश्' इति पठित्वा शकारः सर्वादेशार्थ इत्याह। **अनिति**। प्राग्दिशीये परे अन्स्यात्। **अनेकाल्त्वादिति**। नित्करणस्य प्रयोजनं नास्ति प्रत्ययनित्त्वस्यैव स्वरार्थत्वादिति भावः। **कु तिहोः**। तकारादिकार उच्चारणार्थः।

कुतः कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः द्व्यादेस्तु द्वाभ्याम्।

१९५५ तसेश्च। (५-३-८) किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वरार्थं विभक्त्यर्थं च वचनम्। **१९५६ पर्यभिभ्यां च।** (५-३-९)

कु इति लुप्तप्रथमाकम्। 'किमः कः' इत्यस्मात् 'किमः' इत्यनुवर्तते। 'अष्टन आ' इत्यतो 'विभक्तौ' इति। तिश्च ह् च तयोरिति द्वन्द्वः। इकार उच्चारणार्थः। ताभ्यां विभक्तिर्विशेष्यते। तदादिविधिः तदाह **किमः कुः स्यादित्यादिना।** **कुत इति।** किंशब्दात् पञ्चम्यन्तात्तसिल्। सुब्लुक्। किमः कुभावः। 'तसिलादयः प्राक् पाशपः' इत्युक्तेरव्ययत्वम्। वेत्यनुवृत्तेः फलमाह **कस्मादिति।** 'तिहोः' इत्युक्तेरत्र न कुभावः। सर्वनाम्न उदाहरति **यत इति।** यद्शब्दात् पञ्चम्यन्तात् सुब्लुक्, तसिलो विभक्तित्वात् तस्मिन्परे त्यदाद्यत्वं पररूपम्। एवं तच्छब्दात्तत इति रूपम्। पक्षे तस्मादिति भवति। **अत इति।** एतद्शब्दात् पञ्चम्यन्तात् तसिल्, सुब्लुक्, एतदोऽन्, सर्वादेशः, नलोपः। पक्षे एतस्मादिति भवति। **इत इति।** इदंशब्दात्पञ्चम्यन्तात् तसिल्, सुब्लुक्, इदम इश्। पक्षे अस्मादिति भवति। **अमुत इति।** अदस्शब्दात् पञ्चम्यन्तात् तसिल्, उत्वमत्वे च। पक्षे अमुष्मादिति भवति। **बहुत इति।** पक्षे बहुभ्य इति भवति। **द्व्यादेस्त्विति।** सर्वनामत्वात् प्राप्तस्तसिल् द्व्यादिपर्युदासान्नेत्यर्थः। **तसेश्च।** **परस्य तसेरिति।** 'प्रतियोगे पञ्चम्यास्तसिः' 'अपादाने चाहीयरुहोः' इति वक्ष्यमाणस्य तसेरित्यर्थः। ननु तसेस्तसिल् किमर्थमित्यत आह **स्वरार्थमिति।** लित्स्वरार्थमित्यर्थः। **विभक्त्यर्थमिति।** विभक्तिनिमित्तकत्यदाद्यत्वाद्यर्थमित्यर्थः। अन्यथा परत्वात्तसौ कृते तस्य अप्राग्दिशीयत्वाद् विभक्तित्वाभावात् त्यदाद्यत्वादिकं न

वेत्यनुवृत्तेः फलं दर्शयति **कस्मादिति।** **यतस्तत इति।** 'कृत्तद्धित-' इति प्रातिपदिकत्वात्सुपो लुकि त्यदाद्यत्वम्। पक्षे यस्मात्। तस्मात्। **इत इति।** 'इदम इश्' पक्षे अस्मात्। **अत इति।** एतदोऽनादेशः। पक्षे एतस्मात्। **अमुत इति।** 'अदसोसेः-' इति मुत्वम्। पक्षे अमुष्मात्। **बहुत इति।** पक्षे बहुभ्यः। **द्वाभ्यामिति।** सर्वनामत्वात्प्राप्तोऽपि तसिल् 'अद्व्यादिभ्यः' इति पर्युदासान्न। **तसेरिति।** 'प्रतियोगे पञ्चम्यास्तसिः', 'अपादाने चाहीयरुहोः' इति विहितस्य तसेस्तसिलादेश इत्यर्थः। **विभक्त्यर्थं चेति।** अन्यथा परत्वात्तसौ कृते तस्याप्राग्दिशीयत्वाद्विभक्तिसंज्ञाया अभावात्त्यदाद्यत्वाभावे 'यतोऽवगच्छति' इत्यादि न सिध्येदिति भावः। ननु तसेर्ग्रामत इत्यादौ चरितार्थत्वात्किमादिभ्यस्तसिलो बाध्यत्वेन तसिर्न प्रवर्तते। तस्य निरवकाशत्वात्। तथा च 'तसेश्च' इति विधानं व्यर्थमिति वाच्यम्,

भ्याम्यां तसिल् स्यात्। 'सर्वोभयार्थाभ्यामेव' (वा ३२४०)। परितः सर्वत इत्यर्थः। अभित उभयत इत्यर्थः। १९५७ सप्तम्यास्त्रल्। (५-३-१०) कुत्र। यत्र। तत्र। बहुत्र। १९५८ इदमो हः। (५-३-११) त्रलोऽपवादः। इशादेशः। इह। १९५९ किमोऽत्। (५-३-१२) वाग्रहणमपकृष्यते। सप्तम्यन्तात्किमोऽद्वा स्यात्। पक्षे त्रल्। १९६० क्वाति। (७-२-१०५) किमः क्वादेशः स्यादति। क्व। कुत्र। १९६१ वा ह च च्छन्दसि। (५-३-१३)

स्यादित्यर्थः। **पर्यभिभ्यां च**। **सर्वोभयार्थाभ्यामेवेति**। वार्तिकमिदम्। परिषिञ्चति अभिषिञ्चति इत्यादौ वाग्रहणात् पक्षे न तसिल्। **सप्तम्यास्त्रल्**। किमादिभ्यः सप्तम्यन्तेभ्यः अद्यादिभ्यस्त्रलित्यर्थः। कुत्र इत्यादिरूपाणि कुत इत्यादिवत्। **इदमो हः**। इदंशब्दात् सप्तम्यन्ताद् हप्रत्ययः स्यादित्यर्थः। **किमोऽत्**। **अपकृष्यत इति**। 'वा ह च छन्दसि' इत्युत्तरसूत्रादिति शेषः। अपकर्षे व्याख्यानमेव शरणम्। अत्प्रत्यये तकार इत्। न विभक्ताविति निषेधस्तु न भवति, 'तवर्गस्थेत्त्वप्रतिषेधोऽतद्धिते' इति वार्तिकात्। **क्वाति**। क्व अतीति छेदः। 'क्व' इति लुप्तप्रथमाकं 'किमः कः' इत्यतः 'किमः' इत्यनुवर्तते। तदाह **किमः क्वेति**। किंशब्दात् सप्तम्यन्ताद् अत्प्रत्ययः, तकार इत्, किमः क्वादेश इति भावः। **कुत्रेति**। अत्प्रत्ययाभावपक्षे त्रलि 'कु तिहोः' इति कुभावे रूपम्। केचित्तु 'किमोऽत्' इत्यत्र उत्तरसूत्राद्वाग्रहणापकर्षे प्रमाणाभावात्त्रलं बाधित्वा नित्य एव अत्प्रत्ययः, कुत्रेति त्वपशब्द एवेत्याहुः। **वा ह च छन्दसि**। 'ह' इति लुप्तप्रथमाकम्। किमः सप्तम्यन्ताद् हप्रत्ययः स्यादित्यर्थः। चादत् त्रल् च।

कुतोऽवहीयते कुतोऽवरोहतीत्यादौ तसिलः सावकाशत्वात्। **सर्वोभयार्थाभ्यामेवेति**। अत्र चाभिधानस्वाभाव्यमेव हेतुः। तेनेह न भवति। परिषिञ्चति। अभिषिञ्चति। उपर्यर्थे परिः। अभिस्त्वाभिमुख्ये। नन्वोदनं परिषिञ्चतीत्यत्र सर्वतोभावे परिरिति तसिलभावः कथमिति चेत्। मैवम्, वावचनानुवृत्त्या तु तत्सिद्धेः। **सप्तम्यास्त्रल्**। इह त्रलतसिलौ स्वतन्त्रौ प्रत्ययौ, न तु सप्तमीपञ्चम्योरादेशौ। तेन कुत्र बहुत्र कुतः बहुत इत्यादौ 'अच्च घेः', 'घेर्ङिति' इत्यादिकं नेत्याहुः। **किमोऽत्**। 'न विभक्तौ तुस्माः' इति निषेधोऽत्र न प्रवर्तते थमोरुकारेण मकारपरित्राणार्थेनानित्यताज्ञापनात्। **वाग्रहणमिति**। 'किमोऽद्वा' इति सूत्रं पठित्वा 'ह च छन्दसि' इति सूत्रयितुं युक्तम्। **कुत्रेति**। यद्यपि भागवृत्तिकारो भाषायां त्रल् नेच्छति, तथापि बहुप्रयोगदर्शनादिह स्वीकृतम्। तथा च श्रीहर्षः—'नान्यत्र कुत्रापि च साभिलाषम्'। अमरश्चाह—'साहचर्याच्च कुत्रचित्' इति। **वा ह च छन्दसि**। पूर्वोक्तस्य वाग्रहणाप-

'कुह स्थः' । 'कुह जग्मथुः' । १९६२ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । (२-४-३३) अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतः, तौ चानुदात्तौ स्तः । एतस्मिन्ग्रामे सुखं वसामः । अतोऽत्राधीमहे । अतो न गन्तास्मः । १९६३ इतराभ्योऽपि दृश्यन्ते । (५-३-१४) पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । 'दृशिग्रहणाद्भवदादियोग एव' (वा ३२४४) । स भवान्, ततो भवान्, तत्र भवान् । तं भवन्तम्, ततो भवन्तम्, तत्र भवन्तम् । एवं दीर्घायुः । देवानांप्रियः । आयुष्मान् । १९६४ सर्वैकान्यकिंयत्तदः काले दा । (५-३-१५) सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् । सर्वस्मिन्काले सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । 'काले' किम्—सर्वत्र देशे । १९६५ इदमो र्हिल् । (५-३-१६) सप्तम्यन्तात्काले इत्येव । हस्यापवादः । अस्मिन्काले एतर्हि । 'काले' किम्—इह देशे । १९६६ अधुना । (५-३-१७) इदमः सप्तम्यन्तात्कालवाचिनः

---

*यद्यपि वैदिकप्रक्रियायामिदमुपन्यसनीयं तथापि चाग्रहणस्य पूर्वसूत्रे अपकर्ष-*ज्ञानायात्र तदुपन्यासः । एतदस्त्रतसोः । 'इदमोऽन्वादेशे' इत्यस्माद् 'अन्वादेशेऽशनुदात्तः' इत्यनुवर्तते । तदाह अन्वादेशेत्यादिना । अतोऽत्रेति । एतद्-शब्दात् त्रलि प्रकृतेरशादेशे अत्रेति रूपम् । अतो न गन्तास्म इति । एतस्माद् ग्रामादित्यर्थः । एतद्शब्दात्तसिल् प्रकृतेरशादेशः । 'एतदोऽन्' इत्येव सिद्धे अनुदात्तार्थं वचनम् । नच लित्स्वरे सति शेषनिघातेन त्रतसोरनुदात्तत्वं सिद्धमिति शङ्क्यम्, लित्स्वरापवादे अशोऽनुदात्तत्वे कृते लित्स्वराप्राप्त्या प्रत्ययस्वरेण त्रतसोरुदात्तत्वे प्राप्ते तद्विधानार्थत्वात् । इतराभ्योऽपि दृश्यन्ते । पञ्चमीसप्तमीतरविभक्तिभ्योऽपीत्यर्थः । फलितमाह पञ्चमीसप्तमीतरविभक्त्यन्तादपीति । किमादेरिति शेषः । एवमिति । स दीर्घायुः, ततो दीर्घायुः, तत्र दीर्घायुरित्याद्यूह्यमित्यर्थः । सर्वैकान्य । सप्तम्यन्तेभ्य इति । सर्वादिभ्य इति शेषः । सप्तम्या इत्येवानुवर्तते, व्याख्यानादिति भावः । सदा सर्वदेति । 'सर्वस्य सोऽन्यतरस्यां दि' इति सभावविकल्पः । कदेति । किंशब्दाद् दाप्रत्यये सति तस्य 'किमः कः' इति कादेशः । इदमो र्हिल् । 'इदमः' 'र्हिल्' इति छेदः । एतर्हीति । इदम्शब्दाद् र्हिल्, 'एतेतौ रथोः' इत्येतादेशः । अधुना । 'इदमः' इति 'सप्तम्याः'

कर्षणस्य स्फुटीकरणार्थमिदमुपन्यस्तम् । अत इति । एतस्माद् ग्रामादित्यर्थः । तत्रभवन्तमिति । ततोभवता, तत्र भवता । ततोभवते, तत्रभवते इत्यादि । एवमिति । ततोदीर्घायुस्तत्रदीर्घायुरित्याद्यूह्यमित्यर्थः । सदेति । 'सर्वस्य सोऽन्यतरस्यां दि' इति सभावः

स्वार्थे अधुनाप्रत्ययः स्यात्। इश्। 'यस्य-' (सू ३११) इति लोपः। अधुना। **१९६७ दानीं च। (५-३-१८)** इदानीम्। **१९६८ तदो दा च। (५-३-१९)** तदा, तदानीम्। 'तदो दावचनमनर्थकम्, विहितत्वात्' (वा ३२४१) **१९६९ अनद्यतने र्हिलन्यतरस्याम्। (५-३-२१)** कर्हि, कदा। यर्हि, यदा। तर्हि, तदा। एतस्मिन्काले एतर्हि। **१९७० सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः।**

इति 'काले' इति चानुवर्तते। तदाह **इदम इति। इशिति।** 'इदम इश्' इत्यनेनेति शेषः। **अधुनेति।** इयदितिवत् प्रत्ययमात्रं शिष्यते। पठन्ति चाभियुक्ताः 'उदितवति परस्मिन्प्रत्यये शास्त्रयोनौ गतवति विलयं च प्राकृतेऽपि प्रपञ्चे। सपदि पदमुदीतं केवलः प्रत्ययो यत् तदियदिति मिमीते कोऽधुना पण्डितोऽपि।' इति वैयाकरणीमौपनिषदीं च प्रक्रियामाश्रित्य प्रवृत्तो द्व्यर्थोऽयं श्लोकः। **दानीं च।** इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थे दानीमिति च प्रत्ययः स्यादित्यर्थः। **इदानीमिति।** इदंशब्दाद् दानींप्रत्ययः, इश्। **तदो दा च।** सप्तम्यन्तात्कालवृत्तेः तद्शब्दाद् दाप्रत्ययः, दानींप्रत्ययश्च स्यादित्यर्थः। **तदो दावचनमिति।** वार्तिकमिदम्। **विहितत्वादिति।** 'सर्वैकान्य-' इत्यनेनेति शेषः। **अनद्यतने र्हिल्।** अनद्यतनकालवृत्तिभ्यः किमादिभ्यः सप्तम्यन्तेभ्यो र्हिल्प्रत्ययो वा स्यादित्यर्थः। पक्षे दाप्रत्ययः। **एतस्मिन्काले एतर्हीति।** एतद्शब्दाद् र्हिल्। 'एतदः' इति योगविभागाद् रेफादौ एतादेशः। **सद्यःपरुत्।** 'समानस्य सभावो द्यस् चाहनि' इति भाष्यवाक्यमिदम्। अहर्वृत्तेः समानशब्दात् सप्तम्यन्ताद् द्यस्प्रत्ययः। समानस्य सभावश्च निपात्यत इत्यर्थः। सद्यः समानेऽहनीत्यर्थः। 'पूर्वपूर्वतरयोः परादेश उदारी च संवत्सरे' इत्यपि भाष्यवाक्यम्। उच्च आरिश्चेति द्वन्द्वः। सप्तम्यन्तादिमौ प्रत्ययौ संवत्सरे अभिधेये। इदमः (इश्) समसण् इत्यपि भाष्यवाक्यम्। **ऐषम इति।** समसणि णकार इत्, सकारादकार उच्चारणार्थः। णित्त्वादादिवृद्धिः। 'परस्मादेद्यव्यहनि' इत्यपि भाष्यवाक्यम्। सप्तम्यन्ताद् एद्यविरिकारान्तः प्रत्ययः। 'इदमोऽश्भावो द्यश्च' इत्यपि भाष्यवाक्यम्। सप्तम्यन्ताद् अकारान्तो द्यप्रत्ययः।

कदेति। किमः कः। **एतर्हीति।** 'एतेतौ रथोः' एत्येतादेशः। **अधुनाप्रत्यय इति।** निपातनान्मध्योदात्तोऽयम्। भाष्यमतं चेदम्। वृत्तिकारस्त्वाह—इदमो अश्भावो धुना च प्रत्यय इति। तत्र 'ऊडिदम्-' इत्यादिना विभक्तिस्वरः, स च 'आदेः परस्य' इत्यादेर्भवतीति हरदत्तः। **दावचनमिति।** 'तदश्च' इत्येव सूत्रं पठनीयमिति भावः। **एतस्मिन्काले एतर्हीति।** 'एतदः' इति योगविभागादे-

(५-३-२२) एते निपात्यन्ते। 'समानस्य सभावो द्यस् चाहनि' (वा ३२४५) समानेऽहनि सद्यः। 'पूर्वपूर्वतरयोः परादेशः, उदारी च प्रत्ययौ संवत्सरे' (वा ३२४६)। पूर्वस्मिन्वत्सरे परुत्। पूर्वतरे वत्सरे परारि। 'इदमः (इश्) समसण्' (वा ३२४७)। अस्मिन्संवत्सरे ऐषमः। 'परस्मादेद्यव्यहनि' (वा ३२४८)। परस्मिन्नहनि परेद्यवि। 'इदमोऽश्भावो द्यश्च' (वा ३२४९) अस्मिन्नहनि अद्य। 'पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् च' (वा ३२५०) पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः। 'द्युश्चोभयाद्वक्तव्यः' (वा ३२५१)। उभयद्युः। १९७१ **प्रकारवचने थाल्।** (५-३-२३) प्रकारवृत्तिभ्यः किमादिभ्यस्थाल्स्यात्स्वार्थे। तेन प्रकारेण तथा। यथा। १९७२ **इदमस्थमुः।** (५-३-२४) थालोऽपवादः। 'एतदो वाच्यः' (वा ३२३५)।

'पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् च' इत्यपि भाष्यवाक्यम्। **प्रकारवचने थाल्।** पञ्चम्यर्थे सप्तमीत्याह। **प्रकारवृत्तिभ्य इति।** सामान्यस्य भेदको पि विशेषः प्रकारः। यथा बहुभिः प्रकारैर्भुङ्क्ते इति विशेषैरिति गम्यते। सादृश्यं त्विह न गृह्यते सर्वथेत्यादौ तदप्रतीतेः। तेन प्रकारेणेत्यनन्तरं विशिष्ट इति शेषः। 'यथा हरिः तथा हरः' इत्यादौ यत्प्रकारवान् हरिः तत्प्रकारवान् हर इति बोधे सति हरिसदृशो हर इति फलति। तदभिप्रायेण यथाशब्दस्य सादृश्यार्थकत्वोक्तिः। **इदमस्थमुः।** इदंशब्दात्प्रकारवृत्तेः थमुप्रत्ययः स्यादित्यर्थः। प्रत्यये उकार उच्चारणार्थः। मकारस्य उपदेशे अन्त्यत्वाभावान्नेत्त्वम्। यद्यपि 'न विभक्तौ–' इति निषेधादेव मस्येत्त्वं न भवति। तथापि तदनित्यत्वज्ञापनार्थं मकारोच्चारणमित्याहुः।

फादावेतादेशः। **सद्यः परुत्।** निपातनाद्विषयविशेषो लभ्यत इत्याह **अहनीति।** सप्तम्यन्तस्याहन्शब्दस्यार्थे इत्यर्थः। तद्दर्शयति **समानेऽहनीति। पर उदारी चेति।** पर इत्यादेशः, उदारी प्रत्ययौ। **प्रकारवचने थाल्।** सामान्यस्य भेदको विशेषः प्रकारः। यथा ब्राह्मणसामान्यस्य माठरकाठकादय इति हरदत्तः। यद्यपि 'प्रकारे गुणवचनस्य' इत्यत्र सादृश्यं प्रकारस्तथापि नेह सादृश्यं गृह्यते अनभिधानात्। 'अव्ययं विभक्ति–' इति सूत्रे सादृश्यमपि यथाशब्दार्थ इत्युक्तम्, इह तु केवलस्य थाल्प्रत्ययस्य सादृश्यं नार्थः किं तु प्रकार एवेत्युक्तमिति नास्ति पूर्वापरविरोध इति बोध्यम्। **तेन प्रकारेण तथेति।** प्रथमान्तात्तु न भवति स प्रकारस्तथेति, अनभिधानादेवेति भावः। किं सर्वनामबहुभ्यो विशेषविहितेनापि थाला जातीयर् न बाध्यते अर्थभेदात्। प्रकारे हि थाल्। जातीयर् तु तद्वति स्वभावात्। एवं च कृत्वा प्रकारमात्रे थालं विधाय तदन्तात्प्रकारवति जातीयरं प्रयुङ्क्ते। तथाजातीयो यथा-

अनेन एतेन वा प्रकारेण इत्थम्। १९७३ किमश्च। (५-३-२५) केन प्रकारेण कथम्।

इति तद्धितेषु प्राग्दिशीयप्रकरणम्।

अथ तद्धितेषु प्रागिवीयप्रकरणम्। ४०।

१९७४ दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। (५-३-२७) सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात्। १९७५ पूर्वाधरावराणामसि पुरधवश्चैषाम्। (५-३-३९) एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्, तद्योगे चैषां क्रमात् 'पुर्' 'अध्' 'अव्' इत्यादेशाः स्युः। १९७६ अस्ताति च। (५-३-४०) अस्तातौ परे पूर्वादीनां पुरादयः स्युः। पूर्वस्याम्, पूर्वस्याः, पूर्वा वा दिक्। पुरः,

---

इत्थमिति। 'एतेतौ रथोः' इति प्रकृतेरिदम इदादेशः। एतच्छब्दात् थमुप्रत्यये तु 'एतद' इति योगविभागाद् इदादेशः। **किमश्च**। प्रकारवृत्तेस्थमुरिति शेषः। **कथमिति**। 'किमः कः' इति कादेशः।

इति तद्धितेषु प्राग्दिशीयानां विभक्तिसंज्ञकानां पूर्णोऽवधिः।

अथ प्रागिवीयप्रकरणमारभ्यते। **दिक्छब्देभ्यः**। **सप्तम्याद्यन्तेभ्य इति**। सप्तमीपञ्चमीप्रथमान्तेभ्य इत्यर्थः। **रूढेभ्य इति**। शब्दग्रहणलभ्यमिदम्। अस्तातिप्रत्यये इकार उच्चारणार्थः। तकारान्तः प्रत्ययः। 'संख्याया विधार्थे धा' इति सूत्रपर्यन्तमिदं सूत्रमस्तातिवर्जमनुवर्तते। अत्र विभक्तीनां दिगादीनां च न यथासंख्यम्, व्याख्यानात्। **पूर्वाधरावराणाम्**। 'असि' इति लुप्तप्रथमाकम्। पुर् अध्, अव् एषां द्वन्द्वात्प्रथमाबहुवचनम्। **अस्तात्यर्थ इति**। दिग्देशकालवृत्तिभ्य इत्यर्थः। **अस्ताति च**। 'अस्ताति' इति लुप्तसप्तमीकम्। 'अस्ताति' इति तकारान्तात् सप्तम्येकवचनं वा। 'पूर्वाधरावराणाम्–' इति 'पुरधव' इति चानुवर्तते।

जातीयोऽन्यथाजातीय इति। **अनेन एतेन वेति**। द्वितीयान्तादपि थमुर्भवत्येव। इममेतं वा प्रकारमापन्न इत्थंभूतः। अत्र च 'लक्षणेत्थंभूताख्यान–' इत्यादिसौत्रप्रयोगो लिङ्गम्। एतेन कथंभूतो व्याख्यातः। **इत्थमिति**। 'एतेतौ रथोः' इति इदम इतादेशः। 'एतदः' इति योगविभागादेतदोऽपि इतादेश इति भावः। **किमश्च**। योगविभागः 'था हेतौ च छन्दसि–' इत्युत्तरसूत्रे किम एवानुवृत्तिर्यथा स्यादिदमो मा भूदिति।

इति तत्त्वबोधिन्यां प्राग्दिशीयप्रकरणम्।

पुरस्तात्। अधः, अधस्तात्। अवः। १९७७ विभाषाऽवरस्य। (५-३-४१) अवरस्यास्तातौ परेऽव् स्याद्वा। अवस्तात्, अवरस्तात्। एवं देशे काले च। 'दिशि रूढेभ्यः' किम्-ऐन्द्र्यां वसति। 'सप्तम्याद्यन्तेभ्यः' किम्-पूर्वं ग्रामं गतः। 'दिगादिवृत्तिभ्यः' किम्-पूर्वस्मिन्गुरौ वसति। 'अस्ताति च' (सू १९७६) इति ज्ञापकादसिरस्तातिं न बाधते। १९७८ दक्षिणोत्तराभ्यामतसुच्। (५-३-२८) अस्तातेरपवादः। दक्षिणतः, उत्तरतः। १९७९ विभाषा परावराभ्याम्।

तदाह **अस्तातावित्ति**। यद्यपि सूत्रक्रमे 'पूर्वाधर-' इति 'अस्ताति च' इति च 'संख्याया विधार्थे-' इत्यतः प्राक् पठितम्। तथापि अस्तातौ पुराद्यादेशविधानाय 'अस्ताति च' इति सूत्रमुपन्यसनीयम्। तत्रानुवृत्तिप्रदर्शनाय 'पूर्वाधर-' इत्यपि सूत्रमिहैवोपन्यस्तम्। **पुर इति**। पूर्वशब्दाद् असिप्रत्ययः प्रकृतेः पुर् आदेशः। **पुरस्तादिति**। पूर्वशब्दाद् अस्तातिप्रत्ययः प्रकृतेः पुर् आदेशः। **अधः, अधस्तादिति**। अधरशब्दाद् असिप्रत्यये अस्तातिप्रत्यये च प्रकृतेः अध् आदेशे रूपम्। **अव इति**। अवरशब्दाद् असिप्रत्यये प्रकृतेः अव् आदेशे रूपम्। **विभाषाऽवरस्य**। 'अस्ताति च' इति पूर्वसूत्राद् 'अस्ताति' इत्यनुवर्तते। तदाह **अवरस्येति**। **एवमिति**। पूर्वस्मिन् पूर्वस्मात् पूर्वो वा देशः, कालो वा पुरः पुरस्तादित्यादि। **पूर्वस्मिन्गुराविति**। पूर्वकालिकाध्यापनकर्तरीत्यर्थः। ननु 'दिक्छब्देभ्यः' इति सामान्यविहितस्य परादिशब्देषु सावकाशस्य अस्तातेः पूर्वाधरावरशब्देषु असिना विशेषविहितेन बाधः स्यादित्यत आह **अस्ताति चेतीत्यादि**। **दक्षिणोत्तराभ्याम्**। दिग्देशकालवृत्तिभ्यामिति शेषः। **दक्षिणतः, उत्तरत इति**। नच तसुजेव प्रत्ययोऽस्तु। दिग्वर्तित्वे तु 'सर्वनाम्नो वृत्तिमात्रे-' इति पुंवत्वेनैव दक्षिणत इत्यादि सिद्धमिति वाच्यम्, स्पष्टार्थत्वात्। अत एव भाष्ये अकारः

दिग्देशकालेष्विति। यथासंख्यमत्र नेष्यते अस्वरितत्वात्। **पुरः पुरस्तादिति**। कथं तर्हि 'पश्यामि तामित इतः पुरतश्च पश्चात्' इति भवभूतिः, 'स्यात्पुरः पुरतोऽग्रतः' इत्यमरः, 'पुरतः प्रथमे चाग्रे' इति विश्वश्च। समानकालीनं पूर्वकालीनमित्यादिवत्प्रामादिकमेवेति बहवः। केचित्तु 'दक्षिणोत्तराभ्यां तसुज्विधिनैवेष्टसिद्धौ अतसुच्' इत्यकारोच्चारणमन्यतोऽपि विधानार्थम्। तेन पुरत इति सिध्यति। 'पुर अग्रगमने' क्विपि पुर्। 'र्वोः' इति दीर्घस्तु न भवति भत्वात्। न च अतसुचश्चित्त्वेऽप्यकारोच्चारणं पक्षे आद्युदात्तत्वार्थमिति वाच्यम्, बहूनां प्रयोगानुरोधेनान्यतो विधानार्थमिति कल्पनस्यैव न्याय्यत्वादित्याहुः। यथासंख्यत्वानाश्रयणात् पुरस्ताद्वसति पुरस्तादागतः पुरस्ताद्रमणीयम्। अधस्ताद्वसति, अधस्तादागत इत्यादि सिध्यति।

(५-३-२९) परतः। अवरतः। परस्तात्। अवरस्तात्। १९८० **अञ्चेर्लुक्।** (५-३-३०) अञ्चत्यन्तादिक्छब्दादस्तातेर्लुक्स्यात्। 'लुक्तद्धितलुकि' (सू १४०८)। प्राच्यां प्राच्याः प्राची वा दिक् प्राक्। उदक्। एवं देशे काले च। १९८१ **उपर्युपरिष्टात्।** (५-३-३१) अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्यात्, रिल्, रिष्टातिलौ च प्रत्ययौ। उपरि, उपरिष्टाद्वा वसति, आगतः, रमणीयं वा। १९८२ **पश्चात्** (५-३-३२) अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातेर्विषये। १९८३ **उत्तराधरदक्षिणादातिः।** (५-३-३४) उत्तरात्। अधरात्। दक्षिणात्। १९८४ **एनबन्यतरस्यामदूरेऽपञ्चम्याः।** (५-३-३५) उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चमीं विना। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्छब्दमात्रादेनपमाहुः। पूर्वेण ग्रामम्। अपरेण ग्रामम्। १९८५ **दक्षिणादाच्।** (५-३-३६) अस्तातेर्विषये। दक्षिणा वसति। 'अपञ्चम्याः'

प्रत्याख्यातः। केचित्तु अकारोच्चारणमन्यतो विधानार्थम्। तेन पुरत इति सिद्धमित्याहुः। समानकालीनमित्यादिवत् पुरत इति प्रामादिकमेवेति बहवः। **विभाषा।** अतसुजिति शेषः। पक्षे अस्तातिः। **अञ्चेर्लुक्। प्राच्यामिति।** लिङ्गविशिष्टपरिभाषया अस्तातेर्लुक्। **उपर्युपरिष्टात्।** 'ऊर्ध्वस्य उपभावः रिल्प्रत्ययो रिष्टातिल्प्रत्ययश्च' इति भाष्यम्। तदाह **अस्तातेर्विषये इत्यादिना। वसति, आगतः, रमणीयं वेति।** विभक्तित्रयस्य यथासंख्यमुदाहरणम्। **पश्चात्।** 'अपरस्य पश्चभावः, आतिश्च प्रत्ययः' इति भाष्यवाक्यमिदम्। प्रत्यये इकार उच्चारणार्थः। **उत्तराधर।** आतिप्रत्यये इकार उच्चारणार्थः। अस्तातेरपवादः। **एनबन्यतरस्याम्।** 'अपञ्चम्या इति प्रागसेः' इति भाष्यम्। सूत्रक्रमे 'पूर्वाधर—' इत्यसिं वक्ष्यति। ततः प्रागित्यर्थः। **उत्तरादिभ्य इति।** 'उत्तराधरदक्षिणात्' इत्यनुवर्तत इति भावः। **अदूरे** इत्येतद्व्याचष्टे **अवध्यवधिमतोः सामीप्य इति। पञ्चमीं विनेति।** पञ्चम्यन्ताच्च भवतीत्यर्थः। **यथास्वमिति।** एनबभावे पक्षे अस्तातिः असिः आतिश्चेत्यर्थः। **दिक्छब्दमात्रादिति।** अञ्चत्यन्तात्तु नेदम्, व्यवस्थितविभाषाश्रयणात्। तेन प्राचेन ग्राममित्यादि न भवतीत्याहुः। **दक्षिणादाच्। अस्तातेर्विषय इति।** एतेन 'अदूरे' इति नानुवर्तत इति सूचि-

---

प्राच्यां प्राच्या इति। प्राच्यां दिशि वसति प्राग्वसति। प्राच्या दिश आगतः प्रागागत इत्यादि योज्यम्। **पञ्चम्यन्तं विनेति।** नेह उत्तरादागतः। अधरादागतः। **उत्तरेणेत्यादि।** वसति रमणीयं वा। **पक्षे यथास्वमिति।** दक्षिणतः।

इत्येव। दक्षिणादागतः। **१९८६ आहि च दूरे।** (५-३-३७) दक्षिणाद् दूरे आहि स्यात्। चादाच्। दक्षिणाहि, दक्षिणा। **१९८७ उत्तराच्च।** (५-३-३८) उत्तराहि, उत्तरा। **१९८८ संख्याया विधार्थे धा।** (५-३-४२) क्रियाप्रकारार्थे वर्तमानात्संख्याशब्दात्स्वार्थे धा स्यात्। चतुर्धा पञ्चधा। **१९८९ अधिकरणविचाले च।** (५-३-४३) द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात्। एकं राशिं पञ्चधा कुरु। **१९९० एकाद्धो ध्यमुञन्यतरस्याम्।**

तम्। एवंच आच्प्रत्यये, 'उत्तराधरदक्षिणात्' इत्यातिप्रत्यये, 'दक्षिणोत्तराभ्याम्–' इत्यतसुचि च त्रीणि रूपाणि। **आहि च दूरे।** दक्षिणाशब्ददिति शेषः। **चादाजिति।** तथा दूरे उक्तरूपत्रयेण सह चत्वारि रूपाणीति भावः। **उत्तराच्च।** आच् आहि चेति शेषः। अतसुचा आतिना च चत्वारि रूपाणि। **संख्याया विधार्थे धा।** विधाशब्दस्यार्थः प्रकारः विधार्थः। 'विधा विधौ प्रकारे च' इत्यमरः। सामान्यस्य भेदको विशेषः प्रकारः। स चाभिधानस्वभावात् क्रियाविषयक एव गृह्यते। तदाह **क्रियाप्रकारेति। चतुर्धा पञ्चधेति।** गच्छतीत्यादिक्रियापदमध्याहार्यम्। चतुष्प्रकारा गमनादिक्रियेति बोधः। नवधा द्रव्यमित्यादावपि भवतीत्यादि क्रियापदमध्याहार्यम्। **अधिकरणविचाले च।** अधिकरणं द्रव्यम्, तस्य विचालो विचालनं संख्यान्तरापादनम्। तदाह **द्रव्यस्येति।** संख्यान्तरापादनं च न्यूनसंख्यस्य अधिकसंख्याकरणम् अधिकसंख्यस्य न्यूनसंख्याकरणं च। आद्ये उदाहरति **एकं राशिं पञ्चधा कुर्विति।** द्वितीये तु अनेकमेकधा कुर्वित्युदाहार्यम्। इह राशिविषयक एव प्रकारो गम्यते न तु क्रियाप्रकार इति सूत्रारम्भः। **एकाद्धो ध्यमुञन्यतरस्याम्।**

उत्तरतः। अधः। अधस्तात्। उत्तरात्। अधरात्। दक्षिणात्। **संख्याया विधार्थे धा।** विधाशब्दस्यार्थो विधार्थः। यद्यप्योदनपिण्डोऽपि विधाशब्देनोच्यते, तथापीह न गृह्यते। तेन एकगोविधेत्यादौ न भवति। इह हि 'विधायाम्' इति वक्तव्ये अर्थग्रहणस्य प्रयोजनं विधाशब्दो यत्रार्थे प्रसिद्धस्तत्रैव यथा स्यात्। तादृशश्चार्थः प्रकार एव, स च क्रियाविषयक एव गृह्यते अभिधानस्वभावात्तदाह **क्रियाप्रकारे वर्तमानादिति।** कथं तर्हि 'नवधा द्रव्यम्, बहुधा गुणाः' इत्यादि। अत्रापि त्वश्रुता क्रिया प्रतीयते 'उपदिश्यते, इति वा, भवति इति वा' हरदत्तः। **अधिकरणविचाले च।** अधिकरणं द्रव्यम्, विचलनं विचालोऽन्यथाकरणम्। णिजन्तादेरच्। तच्चेह संख्यासंनिधानात्संख्यान्तरापादनमिति व्याचष्टे **द्रव्यस्येत्यादिना।** संख्यान्तरापादनं हि एकस्यानेकीकरणम्, अनेकस्य च एकीकरणम्। तत्राद्ये उदाहरणम् **एकं राशिं पञ्चधेति।** पञ्च राशीन् कुर्वित्यर्थः। द्वितीये तु अनेकम् एकधा कुर्वित्य-

(५-३-४४) एकध्यम्, एकधा। १९९१ द्वित्र्योश्च धमुञ्। (५-३-४५) आभ्यां 'धा' इत्यस्य धमुञ्स्याद्वा। द्वैधम्, द्विधा। त्रैधम्, त्रिधा। 'धमुञन्तात्स्वार्थे डदर्शनम्' (वा ३२३०) पथि द्वैधानि। १९९२ एधाच्च। (५-३-४६) द्वेधा। त्रेधा। १९९३ याप्ये पाशप्। (५-३-४७) कुत्सितो भिषग् भिषक्पाशः। १९९४ पूरणाद्भागे तीयादन्। (५-३-४८) द्वितीयो भागो

'एकात्' 'धः' इति छेदः। धाशब्दस्य 'धः' इति षष्ठ्येकवचनम्। एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशः स्यादित्यर्थः। **ऐकध्यमिति**। नच एकशब्दाद् ध्यमुञ्प्रत्ययः स्वतन्त्रो विधीयताम्। न तु धाप्रत्ययस्यादेश इति वाच्यम्, तथा सति अधिकरणविचाल एव संनिहितत्वादापत्तेः। **द्वित्र्योश्च धमुञ्**। षष्ठी पञ्चम्यर्थे। 'ध' इति 'अन्यतरस्याम्' इति चानुवर्तते। तदाह **आभ्यामिति**। परस्येति शेषः। **धमुञन्तादिति**। वार्तिकमिदम्। दृशिग्रहणात् क्वचिदेवायम्। **पथि द्वैधानीति**। तृणानीति शेषः। द्वैधमित्यस्माद् डप्रत्यये टिलोपे रूपम्। नच 'तसिलादयः प्राक् पाशपः' इति डप्रत्ययान्तस्याप्यव्ययत्वं शङ्क्यम्, स्वभावतः सत्त्ववचनत्वेनाव्ययत्वासंभवाद् 'द्वैधानि' इति भाष्यप्रयोगाच्च। **एधाच्च**। द्वित्रिभ्यां परस्य धाप्रत्ययस्य एधाजित्यादेशः स्यादित्यर्थः। 'पञ्चम्यास्तसिल्' इत्यारभ्य 'एधाच्च' इत्यन्तैर्विहितप्रत्ययान्तानामव्ययत्वम्। **याप्ये पाशप्**। याप्यः कुत्सितः 'निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः' इत्यमरः। कुत्सिते विद्यमानात् स्वार्थे पाशप् स्यादित्यर्थः। प्रवृत्तिनिमित्तकुत्सायामिदम्। अप्रवृत्तिनिमित्तकुत्सायामपि कुत्सित इति वक्ष्यमाणं भवतीति भाष्ये स्पष्टम्। **पूरणाद्भागे**। पूरणार्थकतीयप्रत्ययान्ताद् भागे विद्यमानात्स्वार्थे

दाहर्तव्यम्। इह क्रियाविषयकप्रकारो न गम्यत इति सूत्रारम्भः। **एकाद्धो**। शब्दप्रधानत्वात्सर्वनामकार्याभावः। इह प्रकरणादेव सिद्धे पुनर्धाग्रहणं विधार्थे विहितस्यापि यथा स्यात्। 'अनन्तरस्य—' इति न्यायेनाधिकरणविचाले विहितस्यैव हि प्राप्नोतीति वृत्तिपदमञ्जर्योः स्पष्टम्। एतेन स्वतन्त्र एव ध्यमुञ् प्रत्ययोऽस्त्वित्याशङ्का परास्ता। **ऐकध्यमिति**। विधार्थे ऐकध्यं भुङ्क्ते। अधिकरणविचाले तु ऐकध्यं राशिं कुर्वित्यादि ज्ञेयम्। एवमग्रेऽपि द्वैधमित्यादौ योज्यम्। **एधाच्च**। द्वित्र्योः संबन्धिनो धाप्रत्ययस्य एधाच् स्यात्। योगविभागो यथासंख्यनिरासार्थः। **याप्ये पाशप्**। 'कुत्सिते' इत्यत्रैव नायं विहितः, तिङन्तादपि प्रसङ्गात्। **पूरणाद्भागे**। पूरणार्थत्वात्तीयप्रत्ययः पूरणशब्देनोक्तः। पूरणग्रहणं चोत्तरार्थम्। न ह्यपूरणस्तीयप्रत्ययो भवति। मुखतीयः पार्श्वतीय इत्यत्र त्वनर्थकत्वान्नातिप्रसङ्गः। भाग इति पुंस्त्वं विवक्षितम्। तेन समानेऽप्यर्थे विभक्तौ विवक्षितायां चतुर्थी पञ्चमीत्येव भवति।

द्वितीयः। तृतीयः। स्वरे विशेषः। 'तीयादीकक्स्वार्थे वा वाच्यः' (वा २६६१)। द्वैतीयीकः, द्वितीयः। तार्तीयीकः, तृतीयः। 'न विद्यायाः' (वा २६६२)। द्वितीया, तृतीया विद्येत्येव। १६६५ प्रागेकादशभ्योऽच्छन्दसि। (५-३-४९) पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः। पञ्चमः। १६६६ षष्ठाष्टमाभ्यां ञ च। (५-३-५०) चादन्। षष्ठो भागः षाष्ठः, षष्ठः। आष्टमः, अष्टमः। १६६७ मानपश्वङ्गयोः कन्लुकौ च। (५-३-५१) षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये। षष्ठको भागो मानं चेत्। अष्टमो भागः पश्वङ्गं चेत्। अस्यानो वा लुक्। चकाराद्यथाप्राप्तम्। षष्ठः, षाष्ठः। अष्टमः, आष्टमः। महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञापयति। १६६८ एकादाकिनिच्चासहाये। (५-३-५२) चात्कन्लुकौ। एकाकी,

---

अन् स्यादित्यर्थः। अन्विधेः प्रयोजनमाह **स्वरे विशेष इति**। 'ञ्नित्यादिर्नित्यम्' इति स्वरे इत्यर्थः। **तीयादीकगिति**। वार्तिकमिदम् 'दृष्टं साम' इति सूत्रभाष्ये स्थितम्। **न विद्याया इति**। वार्तिकमिदमपि तत्रैव स्थितम्। विद्यावृत्तेः तीयप्रत्ययान्तादीकक् नेत्यर्थः। **प्रागेकादशभ्यः**। शेषपूरणेन सूत्रं व्याचष्टे **पूरणप्रत्ययान्ताद् भागे अनिति**। द्वितीयतृतीयशब्दाभ्यां पूर्वसूत्रेण सिद्धत्वाच्चतुर्थादिदशमशब्दपर्यन्तविषयकमिदमित्यभिप्रेत्योदाहरति **चतुर्थ इति**। नचानेनैव सिद्धत्वात्पूर्वसूत्रं किमर्थमिति शङ्क्यम्, तस्य छन्दस्यपि प्रवृत्त्यर्थत्वात्। **षष्ठाष्टमाभ्यां ञ च**। पूर्वसूत्रविषये इति शेषः। 'ञ' इति लुप्तप्रथमाकम्। ञे आदिवृद्धिः। **चादनिति**। इह न यथासंख्यम्, व्याख्यानात्। **मानपश्वङ्गयोः**। **अस्य अनो वेति**। अष्टमशब्दात्पूर्वसूत्रविहितस्य ञप्रत्ययस्य अन्प्रत्ययस्य च अनेन लुगित्यर्थः। **चकाराद्यथाप्राप्तमिति**। ञप्रत्ययः अन्प्रत्ययश्चेत्यर्थः। ननु समर्थानाम्–' इत्यतो वाग्रहणानुवृत्त्यैव ञानोरभावे सति पश्वङ्गे अष्टमो भाग इत्यस्य सिद्धेरिह लुग्विधानं व्यर्थमित्याशङ्क्याह **महाविभाषयेति**। **पूर्वत्रेति**। 'षष्ठाष्टमाभ्यां ञ च' इति सूत्रे इत्यर्थः। एवं षष्ठाष्टमाभ्यां शब्दाभ्यां ञानोरिह नित्यं प्राप्तयोः कदाचिल्लुग्विधिरर्थवानित्यर्थः। **एकादाकिनिच्चासहाये**। असहायवाचकादेकशब्दात्स्वार्थे

'प्रागेकादशभ्यः' इत्यनि सति तु टापि चतुर्थी पञ्चमेति प्रसज्येत। **एकादाकिनिच्च**। असहायवाचिन एकशब्दादाकिनिच् स्यात्। **कन्लुकाविति**। आकिनिचः कनो वा पक्षे लुक्। तयोरेवानेन सूत्रेण विधानात्। असहायग्रहणं संख्याशब्दनिरासार्थम्। अन्यथा प्रसिद्धत्वात्संख्याप्रकरणाच्च तस्यैव ग्रहणं स्यात्। इष्टापत्तौ तु द्वित्वे बहुत्वे च न स्यादेकाकिनौ एकाकिन इति। न हि द्वयोर्बहुषु वा एकत्वसंख्यास्ति। असहायत्वं

एकक:, एक:। १९९९ **भूतपूर्वे चरट्।** (५-३-५३) आढ्यो भूतपूर्वं आढ्यचरः। २००० **षष्ठ्या रूप्य च।** (५-३-५४) षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च। कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः, कृष्णचरः। तसिलादिषु रूप्यस्यापरिगणितत्वान्न पुंवत्। शुभ्राया भूतपूर्वः शुभ्रारूप्यः। २००१ **अतिशायने तमबिष्ठनौ।** (५-३-५५) अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ

अकिनिच्प्रत्ययः स्यादित्यर्थः। **भूतपूर्वे चरट्।** भूतपूर्वे वर्तमानात्प्रातिपदिकात् स्वार्थे चरट् स्यादित्यर्थः। **षष्ठ्या रूप्य च।** रूप्येति लुप्तप्रथमाकम्। 'भूतपूर्वे' इत्यनुवर्तते। **षष्ठ्यन्ताद् भूतपूर्वेऽर्थ इति।** भूतपूर्वेऽर्थे विद्यमानात् षष्ठ्यन्तादित्यन्वयः। 'भूतपूर्वे' इत्यनुवृत्तं हि श्रुतत्वात् षष्ठ्या विशेषणम्। भूतपूर्वे सम्बन्धे या षष्ठी तदन्तात्स्वार्थे रूप्यः स्यादिति फलति। यथाश्रुते तु स्वार्थिकप्रकरणविरोधः। **कृष्णरूप्य इति।** भूतपूर्वगत्या कृष्णसम्बन्धी गौरित्यर्थः। शुभ्रारूप्यशब्दे 'तसिलादिषु—' इति पुंवत्त्वमाशङ्क्य 'तसिलादयः प्राक् पाशपः' इत्यादिवार्तिकपरिगणितेषु रूप्यस्यानन्तर्भावात्तस्मिन्परे पुंवत्त्वं नेत्याह **तसिलादिष्वित्यादि। शुभ्राया भूतपूर्व इति।** गौरिति शेषः। **शुभ्रारूप्य इति।** भूतपूर्वगत्या शुभ्रासंबन्धी गौरित्यर्थः। **अतिशायने।** अतिपूर्वकः शीङ्धातुरुपसर्गवशादुत्कर्षे वर्तते। उत्कर्षश्चाधिक्यफलको न्यक्कारः, नत्वाधिक्यमात्रम्, तथा सति अकर्मकत्वापातात्। न चेष्टापत्तिः, तथा सति 'शुक्लमतिशेते शुक्लतरः, कृष्णमतिशेते कृष्णतरः' इत्यादिभाष्यविरोधात्। 'अतिशयिता अतिशायिनः, बाहुलकः कर्तरि ल्युट्' इति भाष्यम्।

तु परस्परातिरिक्तसहायाभावेन द्वयोर्बहूनामपि भवति। इह 'अकिनिच्' एवायं वक्तव्यः, सवर्णदीर्घेण सिद्धमिष्टम्। 'यस्येति च' इति लोपश्चाकारोच्चारणसामर्थ्यान्न भवतीत्यादि हरदत्तग्रन्थे स्थितम्। **भूतपूर्वे।** अत्र वर्तमानाच्चरट् स्यात्। 'गोष्ठात् खञ्—' इत्यत्रैव नोक्तम्। विशेषविहितेन खञा चरटो बाधा मा भूदिति। संनिधौ हि सामान्यविशेषभावः स्फुटीभविष्यति। यद्यपि दूरस्थस्यापि बाधो न्याय्य एव तथापीह गौरवं स्वीकृत्य दूरे पाठसामर्थ्याद्बाधो नेति भावः। **षष्ठ्या रूप्य च।** भूतपूर्व इत्यनुवर्तते। तच्च यद्यपि पूर्वत्र ङ्याप्प्रातिपदिकस्य विशेषणम्, तथापीह न तथा, षष्ठ्यन्तार्थस्य विशेषणत्वात्, तदाश्रितस्य सम्बन्धिनो गवादेः प्रधानत्वात्, प्रधानेतरसंनिधौ च प्रधाने कार्यसंप्रत्ययस्य न्याय्यत्वात्तदेतदाह **भूतपूर्वेऽर्थे रूप्यः स्यादिति। अतिशायने।** अतिपूर्वाच्छेतेर्ल्युट्। अतिशयनमेवातिशायनम्। अस्मादेव निपातनाद्दीर्घः। न तु सौत्रः। तेन लोकेऽपि दीर्घः साधुः। अबाधकान्यपि निपातनानि भवन्ति। तेन ह्रस्वोऽपि साधुः। यद्यपि केवलः शेतिः स्वप्ने वर्तते तथाप्यतिपूर्वः प्रकर्षे। प्रकर्षश्चात्र

स्तः। अयमेषामतिशयेनाढ्य आढ्यतमः। लघुतमो लघिष्ठः। २००२ तिङश्च। (५-३-५६) तिङन्तादतिशये द्योत्ये तमप्स्यात्। २००३ तरप्तमपौ घः।

अत एव निपातनाद्दीर्घः। अतिशायने इति प्रकृत्यर्थविशेषणम्। अतिशयितरि विद्यमानात् प्रातिपदिकात् स्वार्थे तमप् इष्ठन् च स्यादित्यर्थः। फलितमाह **अतिशयविशिष्टार्थवृत्तेरिति।** यदि तु अतिशायनशब्दस्य भावल्युडन्तत्वं तर्हि प्रत्ययार्थस्य प्राधान्यापत्तौ शुक्लतरादिशब्दात् शुक्लादिगतमतिशयनमिति बोधः स्यात्। नत्वतिशयितशुक्ल इति। तथा च शुक्लतरः शुक्लतरेति पुंस्त्वं स्त्रीत्वं च न स्यात्। अतिशायने वर्तमानादित्यर्थे तु अतिशयप्रकर्षादिशब्देभ्य एव स्यात्, नतु पट्वादिभ्यः। अतिशयविशिष्टे लक्षणया विद्यमानादित्यर्थे अतिशय्यमानादपि प्रत्ययापत्तिः। अतिशयनकर्तरि लक्षणायां तु भाष्योक्तमेव साधु इत्यास्तां तावत्। **अयमेषामिति।** द्वयोरेकस्य निर्धारणे तरबीयसुनावपवादौ वक्ष्येते। अतः परिशेषाद्बहूनामेकस्य निर्धारणे अस्य तमपः प्रवृत्तिरिति भावः। **अतिशयेनाढ्य इति।** द्रव्यस्य जातेर्वा स्वतः प्रकर्षयोगो नास्ति, अन्यथा घटतम इत्याद्यापत्तेः। किंतु गुणद्वारैव द्रव्यजात्योः प्रकर्षयोगः। तथा च आढ्यतम इत्यत्र उत्कर्षविशिष्ट आढ्यः प्रकृत्यर्थः। तमप्तु तद्द्योतकः। तमपि सति 'सुपो धातु–' इति सुपो लुक्, 'घकालतनेषु–' इति योगेन सुबन्तादेव तद्धितोत्पत्तेरुक्तत्वात्। अत्र आतिशायनिकप्रत्ययान्तादातिशायनिकप्रत्ययोऽनभिधानान्न भवति। 'श्रेष्ठतमाय कर्मणे' इति तु छान्दसमिति भाष्ये स्पष्टम्। **लघिष्ठ इति।** लघुशब्दादिष्ठनि ओर्गुणे प्राप्ते 'इष्ठेमेयस्सु' इत्यनुवृत्तौ 'टेः' इति टिलोपः। **तिङश्च।** अत्राप्रातिपदिकत्वादप्राप्ते

नाधिक्यम्, किं त्वभिभवः। 'पूर्वान्महाभागतयातिशेषे' इति प्रयोगदर्शनात्। न चैवं 'प्रकर्षे तमबिष्ठनौ' इत्येव कुतो न सूत्रितमिति शङ्क्यम्। अतिशायनमिति निपातनार्थमेव तथोक्तत्वाद् अतिशयो न प्रत्ययार्थः। तथा हि सति लघोरतिशायनं लघुतममिति स्यात्। प्रत्ययार्थस्य प्राधान्यात्। नापि प्रकृत्यर्थः। तथा हि सति प्रकर्षातिशयातिशयनादिभ्य एव स्यात्, न त्वाढ्यादिभ्यः। किं तु प्रकृत्यर्थविशेषणम्। प्रत्ययस्तु द्योतकस्तदेतदाह **अतिशयविशिष्टेत्यादि।** **अयमेषामिति।** अवयवे समुदाये यदा एकस्यातिशयो विवक्ष्यते, तदा तरबीयसुनावपवादौ वक्ष्येते। तथा च परिशेषाद्बहूनां मध्ये यदा एकदेशस्य निर्धारणं सोऽस्य विषय इति भावः। **आढ्यतम इति।** सुबन्तात्तमप्। 'सुपो धातु–' इति लुक्। यद्यपि 'ङ्याप्प्रातिपदिकात्' इत्येवानुवर्तते, तथापि सुबन्तपरतयैव व्याख्येयम्। अन्यथा हि पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ 'घकालतनेषु कालनाम्नः' इति सप्तम्या अलुग्विधानं कथमुपपद्यताम्। **तिङश्च।**

(१-१-२२) एतौ घसंज्ञौ स्तः। २००४ **किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे** (५-४-११) किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे। किंतमाम्। प्राह्णेतमाम्। पचतितमाम्। उच्चैस्तमाम्। द्रव्यप्रकर्षे

वचनम्। **तमप् स्यादिति**। 'अजादी गुणवचनादेव' इति नियमादिष्ठन्नानुवर्तत इति भावः। **तरप्तमपौ घः**। प्रथमस्य प्रथमपादे सूत्रमिदम्। आतिशायनिकप्रत्ययप्रकरणान्ते, 'पितौ घः' 'तादी घः' इति वा वक्तव्ये प्रकरणान्तरे पृथग्गुरुसूत्रकरणमत्यन्तस्वार्थिकमपि तरपं ज्ञापयति। तस्य आतिशायनिकप्रकरणबहिर्भूतस्य सर्वे तत्संग्रहणार्थं प्रकरणान्तरे सूत्रकरणस्यावश्यकत्वादित्याहुः। तेन 'अल्पाच्तरम्' 'लोपश्च बलवत्तरः' इत्यादि सिद्धम्। **किमेत्तिङव्यय**। 'आमु' इति छेदः। उकार उच्चारणार्थः। किम्, एत्, तिङ्, अव्यय एषां चतुर्णां द्वन्द्वः। किमेत्तिङव्ययप्रकृतिको घः' इति मध्यमपदलोपी समासः। फलितमाह **किम एदन्तादित्यादिना**। एभ्य इत्यर्थः। **किंतमामिति**। अत्यन्तस्वार्थिकोऽयं तमप्, नत्वतिशायने। एषामतिशयेनाढ्य इतिवदेषामतिशयेन क इति विग्रहस्यासंभवात्। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं हि निर्धारणम्। किंशब्दश्च न जात्याद्यन्यतमप्रवृत्तिनिमित्तकः। एवं चात्रातिशयस्याप्रतीतेर्द्रव्यप्रकर्षो दूरापास्त इति भावः। **प्राह्णेतमामिति**। प्राह्णः पूर्वाह्णः। 'प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यम्' इत्यमरः। अतिशयिते पूर्वाह्णे इत्यर्थः। पूर्वावयवगतप्रकर्षादह्नः प्रकर्षो बोध्यः। अत्र अहर्न द्रव्यम्। सूर्योदयादारभ्य सूर्यास्तमयावधिकस्यैव कालस्य अहन्शब्दार्थत्वात्। तस्य च उदयादिक्रियाघटितत्वान्न द्रव्यत्वमिति भावः। **पचतितमामिति**। अतिशयिता पाकक्रियेत्यर्थः। तिङन्तेषु क्रियाविशेष्यकबोधस्यैव 'प्रशंसायां रूपप्' इति सूत्रभाष्ये प्रपञ्चितत्वात्। अतोऽत्र क्रियाया एव प्रकर्षो नतु द्रव्यस्येति भावः। **उच्चैस्तमामिति**। आशंसतीत्यध्याहार्यम्। अतिशयेन उच्चैराशंसनादिक्रियेत्यर्थः। अत्रापि क्रियाया एव प्रकर्षो न

अस्मादिष्ठन्न भवति, 'अजादी गुणवचनादेव' इति नियमादित्याशयेनाह **तमप्स्यादिति**। **तरप्तमपौ घः**। अस्मिन्नेवातिशायनिकप्रकरणे 'तादौ घः' 'पितौ घः' इति वा वक्तव्ये प्रकरणान्तरे गुरुसूत्रकरणमत्यन्तस्वार्थिकमपि तरपं ज्ञापयति। तेन 'अल्पाच्तरम्', 'लोपश्च बलवत्तरः' इत्यादि सिद्धम्। अल्पाजेव ह्यल्पाच्तरम्। न त्वत्र द्वयोरेकस्यातिशयविवक्षायां तरप्। अन्यथा 'शिवकेशवौ' इत्यादिसिद्धावपि 'शङ्खदुन्दुभिवीणाः' इत्यादि न सिध्येदित्याहुः। **किमेत्**। आमोरुकारो यदि त्यज्येत, तर्हि पचतितरामित्यादौ 'ह्रस्वनद्यापः—' इति नुटि पचतितराणामिति स्यात्। 'यस्येति च'

तु उच्चैस्तमस्तरुः । २००५ **द्विवचनविभज्योपपदे तरबीयसुनौ** । (५-३-५७) द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः ।

तु द्रव्यस्य। **उच्चैस्तमस्तरुरिति**। अतिशयेन उच्चैस्तरुरित्यर्थः। अत्र उच्चैस्त्वप्रकर्षस्य तरौ द्रव्ये भानादाम् नेत्यर्थः। किंतमामित्यादौ 'यस्येति च' इति लोपं परत्वाद् बाधित्वा ह्रस्वान्तलक्षणनुटो निवृत्त्यर्थमामु इत्युकारोच्चारणम्। सति तु तस्मिन् 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया नुड्विधावस्य न ग्रहणमित्यादि 'आमि सर्वनाम्नः–' इति सूत्रभाष्ये प्रपञ्चितम्। **द्विवचन**। उच्यतेऽनेनेति वचनम्। द्वयोरर्थयोर्वचनं द्विवचनम्। अर्थप्रतिपादकमिति यावत्। न द्विवचनसंज्ञकमिह गृह्यते व्याख्यानात्। विभक्तव्यं विभज्यम्। 'ऋहलोः–' इति ण्यतं बाधित्वा निपातनाद्यत्। द्विवचनं च विभज्यं चेति समाहारद्वन्द्वः। द्विवचनविभज्यं च तदुपपदं चेति कर्मधारयः। अर्थप्रतिपादके विभक्तव्यविषयके च उपपदे सतीति फलितम्। 'प्रातिपदिकात्' इति 'तिङ' इति चानुवर्तते। सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात्सुबन्तत्वं प्रातिपदिकविशेषणं लभ्यते। फलितमाह **द्वयोरेकस्येत्यादिना**।

लोपस्य परेण नुटा बाधात्। सिद्धान्ते तु 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया नुड्विधौ नास्य ग्रहणम्। **द्विवचनविभज्योपपदे**। द्वयोरर्थयोर्वचनं द्विवचनम्। करणे ल्युट्। कर्मणि षष्ठ्या समासः। येन पदेन द्वावर्थावुच्येते तद्द्विवचनम्। विभक्तव्यं विभज्यम्। 'ऋहलोः–' इति ण्यति प्राप्ते तदपवादो यत् निपात्यते। ण्यति तु 'चजोः–' इति कुत्वेन विभाग्यमिति स्यात्। विभाज्यशब्दस्य स्मृतिषु प्रयुक्तस्य साधुत्वं चिन्त्यमिति हरदत्तोक्तिश्चिन्त्या। णयन्ताद् 'अचो यत्' इति विभाज्यमिति रूपसिद्धेः। न चात्रार्थभेदः शङ्क्यः, 'निवृत्तप्रेषणाद् धातोः प्राकृतेऽर्थे णिच्' इति 'णेरणौ–' इति सूत्रे व्युत्पादनादिति दिक्। द्विवचनं च विभज्यं चेति द्वन्द्वः। तस्य उपपदेन कर्मधारयः। तथा च अर्थवाचके विभजनीये चोपपदे सतीत्यक्षरार्थः। द्विवचनान्ते उपपदे इति व्याख्यायां तु दन्तोष्ठस्य दन्ताः स्निग्धतरा इत्यादि न सिध्यति। ननु द्वयोर्वचनं द्विवचनमिति पक्षेऽपि नेदं सिध्यति समाहारस्यैकत्वाद् गुणभूतवर्तिपदार्थाश्रयणे तु द्वात्रिंशद्दन्ताः द्वावोष्ठाविति तेषां बहुत्वात्सुतरां न सिध्येदिति चेत्। अत्राहुः वृत्तावभेदैकत्वसंख्यामुपाददति वर्तिपदानि। ततश्च भेदस्य परित्यागादभेदैकत्वसंख्यायाश्चोपादानाद्दन्तोष्ठलक्षणार्थद्वयं दन्तोष्ठशब्देनोच्यत इति नास्ति 'द्वयोर्वचनं द्विवचनमित्येतदर्थकद्विवचनोपपदे' इति पक्षे दोष इति। विस्तरस्त्वाकरग्रन्थेभ्योऽवगन्तव्यः। अन्वर्थं चोपपदम् उपोच्चारितं पदमिति, न तु कृत्रिमम्, तद्धितविधौ तस्यासंभवात्। तच्च विग्रहवाक्य एव प्रयुज्यते। वृत्तौ तु

पूर्वयोरपवादः। अयमनयोरतिशयेन लघुः लघुतरः, लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः, पटीयांसः। २००६ **अजादी गुणवचनादेव**। (५-३-५८) इष्ठनीयसुनौ गुणवचनादेव स्तः। प्रथिष्ठः, प्रथीयान्। नेह—पाचकतरः, पाचकतमः। २००७ **तुश्छन्दसि**। (५-३-५९) तृन्तृजन्तादिष्ठनीयसुनौ

द्वयोर्मध्ये अन्यतरापेक्षया अतिशयविशिष्टस्वार्थवृत्तेः विभागप्रयोजकीभूतधर्मवाचकाच्च शब्दात्स्वार्थे तरबीयसुनौ स्त इति यावत्। यद्यप्यत्र द्वे सुबन्ततिङन्ते प्रकृती, द्वौ च प्रत्ययौ, तथापि न यथासंख्यम्, व्याख्यानात्। अथ द्विवचनोपपदे उदाहरति **अयमनयोरिति**। अत्र उपोच्चारितं पदम् उपपदम्, नतु कृत्रिमम्, तद्धितविधौ तदसंभवाद् धात्वधिकार एव तत्प्रवृत्तेरुक्तत्वात्। तच्चोपपदं विग्रहवाक्येऽवश्यं प्रयुज्यते। तद्धितवृत्तौ तु गतार्थत्वान्नावश्यकम्। **लघीयानिति**। ईयसुनि नकार इत्, उकार उच्चारणार्थः, उगित्त्वान्नुम्, 'सान्त–' इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। अथ विभज्योपपदे उदाहरति। **उदीच्याः प्राच्येभ्य इति**। 'पञ्चमी विभक्ते' इति पञ्चमी। द्विवचनसंज्ञकग्रहणे तु 'दन्ताः स्निग्धतराः' इति न सिध्येत्। 'बहुषु पुत्रेषु एतदुपपन्नं भवति अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनीयान्' इति 'आद्यन्तवत्–' सूत्रस्थभाष्यप्रयोगाद् 'नैर्देशिकानां वार्ततरका' इति 'तस्मिन्' इति सूत्रभाष्यप्रयोगाच्च अद्वयर्थोपपदेऽपि तरबीयसुनावित्याहुः। **अजादी**। तरप्तमपौ इष्ठनीयसुनौ चेति चत्वारः प्रत्यया अनुक्रान्ताः। तेषां मध्ये यौ अजादी इष्ठनीयसुनौ तावित्यर्थः। तदाह **इष्ठनीयसुनाविति**। **पाचकतरः, पाचकतम इति**। क्रियाशब्दत्वादाभ्यामिष्ठनीयसुनौ नेति भावः। गुणवचनादजादी एवेति विपरीतनियमव्यावृत्त्यर्थः एवकारः। तेन पटुतरः पटुतम इत्यादि सिद्धम्। **तुश्छन्दसि**। तृ इत्यस्य तुरिति

गतार्थत्वान्नावश्यकम्। एवं स्थिते उपपदग्रहणं स्पष्टार्थम्। इह द्वे उपपदे द्वे च सुबन्ततिङन्तरूपे प्रकृती द्वौ च प्रत्ययौ तथापि यथासंख्यं नेष्यते। द्विवचनोपपदमुदाहरति **अनयोरिति**। **लघीयानिति**। 'टेः' इति लोपः। उगित्त्वान्नुम्। 'सान्तमहतः–' इति दीर्घः। हल्ङ्यादिसंयोगान्तलोपौ। विभज्योपपदमुदाहरति **प्राच्येभ्य इति**। 'पञ्चमी विभक्ते' इति पञ्चमी। कथं तर्हि 'परुद्भवान् पटुरासीत्, ऐषमस्तु पटुतरः' इति। अत्राहुः—एकस्यापि धर्मिणस्तत्कालस्थत्वादिरूपधर्मभेदेन भेदाध्यारोपात्प्रतियोग्यपेक्षस्तत्कालस्थप्रकर्षस्तदाश्रयश्चेह तरप्प्रत्यय इति। व्यपदिशन्ति च—'अन्य एवासि संवृत्तः', 'कच्चित्स एवासि धनंजयस्त्वम्' इति। **अजादी गुणवचनादेव**। इष्टतोऽवधारणार्थ एवकारः। तेन प्रत्ययनियमोऽयम्। एवकाराभावे तु गुणवचनादजादिप्रत्ययवेवेति प्रकृतिनियमोऽपि संभाव्येत। तथा च पटुतरः,

स्तः। २००८ **तुरिष्ठेमेयःसु।** (६-४-१५४) तृशब्दस्य लोपः स्याद् एषु परेषु। अतिशयेन कर्ता करिष्ठः। दोहीयसी धेनुः। २००९ **प्रशस्यस्य श्रः।** (५-३-६०) अस्य श्रादेशः स्यादजाद्योः। २०१० **प्रकृत्यैकाच्।** (६-४-१६३) इष्ठादिष्वेकाच्प्रकृत्या स्यात्। श्रेष्ठः, श्रेयान्। २०११ **ज्य च।** (५-३-६१)

पञ्चम्येकवचनम्। तृ इत्यनेन तृन्तृचोः सामान्येन ग्रहणम्। प्रत्ययत्वात्तदन्तग्रहणम्। अजादी इत्यनुवर्तते। तदाह **तृन्तृजन्तादिति**। अगुणवचनादपि तृप्रत्ययान्तात् प्राप्त्यर्थमारम्भः। एवं च पूर्वेण नियमेन व्यावर्तितयोः प्रतिप्रसवोऽयं नत्वपूर्वो विधिरिति सूचयितुं छान्दसमप्यत्रोपन्यस्तम्। तथा च अगुणवचनादपि कर्तृशब्दादिष्ठन्प्रत्यये कर्तृ इष्ठ इति स्थिते 'इष्ठेमेयस्सु' इति विहिते टिलोपे प्राप्ते। **तुरिष्ठेमेयःसु।** तृ इत्यस्य तुरिति षष्ठ्येकवचनम्। **एष्विति।** इष्ठन्, इमन्, ईयस् इत्येतेष्वित्यर्थः। अयं लोपः सामर्थ्यात्सर्वादेशः, अन्त्यस्य ऋकारस्य 'टेः' इत्येव सिद्धेः। **करिष्ठ इति।** अयमनयोरतिशयेन कर्तेत्यर्थः। **दोहीयसी धेनुरिति।** इयमनयोरतिशयेन दोग्ध्रीत्यर्थः। इष्ठनि 'भस्याढे–' इति पुंवत्त्वे ङीपो निवृत्तौ तृप्रत्ययस्य लोपे परनिमित्ताभावाद् 'दादेः–' इति घत्वस्य निवृत्तौ उगित्वाद् ङीपि दोहीयसीति रूपम्। 'पुगन्त–' इति गुणस्तु न निवर्तते। लुप्तेऽपि तृचि प्रत्ययलक्षणेन तत्सत्त्वात्। **प्रशस्यस्य श्रः।** **अजाद्योरिति।** इष्ठनीयसुनोरित्यर्थः। 'अजादी' इत्यनुवृत्तं सप्तम्या विपरिणम्यत इति भावः। प्रशस्यशब्दस्य क्रियाशब्दतया गुणवचनत्वाभावेऽपि अत एव ज्ञापकादिष्ठनीयसुनौ। श्र इष्ठ, श्र ईयस् इति स्थिते इष्ठेमेयःसु विहितटिलोपे प्राप्ते। **प्रकृत्यैकाच्।** एकः अच् यस्येति बहुव्रीहिः। **इष्ठादिष्विति।** 'तुरिष्ठेमेयःसु' इत्यतः तदनुवृत्तेरिति भावः। 'अल्लोपोऽनः,

---

पटुतम इत्यादि न सिध्येत्। **तुश्छन्दसि।** पूर्वेण नियमेन व्यावर्तितयोः प्रतिप्रसवोऽयम्, नत्वपूर्वो विधिः। तेन उपाधिसंकरो न। **तुरिष्ठ।** 'टेः' इत्यनेनान्त्यलोपे सिद्धेऽप्यारम्भसामर्थ्यात्सर्वस्य तृशब्दस्य लोपस्तदाह **करिष्ठ इति।** **दोहीयसीति।** इयमनयोरतिशयेन दोग्ध्री 'भस्याढे तद्धिते' सिद्धश्च प्रत्ययविधौ' इति वचनात् तद्धिते कर्तव्ये प्रागेव पुंवद्भाव इति ङीपि निवृत्ते दोग्धृशब्दात्प्रत्ययः, ततस्तृचि निवृत्ते निमित्ताभावाद् घत्वजश्त्वयोरपि निवृत्तिः। अलौकिकविग्रहवाक्ये प्रागेव तयोरप्रवृत्तिः। 'अकृतव्यूह–' परिभाषयेति तु तत्त्वम्। गुणस्तु प्रवर्तते। लुप्तेऽपि तृचि प्रत्ययलक्षणप्रौढ्यात्। छान्दसमपि 'तुः–' इति सूत्रम्, इति 'तुरिष्ठेमेयःसु' इति च 'णाविष्ठवत्' इत्यतिदेशेन लोकेऽपि कर्तारमाचष्टे कारयतीत्यादावुपयोक्ष्यमाणत्वादिहोपन्यस्तम्। **प्रशस्यस्य श्रः।** 'अजादी' इत्यनुवृत्तं सप्तम्या विपरिणम्यत इत्याह

प्रशस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः। **२०१२ ज्यादादीयसः।** (६-४-१६०) 'आदेः परस्य' (सू ४४) ज्यायान्। **२०१३ वृद्धस्य च।** (५-३-६२) ज्यादेशः स्यादजाद्योः। ज्येष्ठः, ज्यायान्। **२०१४ अन्तिकबाढयोर्नेदसाधौ।** (५-३-६३) अजाद्योः। नेदिष्ठः, नेदीयान्। साधिष्ठः, साधीयान्। **२०१५ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः।** (६-४-१५६) एषां यणादिपरं लुप्यते, पूर्वस्य च गुण इष्ठादिषु।

नस्तद्धिते, यस्येति च, टेः' इत्यादेरेतत्प्रकरणस्थलोपस्यायं प्रकृतिभाव इति भाष्ये स्पष्टम्। **श्रेष्ठः, श्रेयानिति।** अयमनयोरतिशयेन प्रशस्य इत्यर्थः। **ज्य च।** 'ज्य' इति लुप्तप्रथमाकम्। 'प्रशस्यस्य' इति 'अजादी' इति चानुवर्तते। तदाह **प्रशस्यस्येति। ज्येष्ठ इति।** 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः। ईयसुनि ज्यादेशे ज्येयानिति प्राप्ते। **ज्यादादीयसः।** ज्यात्, आत् इति छेदः। ज्यात् परस्य ईयस आकारः स्यादित्यर्थः। अन्तादेशत्वे प्राप्ते आह **आदे परस्येति। वृद्धस्य च।** शेषपूरणेन सूत्रं व्याचष्टे **ज्यादेशः स्यादजाद्योरिति। इष्ठ**-न्नीयसुनोरित्यर्थः। **ज्येष्ठ इति।** अयमनयोरतिशयेन वृद्ध इत्यर्थः। **अन्तिकबाढयोः। अजाद्योरिति।** शेषपूरणमिदम्। अन्तिक, बाढ अनयोः इष्ठेयसुनोः परतः नेद, साध एतावादेशौ स्त इत्यर्थः। **नेदिष्ठः, नेदीयानिति।** अयमनयोरतिशयेनान्तिक इत्यर्थः। **साधिष्ठः, साधीयानिति।** अयमनयोरतिशयने बाढ इत्यर्थः। बाढो भृशः। 'भृशप्रतिज्ञयोर्बाढम्' इत्यमरः। 'अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्' इति च। **स्थूलदूर। एषामिति।** स्थूल, दूर, युवन्, ह्रस्व, क्षिप्र, क्षुद्र इत्येतेषामित्यर्थः। **यणादीति।** यण् आदिर्यस्येति विग्रहः। परमिति यणादीत्यस्य विशेषणम्, परभूतं यणादीत्यर्थः। **लुप्यत इति।** 'अल्लोपोऽनः' इत्यतोऽनुवृत्तं लोपपदमिह कर्मणि घञन्तमाश्रीयत इत्यर्थः। भावसाधनत्वे परमित्यनेन सामानाधिकरण्यासंभवात्। **पूर्वस्येति।** पूर्वत्वं यणपेक्षया बोध्यम्। **इष्ठादिष्विति।**

अजाद्योरिति। अजाद्योः किम्, प्रशस्यतरः। प्रशस्यतमः। **श्रेष्ठ इति।** प्रकृतिभावादिह 'टेः' इति लोपो 'यस्येति–' लोपश्च न भवति। **ज्यादात्।** ज्यादुत्तरस्य ईयसुन आकारादेशः स्यात्। **वृद्धस्य च।** स्वरूपस्येह ग्रहणम्, न तु 'वृद्धिर्यस्याचामादिः–' इति पारिभाषिकस्य, व्याख्यानात्। अस्य 'प्रियस्थिर–' इत्यादिना वर्षादेशोऽपि पक्षे भवति। न च तस्येमनिचि सावकाशता शङ्क्या, वृद्धशब्दादिमनिचोऽभावात्। यदि तु 'वृद्धस्य वर्षिश्च' इतिसूत्रमिहैव क्रियेत, तदा द्विर्वृद्धग्रहणं न कर्तव्यमिति लाघवं भवतीत्याहुः। **स्थूलदूर।** परग्रहणं यविष्ठो ह्रसिष्ठ इत्यत्र पूर्वयणा-

स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवम् ईयस्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा। क्षेपिमा। क्षोदिमा। २०१६ **प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः।** (६-४-१५७) प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः।

'तुरिष्ठेमेयस्सु' इत्यतस्तदनुवृत्तेरिति भावः। **स्थविष्ठ इति**। स्थूलशब्दादिष्ठनि ल इत्यस्य लोपे ऊकारस्य गुण ओकारः, अवादेश इति भावः। ओर्गुणस्तु न प्रवर्तते, यणादिलोपस्याभीयत्वेनासिद्धत्वात्। एवमग्रेऽपि। **दविष्ठ इति**। दूरशब्दादिष्ठनि र इत्यस्य लोपे ऊकारस्य गुणे अवादेशः। **यविष्ठ इति**। युवन्शब्दादिष्ठनि वन्नित्यस्य लोपे ऊकारस्य गुणे अवादेशः। परमित्यनुक्तौ यु इत्यस्यापि यणादेर्लोपः स्यात्। **ह्रसिष्ठ इति**। ह्रस्वशब्दादिष्ठनि व इत्यस्य लोपः। परमित्यनुक्तौ अत्र रादेर्लोपः स्यात्। **क्षेपिष्ठ इति**। क्षिप्रशब्दादिष्ठनि र इत्यस्य लोपे इकारस्य गुणः। 'इको गुणवृद्धी' इत्युक्तेः न प्रकारस्य गुणः। **क्षोदिष्ठ इति**। क्षुद्रशब्दादिष्ठनि र इत्यस्य लोपः, उकारस्य गुणः। **एवमीयस् इति**। स्थवीयान्, दवीयान्, यवीयान्, ह्रसीयान्, क्षेपीयान्, क्षोदीयान्। इमनिजनुवृत्तेः प्रयोजनमाह **ह्रस्वक्षिप्रेति**। **प्रियस्थिर**। **प्रियादीनामिति**। प्रिय, स्थिर, स्फिर, उरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ, वृन्दारक एषां दशानामित्यर्थः। **प्रादय इति**। प्र, स्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप्, द्राघि, वृन्द एते दशेत्यर्थः। **इष्ठादिष्विति**। इष्ठेमेयस्स्वित्यर्थः। 'तुरिष्ठेमेयःसु' इत्यतः तदनुवृत्तेरिति भावः। **प्रेष्ठ इति**। प्रियशब्दादिष्ठनि प्रकृतेः प्रादेशः। आभीयत्वेनासिद्धत्वादकारोच्चारणसामर्थ्याच्च न टिलोपः। आद्गुणः। **स्थेष्ठ इति**। स्थिरशब्दादिष्ठनि प्रकृतेः स्थादेशः। प्रकृतिभावान्न टिलोपः। **स्फेष्ठ इति**। स्फिरशब्दस्य इष्ठनि स्फादेशः। **वरिष्ठ इति**। उरुशब्दाद् इष्ठनि वर् आदेशः। **बंहिष्ठ इति**। बहुलशब्दस्य बंहि इत्यादेशः। इकार उच्चारणार्थः। अन्यथा आभीयत्वेनासिद्धत्वाद् उच्चारणसामर्थ्याद्वा इकारस्य लोपो न स्यात्। **गरिष्ठ इति**। गुरुशब्दस्य इष्ठनि गर् आदेशः। **वर्षिष्ठ इति**। वृद्धशब्दस्य इष्ठनि वर्षिरादेशः बंहिवदिकार उच्चारणार्थः। **त्रपिष्ठ इति**। तृप्र-

देर्लोपो माभूदिति। पूर्वग्रहणं तु स्पष्टार्थम्। परस्मिन् लुप्ते सामर्थ्यात्पूर्वस्यैव गुणलाभात्। **स्थविष्ठ इति**। न चात्र 'ओर्गुणः' इत्येव सिद्धे गुणग्रहणं व्यर्थमिति वाच्यम्। परयणादिलोपस्याभीयत्वेनासिद्धत्वात् क्षिप्रक्षुद्रयोर्गुणस्य प्राप्त्यभावात्, क्षेपिष्ठः, क्षोदिष्ठ इत्यसिद्धिप्रसङ्गाच्च। **एवमिति**। प्रेयान्, स्थेयान्, स्फेयान्,

द्राघिष्ठः । वृन्दिष्ठः । एवमीयसुन् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वाद् प्रेमा इत्यादि । २०१७ बहोर्लोपो भू च बहोः । (६-४-१५८) बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा, भूयान् । २०१८ इष्ठस्य यिट् च । (६-४-१५९) बहोः परस्य इष्ठस्य लोपः स्याद् यिडागमश्च । भूयिष्ठः । २०१९ युवाल्पयोः कनन्यतरस्याम् । (५-३-६४) एतयोः कनादेशो वा स्यादिष्ठेयसोः । कनिष्ठः, कनीयान् । पक्षे यविष्ठः अल्पिष्ठ इत्यादि । २०२०

शब्दस्य इष्ठनि त्रप् आदेशः अदुपधः । तृपधातोस्तृप्त्यर्थकादौणादिके रकि तृप्रशब्दः । **द्राघिष्ठ इति** । दीर्घशब्दस्य इष्ठनि द्राघिरादेशः । बंहिवदिकार उच्चारणार्थः । **वृन्दिष्ठ इति** । वृन्दारकशब्दस्य इष्ठनि वृन्द आदेशः । अकार उच्चारणार्थः । **एवमीयसुन्निति** । प्रेयान्, स्थेयान्, स्फेयान्, वरीयान्, बंहीयान्, गरीयान्, वर्षीयान्, त्रपीयान्, द्राघीयान्, वृन्दीयान् । अत्र इमनिजनुवृत्तेः प्रयोजनमाह **प्रियोरुबहुलेति । इत्यादीति** । वरिमा, बंहिमा, गरिमा, द्राघिमा । **बहोर्लोपः** । भू इति लुप्तप्रथमाकम् । 'इष्ठेमेयस्सु' इत्यनुवृत्तम् । तत्र इष्ठन उत्तरसूत्रे कार्यान्तरविधानादिह तस्य न संबन्धः । तदाह **बहोः परयोरिति** । 'आदेः परस्य' इति प्रत्यययोरादिलोपः । **भूमेति** । बहुत्वमित्यर्थः । बहुशब्दात् पृथ्वादित्वादिमनिचि प्रकृतेर्भूभावः, प्रत्ययादेरिकारस्य लोपश्च । **भूयानिति** । अयमनयोरतिशयेन बहुरित्यर्थः । वैपुल्यवाचकाद् बहुशब्दादीयसुनि प्रकृतेर्भूभावः, प्रत्ययादेरिकारस्य लोपश्च । भूभावस्याभीयत्वेनासिद्धत्वादोर्गुणो न भवति । **इष्ठस्य यिट् च । लोपः स्यादिति** । 'आदेः परस्य' इति बोध्यम् । यिटि टकार इत् । इष्ठस्यादिलोपे कृते यिडागमः । ट इत् । टित्त्वात् प्रत्ययस्याद्यवयवः । बहोर्भूभावस्तु पूर्वसूत्रेण सिद्ध एव । यदि तु लोप इति निवृत्तं तदा यकार आगम इति भाष्यम् । **युवाल्पयोः । इष्ठेयसोरिति** । अजादी इत्यनुवृत्तस्य सप्तम्या विपरिणामादिति भावः । **कनिष्ठः, कनीयानिति** । अयमनयोरतिशयेन युवा अल्पो वेत्यर्थः । **पक्षे यविष्ठ इति** । युवन्शब्दादिष्ठनि 'स्थूलदूर–' इति वनो लोपे उकारस्य गुणे अवादेशे रूपम् । **अल्पिष्ठ इति** । अल्प-

---

वरीयानित्यादि । **इमेयसोर्लोप इति** । स च 'आदेः परस्य' इत्यादेरेव भवति । **इष्ठस्य यिट् च** । पूर्वसूत्रं संपूर्णमनुवर्तते तदाह **बहोरित्यादि** । भूरादेशश्चेत्यपि ज्ञातव्यम् । **भूयिष्ठ इति** । अत्र इष्ठस्यादिलोपे कृते यिशब्दे आगमः । यद्वा लोपापवादो यकार आगमः, इकारस्तूच्चारणार्थः । पक्षद्वयमपीदं भाष्यारूढम् । **युवाल्पयोः** । युवेति स्वरूपग्रहणम्, न तु युवापत्यस्य, अल्पसाहचर्याद्व्याख्यानाच्च । 'अजादी' इत्यनुवर्तनादजाद्योरेव पूर्वयोर्न तु तरप्तमपोरित्याशयेन व्याचष्टे **इष्ठेय-**

विन्मतोर्लुक्। (५-३-६५) विनो मतुपश्च लुक्स्यादिष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः, स्रजीयान्। अतिशयेन त्वग्वान् त्वचिष्ठः, त्वचीयान्। २०२१ **प्रशंसायां रूपप्।** (५-३-६६) सुबन्तात्तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपम्। २०२२ **ईषदसमाप्तौ कल्पब्देश्यदेशीयरः।** (५-३-६७) ईषदूनो विद्वान्विद्वत्कल्पः। यशस्कल्पम्। यजुष्कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्। २०२३ **विभाषा सुपो बहुच्पुर-**

शब्दादिष्ठनि टिलोपः। **इत्यादीति**। यवीयान्, अल्पीयानिति रूपद्वयमादिपदग्राह्यम्। **विन्मतोर्लुक्। इष्ठेयसोरिति**। अजादी इत्यनुवृत्तस्य सप्तम्या विपरिणामादिति भावः। **स्रजिष्ठ इति**। स्रग्विन्शब्दादिष्ठनि विनो लुकि तन्निमित्तपदत्वभङ्गात् कुत्वनिवृत्तिरिति भावः। **एवं स्रजीयानिति। त्वचिष्ठ इति**। त्वग्वच्छब्दादिष्ठनि मतुपो लुकि तन्निमित्तपदत्वभङ्गात् कुत्वनिवृत्तिरिति भावः। एवं त्वचीयान्। अत एव ज्ञापकादाभ्यामिष्ठनीयसुनौ। **प्रशंसायां रूपप्। सुबन्तात्तिङन्ताच्चेति**। शेषपूरणमिदम्। 'तिङश्च' इत्यनुवृत्तम्, 'प्रातिपदिकात्' इति च। 'घकाल' इत्यादिलिङ्गात् सुबन्तादिति लभ्यत इति भावः। प्रशंसाविशिष्टे स्वार्थे वर्तमानात् तिङन्तात्सुबन्ताच्च रूपबिति फलितम्। **पचतिरूपमिति**। प्रशस्ता पाकक्रियेत्यर्थः। अत्र भाष्ये 'क्रियाप्रधानमाख्यातं द्रव्यप्रधानं नाम' इति सिद्धान्तितम्। 'पचतोरूपं पचन्तिरूपमित्यत्र च न द्विवचनबहुवचने। तिङैव द्वित्वबहुत्वयोरुक्तत्वात्। एकवचनं तु उत्सर्गतः करिष्यते, नपुंसकत्वं तु लोकात्' इत्यपि भाष्ये स्पष्टम्। **ईषदसमाप्तौ**। ईषदसमाप्तिविशिष्टेऽर्थे विद्यमानात् सुबन्तात् स्वार्थे कल्पप्, देश्य, देशीयर् एते प्रत्ययाः स्युरित्यर्थः। **विद्वत्कल्प इति**। ईषन्न्यूनवैदुष्यवानित्यर्थः। **यशस्कल्पमिति**। असंपूर्णं यश इत्यर्थः। 'सोऽपदादौ' इति सत्वम्। **यजुष्कल्पमिति**। असंपूर्णं यजुरित्यर्थः। 'इणः षः' इति षत्वम्। **विद्वद्देश्य इति**। असम्पूर्णवैदुष्यवानित्यर्थः। एवं विद्वद्देशीयः। अत्र सर्वत्र

सोरिति। विन्मतोर्लुक्। स्रजिष्ठ इति। विनो लुकि कृते भत्वात्पदकार्याभावः। अस्मादेव ज्ञापकादगुणवचनत्वेऽपि विन्मतोरजादी भवतः। **प्रशंसायां रूपप्**। प्रकृत्यर्थस्य परिपूर्णतेह प्रशंसा, न तु स्तुतिः। तेनेहापि भवति। चौररूपोऽयं यदक्ष्णोरप्यञ्जनं हरति। गुप्ततरत्वपहरणेन चौर्यं परिपूर्यते। **पचतिरूपमिति**। 'क्रियाप्रधानमाख्यातम्' क्रियायाश्चासत्त्वरूपत्वेऽपि औत्सर्गिकमेकवचनं भवति। तेन पचतोरूपं पचन्तिरूपमित्यादि। इह प्रथमैव विभक्त्यन्तराणामप्राप्तेरिति बहवः। वस्तुतस्तु पश्येत्यादियोगे कर्मणि द्वितीयापि सुलभा। क्लीबत्वं लोकात्। एवं पचति-

स्तात्तु । (५-३-६८) ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव, न तु परतः । ईषदूनः पटुः बहुपटुः । पटुकल्पः । 'सुपः' किम्—यजति-

---

'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति वचनात् प्रकृतिलिङ्गत्वं बोध्यम् । **पचतिकल्पमिति** । असंपूर्णा पाकक्रियेत्यर्थः । पचतिरूपमितिवल्लिङ्गवचननिर्वाहः । एवं वृषभकल्प इयं गौरित्यादावपि प्रकृतिलिङ्गत्वं बोध्यम् । 'क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति वचनाद् गुडकल्पा द्राक्षेत्यादौ प्रकृतिलिङ्गाति-क्रमः । एतत्सर्वमत्रैव भाष्ये स्पष्टम् । **विभाषा** । 'ईषदसमाप्तौ' इत्यनुवर्तते । तदाह **ईषदसमाप्तिविशिष्ट इति । प्रागेवेति** । सूत्रे तुशब्दोऽवधारण इति भावः । **बहुपटुरिति** । पटुशब्दात् सुबन्तात् प्राग् बहुचि कृते प्रातिपदिकावयवत्वात् सुपो लुकि समुदायात् पुनः सुबुत्पत्तिः । नच तद्धितान्तत्वाभावाद् समासत्वाभावाच्च पूर्वोत्पन्नसुब्विशिष्टस्य प्रातिपदिकत्वाभावात् कथमिह लुगिति वाच्यम्, 'अर्थवत्' इत्यनेन तस्य प्रातिपदिकत्वसत्त्वात् पटुरित्यस्य पूर्वोत्पन्नसुप्प्रत्ययान्तत्वेऽपि बहुपटुरिति समुदायस्य प्रत्ययान्तत्वाभावात् प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणात् । नचैवं सति 'कृत्तद्धित—' इत्यत्र समासग्रहणं व्यर्थमिति वाच्यम्, पदघटितसंघातस्य चेत् प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमार्थत्वात् । नचैवं सति प्रकृते बहुपटुरिति समुदायस्य पूर्वोत्पन्नसुब्विशिष्टस्य कथं प्रातिपदिकत्वम् असमासत्वादिति वाच्यम्, यत्र संघाते पूर्वो भागः पदं तस्य चेत् प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमशरीरा-भ्युपगमाद् इति प्रागुक्तं न विस्मर्तव्यम् । नच 'समर्थानाम्' इत्यत्र वाग्रहणादेव सिद्धे विभाषाग्रहणं व्यर्थमिति वाच्यम्, बहुजभावपक्षे पूर्वसूत्रविहितकल्पबाद्यर्थत्वात् । अन्यथा महाविभाषया 'अपवादेन मुक्ते उत्सर्गस्य न प्रवृत्तिः' इति सिद्धान्ताद् बहु-

---

कल्पमित्यादावपि बोध्यम् । **विभाषा सुपः** । सूत्रे 'सुपः' इति षष्ठ्यन्तम् । 'षष्ठ्यतसर्थप्रत्ययेन' इत्युक्तेः । **सुबन्तादिति** । एतच्च पञ्चम्यन्तमुक्तमेव । पुरस्ता-च्छब्दपर्यायस्य प्रागितिशब्दस्य वृत्तौ प्रयुक्तत्वात् । प्रागित्यपकृष्यत इति तु मनोरमायां स्थितम् । न च सूत्रस्थपुरस्ताच्छब्दसमानार्थकप्राक्शब्दयोगेऽपि 'षष्ठ्यतसर्थ—' इति षष्ठी स्यादिति वाच्यम् । 'अन्यारात्—' इति सूत्रेऽञ्चूत्तरपदस्य दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थप्रत्ययेन' इत्येतद्बाधनार्थं पृथग्ग्रहणमिति सिद्धान्तयित्वा प्राक् प्रत्यग्वा ग्रामादित्युदाहृतत्वात् । काशिकायां तु वृत्तावपि पुरस्ताच्छब्दः प्रयुक्तः, सुबन्तादिति च प्रयुक्तम्, तदसमञ्जसमिति मत्वा हरदत्तेन कथंचित् समर्थितम् । ल्यब्लोप एषा पञ्चमी । एवंभूतं प्रकृतित्वेनाश्रित्येत्यर्थ इति । **प्रागेवेति** । सौत्रस्तुशब्दोऽवधारणे वर्तत इति भावः । तेन च बहुजेव विकल्प्यते, न तु पूर्वत्वम् । तुशब्दाभावे तु प्राक्त्वं

कल्पम्। २०२४ प्रकारवचने जातीयर्। (५-३-६९) प्रकारवति चायम्, थाल् तु प्रकारमात्रे। पटुप्रकारः। पटुजातीयः। २०२५ प्रागिवात्कः। (५-३-७०) 'इवे प्रतिकृतौ' (सू २०५१) इत्यतः प्राक्काधिकारः। २०२६

जभावे वाक्यमेव स्यात्। नच कल्पबादीनां बहुचा समानविषयकत्वान्निरवकाशत्वं शङ्क्यम्, तेषां तिङन्ते सावकाशत्वाद् इति भाष्ये स्पष्टम्। एतदभिप्रेत्याह **पटुकल्प इति**। ननु सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तादिह सुब्ग्रहणं व्यर्थमिति पृच्छति **सुपः किमिति**। 'तिङश्च' इत्यनुवृत्तिनिवृत्त्यर्थं सुब्ग्रहणम्। नच अस्वरितत्वादेव तदनुवृत्तिर्न भविष्यति इति वाच्यम्, 'अव्ययसर्वनाम्नाम्–' इत्याद्युत्तरसूत्रे तिङश्चेत्यनुवृत्तेरावश्यकतया तस्य स्वरितत्वावश्यकत्वादिति भाष्ये स्पष्टम्। एतदभिप्रेत्याह **यजतिकल्पमिति**। तुग्रहणं तु 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते, क्वचिदतिवर्तन्ते' इति ज्ञापनार्थम् इति भाष्ये प्रपञ्चितम्। **प्रकारवचने**। 'प्रकारवचने थाल्' इत्यतोऽस्य वैलक्षण्यमाह **प्रकारवति चायमिति**। प्रकारवत्येवेत्यर्थः। **थाल् तु प्रकारमात्र इति**। वस्तुतस्तु उभयमपि प्रकारवतीति न्याय्यम्, अविशेषात्। अन्यथा तथेत्यत्र स प्रकार इत्येवार्थः स्यात्। नच किमादिभ्यो विशिष्य विहितेन थाला जातीयरो बाधात् तज्जातीयः इत्याद्यसिद्धिरिति वाच्यम्, 'जात्यन्ताच्छ बन्धुनि' इति तज्जात्यादिशब्दात् छप्रत्ययेनैव तज्जातीयादिसिद्धेः। अत एव यथाजातीयक इत्यादिभाष्यप्रयोगाः संगच्छन्ते। जयादित्यस्तु अत्र प्रकारः भेदः, थाल्विधौ सामान्यस्य भेदको विशेषः प्रकार इत्याह। वामनस्तु सादृश्यं भेदश्चेत्युभयमपि प्रकार इत्याह। **प्रागिवात्कः**। इवशब्दस्तद्घटित-

---

विकल्प्येत। तथा च पक्षे बहुच् परः स्यात्। भाष्यकारस्य मते तु नेदं तुशब्दस्य फलम्। तथाहि—'उदश्वितोऽन्यतरस्याम्' इत्यादौ प्रधानत्वात्प्रत्यय एव विकल्प्यते, न तु परत्वम्, प्रत्यय एव हि परत्वविशिष्टो विधीयत इति विशेषणस्य गुणत्वात्। 'गुणानां च परार्थत्वात्' इति न्यायात्। तद्वदिहापि विभाषाग्रहणेन बहुजेव संभन्त्स्यते, न पुरस्तादित्येतत्। तुशब्दस्य तु अवधारणार्थस्यान्यदेव प्रयोजनं पुरस्तादेव सर्वं यथा स्यादिति। तेन लिङ्गसङ्ख्ये अपि प्राक् प्रत्ययोत्पत्तेः प्रकृत्यवस्थायां ये दृष्टे ते एव स्तः। बहुचः प्रयोगश्च प्राक् प्रकृतेरेव भवतीति। तेन 'बहुगुडो द्राक्षा', 'लघुर्बहुतृणं नरः' इत्यादौ प्रकृतिवल्लिङ्गमेव भवति, न त्वभिधेयवल्लिङ्गम्। ननु 'स्वार्थिकाः प्रकृतितो लिङ्गवचनानि लभन्ते' इत्येव सिद्धमिति किमनेन तुशब्दग्रहणेनेति चेत्। अत्राहुः—एतदेव ज्ञापयति 'ईषदसमाप्तौ ये स्वार्थिकास्तेष्वभिधेयवदेव लिङ्गवचने स्तः' इति। तेन गुडकल्पा द्राक्षा शर्कराकल्पो गुड इत्यादि सिद्धम्। प्रागि-

अव्ययसर्वनाम्नामकच्प्राक्टेः। (५-३-७१) 'तिङश्च' (सू २००२) इत्यनुवर्तते। २०२७ **कस्य च दः।** (५-३-७२) कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच्च। २०२८ **अज्ञाते।** (५-३-७३) कस्यायमश्वोऽश्वकः। उच्चकैः। नीचकैः। सर्वके। विश्वके। 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु सुबन्तस्य टेः प्रागकच्।' (वा ३२८४) युवकयोः।

सूत्रपर इति मत्वाह **इवे प्रतीति। अव्ययसर्वनाम्नाम्। अनुवर्तत इति।** मण्डूकप्लुत्येति शेषः। अव्ययसर्वनाम्नां तिङन्तानां च टेः प्राक् अकच्प्रत्ययः स्यादित्यर्थः। अकचि ककारादकार उच्चारणार्थः। चकार इत्। ककारान्तः प्रत्ययः। अयमपि प्रागिवादधिकारः। **कस्य च दः।** पूर्वसूत्रे 'अव्ययसर्वनाम्नाम्–' इति समासनिर्देशेऽपि एकदेशे स्वरितत्वप्रतिज्ञाबलाद् अव्ययग्रहणमेवात्रानुवर्तते। कस्य इत्यत्र ककारादकार उच्चारणार्थः। ककारस्येति विवक्षितम्। तेनाव्ययस्य विशेषणात् तदन्तविधिः। तदाह **कान्ताव्ययस्येति। अकच्चेति।** चकारेण तदनुकर्षादिति भावः। एतेन अकच्संनियोगशिष्ट एवायं दकार इत्युक्तं भवति। अयमपि प्रागिवादधिकारः। **अज्ञाते।** अज्ञातेऽर्थे विद्यमानात् सुबन्तात्स्वार्थे कप्रत्ययः स्यात्। अव्ययसर्वनाम्नां तिङन्तानां च टेः प्राक् अकच् स्यात्। तत्रापि ककारान्ताव्ययानां दकारोऽन्तादेशः स्यादित्यर्थः। **कस्यायमिति।** स्यादित्यर्थः। अज्ञातत्वाभिनयोऽयम्। अज्ञातोऽश्व इति विग्रहः। **उच्चकैरिति।** उच्चैरित्यव्ययस्य टेः प्रागकच्। **सर्वके विश्वक इति।** ननु 'अव्ययसर्वनाम्नाम्–' इति सूत्रे सुप इत्यनुवृत्तेः सुबन्तानां सर्वनाम्नां टेः प्रागकजिति फलितम्। तथा सति युवयोः आवयोः, युष्मासु अस्मासु, युष्माभिः अस्माभिः, इत्यत्र सुबन्तानां टेः प्रागकचि युवकयोः आवकयोः, युष्मकासु अस्मकासु, युष्मकाभिः अस्मकाभिः, इति न स्युः। युवयकोः आवयकोः, युष्मासकु अस्मासकु, युष्माभकिः अस्माभकिः, इति स्युः। यदि तु सुप इत्यननुवर्त्य प्रातिपदिकादित्येवानुवर्त्य प्रातिपदिकादेव सर्वनाम्नो टेः प्रागकजित्यर्थः स्यात्, तर्हि

वात्कः। 'सुपः' इत्यनुवर्तते तेन तिङन्तात्को न। **अव्ययसर्वनाम्नाम्। अनुवर्तत इति।** मण्डूकप्लुत्येति भावः। 'ङ्याप्प्रातिपदिकात्' 'सुपः' इति चानुवर्तत एव। **कस्य च दः। कान्ताव्ययस्येति।** सर्वनामग्रहणं तिङ्ग्रहणं च नेह संबध्यते, तयोः कान्तत्वासम्भवात्। न चाधोक् अधोगित्यादौ सम्भवोऽस्तीति वाच्यम्। कत्वस्यासिद्धत्वात्। यद्यपि शक्नोतेर्यङ्लुकि लङि तिपि अशाशक् इति सम्भवति, तथापि यङ्लुकोऽसार्वत्रिकत्वान्नेदृशं लक्ष्यमस्ति। छन्दसि क्वचिल्लक्ष्यसद्भावेऽपि 'सर्वे विधयश्छन्दसि वा विधीयन्ते' इति दत्वविधिर्न प्रवर्तत इति भावः।

आवकयोः। युष्मकासु। अस्मकासु। युष्मकाभिः। अस्मकाभिः। 'ओकार– इत्यादि' किम्–त्वयका। मयका। 'अकच्प्रकरणे तूष्णीमः कां वक्तव्यः' (वा ३२८५)। मित्त्वादन्त्यादचः परः। तूष्णीकामास्ते। 'शीले को मलोपश्च' (वा ३२८६)। तूष्णींशीलः तूष्णीकः। पचतकि। जल्पतकि धकित्। हिरकुत्।

त्वयका मयकेति न स्यात्। त्वकया मकया इति स्यादित्यत आह **ओकारेति**। वार्तिकमिदम्। ओकारादौ सकारादौ भकारादौ च सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु सुबन्तस्यैव सर्वनाम्नष्टेः प्रागकजित्यर्थः। इदं तु वार्तिकं युष्मदस्मन्मात्रविषयकमेव, भाष्ये तथैवोदाहृतत्वात्। अन्येषां तु सर्वनाम्नां प्रातिपदिकस्यैव टेः प्रागकच्, नतु सुबन्तानाम्। तेन सर्वकेणेत्यादि सिद्धम्। अत एव 'विभक्तौ परतो विहितः किमः कादेशः साकच्कार्थः। कः कौ के' इति भाष्यं सङ्गच्छते। **त्वयका मयकेति**। इह त्वया मयेति सुबन्तयोष्टेः प्रागकच्। प्रातिपदिकस्य टेः प्रागकचि तु त्वकया मकयेति स्यादिति भावः। **कां वक्तव्य इति**। काम् प्रत्यय इति वृत्तिस्तु चिन्त्या, भाष्ये प्रत्ययशब्दस्यादर्शनात्। किं तु मित्त्वादागम एवायम्। तदाह **मित्त्वादिति**। अकचोऽपवादः। **तूष्णीकामिति**। तूष्णीमित्यव्ययस्य ईकारादुपरि का इत्याकारान्त आगमः। **शील इति**। इदमपि वार्तिकम्। तूष्णीम् इत्यव्ययात् कप्रत्ययः स्याद् मकारस्य लोपश्च शीले गम्य इत्यर्थः। शीलं स्वभावः। **तूष्णीक इति**। मौनस्वभाव इत्यर्थः। भाष्ये दीर्घस्यैव प्रयोगदर्शनात् 'केऽणः' इति ह्रस्वो न भवति। 'अव्ययसर्वनाम्नाम्–' इत्यत्र तिङश्चेत्यनुवृत्तेः प्रयोजनमाह **पचतकीति**। पचतीत्यत्र इकारात् प्रागकच्। ककारादकार उच्चारणार्थः। अन्यथा इकारात्प्राग् अकच्प्रत्यये आद्गुणे पचतके इति स्यादिति भावः। **जल्पतकीति**। जल्पतीत्यस्य टेः प्रागकच्। **धकिदिति**। धिक् इत्यव्ययस्य टेः प्रागकच्, कस्य

ओकारेति। अकज्विधौ सुपोऽप्यनुवृत्त्या सर्वनाम्ना सुपा च टेर्विशेषणे कामचाराद् अव्यवस्थाप्रसङ्गे भाष्यकारवचनाद्व्यवस्थाश्रीयते। ओकारसकार इत्यादिसंकोचश्च युष्मदस्मन्मात्रविषयकः। तथैव भाष्ये उदाहृतत्वात्। अन्येषां त्वविशेषेण प्रातिपदिकस्यैव टेः प्रागकच्, न सुबन्तस्य। तेन सर्वकेण इमकेण भवकन्तमित्यादि सिध्यति। **त्वयका, मयकेति**। नन्वत्र सुपः प्रागकचि कृते, प्रत्यये परतस्त्वामादेशयोः सतोरपि 'योऽचि' इति यत्वं न स्यात्, विभक्तिपरत्वाभावादिति चेत्। मैवम्, अकृतव्यूहपरिभाषया अनित्यतामाश्रित्याकचः पूर्वमेव यत्वविधानात्। एवं युवकामावकामित्यत्राप्यकचः पूर्वमेव युवावादेशाविति बोध्यम्। **शीले क इति**। शीलं स्वभावो नियमश्च। **तूष्णीक इति**। 'केऽणः' इति ह्रस्वस्तु भाष्यकारप्रयोगाद् 'न कपि' इत्यत्र 'न' इति

२०२९ कुत्सिते । (५-३-७४) कुत्सितोऽश्वोऽश्वकः । २०३० संज्ञायां कन् । (५-३-७५) कुत्सिते कन्स्यात्तदन्तेन चेत्संज्ञा गम्यते । शूद्रकः । राधकः । स्वरार्थं वचनम् । २०३१ अनुकम्पायाम् । (५-३-७६) पुत्रकः । अनुकम्पितः पुत्र इत्यर्थः । २०३२ नीतौ च तद्युक्तात् । (५-३-७७) सामदानादिरूपा नीतिः । तस्यां गम्यमानायामनुकम्पायुक्तात्कप्रत्ययः स्यात् । हन्त ते धानकाः । गुडकाः । एहकि । अद्धकि । पूर्वेणानुकम्प्यमानात्प्रत्ययः ।

दश्च । हिरकुदिति । हिरुगित्यव्ययस्य टेः प्रागकच् कस्य दश्च । कुत्सिते । येन धर्मेण कुत्स्यते वस्तु तद्धर्मयुक्तार्थाभिधायिनः प्रातिपदिकात्स्वार्थे प्रत्ययः स्यादित्यर्थः । अव्ययसर्वनाम्नस्तु टेः प्रागकच्, कान्तस्याव्ययस्य दकारश्चान्तादेश इति बोध्यम् । 'तिङश्च' इत्यप्यनुवर्तते । अश्वक इति । धावनस्य असम्यक्त्वादश्वस्य कुत्सा बोध्या । सर्वनामाव्ययतिङन्तानि पूर्ववदुदाहार्याणि । 'याप्ये पाशप्' इति प्रवृत्तिनिमित्तकुत्सायामेव भवति । इदं तु सूत्रमप्रवृत्तिनिमित्तकुत्सायामपि इति भाष्ये स्पष्टम् । संज्ञायां कन् । 'कुत्सिते' इत्यनुवर्तते । तदाह कुत्सित इति । तदन्तेन चेदिति । कुत्साहेतुकसंज्ञाविषये कनिति यावत् । अनुकम्पायाम् । अनुकम्पायुक्तार्थाभिधायिनः स्वार्थे कः स्यादित्यर्थः । अनुकम्पा दया । नीतौ च तद्युक्तात् । सामदानादीति । आदिना भेददण्डयोर्ग्रहणम् । तद्युक्तादित्येतद्व्याचष्टे अनुकम्पायुक्तादिति । 'अव्ययसर्वनाम्नां' 'टेः प्राक्' इति चानुवर्तते, 'कस्य च दः' इति च । हन्त ते धानका इति । दास्यन्ते इति शेषः । हन्तेत्यव्ययमनुकम्पाद्योतकम् । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः । हन्तेत्यदन्तम् । हे पुत्रेति शेषः । अनुकम्पायुक्ता धाना इत्यर्थः । धानाशब्दात् कप्रत्यये 'केऽणः' इति ह्रस्वे कान्तात् टापि 'अभाषितपुंस्काच्च' इति विकल्पात् पक्षे इत्वाभावः । एहकीति । एहीति तिङन्तस्य टेः प्रागकच् । 'अव्ययसर्वनाम्नाम्–' इत्यत्र 'तिङश्च' इत्यनुवृत्तेरिति भावः ।

योगविभागाद्वा न भवतीत्याहुः । अकचो द्वितीयः अकार उच्चारणार्थ इति ध्वनयन्नुदाहरति पचतकीत्यादि । अनुकम्पायाम् । 'कृपा दयाऽनुकम्पा स्यात्' इत्यमरः । नीतौ च तद्युक्तात् । अनुकम्पायुक्तादिति । यद्यपि पुत्रादिरेव साक्षादनुकम्पायुक्तो न तु धानादिः, तथापि तद्द्वारा धानादीनामप्यस्त्यनुकम्पासम्बन्ध इति भावः । धानका इति । धानाशब्दः स्त्रीलिङ्गः । ततः कः 'केऽणः' इति ह्रस्वः । कप्रत्ययान्ताट्टाप् । अत्र 'प्रत्ययस्थात्–' इतीत्वेन भाव्यम् । प्रायेण तु धानका इति पठ्यते । तत्र लिङ्गातिवृत्तिर्द्रष्टव्येति हरदत्तः । 'कर्मव्यतिहारे णच् स्त्रियाम्' इति सिद्धे 'णचः स्त्रियामञ्' इति सूत्रे पुनः स्त्रीग्रहणेन ज्ञापितं 'स्वार्थिकाः प्रकृतिलिङ्गात्क्वचिदतिवर्तन्ते'

अनेन तु परम्परासंबन्धेऽपीति विशेषः। २०३३ बह्वचो मनुष्यनाम्नष्ठज्वा। (५-३-७८) पूर्वसूत्रद्वयविषये। २०३४ घनिलचौ च (५-३-७९) तत्रैव। २०३५ ठाजादावूर्ध्वं द्वितीयादचः। (५-३-८३) अस्मिन् प्रकरणे यष्ठोऽजादिप्रत्ययश्च तस्मिन्प्रत्यये परे प्रकृतेर्द्वितीयादच उर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तो देविकः, देवियः, देविलः, देवदत्तकः। अनुकम्पितो वायुदत्तो वायुकः। ठग्रहणमुको द्वितीयत्वे कविधानार्थम्। वायुकः। पितृकः। 'चतुर्थादच

अद्धकीति। अद्धीति तिङन्तस्य टेः प्रागकच्। पूर्वेणेति। 'अनुकम्पायास्तद्विषयत्वादिति भावः। परम्परासम्बन्धेऽपीति। पुत्रः साक्षादनुकम्प्यः तद्द्वारा धाना अनुकम्पायुक्ता इति भावः। बह्वचो मनुष्य। ठजिति च्छेदः। पूर्वसूत्रद्वयविषय इति शेषपूरणम्। 'अनुकम्पायाम्' इति 'नीतौ च तद्युक्तात्' इति च सूत्रद्वयविषये बह्वचो मनुष्यनाम्नः प्रातिपदिकात् ठज्वा स्यादित्यर्थः। पक्षे कः। घनिलचौ च। तत्रैवेति। शेषपूरणमिदम्। 'बह्वच-' इति पूर्वसूत्रविषये इ अर्थः। 'अनुकम्पायाम्' इति 'नीतौ च तद्युक्तात्' इति च सूत्रद्वयविषये बह्वचो मनुष्यनाम्नो घन् इलच् एतौ च प्रत्ययावित्यर्थः। ठाजादौ। अस्मिन्प्रकरण इति। 'अनुकम्पायाम्' 'नीतौ च' इत्यस्मिन्प्रकरण इत्यर्थः। संनिधानलभ्यमिदम्। सर्वमिति ऊर्द्ध्वग्रहणादिदं लभ्यते। अन्यथा 'आदेः परस्य' इति परिभाषया द्वितीयाचो यः परः तस्यादेरेव स्यादिति भावः। 'अजिनान्तस्योत्तरपदलोपश्च' इत्यतो 'लोप' इत्यनुवृत्तमिह कर्मसाधनमाश्रीयत इति मत्वाह लुप्यत इति। देविक इति। देवदत्तशब्दात् ठचि द्वितीयादचः परस्य दत्तशब्दस्य लोपे इकादेशे रूपम्। देविय इति। देवदत्तशब्दाद् घनि दत्तशब्दस्य लोपे इयादेशे रूपम्। देविल इति। इलचि दत्तशब्दस्य लोपः। देवदत्तक इति। कप्रत्यये सति ठाजाद्यभावान्न दत्तपदलोपः। वायुक इति। वायुदत्तशब्दाद् दत्तशब्दस्य लोपः। उकः परत्वात् ठस्य

इति। तेन धानका इत्यत्र पुंस्त्वमिति भावः। घनिलचौ च। चकाराद्यथाप्राप्तमिति काशिका। इह पूर्वसूत्रेणैव ठञ् विहितः। वावचनात्कोऽपि। चकारेण तु कस्याभ्यनुज्ञेति चिन्त्यम्। योगविभागे फलमपि चिन्त्यमिति हरदत्तः। ठाजादौ। समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। आदिग्रहणं चिन्त्यप्रयोजनम्, 'यस्मिन्विधिस्तदादौ-' इत्येव सिद्धमिति हरदत्तः। अस्मिन्प्रकरण इति। अनुकम्पायां नीतौ चेत्यर्थद्वयस्यैव प्रत्यासत्त्या बुद्धौ सन्निधानादिति भावः। ऊर्ध्वग्रहणमिह सर्वलोपार्थम्। अन्यथा 'आदेः परस्य' इत्यादेरेव स्यादित्यभिप्रेत्याह द्वितीयादच ऊर्ध्वं सर्वमिति। 'अजिनान्तस्य-' इत्यतो लोप इत्यनुवर्तनादाह लुप्यत इति। ननु ठग्रहणं व्यर्थम्, इकादेशे कृते

ऊर्ध्वस्य लोपो वाच्यः' (वा ३२१६)। अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः। 'अनजादौ च विभाषा लोपो वक्तव्यः' (वा ३२१७)। देवदत्तकः, देवकः। 'लोपः पूर्वपदस्य च' (वा ३२१८)। दत्तिकः, दत्तियः, दत्तिलः, दत्तकः। 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्यः' (वा ३२१९) देवदत्तः, दत्तः, देवः। सत्यभामा, भामा, सत्या। 'उवर्णाल्ल इलस्य च' (वा ३३०२)। भानुदत्तः, भानुलः। 'ऋवर्णादपि' (वा ९०२४)। सवित्रियः। सवितृलः।

'चतुर्थादनजादौ वा लोपः पूर्वपदस्य च।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च॥'

कः। नन्विकादेशे सति देविक इत्यत्र अजादित्वादेव सिद्धे ठग्रहणं व्यर्थमित्यत आह **ठग्रहणमिति**। कृत एव ठग्रहणे वायुशब्दात्परस्य दत्तशब्दस्य ठावस्थायामेव नित्यत्वाद् लोपे कृते ठस्य उकः परत्वात्कादेशः सिध्यति। अन्यथा इकादेशे कृते अजादित्वं पुरस्कृत्य दत्तशब्दस्य लोपे सति वायु इक इति स्थिते ठस्याभावात् कादेशो न स्यात्। नच स्थानिवत्त्वादिकस्य ठत्वं शङ्क्यम्, 'ठस्येकः' इत्यत्र स्थान्यादेशयोरकार उच्चारणार्थ इति पक्षे अल्विधित्वात् सन्निपातपरिभाषाविरोधाच्चेति भाष्ये स्पष्टम्। **पितृक इति**। पितृदत्तशब्दात् ठचि दत्तशब्दस्य लोपे उकः परत्वात् ठस्य कः। अथ

'चतुर्थादनजादौ वा लोपः पूर्वपदस्य च।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च॥'

इति वक्ष्यमाणश्लोकवार्तिकं भङ्क्त्वा चतुर्थादच इत्येतद्व्याचष्टे **चतुर्थादच ऊर्ध्वस्य लोपो वाच्य इति**। **बृहस्पतिक इति**। बृहस्पतिदत्तशब्दात् ठचि दत्तशब्दस्य लोपे ठस्य इकादेशः। द्वितीयादूर्ध्वत्वाभावादप्राप्ते वचनम्। अनजादौ चेति वार्तिकभागं व्याचष्टे **अनजादौ च विभाषा लोपो वक्तव्य इति**।

अजादावित्येव सिद्धत्वादत आह **ठग्रहणमुको द्वितीयत्व इति**। **वायुक इति**। वायुशब्दात्परस्य दत्तशब्दस्य ठावस्थायामेव लोपे 'इसुसुक्तान्तात्–' इति कः। किंच, पृथक् ठग्रहणस्य प्रयोजनान्तरमप्यस्ति। यदा तु चित्रगुप्तप्रभृतिभ्यष्ठच्, तदोगन्तत्वात् कादेशप्राप्त्या प्रथममिकादेशस्याऽसंभवेनाजदिलक्षणो लोपो न स्यादिति तदर्थमपि ठग्रहणम्। तेन ठावस्थायामुत्तरपदलोपे कादेशस्यासम्भवादिकादेशे चित्रिक इति रूपं सिध्यतीति बोध्यम्। 'चतुर्थादनजादौ च' इति वक्ष्यमाणमेव श्लोकं भङ्क्त्वा व्याचष्टे **चतुर्थादच ऊर्ध्वस्येति**। **अनजादाविति**। हलादावित्यर्थः 'अस्मिन् प्रकरणे'

---

१ 'च' इति क।

(वा ३२९९—३३००) । २०३६ **प्राचामुपादेरडज्वुचौ च ।** (५-३-८०) उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये अडच् वुच् एतौ स्तः। चाद्यथाप्राप्तम् । प्राचां ग्रहणं पूजार्थम् । अनुकम्पित उपेन्द्रदत्त उपडः, उपकः,

---

अनजादौ चेति पाठे विभाषेति भाष्यलब्धम्, तत्र देवदत्तको देवक इति कप्रत्यये दत्तलोपविकल्पोदाहरणात् । **लोपः पूर्वपदस्य चेति ।** विभाषेति शेषः । 'अनजादौ' इति तु नात्र संबध्यते । तदाह **दत्तिक इत्यादि ।** ठचि घनि इलचि के च रूपम् । अप्रत्यये तथैवेष्ट इति वार्तिकभागं व्याचष्टे **विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्य इति । दत्तः, देव इति ।** देवदत्तशब्दात् ठाजादिप्रत्ययस्याप्यभावे पूर्वोत्तरपदयोः क्रमेण लोपे रूपम् । **उवर्णादिति ।** ल इति लोपस्य पूर्वाचार्यसंज्ञा । उवर्णात्परस्य इलचो लोपः स्यादित्यर्थः । 'आदेः परस्य' इति इकारस्य लोपः । चकारेण ठाजादौ द्वितीयादच ऊर्ध्वं लोपः सूत्रसिद्धः अनूद्यते । **ऋवर्णादपीति ।** ऋवर्णादपि परस्य इलच आदेर्लोपः स्यादित्यर्थः । **सवित्रियः सवितृल इति ।** घनि इलचि च रूपम् । वस्तुतस्तु ऋवर्णादपीति भाष्यादृष्टत्वादुपेक्ष्यम् । तदेवं व्याख्यातं वार्तिकं समस्तं पठति **चतुर्थादित्यादि । प्राचामुपादेरडज्वुचौ च । पूर्वविषय इति ।** 'बह्वचो मनुष्यनाम्नः–' इति सूत्रविषये इत्यर्थः । **चाद्यथाप्राप्तमिति ।** ठच्, घन्, इलकेत्यर्थः । ठज्वेत्यतो वेत्यनुवृत्त्यैव सिद्धे 'प्राचाम्' ग्रहणं व्यर्थमित्यत आह **प्राचांग्रहणमिति । उपड इति ।** उपेन्द्रदत्तशब्दाद् अडचि द्वितीयं सन्ध्यक्षरमिति वक्ष्यमाणेन एकारादेर्लोप इति केचित् । 'नेन्द्रस्य परस्य' इति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यापेक्षया अन्तरङ्गस्याप्येकादेशस्य पूर्वमप्रवृत्तेरिकारादिलोप इति शब्देन्दुशेखरे । **उपक इति ।** वुचि

इत्येव । **लोपः पूर्वपदस्य चेति ।** ठाजादावनजादौ चेति बोध्यः । 'अप्रत्यये तथैवेष्टः' इत्येतद्व्याचष्टे **विनापि प्रत्ययमिति । ल इलस्य चेति ।** इलस्य लः लोप इत्यर्थः, तत्र 'आदेः परस्य' इति इकारलोपो बोध्यः । **प्राचामुपादेः ।** 'बह्वचो मनुष्य–' इत्याद्यनुवर्तते । **उपेन्द्रदत्त इति ।** ननु कृतसन्धेरुपेन्द्रशब्दादेकादेशस्य पूर्वान्ततया ग्रहणाद् 'उपादेः' इति विधीयमानौ प्रत्ययौ स्तां नाम, लोपस्तु नकारादेरेव स्यात् । ततश्च उपक उपड इति रूपे न स्याताम् । किं तु उपयक उपयड इति रूपे स्याताम् । एवं घनिलचूठच्स्वपि दोष एव । तस्मादिहैव 'द्वितीयं संध्यक्षरं चेत्' इति वार्तिकं कुतो नोक्तमिति चेत् । अत्राहुः—प्रकारान्तरेण निर्वाहसम्भवान्नोक्तम् । तथाहि—आद्गुणे कृते 'द्वितीयं संध्यक्षरम्–' इत्यादिना अकारस्यापि लोपप्रसक्त्या गुणात्पूर्वमेवाकृतव्यूहपरिभाषया प्रत्ययः । न च परिनिष्ठितत्वपरेण समर्थग्रहणेन

उपियः, उपिलः, उपिकः, उपेन्द्रदत्तकः । षड् रूपाणि । २०३७ **जातिनाम्नः कन्** । (५-३-८१) 'मनुष्यनाम्नः' इत्येव । जातिशब्दो यो मनुष्यनामधेयस्तस्मात्कन्स्यादनुकम्पायां नीतौ च । सिंहकः । शरभकः । रासभकः । 'द्वितीयं सन्ध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः' (वा ३३०३)। कहोडः, कहिकः। 'एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः' (वा ३३०६)। वागाशीर्दत्तो वाचिकः । कथं

अकादेशे एकारादिलोपे रूपम् । **उपिय इति** । घनि रूपम् । **उपिल इति** । इलचि रूपम् । **उपिक इति** । ठचि रूपम् । **उपेन्द्रदत्तक इति** । कप्रत्यये रूपम् । ठाजाद्यभावाल्लोपो न । **जातिनाम्नः कन्** । **जातिशब्दो य इति** । यो जातिप्रवृत्तिनिमित्तकः प्रसिद्धः सन् मनुष्यनामधेयभूतः स इत्यर्थः । 'अनुकम्पायाम्' इति 'नीतौ' इति च सूत्रद्वयविहितस्यापवादः । **द्वितीयं संध्यक्षरं चेदिति** । 'एचः संध्यक्षराणि' इति प्राचामाचार्याणां प्रवादः । **कहोड इति** । ऋषिविशेषस्य नामेदम् । अत्र द्वितीयोऽच् संध्यक्षरम्, तदादेर्लोपः । नतु तत्पूर्वस्यैव । **एकाक्षरेति** । व्यञ्जनसहितम् एकोऽच् एकाक्षरम्, एकाच्कमिति यावत् । तथाविधं पूर्वपदं येषां पदानां तानि एकाक्षरपूर्वपदानि, तेषां मध्ये उत्तरभूतानि पदानि यावन्ति तेषां लोपः स्यादित्यर्थः । इह उत्तरपदशब्दो यौगिकः, नतु समासस्य चरमावयवे रूढो व्याख्यानात् । 'द्वितीयादच ऊर्ध्वम्' इत्यनेन द्वितीयाज्विशिष्टस्य लोपे अप्राप्ते वचनमिदम् । **वागशीर्दत्त इति** । वाचि आशीः यस्य नतु मनस्येव स वागाशीः । तेन दत्त इति विग्रहः । यद्वा आशासनमाशीः, वाचा आशीः वागाशीः । 'कर्तृकरणे कृता–' इति समासः । तया वागाशिषा दत्त इति विग्रहः । वाक्करणकाशासनेन दत्त इत्यर्थः । **वाचिक इति** । वागशीर्दत्तशब्दात् ठचि वागित्येकाक्षरपूर्वपदात्परयोराशीर्दत्तशब्दयोर्लोपे सति अन्तर्वर्तिविभक्त्या पदत्वमाश्रित्य प्रवृत्तकुत्वजश्त्वयोरिकाश्रयभत्वेन पदत्वबाधान्निवृत्तौ वाचिक इति रूपमिति केचित् । वस्तुतस्तु ठचि

सौतिथितिरित्यत्रेव परिभाषाबाधः शङ्क्यः, 'प्राग्दिशः–' इति सूत्रे 'समर्थग्रहणं निवृत्तम्' इत्युक्तत्वात् । 'अकृतसंधेः' इति प्रागुक्तज्ञापकबलेन समर्थग्रहणप्रत्याख्यानपक्षेऽपि ज्ञापकस्य विशेषपरत्वाश्रयणादिति । उपेन्द्र उपगुरुरुपकर्तेत्यादिगूपडादीनां पञ्चानां रूपाणां साम्येऽपि सैन्धवादिष्विव प्रकरणादिना विशेषोऽध्यवसेयः । **जातिनाम्नः** । ये शब्दा जात्यन्तरे प्रसिद्धाः, मनुष्येषु नामत्वेन विनियुक्तास्त इहोदाहरणम् । **द्वितीयमित्यादि** । एचः संध्यक्षरमिति प्राचां संज्ञा । **वागाशीरिति** । वाचि आशीर्यस्येति विग्रहः । **वाचिक इति** । यद्यत्र द्वितीयादच ऊर्ध्वस्य लोपः स्यात् तदा वाच् आ इक इति स्थिते 'यस्येति च' इत्याकारस्य लोपे तस्य स्थानिवत्त्वादाका-

षडङ्गुलिदत्तः षडिक इति। 'षषष्ठाजादिवचनात्सिद्धम्' (वा ३३०७)। २०३८ **शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्।** (५-३-८४) एषां मनुष्यनाम्नां ठाजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात्। पूर्वस्यापवादः। अनुकम्पितः शेवलदत्तः शेवलिकः, शेवलियः, शेवलिलः। सुपरिकः। विशालिकः।

इकादेशात् प्राक् ठावस्थायामेव उत्तरपदलोपे कर्तव्ये असिद्धत्वान्न पूर्वं कुत्वादि-प्रवृत्तिरित्याहुः। यद्यपि द्वितीयादच ऊर्ध्वस्य शीर्दत्तशब्दस्य लोपे वाग् इक इति स्थिते 'यस्येति च' इत्याकारलोपे उक्तरीत्या कुत्वजश्त्वयोः निवृत्तौ वाचिक इति सिध्यति। तथापि आकारलोपस्य स्थानिवत्त्वेन आकारान्तस्य इकमाश्रित्य भत्वे सति आकारान्तनिष्ठभत्वेन चकारान्तनिष्ठपदत्वस्य अव्याघातात् कुत्वजश्त्वयोः वागिक इति स्यात्। उत्तरपदलोपे तु अज्झलादेशत्वेन स्थानिवत्त्वाभावात्तुल्या-वधिकया भसंज्ञया 'सुप्तिङन्तम्–' इति पदसंज्ञा बाध्यते, एकसंज्ञाधिकारे परत्वादिति भावः। **कथमिति** । अत्रापि अङ्गुलिदत्तशब्दस्य लोपे सति इकप्रत्ययाश्रित-भत्वेन पदत्वाभावाद् जश्त्वं दुर्लभमिति प्रश्नः। **षष इति** । षष्शब्दस्य पूर्वपदत्वे 'ठाजादौ–' इति सूत्रसिद्धो द्वितीयादच ऊर्ध्वस्यैव लोपः, न त्वयमुत्तरपदलोप इति वचनात् षडिक इति सिद्धमित्यर्थः। एवं च षडङ्गुलिदत्त इत्यत्र ङकाराकारादूर्ध्वस्य लोपे सति ङकाराकारस्य 'यस्येति च' इति लोपे सति तस्य स्थानिवत्त्वेन अकारा-न्तस्य इकमाश्रित्य भत्वे सति तेन अकारान्तनिष्ठेन षकारान्तस्य पदत्वाव्याघाताज्ज-श्त्वं निर्बाधमिति भावः। स्पष्टं चेदं 'स्वादिषु–' इति सूत्रे भाष्ये। **शेवल।** **एषामिति।** शेवल, सुपरि, विशाल, वरुण, अर्यमन् एतत्पूर्वपदकानामित्यर्थः। **पूर्वस्येति।** 'ठाजादौ–' इत्यस्येत्यर्थः। **शेवलिक इति** । शेवलदत्तशब्दात् ठचि तृतीयादचः

रान्तस्य भत्वे अन्तर्वर्तिनीं विभक्तिमाश्रित्य चकारान्तस्य पदत्वेन कुत्वजश्त्वयोः सतोर्वागिक इति स्यात्। उत्तरपदलोपे तु अज्झलादेशत्वेन स्थानिवत्त्वाभावात्तुल्या-वधिकतया 'यचि भम्' इति भसंज्ञया 'सुप्तिङन्तम्–' इति पदसंज्ञा एकसंज्ञाधिकारा-त्परत्वाद्बाध्यते। 'स्वादिषु–' इति पदसंज्ञा तु न शङ्कनीयैव, 'यचि भम्' इति भसंज्ञाया-स्तदपवादत्वात्। **कथमिति** । अत्राप्युत्तरपदलोपे जाते जश्त्वं दुर्लभमिति प्रश्नः। **षष इति** । अत्र सौत्र एव लोप इष्यते, न त्वौपसंख्यानिक इत्यर्थः। **शेवलसुपरि।** **शेवलिक इति** । 'बह्वचो मनुष्यनाम्नः–' इति ठच्। घनिलचोस्तु शेवलियः। शेवलिलः। 'शेवलादीनां तृतीयाल्लोपो य उच्यते स च कृतसंधीनां वक्तव्यः। सुप-र्याशीः, सुपरिकः, सुपरियः, सुपरिल इति भाष्ये स्थितम्। कैयटेन तु सुपरिक इति प्रतीकमुपादाय संहिताकार्ये तु कृते लोपे सति सुपर्यिक इति स्यादिति व्याख्यातम्।

वरुणिकः । अर्यमिकः । **२०३९ अजिनान्तस्योत्तरपदलोपश्च ।** (५-३-८२) अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन्, तस्य चोत्तरपदलोपः । अनुकम्पितो व्याघ्राजिनो व्याघ्रकः । सिंहकः । **२०४० अल्पे ।** (५-३-८५) अल्पं तैलं तैलकम् । **२०४१ ह्रस्वे ।** (५-३-८६) ह्रस्वो वृक्षो वृक्षकः । **२०४२ संज्ञायां कन् ।** *(५-३-८७) ह्रस्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् ।* पूर्वस्यापवादः । वंशकः । वेणुकः । **२०४३ कुटीशमीशुण्डाभ्यो रः ।** (५-३-८८) ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः । **२०४४ कुत्वा डुपच् ।** (५-३-८९) ह्रस्वा कुतूः कुतुपः । 'कुतूः कृत्तिस्नेहपात्रं ह्रस्वा सा कुतुपः पुमान् ।' इत्यमरः । **२०४५ कासूगोणीभ्यां ष्टरच् ।** (५-३-९०) आयुधविशेषः कासूः । ह्रस्वा सा कासूतरी । गोणीतरी । **२०४६ वत्सोक्षाश्वर्षभेभ्यश्च**

परस्य दत्तशब्दस्य लोपः । **शेवलिल इति ।** इलचि रूपम् । **सुपरिक इति ।** सुपरिदत्तशब्दात् ठचि दत्तशब्दलोपः । **विशालिक इति ।** विशालदत्तशब्दात् ठचि रूपम् । **वरुणिक इति ।** वरुणदत्ताद् वरुणिकः । **अर्यमिक इति ।** अर्यमदत्ताद् अर्यमिकः । 'अकृतसंधीनामेषाम्–' इति वार्तिकं भाष्ये स्थितम् । तेन सुपर्याशीर्दत्तः सुपरिक इत्यादि सिध्यति । **अजिनान्तस्य । व्याघ्रक इति ।** व्याघ्राजिन इति कस्यचिन्मनुष्यस्य नाम । तस्मात् कनि अजिनस्य लोपः । **सिंहक इति ।** सिंहाजिनशब्दात् कनि अजिनस्य लोपः । **अल्पे ।** अल्पत्वविशिष्टे वर्तमानाद् यथाविहितं प्रत्ययाः स्युः । **तैलकमिति ।** सर्वकम्, उच्चकैः, पचतकीत्याद्यप्युदाहार्यम् । **ह्रस्वे ।** ह्रस्वत्वविशिष्टे वर्तमानाद्यथाविहितं प्रत्यया इत्यर्थः । अल्पत्वं महत्त्वप्रतिद्वन्द्वि, ह्रस्वत्वं तु दीर्घत्वप्रतिद्वन्द्वीति भेदः । **संज्ञायां कन् । वंशक इति ।** ह्रस्वस्य वेणुजातिविशेषस्य नाम । **कुटीशमी ।** ह्रस्व इत्येव । **कुटीर इति ।** 'स्वार्थिकाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति पुंस्त्वम् । एवं शमीरः, शुण्डार इत्यपि । ह्रस्वा शमी शुण्डा चेत्यर्थः । **कुत्वा डुपच् । कुतुप इति ।** कुतूशब्दाद् डुपचि डित्त्वाट्टिलोपः । तत्रापि कुटीरादिवत् स्त्रीत्वमपहाय पुंस्त्वमेव । तत्रामरकोशमपि प्रमाणयति **कुतूः कृत्तीति । कासूगोणीभ्यां ष्टरच् ।** ह्रस्व इत्येव । **कासूतरीति ।** षित्त्वाद् ङीषिति भावः । 'कासुर्बुद्धे कुवाच्येऽस्त्रे' इति नानार्थरत्नमालायाम् ।

अयं भावः—संहिताकार्ये यणि कृते तृतीयादच ऊर्ध्वलोपे सति शीर्दत्त इत्यस्यैव लोपः स्यात्, आकारस्य तु 'यस्येति च' इत्यनेन स्यात् । तथाच स्थानिवद्भावाद्यणो निवृत्तिर्न भविष्यतीति । **ह्रस्वे ।** तैलादौ ह्रस्वदीर्घादिव्यवहाराभावाद् वृक्षक इत्युदाहृतम् । यद्यपि 'अल्पे' इत्येनैवेदं रूपं सिध्यति, तथापि शाब्दबोधे विशेषोऽस्तीत्याहुः । **कुटीर इति ।**

तनुत्वे। (५-३-९१) वत्सतरः। द्वितीयं वयः प्राप्तः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तिनिमित्ततनुत्व एवायम्। २०४७ **किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्।** (५-३-९२) अनयोः कतरो वैष्णवः। यतरः। ततरः। महाविभाषया कः। यः। सः। २०४८ **वा बहूनां जातिपरिप्रश्ने**

एवं गोणीतरीति। **वत्सोक्ष।** ह्रस्व इति निवृत्तम्। वत्स, उक्षन्, अश्व, ऋषभ एभ्यस्तनुत्वविशिष्टवृत्तिभ्यः ष्टरच्प्रत्ययः स्यादित्यर्थः। तनुत्वं न्यूनत्वम्। वत्सः प्रथमवयाः। वयसश्च प्रथमस्य तनुत्वम् उत्तरवयःप्राप्त्या ज्ञेयम्. तदाह **द्वितीयं वयः प्राप्त इति। उक्षतर इति।** उक्षा तरुणो बलीवर्दः। तारुण्यस्य तनुत्वं तृतीयवयःप्राप्त्या ज्ञेयम्। **अश्वतर इति।** गर्दभेन अश्वायामुत्पादितः अश्वतरः। अश्वतरत्वं च अश्वत्वापेक्षया न्यूनमेव। **ऋषभतर इति।** ऋषभो भारस्य वोढा। तस्य तनुत्वं भारोद्वहने मन्दशक्तिता, तद्वानित्यर्थः। ननु कृशो वत्सो वत्सतर इति कुतो नेत्यत आह **प्रवृत्तिनिमित्ततनुत्वे एवायमिति।** एतच्च भाष्ये स्पष्टम्। **किंयत्तदो निर्धारणे।** किम्, यत्, तद् एषां समाहारद्वन्द्वात्पञ्चमी। द्वयोरेकस्य निर्धारणे गम्ये निर्धार्यमाणवाचिभ्यः किमादिभ्यो डतरच् स्यादित्यर्थः। **अनयोः कतरो वैष्णव इति।** को वैष्णव इत्यर्थः। अत्र वैष्णवत्वगुणेन किंशब्दार्थ इदमर्थाभ्यां निर्धार्यते। अतः किंशब्दाद् डतरचि डित्वाट्टिलोपे कतर इति भवति। एवं यद्शब्दात् तद्शब्दाच्च डतरचि टिलोपे यतरः, ततर इति भवति। 'निर्धार्यमाणवाचिभ्यः' इति किम्? कयोरन्यतरो देवदत्तः, ययो-

---

'स्वार्थिकाः प्रकृतितो लिङ्गमतिवर्तन्ते' इति पुँल्लिङ्गताऽत्र संगच्छते। **वत्सोक्षाश्व।** तनुत्वं न्यूनता। सा च प्रवृत्तिनिमित्तस्य, प्रत्यासत्तेः। क्वचित्तु तत्सहचरितधर्मान्तराणाम्। तत्र वत्सः प्रथमवयाः। वयसश्च प्रथमस्य न्यूनत्वं नाम वयोऽन्तरप्राप्तिस्तदाह **द्वितीयमिति।** तरुण उक्षा। तारुण्यस्य च तनुत्वं तृतीयवयःप्राप्तिः। अश्वायामश्वादुत्पन्नोऽश्वः। अश्वत्वं च जातिः। तत्सहचरितस्याश्वायामश्वादुत्पन्नत्वधर्मस्य न्यूनत्वमन्यपितृकतात्वात्। तथा च गर्दभेनाश्वायामुत्पादितोऽश्वतरः। ऋषभो भारस्य वोढा। तस्य तनुत्वं भारोद्वहने मन्दशक्तिता। तद्वांस्तु ऋषभतरः। **किंयत्तदो। कतरो वैष्णव इति।** गुणेन निर्धारणमिदम्। क्रियासंज्ञाभ्यां निर्धारणे तु कतरोऽध्यापकः' कतरो देवदत्त इत्यादि ज्ञेयम्। ननु द्वयोरेकस्य निर्धारणे डतरच्चेद् भवति, तर्हि 'कयोरन्यतरो देवदत्तः' 'ययोरन्यतरः' 'तयोरन्यतरः' इत्यत्रापि प्राप्नोति। अत्राहुः— निर्धार्यमाणवाचिभ्य एवायं प्रत्ययोऽभिधानस्वाभाव्यात्। तेनात्र नातिप्रसङ्ग इति। 'एकस्येति किम्, 'द्वयोः' इति कर्मणि षष्ठी मा भूत्। तथा हि सति 'अस्मिन् संघे कौ

डतमच् । (५-३-९३) बहूनां मध्ये निर्धारणे डतमज्वा स्यात् । 'जातिपरिप्रश्ने' इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः । महाविभाषया कः, यः, सः । किमोऽस्मिन्विषये

रन्यतरः, तयोरन्यतर इत्यत्र किमादिभ्यो न भवति । **वा बहूनाम्** । 'किंयत्तद्–' इति, 'निर्धारणे' इति, 'एकस्य' इति चानुवर्तते । 'बहूनाम्' इति निर्धारणे षष्ठी । तदाह **बहूनां मध्ये निर्धारणे डतमज्वा स्यादिति** । मध्ये इत्यनन्तरमेकस्येति शेषः । जातिपरिप्रश्ने गम्ये इत्यपि बोध्यम् । जातिश्च परिप्रश्नश्चेति समाहारद्वन्द्वः । जातौ परिप्रश्ने च गम्ये इत्यर्थः । तत्र जाताविति किंयत्तदां सर्वेषामेव विशेषणम् । परिप्रश्नग्रहणं तु किम एव विशेषणम्, तच्च क्षेपार्थकस्य किमो निवृत्त्यर्थम् । यत्तदोस्तु परिप्रश्नग्रहणं न विशेषणम्, असंभवादिति वृत्तौ स्पष्टम् । अत्र वार्तिकम्–'किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम्' इति 'पूर्वसूत्रे द्वयोरिति, अत्र सूत्रे जातिपरिप्रश्ने इति च न कर्तव्ये इति भावः' इति कैयटः । तदाह **जातिपरिप्रश्न इति प्रत्याख्यातमाकर इति** । क्षेपार्थस्य त्वनभिधानान्न ग्रहणमिति तदाशयः । पूर्वसूत्रे द्वयोरिति चेति बोध्यम् । तथाच 'कतम एषां पाचकः शूरो देवदत्तः' इत्यत्र कियागुणसंज्ञाभिरपि निर्धारणे डतमच् भवति । 'एषां कतरो देवदत्तः' इत्यत्र बहूनामेकस्य निर्धारणे डतरच् भवति । अत एव 'प्रत्ययः' इति सूत्रभाष्ये 'बहुष्वासीनेषु कश्चित् कंचित्पृच्छति कतरो देवदत्तः' इति प्रयोगः संगच्छते । **कतमो भवतां कठ इति** । 'गोत्रं च चरणैः सह' इति कठस्य जातित्वम् । **वाग्रहणमकजर्थमिति** । अन्यथा महाविभाषया अपवादेन मुक्ते उत्सर्गस्याप्रवृत्तेरुक्तत्वादकच् न स्यादिति भावः । नच 'अव्ययसर्वनाम्नाम्–' इत्यस्याधिकारत्वात् तदनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमेवेति वाच्यम्, इहैव सूत्रे तदनुवृत्तिः, नतु

देवदत्तयज्ञदत्तौ' इत्यादावेव स्यात् । **वा बहूनाम्** । 'किंयत्तदः' इति वर्तते । जातिश्च परिप्रश्नश्चेति समाहारद्वन्द्वः । अत्र जाताविति सर्वेषां विशेषणम् । षष्ठीसमासे तु गुणभूतस्य जातिग्रहणस्य निष्कृष्य संबन्धोऽनुपपन्नः स्यात् । परिप्रश्नग्रहणं तु किम एव विशेषणम् । तच्च क्षेपनिवृत्त्यर्थम् । तत्र जातिग्रहणं प्रायोऽभिप्रायम् । क्रियागुणसंज्ञाभिरपि निर्धारणे डतमच इष्टत्वात् । तथा पूर्वसूत्रे द्वयोरिति प्रायोऽभिप्रायम् । बहूनां निर्धारणेऽपि डतरच इष्टत्वात् । तथा च वार्तिकम्—'किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम्' इति । अत्र कैयटः—'द्वयोः' इति, 'जातिपरिप्रश्ने' इति च न कर्तव्यमिति भाव इति । तदेतदाह **प्रत्याख्यातमाकर इति** । **कठ इति** । कतमो भवतामध्यापकः शूरो देवदत्तो वेत्यप्युदाहर्तव्यम् । **यकः** । **सक**

डतरजपि । कतरः । २०४९ एकाच्च प्राचाम् । (५-३-९४) डतरच् डतमच स्यात् । अनयोरेकतरो मैत्रः । एषामेकतमः । २०५० अवक्षेपणे कन् । (५-३-९५) व्याकरणकेन गर्वितः । येनेतरः कुत्स्यते तद्विहोदाहरणम् । स्वतः कुत्सितं तु 'कुत्सिते' (सू २०२१) इत्यस्य ।

इति तद्धितेषु प्रागिवीयप्रकरणम् ।

अथ तद्धितेषु स्वार्थिकप्रकरणम् । ४१ ।

२०५१ इवे प्रतिकृतौ । (५-३-९६) कन्स्यात् । अश्व इव प्रतिकृतिः

पूर्वसूत्रे इति ज्ञापनार्थत्वात् । अतो डतरज्विषये नाकच् । **महाविभाषयेति** । अत एव 'अवक्षेपणे' इति सूत्रे भाष्ये 'क एतयोरर्थयोर्विशेषः' इति प्रयोगः संगच्छते । समबादयः प्रागवक्षेपणकनो नित्याः प्रत्ययाः' इति तु प्रायिकमिति भावः । **किमोऽस्मिन्निति** । 'वा बहूनाम्–' इति प्रकृतसूत्रविषयेऽपीत्यर्थः, बहुष्वासीनेषु इत्याद्युदाहृतभाष्यप्रयोगादिति भावः । **एकाच्च प्राचाम्** । शेषपूरणेन सूत्रं व्याचष्टे—**डतरच् डतमच्च स्यादिति** । पूर्वसूत्रद्वयविषये इति शेषः । 'महाविभाषयैव सिद्धे प्राचांग्रहणं न कर्तव्यम्' इति भाष्यम् । अत एव नाकजर्थं तत् । **अवक्षेपणे कन्** । **व्याकरणकेन गर्वित इति** । व्याकरणं हि स्वतो न कुत्सितम्, किं तु अधीतं सदध्येतृकुत्साहेतुभूतगर्वमावहदवक्षेपणम् । नन्ववक्षेपणं कुत्सा, तत्कथं व्याकरणमवक्षेपणं स्यात्, 'कुत्सिते' इत्यनेन गतार्थं चेदमित्यत आह **येनेतर इति** । अवक्षेपणशब्दः करणे ल्युडन्त इति भावः ।

इति तद्धितेषु प्रागिवीयप्रकरणम् ।

अथ तद्धिते स्वार्थिकप्रकरणं निरूप्यते । **इवे प्रतिकृतौ** । **कन् स्यादिति** । 'अवक्षेपणे कन्' इत्यतः तदनुवृत्तेरिति भावः । इवार्थ उपमानत्वम् । तद्वति वर्तमानात्प्रातिपदिकात्कन् स्यात्प्रतिकृतिभूते उपमेये इति फलितम् । मृदादिनि-

---

इति । कक इति तु नोक्तम्, अकच्सहितस्यापि 'किमः कः' इत्ययमादेश इति व्याख्यातत्वात् । **महाविभाषयेति** । 'प्राग्दिशः–' इति सूत्रे समर्थप्रथमग्रहणयोर्निवृत्तत्वेऽपि वाग्रहणमनुवर्तते इत्युक्तत्वादिति भावः । 'किंयत्तदः–' इति सूत्रे द्वयोरित्यस्य प्रत्याख्यानादाह **किमोऽस्मिन्निति** । **एकाच्च** । प्राचांग्रहणं पूजार्थम् । विकल्पोऽनुवर्तत एव । **अवक्षेपणे कन्** । कुत्सिते तु कः । स्वरे विशेषः । **येनेतर इति** । अवक्षिप्यते येनेत्यवक्षेपणशब्दः करणे ल्युडन्त इति भावः ।

इति तत्त्वबोधिन्यां प्रागिवीयप्रकरणम् ।

अश्वकः। 'प्रतिकृतौ' किम्—गौरिव गवयः। **२०५२ संज्ञायां च। (५-३-९७)** इवार्थे कन् स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थमारम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः। **२०५३ लुम्मनुष्ये। (५-३-९८)** 'संज्ञायां च' इति विहितस्य कनो लुप्स्यान्मनुष्ये वाच्ये। 'चञ्चा तृणमयः पुमान्'। चञ्चेव मनुष्यश्चञ्चा। वध्रिका। **२०५४ जीविकार्थे चापण्ये। (५-३-९९)** जीविकार्थं यदविक्रीयमाणं तस्मिन्वाच्ये कनो लुप्स्यात्। वासुदेवः। शिवः। स्कन्दः। देवलकानां

मिता प्रतिमा प्रतिकृतिः। **अश्वक इति**। प्रतिकृतेः स्त्रीत्वेऽपि 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति पुँल्लिङ्गत्वम्। **संज्ञायां च**। कनिति शेषः। **समुदायश्चेदिति**। प्रकृतिप्रत्ययसमुदायश्चेत्प्रकृत्यर्थसदृशस्य संज्ञेत्यर्थः। पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह **अप्रतिकृत्यर्थमारम्भ इति**। तथा च 'प्रतिकृतौ' इति निवृत्तम्। 'इव' इति त्वनुवर्तत एव। तदाह **अश्वसदृशस्येति**। अश्वसदृशस्य अमनुष्यस्य कस्यचित्संज्ञैषा। अश्वसदृशोऽयमश्वकसंज्ञक इति बोधः। **लुम्मनुष्ये। संज्ञायां चेति विहितस्येति**। ननु 'इवे प्रतिकृतौ' इति विहितस्य, मनुष्यस्य प्रतिकृतित्वासंभवादिति भावः। चञ्चेव मनुष्यः चञ्चा इत्युदाहरणं वक्ष्यन् चञ्चाशब्दं व्याचष्टे **चञ्चा तृणमयः पुमानिति। चञ्चेति**। चञ्चातुल्यो मनुष्योऽयं चञ्चासंज्ञक इत्यर्थः। **वध्रिकेति**। वध्रिका चर्ममयी प्रतिकृतिः। तत्तुल्यो मनुष्योऽयं वध्रिकासंज्ञक इत्यर्थः। लुपि युक्तवत्त्वात् स्त्रीत्वम्। वचनं तु विशेष्यवदेव, 'हरीतक्यादिषु व्यक्तिः' इत्युक्तेः। तेन चञ्चे इव मनुष्यौ इत्यत्र चञ्चा इति न भवति। **जीविकार्थे चापण्ये**। पण्यं विक्रीयमाणम्। तदाह **अविक्रीयमाणमिति। वासुदेव इति**। वासुदेवतुल्या जीविकार्था अविक्रेया प्रतिकृतिरि-

अश्वक इति। अश्वशब्दोऽश्वे एव वर्तते, कन्प्रत्ययस्तु प्रतिकृतिरूपे सदृश इति मायं स्वार्थिक इत्येके। अन्ये तु सादृश्यनिबन्धनादभेदोपचाराद्गौर्वाहीक इतिवदश्वशब्द एव प्रतिकृतौ वर्तते। प्रत्ययस्तु तस्यैवौपचारिकत्वस्य बोधक इत्याहुः। प्रतिकृतौ किम्, गौरिव गवयः। तृणचर्मकाष्ठादिनिर्मितं प्रतिमापरपर्यायं वस्तु प्रतिकृतिः। गवयस्तु नैवम्। **समुदायश्चेदिति**। प्रकृतिप्रत्ययसमुदायश्चेदश्वसदृशस्य संज्ञेत्यर्थः। **चञ्चा। वध्रिकेति**। लुपि युक्तवद्भावात् स्त्रीलिङ्गता। **वासुदेवः। शिव इत्यादि**। याः प्रतिमाः प्रतिगृह्य गृहाद् गृहं भिक्षमाणा अटन्ति ता एवमुच्यन्ते। देवलका अपि। त एव भिक्षवोऽभिप्रेताः। यास्त्वायतनेषु प्रतिष्ठाप्यन्ते पूज्यन्ते च तासूत्तरसूत्रेण लुप्। तदुक्तम्—'अर्चासु पूजनार्हासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिषु' इति। अर्चासु प्रतिमासु। प्रतिमासु कीदृशीषु,

जीविकार्थासु देवप्रतिकृतिष्विदम् । 'अपण्ये' किम्-हस्तिकान्विक्रीणीते । २०५५ देवपथादिभ्यश्च । (५-३-१००) कनो लुप्स्यात् । देवपथः । हंसपथः । आकृतिगणोऽयम् । २०५६ वस्तेर्ढञ् । (५-३-१०१) 'इवे' इत्यनुवर्तते

त्यर्थः । एवं शिव इत्यादि । कथं प्रतिकृतेरविक्रेयाया जीविकार्थत्वमित्यत आह **देवलकानामिति** । प्रतिमां गृहीत्वा भिक्षार्थं प्रतिगृहमटतामित्यर्थः । तत्तदायतनेषु प्रतिष्ठितासु पूजार्थप्रतिमासु उत्तरसूत्रेण लुब्वक्ष्यते । **हस्तिकान्विक्रीणीत इति** । जीविकार्थं हस्तितुल्यप्रतिकृतीः विक्रीणीत इत्यर्थः । अत्र पण्यत्वप्रतीतेः कनो न लुक् । 'संज्ञायां च' इति विहितस्य नायं लुप्, किन्तु 'इवे प्रतिकृतौ' इति विहितस्यैव, भाष्ये प्रतिकृताविव एतदुदाहरणात् । पठन्ति चाभियुक्ताः—

'रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो नरस्तं च धिग् धिक् ।
अस्मिन्पद्ये योऽपशब्दं न वेत्ति व्यर्थप्रज्ञं पण्डितं तं च धिग् धिक् ॥ इति ।

अत्र रामादिशब्दाः प्रतिकृतिषु वर्तन्ते । तासां चात्र पण्यतया कनो लुप् दुर्लभ इति रामसीतालक्ष्मणशब्दानामपशब्दत्वमित्याशयः । **देवपथादिभ्यश्च । कनो लुप् स्यादिति** । शेषपूरणमिदम् । 'इवे प्रतिकृतौ' इति विहितस्य देवपथादिभ्यः परस्य कनो लुप् स्यादिति यावत् । **देवपथ इति** । देवानां पन्थाः देवपथः । तत्प्रतिकृतिरित्यर्थः । 'इवे प्रतिकृतौ' इति कनो लुप् । एवं हंसपथः । अत्र वृत्तौ पठितम्—

'अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।
इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥ इति ।

अर्चाः प्रतिमाः । पूजार्थासु तासु चित्रकर्मसु ध्वजेषु देवपथादिगणपठितेषु 'इवे प्रतिकृतौ' इति विहितस्य कनो लुबित्यर्थः । 'तद्राजस्य-' इति सूत्रे कैयटोऽप्येतं श्लोकं पपाठ । अर्चासु यथा—शिवो विष्णुर्गणपतिरित्यादि चित्रकर्मसु यथा—रावणः कुम्भकर्णः इन्द्रजिदित्यादि । ध्वजेषु यथा—कपिः गरुडो वृषभ इत्यादि

पूजनार्हासु गृहेष्वायतनेषु वा याः पूज्यन्ते तासु । चित्रकर्मध्वजाभ्यां तद्गताः प्रतिकृतयो लक्ष्यन्ते । अर्चासूदाहरणम्—शिवः, विष्णुः । चित्रकर्मणि अर्जुनः, दुर्योधनः । ध्वजेषु—कपिः, गरुडः, सिंहः । सुवर्णसिंहमकरादयो राज्ञां ध्वजेषु सन्ति । **हस्तिकानिति** । ईदृशमेव विषयमभिप्रेत्य पठन्ति—'रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो नरस्तं च धिग्धिक् । अस्मिन्पद्ये योऽपशब्दान्न वेत्ति व्यर्थप्रज्ञं पण्डितं तं च धिग्धिक्' इति । अयं भावः—'अपण्ये' इत्युक्तत्वात्पण्ये हस्तिकानितिवत् रामकं सीतिकां लक्ष्मणकमिति प्रयोगा एव साधव इति । **देवपथ इत्यादि** । देवपथ

एव। 'प्रतिकृतौ' इति निवृत्तम्। बस्तिरिव बास्तेयम्, बास्तेयी। २०५७ शिलाया ढः। (५-३-१०२) शिलेव शिलेयम्। योगविभागाद् ढञपीत्येके। शैलेयम्। २०५८ शाखादिभ्यो यः। (५-३-१०३) शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः। २०५९ द्रव्यं च भव्ये। (५-३-१०४) द्रव्यम् अयं ब्राह्मणः। २०६० कुशाग्राच्छः। (५-३-१०५) कुशाग्रमिव कुशाग्रीया बुद्धिः। २०६१ समासाच्च तद्विषयात्। (५-३-१०६) इवार्थविषयात्समासाच्छः स्यात्। काकतालीयो देवदत्तस्य

बस्तेर्ढञ्। निवृत्तमिति। अस्वरितत्वादिति भावः। 'संज्ञायां च' इत्यादिपूर्वसूत्रेषु क्वापि प्रतिकृतावित्यस्यानिवृत्तेः न लुब्विधिषु तेषु तदनुवृत्तिरपेक्षिता। बस्तिरिवेति। 'बस्तिर्नाभेरधो द्वयोः' इत्यमरः। शिलाया ढः। इवे इत्येव। शिलेव शिलेयमिति। दध्यादीति शेषः। योगेति। 'शिलायाः' इत्येको योगः। 'ढञ्' इत्यनुवर्तते, 'इवे' इति च। शैलेयमिति। ञित्त्वादादिवृद्धिः, स्त्रियां ङीप् च फलम्। 'ढः' इति द्वितीयो योगः। 'शिलायाः' इत्यनुवर्तते। उक्तोऽर्थः। शाखादिभ्यो यः। 'यत्' इति त्वपपाठः। तैत्तिरीये 'मुख्यो भवति' इत्यादौ मुख्यशब्दस्य आद्युदात्तत्वदर्शनात्, उगवादिसूत्रभाष्यविरुद्धत्वाच्च। द्रव्यं च भव्ये। द्रुशब्दादिवार्थवृत्तेः यप्रत्ययो निपात्यते भव्ये उपमेये गम्ये। 'भव्य आत्मवान्। अभिप्रेतानामर्थानां पात्रभूतः' इति वृत्तिः। द्रव्यम् अयमिति। द्रुः वृक्षः, स यथा पुष्पफलादिभाग् एवमभिमतफलपात्रभूत इत्यर्थः। यद्वा द्रुः कल्पवृक्षोऽत्र विवक्षितः, स इव अभिमतार्थभागित्यर्थः। यप्रत्यये ओर्गुणः अवादेशः। कुशाग्राच्छः। इवे इत्येव. कुशाग्रमिवेति। सूक्ष्मत्वेन सादृश्यम्। कुशाग्रवत् सूक्ष्मेत्यर्थः। समासाच्च। तच्छब्देन प्रकृत इवार्थः परामृश्यते। तदाह इवार्थविषयादिति। इवार्थः सादृश्यमुपमानोपमेयभावात्मकम्, तद्विषयकादित्यर्थः। सादृश्यवदर्थबोधकात् समासादिति यावत्। यद्यपि घनश्याम इति समासोऽपि सादृश्यवदर्थबोधकः, तथापि सादृश्यवदर्थबोधकसमस्यमानयावत्पदावयवकात् समासादिति विवक्षितमिति न दोषः। छः स्यादिति। चकारेण पूर्वसूत्रोपात्तच्छस्यानुकर्षादिति भावः। इवार्थे इति शेषः। 'पूगाञ्ञ्यः—' इत्यतः प्रागिवाधिकारात्। ततश्च इवार्थक-

---

इव प्रतिकृतिः। हंसपथ इव प्रतिकृतिरिति विग्रहः। बस्तिरिति। 'बस्तिर्नाभेरधो द्वयोः' इत्यमरः। द्रव्यं च भव्ये। द्रुशब्दादिवार्थे यत्प्रत्ययो निपात्यते। समासाच्च तद्विषयात्। तच्छब्देन प्रकृत इवार्थो निर्दिश्यते इत्याह इवार्थविषयादिति। छः स्यादिति। इवार्थे इति बोध्यम्। 'पूगाञ्ञ्यः—' इत्यतः प्रागिवेत्य-

वधः । इह काकतालसमागमसदृशश्चोरसमागम इति समासार्थः । तत्प्रयुक्तः काक-मरणसदृशस्तु प्रत्ययार्थः । अजाकृपाणीयः । अतर्कितोपनत इति फलितोऽर्थः ।

समस्यमानयावत्पदकात्समासादिवार्थे छः स्यादिति लभ्यते । **काकतालीयो देव-दत्तस्य वध इति ।** काकः कश्चिदकस्मात् तालवृक्षस्य मूलं गतस्तालफलपतना-न्मृतः । तथैव कश्चिद्देवदत्तः अकस्मान्निर्जनप्रदेशे क्वचिद्गत चोरेण हतः, तत्रेदं वाक्यं प्रवृत्तम् । अत्र समासार्थगतं सादृश्यमेकम्, प्रत्ययार्थगतम् अन्यत्सादृश्यं च भासते । तथाहि—काकागमनमिव तालपतनमिव काकतालमिति समासस्य विग्रहः । अत्र काकशब्दः काकागमनसदृशे देवदत्तागमने लाक्षणिकः । तालशब्दस्तु तालपतनसदृशे चोरागमने लाक्षणिकः । काकागमनसदृशं देवदत्तागमनं तालपतन-सदृशं चोरागमनमिति च काकतालमिति समासाद्बोधः । यद्यप्यत्र काकताल-शब्दयोः मिलितयोरेकत्रान्वयाभावाद् द्वन्द्वसमासो न संभवति, परस्परान्वया-भावेन असामर्थ्याच्च । तथापि अस्मादेव विधिबलात् 'सुप्सुपा' इति समासः । तथा च काकतालसमागमसदृशो देवदत्तचोरसमागम इति समासार्थः, तदाह **इह काकतालसमागमसदृशश्चोरसमागम इति समासार्थ इति ।** अत्र चोरसमागम इत्यस्य चोरेण देवदत्तस्य समागम इत्यर्थः । तदेवंविधात्समा-सात् काकतालशब्दादिवान्तरार्थे सादृश्यान्तरे छप्रत्ययः । तत्र समासात्मककाक-तालशब्दभूतप्रकृत्यर्थरूपकाकतालसमागमसदृशदेवदत्तचोरसमागमे सति तालपतन-कृतकाकमरणे उपस्थिते उपमानत्वम्, देवदत्तवधे चोरागमनकृते उपमेयत्वं च छप्रत्ययेन गम्यते । ततश्च तादृशचोरसमागमे सति तालपतनकृतकाकमरणसदृशो देवदत्तस्य चोरकृतो वध इति छप्रत्ययेन लभ्यते । तदाह **तत्प्रयुक्त इति ।** तादृशतालपतन-प्रयुक्त इत्यर्थः । सदृश इत्यनन्तरं देवदत्तवध इति शेषः । तथा च काकतालसमागमसदृशो देवदत्तचोरसमागमः, तद्धेतुकस्तालपतनकृतकाकमरणसदृशश्चोरकृतो देवदत्तवध इत्येवं काकतालीयो देवदत्तवध इति समासाद्बोधः । एतदेवाभिप्रेत्योक्तं भाष्ये 'काका-गमनमिव तालपतनमिव काकतालम् । काकतालमिव काकतालीयम्' इति । अत्र काकतालमिति इवार्थगर्भितकेवलद्वन्द्वाद् न भवति इवान्तरार्थस्य सादृश्यान्तरस्या-प्रतीतेरित्यलम् । **अजाकृपाणीय इति ।** अजागमनमिव कृपाणपतनमिव अजा-

---

धिकारात् । शस्त्रीश्यामत्यादौ तु एक एव इवार्थः । स च समासान्तर्भूत इति छो न भवत्युक्तार्थानामप्रयोगात् । **काकतालीय इति ।** प्रकृतसूत्रादेव ज्ञापकादिवार्थे समासः । सुप्सुपेति वा । उभयथापि विशेषसंज्ञाविनिर्मुक्तः । स च छप्रत्ययविषय एव । तेनेह स्वातन्त्र्यमुपाध्यन्तरयोगो विग्रहश्च नेत्याकरः । इह **काकतालेत्यादि ।**

२०६२ शर्करादिभ्योऽण्। (५-३-१०७) शर्करेव शार्करम्। २०६३ अङ्गुल्यादिभ्यष्ठक् (५-३-१०८) अङ्गुलीव आङ्गुलिकः। भरुजेव भारुजिकः। २०६४ एकशालायाष्ठजन्यतरस्याम्। (५-३-१०९) एकशालाशब्दादिवार्थे ठञ्वा। पक्षे ठक्। एकशालेव एकशालिकः, ऐकशालिकः। २०६५ कर्कलोहितादीकक्। (५-३-११०) कर्कः शुक्लोऽश्वः। स इव कार्कीकः। लौहितीकः स्फटिकः। २०६६ पूगाञ्ञ्योऽग्रामणीपूर्वात्। (५-३-११२) इवार्थो निवृत्तः। नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः। तद्वाचकात्स्वार्थे ञ्यः स्यात्। लौहितध्वज्यः। 'व्रातच्फञोरस्त्रियाम्'

कृपाणम्, तदिव अजाकृपाणीयः। अजाकृपाणसमागमसदृशो देवदत्तचोरसमागमः समासार्थः कृपाणपतनप्रयुक्ताजामरणसदृशो देवदत्तवधश्चोरकृतः प्रत्ययार्थः। अत्र सर्वत्र अतर्कितोपनतत्वं साधारणो धर्म इत्याह **अतर्कितेति**। **शर्करादिभ्योऽण्**। इवे इत्येव। **शार्करमिति**। 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति विशेष्यनिघ्नतेति भावः। **अंगुल्यादिभ्यष्ठक्**। इवे इत्येव। **अंगुलीवेति**। अङ्गुलिशब्दात् 'कृदिकारादक्तिनः' इति ङीष्। **आंगुलिक इति**। पूर्ववद्विशेष्यनिघ्नता। **भरुजेव भारुजिक इति**। पूर्ववद्विशेष्यनिघ्नता। **एकशालायाः। पक्षे ठगिति**। 'अन्यतरस्याम्' ग्रहणम् अनन्तरठकः समुच्चयार्थमिति भावः। ठञ्वेत्येव सुवचम्। **कर्कलोहितादीकक्। कर्कः शुक्लोऽश्व इति**। अश्वपर्यायेषु 'सितः कर्कः' इत्यमरः। **लौहितीकः स्फटिक इति**। जपापुष्पादिसंपर्कवशाल्लोहित इवेत्यर्थः। **पूगाञ्ञ्यः। इवार्थो निवृत्त इति**। व्याख्यानादिति भावः। **अनियतवृत्तय इति**। उद्वृत्ता इत्यर्थः। **तद्वाचकादिति**। पूगेति न स्वरूपग्रहणम्, व्याख्यानात्। ग्रामणीवाचकपूर्वावयवकभिन्नात् पूगवाचकादित्यर्थः। **लौहितध्वज्य इति**। लोहिता ध्वजा यस्य पूगस्य स एव लौहितध्वज्यः। **व्रातच्फञोरस्त्रियामिति**। इदं सूत्रम् 'गोत्रे कुञ्जादिभ्यः–' इत्यत्र

आगच्छतः काकस्याऽकस्मात्तालफलपतनाद्यथा वधः, तथैव चाकस्मिकचोरसमागमाद्देवदत्तवधः। एवमजाया आगच्छन्त्याः कृपाणपतनाद् यथा वधः, तत्सादृशं मरणमिति फलितोऽर्थः। **अतर्कितोपनत इति**। अचिन्तितोपपन्नः, यादृच्छिक इत्यर्थः। **पूगाञ्ञ्यो**। स्वरूपग्रहणं तु न भवति, 'अग्रामणीपूर्वात्' इति वचनात्। पूर्वशब्दो ह्यवयववचनः। अग्रामणीपूर्वादिति किम्, देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः। 'स एषां ग्रामणीः' इति कन्। अत्र समुदायः पूगवचनः। **लौहितध्वज्य इति**। लोहितो ध्वजो यस्य संघस्य स लोहितध्वजः, स एव लौहितध्वज्यः। **व्रातच्-**

(सू ११००) व्रातः। कापोतपाक्यः। च्फञ्। कौञ्जायन्यः। ब्राध्नायन्यः। २०६७ आयुधजीविसङ्घाञ्ञ्यड् वाहीकेष्वब्राह्मणराजन्यात्। (५-३-११४) बाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट्। क्षौद्रक्यः। मालव्यः। टित्वान्ङीप्। क्षौद्रकी। 'आयुध' इति किम्—मल्लाः। 'सङ्घ' इति किम्—सम्राट्। 'वाहीकेषु' किम्—शबराः। 'अब्राह्मण' इति किम्—गोपालवाः। सालङ्कायनाः। ब्राह्मणे तद्विशेषग्रहणम्। राजन्ये स्वरूपग्रहणम्। २०६८ वृकाट्टेण्यण्। (५-३-११५) आयुधजीविसङ्घवाचकात्स्वार्थे। वार्केण्यः। 'आयुध' इति किम्—जातिविशेषान्मा भूत्। २०६९ दामन्यादित्रिगर्तषष्ठाच्छः। (५-३-११६) दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः स्यात्। त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः।

प्रसङ्गादुपादाय व्याख्यातम्। **व्रात इति।** उदाहरणसूचनमिदम्। भारोद्वहनादिशरीरायासजीवनाद् नानाजातीयानामनियतवृत्तीनां सङ्घो व्रातः। **कापोतपाक्य इति।** कपोतान् पक्षिविशेषान् भक्षणाय पचतीति कपोतपाकः, स एव कापोतपाक्यः। पचेः कर्तरि घञ्, 'चजोः कु घिण्ण्यतोः' इति कुत्वम्। **च्फञिति।** उदाहरणसूचनमिदम्। **कौञ्जायन्य इति।** 'गोत्रे कुञ्जादिभ्यः–' इति च्फञ्। आयन्नादेशः। ततः स्वार्थे अनेन ञ्यः। एवं ब्राध्नायन्यः। **आयुधजीवि। वाहीकेष्विति।** वाहीकाख्यग्रामविशेषेष्वित्यर्थः। **क्षौद्रक्य इति।** क्षुद्रको नाम कश्चिदायुधजीविनां वाहीकदेशवासिनां सङ्घः, स एव क्षौद्रक्यः। **मालव्य इति।** मालवो नाम कश्चिद्वाहीकेषु आयुधजीविनां सङ्घः, स एव मालव्यः। **टित्वाद् ङीबिति।** एवं च 'अस्त्रियाम्' इति नात्र संबध्यत इति भावः। **तद्विशेषेति।** व्याख्यानादिति भावः। **वृकाट्टेण्यण्।** वृको नाम कश्चिदायुधजीविसंघः, स एव वार्केण्यः। आदिवृद्धिः। रपरत्वम्। **जातिविशेषादिति।** वृको नाम कश्चिन्मनुष्यखादी चतुष्पाज्जातिविशेषः प्रसिद्धः। तस्मान्नेत्यर्थः। **दामन्यादि।** दामनिः आदिर्यस्य दामन्यादिः। त्रिगर्तः षष्ठो यस्य वर्गस्य स त्रिगर्तषष्ठः। दामन्यादिश्च त्रिगर्तषष्ठश्चेति समाहारद्वन्द्वात्पञ्चमी। फलितमाह **दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चेति।** आयुधजीविनां हि षड् वर्गाः, तत्र षष्ठस्त्रिगर्तः वर्गः, तेभ्यः षड्वर्गेभ्य इति यावत्। के ते त्रिगर्तषष्ठा इत्यत आह

फञोः। उत्सेधजीवित्वं व्रातस्य पूगाद्विशेषः। उत्सेधः शरीरायासः। **कौञ्जायन्य इति।** 'गोत्रे कुञ्जादिभ्यः–' इति च्फञ्। **दामन्यादित्रिगर्तषष्ठात्।** समाहारद्वन्द्वात्पञ्चमी। **त्रिगर्तषष्ठेभ्य इति।** येषामायुधजीविनां षडन्तर्वर्गाः। षष्ठवर्गस्तु

'आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
क्रौष्टुकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जालकिः ॥'

दामनीयः। दामनीयौ । दामनयः। औलपि—औलपीयः । त्रिगर्त—कौण्डोपरथीयः । दाण्डकीयः । **२०७० पर्श्वादियौधेयादिभ्योऽणञौ। (५-३-११७)** आयुधजीविसंघवाचिभ्य एभ्यः क्रमादणञौ स्तः स्वार्थे । पार्शवः । पार्शवौ । पर्शवः । यौधेयः । यौधेयौ । यौधेयाः । **२०७१ अभिजिद्विदभृ-**

आहुरिति । कौण्डोपरथः, दाण्डकिः, क्रौष्टुकिः, जालमानिः, ब्राह्मगुप्तः, जालकिः इत्येतान् त्रिगर्तषष्ठान् आहुरित्यर्थः । जालकिरिति त्रिगर्तस्य नामान्तरम् । एतेषु षट्सु कौण्डोपरथब्राह्मगुप्तशब्दौ शिवाद्यणन्तौ । शेष इञन्तः । दामादिगणमुदाहरति **दामनीय इति** । दामनिरेव दामनीयः । **औलपीति** । प्रकृतिप्रदर्शना । **औलपीय इति** । औलपिशब्दात् स्वार्थे छः । **त्रिगर्तेति** । त्रिगर्तषष्ठानामुदाहरणसूचनमिदम् । **कौण्डोपरथीय इति** । कौण्डोपरथशब्दात्स्वार्थे छः । **दाण्डकीय इति** । दाण्डकिशब्दात् स्वार्थे छः । क्रौष्टुकीयः, जालमानीयः, ब्राह्मगुप्तीयः, जालकीय इत्यप्युदाहार्यम् । **पर्श्वादियौधेयादि । एभ्य इति** । पर्श्वादिभ्यो यौधेयादिभ्यश्चेत्यर्थः । **पार्शव इति** । पर्शुशब्दाज्जनपदक्षत्रियविशेषयोर्वाचकादपत्येऽर्थेषु 'द्व्यञ्मगध–' इत्यण् । ततोऽपत्यसङ्घविवक्षायामनेन अणिति भावः । **पर्शव इति** । अपत्यसङ्घबहुत्वविवक्षायां प्रकृतस्याणोऽपि तद्राजत्वाल्लुक्, 'ञ्यादयस्तद्राजाः' इति वक्ष्यमाणत्वादिति भावः । **यौधेय इति** । युधाशब्दादपत्येऽर्थे 'द्व्यचः' इति

त्रिगर्तस्तेभ्य इत्यर्थः । त्रिगर्तवर्गषष्ठकाः के इत्याकाङ्क्षायामाह **आहुस्त्रिगर्तषष्ठांश्चेति** । अत्र जानकयस्त्रिगर्तवर्गः, तेषु च त्रिगर्तषष्ठेषु प्रथमपञ्चमौ कौण्डोपरथब्राह्मगुप्तशब्दौ शिवाद्यणन्तौ, शेषास्त्विञन्ताः । केचित्तु अतद्धितान्तमेव पञ्चमं ब्रह्मगुप्तशब्दं पठन्ति । **कौण्डोपरथीय इति** । बहुवचने तु कौण्डोपरथा दाण्डकय इत्यादि । **पार्शव इति** । पर्शुरिति जनपदशब्दस्ततोऽपत्ये 'द्व्यञ्मगध–' इत्यण् । बहुत्वे तद्राजत्वाल्लुक् । पुनः संघविवक्षायामनेनाण् । अस्याप्यणो बहुत्वे तद्राजत्वाल्लुक् । तदाह **पर्शव इति** । ननु पर्शुरिति यो जनपदशब्दस्तस्मादेवानेन स्वार्थेऽण् विधीयताम्, अपत्यवाचिपर्शुशब्दात्संघविवक्षायामणिवधौ तु स्वार्थिकत्वं न सिध्येदिति चेत् । अत्राहुः—केवलः पर्शुशब्द एव जनपदवाची, न त्वणन्त इति जनपदवाचिनः स्वार्थेऽण् न विधीयते, किं तु 'द्व्यञ्मगध–' इत्यणः 'तद्राजस्य बहुषु–' इत्यादिना लुकि बह्वपत्यवाचिपर्शुशब्दादेव स्वार्थे विधीयते स्वार्थश्चात्र संघ एव । न च पर्शुशब्दस्य संघवाचित्वं नेति शङ्क्यम्, बह्वपत्यवाचित्वे संघवाचित्वध्रौव्यादिति न

च्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् । (५-३-११८)
अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ्स्यात् । अभिजितोऽपत्यमाभिजित्यः । वैदभृत्यः । शालावत्यः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः ।
२०७२ **ञ्यादयस्तद्राजाः ।** (५-३-११९) 'पूगाञ्ञ्यः-' (सू २०६६) इत्यारभ्य उक्ता एतत्संज्ञाः स्युः । तेनास्त्रियां बहुषु लुक् । लोहितध्वजाः, कपोतपाकाः, कौञ्जायनाः, ब्राध्नायना इत्यादि । २०७३ **पादशतस्य संख्यादेर्वी-**

ढक् । तदन्तादपत्यसङ्घविवक्षायामनेन अञ् । ञित्त्वम् आद्युदात्तत्वफलकम् । **यौधेया इति** । अपत्यसङ्घबहुत्वविवक्षायां 'तद्राजस्य-' इत्यञो लुक् । 'चितः' इत्यन्तोदात्तं फलम् । **अभिजिद्विदभृत्** । अभिजित्, विदभृत, शालावत्, शिखावत्, शमीवत्, ऊर्णावत्, श्रुमद् एषां समाहारद्वन्द्वात् पञ्चम्या लुक् । 'अण' इति प्रत्ययत्वात् तदन्तग्रहणम् , तदाह **अभिजिदादिभ्य इति** । अत्र 'आयुधजीविसङ्घादिति निवृत्तम्' इति वृत्तिः । **आभिजित्य इति** । अभिजितोऽपत्यं आभिजितः । अपत्येऽण् । आभिजित एव आभिजित्यः । **वैदभृत्य इति** । विदभृतोऽपत्यं वैदभृतः । स एव वैदभृत्यः । **शालावत्य इति** । शालावतोऽपत्यं शालावतः, स एव शालावत्यः । **शैखावत्य इति** । शिखावतोऽपत्यं शैखावतः, स एव शैखावत्यः । **शामीवत्य इति** । शमीवतोऽपत्यं शामीवतः, स एव शामीवत्यः । **और्णावत्य इति** । ऊर्णावतोऽपत्यमौर्णावतः, स एव और्णावत्यः । **श्रौमत्य इति** । श्रुमतोऽपत्यं श्रौमतः, स एव श्रौमत्यः । अत्र अभिजिदित्यादिशब्देषु यञः स्वार्थिकतया गोत्रार्थकत्वादाभिजित्यस्यायमिति विग्रहे 'गोत्रचरणात्-' इति वुञि 'आपत्यस्य च-' इति यलोपे आभिजितक इति भवति । 'अपत्याणन्तेभ्य एवायं यञ् । तेन आभिजितो मुहूर्त इत्यादौ न यञ्' इति भाष्ये स्पष्टम् । **ञ्यादयस्तद्राजाः । लोहितध्वजा इति** । 'पूगात्-' इति विहितस्य ञ्यस्य तद्राजत्वाद् बहुत्वे लुक् । **कपोतपाकाः, कौञ्जायनाः, ब्राध्नायना इति** । 'व्रातच्फञोः-' इति विहितस्य ञ्यस्य लुक् । **इत्यादीति** । क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः । आयुधजीवीति ञ्यटो लुक् ।

काद्यनुपपत्तिरिति । **यौधेय इति** । युध्यतेऽसौ युधा । युधेरिगुपधलक्षणः कः । युधाया अपत्यं 'द्व्यचः' इति ढक् । तदन्तात्संघविवक्षायामनेनाञ् । तेन यौधेय इति आद्युदात्तं भवति । किं च यौधेयस्याङ्को लक्षणं वा यौधेयः । 'संघाङ्कलक्षण-' इत्यन्तादण् । एवं यौधेयादिषु ये ढगन्ताः शौकेयादयस्तेषु सर्वेषु प्रयोजनद्वयमूह्यम् । **यौधेया इति** । अञो लुक्, अन्तोदात्तम् । न च 'न प्राच्यभर्ग-' इत्यादिना निषेधः शङ्क्यः, स्त्रियामेव तन्निषेधात् । **आभिजित्य इति** । आभिजितशब्दादणन्ताद्यञ् ।

प्सायां वुन्लोपश्च । (५-४-१) लोपवचनमनैमित्तिकत्वार्थम् । अतो न स्थानिवत् । 'पादः पत्' (सू ४१४)। 'तद्धितार्थ–' (सू ७२८) इति समासे कृते प्रत्ययः । वुञयं स्त्रियामेव । द्वौ द्वौ पादौ ददाति द्विपदिकाम् । द्विशतिकाम् । 'पादशतग्रहणमनर्थकम्, अन्यत्रापि दर्शनात्' (वा ३३१४) । द्विमोदकिकाम् ।

वार्केण्यः, वार्केण्यौ, वृकाः । वृकाट्टेण्यणो लुक् । दामनीयः, दामनीयौ, दामनयः, कौण्डोपरथा इत्यादौ 'दामन्यादित्रिगर्तषष्ठात्' इति छस्य लुक् । पार्शवः, पार्शवौ, पर्शवः, यौधेया इत्यत्र पर्श्वादियौधेयाद्यणञोर्लुक् । आभिजित्यः, आभिजित्यौ, अभिजितः, विदभृत इत्यादौ अभिजिद्विदभृदित्यादिविहितस्य यञो लुगिति भावः ।

इति तद्धितेषु पञ्चमाध्यायस्य तृतीयपादः समाप्तः ।

अथ पञ्चमाध्यायस्य चतुर्थपादप्रारम्भः । **पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च** । पादश्च शतं चेति समाहारद्वन्द्वाद् लोपापेक्षया षष्ठी । वुन्प्रत्ययापेक्षया तु सा पञ्चम्यर्थे । संख्यावाचकशब्दपूर्वकात् पादशब्दात् शतशब्दाच्च वीप्साविशिष्टार्थवृत्तेः स्वार्थे वुन्प्रत्ययः स्यात्, प्रकृतेरन्त्यस्य लोपश्चेत्यर्थः । ननु वुनः अकादेशे सति 'यस्येति च' इत्येव लोपसिद्धेरिह लोपविधिर्व्यर्थ इत्यत आह **लोपवचनमनैमित्तिकत्वार्थमिति** । 'यस्येति च' इति लोपस्य परनिमित्तकतया तस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वात् 'पादः पत्' इति पदादेशो न स्यात् । अस्य तु लोपस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वाप्रसक्तेः पद्भावो निर्बाध इति भावः । **तद्धितार्थ इति** । नच वीप्सायाः प्रकृत्यर्थविशेषणतया वुनोऽर्थाभावात्कथमिह 'तद्धितार्थ–' इति समास इति वाच्यम्, वुनो द्योतकतया द्योत्यार्थेनैवार्थवत्त्वात् । **वुञयं स्त्रियामेवेति** । स्वभावादिति भावः । **द्विशतिकामिति** । द्वे द्वे शते ददातीति विग्रहः । **पादशतेत्यादि** । वार्तिकमिदम् । अनर्थकमिति कथम्, पादशतभिन्नव्यावृत्त्यर्थत्वादित्यत आह **अन्यत्रापि दर्शनादिति** ।

एवं विदभृत्प्रभृतिभ्योऽपि तदन्तेभ्यो नैदभृत-शालावत-शैखावतादिभ्यो यञ् । **पादशतस्य संख्यादेः** । पादशतस्य किम्, द्वौ द्वौ माषौ ददाति । संख्यादेरिति किम्, पादं पादं ददाति । वीप्सायामिति किम्, पादौ ददाति । **अनैमित्तिकत्वार्थमिति** । निमित्ते भवो नैमित्तिकः, अध्यात्मादित्वाट्ठञ् । **तद्धितार्थ इति** । यद्यपि प्रकृत्युपाधिर्वीप्सा, तथापि वुना द्योत्येऽति तद्धितार्थो भवत्येवेति भावः । **ददातीति** । समर्पणमात्रमिह ददातेरर्थः, न तु परस्वत्वापादनपर्यन्तम् । तथात्वे हि उत्तरसूत्रविषयत्वं स्यात् । केचित्तु व्यवसृजतेर्धातोः प्रयोगे सत्येव उत्तरसूत्रस्य प्रवृत्तिमाहुः । **अन्यत्रापि दर्शनादिति** । द्वौ द्वौ माषौ ददातीत्यादौ त्वनभिधानान्नातिप्रसङ्ग इति

२०७४ दण्डव्यवसर्गयोश्च। (५-४-२) वुन्स्यात्। अवीप्सार्थमिदम्। द्वौ पादौ दण्डितः द्विपदिकाम्। द्विशतिकां व्यवसृजति ददातीत्यर्थः। **२०७५ स्थूलादिभ्यः प्रकारवचने कन्।** (५-४-३) जातीयरोऽपवादः। स्थूलकः। अणुकः। 'चञ्चद्बृहतोरुपसंख्यानम्' (वा ३३१५)। चञ्चत्कः। बृहत्कः। 'सुराया अहौ' (ग सू १३०)। सुरावर्णोऽहिः सुरकः। **२०७६ अनत्यन्तगतौ क्तात्।** (५-४-४) छिन्नकम्। भिन्नकम्। अभिन्नकम्। **२०७७ न सामि-**

तदुदाहृत्य दर्शयति **द्विमोदकिकामिति।** द्वौ द्वौ मोदकौ ददातीति विग्रहः। **दण्डव्यवसर्गयोश्च। वुन् स्यादिति।** संख्यादेः पादशताद् दण्डव्यवसर्गयोर्गम्ययोर्वुन् स्यात्प्रकृतेरन्त्यलोपश्चेत्यर्थः। दण्डनं दण्डः। बलात्कृत्य द्रव्यग्रहणम्। व्यवसर्गो दानम्। ननु पूर्वेण सिद्धे किमर्थमिदमित्यत आह **अवीप्सार्थमिति। द्वौ पादौ दण्डित इति।** बलात्कृत्य ग्राहित इत्यर्थः। **स्थूलादिभ्यः।** प्रकारो भेदः सादृश्यं च, व्याख्यानात्। तद्वति वर्तमानाद्यथायोगं कन्नित्यर्थः। **जातीयरोऽपवाद इति।** एतेन अयमपि तद्वदेव प्रकारवति भवति, न तु प्रकारमात्रे इति सूचितम्। **चञ्चत्क इति।** चञ्चधातुश्चलने। अचञ्चन्नपि यश्चञ्चन्निव दृश्यते स चञ्चत्कः। यथा स्पन्दमानस्वच्छजलमध्यवर्ती मणिः। **बृहत्क इति।** अबृहन्नपि बृहन्निव दृश्यते स बृहत्कः, बृहदाख्यासामविशेषो वा। **सुराया अहाविति।** गणसूत्रमिदम्। प्रकारवचने कन्निति शेषः। सुराया अहाविवेति निम्नार्थमिदम्। **सुरक इति।** 'केऽणः' इति ह्रस्वः। **अनत्यन्तगतौ क्तात्।** अत्यन्तगतिः

भावः। **दण्डव्यवसर्गे।** दण्डनं दण्डः। दण्डश्चुरादित्वाद्भावे घञ्। अत्राप्युदाहरणे 'तद्धितार्थ-' इति समासः। स्त्रीलिङ्गं च तद्धितार्थः। यद्वा प्रकृत्यर्थ एव तद्धितार्थः, स्वार्थिकत्वाद् वुनः। **द्वौ पादौ दण्डित इति।** देवदत्तेन यज्ञदत्त इति शेषः। दण्डेरप्रधाने कर्मणि क्त इति यज्ञदत्त इत्यत्र प्रथमा। द्वौ पादावित्यत्र द्विपदिकामित्यत्र च द्वितीया भवति। 'दण्डेर्ग्रहणार्थे' इति तु द्विकर्मकेषूक्तम्। तथा च द्विपदिकाकर्मककर्मकग्रहणविषयीभूतो यज्ञदत्त इत्यादिरर्थ इति नव्याः। **स्थूलादिभ्यः।** प्रकारो भेदः सादृश्यं च। उभयत्रापि यथासंभवं कन्। **जातीयरोऽपवाद इति।** तेनायमपि तद्वदेव प्रकारवति भवति, न तु प्रकारमात्रे इत्युक्तं भवति। **चञ्चद्बृहतोरिति।** एतावपि स्थूलादिष्वेव पठितव्याविति भावः। **चञ्चत्क इति।** चञ्चतिश्चलनकर्मा। चञ्चन्नेव कश्चिच्चञ्चत्कः। एवं बृहद्विशेषो बृहत्कः। यद्वा अचञ्चन्बृहन्नपि प्रभाविशेषाच्चञ्चन्निव बृहन्निव मणिविशेषो लक्ष्यते स चञ्चत्कः, बृहत्कः। **सुरक इति।** 'केऽणः' इति ह्रस्वः। **छिन्नकमिति।** ईषच्छिन्नमित्यर्थः। क्तप्रकृति-

वचने। (५-४-५) सामिपर्याय उपपदे क्तान्तान्न कन् । सामिकृतम्। अर्धकृतम् । अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्न प्राप्तः। इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति। बहुतरकम्। २०७८ बृहत्या आच्छादने। (५-४-६) कन्स्यात्। 'द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा' इत्यमरः। 'आच्छादने' किम्–बृहती छन्दः। २०७९ अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः। (५-४-७) स्वार्थे । अषडक्षीणो

अशेषावयवसंबन्धः, तदभावः अनत्यन्तगतिः, तस्यां गम्यमानायां क्तान्तात्कनित्यर्थः। **छिन्नकमिति**। किञ्चिदवयवावच्छेदेन छिन्नमित्यर्थः। **न सामिवचने** । वचनग्रहणं पर्यायलाभार्थमिति मत्वा आह **सामिपर्याय उपपद इति**। **सामिकृतमिति**। सामीत्यव्ययमर्धे। 'सामि' इति समासः। **अर्धकृतमिति**। अर्धं कृतमिति कर्मधारयः। सामीत्यस्य क्रियाविशेषणत्वेन कारकत्वात् समुदायस्य क्तान्तत्वम्, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्। नन्विह अनत्यन्तगतेः प्रकृत्यैवाभिहितत्वाद् 'उक्तार्थानामप्रयोगः' इति न्यायेन पूर्वसूत्रविहितस्य कनः अप्रसक्तेरिह तन्निषेधो व्यर्थ इति शङ्कते **अनत्यन्तगतेरिति** । परिहरति **इदमेवेति** । तथापीति पूर्वमध्याहार्यम् । **ज्ञापयतीति**। न ह्ययमनत्यन्तगताविति कनः प्रतिषेधः, किं तर्हि, अत्यन्तस्वार्थिकस्य कनः, तत्र च इदमेव ज्ञापकम्। अन्यथा तद्वैयर्थ्यादिति भावः। **बहुतरकमिति**। बहुतरमेव बहुतरकम्। भाष्ये तु इदं सूत्रं प्रत्याख्यातम्। 'तमबाद्यन्तात् स्वार्थे कन् वक्तव्यः' इति वचनेन यावादित्वाद्वा स्वार्थे कना बहुतरकं सुकरतरकमित्यादि सिद्धमिति तदाशयः। **बृहत्या आच्छादने**। कन् इति शेषः। बृहत्येव बृहतिका, उत्तरीयं वासः, तदाह **द्वौ प्रावारेति**। अमरवाक्यमिदम्। **अषडक्ष। स्वार्थ इति**। शेषपूरणमिदम्। अषडक्ष, आशितङ्ग, अलङ्कर्मन् ,

---

वाच्यया क्रियया कप्रत्ययवाच्यस्य साधनस्य व्याप्तिरत्यन्तगतिः, सेह नास्ति। **न सामिवचने** । सामि अर्थं उच्यते येन तत्सामिवचनमिति व्युत्पत्त्या 'वचनग्रहणं पर्यायार्थम्' इत्याह **सामिपर्याय इति**। **सामिकृतमिति**। 'सामि' इति समासः। **अर्धकृतमिति**। विशेषणसमासो बहुव्रीहिर्वा। **प्रकृत्यैवेति**। सामिवचनेनैवेत्यर्थः। **ज्ञापयतीति** । अयं भावः—'न सामिवचने' इत्यनेन 'अनत्यन्तगतौ–' इति कनो न निषेधः। सामिकृतादिभ्यस्तस्य प्राप्त्यभावात् तेभ्योऽसमासे सामिपदेनैव अनत्यन्तगतेर्द्योतनात् , समासेभ्यस्तु क्तान्तत्वाभावाच्च। न च कृद्ग्रहणपरिभाषया समासस्य क्तान्तत्वमस्तीति शङ्क्यम् , सामिशब्दस्य गतिकारकत्वाभावात् । तस्मात् स्वार्थिक एव कन् निषिध्यत इति । इदमेव निषेधवचनं क्वचित्स्वार्थिकं कनं ज्ञापयतीति।

मन्त्रः। द्वाभ्यामेव कृत इत्यर्थः। आशिता गावोऽस्मिन्निति आशितङ्गवीनमरण्यम्। निपातनात्पूर्वस्य मुम्। अलं कर्मणे अलङ्कर्मीणः। अलम्पुरुषीणः। ईश्वराधीनः। नित्योऽयं खः। उत्तरसूत्रे विभाषाग्रहणात्। 'अन्येऽपि केचित्स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते'। 'तमबादयः प्राक्कनः। ञ्यादयः प्राग्वुनः। आमा-

---

अलम्पुरुष एभ्यः अध्युत्तरपदाच्च स्वार्थे खः स्यादित्यर्थः। **अषडक्षीणो मन्त्र इति।** मन्त्रणं मन्त्रः। रहसि राजतदमात्यादिभिः युक्तिभिः क्रियमाणं निर्धारणम्। अविद्यमानानि षड् अक्षीणि श्रोत्रेन्द्रियाणि यस्मिन्निति बहुव्रीहिः। 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच्। तदन्तादनेन स्वार्थे खः। **द्वाभ्यामेवेति।** पुरुषाभ्यामिति शेषः। **आशिता इति।** 'अश भोजने' इत्यस्माद् 'आशितः कर्त्ता' इति ज्ञापकात्कर्तरि क्तः। **पूर्वस्य मुमिति।** आशितशब्दस्येत्यर्थः। **अलङ्कर्मीण इति।** 'पर्यादयो ग्लानाद्यर्थे' इति चतुर्थीसमासात्खः, टिलोपः। **अलम्पुरुषीण इति।** अलं पुरुषायेति विग्रहः। मातृभोगीण इत्यादाविव अषडक्षीणादौ णत्वम्। 'पदव्यवायेऽपि' इति निषेधस्तु न, पदे परतो यत्पदं तेन व्यवाये इत्याश्रयणात्। **ईश्वराधीन इति।** 'यस्मादधिकम्–' इति ईश्वरशब्दात्सप्तमी। शौण्डादित्वादधिशब्देन समासः। ततः स्वार्थे खः। 'समर्थानाम्–' इत्यतो वाग्रहणानुवृत्त्या अस्य खस्य वैकल्पिकत्वभ्रमं वारयति **नित्योऽयं ख इति। उत्तरेति।** 'विभाषाञ्चेः–' इत्युत्तरसूत्रे 'समर्थानाम्–' इत्यतो वाग्रहणानुवृत्त्यैव सिद्धे विभाषाग्रहणादिह पूर्वसूत्रे वाग्रहणानुवृत्त्यभावो ज्ञायत इत्यर्थः। नचैवं सति आशिता गावोऽस्मिन्निति, अलं कर्मण इति च विग्रहप्रदर्शनमनुपपन्नमिति वाच्यम्, तस्य खप्रत्ययप्रकृतिकथनार्थत्वेन अलौकिकविग्रहवाक्यप्रायत्वात्। प्रसङ्गादाह **अन्येऽपीति। इष्यन्त इति।** भाष्यकृतेति शेषः। **तमबादयः प्राक्कन इति।** 'अतिशायने तमप्–' इत्यारभ्य 'अवक्षेपणे कन्' इत्यतः प्राग्विहिताः प्रत्यया इत्यर्थः। **ञ्यादयः प्राग्वुन इति।** 'पूगाञ्ञ्योऽग्रामणी-

---

अषडक्षीण इति। अविद्यमानानि षडक्षीणि यस्मिन्निति बहुव्रीहिः। अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्तते। 'बहुव्रीहौ सक्थ्यक्ष्णोः–' इति षच्, तदन्तादनेन खः। मन्त्रो मन्त्रणम्। **आशितंगवीनमिति।** आङ्पूर्वादश्नातेः 'आशितः कर्ता' इति ज्ञापकात्कर्तरि क्तः, णयन्तात्कर्मणि वा। उभयापि प्रभूतयवसमिति फलितोऽर्थः। **अलंकर्मीण इति।** अलंकर्म अलंपुरुषेति 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति समासः। **अलंपुरुषीण इति।** प्रतिमल्लादिः। **ईश्वराधीन इति।** अधिशब्दः शौण्डादिरित्युक्तम्। **तमबादय इति।** 'अतिशायने तमप्–' इत्यादयः। **प्राक्कन इति।** 'अवक्षेपणे कन्' इति विहितात्। **ञ्यादय इति।** 'पूगाञ्ञ्यो ग्रामणीपूर्वात्'

दयः प्राङ्मयटः । 'बृहतीजात्यन्ताः समासान्ताश्च' इति भाष्यम् । २०८०
विभाषाञ्चेरदिक्स्त्रियाम् । (५-४-८) अदिक्स्त्रीवृत्तेरञ्चत्यन्तात्प्रातिपदिकात्खः स्याद्वा स्वार्थे । प्राक्–प्राचीनम् । प्रत्यक्–प्रतीचीनम् । अवाक्–अवाचीनम् । 'निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः' इत्यमरः । अर्वन्तमञ्चतीति अर्वाक्,

---

पूर्वात्' इत्यारभ्य 'पादशतस्य संख्यादेर्वीप्सायां वुन्' इत्यतः प्राग्विहिताः प्रत्यया इत्यर्थः । **आमादयः प्राङ्मयट इति** । 'किमेत्तिङव्ययघादाम्–' इत्यारभ्य 'तत्प्रकृतवचने मयट्' इत्यतः प्राग्विहिता इत्यर्थः । **बृहतीजात्यन्ता इति** । बृहतीशब्देन 'बृहत्या आच्छादने' इति कन् लक्ष्यते । जात्यन्तशब्देन तु 'जात्यन्ताच्छ बन्धुनि' इति छो लक्ष्यते । बहुवचननिर्देशात् पाशबादयोऽपि 'षष्ठया रूप्य च' इत्यन्ता गृह्यन्त इति कैयटः । वस्तुतस्तु परिगणिता एव नित्याः, न तु पाशबादयोऽपि । 'बृहतीजात्यन्ताः' इति बहुवचनं तु 'बृहत्या आच्छादने' इति 'जात्यन्ताच्छ बन्धुनि' इति च सूत्रयोर्मध्यगतेन 'अषडक्ष–' इति सूत्रेण विहितं खप्रत्ययमभिप्रेत्येति न दोषः । 'विभाषाञ्चेः–' इति उत्तरसूत्रे खविधौ विभाषाग्रहणं तु तस्यापि बृहतीजात्यन्तरालवर्तित्वाविशेषाद् नित्यत्वे प्राप्ते विकल्पार्थम् । अनित्योऽयं खः, उत्तरसूत्रेषु विभाषाग्रहणादिति मूलं तु अभ्युच्चययुक्तिरिति शब्देन्दुशेखरे स्थितम् । **विभाषाञ्चेरदिक्स्त्रियाम्** । अदिक्स्त्रियामिति कर्मधारयगर्भो नञ्तत्पुरुषः । तदाह **अदिक्स्त्रीवृत्तेरिति । प्रागिति** । 'अञ्चेर्लुक्' इति लुप्तास्तात्यन्तमिदम् । प्राञ्चि देशे इत्यर्थे प्राचीनमिति खान्तमिदं स्वभावादाधेयपरम् । स्वभावादेव सामान्ये नपुंसकमेकवचनान्तत्वं च । इदं तु पदसंस्कारपक्षे । वाक्यसंस्कारपक्षे तु प्रागादिशब्देभ्यः समभिव्याहृतदेशकालस्थवृक्षादिबोधकेभ्यः खः । तत्र उपस्थितविशेष्यलिङ्गत्यागे मानाभावात् प्राचीना आम्राः, प्राचीना वाटी, प्राचीनं

इत्यादयः । **प्राग्वुन इति** । 'पादशतस्य संख्यादेः' इति विहितात् । **आमादय इति** । 'किमेत्तिङव्ययघादाम्–' इत्यादयः । **प्राङ्मयट इति** । 'तत्प्रकृतवचने मयट्' इत्यतः प्रागित्यर्थः । **बृहतीजात्यन्ता इति** । बृहतीशब्देन 'बृहत्या आच्छादने' इति विहितः कन् उपलक्ष्यते । जात्यन्तशब्देन 'जात्यन्ताच्च–' इति छः । बहुवचननिर्देशात्पाशबादयो गृह्यन्ते । यो हि वैयाकरणपाशादिशब्दैरर्थः प्रतीयते नासौ प्रकृतिमात्रेण प्रतीयत इति तेऽपि तमबादिवन्नित्या एवेति स्थितमाकरे । कन्छौ मुक्त्वा मूले बृहतीमात्रप्रयोगो जात्यन्तमात्रप्रयोगश्च कृतः, स तु अवाचकोऽप्यार्षग्रन्थानुवादकत्वान्न दोषाय । **विभाषाञ्चेर** । दिक् चासौ स्त्री चेति दिक्स्त्री, तत्र प्रतिषेधः, न तु दिशि स्त्रियां च, स्त्रीलिङ्गैकवचननिर्देशात् । **प्राचीनमिति** । 'अचः'

अर्वाचीनम् । 'अदिक्स्त्रियाम्' किम्-प्राची दिक्, उदीची दिक् । 'दिग्ग्रहणम्' किम्-प्राचीना ब्राह्मणी । 'स्त्रीग्रहणम्' किम्-प्राचीनं ग्रामाद् आम्राः । २०८१ **जात्यन्ताच्छ बन्धुनि ।** (५-४-९) ब्राह्मणजातीयः । 'बन्धुनि' किम्-ब्राह्मणजातिः शोभना । जातेर्व्यञ्जकं द्रव्यं बन्धु । २०८२ **स्थानान्ताद्विभाषा सस्थानेनेति चेत् ।** (५-४-१०) सस्थानेन तुल्येन चेत्स्थानान्तमर्थवदित्यर्थः ।

वनमिति भवतीत्याहुः । अर्वन्तमञ्चतीति वदयन् अर्वच्छब्दं विवृणोति **निकृष्टेति ।** अमरवाक्यमिदम् । **प्राची दिगिति ।** लिङ्गविशिष्टपरिभाषया प्राप्तिः । **दिग्ग्रहणं किमिति ।** अस्त्रियामित्येतावतैव प्राची दिगित्यत्रातिप्रसङ्गनिरासात्किं तेनेति प्रश्नः । अव्याप्तिपरिहारार्थमित्याह **प्राचीना ब्राह्मणीति ।** नेयं दिग्रूपा स्त्री, किंतु तद्भिन्ना स्त्रीति खो भवत्येवेति भावः । **स्त्रीग्रहणं किमिति ।** अदिशीत्येतावतैव प्राचीना ब्राह्मणीत्यत्राव्याप्तिनिरासात्प्रश्नः । इदमप्यव्याप्तिपरिहारार्थमित्याह **प्राचीनं ग्रामादाम्रा इति ।** स्थानिवत्सूत्रभाष्ये अयं प्रयोगः स्थितः । अत्र प्राच्यां दिशीत्यर्थे लुप्तास्तात्यन्ता प्रागिति प्रकृतिः । स च अव्ययत्वाद् अस्त्रीति खो भवत्येवेति भावः । **जात्यन्ताच्छ बन्धुनि ।** छेति लुप्तप्रथमाकम् । जातिशब्दान्तात् प्रातिपदिकाद्बन्धुनि वर्तमानात् स्वार्थे छप्रत्ययः स्यादित्यर्थः । बन्धुशब्दो द्रव्यवाचीति वक्ष्यति । तथा च बन्धुनि वर्तमानादित्यनेन जात्याश्रयद्रव्यलक्षणादिति फलितम् । **ब्राह्मणजातीय इति ।** ब्राह्मणत्वजात्याश्रयो व्यक्तिविशेष इत्यर्थः । **ब्राह्मणजातिः शोभनेति ।** ब्राह्मणत्वजातिरित्यर्थः । बध्यते ब्राह्मणत्वादिजातिर्व्यज्यतेऽस्मिन्निति बन्धु द्रव्यम् । 'शॄस्वृस्निहि–' इत्यादिना अधिकरणे उप्रत्ययः । तदाह **जातेर्व्यञ्जकं द्रव्यं बन्ध्विति ।** आप्तपर्यायस्तु बन्धुशब्दो नेह गृह्यते, बन्धुनीति

इत्यकारलोपे कृते 'चौ' इति दीर्घः । एवमग्रे क्वचिद्बोध्यम् । **प्राचीना ब्राह्मणीति ।** प्रकर्षेणाञ्चतीति प्राचीनेत्येवं क्रियानिमित्तको वा देशकालनिमित्तको वा अयं शब्दो ब्राह्मण्यां वर्तते, न तु दिशीति प्रतिषेधाभावः । **प्राचीनमिति ।** प्राच्यां दिशीत्यर्थे 'दिक्शब्देभ्यः–' इत्यस्तातिः 'अञ्चेर्लुक्' इति लुक् । 'लुक्तद्धितलुकि' इति ङीपो लुक् । 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वात् स्त्रीत्वाभावः । खे तु कृते स्वभावान्नपुंसकत्वम् । **ब्राह्मणजातीय इति ।** द्व्येकयोरितिवद्भावप्रधानो ब्राह्मणशब्दः, तस्य जातिशब्देन सह बहुव्रीहिः । ब्राह्मणत्वजात्याधारभूतः पिण्ड इत्यर्थः । **ब्राह्मणजातिरिति ।** षष्ठीतत्पुरुषः । भावप्रधानेन सह कर्मधारयो वा । **जातेर्व्यञ्जकमिति ।** बध्यते जातिरस्मिन्निति बन्धुः । 'शॄस्वृस्निहि–' इत्यादिना अधिकरणे उप्रत्ययः । रूढोऽपि बन्धुशब्द आप्तपर्यायः पुँल्लिङ्गोऽस्ति, तथापि स नेह गृह्यते । 'बन्धुनि' इति नपुंसक-

पित्रा तुल्यः पितृस्थानीयः, पितृस्थानः । 'सस्थानेन' किम्-गोस्थानम् । २०८३ **अनुगादिनष्ठक्** । (५-४-१३) अनुगदतीत्यनुगादी । स एव आनुगादिकः । २०८४ **विसारिणो मत्स्ये** । (५-४-१६) अणस्यात् । वैसारिणः । 'मत्स्ये' इति किम्-विसारी देवदत्तः । २०८५ **संख्यायाः क्रियाभ्यावृत्तिगणने**

नपुंसकनिर्देशादिति भावः । **स्थानान्तात्** । सस्थानेनेत्यस्य विवरणं तुल्येनेति । इतिशब्दादर्थवदिति लभ्यते । तुल्यरूपेणार्थेन यदि स्थानान्तं शब्दस्वरूपमर्थव-द्भवति, तदा स्थानान्तात् छो वा स्यादित्यर्थः । तुल्यरूपार्थे वर्तमानात् स्थानान्तात् छो वा स्यादिति यावत् । **पितृस्थानीय इति** । स्थानं पूज्यत्वादिपदम् । पितृ-स्थानमिव स्थानं यस्येति बहुव्रीहिः । पितृनिष्ठपूज्यत्वादितुल्यपूज्यत्वादिमानित्यर्थः । **गोस्थानमिति** । गवां निवास इत्यर्थः । अत्र तुल्यत्वाप्रतीतेर्न च्छः । 'किमेत्ति-ङव्यय-' इत्युत्तरसूत्रं प्रसङ्गात्पूर्वमेव व्याख्यातम् । 'अमु च च्छन्दसि' इति तु वैदिकप्रक्रियायां व्याख्यास्यते । **अनुगादिनष्ठक्** । स्वार्थे इति शेषः । 'आमादयः प्राग्वयदः' इत्युक्तेः ठगादयो नित्या एव प्रत्ययाः । **अनुगादीति** । 'सुप्यजातौ-' इति णिनिः । प्रकृतिप्रदर्शनमिदम् । ठको नित्यत्वात्स एवेत्यस्वपदविग्रहप्रदर्शनम् । **आनुगादिक इति** । 'नस्तद्धिते' इति टिलोपः । इह क्रमेण च 'स्त्रियाम्' इति 'अणिनुणः' इति च सूत्रद्वयं पठितं कृदधिकारे व्याख्यास्यते । **विसारिणो मत्स्ये** । 'अणिनुणः' इति पूर्वसूत्राद् अणित्यनुवर्तते, तदाह **अण् स्यादिति** । मत्स्ये विद्यमानाद् विसा-रिन्शब्दात् स्वार्थे अण् स्यादित्यर्थः । **वैसारिण इति** । 'इनण्यनपत्ये' इति प्रकृति-भावाट्टिलोपो न । **संख्यायाः** । अभ्यावृत्तिशब्देन यदि द्वितीयादिप्रवृत्तिर्गृह्येत, तदा चतु-

---

निर्देशादिति भावः । संस्थानेनेत्यस्यैव व्याख्यानं **तुल्येनेति** । **पितृस्थानीय इति** । स्थानमत्र संबन्धविशेषः । पदमिति यस्य प्रसिद्धिः । पितुरिव स्थानमस्य पितृस्थानः । पितृतुल्य इत्यर्थः । **गोः स्थानमिति** । तिष्ठन्त्यस्मिन्निति स्थानं देशः । इतिकरणं लिङ्गार्थम् । तेन तत्पुरुषो बहुव्रीहिर्वा यस्तुल्यस्थानशब्दस्तस्माच्छो न भवति । **अनुगादिनः** । प्रकृतिस्वरूपप्रदर्शनपरं चैतद् न त्वयं केवलः प्रयोगार्हः, ठको नित्यत्वादिति हरदत्तः । 'सुप्यजातौ-' इति णिनि' । **विसारिणो** । पूर्ववदिहापि णिनिः । हरदत्तस्तु—'सुप्यजातौ-' इति णिनिरुपसर्गभिन्न एव सुप्युपपदे भवतीत्याशयेन पूर्वसूत्रेऽस्मिंश्च अतएव निपातनाद् णिनिरित्याह । तदयुक्तम् , 'स बभूवोपजीविनाम्' 'अनुयायिवर्गः' 'न बध्नीयाः प्रभवोऽनुजीविभिः' इत्यादिप्रयोगानुरोधेन उपसर्गे सुप्युपपदेऽपि णिनेरवश्यस्वीकर्तव्यतया निपातनाश्रयणस्य व्यर्थत्वात् । 'अणिनुणः' इत्यतोऽनुवर्तनादाह **अण् स्यादिति** । **वैसारिण इति** । 'इनण्यनपत्ये' इति

कृत्वसुच् । (५-४-१७) अभ्यावृत्तिर्जन्म । क्रियाजन्मगणनवृत्तेः संख्याशब्दात्स्वार्थे कृत्वसुच्स्यात् । पञ्चकृत्वो भुङ्क्ते । 'संख्यायाः' किम्--भूरिवारान्भुङ्क्ते ।
२०८६ द्वित्रिचतुर्भ्यः सुच् । (५-४-१८) कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिः । 'रात्सस्य' (सू २८०) । चतुः । **२०८७ एकस्य सकृच्च ।** (५-४-१९)

वारं पाकप्रवृत्तौ त्रिः पचतीति स्यादित्यत आह **अभ्यावृत्तिर्जन्मेति ।** उपसर्गवशाद् 'वृतु वर्तने' इति धातोरुत्पत्तौ वृत्तिरिति भावः । कृत्वसुचि चकार इत् । उकार उच्चारणार्थः । 'तद्धितश्चासर्वविभक्तिः' इत्यत्र तसिलादिषु परिगणनात् कृत्वोऽर्थानामव्ययत्वम् । **पञ्चकृत्वो भुङ्क्त इति ।** पञ्चत्वसंख्याकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः । **संख्यायाः किमिति ।** गणने वृत्तिः संख्याशब्दानामेवेति प्रश्नः । **भूरिवारान् भुङ्क्त इति ।** भूरिशब्दो बहुशब्दपर्यायः । वारशब्दस्तु समभिव्याहृतक्रियापर्याप्ते काले वर्तते । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । बहुकालेषु कार्त्स्न्येन व्याप्ता भोजनक्रियेत्यर्थः । भोजनबहुत्वं त्वर्थाद्गम्यते । तथा च वारशब्दोऽयं न गणनवाची । भूरिशब्दोऽपि न संख्याशब्देन गृह्यते । 'बहुगणवतुडति संख्या' इत्यत्र बहुग्रहणेन तत्पर्यायस्य असंख्यात्वबोधनात् । अतोऽत्र न कृत्वसुच् । **द्वित्रिचतुर्भ्यः ।** 'क्रियाभ्यावृत्तिगणने' इत्येव । सुचि चकार इत्, उकार उच्चारणार्थः । पूर्ववदव्ययत्वम् । **त्रिरिति ।** भुङ्क्ते इत्यनुषज्यते । **रादिति ।** चतुर्शब्दात् सुचि चतुर् स् इति स्थिते 'रात्सस्य' इति सकारस्य लोपे चतुरिति

प्रकृतिभावः । **संख्यायाः ।** अभ्यावृत्तिशब्देन यदि द्वितीयादिप्रवृत्तिर्गृह्यते, तदा षट्कृत्वः प्रवृत्तौ पञ्चकृत्व इति स्यात्, अतोऽत्र विवक्षितमर्थमाह **अभ्यावृत्तिर्जन्मेति । भूरिवारानिति ।** भूरिशब्दस्य लौकिकसंख्यावाचित्वेऽपि नेह ग्रहणम् । 'बहुगण–' इति सूत्रे बहुग्रहणस्य नियमार्थत्वाद् 'अनियतसंख्यावाचिनां चेद्भवति बहोरेव' इति नियमशरीरमिति मनोरमा । बहुगणयोरेवेति नियमशरीरमित्यन्ये । वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात् 'कालाध्वनोः–' इति द्वितीयेति हरदत्तः । ननु वारशब्दस्य कालवाचित्वे भूरिशब्दोऽपि तत्समानाधिकरण्याद्वारकाल एव वर्तत इति कथमत्र प्रसङ्ग इति चेत् । अत्राहुः—कालवाचित्वेऽपि क्रियाभ्यावृत्तेरपि गम्यमानत्वात्प्रसङ्ग इति । अभ्यावृत्तिगणने किम्, पञ्चपाका दशपाका इत्यत्र क्रियामात्रगणने माभूत् । क्रियाग्रहणं किमर्थम्, यावताभ्यावृत्तिः क्रियाया एव भवति, साध्यार्थविषयत्वात्तस्याः, न द्रव्यगुणयोः । तयोस्तु सिद्धस्वभावतया शब्दाभिधानात्[1] । पुनःपुनर्दण्डः, पुनःपुनः स्थूलः, इत्यत्रापि गम्यमानाया भवतिक्रियाया एवाभ्यावृत्तिर्न तु द्रव्यगुणयो-

---

१ एतदग्रे 'वस्तुतः' इत्यधिकम् क ।

'सकृत्' इत्यादेशः स्यात्, चात्सुच्। सकृद् भुङ्क्ते। 'संयोगान्तस्य-' (सू २४) इति सुचो लोपः। न तु 'हल्ङ्याप्-' (सू २५२) इति। अभैत्सीदित्यत्र सिच इव सुचोऽपि तदयोगात्। **२०८८ विभाषा बहोर्धाऽविप्रकृष्टकाले।** (५-४-२०) अविप्रकृष्ट आसन्नः। बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते। 'आसन्नकाले' किम्- बहुकृत्वो मासस्य भुङ्क्ते। **२०८९ तत्प्रकृतवचने मयट्।** (५-४-२१) प्राचुर्येण प्रस्तुतं प्रकृतम्, तस्य वचनं प्रतिपादनम्। भावेऽधिकरणे वा ल्युट्।

रूपमित्यर्थः। अत्र भुङ्क्ते इत्यनुषज्यते। **एकस्य सकृच्च।** शेषपूरणेन सूत्रं व्याचष्टे **सकृदित्यादेशः स्यादिति। सकृद् भुङ्क्त इति।** एकशब्दात् सुच्, प्रकृतेः सकृदित्यादेशश्च। अत्र एकशब्दः क्रियाविशेषणम्। एकत्वविशिष्टा भुजिक्रियेत्यर्थः। स्वादु पचति इत्यादिवदेकं भुङ्क्ते इति प्रयोगे प्राप्ते इदं सूत्रमिति कैयटः। एको भुङ्क्ते इत्यत्र तु नायं विधिः प्रवर्तते, क्रियाग्रहणमनुवर्त्य क्रियाविशेषणस्यैव एकशब्दस्य ग्रहणादित्यास्तां तावत्। ननु 'संयोगान्तस्य-' इति सुचो लोप इत्यनुपपन्नम्। 'हल्ङ्याब्भ्यः-' इत्येव हि सुलोपोऽत्र युक्तः। तस्मिन् कर्तव्ये संयोगान्तलोपस्य त्रैपादिकस्यासिद्धत्वादित्यत आह **न तु हल्ङ्याबितीति। सिच इवेति।** अभैत्सीदित्यत्र सिचो लोपनिवृत्तये हल्ङ्याबित्यत्र सिग्रहणेन सिचो न ग्रहणम्, तत्साहचर्यात् सुग्रहणेनापि सुजयं न गृह्यत इति भावः। **विभाषा बहोर्धाऽविप्रकृष्टकाले।** अविप्रकृष्टकालिकक्रियाजन्मगणनवृत्तेर्बहुशब्दाद् धाप्रत्ययो वा स्यात्। पक्षे कृत्वसुच्। **बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्त इति।** दिवसे प्रातःसङ्गवाद्यव्यवहितकालिकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः। 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति दिवसात्षष्ठीति हरदत्तः। शेषत्वविवक्षायां षष्ठी इति तु नवीनाः।

रिति चेत्। नैवम्, उत्तरार्थं क्रियाग्रहणस्यावश्यकत्वात्। **एकस्य सकृच्च।** अभ्यावृत्तिरिति न संबध्यते। एकशब्देन ह्येकैव क्रियाव्यक्तिराख्यायते, तस्यास्त्वावृत्तेरसंभवात्। क्रियाग्रहणमिहार्थमावश्यकम्। अन्यथा 'आ दशतः संख्याः संख्येये वर्तन्ते' इत्येको भुङ्क्ते इत्यत्रापि स्यादिति। इह साधु पचतीत्यादिवदेकं भुङ्क्ते इति प्रयोगे प्राप्ते सकृच्छब्दप्रयोगार्थमिदं सूत्रमिति कैयटः। एकः पाक इत्यत्र तु अनभिधानान्नेति काशिका। **संयोगान्तस्येति।** हल्ङ्यादिना सुलोप इति प्राचो ग्रन्थोऽयुक्त इत्याह **न त्विति।** सुतिसीति साहचर्याद्विभक्तय एव तत्र गृह्यन्त इत्यभिप्रेत्याह **सिच इवेति। बहुधा दिवसस्य भुङ्क्त इति।** शेषत्वविवक्षायां षष्ठी। 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इत्यनेन षष्ठीति हरदत्तोक्तिस्तु नादर्तव्या। शेषाधिकारबलेनाष्टसूत्र्याः समासनिवृत्तिफलकतया तिङन्तेनोदाहरणमिति प्रागुक्तनिष्कर्षविरोधादित्याहुः।

आद्ये प्रकृतमन्नमन्नमयम्। अपूपमयः । यवागूमयी। द्वितीयेऽन्नमयो यज्ञः। अपूपमयं पर्व। २०६० समूहवच्च बहुषु। (५-४-२२) सामूहिकाः प्रत्ययाः

तत्प्रकृतवचने। तदिति प्रथमान्तनिर्देशः। **प्राचुर्येणेति**। बहुलतया उपस्थितं प्रकृतशब्देन विवक्षितमित्यर्थः। उपसर्गबलादिति भावः। **प्रतिपादनमिति**। बोधनमित्यर्थः। **भाव इति**। तथा च प्रकृतस्य बोधने सतीत्यर्थः। प्राचुर्यविशेषणक-वस्तुवृत्तेः प्रथमान्तात्स्वार्थे मयडिति फलति। अत्र प्राचुर्यविशिष्टं वस्तु प्रकृतेरर्थः। प्रत्ययस्तु तद्द्योतकः। **अधिकरणे वेति**। तथा च प्राचुर्यविशेषणकं यद्वस्तु यस्मिन्नुच्यते तदधिकरणे वाच्ये तादृशवस्तुवृत्तेः शब्दाद् मयडिति फलितम्। अत्र पक्षे प्राचुर्यविशिष्टमुच्यमानं वस्तु प्रकृत्यर्थः। तदधिकरणं प्रत्ययार्थः। तन्त्रेणार्थद्वये सूत्रतात्पर्यम्, व्याख्यानात्। यद्यप्याद्यपक्षे स्वार्थिकप्रकरणपाठः समञ्जसः, नतु द्वितीयपक्षे। तथापि 'अथ स्वार्थिकाः' इति मूलं प्रायिकाभिप्रायमिति न दोषः। **आद्य इति**। भावल्युट्पक्षे इत्यर्थः। **प्रकृतमन्नमन्नमयमिति**। प्रचुरमन्नमि-त्यर्थः। स्वार्थिकत्वात्प्रकृतिलिङ्गता। **अपूपमय इति**। प्रचुरोऽपूप इत्यर्थः। **यवागू-मयीति**। प्रचुरा यवागूरित्यर्थः। टित्त्वाद् ङीबिति भावः। **द्वितीय इति**। अधिकरणल्युट्पक्षे इत्यर्थः। **अन्नमयो यज्ञ इति**। 'इष्टिषु दशौदनाः पशौ तं सोमसहस्रम्' इत्यादिवाक्यैरुच्यमानानि प्राचुर्यविशिष्टान्नानीत्यर्थः। अस्वार्थिकत्वेन प्रकृतिलिङ्गत्वाभावाद्विशेष्यनिघ्नता। **अपूपमयं पर्वेति**। पर्वणि प्रचुरा अपूपाः कार्या इत्याद्युच्यमानापूपाधिकरणं पर्वेत्यर्थः। अस्वार्थिकत्वाद्विशेष्यनिघ्नता। केचित्तु द्वितीयपक्षे वचनशब्दोऽधिकरणल्युडन्तः, प्रकृत्यर्थो न विवक्षित इत्याहुः। तथा सति प्राचुर्यविशिष्टान्नाद्यधिकरणं यज्ञ इत्येव बोधः, नतु उच्यमानत्वस्य बोधः। **समूह-वच्च बहुषु**। 'तत्प्रकृतवचने' इत्येव। **सामूहिका इति**। 'तस्य समूहः' इत्यधिकारविहिताः प्रत्यया इत्यर्थः। बहुषु प्राचुर्यविशिष्टेषु वर्तमानाच्छब्दात् स्वार्थे

तत्प्रकृत। प्राचुर्येण प्रस्तुतमिति। यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः, तथापि वचनग्रहणादयं विशेषो लभ्यते। वचनग्रहणं हि यादृशस्य प्रकृतस्य लोके मयटा वचनं प्रत्यायनं तत्र यथा स्यादित्येवमर्थम्। **आद्य इति**। प्रथमान्तात्प्रकृते द्योत्ये प्रत्ययः। स्वार्थिकत्वात्प्रकृतितो लिङ्गवचनम्। अपूपमयमित्यपि क्वचित्पठ्यते। प्रस्तुतोऽपूपोऽपूपमयम्। क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते। अस्मिन्पक्षे तद्ग्रहणं व्यर्थम्। द्वितीये त्वावश्यकं प्रथमान्तादेव प्रत्ययलाभार्थम्। **द्वितीय इति**। अस्मिन्पक्षे उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणम्। ल्युटोक्त-मधिकरणं तु मयडर्थः। अतएव विशेष्यनिघ्नता, तदाह **अन्नमयो यज्ञ इति**।

अतिविरयन्ते, चाम्मयट्। मोदकाः प्रकृता मौदकिकम्, मोदकमयम्। शाष्कुलिकम्, शष्कुलीमयम्। द्वितीयेऽर्थे मौदकिको यज्ञः, मोदकमयः। २०६१ अनन्तावसथेतिहभेषजाञ्ञ्यः। (५-४-२३) अनन्त एव आनन्त्यम्। आवसथ एव आवसथ्यम्। इतिह इति निपातसमुदायः। ऐतिह्यम्। भेषजमेव भैषज्यम्। २०६२ देवतान्तात्तादर्थ्ये यत्। (५-४-२४) तदर्थ एव तादर्थ्यम्। स्वार्थे ष्यञ्। अग्निदेवतायै इदमग्निदेवत्यम्। पितृदेवत्यम्। २०६३ पादार्घा-

---

समूहवत्प्रत्ययाः स्युरित्यर्थः। यद्वा बहुत्वविशिष्टानि प्राचुर्यविशिष्टानि वस्तूनि यस्मिन्नधिकरणे उच्यन्ते, तदधिकरणे वाच्ये तद्वस्तुवृत्तेः शब्दात् समूहवत्प्रत्ययाः स्युरित्यर्थः। आद्ये उदाहरति **मोदकाः प्रकृताः मौदकिकमिति**। 'अचित्तहस्तिधेनोः—' इति सामूहिकष्ठक्। स्वार्थिकत्वेऽपि प्रकृतिलिङ्गातिक्रमः कुटीरवत्। **शाष्कुलिकमिति**। शष्कुल्यः प्रचुरा इत्यर्थः। पूर्ववट्ठक्, प्रकृतिलिङ्गातिक्रमश्च। **द्वितीयेऽर्थे मौदकिको यज्ञ इति**। मोदका अस्मिन्यज्ञे उच्यन्त इति विग्रहः। **अनन्तावसथेतिह**। अनन्त, आवसथ, इतिह, भेषज एभ्यः स्वार्थे ञ्यप्रत्ययः स्यादित्यर्थः। **अनन्त एवेति**। अन्तो नाशः। तस्याभावः अनन्तः। अर्थाभावे नञ्तत्पुरुषः, अर्थाभावे अव्ययीभावेन तद्विकल्पस्योक्तत्वात्। **आनन्त्यमिति**। स्वार्थिकत्वेऽपि प्रकृतिलिङ्गव्यतिक्रमः। आवसथो गृहम्। **निपातसमुदाय इति**। स च उपदेशपारम्पर्ये वर्तते। तस्मात्स्वार्थे ञ्यः। 'पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम्।' इत्यमरः। **भैषज्यमिति**। भेषजम् औषधम्, तदेव भैषज्यम्। 'भेषजौषधभैषज्यानि' इत्यमरः। **देवतान्तात्तादर्थ्ये यत्। तदर्थ एवेति**। तच्छब्देन देवतान्तस्यार्थ उच्यते, तस्मै अयं तदर्थः, ततः स्वार्थे चतुर्वर्णादित्वात् ष्यञित्यर्थः। देवतान्तात्प्रातिपदिकाद् यत्स्यात्प्रकृत्यर्थार्थे वस्तुनि वाच्य इत्यर्थः। त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्या चेत्युक्तं 'सास्य देवता' इत्यत्र। अतः पितृदेवत्यं रक्षोदेवत्यमित्यादौ नाव्याप्तिः, तदाह **पितृदेवत्यमिति**। देवताशब्दस्य देवा मनुष्या पितरः असुरा रक्षांसि पिशाचा इत्यादि श्रुतिपुराणादिप्रसिद्धजातिविशेषपरत्वे तु अत्राव्याप्तिः स्यादिति भावः। भाष्ये तु पितृदेवत्यमिति न

अन्नं प्रकृतमुच्यते अस्मिन्नित्यर्थः। **मौदकिकम्। शाष्कुलिकमिति**। 'अचित्तहस्तिधेनोष्ठक्'। **आवसथ इति**। 'उपसर्गे वसेः' इत्यथप्रत्ययः। **निपातसमुदाय इति**। उपदेशपारम्पर्ये वर्तते वचनाच्चाप्रातिपदिकादेव प्रत्ययः। **ऐतिह्यमिति**। 'इतिहाव्ययम्' इति कोशः। **भेषजमिति**। भिषज्यतेः कण्ड्वादियगन्तात्क्विप्। भिषजामिदं भेषजम्। अस्मादेव निपातनादेकारः। **पितृदेवत्यमिति**। पितरश्च

भ्यां च। (५-४-२५) पादार्थमुदकं पाद्यम्। अर्घ्यम्। 'नवस्य नू आदेशो त्नप्तनप्खाश्च प्रत्यया वक्तव्याः' (वा ३३२७)। नूत्नम्, नूतनम्, नवीनम्। 'नश्च पुराणे प्रात्' (। ३३२८)। पुराणार्थे वर्तमानात्प्रशब्दान्नो वक्तव्यः, चात्पूर्वोक्ताः। प्रणम्, प्रत्नम्, प्रतनम्, प्रीणम्। 'भागरूपनामभ्यो धेयः' (वा ३३३०)। भागधेयम्। रूपधेयम्। नामधेयम्। 'आग्नीध्रसाधारणादञ्' (वा ३३३४)। आग्नीध्रम्। साधारणम्। स्त्रियां ङीप्। आग्नीध्री। साधारणी। २०६४ **अतिथेर्ञ्यः।** (५-४-२६) 'तादर्थ्ये' इत्येव। अतिथये इदमातिथ्यम्। २०६५ **देवात्तल्।** (५-४-२७) देव एव देवता। २०६६ **अवेः कः।** (५-४-२८)

सिध्यतीत्याक्षिप्य दिवेरैश्वर्यकर्मणो देवः, तस्मात्स्वार्थे तलिति समाहितम्। हविः प्रति पित्रादीनामीश्वरत्वं स्वामित्वम्। हविस्तु यजमानस्य स्वम्। तच्च यजमानेन अग्न्याद्युद्देशेन त्यक्तं चेत्तदाग्न्यादिस्वामिकं भवितुमर्हति। अतो देवतात्वं त्यज्यमानद्रव्योद्देश्यत्वविशेषात्मकमेव भाष्यरीत्यापि पर्यवस्यतीत्यलम्। **पादार्घाभ्यां च।** तादर्थ्ये यदिति शेषः। **अर्घ्यमिति।** अर्घार्थमुदकमिति विग्रहः। अर्घः पूजा। 'मूल्ये पूजाविधावर्घः' इत्यमरः। **नवस्येति।** वार्तिकमिदम्। एते प्रत्यया अत्यन्तस्वार्थिकाः। **नवीनमिति।** नवशब्दात् खप्रत्यये, तस्य ईनादेशे, प्रकृतेर्नूभावे, ओर्गुणः, अवादेशः। **नश्च पुराणे प्रादिति।** वार्तिकमिदम्। **चात्पूर्वोक्ता इति।** त्नप्, तनप्, ख इत्यर्थः। **प्रीणमिति।** खे रूपम्। **भागरूपेति।** वार्तिकमिदम्। **आग्नीध्रेति।** वार्तिकमिदम्। **आग्नीध्रमिति।** अग्नीधः शरणम् आग्नीध्रम्। ततः स्वार्थे अञि आग्नीध्रमेव। अनेकं प्रत्यविशिष्टसम्बन्धं साधारणमुच्यते। ततः स्वार्थे अञि साधारणमित्येव। अञ्विधेः प्रयोजनमाह **स्त्रियां ङीबिति। अतिथेर्ञ्यः। तादर्थ्ये इत्येवेति।** अतिथये इदमित्यर्थे अतिथिशब्दाच्चतुर्थ्यन्ताद् ञ्यः स्यादित्यर्थः। **देवात्तल्।** 'तादर्थ्ये' इति निवृत्तम्। अत्यन्तस्वार्थिकोऽयं तल्।

ता देवताश्च पितृदेवताः। पितृदेवताभ्य इदमिति विग्रहः। **अर्घ्यमिति।** 'मूल्ये पूजाविधावर्घः' इत्यमरः। **पूर्वोक्ता इति।** त्नप्तनप्खप्रत्यया इत्यर्थः। **आग्नीध्रमिति।** 'अग्नीधः शरणे रण् भं च' इति शैषिकेषु व्युत्पादितम्, तच्चान्तोदात्तम्, ततः स्वार्थेऽनेनाञ्। आद्युदात्तत्वं फलम्। फलान्तरमप्याह **स्त्रियामिति। आग्नीध्रीति।** शालेति विशेष्यम्। समानं धारणमस्याः साधारणी। अनेकं प्रत्यविशिष्टसम्बन्धो भूम्यादिः। पृषोदरादित्वात्समानस्य सभावः। विभाषाप्रकरणादञभावे टाप्। आग्नीध्रा शाला। साधारणा भूमिः। नन्वञभावपक्षे समानस्य सभावेऽपि साधारण इत्येव स्यान्न त्वत्रादिवृद्धिरिति चेद् अत्राहुः—'साधारणादञ्' इत्यत एव निपातनात्

अविरेवाविकः । २०६७ **यावादिभ्यः कन्।** (५-४-२९) याव एव यावकः । मणिकः । २०६८ **लोहितान्मणौ।** (५-४-३०) लोहित एव लोहितको मणिः । २०६९ **वर्णे चानित्ये।** (५-४-३१) लोहितकः कोपेन । 'लोहितालिङ्गबाधनं वा' (वा ३३२२) । लोहितिका, लोहिनिका कोपेन ।

देवतेति। स्वार्थिकत्वेन प्रकृतिलिङ्गातिक्रमात् स्त्रीत्वम् । **अवेः कः** । अयमपि केवलस्वार्थिकः । 'अवयः शैलमेषार्काः' इत्यमरः । **यावादिभ्यः कन्। यावक इति** । यवानामयं याव ओदनादिः, स एव यावकः । अलक्तकवृक्षो वा यावः, स एव यावकः 'यावोऽलक्तो द्रुमालयः' इत्यमरः । **लोहितान्मणौ** । मणौ वर्तमानाद् लोहितशब्दात्स्वार्थे कन् स्यादित्यर्थः । माणिक्यमयो मणिरेवेह मणिर्विवक्षितः । यस्तु जपाकुसुमादिनिमित्तलौहित्यवान् स्फटिकमणिस्तस्य तु 'रक्ते' इत्युत्तरसूत्रेण सिद्धम् । **वर्णे चानित्ये** । अनित्ये वर्णे विद्यमानाद् लोहितशब्दात्स्वार्थे कन् स्यादित्यर्थः । अमण्यर्थमिदम् । **लोहितकः कोपेनेति** । देवदत्तादिरिति शेषः । कोपनिमित्तकं देवदत्तादेर्लौहित्यमनित्यमेव, कोपाभावे तदभावात् । यद्यपि माणिक्यमणिलौहित्यमपि अनित्यमेव, माणिक्ये नष्टे तन्नाशात् । तथापि आश्रयद्रव्यस्य उत्पत्तिप्रभृति नाशपर्यन्तं यो वर्णो वर्तते, स वर्णो नित्य इत्यभिमतमिति न दोषः । स्यादेतत्, लोहिनिका लोहितिका वा कोपेनेति स्त्रियां रूपद्वयमिष्यते । तत्र लोहितशब्दाद् 'वर्णादनुदात्तात्–' इति नत्वसंनियोगशिष्टं ङीपं परत्वात् स्वार्थिकतया अन्तरङ्गत्वाच्च बाधित्वा कनि कृते सति नत्वसंनियोगशिष्टङीपो न प्रसक्तिः, कोपधत्वेन तोपधत्वाभावात् । ततश्च लोहितकशब्दाद् 'अजाद्यतः–' इति टापि 'प्रत्ययस्थात्–' इति इत्वे लोहितिकेत्येव स्यात्, नतु तत्र लोहिनिकेति, अत आह **लोहितालिङ्गबाधनं वेति** । वार्तिकमिदम् । लोहितशब्दात्परस्य स्त्रीलिङ्गबोधकप्रत्ययस्य कना बाधो वा स्यादित्यर्थः । असति तु कना ङीपो बाधे लोहिनीशब्दात् कनि

समानस्य साभावविधानाद्वा इष्टसिद्धिरिति । **देवतेति** । तलन्तं स्त्रियाम् । **वर्णे चानित्ये** । अनित्ये किम्, लोहितं रुधिरम् । लोहिता लाक्षा । अनित्यत्वमिह समानाधिकरणध्वंसप्रतियोगित्वम् । अतएव 'रक्ते' इत्युत्तरसूत्रे सार्थकम् । लाक्षादिना रक्ते लौहित्यस्य यावदाश्रयमवस्थानेन नित्यतया पूर्वेणासिद्धेः । **लोहितक इति** । कोपेन लोहितो यः पुरुषस्तस्मिन्नेव क्षणादूर्ध्वं कोपशान्तौ लौहित्यं नश्यतीति भवत्यत्रानित्यो वर्णः । 'प्रातिपदिकात्तद्धिताः' इति पक्षस्य प्रतिपदविधानमात्रेणापवादत्वमिति पक्षस्य चाश्रयणे 'वर्णादनुदात्तात्–' इत्यतः प्रागेव कनि कृते लोहितिकेति रूपं न स्यादित्याशङ्कायामाह **लिङ्गबाधनं वेति** । लोहितादित्युपलक्षणम् । एतिका

२१०० रक्ते । (५-४-३२) लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन्स्यात् । 'लिङ्गबाधनं वा' (३३२२) इत्येव । लोहितिका, लोहिनिका शाटी । **२१०१ कालाच्च ।** (५-४-३३) 'वर्णे चानित्ये' (सू २०११) 'रक्ते' (सू २१००) इति सूत्रद्वयमनुवर्तते । कालकं मुखं वैलक्ष्येण । कालकः पटः । कालिका शाटी । **२१०२ विनयादिभ्यष्ठक् ।** (५-४-३४) विनय एव वैनयिकः । सामयिकः । 'उपायाद्ध्रस्वत्वं च' (ग सू १४४) । औपयिकः । **२१०३ वाचो व्याहृतार्थायाम् ।** (५-४-३५) सन्दिष्टार्थायां वाचि विद्यमानाद्वाक्शब्दात्स्वार्थे ठक्

'केऽणः' इति ह्रस्वे कन्नन्ताट्टापि लोहिनिकेति सिध्यति । सति तु कना ङीपो बाधे लोहिताशब्दात् कनि 'केऽणः' इति ह्रस्वे टापि लोहितिकेति भवति । ननु 'ङ्याप् प्रातिपदिकात्' इत्यत्र लिङ्गविशिष्टपरिभाषयैव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तादेव तद्धिता भवन्ति, न तु ङ्याब्भ्यां प्रागित्येवमर्थमित्युक्तम् । एवं च ङीपः प्राक् कनः प्रसक्तेरेवाभावादिदं वार्तिकं व्यर्थमिति चेत्, अत एव वार्तिकाल्लिङ्गात्स्वार्थिकतद्धितेषु ङ्याब्ग्रहणं न संबध्यते । न च सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात् 'कुत्सिते' इति सूत्रस्थभाष्यरीत्या स्वार्थद्रव्यलिङ्गसंख्याकारककुत्सादिप्रयुक्तकर्याणां क्रमिकतया ङ्याबन्तादेव सुपि ततः कनि रूपसिद्धेर्वचनमिदं व्यर्थमिति वाच्यम्, अत एव स्वार्थिकतद्धितानां प्रातिपदिकादेव प्रवृत्तिविज्ञानादित्यन्यत्र विस्तरः । **रक्ते ।** लाक्षादिना रक्ते पटादौ लौहित्यस्य यावद्द्रव्यमवस्थानेन नित्यतया पूर्वेणाप्राप्तौ वचनम् । **कालाच्च । द्वयमनुवर्तत इति ।** अनित्ये वर्णे रक्ते च वर्तमानात्स्वार्थे कनिति फलितम् । अनित्ये वर्णे उदाहरति **कालकं मुखं वैलक्ष्येणेति ।** लज्जासूयादिनेत्यर्थः । रक्ते उदाहरति **कालकः पट इति ।** नील्यादिनेति शेषः । **विनयादिभ्यः । उपायाद् ध्रस्वत्वं चेति ।** गणसूत्रमिदम् । उपायशब्दात्स्वार्थे ठक् । प्रकृतेर्दीर्घस्य ह्रस्वत्वं चेत्यर्थः । ह्रस्वस्य ह्रस्वविधौ वैयर्थ्याद्दीर्घस्येति गम्यते । **वाचो व्याहृतार्थायाम् ।** इदम् अस्य वक्तव्यमिति दूतं प्रति योऽर्थ उच्यते स व्याहृतः, व्याहृतः

एनिकेत्यादेरपि संग्राह्यत्वात् । 'सुबन्तात्तद्धिताः' इति पक्षस्य 'निरवकाशत्वमपवादत्वम्' इति पक्षस्य च मुख्यत्वात्तदाश्रयणे तु 'वर्णादनुदात्तात्—' इत्यस्यानन्तरमेव कनः प्रवृत्तेः कन्प्रत्ययस्य पुँल्लिङ्गे सावकाशतया निरवकाशत्वाभावाच्च वार्तिकमिदं न कर्तव्यम् । अतएव ङ्याब्ग्रहणं व्यर्थमिति स्वाम्पीति रूपं प्रबलमिति च मनोरमादावुक्तमिति दिक् । **उपाय इति ।** उपायशब्दष्ठकं लभते ह्रस्वत्वं चेत्यर्थः । अकस्माच्छब्दोऽत्र पठ्यते स तु दान्तो न तु तान्तः । तेन कादेशो न । 'अव्ययानां भमात्रे टिलोपः' । आकस्मिकम् । **वाचो व्याहृता ।** व्याहृतार्थायां किम्, मधुरा वाग्देवदत्तस्य ।

स्यात्। 'सन्देशवाग्वाचिकं स्यात्' इत्यमरः। **२१०४ तद्युक्तात्कर्मणोऽण्।** (५-४-३६) कर्मैव कार्मणम्। वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः। **२१०५ ओषधेरजातौ।** (५-४-३७) स्वार्थेऽण्। औषधं पिबति। 'अजातौ' किम्-ओषधयः क्षेत्रे रूढाः। **२१०६ प्रज्ञादिभ्यश्च।** (५-४-३८) प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। दैवतः। बान्धवः। **२१०७ मृदस्तिकन्।** (५-४-३९) मृदेव मृत्तिका। **२१०८ सस्नौ प्रशंसायाम्।** (५-४-४०) रूपपोऽपवादः। प्रशस्ता मृत् मृत्स्ना मृत्स्ना। उत्तरसूत्रे अन्यतरस्यांग्रहणान्नित्योऽयम्। २१०९

अर्थो यस्या इति विग्रहः, तदाह **संदिष्टार्थायामिति। तद्युक्तात्।** संदिष्टार्थया दूतवाचा यत्प्रयुक्तं कर्म तदभिधायिनः कर्मन्शब्दात्स्वार्थे अणित्यर्थः। **कर्मैव कार्मणमिति।** अन्निति प्रकृतिभावात्र टिलोपः। दूतवाक्यं श्रुत्वा तथैव यत्क्रियते कर्म तत्कार्मणमुच्यते, तदाह **वाचिकं श्रुत्वेति। ओषधेरजातौ। औषधं पिबतीति।** शुण्ठीमरीचादिचूर्णमद्यादिद्रव्यसंसृष्टं विवक्षितम्। तस्य न जातिवचनत्वमिति भावः। **क्षेत्रे रूढा इति।** उत्पन्ना इत्यर्थः। शाल्यादिसस्यात्मका इति फलितम्। **प्रज्ञादिभ्यश्च। स्वार्थे** अणिति शेषः। **प्राज्ञ इति।** प्रजानातीति प्रज्ञः, 'इगुपधज्ञा-' इति कः। प्रज्ञशब्दात्स्वार्थे अण्। **प्राज्ञीति।** अणन्तत्वाद् ङीप्। प्रज्ञा अस्यास्तीति विग्रहे तु 'प्रज्ञाश्रद्धार्चाभ्यः-' इति णान्तात् टापि प्राज्ञेति रूपम्। **मृदस्तिकन्।** मृद्शब्दात्स्वार्थे तिकन्नित्यर्थः। **सस्नौ।** प्रशस्तायां मृदि वर्तमानाद् मृच्छब्दात्स्वार्थे स स्न एतौ प्रत्ययौ स्त इत्यर्थः। **रूपप इति।** 'प्रशंसायां रूपप्' इति विहितस्येत्यर्थः। **नित्योऽयमिति।** सस्नविधिरित्यर्थः।

वाचिकमिति। 'स्वार्थिकाः क्वचिल्लिङ्गमतिवर्तन्ते' इति नपुंसकत्वम्। **प्रज्ञ एवेति।** प्रजानातीति प्रज्ञः। 'इगुपधज्ञा-' इति कः। ततः स्वार्थेऽण्, प्राज्ञः। **प्राज्ञीति।** 'टिड्ढा-' इति ङीप्। प्रज्ञानं प्रज्ञा। 'आतश्चोपसर्गे-' इत्यङि टाप्। प्रज्ञा विद्यते यस्याः सा तु प्राज्ञा भवति। 'प्रज्ञाश्रद्धार्चाभ्यः-' इति णः। **मृदस्तिकन्।** 'प्रत्ययस्थात्-' इत्येव सिद्धे इकारोच्चारणं प्रक्रियालाघवार्थम्, टापो लुक्यपि श्रवणार्थं च। पञ्चभिर्मृत्तिकाभिः क्रीतः पञ्चमृत्तिकः पटः। **सस्नौ।** इह 'प्रशंसायां रूपप्' इत्यस्यानन्तरं 'वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि'। 'मृदः सस्नौ' 'तिकंश्च' इति वक्तुमुचितम्। न चैवं सस्नाविव तिकन् प्रत्ययोऽपि प्रशंसायामेवेत्यतिप्रसङ्गः। 'तिकंश्च' इत्यत्र 'प्रशंसायाम्' इति निवृत्तमिति कल्पनायां मानाभावादिति वाच्यम्, 'मृदः सस्नतिकनः' इति वक्तव्ये तिकनः पृथक्करणस्यैव तत्र मानत्वात्। **प्रशस्ता मृदिति।** 'मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका' इत्यमरः। **नित्योऽयमिति।**

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् । (५-४-४२) बहूनि ददाति बहुशः । अल्पानि अल्पशः । 'बह्वल्पार्थान्मङ्गलामङ्गलवचनम्' (वा ३३३८) । नेह—बहूनि ददात्यनिष्टेषु, अल्पं ददात्याभ्युदयिकेषु । २११० **संख्यैकवचनाच्च वीप्सायाम्** । (५-४-४३) द्वौ द्वौ ददाति द्विशः । माषं माषं माषशः ।

वस्तुतस्तु 'ङ्यादयः प्राग्वुनः' इत्यादिपरिगणितेषु अनयोः प्रत्ययोरनन्तर्भावाद-नित्यत्वमेवानयोरुचितमित्याहुः । **बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्** । बह्वल्पा-र्थाच्च कारकाभिधायिनः शब्दात्स्वार्थे शस्प्रत्ययो वा स्यादित्यर्थः । **बह्वल्पार्थादिति** । वार्तिकमिदम् । मङ्गलामङ्गले गम्ये एवायं शसित्यर्थः । **बहूनि ददात्यनिष्टेष्विति** । भयादिनिमित्तेष्वित्यर्थः । **अल्पं ददात्याभ्युदयिकेष्विति** । अभ्युदयः श्रेयः, तत्प्रयोजनकेष्विष्टापूर्तेष्वित्यर्थः । आभ्युदयिकेषु बहुदानं अनिष्टेषु अल्पदानं च मङ्गलम् । तद्विपरीतदानं तु अमङ्गलमिति भावः । अर्थग्रहणाद् भूरिशो ददाति, स्तोकशो ददाति इत्याद्यप्युदाहार्यम् । **संख्यैकवचनाच्च** । सङ्ख्या च एकवचनं चेति समा-हारद्वन्द्वात्पञ्चमी । एकत्वविशिष्टोऽर्थ उच्यतेऽनेनेत्येकवचनः । एकत्वविशिष्टस्यार्थस्य वचन इति विग्रहः । सङ्ख्यावाचकात्तदन्यस्माच्चैकत्वविशिष्टवाचकात्कारकाभिधायिनः प्रातिपदिकाद् वीप्सायां शस् वेत्यर्थः । सङ्ख्यावाचिन उदाहरति **द्वौ द्वौ ददातीति** । 'नित्यवीप्सयोः' इति द्विर्वचनम् । द्विश इत्यत्र तु न । शसैव वीप्साया उक्तत्वात् । 'तद्धितश्चासर्वविभक्तिः' इत्यत्र 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इति परि-गणनात् शसादीनां डाच्पर्यन्तानामव्ययत्वम् । एकत्वविशिष्टवाचिन उदाहरति **माषं माषं माषश इति** । माषं माषमित्यनन्तरं ददातीति शेषः । माष-

---

मृदित्येतावदुक्ते प्रशस्तत्वानवगमाद्विभाषात्र नानुवर्तत इति सत्वा वेत्ययं विधिर्नित्य एव । उत्तरसूत्रस्थान्यतरस्यांग्रहणात्तु सुतरामिति भावः । **बह्वल्पार्थात्** । **बहूनीति** । बहुभ्यो ददाति बहुशः, अल्पेभ्योऽल्पश इत्याद्यपि बोध्यम् । बह्वल्पार्थात्किम् , गां ददाति । अश्वं ददाति । अर्थग्रहणात्पर्यायेभ्यो विशेषेभ्यश्च । भूरिशो ददाति । त्रिशः । कारकात्किम्, बहूनां स्वामी, अल्पानां स्वामी । **मङ्गलवचनमिति** । 'बहुशो ददात्याभ्युदयिकेषु कर्मसु । अल्पशो ददात्यनिष्टेषु' । आभ्युदयिकेषु बहुदानम् अनिष्टेष्वल्पदानं च मङ्गलम् । तद्वैपरीत्येन दानं तु मङ्गलं न भवतीत्याशयेनाह **नेहेति** । **अनिष्टेष्विति** । भयादिनिमित्तेषु दानेषु । **आभ्युदयिकेष्विति** । अभ्युदयप्रयोजनेष्वग्न्याधेयादिषु । मूलपुस्तके तु 'मङ्गलामङ्गलवचनम्' इति प्रायेण पठ्यते । तत्रामङ्गलग्रहणं वृथेत्याहुः । प्रायिकं चैतन्मङ्गलवचनमन्यत्रापि हि दृश्यते— 'अपेतापोढमुक्तपतितापत्रस्तैरल्पशः' इति । कारकत्वं तु समसनक्रियां प्रति पञ्चम्याः

प्रस्थशः। परिमाणशब्दा वृत्तावेकार्था एव। 'संख्यैकवचनात्' किम्—घटं घटं

शब्दः परिमाणविशेषवाची। **प्रस्थश इति**। प्रस्थं प्रस्थं ददातीति विग्रहः। ननु घटं घटं ददातीत्यत्रापि घटश इति स्यात्, घटशब्दस्याप्येकत्वविशिष्टार्थवाचकत्वात्। न च एकत्वविशिष्टस्यैवार्थस्य वाचक एकवचनशब्देन विवक्षितः। घटशब्दस्तु नैवम्। घटौ घटा इत्यादौ द्वित्वबहुत्वविशिष्टवाचकत्वादिति वाच्यम्, एवं सति माषशः प्रस्थश इत्यत्रापि शसभावप्रसङ्गादित्यत आह **परिमाणशब्दा वृत्तावेकार्था एवेति**। अयमाशयः—समासादिवृत्तौ एकत्वविशिष्टस्यैवार्थस्य वाचका एकवचनशब्देन विवक्षिताः। तथाविधाश्च परिमाणशब्दा एव, नतु घटादिजातिशब्दा अपि। माषदातेत्युक्ते हि माषपरिमितस्य हिरण्यादेर्दातेति प्रतीयते, नतु माषाणामिति। अतो माषशब्दोऽयं भवति वृत्तावेकत्वविशिष्टार्थनियतः। एवं प्रस्थादिशब्दोऽपि। घटशब्दस्तु नैवम्, घटदातेत्युक्ते घटानां दातेत्यपि प्रतीतेः। एतदेवाभिप्रेत्य प्रत्युदाहरति **घटं घटमिति**। एतत्सर्वं जयादित्यमतम्। वामनस्तु उक्तनियमे प्रमाणाभावाद् जातिशब्देभ्योऽपि शस् भवत्येव, एकवचनग्रहणं तु घटौ घटौ ददातीत्यादौ शसभावार्थमित्याह। एकैकशः पितृसंयुक्तानित्यत्र तु शसैव वीप्साया उक्तत्वाद् द्विर्वचनमार्षमिति हरदत्तः। प्रत्याहाराह्निकभाष्ये 'एकैकशः सहस्रकृत्वः'

कर्मत्वात्तदभिधायकत्वाच्चाल्पशब्दस्य। तथा च व्याचक्षते—अल्पा पञ्चमी समस्यत इति। आचार्येणेति शेषः। **परिमाणशब्दा इति**। तथा चैकवचनग्रहणेन एकोऽर्थ उच्यते येनेत्यर्थकेन वृत्तावेकार्थतानियताः परिमाणशब्दा एव गृह्यन्त इति भावः। माषं माषमिति। माषदातेत्युक्ते माषमात्रस्य हिरण्यादेर्दातेति प्रतीयते, न तु माषाणामिति प्रतीतिरिति भवत्ययं वृत्तावेकार्थतानियमः। एवं प्रस्थादिरपि। घटादयस्तु नैवम्। घटदातेत्युक्ते तु घटानां दातेत्यर्थस्यापि प्रतीयमानत्वात्। अतएव च प्रत्युदाहरति **घटं घटमिति**। घटादयो हि जातिशब्दा नैकार्था भवन्ति, जातियोगस्यैकानेकसाधारणत्वात्, किं त्वभेदैकत्वसंख्यामुपाददते। एतच्च सर्वं जयादित्यमतानुसारेणोक्तम्। वामनमते जातिशब्देभ्योऽपि भवत्येव। तथा च 'जश्शसोः' इति सूत्रे तेनोक्तम् 'जसा सह चरितस्य शसो ग्रहणादिह' न भवति। 'कुण्डशो ददाति वनशः प्रविशति' इति, तस्यायमाशयः—जातिशब्दोऽपि यद्यर्थप्रकरणादिना वृत्तावेकार्थो भवति, तदा भवत्येव ततोऽपि शसिति। अथ कथम् 'एकैकशः पितृसंयुक्तान्' इति द्विर्वचनशसोः सह प्रयोग इति चेत्। छन्दोवदृषयः कुर्वन्तीति हरदत्तः। अतएव 'सुपः' इति सूत्रे एकैकश इति प्राचो ग्रन्थः प्रामादिक इत्यवोचामेति मनोरमायां स्थितम्। वस्तुतस्तु एकैकमेव एकैकशः। स्वार्थे शस्, न तु वीप्सायाम्, 'एका कपिला-

ददाति। 'वीप्सायाम्' किम्—द्वौ ददाति। 'कारकात्' इत्येव। द्वयोर्द्वयोः स्वामी। **२१११ प्रतियोगे पञ्चम्यास्तसिः। (५-४-४४)** प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात्। प्रद्युम्नः कृष्णतः प्रति। 'आद्यादिभ्य उपसंख्यानम्' (वा ३३३१)। आदौ आदितः। मध्यतः। अन्ततः। पृष्ठतः। पार्श्वतः। आकृतिगणोऽयम्। स्वरेण स्वरतः। वर्णतः। **२११२ अपादाने चाहीयरुहोः। (५-४-४५)** अपादाने या पञ्चमी तदन्तात्तसिः स्यात्। ग्रामादागच्छति। ग्रामतः। 'अहीयरुहोः' किम्—स्वर्गाद्धीयते। पर्वतादवरोहति। **२११३ अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः। (५-४-४६)** अकर्तरि तृतीयान्ताद्वा तसिः स्यात्। अतिक्रम्य ग्रहोऽतिग्रहः। चारित्रेणातिगृह्यते। चारित्रतोऽतिगृह्यते। चारित्रेणान्यानतिक्रम्य वर्तत इत्यर्थः। अव्यथनमचलनम्। वृत्तेन न व्यथते। वृत्ततो न व्यथते।

इति भाष्यप्रयोगात् स्वार्थिकशसा समाधेयमित्यन्ये। **प्रतियोगे। विहितेति।** 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति प्रतेः कर्मप्रवचनीयत्वे तद्योगे 'प्रतिनिधिप्रतिदाने च यस्मात्' इति पञ्चमी विहितत्यर्थः। **प्रद्युम्नः कृष्णतः प्रतीति।** कृष्णस्य प्रतिनिधिरित्यर्थः। **आद्यादिभ्य इति।** अयं सार्वविभक्तिकस्तसिः। **अपादाने चाहीयरुहोः।** अहीयरुहोरिति छेदः। हीयते इत्यादौ कर्मणि लकारे यगन्तस्य एकदेशस्य हीयेत्यनुकरणम्। हीयरुहोः संबन्धि यत्र भवति तस्मिन्नपादाने इत्यर्थः। **अतिग्रहाव्यथन। अतिक्रम्य ग्रह इति।** लोकवृत्तमतिक्रम्य तद्विलक्षणतया प्रतीयमानत्वमित्यर्थः। **चारित्रेणेति।** चरित्रमेव चारित्रम्, तेन हेतुना इतरविलक्षणत्वेन दृश्यत इत्यर्थः। फलितमाह **अन्यानतिक्रम्य वर्तत इति।** 'व्यथ

मेकैकशः सहस्रकृत्वो दत्त्वा' इति भाष्यादिति 'तान्येकवचन–' इत्यादिसूत्रे वक्ष्यामः। **द्वौ ददातीति।** कथं तर्हि—'अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। सहस्रशः समेतानां परिषत्त्वं न विद्यते' इति। न ह्यत्र वीप्सास्ति, नापि कारकत्वमिति चेत्। अत्राहुः—सहस्रं सहस्रं ये समेतास्तेषामपि परिषत्त्वं नेत्यर्थः। तथा च समवायक्रियां प्रति कर्तृत्वं वीप्सा चास्त्येवेति। एतेन 'एकश एकवचनादिसंज्ञानि स्युः' इति व्याख्यातम्। एकशब्दार्थस्यास्तिक्रियां प्रति कर्तृत्वात्। **कृष्णतः प्रतीति।** 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति कर्मप्रवचनीयसंज्ञायां 'प्रतिनिधिप्रतिदाने च यस्मात्' इति पञ्चमी। **आद्यादिभ्य इति।** 'तस्यादित उदात्तमर्धह्रस्वम्' इत्येतदत्र लिङ्गम्। **ग्रामत इति।** एवम् अध्ययनात्पराजयते अध्ययनत इत्याद्यपि बोध्यम्। **अतिगृह्यत इति।** अन्यातिक्रमेण लोकैर्गृह्यत इत्यर्थः। फलितमाह **अन्यानतिक्रम्य**

वृत्तेन न चलतीत्यर्थः। क्षेपे-वृत्तेन क्षिप्तः। वृत्ततः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः। 'अकर्तरि' इति किम्-देवदत्तेन क्षिप्तः। **२११४ हीयमानपापयोगाच्च।** (५-४-४७) हीयमानपापयुक्तादकर्तरि तृतीयान्ताद्वा तसिः। वृत्तेन हीयते। वृत्तेन पापः। वृत्ततः। क्षेपस्याविवक्षायामिदम्। क्षेपे तु पूर्वेण सिद्धम्। 'अकर्तरि' इति किम्-देवदत्तेन हीयते। **२११५ षष्ठ्या व्याश्रये।** (५-४-४८) षष्ठ्यन्ताद्वा तसिः स्यान्नानापक्षसमाश्रयणे। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। अर्जुनस्य कर्णस्य पक्षे इत्यर्थः। 'व्याश्रये' किम्-वृक्षस्य शाखा। **२११६ रोगाच्चापनयने।** (५-४-४९) रोगवाचिनः षष्ठ्यन्ताद्वा तसिश्चिकित्सायाम्। प्रवाहिकातः कुरु। प्रतीकारमस्याः कुर्वित्यर्थः। 'अपनयने' किम्-प्रवाहिकायाः प्रकोपनं करोति। **२११७ कृभ्वस्तियोगे संपद्यकर्तरि च्विः।** (५-४-५०) 'अभूततद्भाव इति वक्तव्यम्' (वा३३४०)

भयसंचलनयोः' इति चलनार्थाद् ल्युटि व्यथनशब्दः, तदाह **अव्यथनमचलनमिति। क्षेप इति।** उदाह्रियत इति शेषः। क्षेपो निन्दा। **हीयमानपापयोगाच्च। हीयमानेति।** हीयमानयुक्तात् पापयुक्ताच्चेत्यर्थः। ननु पूर्वसूत्रे क्षेपग्रहणादेव सिद्धे किमर्थमिदमित्यत आह **क्षेपस्याविवक्षायामिति।** तत्त्वकथन इत्यर्थः। **षष्ठ्या व्याश्रये। नानापक्षसमाश्रयण इति।** सर्वसाधारण्यं विहाय एकपक्षाश्रय इति यावत्। पक्षः स्वीयत्वेन परिग्रहः। **देवा अर्जुनतोऽभवन्निति।** अर्जुनस्य पक्षे देवा आसन्नित्यर्थः। **आदित्याः कर्णतोऽभवन्निति।** सूर्याः कर्णस्य पक्षे आसन्नित्यर्थः। **रोगाच्च।** रोगस्य प्रतीकारः चिकित्सा। **प्रवाहिकात इति।** विषूचिकाप्रतीकारमित्यर्थः। **कृभ्वस्तियोगे। अभूतेति।** येन रूपेण प्रागभूतं यद्वस्तु तस्य तद्रूपप्राप्तावित्यर्थः। एवं च यत्र प्रकृतिस्वरूपमेव विकाररूपमापद्यमानं विकाराभेदेन विवक्ष्यते, तत्रैवायं प्रत्यय इति लभ्यते। संपद्यकर्तरीत्येकं पदम्। संपदनं सम्पद्यः। संपूर्वकात्पदधातोरत एव निपातनाद् भावे कृत्संज्ञः शः, दिवादित्वात् श्यन्। संपद्यस्य कर्तेति षष्ठीसमासः। संपद्यमाने वर्तमानादिति यावत्। केन रूपेण कस्य संपत्तिरित्याकाङ्क्षायाम्, 'अभूततद्भावे-' इति वार्तिकात् प्रकृतेर्विकाररूपेण संपत्तिरिति लभ्यते। तत्र विकारवाचकादेव प्रत्ययः, नतु प्रकृतिवाचकात्, व्याख्यानात्। तथा

वर्तत इति। प्रवाहिकात इति। प्रच्छर्दिकातः कुर्वित्याद्यप्युदाहरणम्। प्रवाहिका विषूचिका। प्रच्छर्दिका तु वमनव्याधिः। **कृभ्वस्तियोगे।** योग इति किम्, अशुक्लः शुक्लो जायते। **संपद्यकर्तरीति।** संपद्यश्चासौ कर्ता चेति विग्रहः। 'पाघ्राध्माधेट्दृशः-' इति विहितः शप्रत्ययोऽस्मादेव निपातनात्सम्पदोऽपि भवति।

विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे। **२११८ अस्य च्वौ। (७-४-३२)** अवर्णस्य ईत्स्यात् च्वौ। वेर्लोपः। च्व्यन्तत्वादव्ययत्वम्। अकृष्णः कृष्णः संपद्यते, तं करोति, कृष्णीकरोति। ब्रह्मीभवति। गङ्गीस्यात्। 'अव्ययस्य च्वावीत्वं नेति वाच्यम्' (वा ५०५२)। दोषाभूतम् अहः। दिवाभूता रात्रिः। एतच्च 'अव्ययीभावश्च' (सू ४५१)

च फलितमाह **विकारात्मतामित्यादिना**। **वर्तमानादिति**। विकारवाचकशब्दस्य प्रकृतौ गौराया वृत्त्या विद्यमानत्वं बोध्यम्। **करोत्यादिभिरिति**। 'डुकृञ् करणे, भू सत्तायाम, अस भुवि' इति धातुभिर्योगे सतीत्यर्थः। च्विप्रत्यये चकार इत्, इकार उच्चारणार्थः। **अस्य च्वौ**। **ईत्स्यादिति**। 'ई घ्राध्मो.' इत्यतः तदनुवृत्तेरिति भावः। **वेर्लोप इति**। 'वेरपृक्तस्य' इत्यनेनेति शेषः। **च्व्यन्तत्वादव्ययत्वमिति**। 'ऊर्यादिच्विडाचश्च' इति निपातत्वात् स्वरादिनिपातमित्यव्ययत्वमित्यर्थः। 'तद्धितश्चासर्वविभक्तिः' इत्यत्र 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इति परिगणितेष्वन्तर्भावादव्ययत्वमिति केचित्। कृञ्योगे उदाहरति **कृष्ण इति**। वस्तुतः अकृष्णः सन् वेषादिना कृष्णभावं प्राप्नोतीत्यर्थः। **तं करोतीति**। अकृष्णं कृष्णरूपेण संपद्यमानं करोतीत्यर्थः। **कृष्णीकरोतीति**। अत्र वस्तुतः अकृष्णो नटः प्रकृतिभूतः। स तावत्कृष्णभावं विकारं प्राप्नुवन् सम्पद्यमानत्वात् सम्पद्यकर्ता भवतीति तत्राभेदारोपमवलम्ब्य वर्तमानो विकारभूतकृष्णवाचकः शब्दः। तस्मात् च्विप्रत्ययः, चकार इत्, इकार उच्चारणार्थः। तस्मिन्परे अकारस्य ईत्त्वम्। 'वेरपृक्तस्य' इति वकारलोपः। कृष्णीति ईकारान्तमव्ययम्। **ब्रह्मीभवतीति**। अब्रह्म ब्रह्म संपद्यमानं भवतीत्यर्थः। ब्रह्मन्शब्दात् च्विः। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः। ईत्वमिति भावः। अत्यन्तस्वार्थिकानामेव प्रातिपदिकादुत्पत्तिः, नतु सुबन्तादिति नियमः। अतो न च्वेः प्रातिपदिकादुत्पत्तिः। किंतु सुबन्तादेवेति बोध्यम्। अत एव अगौर्गौः समपद्यत गोऽभवदित्यत्र च्व्यन्तस्य गोशब्दस्य 'एङः पदान्तात्–' इति पररूपमुदाहृतं भाष्ये संगच्छत इत्यलम्। **गङ्गीस्यादिति**। अगङ्गा गङ्गात्वेन संपद्यमाना स्यादित्यर्थः। 'अस्य च्वौ' इति ईत्त्वम्। **दोषाभूतम् अहरिति**। दोषेत्याकारान्तमव्ययं रात्रावित्यर्थे वर्तते। इह तु रात्रिरित्यर्थे वर्तते। अदोषाभूतमहः बहुलमेघावरणान्धकाराद् दोषाभूतमित्यर्थः। **दिवाभूता रात्रिरिति**। दिवेत्याकारान्तमव्ययम् अहनीत्यर्थे। इह तु अहरित्यर्थे वर्तते। चन्द्रिकातिशयवशाद् अहर्भूतेत्यर्थः। ननु 'अव्ययस्य च्वावीत्त्वं न' इति

दिवादित्वात् श्यन्निति हरदत्तः। **वक्तव्यमिति**। वृत्तिकारस्तु 'अभूततद्भावे' इति

इति सूत्रे भाष्ये उक्तम्। २११९ **क्यच्व्योश्च** । (६-४-१५२) हलः परस्यापत्ययकारस्य लोपः स्यात्क्ये च्वौ च परतः। गार्गीभवति। २१२० **च्वौ च** । (७-४-२६) च्वौ परे पूर्वस्य दीर्घः स्यात्। शुचीभवति। पटू-स्यात्। 'अव्ययस्य दीर्घत्वं न' इति केचित्, तन्निर्मूलम्। 'स्वस्ति स्यात्' इति तु महाविभाषया च्वेः अभावात्सिद्धम्। 'स्वस्तीस्यात्' इत्यपि पक्षे स्यादिति चेदस्तु। यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यत इत्यस्तु। 'रीङृतः' (सू १२३४)। मात्रीकरोति। २१२१ **अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च** । (५-४-५१) एषां लोपः स्यात् च्विश्च। अरूकरोति। उन्मनीस्यात्। उच्चक्षूकरोति। उच्चेती-

वार्तिकम् 'अस्य च्वौ' इति सूत्रभाष्ये न दृश्यत इत्यत आह **एतच्चेति** । गार्गीभवतीति वक्ष्यन्नाह **क्यच्व्योश्च** । 'अल्लोपोऽनः' इत्यस्माद् 'लोप' इति, 'हलस्तद्धितस्य' इत्यस्माद् 'हलः' इति, 'सूर्यतिष्य–' इत्यतः 'य' इति, 'आपत्यस्य च–' इत्यस्माद् 'आपत्यस्य' इति चानुवर्तते, तदाह **हलः परस्येति** । **गार्गीभवतीति** । अगार्ग्यो गार्ग्यः संपद्यमानो भवतीत्यर्थः। यञन्तात् च्वौ यकारस्य लोपः। वेर्लोपः। यकारस्य तु 'आपत्यस्य च–' इति लोपो न संभवति, ईकारेण व्यवधानात्। 'हलस्तद्धितस्य' इत्यपि न संभवति। तस्य इति अर्थवत्येव विधानात्। अतो वचनमिति भावः। अथ शुचीभवतीति वक्ष्यन्नाह **च्वौ च** । **दीर्घः स्यादिति** । 'अकृत्सार्वधातुकयोः–' इत्यतः तदनुवृत्तेरिति भावः। **अव्ययस्येति** । अव्ययस्य 'च्वौ च' इति दीर्घो नेत्यर्थः। तेन स्वस्ति स्यादित्यत्र च्वौ न दीर्घ इति भावः। **तन्निर्मूलमिति** । भाष्यादावदृष्टत्वादिति भावः। तर्हि स्वस्ति स्यादिति न स्याद् दीर्घप्रसङ्गादित्यत आह **स्वस्तिस्यादिति त्विति** । ननु महाविभाषया दीर्घाभावे स्वस्ति स्यादिति सिद्धावपि कदाचित् स्वस्तीस्यादिति दीर्घो दुर्वार इति शङ्कते **स्वस्तीस्यादित्यपि पक्षे स्यादिति** । इष्टापत्तिरित्याह **अस्त्विति** । दीर्घतदभावाभ्यां रूपद्वयमिति शेषः। प्रामाणिकत्वादुभयमप्यादर्तव्यमिति भावः। ननु शिष्टानङ्गीकारात् कथं दीर्घपाठादर इत्यत आह **यदि नेष्यत इत्यादि** । मातृशब्दात् च्विप्रत्यये विशेषमाह **रीङृत इति** । **अरुर्मनश्चक्षुः** । **एषामिति** । अरुस्, मनस्, चक्षुस्, चेतस्, रहस्, रजस् इत्येतेषामित्यर्थः। पूर्वेणैव प्रत्ययसिद्धस्तत्संनियोगेन

सूत्रमध्ये प्रचिक्षेप। **च्व्यन्तत्वादिति** । तस्य निपातत्वात् 'स्वरादिनिपातमव्ययम्' इत्यनेनेत्यर्थः। **गार्गीभवतीति** । इह यञन्तात् सुपि ततः च्विप्रत्यये कृते 'आपत्यस्य च तद्धितेऽनाति' इति यलोपो न भवति, ईकारेण व्यवधानादिति बोध्यम्। **अरुर्मनः** । **च्विश्चेति** । पूर्वेण सिद्धस्यापि च्वेरयमनुवादः। लोपस्तु तत्संनियोग-

करोति। विरहीकरोति। विरजीकरोति। २१२२ विभाषा साति कार्त्स्न्ये। (५-४-५२) च्विविषये सातिर्वा स्यात्साकल्ये। २१२३ सात्पदाद्योः। (८-३-१११) सस्य षत्वं न स्यात्। दधि सिञ्चति। कृत्स्नं शस्त्रमग्निः संपद्यतेऽग्निसाद्भवति। अग्नीभवति। महाविभाषया वाक्यमपि। 'कार्त्स्न्ये' किम्–एकदेशेन शुक्लीभवति पटः। २१२४ अभिविधौ संपदा च। (५-४-५३) संपदा कृभ्वस्तिभिश्च योगे सातिर्वा स्यादभ्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। संपदा तु वाक्यमेव। अग्निसात्संपद्यते, अग्निसाद्भवति शस्त्रम्, अग्नीभवति। जलसात्-

---

अन्त्यलोप इह विधीयते। **अरूकरोतीति**। अनरुः अरुः संपद्यते तत् करोतीत्यर्थः। प्रकृतेरन्त्यलोपे उकारस्य 'च्वौ च' इति दीर्घः। **उन्मनीकरोतीति**। अनुन्मना उन्मनाः संपद्यते तं करोतीत्यर्थः। च्वौ अन्त्यलोपः, ईत्वं च। **उच्चक्षूकरोतीति**। अनुच्चक्षुः उच्चक्षुः संपद्यते, तं करोतीत्यर्थः। च्वौ अन्त्यलोपे दीर्घश्च। **उच्चेतीकरोतीति**। अनुच्चेता उच्चेताः संपद्यते, तं करोतीत्यर्थः। च्वौ अन्त्यलोपः, ईत्वं च। **विरहीकरोतीति**। रहो विजनप्रदेशः, विशिष्टं रहो विरहः। अविरहो विरहः संपद्यते तत् करोतीत्यर्थः। च्वौ अन्त्यलोपः, ईत्वं च। **विरजीकरोतीति**। अविरजा विरजाः संपद्यते तं करोतीत्यर्थः। अन्त्यलोपे 'अस्य च्वौ' ईत्वं च। **विभाषा साति**। सातीति लुप्तप्रथमाकम्। **च्विविषय इति**। अभूततद्भावे संपद्यकर्तरि कृभ्वस्तियोग इत्यर्थः। **सात्पदाद्योः**। शेषपूरणेन सूत्रं व्याचष्टे **सस्य षत्वं न स्यादिति**। सातेरवयवस्य पदादेश्च सस्य षत्वं न स्यादित्यर्थः। 'न रपरसृपि–' इत्यतो 'न' इति 'अपदान्तस्य–' इत्यतो 'मूर्धन्य' इति चानुवर्तत इति भावः। पदादेरुदाहरति **दधि सिञ्चतीति**। षिचिधातोः 'धात्वादेः षः सः' इति षस्य सः। तस्य 'आदेशप्रत्यययोः' इति षत्वे प्राप्ते अनेन निषेधः। **कृत्स्नमिति**। सर्वावयवोपेतमित्यर्थः। अग्निसादित्यत्र प्रत्ययावयवसकारत्वात् षत्वे प्राप्ते अनेन निषेधः। **अग्नीभवतीति**। च्विप्रत्यये 'च्वौ च' इति दीर्घः। **महाविभाषयेति**। 'समर्थानाम्–' इत्यतो वाग्रहणानुवृत्तेरित्यर्थः। महाविभाषया सिद्धे इह विभाषाग्रहणं तु अपवादेन मुक्ते औत्सर्गिकच्वेः समावेशार्थम्। **अभिविधौ संपदा च**। चकारः कृभ्वस्तिसमुच्चयार्थः। तदाह **संपदा कृभ्वस्तिभिश्चेति**। अभिविधावित्यस्य विवरणं **व्याप्ताविति**। **पक्ष इति**। सातिप्रत्ययाभावपक्षे कृभ्वस्तियोगे पूर्वेण

विधित्वार्थः। **विभाषा साति**। विभाष्यते विकल्प्यत इति विभाषा। 'गुरोश्च हलः' इत्यकारप्रत्ययः। ततः टाप्। न त्विदमव्ययम्, 'द्वयोर्विभाषयोर्मध्ये' 'पयस्तु विभाषया' इत्यादौ विभक्तेर्दर्शनात्। **कृत्स्नमिति**। सर्वावयवोपेतमित्यर्थः। **अग्निसाद्भवति**

संपद्यते, जलीभवति लवणम्। 'एकस्या व्यक्तेः सर्वावयवावच्छेदेनान्यथाभावः कात्स्न्यर्थम्'। 'बहूनां व्यक्तीनां किञ्चिदवयवावच्छेदेनान्यथात्वं त्वभिविधिः'। २१२५ **तदधीनवचने**। (५-४-५४) सातिः स्यात्कृभ्वस्तिभिः संपदा च योगे। राजसात्करोति, राजसात्संपद्यते। राजाधीनमित्यर्थः। २१२६ **देये त्रा च**। (५-४-५५) तदधीने देये त्रा स्यात्सातिश्च कृभ्वादियोगे। विप्राधीनं देयं करोति। विप्रत्राकरोति। विप्रत्रासंपद्यते। पक्षे विप्रसात्करोति। 'देये' किम्-राजसाद्भवति राष्ट्रम्। २१२७ **देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्**। (५-४-५६) एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वन्दे रमे वा। बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः। २१२८ **अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्**। (५-४-५७) द्व्यच् अवरं न्यूनम्, न तु ततोन्यूनम्, 'अनेकाच्' इति यावत्। तादृशमर्धं यस्य तस्माड्डाच्

च्विः, संपदा योगे तु सातेरभावे वाक्यमेव, नतु च्विः, कृभ्वस्तियोग एव तद्विधानादित्यर्थः। सम्पदा योगे उदाहरति **अग्निसात्संपद्यत इति**। कृभ्वस्तियोगे उदाहरति **अग्निसाद्भवति शस्त्रमिति**। अग्निसात्करोति अग्निसात्स्यादित्यप्युदाहार्यम्। कात्स्न्यभिविध्योर्विशेषमाह **एकस्या व्यक्तेरित्यादिना**। **तदधीनवचने**। शेषपूरणेन सूत्रं व्याचष्टे **सातिः स्यादित्यादिना**। 'अभूततद्भावे' इति निवृत्तमिति भावः। **देये त्रा च**। 'तदधीनवचने' इत्येवानुवर्तते। **कृभ्वादियोग इति**। कृभ्वस्तिभिः संपदा च योगे इत्यर्थः। **देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्**। **एभ्य इति**। देव, मनुष्य, पुरुष, पुरु, मर्त्य इत्येतेभ्य इत्यर्थः। अत्यन्तस्वार्थिकोऽयम्। 'साति' इति 'कृभ्वस्तियोगे' इत्यपि निवृत्तम्। **देवत्रा वन्दे रमे वेति**। देवान् वन्दे, देवेषु रमे वेत्यर्थः। मनुष्यत्रा पुरुषत्रा। पुरुशब्दो बहुलपर्यायः। पुरुत्रा, मर्त्यत्रा। **अन्यत्रापीति**। देवादिभ्योऽन्यत्रापीत्यर्थः। **बहुत्रा जीवतो मन इति**। जीवतो जन्तोर्मनः बहुषु विषयेषु गच्छति बहून् व्याप्नोतीत्यर्थः। **अव्यक्तानुकरणात्**। यत्र ध्वनौ अकारादयो वर्णविशेषा न व्यज्यन्ते सः अव्यक्तो ध्वनिः। तस्यानुकरणम् अव्यक्तानुकरणम्। द्व्यजवरार्धशब्दं व्याचष्टे **द्व्यजिति**। द्वावचौ यस्येति विग्रहः। अवरशब्दं व्याचष्टे

शस्त्रमिति। जातावेकवचनम्। सर्वाणि शस्त्राणीत्यर्थः। **वन्दे रमे वेति**। देवान् वन्दे देवत्रा वन्दे। देवेषु रमे देवत्रा रमे इत्यर्थोऽत्र पर्यवसन्नः। एवं मनुष्यान् गच्छति मनुष्यत्रा गच्छति। मनुष्येषु वसति मनुष्यत्रा वसति। पुरुषान् गच्छति पुरुषत्रा गच्छति। पुरुषेषु वसति पुरुषत्रा वसति। पुरुशब्दो बहुपर्यायः। पुरून् गच्छति पुरुषु वसति वा

स्यात्कृभ्वस्तिभिर्योगे। 'डाचि विवक्षिते द्वे बहुलम्' (वा ४६१७) 'नित्यमाम्रेडिते डाचीति वक्तव्यम्' (वा ३६३८)। डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटाकरोति। 'अव्यक्तानुकरणात्' किम्—ईषत्करोति। 'द्व्यजवरार्धात्' किम्—श्रत्करोति। 'अवर' इति किम्—घरटघरटाकरोति। अपटत्रपटाकरोति 'अनेकाचः' इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम्।

न्यूनमिति। द्व्यजेव अवरं न्यूनसंख्याकमिति सामानाधिकरण्येनान्वयः। **न तु ततो न्यूनमिति**। एकाच्कमित्यर्थः। फलितमाह **अनेकाजिति यावदिति**। **तादृशमर्धमिति**। अनेकाच्कम् अर्धं भागो यस्य तद् द्व्यजवरार्धम्। तस्मादित्यर्थः। **कृभ्वस्तिभिर्योग इति**। मण्डूकप्लुत्या तदनुवृत्तेरिति भावः। तथा च अनेकाच्कभागयुक्तादव्यक्तानुकरणात् शब्दात् कृभ्वस्तियोगे डाच् स्यादिति फलितम्। अथ पटच्छब्दादव्यक्तानुकरणाद् डाचमुदाहरिष्यन् पटच्छब्दस्य द्विर्वचनमाह **डाचि विवक्षिते द्वे बहुलमिति**। यद्यपि 'सर्वस्य द्वे' इति प्रकरणे 'डाचि द्वे भवत इति वक्तव्यम्' इत्येव भाष्ये वार्तिकं पठितम्। तत्र डाचि परत इति नार्थः, तथा सति डाचि सति पटच्छब्दस्य द्विर्वचनम्, सति च द्विर्वचने अर्धस्यानेकाच्त्वाद् डाजित्यन्योन्याश्रयापत्तेः। अतः डाचि विवक्षिते इत्याश्रितम्। एवं च डाचि विवक्षिते पटच्छब्दस्य द्विर्वचने सति पटत् पटत् इत्यस्यानेकाच्कार्धभागयुक्तत्वाद् डाच् सूपपादः। पटत् पटत् आ करोतीति स्थिते प्रक्रियां दर्शयति **नित्यमाम्रेडिते डाचीति**। 'एकः पूर्वपरयोः' इत्यधिकारे पररूपप्रकरणे 'नाम्रेडितस्यान्त्यस्य तु वा' इति सूत्रभाष्ये इदं वार्तिकं पठितम्। **डाच्परमिति**। डाच् परं यस्मादिति विग्रहः। **पकार इति**। तथा च पटपटत् आ करोति इति स्थिते डित्वाट्टिलोपे पटपटाकरोतीति रूपमित्यर्थः। **अवरेति किमिति**। द्व्यजर्धादित्येवास्त्वित्यर्थः। **घरटघरटाकरोतीति**। घरटत् इत्यव्यक्तानुकरणाद् डाचि द्विर्वचने पररूपे टिलोपे रूपम्। द्व्यजर्धादित्युक्ते तु अर्धभागस्य घरटत् इत्यस्य बह्वच्कत्वाड्डाच् न स्यादित्यर्थः। **अनेकाच इत्येवेति**। द्व्यजवरार्धादित्यपनीय 'अव्यक्तानुकरणादनेकाचोऽनितौ डाच्' इत्येव सूत्रयितुमुचितमित्यर्थः। **एवं हीति**। 'अनेकाचोऽनितौ' इति पाठे सति पटच्छब्दस्य द्वित्वात्प्रा-

---

पुरत्रा। मर्त्यान्मर्त्येषु वा मर्त्यत्रा। **डाचिविवक्षित इति**। परसप्तम्यां त्वन्योन्याश्रयः स्यात्। डाचि कृते द्वित्वे सति द्व्यजवरार्धता, तस्यां च सत्यां डाजिति भावः। **खरटखरटाकरोतीति**। द्वित्वपररूपादि प्राग्वत्। द्व्यजर्धादित्युक्ते त्वत्र डाच् न स्यात्। न ह्यत्रार्धं द्व्यच् किं तु त्र्यच्। **अनेकाच इत्येवेति**। 'द्व्यजवरार्धात्' इत्य-

'अनितौ' किम्—पटिति करोति । २१२९ **कृञो द्वितीयतृतीयशम्बबीजात्कृषौ**। (५-४-५८) द्वितीयादिभ्यो डाच्स्यात्कृञ एव योगे कर्षणेऽर्थे। बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम् । द्वितीयं तृतीयं कर्षणं करोति । द्वितीयाकरोति । तृतीयाकरोति । शंबशब्दः प्रतिलोमे । अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति, शंबाकरोति । बीजेन सह कर्षति, बीजाकरोति । २१३० **संख्यायाश्च गुणान्तायाः** । (५-४-५९) कृञो योगे कृषौ डाच्स्यात्। द्विगुणाकरोति क्षेत्रम् । क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः । २१३१ **समयाच्च यापनायाम्** । (५-४-६०) 'कृषौ' इति निवृत्तम् । कृञो योगे डाच्स्यात् । समयाकरोति । कालं यापयतीत्यर्थः । २१३२ **सपत्रनिष्पत्रादु-**

गेव अनेकाच्कत्वाद् डाच् संभवतीति 'डाचि परतो द्वित्वम्' इति वक्तुं शक्यमिति भावः । **पटितीति** । 'अव्यक्तानुकरणस्य' इति पररूपम् । **कृञो द्वितीय** । **द्वितीयादिभ्य इति** । द्वितीय, तृतीय, शम्ब, बीज इत्येतेभ्य इत्यर्थः । **कृञ एव योग इति** । कृञ्ग्रहणात् कृभ्वस्तिर्नानुवर्तत इति भावः । 'मद्रात्परिवापणे' इति यावत् कृञ इत्यनुवर्तते । **बहुलोक्तेरिति** । 'डाचि बहुलं द्वे भवतः' इति बहुलग्रहणाद् अव्यक्तानुकरणस्यैव डाचि द्वित्वम् । नतु तदन्यस्येत्यर्थः । **शम्बशब्दः प्रतिलोम इति** । वर्तत इति शेषः । **बीजेन सह कर्षतीति** । आदौ कृष्टक्षेत्रे कुलत्थादिबीजानां वापे कृते पुनः बीजैः सह कर्षणं प्रसिद्धम् । 'कर्षात्वत—' इति सूत्रभाष्यप्रामाण्यात् कृषधातुः शब्विकरणोऽस्ति, तेन शविकरणत्वात् कृषतीत्येव युक्तमिति न शङ्क्यम् । **संख्यायाश्च** । शेषपूरणेन सूत्रं व्याचष्टे **कृञो योग इति**। **समयाच्च** । 'कृषौ' इति निवृत्तम् । समयशब्दाद् यापनायां गम्यमानायां डाजित्यर्थः । **समयाकरोतीति** । करोतिरिह यापनायामित्याह **यापयतीति** । अतिक्रान्तं करोतीत्यर्थः । अद्येदं कर्तव्यमित्युक्ते विघ्नं कश्चिदाशङ्क्य कालक्षेपं करोतीति यावत् । **सपत्र** । सपत्रशब्दाद् निष्पत्रशब्दाच्च अतिव्यथने डाजित्यर्थः । 'व्यध ताडने'

पनीयेत्यर्थः । **पटितीति** । 'अव्यक्तानुकरणस्यात इतौ' इति पररूपम् । नन्वत्र करोतिना योगो दुर्लभः, इतिशब्देन व्यवधानात् । तथा चानिताविति व्यर्थमिति चेत् । अत्राहुः—इतिशब्देन करोत्यर्थगतप्रकार एव परामृश्यते इत्येवंप्रकारेण करोतीति । तथा च पटच्छब्दस्यार्थद्वारा योगोऽस्त्येवेति । **बीजेन सहेति** । ननु बीजेन सह भूतलस्य कर्षणे बीजानामपि कर्षणप्रसङ्गाद्विवक्षितार्थो न सिध्यतीति चेत् । अत्राहुः—वृत्तिविषये बीजशब्दो बीजावापसहिते विलेखने वर्तते । तथा च बीजावापसहितं विलेखनं करोतीत्यर्थ इति । **समयाच्च** । **कालं यापयतीत्यर्थ इति** ।

तिव्यधने। (५-४-६१) सपत्त्राकरोति मृगम्। सपुङ्खशरप्रवेशेन सपत्त्रं करोतीत्यर्थः। निष्पत्त्राकरोति। सपुङ्खस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्त्रं करोतीत्यर्थः।'अतिव्यथने' किम्-सपत्त्रं निष्पत्त्रं वा करोति भूतलम्। २१३३ **निष्कुलान्निष्कोषणे।** (५-४-६२) निष्कुलाकरोति दाडिमम्। निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहिर्डाच्। २१३४ **सुखप्रिया-दानुलोम्ये।** (५-४-६३) सुखाकरोति। प्रियाकरोति गुरुम्। अनुकूलाचरणे-नानन्दयतीत्यर्थः। २१३५ **दुःखात्प्रातिलोम्ये।** (५-४-६४) दुःखाकरोति स्वामिनम्। पीडयतीत्यर्थः। २१३६ **शूलात्पाके।** (५-४-६५) शूला-करोति मांसम्। शूलेन पचतीत्यर्थः। २१३७ **सत्यादशपथे।** (५-४-६६) सत्याकरोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। शपथे तु सत्यं

चतुर्थ्यन्तः। अतिक्रम्य वेधः अतिव्यधनम्। लक्ष्ये शराः पतन्त्यनेनेति पत्त्रम्, शराणां पुङ्खगतो बर्हः। **भूतलमिति।** पुङ्खपर्यन्तं पुङ्खवर्जं वा शरप्रवेशनेन सपत्त्रं निष्पत्त्रं वा भूतलं करोतीत्यर्थः। **निष्कुलान्निष्कोषणे।** डाजिति शेषः। निष्को-षणम् अन्तर्गतावयवानां बहिःकरणम्। **निष्कुलाकरोति दाडिममिति।** निर्गतं कुलं यस्मादिति बहुव्रीहिः। कुलशब्दश्च अन्तरवयवसमूहे वर्तते। तदाह **निर्गत-मित्यादि। सुखप्रियादानुलोम्ये।** सुखशब्दात्प्रियशब्दाच्च आनुलोम्ये गम्ये डाच् स्यादित्यर्थः। आराध्यगुर्वादिचित्तानुवर्तनमानुलोम्यम्। **सुखाकरोति। प्रिया-करोति गुरुमिति।** चित्तानुवर्तनेन गुरुं सुखसंपन्नं प्रियसंपन्नं च करोतीत्यर्थः। तदाह **अनुकूलेति। दुःखात्।** डाजिति शेषः। आराध्यप्रतिकूलाचरणं प्राति-लोम्यम्। अन्यत्पूर्ववत्। **शूलात्पाके।** डाजिति शेषः। **शूलाकरोतीति।** अत्र करोतिः पाके वर्तते। तदाह **शूलेन पचतीत्यर्थ इति। सत्यादशपथे।**

'कर्तव्यस्यावसरप्राप्तिः समयस्तस्यातिक्रमणं यापना' इति वृत्तिग्रन्थमुपादाय हरदत्त आह—'अद्य मे पारवश्यम्, श्वः परश्वो वा अस्य समय इत्येवं बहुषु दिवसेषु य आह स एवमुच्यते' इति। **सपत्त्रनिष्पत्त्रात्।** लक्ष्ये शराः पतन्त्यनेनेति पत्त्रम्, शराणां पुङ्खगतो बर्हः। **सपत्त्रं निष्पत्त्रं वा करोतीति।** पत्त्राणि पर्णानि तत्सहितं तद्रहितं वेति यथासम्भवमर्थः। **निष्कुलात्।** निष्कोषणमन्तरवयवानां बहिर्निष्कासनम्। निष्कोषणे किम्, निष्कुलं करोति शत्रुम्। **शूलात्पाके।** पाके किम्, शूलं करोति कदन्नम्, शूलमुदररोगः। **सत्यादशपथे।** सत्सु साधु सत्यम्। 'तत्र साधुः' इति प्राग्घितीयत्वाद्यति प्राप्ते अतएव निपातनाद् यः। अन्तोदात्तोऽयम्।

---

१ 'अतिव्यथने' इति बहुत्र पाठः।

करोति विप्रः। २१३८ मद्रात्परिवापणे। (५-४-६७) मद्रशब्दो मङ्गलार्थः। परिवापणं मुण्डनम्। मद्राकरोति। माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः। 'भद्राच्चेति वक्तव्यम्' (वा ३३४४)। भद्राकरोति। अर्थः प्राग्वत्। 'परिवापणे' किम्—मद्रं करोति। भद्रं करोति।

इति स्वार्थिकप्रकरणम्। इति तद्धिताः॥

डाजिति शेषः। **सत्याकरोति भाण्डमिति**। रत्नादिद्रव्यजातमित्यर्थः। सत्यशब्दोऽत्र तथ्ये वर्तते। 'सत्यं तथ्यमृतं सम्यक्' इत्यमरः। **क्रेतव्यमितीति**। एतावतैव मूल्येन इदं क्रयणार्हं नातोऽधिकमूल्येनेत्येवं यथाभूतार्थं वदतीत्यर्थः। **सत्यं करोति विप्र इति**। शपथं करोतीत्यर्थः। **मद्रात्परिवापणे**। डाजिति शेषः। **मद्रशब्दो मङ्गलार्थ इति**। मङ्गलपर्याय इत्यर्थः। **परिवापणं मुण्डनमिति**। केशान्वपते इत्यादौ तथा दर्शनादिति भावः। **माङ्गल्यमुण्डनेनेति**। चौलेनेत्यर्थः। **मद्रं करोति। भद्रं करोतीति**। क्षेमं करोतीत्यर्थः। अत्र परिवापणस्याप्रतीतेर्न डाजिति भावः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां तद्धितप्रकरणं समाप्तम्।

'सत्येनोत्तभिता भूमिः'। 'ऋतं च सत्यं च' इत्यत्र तथा दर्शनात्। **सत्याकरोतीति**। भाण्डं रत्नादिद्रव्यजातम्। **क्रेतव्यमिति**। मयैवैतद् ग्राह्यमिति बुद्ध्या परीक्षादिना सत्यंकारद्रव्यप्रदानेन च दृढं करोतीत्यर्थः। **तथ्यमिति**। तथैव तथ्यम्। 'पादार्घाभ्यां च' इति चकारस्यानुक्तसमुच्चयार्थत्वात्स्वार्थे यत्। **परिवापणमिति**। कर्मव्यापारमात्रवाचिनो वपेर्हेतुमण्णिचि ल्युडिति हरदत्तः। कर्मव्यापारः फलं तस्य कर्मनिष्ठत्वात्। यथा च फलमात्रवाचिन इत्यर्थः फलित इत्याहुः। **माङ्गल्यमुण्डनेनेति**। चौलदीक्षादौ। **भद्राच्चेति**। भद्रादित्यर्थग्रहणमिति व्याख्याने तु मङ्गलादिभ्योऽपि स्यादिति बोध्यम्। इति तद्धाजाः।

इति तत्त्वबोधिन्यां तद्धितप्रक्रियाप्रकरणम्।

अथ द्विरुक्तप्रकरणम् । ४२ ।

२१३९ सर्वस्य द्वे। (८-१-१) इत्यधिकृत्य । २१४० नित्य-

अथ द्विरुक्तप्रकरणम्। **सर्वस्य द्वे**। **इत्यधिकृत्येति**। द्विर्वचनविषयोऽनुक्तं

सर्वस्य द्वे । सर्वशब्दस्य द्वे भवत इति विधिस्तु न शङ्क्यः । किं तु 'नित्यवीप्सयोः' इत्येवमादीनां विधेयकार्यिणोरनिर्देशेन साकाङ्क्षत्वात्स्वरितत्वाच्चाधिकारोऽयं तदाह **इत्यधिकृत्येति** । एतदर्थरूपमधिकृत्येत्यर्थः । स्वरूपग्रहणं तु न भवति 'नाम्रेडितस्यान्त्यस्य तु वा' इति लिङ्गात् स्वरूपग्रहणे हि सति द्विरुक्तसर्वशब्दस्यैव परमाम्रेडितं स्यात्, न तु द्विरुक्तस्याव्यक्तानुकरणशब्दस्य परमिति 'नाम्रेडितस्य–' इति पररूपनिषेधोऽन्त्यस्य तकारस्य विकल्पविधिश्च कथं संगच्छेत। ननु 'नित्यवीप्सयोः' इत्यादौ 'पदस्य' इति वक्ष्यमाणमपकृष्य पदस्यैव द्वित्वं विधीयत इति किमनेन सर्वस्येति ग्रहणेनेति चेत्। अत्राहुः—'स्वादिषु–' इति पदसंज्ञामादाय वृक्षाभ्यामित्यादौ प्रकृतिभागमात्रस्य द्विर्वचनं स्यात्। कृते तु 'सर्वस्य' इति ग्रहणे 'सर्वशब्दोऽवयवकार्त्स्न्ये वर्तते' इति 'सर्वावयवोपेतस्य द्वित्वम्, न तु कश्चिदवयवो वर्ज्यते' इत्यर्थलाभादिष्टसिद्धिरिति । इह 'द्वे' इत्यस्य संख्येयापेक्षायां शब्दरूपे गृह्येते, शब्दानुशासनप्रस्तावात् । 'सर्वस्य' इति स्थानषष्ठी । सोऽयं स्थानेद्विर्वचनपक्षः । यदि तु उच्चारणे संख्येये, तदा स्थान्यादेशभावो न संभवति, निवृत्तिधर्मा हि स्थानी भवति, सर्वं चेद् निवृत्तं कस्योच्चारणं स्यात्, अतः 'सर्वस्य' इत्यध्याहृतोच्चारणशब्दापेक्षया 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी । 'सर्वं द्विरुच्चारयेत्' इति फलितोऽर्थः । सोऽयं 'द्विःप्रयोगो द्विर्वचनम्' इति पक्षः । ननु आद्यपक्षे स्थानिवद्भावेन समुदायस्यैव पदत्वं स्यात्, न त्ववयवयोस्ततश्च पदकार्याणि न स्युः । न चेष्टापत्तिः । 'अपचन्नपचन्' इत्यत्र ङमुट्, 'वृक्षान् वृक्षान्' इत्यत्र 'पदान्तस्य' इति णत्वनिषेधः, 'अग्नेऽग्ने' इत्यत्र 'एङः पदान्तात्–' इति पूर्वरूपत्वं च न सिध्येत्। किं चापदान्तत्वप्रयुक्तकार्याणि स्युः । तद्यथा 'पयः पयः' इत्यत्र 'सोपदादौ' इति सत्वं स्यात्, 'सर्पीः सर्पीः' इत्यत्र 'इणः षः' इति षत्वं स्यात् । 'पाशकल्पककाम्येषु–' इति वृत्तिग्रन्थमवष्टभ्य कथंचित्सत्वषत्वपरिहारेऽपि 'अश्रीताश्रीत' इत्यत्र 'अतो गुणे' इति पररूपं स्यादिति चेत् । अत्राहुः—यदि प्रत्यस्तमितावयवभेदः समुदाय एक एवादेशः स्याद् द्वे इति द्विवचनमनुपपन्नं स्यात्, अतो द्वे इति वचनादेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते तत्र स्थानिवद्भावेन समुदायस्य पदत्वं स्वत एव चावयवयोरपीति न कश्चिद्दोष इति । स्यादेतत्—द्विःप्रयोगपक्षे प्रत्येकं पदसंज्ञायां सिद्धायामपि

वीप्सयोः। (८-१-४) आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्।

स्यन्त इति शेषः। **नित्यवीप्सयोः**। नित्यशब्देन नित्यत्वं विवक्षितम्। तच्च आभीक्ष्ण्यमिति भाष्यम्। व्याप्तुमिच्छा वीप्सा, व्याप्तिप्रतिपादनेच्छा, सा च प्रयोक्तृधर्मः। व्याप्तिरेव तु शाब्दबोधविषय इति भाष्यस्वरसः। तथा च नित्यव्याप्त्योरित्येव सुवचम्। व्याप्तिश्च कात्स्न्र्येन संबन्धः, उपसर्गबलात्। पदस्येत्यधिकरिष्यमाणमिहापकृष्यते। सर्वस्येति स्थानषष्ठी। द्वे इति त्वादेशसमर्पकम्। तस्य च शब्दरूपे इति विशेष्यमर्थाल्लभ्यते, शब्दानुशासनप्रस्तावात्। ते च शब्दरूपे स्वरूपतः अर्थतश्चान्तरतमे पदे इति स्थानेऽन्तरतमपरिभाषया लभ्यते। ततश्च पौनःपुन्ये कात्स्न्र्ये च गम्ये कृत्स्नावयवविशिष्टस्य पदस्यार्थतश्च शब्दतश्चान्तरतमे द्वे पदे भवत इति फलितम्। तदभिप्रेत्याह **आभीक्ष्ण्ये वीप्सायां च द्योत्य इति**। द्योत्यं च द्योत्या च द्योत्यम्। तस्मिन्नित्यर्थः। 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकैकशेष एकत्वं च। नित्यवीप्से च प्रकृतिगम्ये। द्विर्वचनं तु द्योतकम्। सत्यपि प्रकृतेर्द्वित्वे द्विरुक्तयोः प्रकृत्यनतिरेकादिति बोध्यम्। **द्विर्वचनं स्यादिति**। द्वे पदे

समुदायस्य सा न सिध्यति। ततश्च देवदत्तः पचतिपचतीत्यादौ 'तिङ्ङतिङः' इति सर्वस्य पदस्य निघातो न सिध्यतीति चेत्। अत्राहुः—पचतिपचतीत्यादौ हि स एव धातुः प्रत्ययश्चात्र द्विः पठ्यते। ततश्च यो यस्मात् प्रत्ययो विहितस्तदादितदन्तमिति 'वधीयमाना पदसंज्ञा समुदायस्यापि प्रवर्तते। तेनावग्रहादिः सिध्यतीति। **नित्यवीप्सयोः**। नित्यमिह पौनःपुन्यमित्याह। **आभीक्ष्ण्य इति। द्योत्य इति**। 'नपुंसकमनपुंसकेन–' इत्येकशेषः, एकवद्भावश्च बोध्यः। **पदस्येति**। तेन नित्यतायां विधीयमानं द्विर्वचनं धातुमात्रस्य न भवति। किं च क्रियासमभिहारे धातोर्विहितो यङन्तरङ्गः, पदस्योच्यमानं द्विर्वचनं तु बहिरङ्गमिति यङं न बाधते। अन्यथा हि पौनःपुन्यं भृशार्थश्च क्रियासमभिहार इति भृशार्थे सावकाशोऽयं यङ् पौनःपुन्ये परेण द्विर्वचनेन बाध्येत। न च पदस्य द्विर्वचनाभ्युपगमे सगतिकस्य प्रपचति प्रपठतीत्यादेर्द्विर्वचनं न स्यादिति वाच्यम्, वार्तिककारवचनात्तत्सिद्धेः। अत्र वदन्ति—सगतिकस्य द्वित्वे ऐकपद्यं नास्त्येव, स्थानिनः पदत्वाभावेन आदेशेऽपि तस्य दौर्लभ्यात्। द्विःप्रयोगपक्षे तु प्रथमगतिं विहायावशिष्टस्य समुदायस्य पदत्वं प्राप्तं तस्मिन् सत्यपि न क्षतिः। वस्तुतस्त्विह स्थाने द्विर्वचनपक्ष एव मुख्यः। स्थानिनः सुबन्तत्वेनादेशस्यापि सुबन्तत्वात्सुबन्तात्तद्धित इति पक्षे समुदायात् ष्यञ्ठञोः संभवेन पौनःपुन्यं पौनःपुनिक इति रूपसिद्धेः। 'प्रातिपदिकात्तद्धितः' इति पक्षाभ्युपगमेऽपि श्रूयमाणप्रत्ययान्तस्यैव प्रातिपदिकत्वनिषेधात्पुनरित्यस्यैव प्रातिपदिकत्वेनादेशस्यापि प्रातिपदि-

आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च। पचति पचति। भुक्त्वा भुक्त्वा।

आदेशौ स्त इत्यर्थः। तत्रावयवयोः पदत्वं स्वतःसिद्धम्। समुदायस्य तु पदद्वयात्मकस्य स्थानिवत्त्वात् सुबन्तत्वम्। तेन अपचन्नपचन्नित्यत्र ङमुट्, वृक्षान्वृक्षानित्यत्र 'पदान्तस्य' इति णत्वनिषेधः। अग्नेऽग्ने इत्यत्र 'एङः पदान्तात्-' इति पूर्वरूपं चेत्यादीन्यवयवानां पदकार्याणि सिध्यन्ति। पुनः पुनरिति समुदायस्य स्थानिवत्त्वेन सुबन्तत्वाद् भावे ष्यञि, भवे ठञि च पौनःपुन्यम्, पौनःपुनिक इति च सिध्यति। द्वे उच्चारणे स्त इत्याश्रयणे तु सर्वं पदं द्विरुच्चारयेदित्यर्थः फलितः स्यात्। ततश्च पुनरित्येकस्यैव द्विरुच्चार्यमाणस्य पुनः पुनरित्यादेशत्वाभावेन स्थानिवत्त्वाप्रसक्त्या सुबन्तत्वविरहात् तद्धितोत्पत्तिर्न स्यात्। तस्मादादेशपक्ष एव श्रेयानित्यास्तां तावत्। **आभीक्ष्ण्यं तिङन्तेष्विति**। आभीक्ष्ण्यं पौनःपुन्यम्। तच्चेह प्रधानभूतक्रियाया एव। क्रियाप्राधान्यं चाख्यातेष्वस्तीति 'प्रशंसायां रूपप्' इति सूत्रे भाष्ये स्पष्टम्। अव्ययकृत्स्वपि क्त्वातुमुन्नादिषु क्रियाप्राधान्यम्, 'अव्ययकृतो भावे' इत्युक्तेः। तथा च तिङन्तेषु अव्ययसंज्ञककृदन्तेषु च पौनःपुन्यनिमित्तकद्विर्वचनं नान्यत्रे-

---

त्वात्पौनःपुन्यमित्यादि सिध्यत्येव। द्विःप्रयोगपक्षे त्वन्तरङ्गत्वादव्ययात्सुपो लुकि द्वित्वं प्रवर्तत इति समुदायस्य सुबन्तत्वाभावात् प्रातिपदिकत्वाभावाच्च ष्यञ्ठञौ न भवतः। न च 'अर्थवदधातुः-' इत्यादिना समुदायस्य प्रातिपदिकत्वे सोरुत्पत्तौ तस्य लुकि च सुबन्तत्वं प्रातिपदिकत्वं च संभवत्येवेति वाच्यम्, 'यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति समासस्यैव' इति नियमेन प्रातिपदिकत्वस्यासंभवेन सुबन्तत्वस्याप्यसम्भवात्। न च द्विःप्रयोगपक्षे स एव धातुः प्रत्ययश्च द्विः पठ्यते इति समुदायस्यापि पदसंज्ञा प्रवर्तते इत्यधुनैवोक्तत्वात्पुनःपुनरिति समुदायस्य सुबन्तत्वमस्त्येवेति शङ्क्यम्. अन्तरङ्गत्वात्सोर्लुकि प्रकृतिभागस्य द्विर्वचने सति यस्मात्प्रत्ययो विहितस्तदादि तदन्तमिति विधीयमानायाः पदसंज्ञायाः समुदायस्य दुर्लभत्वात्। ततश्चैकपद्याभावे 'पुनःपुनर्जायमाना पुराणी' इत्यादाववग्रहोऽपि न सिध्येदिति। **आभीक्ष्ण्यमिति**। तद्धि क्रियानिष्ठधर्मः। तेन तद्द्योतनार्थं द्वित्वं क्रियाप्रधानानामेव न्याय्यम्। क्रियाप्राधान्यं चाख्यातेऽस्ति, कृद्विशेषे च, 'अव्ययकृतो भावे' इति वक्ष्यमाणत्वादिति भावः। केचित्तु क्रियाप्रधानानामेव द्वित्वे परिगृहीतसाधनाया एव क्रियाया व्यवहारोपयोगित्वात्तदभिधानाच्च धातुमात्रस्य द्वित्वं न भवति किंतु तादृशक्रियाभिधायिनः पदस्यैव स्यादिति पदस्यापकर्षणाभावेऽपि न क्षतिरित्याहुः। तच्चिन्त्यम्। उक्तरीत्या नानाकारकविशिष्टक्रियासमर्पकस्य वाक्यस्यैव द्वित्वापत्तेः। किं च भावार्थकलकारान्तानामव्ययकृतां च भवदुक्तरीत्या द्वित्वं न स्यात्। ननु तत्र नित्यतावगत्यनन्तरं पदान्तरैः साधनाकाङ्क्षा

वीप्सायाम्–वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः। २१४१ परेर्वर्जने

त्यर्थः। तथैवोदाहरति **पचति पचति, भुक्त्वा भुक्त्वेति। वीप्सायामिति।** उदाह्रियत इति शेषः। **वृक्षं वृक्षमिति।** कृत्स्नं वृक्षमित्यर्थः। अत्र प्रकृततद्वाटिकागतवृक्षकार्त्स्न्यं गम्यते। जगतीतलस्थितकृत्स्नवृक्षसेचनस्य अशक्यत्वात्। सर्वशब्दस्य कार्त्स्न्यवाचित्वेऽपि न द्वित्वमित्यनुपदमेव 'यथास्वे–' इत्यत्र वक्ष्यते। वृक्षं वृक्षमित्यत्र कार्त्स्न्यावगमेऽपि प्रत्येकनिष्ठमेकत्वमेव भासते, नतु बहुत्वम्। अतो न बहुवचनम्। 'एकैकस्य प्राचाम्' इति लिङ्गाच्च। सर्वस्येत्यभावे वृक्षाभ्यामित्यादौ स्वादिषु–' इति पदत्वमवलम्ब्य प्रकृतिभागमात्रस्य द्विर्वचनं

परिपूर्येत इति भूयते पक्त्वेत्यादिपदानां द्वित्वं स्यादेवेति चेत् तर्हि तत्रैव धातुमात्रस्य द्वित्वं केन वार्यताम्। किं च तद्वदेव कर्तृकर्मलकारस्थलेऽपि धातुमात्रद्वित्वं दुर्वारमिति पदस्येत्यपकर्षणमावश्यकमेवेति दिक्। **वीप्सायामिति।** व्याप्तुमिच्छा वीप्सा। व्याप्तिप्रतिपिपादयिषेति यावत्। सा च प्रयोक्तुर्धर्मं आबाधवत्। गतगत इत्युक्ते प्रियस्य चिरगमनादिना पीडितो वाक्यं प्रयुङ्क्ते इति यथा प्रतीयते तथा वृक्षंवृक्षं सिञ्चतीत्यादावपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात्। शाब्दबोधविषयस्तु व्याप्तिरेव। तथा च 'नित्यव्याप्त्योः' इत्येव सूत्रयितुं शक्यम्। व्याप्तिरिह कार्त्स्न्यम्, तच्चाधिकारिकम्। 'सर्वे ब्राह्मणा आमन्त्रिताः' इत्यादौ यथा। 'न हि जगतीतले विद्यमाना ब्राह्मणाः सर्वेऽपि केनचिदामन्त्रयितुं शक्यन्ते' इति स्वग्रामस्थस्वजातीयब्राह्मणपरतया यत्र संकोचो यथाभ्युपेयते तथात्रापि सकलवृक्षसेचनसामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र वाटिकादौ वृक्षसेचनार्थमधिकारस्तद्वाटिकास्थवृक्षाणामेव कार्त्स्न्यं वृक्षं वृक्षं सिञ्चतीत्यादौ गम्यते इत्यभ्युपेयम्। यत्र तु संकोचे कारणं नास्ति, तत्रासंकोच इष्ट एव 'जातोजातो निधनमुपैति' इति यथा। न चैवं वृक्षं वृक्षमित्यादौ बहुवचनप्रसङ्गः, बहूनां भानेऽपि बहुत्वसंख्यायास्तत्राभानात्। प्रत्येकनिष्ठमेकत्वमेव हि तत्र भासत इत्यादि मनोरमायां स्थितम्। वृक्षं वृक्षमिति समुदायस्य तु प्रातिपदिकत्वाभावाद्बहुवचनस्य प्रसङ्ग एव नास्ति। न च 'अर्थवदधातुः–' इत्यनेन प्रातिपदिकत्वं शङ्क्यम्, 'यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति समासस्यैव' इति नियमात्। न चाष्टमिकं द्विर्वचनमादेशरूपमिति संघातो न भवतीत्यपि शङ्क्यम्, द्वे इति वचनादेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते इति प्रागुक्तत्वात्। नन्वेवमपि 'सरित्सरित्' 'योषायोषा' इत्यादौ बहुवचनोत्पत्तिर्दुर्वारैव। सरिदिति स्थानिनः प्रातिपदिकत्वसम्भवेन तदादेशस्यापि सरित्सरिदित्यादेः स्थानिवद्भावेन प्रातिपदिकत्वसम्भवादिति चेत्, अत्राहुः—अन्तरङ्गैकत्वसंख्यावरुद्धो द्विरुक्तार्थः संख्यान्तरे

(८-१-५) परि परि वङ्गेभ्यो वृष्टो देवः । वङ्गान्परिहृत्येत्यर्थः । 'परेर्वर्जने वावचनम्' । (वा ४६८३) परि वङ्गेभ्यः । **२१४२ उपर्यध्यधसः सामीप्ये ।** (८-१-७) उपर्युपरि ग्रामम् । ग्रामस्योपरिष्टात्समीपे देशे इत्यर्थः । अध्यधि सुखम् । सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः । अधोऽधो लोकम् । लोकस्याधस्तात्समीपे देशे इत्यर्थः । **२१४३ वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ।** (८-१-८) असूयायाम्-सुन्दर सुन्दर वृथा ते

स्यात् । कृते तु सर्वग्रहणे पदावयवत्वानाक्रान्तस्यैव कृत्स्नावयवोपेतस्य पदस्य द्वित्वमित्यर्थलाभान्न दोषः । 'पदस्य' इति किम् ? वाक्यस्य मा भूत । **परेर्वर्जने** । वर्जने वर्तमानस्य परीत्यस्य द्वे स्त इत्यर्थः । **परि परि वङ्गेभ्यो वृष्ट इति** । पर्जन्य इति शेषः । 'अपपरी वर्जने' इति परिः कर्मप्रवचनीयः । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । परि हरेः संसार इत्यत्र तु, 'परेरसमासे इति वक्तव्यम्' इति वार्तिकाद् न द्विर्वचनम् । **उपर्यध्यधसः** । उपरि, अधि, अधः एतेषां द्वे स्तः सामीप्ये गम्य इत्यर्थः । सामीप्यं च उपर्युपरि ग्राममित्यत्र अधोऽधो लोकमित्यत्र च देशतः, अध्यधि सुखमित्यत्र तु कालत इति ज्ञेयम् । **वाक्यादेः** । द्वे स्त इति शेषः । यद्यपि कोपाद्भर्त्सनम्, असूयया कुत्सनम्, तथापि विनापि कोपासूये भर्त्सनकुत्सनयोः शिष्यादौ संभवात्पृथग् ग्रहणम् इति भाष्ये

निराकाङ्क्ष एव । न हि वस्तुगत्या बहुत्वमस्तीत्येतावतैव तस्य शाब्दबोध आपादयितुं शक्यते । असत्त्वार्थकेष्वपि तदापत्तेः । न हि शयनबाहुल्याभिप्रायेण 'देवदत्तेन शय्यते' इति भावे कश्चित्प्रयुङ्क्ते । तत्रायोग्यं तदिति चेत् समं प्रकृतेऽपि । अत्र च लिङ्गम् 'एकैकस्य प्राचाम्' इति निर्देश इति । **परेर्वर्जने** । अत्र वार्तिकं 'परेरसमासे' । नेह—परित्रिगर्तं वृष्टो देवः । 'वेति च वक्तव्यम्' तथा च अप हरेः परि हरेः संसार इति कारकेषूदाहृतम् । **परिपरि वङ्गेभ्य इति** । 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । **उपर्यध्य** । सामीप्यं प्रत्यासत्तिः, तच्च कालकृतं देशकृतं वा । **अध्यधि सुखमिति** । कालकृतस्योदाहरणमिदम् । सामीप्य इति किम्, उपरि चन्द्रमाः । उपरि शिरसो घटं धारयतीत्यत्र तु वस्तुतो विद्यमानमपि सामीप्यं न विवक्षितम्, किं त्वौत्तराधर्यमेव केवलं विवक्षितमिति द्विर्वचनं न भवति । विवक्षा हि शब्दव्युत्पत्तेः प्रधानं कारणम् । अत्र च 'उपश्लोकमं तदाद्याचिख्यासायाम्' इति सन्नन्तप्रयोगो ज्ञापक इत्याहुः । **वाक्यादेः** । **सुन्दरसुन्दरेत्यादि** । 'स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनभर्त्सनेषु' 'आम्रेडितं भर्त्सने' इति सूत्राभ्यां यथायथं प्राप्तः प्लुतो वैकल्पिकत्वान्नेह कृतः । उक्तं हि प्राक् 'सर्वः प्लुतो वैकल्पिकः' इति ।

सौन्दर्यम्। संमतौ—देव देव वन्द्योऽसि। कोपे—दुर्विनीत दुर्विनीत इदानीं शास्यसि। कुत्सने—धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने—चोर चोर घातयिष्यामि त्वाम्।

२१४४ एकं बहुव्रीहिवत्। (८-१-६) द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्। तेन सुब्लोपपुंवद्भावौ। एकैकमक्षरम्। इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप्। एकैकया आहुत्या। इह पूर्वभागे पुंवद्भावाद-

---

स्पष्टम्। **सुन्दरेति**। सौन्दर्यमसमानस्येदं वाक्यम्। **देवेति**। तव वन्दनं संमतमित्यर्थः। **दुर्विनीतेति**। क्रोधाविष्टस्य वाक्यम्। **शास्यसीति**। दुर्विनयस्य फलमिति शेषः। **धानुष्केति**। युद्धासमर्थं प्रति निन्द्येयम्। **चोरेति**। चोरं प्रति अवाच्यवादोऽयम्। **एकं बहुव्रीहिवत्**। **द्विरुक्त इति**। द्विर्वचनं प्राप्त इत्यर्थः। एतच्च प्रकरणाल्लभ्यते, 'वीप्सामात्रविषयमिदम्' इति भाष्याच्च। **तेनेति**। बहुव्रीहिवत्त्वेन सुब्लोपपुंवद्भावौ सिध्यत इत्यर्थः। तत्र सुब्लोपमुदाहरति **एकैकमिति**। **इहेति**। एकैकमित्यत्र एकमित्यस्य द्विर्वचने सति, एकमेकमिति स्थिते सुपो लुकि, समुदायात् सुबित्यन्वयः। ननु 'यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव' इति नियमेन समुदायस्य प्रातिपदिकत्वाभावात् कथमिह सुपो लुक्, कथं वा समुदायात् सुबित्यत आह **बहुव्रीहिवद्भावादेव प्रातिपदिकत्वादिति**। एतच्च सुपोर्लुकीत्यत्र समुदायात्सुबित्यत्र च मध्यमणिन्यायेनान्वेति। अथ पुंवत्त्वेऽप्युदाहरति **एकैकया आहुत्येति**। एकयेत्यस्य द्विर्वचने सति एकया एकयेति स्थिते, बहुव्रीहिवत्त्वेन समुदायस्य प्रातिपदिकत्वात्सुपोर्लुकि, पूर्वखण्डस्य पुंवत्त्वे कृते, समुदायात्पुनस्तृतीयोत्पत्तौ, एकैकयेति रूपम्। बहुव्रीहिवत्त्वाभावे तु इह समुदायस्य प्रातिपदिकत्वाभावात् सुपोर्लुक् पूर्वखण्डस्य पुंवत्त्वं च न स्यात्, उत्तरपदपरकत्वाभावात् समासचरमावयवस्यैव उत्तरपदत्वादिति भावः। एकैकामित्यत्र उत्तरखण्डस्य 'सर्वनाम्नो वृत्तिमात्रे—' इति पुंवत्त्वं बहुव्रीहिवत्त्वे सत्यपि न प्रवृत्तिमर्हति,

---

नन्वत्र कोपासूयाभ्यां पृथक्कुत्सनभर्त्सनग्रहणमपार्थकम्। न ह्यसूयां विना कुत्सयते, न वा अकुपितो भर्त्सयत इति चेत्। अत्राहुः—गुरवो हि हितैषित्वादकुपिता अपि भर्त्सनं कुर्वते, विनाप्यसूयां कुत्सां कुर्वन्तीति पृथक्तया निर्देशः सूत्रकारेण कृतः। 'साम्रतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः। लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः' इति। **एकं बहुव्रीहिवत्**। द्वे इत्यनुवर्तते। तच्चानुवाद्यसमर्पकम्, तदाह **द्विरुक्त इति**। **तेनेति**। यद्यप्येतौ बहुव्रीहौ विशिष्य न विहितौ, तथापि तत्र दृष्टाविस्तत्वतैवातिदिश्येते इति भावः। **सुब्लोपपुंवद्भावाविति**। पूर्वपदप्रकृतिस्वरश्च बोध्यः। **समुदायात्सुबिति**। तच्चैकवचनमेवेति अन्तरङ्गैकत्वसंख्यावरुद्धो

वग्रहे विशेषः। 'न बहुव्रीहौ' (सू २२२) इत्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम्। तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः। वस्तुतस्तु भाष्यमते प्रत्याख्यातमेतत्। सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके विग्रहे निषेधकम्, न तु बहुव्रीहाविवीहातिदेशशङ्कैव नास्ति। एकैकस्मै देहि। २१४५ आबाधे च।

पूर्वस्यैवेदम्, 'नश्लेषाद्धा–' इति लिङ्गादित्युक्तत्वादिति बोध्यम्। ननु सुपोर्लुकि पूर्वखण्डस्य एकाशब्दस्य पुंवत्त्वे सत्यसति वा वृद्धौ एकैकयेति सिध्यत्येवेत्यत आह **इह पूर्वभाग इति। अवग्रह इति।** समस्तपदस्य द्विधा करणे पूर्वखण्डः अवग्रहः। 'तस्य पूर्वोऽवग्रहः' इति प्रातिशाख्यम्। एकैकयेत्येक एकया इतीष्यते पूर्वखण्डस्य पुंवत्त्वम्। बहुव्रीहिवत्त्वाभाव तु एकैकयेत्येका एकयेति स्यादिति भावः। तैत्तिरीयास्तु एकैकयेत्येका एकया इत्येवावगृह्णन्ति। एक समासवदित्येव सिद्धे बहुव्रीहिग्रहणं बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्वरार्थम्। ननु बहुव्रीहिवत्त्वे सति 'न बहुव्रीहौ' इति सर्वनामत्वनिषेधादेकैकस्मै देहीत्यादौ कथं सर्वनामकार्यमित्यत आह **न बहुव्रीहावित्यत्रेति।** 'विभाषा दिक्समासे बहुव्रीहौ' इत्यतो बहुव्रीहिग्रहणानुवृत्त्यैव सिद्धे 'न बहुव्रीहौ' इत्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम्। अतो बहुव्रीहिवदित्यदितिष्टबहुव्रीहौ सर्वनामत्वनिषेधो नेत्यर्थः। तदाह **तेनेति।** तदेवं प्राचानोक्तं परिहारमुक्त्वा सिद्धान्तिमतेनाह **वस्तुतस्त्विति। एतदिति।** 'न बहुव्रीहौ' इति सूत्रमित्यर्थः। एवं च बहुव्रीहावपि सर्वनामत्वस्य भाष्यसंमततया बहुव्रीहिवत्त्वातिदेशे सत्यपि सर्वनामत्वं निर्बाधमिति भावः। **सूत्रमतेऽपीति।** उपसर्जनत्वादेव बहुव्रीहौ सर्वनामत्वनिषेधे सिद्धे 'न बहुव्रीहौ' इति बहुव्रीह्यर्थके अलौकिकविग्रहवाक्ये एव समासात् प्राक् सर्वनामत्वं निषिध्यत इति प्रागेवोक्तम्। तस्मादिह बहुव्रीह्यतिदेशाप्रयुक्तसर्वनामकार्याभावशङ्कैव नास्तीत्यर्थः। **एकैकस्मै देहीति।** इह द्वयोरपि

द्विरुक्तार्थः संख्यान्तरे निराकाङ्क्ष इति प्रागेवोक्तत्वात्। **पूर्वभाग इति।** नतूत्तरभागेऽपि। तथाहि—द्विधात्र पुंवद्भावः 'सर्वनाम्नो वृत्तिमात्रे–' इति वा 'स्त्रियाः पुंवत्–' इति वा। तत्राद्यः पूर्वभागस्यैव 'भश्लेषा–' इति ज्ञापकादित्युक्तम्। द्वितीयस्तु समानाधिकरणे परे विधीयते, न चोत्तरभागस्य समानाधिकरणपरत्वमस्तीति भावः। **अवग्रहे विशेष इति।** एकैकयेत्येकएकयेति भवतीत्यर्थः। **एकैकस्मै इति।** ननु सुब्लोपपुंवद्भावाविव बहुव्रीहौ सर्वनामसंज्ञाभावोऽपि दृष्ट इत्ययमपि बहुव्रीहिवद्भावेनातिदिश्यताम्। तथा च स्मायादेशोऽत्र दुर्लभ इति चेत्। अत्राहुः—सुब्लोपपुंवद्भावाविव सर्वनामसंज्ञाभावः शास्त्रेण न दृष्टः। किं तु बहुव्रीहेर्गौणत्वात्सर्ववाचकत्वं न संभवतीति तदभावो दृष्ट इति नायमतिदिश्यते। 'न बहुव्रीहौ' इति शास्त्रं त्वलौकिकवाक्ये

(८-१-१०) पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च । गतगतः । विरहात्पीड्यमानस्येयमुक्तिः । बहुव्रीहिवद्भावात्सुब्लुक् । गतगता । इह पुंवद्भावः । २१४६ **कर्मधारयवदुत्तरेषु** । (८-१-११) इह उत्तरेषु द्विर्वचनेषु कर्मधारयवत् कार्यम् । 'प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि' (वा ४६८९) । २१४७ **प्रकारे गुणवचनस्य** । (८-१-१२) सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारय-

---

सुपोर्लुक्कि पुनः सर्वादिपठितैकशब्दान्ततया सर्वनामत्वात् स्मैभाव इति भावः । **आबाधे च** । आबाधः पीडा । तदाह **पीडायामिति** । **गतगत इति** । प्रियां विना काल इति शेषः । आबाधं दर्शयितुमाह **विरहादिति** । स्त्रीवियोगादित्यर्थः । **बहुव्रीहिवद्भावादिति** । गत इत्यस्य द्विर्वचने सति बहुव्रीहिवत्त्वात् समुदायस्य प्रातिपदिकत्वेन सुपोर्लुकि समुदायात् सुबुत्पत्तिरित्यर्थः । **गतगतेति** । प्रियेति शेषः । इयमपि स्त्रीविरहात् पीड्यमानस्योक्तिः । एकस्या एव गमनकर्त्र्याः द्विःकथनात् समानाधिकरणं स्त्रीलिङ्गमुत्तरपदमिति 'स्त्रियाः पुंवत्–' इति पुंवत्त्वम्, बहुव्रीहिवत्त्वादुत्तरपदत्वस्यापि सत्त्वात् । तदाह **इह पुंवद्भाव इति** । **कर्मधारयवदुत्तरेषु** । कार्यं स्यादिति शेषः । कर्मधारयवत्त्वस्य फलमाह **प्रयोजनमिति** । सुब्लोपादीनां प्रत्येकान्वयाभिप्रायमेकवचनम् । **अन्तोदात्तत्वानीति** । अनुदात्तं चेत्यधिकृतमपि भाष्यप्रामाण्यादत्र सम्बध्यत इति भावः । **प्रकारे गुणवचनस्य** ।

निषेधकम्, न तु बहुव्रीहावित्युक्तत्वादिति । **आबाधे च** । **इहेति** । बहुव्रीहिवद्भावादित्यनुषज्यते । तथा च 'स्त्रियाः पुंवत्–' इति प्रवर्तते । न च द्विरुक्तस्य परमुत्तरपदं नेति वाच्यम्, बहुव्रीहिवदित्यतिदेशबलेनैव उत्तरपदत्वस्यापि लाभात् । ननु बहुव्रीहिवद्भावेनोत्तरपदत्वलाभे सति ननेत्यत्र 'नलोपो नञः' इति कस्मान्न भवति । उच्यते– 'नलोपो नञः' इत्यत्र उत्तरपदे इति प्रवर्तते, नञ इति च कार्यिणो निदशः, तत्र साक्षाच्छिष्टेन कार्यित्वेन नञो निमित्तभावो बाध्यते । यथा मद्रहृदो भद्रहृद इति । अत्र रेफस्य 'अचो रहाभ्याम्–' इति द्वित्वप्रसङ्गे आकरे उक्तं 'नेमौ रहौ कार्यिणौ किं तु निमित्तमेतौ द्विर्वचनस्य' इति । नन्वेवमपि 'धूर्धूः' 'पन्थाःपन्थाः' इत्यादौ 'ऋक्पूरब्धूर्–' इति समासान्तः स्यादिति चेत् । न, 'समासाच्च तद्विषयात्' इत्यतः समासादित्यनुवर्तमाने 'समासान्ताः' इति पुनः समासग्रहणं हि समासाधिकारविहितो यः समासस्तत्परिग्रहार्थम् । तेनातिदेशिके समासे समासान्तानामप्रवृत्तिरिति दिक् । **कर्मधारयवदुत्तरेषु** । अधिकारेणैव सिद्धे 'उत्तरेषु' इति वचनं विस्पष्टार्थमिति वृत्तिः । **प्रकारे गुणवचनस्य** । यद्यपि प्रकारशब्दो भेदे सादृश्ये च वर्तते । बहुभिः प्रकारैर्भुङ्क्ते, बहुभिर्भेदैर्विशेषैरित्यवगमात् । ब्राह्मणप्रकारोऽयं माणवकः,

वत्। 'कर्मधारयवदुत्तरेषु–' (सू २१४६) इत्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः 'समासस्य' (सू ३७३४) इत्यन्तोदात्तत्वं च। पटुपट्वी। पटुपटुः।

प्रकारशब्दः सादृश्ये वर्तते व्याख्यानादित्यभिप्रेत्याह **सादृश्ये द्योत्य इति**। गुणवचनशब्देन 'आ कडारात्–' इति सूत्रस्थभाष्यपरिगणिताः शब्दा गृह्यन्त इति 'वोतो गुणवचनात्' इत्यादौ प्रपञ्चितमिदम्। **तेनेति**। कर्मधारयवत्त्वेनेत्यर्थः। **पुंवद्भाव इति**। 'पुंवत्कर्मधारय–' इत्यनेनेति शेषः। **पटुपट्वीति**। पट्वी-शब्दस्य द्विर्वचने कर्मधारयवत्त्वात् 'पुंवत्कर्मधारय–' इति पूर्वखण्डस्य पुंवत्त्वे रूपमिति भावः। यद्यपि बहुव्रीहिवत्त्वेऽपि 'स्त्रियाः पुंवत्–' इति पुंवत्त्वादिदं सिद्धम्, तथापि कारिकेत्यादिकोपधादिष्वपि पुंवत्त्वार्थं कर्मधारयवदिति वचनमिति भावः। **पटुपटु-**

ब्राह्मणसदृश इत्यवगमाच्च। तथापीह विवक्षितमाह **सादृश्य इति**। व्याख्यानमेवात्र शरणम्। **पुंवद्भाव इति**। 'पुंवत्कर्मधारय–' इति सूत्रात्। तच्च कोपधादिष्वपि कालककालिकेत्यादिषु प्रवर्तते। तेन बहुव्रीहिवद्भावे प्रकृते कर्मधारयवद्भावोक्तिर्व्यर्थेति शङ्काया निरवकाश इति बोध्यम्। **पटुपटुरिति**। इह द्वित्वेन जातीयरो बाधो नेष्यते पटुजातीय इति वामनः। अन्यथा ब्राह्मणजातीय इत्यादावगुणवचनेऽपि भेदरूपेऽर्थे सावकाशो जातीयर् गुणवचनेषु सादृश्यपरेण द्वित्वेन बाध्येतेति भावः। गुणवचनस्येति किम्, अग्निर्माणवकः, सिंहो माणवकः। यद्यपीहाग्निसिंहशब्दाभ्यां गौण्या वृत्त्या तैक्ष्ण्यक्रौर्यादिगुणो गम्यते, तथापि प्रकारे वर्तमानस्येत्येव सिद्धे गुणवचनग्रहणसाम-र्थ्याद् मुख्यवृत्त्या गुणपराणामेव द्वित्वम्, न त्वन्येषामित्याकरः। 'नवं नवं प्रीतिरहो करोति' इत्यत्र वीप्सायां द्विर्वचनम्। अनेन तु द्विर्वचने सुब्लुक् स्यात्। 'नवनवा वनवायुभिराददे' इत्यत्र त्वनेनैव द्विर्वचनम्, न तु वीप्सायामिति पुंवद्भावः। कथं 'भीतभीत इव शीतमयूखः' इति भारविः। इवशब्देन सादृश्यस्योक्ततया इह प्रकारे द्वित्वायोगात्। सत्यम्, भीतेभ्यो भीत इति कथंचिद्व्याख्येयम्। तेनातिभीत इति फलितम्। 'आधिक्ये द्वे वाच्ये' इति वार्तिकेन भीतभीतादौ द्वित्वमिति दुर्घटादि-भिरुक्तं समाधानं नादर्तव्यम्। तादृशस्य वार्तिकस्याप्रसिद्धत्वात्। अथ कथं 'खिन्नः-खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र। क्षीणःक्षीणः परिलघुपयः स्रोतसां चोपयुज्य' इति मेघदूतः। पदार्थभेदस्याभावेन वीप्सार्थस्यासंभवादिति चेत्। अत्राहुः— एकस्यापि खेदावस्थासु क्षयावस्थासु च भेदं परिकल्प्य वीप्सा बोध्येति। अथ कथं 'मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्' इति मेघदूतः। वीप्सार्थस्यासंभवादनेनैव द्विर्वचने कृते 'मन्दमन्दमुदितः प्रययौ खम्' इतिवत्सुब्लुक् स्यादिति चेत्। सत्यम्, स्वतो मन्दगामिनं त्वां पवनो मन्दं नुदतीति कथंचिद्व्याख्येयम्। सिद्धस्य गतेश्चिन्त-

पटुसदृशः, ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते। शुक्लशुक्लं रूपम्। शुक्लशुक्लः पटः। 'आनुपूर्व्ये द्वे वाच्ये' (वा ४६६२)। मूले मूले स्थूलः। 'संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः' (वा ५०२६)। सर्पः सर्पः, बुध्यस्व बुध्यस्व। सर्पः सर्पः सर्पः, बुध्यस्व बुध्यस्व बुध्यस्व। 'क्रियासमभिहारे च' (वा ४६६५)। लुनीहि लुनीहीत्येवायं लुनाति। 'नित्यवीप्सयोः' (सू २१४०) इति सिद्धे भृशार्थे

रिति। 'वोतो गुणवचनात्' इति ङीषभावे पुंसि च द्विर्वचने रूपम्। **पटुसदृश इति।** इत्यर्थ इति शेषः। फलितमाह **ईषत्पटुरिति।** इह गुणवचनशब्दस्य गुणोपसर्जनद्रव्यवाचित्वमेवेति भ्रमं निरस्यति **गुणोपसर्जनेति। शुक्लशुक्लं रूपमिति।** शुक्लसदृशमित्यर्थः। ईषच्छुक्लमिति यावत्। एवं शुक्लशुक्लः पट इति बोध्यम्। **आनुपूर्व्ये इति।** अत्र वार्तिके कर्मधारयवदिति न संबध्यते, तदुदाहरणे भाष्ये सुब्लोपादर्शनादित्यभिप्रेत्योदाहरति **मूले मूल इति।** पूर्वपूर्वो मूलभाग उत्तरोत्तरमूलभागापेक्षया स्थूल इति यावत्। **संभ्रमेणेति।** वार्तिकमिदम्। संभ्रमो भयादिकृता त्वरा, तेन प्रवृत्तौ गम्यमानायां यथेष्टम् इच्छानुसारेण अनेकधा शब्दः प्रयोक्तव्य इति वक्तव्यमित्यर्थः। अनेकधेत्युक्तेर्द्वे इति निवर्तते। यथेष्टमित्युक्तेरसकृत्त्वेऽप्येकस्य प्रयोगः स्यादिति शङ्कां निरस्यति **न्यायसिद्ध इति।** यावद्वारं प्रयोगे सति बोद्धा अर्थं प्रत्येति, तावद्वारमेव प्रयोगः। बोधात्मकफलपर्यवसायित्वाच्छब्दप्रयोगस्येत्यर्थः। एतच्च भाष्ये स्पष्टम्। अत्रापि कर्मधारयवत्त्वानतिदेशान्न सुब्लुक्, भाष्ये तथैवोदाहरणात्। **क्रियासमभिहारे चेति।** वार्तिकमिदम्। द्वे स्त इति शेषः। पौनःपुन्यं भृशत्वं च क्रियासमभिहारः। लोडन्तविषयमेवेदम्। 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः' इति सूत्रभाष्ये क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे भवत इति वक्तव्यमिति पाठमभिप्रेत्योदाहरति **लुनीहिलुनीहीत्येवायं लुनातीति।** 'लूञ् छेदने' अस्मात् 'क्रियासमभिहारे लोट्

नीयत्वात्। **शुक्लशुक्लमिति।** केवलगुणवाचिन उदाहरणमिति ध्वनयति **रूपमिति। आनुपूर्व्ये इति।** वीप्साभावादयमारम्भः। **मूले मूल इति।** अग्रेअग्रे सूक्ष्मा इत्यप्युदाहर्तव्यम्। एकस्य वस्तुनो वेणुदण्डादेरेकमेव मुख्यं मूलमग्रं च। इतरेषां भागानामापेक्षिकोऽग्रमूलव्यपदेशः। स्थौल्यसौक्ष्म्ये अपि नैकरूपे, किं तर्हि यथामूलमुपचीयते स्थौल्यम्, यथा अग्रं सौक्ष्म्यं तथा नेतरे भागा इति वीप्साया असंभवः। 'मूले मूले पथि विटपिनाम्' इत्यत्र तु वीप्सायां द्विर्वचनम्। एतच्च हरदत्तग्रन्थे स्पष्टम्। **न्यायसिद्ध इति।** यावद्भिः शब्दैः संबोध्योऽर्थमवगच्छति तावतां प्रयोक्तव्यत्वा-

द्वित्वार्थमिदम्। पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकत्वं लब्धुं वा। 'कर्म-व्यतिहारे सर्वनाम्नो द्वे वाच्ये, समासवच्च बहुलम्' (वा ४७००)। बहुल-ग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्व-

---

लोटो हिस्वौ–' इति लोट्। तस्य हि इत्यादेशः श्नाविकरणः। लुनीहीत्यस्य अनेन द्विर्वचनम्। 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' इत्यनुप्रयोगः। तस्माल्लडादयः। अति-शयेन पुनर्वा लवनं लुनीहीति द्विरुक्तस्यार्थः। एककर्तृकं लवनमनुप्रयोगस्यार्थः। इतिशब्दस्त्वभेदान्वये तात्पर्यं ग्राहयतीत्यादि मूल एव लकारार्थप्रक्रियायां स्फुटी-भविष्यति। तथा च अतिशयितमेककर्तृकं लवनमिति फलितोऽर्थः। **नित्येति**। 'नित्यवीप्सयोः' इति पौनःपुन्ये द्विर्वचने सिद्धेऽपि भृशार्थे द्विर्वचनार्थमिदं वार्तिकमि-त्यर्थः। नन्वस्य भृशार्थ एव द्विर्वचनफलकत्वे 'भृशे च' इत्येव सिद्धे 'क्रियासमभिहारे' इति व्यर्थमित्यत आह **पौनःपुन्येऽपीति**। लुनीहिलुनीहीत्यत्र पौनःपुन्ये लोटो द्विर्वचनस्य च समुच्चयार्थमिति यावत्। अन्यथा लोटैव पौनःपुन्यस्य द्योतितत्वात्तत्र नित्यवीप्सयोर्द्विर्वचनस्य प्रवृत्तिर्न स्यादित्यर्थः। एवं च 'धातोरेकाचः–' इति पौनःपुन्ये यङन्ते पापच्यते इत्यादौ न द्विर्वचनमित्यन्यत्र विस्तरः। **कर्मव्यतिहार इति**। क्रियाविनिमयः कर्मव्यतिहारः, तस्मिन् गम्ये सर्वनाम्नो द्वे स्तः। ते च द्विरुक्ते पदे बहुलं समासवदित्यर्थः। अत्र 'बहुलम्' इति समासवदित्यत्रैवान्वेति। द्विर्वचनं तु नित्यमेव। **अन्यपरयोरिति**। अन्यशब्दपरशब्दयोरेव बहुलं समासवत्त्वम्। इतरशब्दस्य तु नित्यमेवेत्यर्थः। अत एव अन्यशब्दस्य समासवत्त्वरहितमेव इतर-शब्दस्य तत्सहितमेवोदाहरणं भाष्ये दृश्यते। तथा 'परस्परोपपदाच्च' इति वार्तिक-प्रयोगात् परशब्दस्यापि समासवत्त्वाभावो गम्यत इति भावः। एवं च क्रियासमभि-हारे अन्यशब्दस्य परशब्दस्य च नित्यं द्विर्वचनम्। द्विरुक्तयोस्तु समासवत्त्वं बहुलम्। इतरशब्दस्य तु तदुभयमपि नित्यम्। एतत्त्रयव्यतिरिक्तसर्वनामशब्दस्य तु नेदं

दिति भावः। **पौनःपुन्य इति**। पुनःपुनर्भवितरि वर्तमानात्पुनःपुनःशब्दाद् भावे प्रत्ययः। **लोटा सह समुच्चित्येति**। नन्वत्र लोटा सह समुच्चित्य यथा द्विर्वचनं भवति, तथा क्रियासमभिहारे यङि यङा सह समुच्चित्य द्विर्वचनं स्यात् पापच्यते पापच्यते, बोभूयते बोभूयते इति अत्राहुः—लोट् क्रियासमभिहारं व्यभिचरति। समुच्चयेऽपि जायमानत्वात्। ततश्च लोड्द्विर्वचनयोरेव तद्द्योतकत्वम्, न त्वेकैकस्येति युक्तं लोडन्तस्य द्विर्वचनम्। यङ् तु क्रियासमभिहारं न व्यभिचरतीति द्विर्वचनं विनैव तस्य द्योतकत्वम्। तेन तदन्तस्य न द्विर्वचनमिति। **कर्मव्यतिहार इति**। क्रियाविनिमय इत्यर्थः। **द्वे इति**। नित्यमेवेदं द्वित्वम्, बाहुलकं तु समासवद्भावस्यैव।

पदस्थस्य सुपः सुर्वक्तव्यः' (वा ४७००) अन्योन्यं विप्रा नमन्ति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतम्। अन्योन्यस्मै दत्तमित्यादि। 'अन्योन्येषां पुष्करैरामृशन्तः' इति माघः। एवं परस्परम्। अत्र कस्कादित्वाद्विसर्गस्य सः। इतरेतरम्। इतरेतरेणेत्यादि। 'स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः' (वा ४७०१) अन्योन्याम्, अन्योन्यम्। परस्पराम्, परस्परम्। इतरेतराम्,

---

द्वित्वम्, बहुलग्रहणादिति स्थितिः। **असमासवद्भाव इति**। इदमन्यपरशब्दयोरेव। इतरशब्दस्य समासवत्त्वस्यैवोक्तत्वात्। **सुपः सुरिति**। सुबिति प्रत्याहारः। सप्तानामपि विभक्तीनां पूर्वपदस्थानां प्रथमैकवचनं सु इत्यादेशो वाच्य इत्यर्थः। इदं द्वित्वादिविधानं प्रथमैकवचनमात्रविषयमिति केचित्। तदेतद्भाष्यविरुद्धम्, भाष्ये द्वितीयादिविभक्तेरुदाहृतत्वादित्यभिप्रेत्य द्वितीयादिविभक्तीरुदाहरति **अन्योन्यं विप्रा नमन्तीत्यादि**। इह अन्यम् अन्यौ इत्यादीनां द्वित्वे पूर्ववत्सुपः सुः। प्रथमैकवचनस्यैवेदं द्वित्वादीत्येतद् न कविसंमतमित्याह **अन्योन्येषामित्यादि माघ इत्यन्तम्**। परस्परमित्यत्र विसर्गस्य सत्त्वापवादमुपध्मानीयमाशङ्क्य आह **कस्कादित्वादित्यादि**। **इतरेतरमिति**। इतर इतरावित्यादीनां द्वित्वे समासवत्त्वात् सुपोर्लुकि समुदायात् पुनः सुबुत्पत्तिरिति भावः। **स्त्रीनपुंसकयोरिति**। स्त्रीनपुंसकयोर्विद्यमानानाम् अन्यपरेतरपदानां कर्मव्यतिहारे द्वित्वे उत्तरपदस्थविभक्तेः आम् इत्यादेशो बहुलं वक्तव्य इत्यर्थः। **अन्योन्यामित्यादि**। अन्योन्याम् अन्योन्यं वा इमे ब्राह्मण्यौ कुले वा भोजयतः, परस्परां परस्परं वा इमे ब्राह्मण्यौ कुले वा भोजयतः, इतरेतराम् इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयत इत्यन्वयः। तत्र अन्यामित्यस्य द्वित्वे दलद्वये टाबभाव इति वक्ष्यमाणतया पुंवत्त्वात् टापो निवृत्तौ समासवत्त्वाभावात्सुपोरलुकि पूर्वपदस्थविभक्तेः सुभावे रुत्वे 'अतो रोरप्लुतात्–' इत्युत्वे

सुपः सुर्वक्तव्य इति। अत्र कैश्चिदुक्तं द्वितीयादीनामेवेदं स्वादेशविधानम्। अतएवोत्तरदलेऽपि द्वितीयादय **एव न तु** प्रथमा, तत्राप्येकवचनमेव न तु वचनान्तरमिति। तदपाणिनीयम्, भाष्यादावनुक्तत्वात्। तदेतद्ध्वनयन् वचनान्तरमुदाहरति **अन्योन्यावन्योन्यानिति**। **माघ इति**। स च भाष्यानुगुण एवेति भावः। एतेनार्वाचीनमतं कवयोऽपि नाद्रियन्त इत्युक्तं भवति। भारविश्चाह 'क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः' इति। अत्रादृष्टः परस्परो यैरिति विग्रहः। यदि तु द्वितीयादीनामेव स्वादेशविधानं न तु प्रथमायाः, तर्ह्ययं प्रयोगो न सिध्यदिति दिक्। **अन्योन्यमिति**। न चात्र आमभावेऽपि टाप् स्यादिति शङ्क्यम्, 'बहुलग्रहणाट्टाबभावः' इत्यनुपदमेव वक्ष्यमाणत्वात्। स्त्रीनपुंस-

इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः । अत्र केचित्—आमादेशो द्वितीयाया एव, भाष्यादौ तथैवोदाहृतत्वात् । तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः । अन्ये तूदाहरणस्य दिङ्मात्रत्वात्सर्वविभक्तीनामामादेशमाहुः । "दलद्वये टाबभावः क्लीबे चाद्ड्विरहः स्वमोः । समासे सोरलुक्चेति सिद्धं

आद्गुणे उत्तरपदस्थविभक्तेरनेन आम्भावे अन्योन्यामिति रूपम् । आम्भावविरहे तु पुंवत्त्वाट्टापो निवृत्तौ पूर्वपदस्थविभक्तेः सुभावे पुँल्लिङ्गवदेव अन्योन्यमिति रूपम् । इयं ब्राह्मणी अन्यां ब्राह्मणीं भोजयति, अन्या त्विमामित्येवं विनिमयेन ब्राह्मण्यौ भोजयत इत्यर्थः । इदं कुलं कर्तृ अन्यत्कुलं भोजयति, अन्यत्कुलं कर्तृ इदं कुलमित्येवं विनिमयेन कुले भोजयत इत्यर्थः । अत्रान्यच्छब्दस्य नपुंसकलिङ्गस्य द्वित्वे पूर्वपदस्थाया विभक्तेः सुभावे उत्तरपदस्थविभक्तेः आम्भावे अन्योन्यामिति रूपम् । आम्भावविरहे तु 'क्लीबे चाद्ड्विरहः स्वमोः' इति वक्ष्यमाणतया पुंवत्त्वाद् अद्डादेशाभावे अन्योन्यमिति पुंवदेव रूपमिति बोध्यम् । एवं स्त्रीत्वे परामिति पदस्य द्वित्वे दलद्वयेऽपि पुंवत्त्वात् टापो निवृत्तौ पूर्वोत्तरपदस्थविभक्त्योः क्रमेण सुभावे आम्भावे च परस्परामिति रूपम् । आम्भावविरहे तु द्वित्वे पुंवत्त्वाट्टापो निवृत्तौ पूर्वपदस्थविभक्तेः सुभावे परस्परमिति रूपम् । नपुंसकत्वे तु परमित्यस्य द्वित्वे पूर्वपदस्थविभक्तेः सुभावे उत्तरपदस्थविभक्तेराम्भावे परस्परामिति रूपम् । आमभावे तु द्वित्वे पूर्वपदस्थविभक्तेः सुभावे परस्परम् इति रूपम् । इतरामित्यस्य द्वित्वे पुंवत्त्वाट्टापो निवृत्तौ उत्तरपदस्थविभक्तेराम्भावे समासवत्त्वात् पूर्वपदस्थविभक्तेर्लुकि इतरेतरामिति रूपम् । आम्भावविरहे तु इतरेतरमिति रूपम् । नपुंसकस्य तु इतरच्छब्दस्य द्वित्वे पुंवत्त्वादद्डादेशविरहे पूर्वपदस्थविभक्तेर्लुकि उत्तरपदस्थविभक्तेराम्भावतदभावाभ्यां रूपद्वयम् । अत्र भाष्यादौ द्वितीयाविभक्त्यन्तस्योदाहरणादितरविभक्तिषु आम्भावो न भवतीति प्राचीनमतमाह **अत्र केचिदिति । तेनेति ।** द्वितीयेतरविभक्तिषु आम्भावविरहेणेत्यर्थः । **पुंवदेवेति ।** आम्भावविरहे सति बहुलग्रहणात् पुंवत्त्वे टाबभावे प्रथमतृतीयादिविभक्तिषु पुंवदेव रूपम् । नपुंसकत्वे प्रथमतृतीयादिविभक्तिषु आम्भावविरहात् प्रथमैकवचनस्य इदं पुंवदेव रूपमित्यर्थः । सिद्धान्तमाह **अन्ये त्विति । दिङ्मात्रत्वादिति ।** दिक्प्रदर्शनमात्रत्वादित्यर्थः । उपलक्षणत्वादिति यावत् । अथात्र बहुलग्रहणानुवृत्तेः प्रयोजनकथनपरप्राचीनश्लोकमाह **दलद्वय इति ।** स्त्रीलिङ्गेष्वन्यपरेतरशब्देषु कर्मव्यतिहारे द्वित्वे सति पूर्वोत्तरखण्डयोः पुंवत्त्वाट्टाब्निवृत्तिरित्यर्थः । यद्यपि इतरेतरमित्यत्र समासवत्त्वात् 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवत्त्वादेव पूर्वखण्डे टाबभावः सिद्धः, तथाप्युत्तरखण्डे टाबभावार्थं बाहुलकाश्रयणमिति भावः । **क्लीब**

कयोस्तृतीयादिषु पुंवदिति प्राचो ग्रन्थं परिष्कुर्वन्नाह **अत्र केचिदिति ।** वस्तुस्थिति-

बाहुलकात्त्रयम्" । तथा हि—अन्योन्यं परस्परमित्यत्र दलद्वयेऽपि टाप्प्राप्तः। न च 'सर्वनाम्नो वृत्तिमात्रे–' (वा) इति पुंवद्भावः, अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। 'यां यां प्रियः प्रैक्षत कातराक्षी सा सा' इत्यादावतिप्रसङ्गात्। अन्योन्यमितरेतरम् इत्यत्र च 'अद्डुतरादिभ्यः–' (सू ३१५) इत्यद्ड् प्राप्तः। 'अन्योन्यसंसक्तमहस्त्रियामम्' 'अन्योन्याश्रयः' 'परस्पराक्षिसादृश्यम्' 'अपरस्परैः'

इति। अन्योन्यमित्यादौ अद्डादेशविरह इत्यर्थः। **समासे सोरिति**। कृतद्वित्वस्य अन्येन समासे पूर्वखण्डस्थस्येत्यर्थः। **तथा हीति**। यथेदं स्पष्टं भवति तथा उदाहृत्य प्रदर्श्यत इत्यर्थः। ननु पूर्वदले 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवत्त्वेनैव टान्निवृत्तेः सिद्धत्वात् तद्विषये बहुलग्रहणं नादर्तव्यमित्याशङ्क्य निराकरोति **न चेति**। 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवत्त्वस्यात्र न प्रसक्तिरित्यर्थः। कुत इत्यत आह **अन्यपरयोरिति**। 'समासवच्च बहुलम्' इति समासवत्त्वम् इतरशब्दमात्रविषयम्, न त्वन्यपरशब्दविषयमिति प्रागुक्तमित्यर्थः। ननु मास्तु समासवत्त्वम्, तथापि 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवत्त्वं दुर्वारम्। द्विर्वचनस्य वृत्तित्वादित्याशङ्क्य निराकरोति **नच द्विर्वचनमेव वृत्तिरिति**। 'कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः' इति परिगणनादिति भावः। द्विर्वचनस्य वृत्त्यन्तर्भावे बाधकमाह **यां यामिति**। द्विर्वचनस्य वृत्त्यन्तर्भावे 'यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमुखी बभूव' इत्यत्र श्लोके यांयामित्यत्र सासेत्यत्र च 'सर्वनाम्नो वृत्तिमात्रे–' इति पूर्वखण्डस्य पुंवत्त्वं स्यादित्यर्थः। क्लीबे चाद्ड्विरह इत्यस्योदाहरति **अन्योन्यमिति**। ननु समासे सोरलुक् चेति कथम्, अन्यपरशब्दयोः समासवत्त्वाभावादित्याशङ्क्य कृतद्वित्वस्यान्येन समासे पूर्वखण्डस्थस्य सोरलुगिति तदर्थमभिप्रेत्य तथैवोदाहरति **अन्योन्यसंसक्तमिति**। अन्योऽन्येन संसक्तमिति तृतीयासमासः। अहश्च त्रियामा चेति समाहारद्वन्द्वः। अहश्च रात्रिश्च अन्योन्येन संयुक्तमित्यर्थः। **अन्योन्याश्रय इति**। अन्योऽन्यस्य आश्रय इति षष्ठीसमासः। **परस्पराक्षिसादृश्यमिति**। अक्ष्णा सादृश्यमक्षिसादृश्यम्। परस्परस्याक्षिसादृश्यमिति विग्रहः। **अपरस्परैरिति**। न परस्परे अपरस्परे तैरिति विग्रहे एषु कृतद्वित्वेषु समासावयवेषु पूर्वखण्डस्थस्य सुबादेशस्य

माह **अन्ये त्विति**। **अतिप्रसङ्गादिति**। तथा च एकशेषप्रतिबन्धाद् द्विर्वचनस्यापि वृत्तित्वमाश्रित्य तद्बलेन पुंवद्भावो न शक्यो लक्ष्यविरोधात्। 'कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत्' इति 'अकथितं–' सूत्रस्थ 'यांयाम्' इति भाष्यप्रयोगविरोधाच्चेति भावः। नव्यास्तु–'यांयां प्रियः प्रैक्षत–' इत्यादिमाघप्रयोगे 'सासा–' इति द्विर्वचनमयुक्तम्। द्विरुक्तार्थस्य सेत्यनेनैव परामर्ष्टुं शक्यत्वात्। अत एव

इत्यादौ सोर्लुक्च प्राप्तः। सर्वं बाहुलकबलेन समाधेयम्। प्रकृतवार्तिकभाष्योदाहरणम्, 'स्त्रियाम्' (सू ४५३) इति सूत्रे 'अन्योन्यसंश्रयं त्वेतद्' इति भाष्यं चात्र प्रमाणमिति। **२१४८ अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्।** (८-१-१३) प्रियप्रियेण ददाति। प्रियेण वा। सुखसुखेन ददाति। सुखेन वा। द्विर्वचने कर्मधारयवद्भावात्सुपो लुकि तद्वेव वचनम्। अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः। **२१४९ यथास्वे यथायथम्।** (८-१-१४) यथास्वम् इति वीप्सायामव्ययीभावः। योऽयमात्मा यच्चात्मीयं तद्यथास्वम्। तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते। यथायथं ज्ञाता। यथास्वभाव-

---

सोर्लुक् प्राप्त इत्यर्थः। सुभावविधानं तु अन्योन्यमित्यादावसमासे चरितार्थमिति भावः। ननु बहुलग्रहणादेतत् समाधेयमित्यत्र किं प्रमाणमित्यत आह **प्रकृतवार्तिकेति।** 'स्त्रीनपुंसकयोः-' इति प्रकृतवार्तिके अन्योन्यमिमे ब्राह्मण्याविति, इतरेतरमिमे कुले इति चोदाहरणाद् 'दलद्वये टाबभावः क्लीबे चादड्विरहः स्वमोः' इति विज्ञायते। 'स्त्रियाम्' इति सूत्रे अन्योऽन्यसंश्रयं त्वेतदिति भाष्यप्रयोगात् समासे सोर्लुगिति विज्ञायत इत्यर्थः। **अकृच्छ्रे।** कृच्छ्रं कष्टम्। अकृच्छ्रम् अनायासः। तस्मिन्वर्तमानयोः प्रिय-सुख इत्यनयोः द्वे वा स्तः। **कर्मधारयवद्भावादिति** 'कर्मधारयवदुत्तरेषु' इत्यधिकारादिति भावः। 'समासवच्च बहुलम्' इत्यतः समासवदित्यनुवृत्तिस्तु न शङ्क्या, तस्य वार्तिकस्थत्वात्। एवं च प्रियेणेत्यस्य सुखेनेत्यस्य च द्वित्वे सति कर्मधारयवत्त्वात् सुपोस्तृतीयैकवचनयोर्लुकि पुनः समुदायात् तृतीयैकवचनमिति फलितम्। **यथास्वे यथायथम्। वीप्सायामिति।** कार्त्स्न्येन संबन्धो वीप्सेत्युक्तम्। स्वशब्दार्थगतकार्त्स्न्ये द्योत्ये यथाशब्दस्य स्वशब्देनाव्ययीभाव इत्यर्थः। कृत्स्नश्चासौ स्वश्चेत्यस्वपदविग्रहः, नित्यसमासत्वात्। स्वशब्दस्तु आत्मात्मीयज्ञातिधनवाची। इह तु आत्मात्मीयवाच्येव गृह्यते, नतु ज्ञातिधनवाची, व्याख्यानादित्यभिप्रेत्य विग्रहवाक्यस्य फलितमर्थमाह **द्वे इति।** स्त इति शेषः। निपातनादिति भावः। न च 'नित्यवीप्सयोः' इत्येव वीप्सया द्वित्वमिह सिद्धमिति शङ्क्यम्, द्वित्वविषयस्य शब्दस्य लक्षणया कार्त्स्न्यविशिष्टे वृत्तावेव वीप्साया द्विर्वचनविधानात्। अन्यथा सर्वो घट इत्यादौ सर्वशब्दस्यापि द्वित्वापत्तेरिति भावः। **क्लीबत्वमिति।** यथायथा इति समुदायस्येति शेषः। अन्यथा अव्ययत्वादलिङ्गत्वं स्यादिति भावः। एवं च कृतद्वित्वस्य

भाष्ये 'यां यां मन्येत सा भवतु' इत्येवोक्तमि त्याहुः। **सोर्लुक् च प्राप्त इति।** सुपः स्वादेशविधानस्यान्योन्यं परस्परमित्यत्र केवले चरितार्थत्वादिति भावः। **योऽयमात्मेत्यादि।** आत्मात्मीययोरपि स्वशब्दवाच्यत्वात्। **यथायथमिति।**

मित्यर्थः। यथात्मीयमिति वा। **२१५० द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु।** (८-१-१५) द्विशब्दस्य द्विर्वचनं पूर्वपदस्य अम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु। तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम्। इतरे विषयभूताः। द्वन्द्वं मन्त्रयते। रहस्यमित्यर्थः। मर्यादा स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति। माता पुत्रेण मिथुनं गच्छति, पौत्रेण प्रपौत्रेणापीति मर्यादार्थः। व्युत्क्रमणं पृथगवस्थानम्। द्वन्द्वं व्युत्क्रान्ता द्विवर्गसंबन्धेन पृथगवस्थिताः। द्वन्द्वं यज्ञ-

---

नपुंसकह्रस्वत्वं च फलितम्। **यथायथं ज्ञातेति।** अत्र ज्ञातेति तृजन्तम्। तद्योगे 'न लोक–' इति षष्ठीनिषेधात्कर्मणि द्वितीया। तृजन्तत्वे तु यथायथस्य ज्ञातेत्येव। **द्वन्द्वं रहस्य। पूर्वपदस्येति।** द्वौ द्वाविति द्वित्वे कर्मधारयवत्त्वात् सुब्लुकि समुदायात् पुनः सुपि पूर्वपदावयवस्य इकारस्य अम् इति मकारान्तादेश इत्यर्थः। **अत्वमिति।** उत्तरपदस्य अकारोऽन्तादेश इत्यर्थः। न च त्यदाद्यत्वमुत्तरपदान्तस्य सिद्धमिति वाच्यम्, संज्ञात्वात्तदप्राप्तेरित्याहुः। **नपुंसकत्वं चेति।** चकारः अनुक्तसमुच्चये। कृतद्वित्वस्य नपुंसकत्वं द्विवचनाभावश्चेत्यर्थः। **आचतुरं हीति।** आङभिविधौ। 'आङ्मर्यादा–' इत्यव्ययीभावः। शरत्प्रभृतित्वात् टच्। चतुर्थान्तमिति फलितोऽर्थः। पशवः स्वप्रभृति चतुर्थपर्यन्तं द्वन्द्वं मिथुनीयन्ति इत्यन्वयः। मिथुनशब्देन मैथुनं विवक्षितम्। मिथुनस्य कर्म मैथुनम्। तदिच्छतीत्यर्थे 'सुप आत्मनः–' इति क्यच्। फलितमर्थमाह **मिथुनं गच्छतीति।** मिथुनत्वं प्राप्नोतीत्यर्थः। मिथुनायन्ते इति क्यङ्पाठस्तु प्रामादिकः। **मर्यादीकृत्येति।** स्वप्रभृति चतुरोऽभिव्याप्येत्यर्थः। अत्यन्तसहचरितत्वेन लोकविज्ञानमभिव्यक्तिरिति

'न लोका–' इत्यनेन कृद्योगषष्ठीनिषेधो ज्ञातेत्यस्य तृन्नन्तत्वात्। 'योयम् आत्मा' इत्यर्थे विद्यमानयथायथशब्दस्यार्थमाह **यथास्वभावमिति।** 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरः। **पूर्वपदस्येति।** द्वि औ द्वि औ इति स्थिते कर्मधारयवद्भावात्सुब्लुकि कृते पूर्वपदावयवस्येकारस्येत्यर्थः। **अत्वमुत्तरपदस्येति।** उत्तरपदावयवस्यैकारस्येत्यर्थः। **नपुंसकत्वं चेति।** चकारादेकवद्भाव इत्यपि बोध्यम्। तेन 'अतोऽम्' इत्यमादेशे द्वन्द्वमिति सिध्यति। **रहस्यं द्वन्द्वशब्दवाच्यमिति।** द्वाभ्यां निर्वृत्ते रहस्ये योगरूढिरेवेत्यर्थः। **द्वन्द्वं मन्त्रयते इति।** द्वौ द्वौ भूत्वा मन्त्रयेते इत्यर्थः। एवं हि तद् रहस्यं भवति। **आचतुरमिति।** 'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः। 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति टच्। चतुःशब्दोऽत्र चतुर्णां पूरणे द्रष्टव्यः। आ चतुर्थादित्यर्थः। **द्वन्द्वं**

पात्राणि प्रयुनक्ति । द्वन्द्वं सङ्कर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्वम् इष्यते। इति द्विरुक्तप्रकरणम् ।

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्धं समाप्तम् ।

भाष्याल्लभ्यते। तदाह **साहचर्येणेत्यर्थं इति** । अत्र द्वन्द्वं न्यग्नीत्यत्र वीप्सायां द्वित्वम्। अन्यत्र स्वार्थे इति बोध्यम्। **अन्यत्रापीति**। द्वन्द्वानि सहते इत्यादावित्यर्थः। शीतमुष्णं च एकं द्वन्द्वम्। सुखं दुःखं चापरम् । क्षुत्तृष्णा चान्यत्। इह स्वार्थे द्वन्द्वः। अम्भावादि पूर्ववत्। 'चार्थे द्वन्द्वः' इति निपातनादन्यत्रापीति सिद्धम्।

इति द्विरुक्तप्रकरणम् ।

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशाररथचक्राकारादिबहुगुणविराजमान-
प्रौढापरिमितमहाध्वरस्य श्रीशाहजी शरभतुक्कोजी भोसलचोलमहीमहेन्द्रामात्य-
धुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण
बाल्य एव तद्दयानिर्वर्तितापरिमिताग्निविजृम्भितवाजपेयसर्वपृष्ठाप्तो-
र्यामप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन पदवाक्यप्रमाण-
पारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्या-
वैशद्येन अध्वरमीमांसाकुतूहलवृत्तिनिर्माणप्रकटितसर्वतन्त्र-
स्वातन्त्र्येण बौधायनापस्तम्बसत्याषाढभारद्वाजकात्या-
यनाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीण-
महादेववाजपेययाजिसुतेन अन्नपूर्णाम्बागर्भ-
जातेन वासुदेवदीक्षितविदुषा विरचितायां
सिद्धान्तकौमुदीव्याख्यायां बाल-
मनोरमायां पूर्वार्धं
सम्पूर्णम् ।

यज्ञपात्राणीति। 'स्फ्यश्च कपालानि च' इत्यादीनि पात्राणि द्वन्द्वं प्रयुनक्ति। आसादयतीत्यर्थः। **अभिव्यक्तौ साहचर्येणेत्यर्थ इति**। अत्र द्वन्द्वमित्यत्र स्वार्थे द्विर्वचनम्। एकवद्भावादिकं तु पूर्ववत् । **अन्यत्रापीति**। 'द्वन्द्वं युद्धं प्रवर्तते'। इह वीप्सायां द्विर्वचनम्। द्वयोर्द्वयोर्युद्धमित्यर्थः। 'द्वन्द्वानि सहते' शीतमुष्णमेकं द्वन्द्वं सुखदुःखे चापरं क्षुत्तृष्णे चापरम् । इह स्वार्थे द्विर्वचनमेकवद्भावादि पूर्ववत् । बहुत्वं त्वेकशेषवशात्। इति तत्त्वबोधिनीव्याख्यायां द्विरुक्तप्रक्रियाप्रकरणम् ।

सिद्धान्तकौमुदीव्याख्या या कृता तत्त्वबोधिनी। समाप्तं तत्र पूर्वार्धं तेन तुष्यतु शंकरः॥

इति श्रीपरमहंसपरिव्राजकाचार्यवामनेन्द्रस्वामिचरणारविन्दसेवकज्ञानेन्द्रसरस्वतीकृतौ सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां पूर्वार्धं संपूर्णम् ॥

अकाराद्यनुक्रमेण

कौमुद्यव्ययीभावप्रभृतिपूर्वार्धपर्यन्तसूत्रसूचिका

पृष्ठम्	सूत्रम्
	अ
५६३	अंशं हारी ५ । २ । ६९
६७६	अकृच्छ्रे प्रियसु ८ । १ । १३
१८	अक्षशलाकासं० २ । १ । १०
२२२	अक्ष्णोऽदर्शनात् ५ । ४ । ७६
४६९	अगारान्ताट्ठन् ४ । ४ । ७०
२०३	अग्नेः स्तुत्स्तोम० ८ । ३ । ८२
३५४	अग्नेर्ढक् ४ । २ । ३३
११०	अग्राख्यायामुर० ५ । ४ । ९३
१७५	अग्रान्तशुद्धशु० ५ । ४ । १४५
१६३	अङ्गुलेर्दारुणि ५ । ४ । ११४
६३१	अङ्गुल्यादिभ्यष्ठक् ५।३।१०८
४११	अ च ४ । ३ । ३१
२२२	अचतुरविचतु० ५ । ४ । ७७
३६२	अचित्तहस्तिधे० ४ । २ । ४७
४२९	अचित्ताददेशका ४ । ३ । ९६
९३	अच्छगत्यर्थवदेषु १ । ४ । ६९
२२१	अच्प्रत्यन्ववपूर्वा० ५ । ४ । ७५
६०७	अजादी गुणवच० ५ । ३ । ५८
१८६	अजाद्यदन्तम् २ । २ । ३३
४८२	अजाविभ्यां थ्यन् ५ । १ । ८
६२३	अजिनान्तस्योत्त० ५ । ३ । ८२
६१५	अज्ञाते ५ । ३ । ७३
५९९	अञ्चेर्लुक् ५ । ३ । ३०
१६४	अञ्नासिकायाः ५ । ४ । ११८

पृष्ठम्	सूत्रम्
४११	अणञौ च ४ । ३ । ३३
३३१	अणो द्व्यचः ४ । १ । १५६
४५७	अण्कुटिलिकायाः ४ । ४ । १८
५७८	अण्च ५ । २ । १०३
३३९	अणिञोरनार्षयो० ४ । १ । ७८
४२३	अणृगयनादिभ्यः ४ । ३ । ७३
४६४	अण्महिष्यादिभ्यः ४ । ४ । ४८
३०२	अत इञ् ४ । १ । ९५
५८२	अत इनिठनौ ५ । २ । ११५
३३८	अतश्च ४ । १ । १७५
६५२	अतिग्रहाव्यथन० ५ । ४ । ४६
६४५	अतिथेर्ञ्यः ५ । ४ । २६
६०३	अतिशायने तम० ५ । ३ । ५५
१११	अतेः शुनः ५ । ४ । ९६
३६	अत्यन्तसंयोगे च २ । १ ।२९
३२२	अत्रिभृगुकुत्सव० २ । ४ । ६५
३७४	अदूरभवश्च ४ । २ । ७०
९३	अदोऽनुपदेशे १ । ४ । ७०
५४२	अद्यश्वीनावष्टब्धे ५ । २ । १३
५६४	अधिकम् ५ । २ । ७३
५१	अधिकरणवाचिना २ । २ । १३
६००	अधिकरणविचाले ५ । ३ । ४३
१९९	अधिकरणैतावत्त्वे २।१।१५
४२७	अधिकृत्य कृते ४ । ३ । ८७
५९४	अधुना ५ । ३ । १७

पृष्ठम्	सूत्रम्
१६०	अध्ययनतो २ । ४ । ५
४६४	अध्यर्धपूर्वद्विगो ५ । १ । २८
५६१	अध्यायानुवाकयोः ५ । २ । ६०
४६६	अध्यायिन्यदेशका ४ । ४ । ७१
४२२	अध्यायेष्वेवर्षेः ४ । ३ । ६९
५४३	अध्वनो यत्खौ ५ । २ । १६
१६०	अध्वर्युक्रतुरनपुं० २ । ४ । ६
३२४	अन् ६ । ४ । १६७
६३६	अनत्यन्तगतौ ५ । ४ । ४
६४	अनत्याधान १ । ४ । ७५
५६५	अनद्यतने र्हिल् ५ । ३ । २१
६४५	अनन्तावसथेतिह ५ । ४ । २३
२६	अनश्च ५ । ४ । १०८
६१७	अनुकम्पायाम् ५ । ३ । ७६
६१	अनुकरणं १ । ४ । ६२
५६४	अनुकाभिका ५ । २ । ७४
२२६	अनुगवमायामे ५ । ४ । ८३
६४१	अनुगादिनष्ठक् ५ । ४ । १३
५४३	अनुग्वलङ्गामी ५ । २ । १५
३६१	अनुदात्तादेरञ् ४ । २ । ४४
४४४	अनुदात्तादेश्च १ । ३ । १४०
५२६	अनुपदसर्वान्ना ५ । २ । ९
५६६	अनुपद्यन्वेष्टा ५ । २ । ९०
५२३	अनुप्रवचनादि ५ । १ । १११
३६६	अनुब्राह्मणादिनिः ४ । २ । ६२
२१	अनुर्यत्समया २ । १ । १५
१८६	अनुवादे चरणानाम् २ । ४ । ३
४१६	अनुशतिकादी ७ । ३ । २०
३०७	अनृष्यानन्तर्ये ४ । १ । १०४
१२६	अनेकमन्यपदार्थे २ । २ । २४
११०	अनोश्मायस्सरसां ५ । ४ । ९४
४१६	अन्तःपूर्वपदाट्ठञ् ४ । ३ । ६०
६२	अन्तरपरिग्रहे १ । ४ । ६५
१६३	अन्तर्बहिर्भ्यां च ५ । ४ । ११७
६०६	अन्तिकबाढयो ५ । ३ । ६३
४७३	अन्नाण्णः ४ । ४ । ८५
४०	अन्नेन व्यञ्जनम् २ । १ । ३४
२६	अन्यपदार्थे च २ । १ । २१
२२६	अन्ववतप्ताद्रह ५ । ४ । ८१
२६२	अपत्यं पौत्र० ४ । १ । १६२
१२१	अपथं नपुंसकम् २ । ४ । ३०
३६७	अपदातौ ४ । २ । १३५
२०	अपपरिबहिरञ्चवः २ । १ । १२
४५८	अपमित्ययाचि० ४ । ४ । २१
२७०	अपरस्पराः ६ । १ । १४४
२७१	अपस्करो ६ । १ । १४९
६५२	अपादाने चाही ५ । ४ । ४५
३२७	अपूर्वपदादन्यत ६ । १ । १४०
४३	अपेतापोढमुक्त० २ । १ । ३८
३५३	अपोनप्त्रपांनप्तृ० ४।२।२७
१३८	अप्पूरणीप्रमा० ५ । ४ । ११६
४२८	अभिजनश्च ४ । ३ । ९०
६२३	अभिजिद्विदभृ ५ । ३ । ११८
४२७	अभिनिष्क्रामति ४ । ३ । ८६
६५६	अभिविधौ ५ । ४ । ५३
५४४	अभ्यमित्राच्छ ५ । २ । १७
४१०	अमावास्याया ३ । ३ । ३०
२३४	अमूर्धमस्तकात् ६ । ३ । १२
१००	अमैवाव्ययेन २ । २ । २०
५६५	अयःशूलदण्डा ५ । २ । ७६

पृष्ठम्	सूत्रम्
३९६	अरण्यान्मनुष्ये ४ । २ । १२९
६५५	अरुर्मनश्चक्षुश्चेतो ५ । ४ । ५१
२५५	अर्थे विभाषा ६ । ३ । १००
५७	अर्धं नपुंसकम् २ । २ । २
१२१	अर्धर्चाः पुंसि २ । ४ । ३१
११२	अर्धाच्च ५ । ४ । १००
४९१	अर्धात्परिमाणस्य ७ । ३ । २६
४०१	अर्धाद्यत् ४ । ३ । ४
५८६	अर्शआदिभ्यो ५ । २ । १२७
२२९	अलुगुत्तरपदे ६ । ३ । १
१७३	अल्पाख्यायाम् ५ । ४ । १३६
१८७	अल्पाच्तरम् २ । २ । ३४
६२३	अल्पे ५ । ३ । ८५
४६५	अवक्रयः ४ । ४ । ५०
६२६	अवक्षेपणे ५ । ३ । ९५
४०८	अवयवादृतोः ७ । ३ । ११
४४३	अवयवे च ४ । ३ । १३५
५१५	अवयसि ठंश्च ५ । १ । ८४
२२५	अवसमन्धेभ्य ५ । ४ । ७९
५४८	अवात्कुटारच्च ५ । २ । ३०
५४१	अवारपारात्यन्ता ५ । २ । ११
३९५	अवृद्धादपि ४ । २ । १२५
३११	अवृद्धाभ्यो ४ । १ । ११३
६४६	अवेः कः ५ । ४ । २८
६५७	अव्यक्तानुकरणा ५ । ४ । ५७
६	अव्ययं विभक्ति २ । १ । ६
६१५	अव्ययसर्वनाम्ना ५ । ३ । ७१
३८९	अव्ययात्त्यप् ४ । २ । १०४
६	अव्ययीभावः २ । १ । ५
१०	अव्ययीभावश्च २ । ४ । १८
४१९	अव्ययीभावाच्च ४ । ३ । ५९
१५	अव्ययीभावे चा ६ । ३ । ८१
२७	अव्ययीभावे श ५ । ४ । १०७
४२०	अशब्दे यत्खा ४ । २ । ६४
१२७	अशाला च २ । ४ । २४
२७५	अश्वपत्यादि ४ । १ । ८४
५४४	अश्वस्यैकाहगमः ५ । २ । १९
३१०	अश्वादिभ्यः ४ । १ । ११०
६३७	अषडक्षाशितङ्ग्वल ५ । ४ । ७
२५५	अषष्ठ्यतृतीयास्थ ६ । ३ । ९९
२६२	अष्टनः संज्ञायाम् ६ । ३ । १२५
४४७	असंज्ञायां तिल ४ । ३ । १४९
४८९	असमासे ५ । १ । २०
४०१	अ सांप्रतिके ४ । ३ । ९
९३	अस्तं च १ । ४ । ६८
५९७	अस्ताति च ५ । ३ । ४०
४६६	अस्तिनास्तिदिष्टं ४ । ४ । ६०
१२२	अस्मदो १ । २ । ५९
५८४	अस्मायामे ५ । २ । १२१
६५४	अस्य च्वौ ७ । ४ । ३२
१०४	अहःसर्वैकदेशसं ५ । ४ । ८७
५८९	अहंशुभमोर्युस् ५ । २ । १४०
१०५	अहष्टखोरेव ६ । ४ । १४५
१०७	अह्नोऽदन्तात् ८ । ४ । ७
१०६	अह्नोऽह्न एतेभ्यः ५ । ४ । ८८
	आ
४५५	आकर्षात्ष्ठल् ४ । ४ । ९
५६२	आकर्षादिभ्यः ५ । २ । ६४

पृष्ठम्	सूत्रम्
५२४	आकालिक ५ । १ । ११४
४६३	आक्रन्दाट्ठञ्च ४ । ४ । ३८
५४३	आगवीनः ५ । २ । १४
३२३	आगस्त्यकौण्डि० २ । ४ । ७०
३५०	आग्रहायण्यश्व ४ । २ । २२
२०	आङ्मर्यादाभि २ । १ । १३
५२७	आ च त्वात् ५ । १ । १२०
२३१	आज्ञायिनि च ६ । ३ । ५
५०५	आढकाचित ५ । १ । ५३
२३१	आत्मनश्च ६ । ३ । ६
४८३	आत्मन्विश्व ५ । १ । ९
४८३	आत्माध्वानौ ६ । ४ । १६९
४४१	आथर्वणिक ४ । ३ । १३३
९१	आदरानादर १ । ४ । ६३
२००	आनङृतो ६ । ३ । २५
११३	आन्महतः ६ । ३ । ४६
२८२	आपत्यस्य ६ । ४ । १५१
१७८	आपोऽन्यतर ७ । ४ । १५
५३९	आप्रपदं प्राप्नोति ५ । २ । ८
६६८	आबाधे च ८ । १ । १०
४२८	आयुधजीविभ्यः ४ । ३ । ९१
६३२	आयुधजीविसं ५ । ३ । ११४
४५७	आयुधाच्छ च ४ । ४ । १४
३१८	आरगुदीचाम् ४ । १ । १३०
४८९	अर्हादगोपुच्छ ५ । १ । १९
५८६	आलजाटचौ ५ । २ । १२५
४७०	आवसथात्ष्ठल् ४ । ४ । ७४
२७१	आश्चर्यमनित्ये ६ । १ । १४७
४१५	आश्वयुज्या ४ । ३ । ४५

पृष्ठम्	सूत्रम्
५७३	आसन्दीवदष्ठी ८ । २ । १२
२७०	आस्पदं प्रतिष्ठा ६ । १ । १४६
६००	आहि च दूरे ५ । ३ । ३७
	इ
२६२	इकः काशे ६ । ३ । १२३
२६२	इको वहेऽपीलोः ६ । ३ । १२१
२४४	इको ह्रस्वोऽङ्यो० ६ । ३ । ६१
५३४	इगन्ताच्च लघुपू ५ । १ । १३१
१७०	इच्कर्मव्यतिहारे ५ । ४ । १२७
२८५	इञः प्राचाम् २ । ४ । ६०
३९२	इञश्च ४ । २ । ११२
५९४	इतराभ्योऽपि द० । ५ । ३ । १४
३१५	इतश्चानिञः ४ । १ । १२२
२५३	इदक्ष्मोरीश्की ६ । ३ । ९०
५९०	इदम इश् ५ । ३ । ३
५९६	इदमस्थमुः ५ । ३ । २४
५९४	इदमो र्हिल् ५ । ३ । १६
५९३	इदमो हः ५ । ३ । ११
५००	इद्गोण्याः १ । २ । ५०
२०३	इद्वृद्धौ ६ । ३ । २८
१७६	इनः स्त्रियाम् ५ । ४ । १५२
५४९	इनच्पिटच्चिकचि च ५ । २ । ३३
३५८	इनण्यनपत्ये ६ । ४ । १६४
३६२	इनित्रकट्यचश्च ४ । २ । ५१
५६९	इन्द्रियमिन्द्रलिङ्ग ५ । २ । ९३
६२६	इवे प्रतिकृतौ ५ । ३ । ९६
२४७	इष्टकेषीकामालानां ६ । ३ । ६५
५६८	इष्टादिभ्यश्च ५ । २ । ८८
६११	इष्ठस्य यिट् च ६ । ४ । १५९

पृष्ठम्	सूत्रम्
३४६	इसुसुक्तान्तात्कः ७ । ३ । ५१
	ई
२०२	ईदग्नेः सोमवरुणा ६ । ३ । २७
१७६	ईयसश्च ५ । ४ । १५६
८६	ईषदकृता २ । २ । ७
२५६	ईषदर्थे ६ । ३ । १०५
६१२	ईषदसमाप्तौ कल्पप् ५ । ३ । ६७
	उ
४७६	उगवादिभ्यो यत् ५ । १ । २
२४०	उगितश्च ६ । ३ । ४५
४६१	उञ्छति ४ । ४ । ३२
५६६	उत्क उन्मनाः ५ । २ । ८०
३८३	उत्करादिभ्यः ४ । २ । ९०
१०६	उत्तमैकाभ्यां ५ । ४ । ९०
५१४	उत्तरपथेनाहृतं ५ । १ । ७७
४०८	उत्तरपदस्य ७ । ३ । १०
१११	उत्तरमृगपूर्वाच्च ५ । ४ । ९८
६००	उत्तराच्च ५ । ३ । ३८
५९९	उत्तराधरदक्षिणा ५ । ३ । ३४
२७६	उत्सादिभ्योऽञ् ४ । १ । ८६
२४३	उदकस्योदः ६ । ३ । ५७
३७५	उदक्च विपाशः ४ । २ । ७४
५७३	उदन्वानुदधौ च ८ । २ । १३
५६३	उदराट्ठगाद्यूने ५ । २ । ६७
३४६	उदश्वितोऽन्य ४ । २ । १९
३३२	उदीचां वृद्धा ४ । १ । १५७
३३०	उदीचामिञ् ४ । १ । १५३
३६१	उदीच्यग्रामाच्च ४ । २ । १०९
१७५	उद्विभ्यां काकु० ५ । ४ । १४८
३२२	उपकादिभ्योऽन्य २ । ४ । ६९
४१४	उपजानूपकर्णो ४ । ३ । ४०
४३६	उपज्ञाते ४ । ३ । ११५
१२६	उपज्ञोपक्रमं तदा २ । ४ । २१
९८	उपपदमतिङ् २ । २ । १९
१७३	उपमानाच्च ५ । ४ । १३७
१११	उपमानादप्राणिषु ५ । ४ । ९७
७३	उपमानानि सा० २ । १ । ५५
७४	उपमितं व्या० २ । १ । ५६
६६६	उपर्यध्यधसः ८ । १ । ७
५९९	उपर्युपरिष्टात् ५ । ३ । ३१
२६२	उपसर्गस्य घ० ६ । ३ । १२२
१६५	उपसर्गाच्च ५ । ४ । ११९
२२७	उपसर्गादध्वनः ५ । ४ । ८५
१६५	उपसर्गादनोत्परः ८ । ४ । २८
७	उपसर्जनं २ । २ । ३०
६४	उपाजेऽन्वाजे १ । ४ । ३०
५५०	उपाधिभ्यां ५ । २ । ३४
४१५	उप्ते च ४ । ३ । ४४
५५५	उभादुदात्तो ५ । २ । ४४
४४६	उमोर्णयोर्वा ४ । ३ । १५८
१७६	उरःप्रभृतिभ्यः ५ । ४ । १५१
४७६	उरसोऽण्च ४ । ४ । ९४
४३६	उरसो यच्च ४ । ३ । ११४
२०५	उषासोषसः ६ । ३ । ३१
४४६	उष्ट्राद्वुञ् ४ । ३ । १५७
	ऊ
२२०	ऊदनोर्देशे ६ । ३ । ९७
५८६	ऊर्णाया युस् ५ । २ । १२३

पृष्ठम्	सूत्रम्
१७१	ऊर्ध्वाद्विभाषा ५ । ४ । १३०
६०	ऊर्यादिच्विडा १ । ४ । ६१
५७६	ऊषसुषिमुष्क ५ । २ । १०७
	ऋ
२१८	ऋक्पूरब्धूः ५ । ४ । ७४
२४२	ऋचः शे ६ । ३ । ५५
४२४	ऋतष्ठञ् ४ । ३ । ७८
४६५	ऋतोऽञ् ४ । ४ । ४९
५२२	ऋतोरण् ५ । १ । १०५
२३७	ऋतो विद्यायोनि ६ । ३ । २३
४८६	ऋषभोपानहो ५ । १ । १४
३११	ऋष्यन्धकवृ० ४ । १ । ११४
	ए
५८३	एकगोपूर्वा ५ । २ । ११८
२४५	एक तद्धिते ६ । ३ । ६२
४७१	एकधुराल्लुक्च ४ । ४ । ७९
६६७	एकं बहुव्रीहिवत् ८ । १ । ९
७	एकविभक्ति १ । २ । ४४
६३१	एकशालाया ५ । ३ । १०९
६४२	एकस्य सकृच्च ५ । ४ । १९
२४३	एकहलादौ ६ । ३ । ५९
६२६	एकाच्च प्राचाम् ५ । ३ । ९४
६०२	एकादाकिनिच्चास ५ । ३ । ५२
११७	एकादिश्चैकस्य ६ । ३ । ७६
६००	एकाद्धो ध्यमु ५ । ३ । ४४
२९६	एको गोत्रे ४ । १ । ९३
३९३	एङ् प्राचां १ । १ । ७५
४४९	एण्या ढञ् ४ । ३ । १५९
५९४	एतदस्त्रतसोस्त्र २ । ४ । ३३

पृष्ठम्	सूत्रम्
५९१	एतदोऽन् ५ । ३ । ५
२५४	एति संज्ञायाम ८ । ३ । ९९
५९०	एतेतौ रथोः ५ । ३ । ४
६०१	एधाच्च ५ । ३ । ४६
५९९	एनबन्यतरस्यां ५ । ३ । ४५
	ऐ
५२३	ऐकागारिकट् ५ । १ । ११३
३९०	ऐषमोह्यः ४ । २ । १०५
	ओ
४५९	ओजःसहोऽम्भसा ४ । ४ । २७
२३०	ओजःसहोऽम्भः ६ । ३ । ३
३७४	ओरञ् ४ । २ । ७१
४४४	ओरञ् ४ । ३ । १३९
१५९	ओर्गुणः ६ । ४ । १४६
३९४	ओर्देशे ठञ् ४ । २ । ११९
६४६	ओषधेरजातौ ५ । ४ । ३७
	औ
३२६	औक्षमनपत्ये ६ । ४ । १७३
	क
५८९	कंशंभ्यां ५ । २ । १३८
४९४	कंसाट्टिठन् ५ । १ । २५
४५२	कंसीयपरश ४ । ३ । १६८
१७५	ककुदस्याव ५ । ४ । १४६
३९६	कच्छाग्निवक्त्र ४ । २ । १२६
३९७	कच्छादिभ्यश्च ४ । २ । १३३
४३४	कठचरका ४ । ३ । १०७
४६९	कठिनान्तप्रस्तार ४ । ४ । ७२
५११	कडंकरदक्षि ५ । १ । ६९
८४	कडाराः २ । २ । ३८

पृष्ठम्	सूत्रम्
९२	करोमनसी १ । ४ । ६६
३९१	कण्वादिभ्यो ४ । २ । १११
७८	कतरकतमौ २ । १ । ६३
३८६	कत्र्यादिभ्यो ४ । २ । ९५
४७७	कथादिभ्यः ४ । ४ । १०२
३९९	कन्थापलदन ४ । २ । १४२
३८८	कन्थायाष्ठक् ४ । २ । १०२
३१३	कन्यायाः ४ । १ । ११६
५३२	कपिज्ञात्योर्ढक् ५ । १ । १२७
३०९	कपिबोधादाङ्गिरसे ४ । १ । १०७
४८०	कम्बलाच्च ५ । १ । ३
३३७	कम्बोजाल्लुक् ४ । १ । १७३
६३१	कर्कलोहितादी ५ । ३ । ११०
४२०	कर्णललाटात्क ४ । ३ । ६५
२५८	कर्णो लक्षणस्या ६ । ३ । ११५
५४	कर्तरि च २ । २ । १६
३९	कर्तृकरणे कृता २ । १ । ३२
५२२	कर्मण उकञ् ५ । १ । १०३
५५०	कर्मणि घटोऽठच् ५ । २ । ३५
५२	कर्मणि च २ । २ । १४
६६९	कर्मधारयवदुत्तरेषु ८ । १ । ११
४३५	कर्मन्दकृशाश्वा ४ । ३ । १११
५२१	कर्मवेषाद्यत् ५ । १ । १००
४६७	कर्माध्ययने वृत्तम् ४ । ४ । ६३
४३४	कलापिनोऽण् ४ । ३ । १०८
४३२	कलापिवैशम्पाय ४ । ३ । १०४
४१६	कलाप्यश्वत्थयव ४ । ३ । ४८
३४६	कलेर्ढक् ४ । २ । ८
३१६	कल्याण्यादीना ४ । १ । १२६

पृष्ठम्	सूत्रम्
२५६	कवं चोष्णे ६ । ३ । १०७
६१५	कस्य च दः ५ । ३ । ७२
३५२	कस्येत् ४ । २ । २५
५८१	काण्डाण्डादीर ५ । २ । १११
२५६	का पथ्यक्षयोः ६ । ३ । १०४
३८७	कापिश्याः ष्फक् ४ । २ । ९९
२३३	कारनाम्नि च प्राचां ६ । ३ । १०
२७२	कारस्करो वृक्षः ६ । १ । १५६
२४८	कारे सत्यागदस्य ६ । ३ । ७०
४६७	कार्मस्ताच्छील्ये ६ । ४ । १७२
५६६	कालप्रयोजनाद्रोगे ५ । २ । ८१
३५	कालाः २ । १ । २८
६०	कालाः परिमाणिना २ । २ । ५
६४८	कालाच्च ५ । ४ । ३३
४०२	कालाट्ठञ् ४ । ३ । ११
५१४	कालात् ५ । १ । ७८
४१५	कालात्साधुपुष्प्यत् ४ । ३ । ४३
६४८	कालाद्यत् ५ । १ । १०७
३५५	कालेभ्यो भववत् ४ । २ । ३४
३७९	कालोपसर्जने च १ । २ । ५७
४३२	काश्यपकौशिका ४ । ३ । १०३
३९३	काश्यादिभ्यः ४ । २ । ११६
६२३	कासूगोणीभ्यां ष्टरच् ५।३।९०
२७२	कास्तीराजस्तु ६ । १ । १५५
६२४	कियत्तदो निर्धारणे ५ । ३ । ९२
५९०	किंसर्वनामबहुभ्यो ५ । ३ । २
७९	किं क्षेपे २ । १ । ६४
२७६	किति च ७ । २ । ११८
२२८	किमः क्षेपे ५ । ४ । ७०

पृष्ठम्	सूत्रम्	पृष्ठम्	सूत्रम्
५५४	किमः संख्यापरि ५ । २ । ४१	३६६	कृकणपर्णाद्भार ४ । २ । १४५
५६७	किमश्च ५ । ३ । २५	६५६	कृञो द्वितीयतृतीय ५।४।५८
५५३	किमिदंभ्यां वो घः ५ । २ । ४०	४१४	कृतलब्धक्रीत ४ । ३ । ३८
६०५	किमेत्तिङव्ययघा ५ । ४ । ११	४३६	कृते ग्रन्थे ४ । ३ । ११६
५६३	किमोऽत् ५ । ३ । १२	८३	कृत्यतुल्याख्या २ । १ । ६८
४६५	किसरादिभ्यःष्ठन् ४ । ४ । ५३	३६	कृत्यैरधिकार्थवचने २ । १ । ३३
६०	कुगतिप्रादयः २ । २ । १८	६३	कृत्यैर्ऋणे २ । १ । ४३
६२३	कुटीशमीशुण्डा ५ । ३ । ८८	६५३	कृभ्वस्तियोगे ५ । ४ । ५०
५६१	कु तिहोः ७ । २ । १०४	३२०	केकयमित्रयुप्रलया ७ । ३ । २
६२३	कुत्वा डुपच् ५ । ३ । ८६	१४०	केऽणः ७ । ४ । १३
७२	कुत्सितानि कुत्सनैः २ । १ । ५३	३६०	केदाराद्यञ् ४ । २ । ४०
६१७	कुत्सिते ५ । ३ । ७४	५८०	केशाद्वोऽन्यतर ५ । २ । १०६
२६७	कुमति च ८ । ४ । १३	३६२	केशाश्वाभ्यां यञ् ४ । २ । ४८
११३	कुमहद्भ्यामन्य ५ । ४ । १०५	२५५	कोः कत्तत्पुरुषे ६ । ३ । १०१
८४	कुमारश्रमणादिभिः २ । १ । ७०	३७६	कोपधाच्च ४ । २ । ७६
३०१	कुमुदनडवेतसे ४ । २ । ८७	४४३	कोपधाच्च ४ । ३ । १३७
१७४	कुम्भपदीषु च ५ । ४ । १३६	३६७	कोदधादण् ४ । २ । १३२
३३५	कुरुनादिभ्यो ण्यः ४।१।१७०	४१५	कोशाड्ढञ् ४ । ३ । ४२
३३०	कुर्वादिभ्यो ण्यः ४ । १ । १५१	४४१	कौपिञ्जल ४ । ३ । १३२
३८७	कुलकुक्षिग्रीवाभ्यः ४ । २ । ६६	३४८	कौमारापूर्ववचने ४ । २ । १३
३१७	कुलटाया वा ४ । १ । १२७	३३१	कौसल्यकार्मा ४ । १ । १५५
३२६	कुलात्खः ४ । १ । १३६	५१	क्तेन च पूजायाम् २ । २ । १२
४३६	कुलालादिभ्यो ४ । ३ । ११८	७६	क्तेन नञ्विशिष्टे २ । १ । ६०
५०६	कुलिजाल्लुक्खौ च ५ । १ । ५५	६४	क्तेनाहोरात्रावयवा २ । १ । ४५
४५४	कुलत्थकोपधादण् ४ । ४ । ४	१०३	क्त्वा च २ । २ । २२
५६७	कुल्माषादञ् ५ । २ । ८३	१४८	क्यङ्मानिनोश्च ६ । ३ । ३६
६२७	कुशाग्राच्छः ५ । ३ । १०५	६५५	क्यच्व्योश्च ६ । ४ । १५२
४६०	कुसीददशैकादशा ४ । ४ । ३१	४२१	क्रतुयज्ञेभ्यश्च ४ । ३ । ६८
२७०	कुस्तुम्बुरुणि ६ । १ । १४३		

पृष्ठम्	सूत्रम्
३६६	क्रतूक्थादिसूत्रान्ता ४।२।६०
३६८	क्रमादिभ्यो वुन् ४।२।६१
४४८	क्रीतवत्परिमाणात् ४।३।१५६
३४२	क्रौड्यादिभ्यश्च ४।१।८०
५९३	क्वाति ७।२।१०५
३२६	क्षत्राद्घः ४।१।१३८
३५०	क्षीराड्ढञ् ४।२।२०
१९३	क्षुद्रजन्तवः २।४।८
३१८	क्षुद्राभ्यो वा ४।१।१३१
४३६	क्षुद्राभ्रमरवटर ४।३।११९
१०८	क्षुभ्नादिषु च ८।४।३९
५६९	क्षेत्रियच्पर ५।२।९२
६४	क्षेपे २।१।४७
	ख
४७१	खः सर्वधुरात् ४।४।७८
३४	खट्वा क्षेपे २।१।२६
३६१	खण्डिकादि ४।२।४५
३६२	खलगोरथात् ४।२।५०
४८२	खलयवमाष ५।१।७
४९७	खार्या ईकन् ५।१।३३
११२	खार्याः प्राचाम् ५।४।१०१
	ग
१७१	गन्धस्येदुत्पूति ५।४।१३५
४१८	गम्भीराञ्ञ्यः ४।३।५८
३०७	गर्गादिभ्यो ४।१।१०५
३९७	गर्तोत्तरपदा ४।२।१३७
१९४	गवाश्वप्रभृ २।४।११
२३३	गविर्युधिभ्यां ८।३।९५
३९७	गहादिभ्यश्च ४।२।१३८

पृष्ठम्	सूत्रम्
५८०	गाण्ड्यजगात्सं ५।२।११०
३६९	गाथिविदथिके ६।४।१६५
३०	गिरेश्च सेन० ५।४।११२
४७७	गुडादिभ्यष्ठञ् ४।४।१०३
५२९	गुणवचन १।१।१२४
३१९	गृष्ट्यादिभ्यश्च ४।१।१३६
४७४	गृहपतिना ४।४।९०
४३०	गोत्रक्षत्रियाख्ये ४।३।९९
५३५	गोत्रचरणाच्छ्ला ५।१।१३४
४३९	गोत्रचरणाद्वुञ् ४।३।१२६
३२८	गोत्रस्त्रियाः ४।१।१४७
४२५	गोत्रादङ्कवत् ४।३।८०
३००	गोत्राद्यून्यस्त्रि ४।१।९४
३४१	गोत्रावयवात् ४।१।७९
३०४	गोत्रे कुञ्जादि ४।१।९८
२८२	गोत्रेऽलुगचि ४।१।८९
३५९	गोत्रोक्षोष्ट्रोर ४।२।३९
५१०	गोद्व्यचोऽसंख्या ५।१।३९
३१८	गोधाया ढ्रक् ४।१।१२९
४४९	गोपयसोर्यत् ४।३।१६०
४५४	गोपुच्छाट्ठञ् ४।४।६
३९७	गोयवाग्वोश्च ४।२।१३६
६९	गोरतद्धितलुकि ५।४।९२
४४६	गोश्च पुरीषे ४।३।१४५
५६२	गोषदादिभ्यो ५।२।६२
५४४	गोष्ठात्खञ्भूत ५।२।१८
२७०	गोष्पदं सेवि ६।१।१४५
८	गोस्त्रियोरुप १।२।४८
२५०	ग्रन्थान्ताधिके ६।३।७९

पृष्ठम् सूत्रम्

११० ग्रामकौटाभ्यां ५ । ४ । ९५
४०१ ग्रामजनपदैक ४ । ३ । ७
३६० ग्रामजनबन्धु ४ । २ । ४३
४२० ग्रामात्पर्यनु ४ । ३ । ६१
३८६ ग्रामाद्यखञौ ४ । २ । ९४
२१२ ग्राम्यपशुसङ्घे १ । २ । ७३
४१८ ग्रीवाभ्योऽण्च ४ । ३ । ५७
४१६ ग्रीष्मवसन्तादन्य ४ । ३ । ४६
४१६ ग्रीष्मावरसमाद्वुञ् ४ । ३ । ४९

घ

२३५ घकालतनेषु ६ । ३ । १७
३६५ घञः सास्यां क्रिया ४ । २ । ५८
६१८ घनिलचौ च ५ । ३ । ७९
२३९ घरूपकल्प ६ । ३ । ४३

ङ

२४५ ङ्यापोः संज्ञाछन्द ६ । ३ । ६३

च

३१८ चटकाया ऐरक् ४ । १ । १२८
४१ चतुर्थी तदर्था २ । १ । ३६
८५ चतुष्पादो गर्भि २ । १ । ७१
३१९ चतुष्पाद्भ्यो ४ । १ । १३५
२५२ चरणे ब्रह्मचा ६ । ३ । ८६
३६२ चरणेभ्यो धर्मे ४ । २ । ४६
४५५ चरति ४ । ४ । ८
४८७ चर्मणोऽञ् ५ । १ । १५
१८३ चार्थे द्वन्द्वः २ । २ । २९
२६२ चितेः कपि ६ । ३ । १२७
५१८ चित्तवति ५ । १ । ८९
४५८ चूर्णादिनिः ४ । ४ । २३

पृष्ठम् सूत्रम्

६५५ च्वौ च ७ । ४ । २६

छ

४३४ छगलिनो ४ । ३ । १०९
३५३ छ च ४ । २ । २८
४६६ छत्रादिभ्यो णः ४ । ४ । ६२
४८५ छदिरुपधिबलेर्ढञ् ५ । १ । १३
५६८ छन्दसि परि ५ । २ । ८९
४७५ छन्दसो निर्मिते ४ । ४ । ९३
४२२ छन्दसो यदणौ ४ । ३ । ७१
४४० छन्दोगौक्थिक ४ । ३ । १२९
३७३ छन्दोब्राह्म ४ । २ । ६६
१२६ छाया बाहुल्ये २ । ४ । २२
५१० छेदादिभ्यो । ५ । १ । ६४

ज

४१८ जङ्गलधेनुवलजा ७ । ३ । २५
३९५ जनपदतदव ४ । २ । १२४
३३३ जनपदशब्दात् ४ । १ । १६६
४३० जनपदिनां ४ । ३ । १००
३७७ जनपदे लुप् ४ । २ । ८१
४५० जम्ब्वा वा ४ । ३ । १६५
१६९ जम्भा सुहरित ५ । ४ । १२५
४४७ जातरूपेभ्यः ४ । ३ । १५३
६२१ जातिनाम्नः कन् ५ । ३ । ८१
१६१ जातिरप्राणिनाम् २ । ४ । ६
१५३ जातेश्च ६ । ३ । ४१
६४० जात्यन्ताच्छ ५ । ४ । ९
१२२ जात्याख्यायामे १ । २ । ५८
१७१ जायाया निङ् ५ । ४ । १३४
४२० जिह्वामूलाङ्गुलेश्छः ४ । ३ । ६२

पृष्ठम्	सूत्रम्
२९३	जीवति तु वंश्ये ४ । १ । १६३
६२७	जीविकार्थे चापण्ये ५ । ३ । ९९
९६	जीविकोपनिषदा १ । ४ । ७९
४१३	जे प्रोष्ठपदानाम् ७ । ३ । १८
६०८	ज्य च ५ । ३ । ६१
६०९	ज्यादादीयसः ६ । ४ । १६०
२५४	ज्योतिरायुषः ८ । ३ । ८३
२५२	ज्योतिर्जनपद ६ । ३ । ८५
४८१	ज्योत्स्नातमि ५ । २ । ११४
	झ
३०	झयः ५ । ४ । १११
५७२	झयः ८ । २ । १०
	ञ
४४८	ञितश्च तत्प्र ४ । ३ । १५५
६३४	ञ्यादयस्त ५ । ३ । ११९
	ट
५२९	टेः ६ । ४ । १५५
	ठ
३८१	ठक्छौ च ४ । २ । ८४
४२४	ठगायस्थानेभ्यः ४ । ३ । ७५
३६०	ठञ्कवचिनश्च ४ । २ । ४१
३२८	ठस्येकः ७ । ३ । ५०
६१८	ठाजादावूर्ध्वं ५ । ३ । ८३
	ढ
३१९	ढकि लोपः ४ । १ । १३३
३१४	ढक्च मण्डूकात् ४ । १ । ११९
३१९	ढे लोपोऽकद्र्वाः ६ । ४ । १४७
	ण
३७०	ण्यक्षत्रियार्षञितो २ । ४ । ५८
	त
४२४	तत आगतः ४ । ३ । ७४
३१	तत्पुरुषः २ । १ । २२
७९	तत्पुरुषः समाना १ । २ । ४२
१०३	तत्पुरुषस्या ५ । ४ । ८६
२३४	तत्पुरुषे कृति ६ । ३ । १४
१२६	तत्पुरुषोऽनञ्कर्म २ । ४ । १९
६४३	तत्प्रकृतवचने ५ । ४ । २१
४५९	तत्प्रत्यनुपूर्व ४ । ४ । २८
३१६	तत्प्रत्ययस्य ७ । ३ । २९
६४	तत्र २ । १ । ४६
५६२	तत्र कुशलः ५ । २ । ६३
५२०	तत्र च दीयते ५ । १ । ९६
४०७	तत्र जातः ४ । ३ । २५
५१५	तत्र तस्येव ५ । १ । ११६
१५७	तत्र तेनेदमिति २ । २ । २७
४६९	तत्र नियुक्तः ४ । ४ । ६९
४१७	तत्र भवः ४ । ३ । ५३
५०१	तत्र विदितः ५ । १ । ४३
४७६	तत्र साधुः ४ । ४ । ९८
३४८	तत्रोद्धृतममत्रेभ्यः ४ । २ । १४
९७	तत्रोपपदं ३ । १ । ९२
५३९	तत्सर्वादेः पथ्यङ्ग ५ । २ । ७
३६६	तदधीते ४ । २ । ५९
६५७	तदधीनवचने ५ । ४ । ५४
४८५	तदर्थं विकृतेः ५ । १ । १२
५१०	तदर्हति ५ । १ । ६३
५१५	तदर्हम् ५ । १ । ११७
१७८	तदशिष्यं संज्ञा १ । २ । ५३

पृष्ठम्	सूत्रम्
५५६	तदस्मिन्नधिकमिति ५ । २ । ४५
५६७	तदस्मिन्नन्नं ५ । २ । ८२
३७४	तदस्मिन्नस्ती ४ । २ । ६७
५०२	तदस्मिन्वृद्ध्या ५ । १ । ४७
४६८	तदस्मै दीयते ४ । ४ । ६६
४८७	तदस्य तदस्मिन् ५ । १ । १६
४६५	तदस्य पण्यम् ४ । ४ । ५१
५०६	तदस्य परिमाणम् ५ । १ । ५७
५१६	तदस्य ब्रह्मचर्यम् ५ । १ । ६४
५२१	तदस्य सञ्जातम् ५ । २ । ३६
४१७	तदस्य सोढम् ४ । ३ । ५२
३६५	तदस्यां प्रहर ४ । २ । ५७
५७०	तदस्यास्त्य ५ । २ । ९४
५६४	तदो दा च ५ । ३ । १९
४२७	तद्गच्छति पथि ४ । ३ । ८५
५०४	तद्धरति वहत्या ५ । १ । ५०
६७	तद्धितार्थोत्तर २ । १ । ५१
२७५	तद्धितेष्वचा ७ । २ । ११७
६४९	तद्युक्तात्कर्म ५ । ४ । ३६
३३६	तद्राजस्य २ । ४ । ६२
४७१	तद्वहति रथयुग ४ । ४ । ७६
५६३	तन्त्रादचिराप ५ । २ । ७०
५७७	तपःसहस्राभ्यां ५ । २ । १०२
५१५	तमधीष्टो भृतो ५ । १ । ८०
४५४	तरति ४ । ४ । ५
६०४	तरप्तमपौ १ । १ । २२
४००	तवकममका ४ । ३ । ३
१४१	तसिलादिष्वा ६ । ३ । ३५
४३६	तसिश्च ४ । ३ । ११३

पृष्ठम्	सूत्रम्
५९२	तसेश्च ५ । ३ । ८
५७१	तसौ मत्वर्थे १ । ४ । १९
८७	तस्मान्नुडचि ६ । ३ । ७४
४००	तस्मिन्नणि च ४ । ३ । २
५२२	तस्मै प्रभवति ५ । ५ । १०१
४८१	तस्मै हितम् ५ । १ । ५
५२०	तस्य च दक्षिणा ५ । १ । ९५
४६४	तस्य धर्म्यम् ४ । ४ । ४७
५००	तस्य निमित्तम् ५ । १ । ३८
३७४	तस्य निवासः ४ । २ । ६९
५४६	तस्य पाकमूले ५ । २ । २४
५५८	तस्य पूरणे ५ । २ । ४८
५२६	तस्य भावस्त्व ५ । १ । ११९
५०२	तस्य वापः ५ । १ । ४५
४४२	तस्य विकारः ४ । ३ । १३४
४२०	तस्य व्याख्यान ४ । ३ । ६६
३५७	तस्य समूहः ४ । २ । ३७
२८६	तस्यापत्यम् ४ । १ । ९२
४३६	तस्येदम् ४ । ३ । १२०
५०१	तस्येश्वरः ५ । १ । ४२
४४७	तालादिभ्यो ४ । ३ । १५२
५६५	तावतिथं ग्रहणमि ५ । २ । ७७
३२२	तिककितवादिभ्यो २ । ४ । ६८
३३१	तिकादिभ्यः फिञ् ४ । १ । १५४
६०४	तिङश्च ५ । ३ । ५६
४३२	तित्तिरिवरतन्तु ४ । ३ । १०२
८३	तिरोऽन्तर्धौ १ । ४ । ७१
१५५	ति विंशतेर्डिति ६ । ४ । १४२
२३	तिष्ठद्गुप्रभृतीनि च २ । १ । १७

पृष्ठम्	सूत्रम्
१२३	तिष्यपुनर्वस्वोर्न १ । २ । ६३
३९०	तीररूप्योत्तरपदा ४ । २ । १०६
२५२	तीर्थे ये ६ । ३ । ८७
५८३	तुन्दादिभ्य इलच्च ५ । २ । ११७
५८९	तुन्दिबलिवटेर्भः ५ । २ । १३९
६०८	तुरिष्ठेमेयःसु ६ । ४ । १५४
६०७	तुश्छन्दसि ५ । ३ । ५९
४२९	तुदीसलातुरवर्मती ४ । ३ । ९४
५२	तृजकाभ्यां कर्तरि २ । २ । १५
२५५	तृणे च जातौ ६ । ३ । १०३
३६	तृतीया तत्कृतार्थेन २ । १ । ३०
१०२	तृतीयाप्रभृतीन्यन्य २ । २ । २१
९	तृतीयासप्तम्योर्बहु २ । ४ । ८४
३३६	ते तद्राजाः ४ । १ । १७२
४९९	तेन क्रीतम् ५ । १ । ३७
५२५	तेन तुल्यं क्रिया ५ । १ । ११५
४५४	तेन दीव्यति खनति ४ । ४ । २
३७४	तेन निर्वृत्तम् ४ । २ । ६८
५१४	तेन निर्वृत्तम् ५ । १ । ७९
५१८	तेन परिजय्यलभ्य ५ । १ । ९३
४३१	तेन प्रोक्तम् ४ । ३ । १०१
५२१	तेन यथाकथाच ५ । १ । ९८
३४३	तेन रक्तं रागात् ४ । २ । १
५४६	तेन वित्तश्चुञ्चुप् ५ । २ । २६
१६०	तेन सहेति तुल्ययो २ । २ । २८
४३५	तेनैकदिक् ४ । ३ । ११२
३९३	त्यदादीनि च १ । १ । ७४
२११	त्यदादीनि सर्वैर्नि १ । २ । ७२
४४४	त्रपुजतुनोः ४ । ३ । १३८
५०९	त्रिंशच्चत्वारिंशतो ५ । १ । ६२
१७५	त्रिककुत्पर्वते ५ । ४ । १४७
५५९	त्रेः सम्प्रसारणञ्च ५ । २ । ५५
४५७	त्रेर्मन्नित्यम् ४ । ४ । २०
११६	त्रेस्त्रयः ६ । ३ । ४८
२४५	त्वे च ६ । ३ । ६४
	द
५९९	दक्षिणादाच् ५ । ३ । ३६
३८७	दक्षिणापश्चात्पुरस ४ । २ । ९८
१६९	दक्षिणेर्मा लुब्ध ५ । ४ । १२६
५९८	दक्षिणोत्तराभ्या ५ । ३ । २८
६३६	दण्डव्यवसर्गयोश्च ५ । ४ । २
५११	दण्डादिभ्यः ५ । १ । ६६
३४९	दध्नष्ठक् ४ । २ । २८
५७९	दन्त उन्नत उरच् ५ । २ । १०६
५८१	दन्तशिखात्संज्ञा ५ । २ । ११३
३२०	दाण्डिनायन ६ । ४ । १७४
५९५	दानीं च ५ । ३ । १८
६३२	दामन्यादित्रि ५ । ३ । ११६
५९७	दिक्शब्देभ्यः सप्त ५ । ३ । २७
४०१	दिक्पूर्वपदाट्ठञ्च ४ । ३ । ६
३९०	दिक्पूर्वपदादसं ४ । २ । १०७
६६	दिक्संख्ये संज्ञायां २ । १ । ५०
४१७	दिगादिभ्यो यत् ४ । ३ । ५४
१५६	दिङ्नामान्यन्तरा २ । २ । २६
२७६	दित्यदित्यादित्य ४ । १ । ८५
२०५	दिवसश्च पृथिव्याम् ६ । ३ । ३०
२०४	दिवो द्यावा ६ । ३ । २९
४०९	दिशोऽमद्राणाम् ७ । ३ । १३

पृष्ठम्	सूत्रम्
३५६	दीर्घाच्च वरुणस्य ७ । ३ । २३
६६०	दुःखात्प्रातिलोम्ये ५ । ४ । ६४
३२७	दुष्कुलाड्ढक् ४ । १ । १४२
२५३	दृग्दृशवतुषु ६ । ३ । ८९
४१८	दृतिकुक्षिकलशि ४ । ३ । ५६
३४६	दृष्टं साम ४ । २ । ७
४१६	देयमृणे ४ । ३ । ४७
६५७	देये त्रा च ५ । ४ । ४५
२०२	देवताद्वन्द्वे च ६ । ३ । २६
३५५	देवताद्वन्द्वे च ७ । ३ । २१
६४५	देवतान्तात्तादर्थ्ये ५ । ४ । २४
६२८	देवपथादिभ्यश्च ५ । ३ । १००
६५७	देवमनुष्यपुरुष ५ । ४ । ५६
६४६	देवात्तल् ५ । ४ । २७
४२०	देविकाशिंशपा ७ । ३ । १
५७८	देशे लुबिलचौ च ५ । २ । १०५
३४२	दैवयज्ञिशौचि ४ । १ । ८१
३५४	द्यावापृथिवी ४ । २ । ३२
५८०	द्युद्रुभ्यां मः ५ । २ । १०८
३८८	द्युप्रागपागुदक् ४ । २ । १०१
६२६	द्रव्यं च भव्य ५ । ३ । १०४
३०६	द्रोणपर्वतजीव ४ । १ । १०३
४४६	द्रोश्च ४ । ३ । १६१
६७७	द्वन्द्वं रहस्यमर्या ८ । १ । १५
५३५	द्वन्द्वमनोज्ञादि ५ । १ । १३३
१८८	द्वन्द्वश्च प्राणि २ । ४ । २
२०५	द्वन्द्वाच्चुदष ५ । ४ । १०६
३४५	द्वन्द्वाच्छः ४ । २ । ६
४३६	द्वन्द्वाद्वुन्वैरमैथु ४ । ३ । १२५
१८६	द्वन्द्वे घि २ । २ । ३२
५८७	द्वन्द्वोपतापग ५ । २ । १२८
४०३	द्वारादीनां च ७ । ३ । ४
७०	द्विगुरेकवचनम् २ । ४ । १
३१	द्विगुश्च २ । १ । २३
५०५	द्विगोः ष्ठंश्च ५ । १ । ५४
५१५	द्विगोर्यप् ५ । १ । ८२
२८१	द्विगोर्लुगनपत्ये ४ । १ । ८८
५१६	द्विगोर्वा ५ । १ । ८६
५६	द्वितीयतृतीयच २ । २ । ३
३१	द्वितीया श्रिता २ । १ । २४
२५०	द्वितीये चानुपा ६ । ३ । ८०
६४२	द्वित्रिचतुर्भ्यः ५ । ४ । १८
४६८	द्वित्रिपूर्वादण्च ५ । १ । ३६
४६६	द्वित्रिपूर्वान्निष्कात् ५ । १ । ३०
१६३	द्वित्रिभ्यां षमू० ५ । ४ । ११५
५५५	द्वित्रिभ्यां तय ५ । २ । ४३
११२	द्वित्रिभ्यामञ्ज ५ । ४ । १०२
६०१	द्वित्र्योश्च धमुञ् ५ । ३ । ४५
१७०	द्विदण्ड्यादि ५ । ४ । १२८
६०६	द्विवचनविभ ५ । ३ । ५७
२२६	द्विस्तावा त्रिस्ता ५ । ४ । ८४
४०२	द्वीपादनुसमुद्रं ४ । ३ । १०
५५९	द्वेस्तीयः ५ । २ । ५४
३४७	द्वैपवैयाघ्रादञ् ४ । २ । १२
३१५	द्व्यचः ४ । १ । १२१
४२३	द्व्यजृद्ब्राह्मणर्क्प्र ४ । ३ । ७२
३३५	द्व्यङ्मगधक ४ । १ । १६८
२१६	द्व्यन्तरुपसर्गेभ्यः ६ । ३ । ९७

पृष्ठम्	सूत्रम्
११६	अष्टनः संख्या ६ । ३ । ४७
	ध
४७३	धनगणं लब्धा ४ । ४ । ८४
५६२	धनहिरण्यात्कामे ५ । २ । ६५
१७१	धनुषश्च ५ । ४ । १३२
३९४	धन्वयोपधाद्वुञ् ४ । २ । १२१
४६३	धर्मं चरति ४ । ४ । ४१
४७५	धर्मपथ्यर्थन्याया ४ । ४ । ९२
५८८	धर्मशीलवर्णा ५ । २ । १३२
१६७	धर्मादनिच्केव ५ । ४ । १२४
५३७	धान्यानां भवने ५ । २ । १
४७१	धुरो यड्ढकौ ४ । ४ । ७७
३९६	धूमादिभ्यश्च ४ । २ । ११७
९३	ध्वाङ्क्षेण क्षेपे २ । १ । ४२
	न
१४०	न कपि ७ । ४ । १४
१४९	न कोपधायाः ६ । ३ । ३७
२५५	नक्षत्राद्वा ८ । ३ । १००
३४४	नक्षत्रेण युक्तः ४ । २ । ३
४१४	नक्षत्रेभ्यो बहु ४ । ३ । ३७
३९६	नगरात्कुत्स ४ । २ । १२८
३२२	न गोपवनादि २ । ४ । ६७
९०	नगोऽप्राणिष्व ६ । ३ । ७७
८७	नञ् २ । २ । ६
४२५	नञः शुचीश्वर ७ । ३ । ३०
२२८	नञस्तत्पुरु ५ । ४ । ७१
१६६	नञ्दुःसुभ्यो ५ । ४ । १२१
३८२	नडशादाड् ४ । २ । ८८
३०५	नडादिभ्यः ४ । १ । ९९
३८३	नडादीनां कुक्च ४ । २ । ९१
५४९	नते नासिकायाः ५ । २ । ३१
२८५	न तौल्वलिभ्यः २ । ४ । ६१
४४०	न दण्डमाणवा ४ । ३ । १३०
१९९	न दधिपयआ २ । ४ । १४
३०	नदीपौर्णमा ५ । ४ । ११०
२५	नदीभिश्च २ । १ । २०
२४०	नद्याः शेषस्यान्य० ६ । ३ । ४४
३८७	नद्यादिभ्यो ढक् ४ । २ । ९७
३८१	नद्यां मतुप् ४ । २ । ८५
१४०	नद्यृतश्च ५ । ४ । १५३
३९२	न द्व्यचः प्राच्य ४ । २ । ११३
५२७	न नञ्पूर्वात्तत्पु ५ । ५ । १२१
४५	न निर्धारणे २ । २ । १०
२१०	नपुंसकमनपुंसकेन १ । २ । ६९
२९	नपुंसकादन्य ५ । ४ । १०९
२२७	न पूजनात् ५ । ४ । ६९
३३८	न प्राच्य ४ । १ । १७६
४७१	न भकुर्छु ८ । २ । ७९
८९	नभ्राण्नपान्न ६ । ३ । ७५
३२५	न मपूर्वोऽप ६ । ४ । १७०
३०४	न य्वाभ्यां पदा ७ । ३ । ३
३६३	नरे संज्ञायाम् ६ । ३ । १२९
८७	नलोपो नञः ६ । ३ । ७३
१०९	न संख्यादेः ५ । ४ । ८९
१७८	न संज्ञायाम् ५ । ४ । १५५
६३६	न सामिवचने ५ । ४ । ५
२९	नस्तद्धिते ६ । ४ । १४४
२५९	नहिवृतिवृषि ६ । ३ । ११६

पृष्ठम्	सूत्रम्
१७९	नाडीतन्त्र्योः ५ । ४ । १५९
४९१	नातः परस्य ७ । ३ । २७
५५८	नान्तादसंख्या ५ । २ । ४९
१११	नावो द्विगोः ५ । ४ । ९९
८	नाव्ययीभावा २ । ४ । ८३
४६९	निकटे वसति ४ । ४ । ७३
४४६	नित्यं वृद्धशरा ४ । ३ । १४४
५६०	नित्यं शतादि ५ । २ । ५७
९५	नित्यं हस्ते १ । ४ । ७७
५४	नित्यं क्रीडाजीवि २ । २ । १७
१६७	नित्यमसिच्प्रजा ५ । ४ । १२२
६६२	नित्यवीप्सयोः ८ । १ । ४
४५७	निर्वृत्तेऽक्षद्यूता ४ । ४ । १९
४०३	निशाप्रदोषाभ्यां ४ । ३ । १४
६६०	निष्कुलान्निष्को ५ । ४ । ६२
१८२	निष्ठा २ । २ । ३६
१८०	निष्प्रवाणिश्च ५ । ४ । १६०
६१७	नीतौ च तद्यु ५ । ३ । ७७
३५५	नेन्द्रस्य परस्य ७ । ३ । २२
२३६	नेन्सिद्धबध्नातिषु ६ । ३ । १९
५४९	नेर्बिडज्बिरी ५ । २ । ३२
४५४	नौद्व्यचष्ठन् ४ । ४ । ७
४७४	नौवयोधर्मविष ४ । ४ । ९१
४५०	न्यग्रोधस्य च ४ । ४ । ९१
	प
५४६	पक्षात्तिः ५ । २ । २५
४६१	पश्चिमत्स्यमृगा ४ । ४ । ३५
५०८	पङ्क्तिविंशतित्रिं ५ । १ । ५९
५०८	पञ्चद्दशतौ वर्गे ५ । १ । ६०
४३	पञ्चमी भयेन २ । १ । ३७
२२९	पञ्चम्याः स्तोका ६ । ३ । २
५९१	पञ्चम्यास्तसिल् ५ । ३ । ७
४९७	पणपादमाष ५ । १ । ३४
५३२	पत्यन्तपुरोहि ५ । १ । १२८
४३८	पत्रपूर्वादञ् ४ । ३ । १२२
४३८	पत्राध्वर्युपरि ४ । ३ । १२३
४१०	पथः पन्थ च ४ । ३ । २९
५१४	पथः ष्कन् ५ । १ । ७५
२२८	पथो विभाषा ५ । ४ । ७२
४७७	पथ्यतिथिव ४ । ४ । १०४
४७३	पदमस्मिन्दृश्यम् ४ । ४ । ८७
२६८	पदव्यवायेऽपि ८ । ४ । ३८
४५६	पदान्तस्यान्य ७ । ३ । ९
४६३	पदोत्तरपदं ४ । ४ । ३९
२४२	पद्यत्यतदर्थे ६ । ३ । ५३
५१४	पन्थो ण नित्यम् ५ । १ । ७६
११८	परवल्लिङ्गं द्वन्द्व २ । ४ । २६
४६६	परश्वधाट्ठञ्च ४ । ४ । ५८
२३२	परस्य च ६ । ३ । ८
४०१	परावराधमोत्तम ४ । ३ । ५
४८८	परिखाया ढञ् ५ । १ १७
४६२	परिपन्थं च ४ । ४ । ३६
४९०	परिमाणान्तस्या ७ । ३ । १७
४६०	परिमुखं च ४ । ४ । २९
३४७	परिवृतो रथः ४ । २ । १०
४६४	परिषदो ण्यः ४ । ४ । ४४
४७७	परिषदो ण्यः ४ । ४ । १०१
६६५	परेर्वर्जने ८ । १ । ५

पृष्ठम्	सूत्रम्
५४०	परोवरपरम्पर ५ | २ | १०
४५५	पर्पादिभ्यः ष्ठन् ४ | ४ | १०
५६२	पर्यभिभ्यां च ५ | ३ | ६
३६६	पर्वताच्च ४ | २ | १४३
६३३	पश्वादियौधे ५ | ३ | ११७
४४४	पलाशादिभ्यो ४ | ३ | १४१
५६६	पश्चात् ५ | ३ | ३२
३४७	पाण्डुकंबला ४ | २ | ११
५०२	पात्रात्ष्ठन् ५ | १ | ४६
५११	पात्राद्धंश्च ५ | १ | ६८
६४	पात्रेसमितादयश्च २ | १ | ४८
६३४	पादशतस्य ५ | ४ | १
२४१	पादस्य पदा ६ | ३ | ५२
१७३	पादस्य लोपो ५ | ४ | १३८
६४५	पादार्घाभ्यां ५ | ४ | २५
२६४	पानं देशे ८ | ४ | ६
७२	पापाणके २ | १ | ५४
२७२	पारस्करप्रभृ ६ | १ | १५७
५१३	पारायणतुरा ५ | १ | ७२
४३५	पाराशर्यशि ४ | ३ | ११०
२३	पारे मध्ये षष्ठ्या २ | १ | १८
५६५	पार्श्वेनान्विच्छति ५ | २ | ७५
३६२	पाशादिभ्यो यः ४ | २ | ४६
२१०	पिता मात्रा १ | २ | ७०
४२५	पितुर्यच्च ४ | ३ | ७६
३५६	पितृव्यमातुल ४ | २ | ३६
३१६	पितृष्वसुश्छण् ४ | १ | १३२
४४६	पिष्टाच्च ४ | ३ | १४६
३१४	पीलाया वा ४ | १ | ११८

पृष्ठम्	सूत्रम्
७६	पुंवत्कर्मधारय ६ | ३ | ४२
५०१	पुत्राच्छ च ५ | १ | ४०
३३२	पुत्रान्तादन्य ४ | १ | १५६
२३७	पुत्रेऽन्यतर ६ | ३ | २२
२०६	पुमान्स्त्रिया १ | २ | ६७
४३३	पुराणप्रोक्तेषु ४ | ३ | १०५
५५२	पुरुषहस्तिभ्या ५ | २ | ३८
६२	पुरोऽव्ययम् १ | ४ | ६७
५८८	पुष्करादिभ्यो ५ | २ | १३५
६३१	पूगाञ्ञ्योऽग्रा ५ | ३ | ११२
४७	पूरणगुणसुहिता २ | २ | ११
६०१	पूरणाद्भागे तीया ५ | ३ | ४८
५०३	पूरणार्धाट्ठन् ५ | १ | ४८
१७५	पूर्णाद्विभाषा ५ | ४ | १४६
६५	पूर्वकालैकसर्व २ | १ | ४६
१६४	पूर्वपदात्संज्ञायां ८ | ४ | ३
१२०	पूर्ववदश्ववडवौ २ | ४ | २७
३०	पूर्वसदृशसमोना २ | १ | ३१
५६८	पूर्वादिनिः ५ | २ | ८६
५६७	पूर्वाधरावराणा ५ | ३ | ३६
७५	पूर्वापरप्रथम २ | १ | ५८
५५	पूर्वापराधरोत्तर २ | २ | १
४१०	पूर्वाह्णापराह्ण ४ | ३ | २८
५२८	पृथ्वादिभ्य ५ | १ | १२२
२५६	पृषोदरादीनि ६ | ३ | १०६
२४३	पेषंवासवाह ६ | ३ | ५८
२८४	पैलादिभ्यश्च २ | ४ | ५६
७६	पोटायुवतिस्तोक २ | १ | ६५
४२१	पौरोडाशपुरो ४ | ३ | ७०

पृष्ठम्	सूत्रम्
६१४	प्रकारवचने जा ५ । ३ । ६९
५९६	प्रकारवचने थाल् ५ । ३ । २३
६६९	प्रकारे गुणवच ८ । १ । १२
१६०	प्रकृत्याशिषि ६ । ३ । ८३
६०८	प्रकृत्यैकाच् ६ । ४ । १६३
६४९	प्रज्ञादिभ्यश्च ५ । ४ । ३८
५७७	प्रज्ञाश्रद्धार्चा ५ । २ । १०१
४६३	प्रतिकण्ठार्थल ४ । ४ । ४०
४७७	प्रतिजनादिभ्यः ४ । ४ । ९९
४६३	प्रतिपथमेति ४ । ४ । ४२
६५२	प्रतियोगे पञ्च ५ । ४ । ४४
२७२	प्रतिष्कशश्च ६ । १ । १५२
२२६	प्रतेरुरसः सप्तमी ५ । ४ । ८२
४००	प्रत्ययोत्तरपद ७ । २ । ९८
६	प्रथमानिर्दिष्टं १ । २ । ४३
३७९	प्रधानप्रत्ययार्थ १ । २ । ५६
२६३	प्रनिरन्तःशरेक्षु ८ । ४ । ५
४२६	प्रभवति ४ । ३ । ८३
५५१	प्रमाणे द्वयस ५ । २ । ३७
४६०	प्रयच्छति गर्ह्यम् ४ । ४ । ३०
५२९	प्रयोजनम् ५ । १ । १०९
३१५	प्रवाहणस्य ढे ७ । ३ । २८
६१२	प्रशंसायां रूपप् ५ । ३ । ६६
८२	प्रशंसावचनैश्च २ । १ । ६६
६०८	प्रशस्यस्य श्रः ५ । ३ । ६०
१७०	प्रसंभ्यां जानु ५ । ४ । १२९
२७२	प्रस्कण्वहरिश्च ६ । १ । १५३
३९५	प्रस्थपुरवहा ४ । २ । १२२
३९१	प्रस्थोत्तरपद ४ । २ । ११०
४६६	प्रहरणम् ४ । ४ । ५७
३	प्राक्कडारात्स २ । १ । ३
४७९	प्राक् क्रीताच्छः ५ । १ । १
६१४	प्रागिवात्कः ५ । ३ । ७०
६०२	प्रागेकादशभ्यो ५ । ३ । ४९
४७१	प्राग्घिताद्यत् ४ । ४ । ७५
५९०	प्राग्दिशो विभक्तिः ५ । ३ । १
२७४	प्राग्दीव्यतोऽण् ४ । १ । ८३
४८८	प्राग्वतेष्ठञ् ५ । १ । १८
४५२	प्राग्वहतेष्ठक् ४ । ४ । १
३९८	प्राचां कटादेः ४ । २ । १३९
४१०	प्राचां ग्रामनगरा ७ । ३ । १४
४१७	प्राचां नगरान्ते ७ । ३ । २४
३३३	प्राचामवृद्धा ४ । १ । १६०
६२०	प्राचामुपादे ५ । ३ । ८०
५३३	प्राणभृज्जाति ५ । १ । १२९
४४८	प्राणिरजतादि ४ । ३ । १५४
५७३	प्राणिस्था ५ । २ । ९६
२६५	प्रातिपदिकान्त ८ । ४ । ११
९५	प्राध्वं बन्धने १ । ४ । ७८
६०	प्राप्तापन्ने च २ । २ । ४
४१४	प्रायभवः ४ । ३ । ३९
२३४	प्रावृट्शरत्काल ६ । ३ । १५
४०४	प्रावृष एण्यः ४ । ३ । १७
४०८	प्रावृषष्ठप् ४ । ३ । २६
६१०	प्रियस्थिरस्फिर ६ । ४ । १५७
३९९	प्रोक्ताल्लुक् ४ । २ । ६४
४५०	प्लक्षादिभ्योऽण् ४ । ३ । १६४

पृष्ठम् सूत्रम्

फ

२८६ फक्फिञोरन्य ४ । १ । ९१
४५० फले लुक् ४ । ३ । १६३
१२२ फल्गुनीप्रोष्ठपदा १ । २ । ६०
३२९ फाण्टाहृतिमि ४ । १ । १५०
५७५ फेनादिलच्च ५ । २ । ९९
३२९ फेरछ च ४ । १ । १४९

ब

४७६ बन्धने चर्षौ ४ । ४ । ९६
२४७ बन्धुनि बहु ६ । १ । १४
२३४ बन्धे च विभाषा ६ । ३ । १३
५८८ बलादिभ्यो मतु ५ । २ । १३६
६२८ बस्तेर्ढञ् ५ । ३ । १०१
५५९ बहुपूगगणस ५ । २ । ५२
१६२ बहुव्रीहौ सक्थ्य ५ । ४ । ११३
१६१ बहुव्रीहौ संख्येये ५ । ४ । ७३
६११ बहोर्लोपो भू ६ । ४ । १५८
३२२ बह्वच इञः प्राच्य २ । ४ । ६६
३७५ बह्वचः कूपेषु ४ । २ । ७३
४२१ बह्वचोऽन्तोदात्ता ४ । ३ । ६७
६१८ बह्वचो मनुष्य ५ । ३ । ७८
४६८ बह्वच्पूर्वपदा ४ । ४ । ६४
६५० बह्वल्पार्थाच्छ ५ । ४ । ४२
३०३ बाह्वादिभ्यश्च ४ । १ । ९६
३९४ बाहीकग्रामेभ्यः ४ । २ । ११७
३८३ बिल्वकादि ६ । ४ । १५३
४४३ बिल्वादिभ्यो ४ । ३ । १३६
४९७ बिस्ताच्च ५ । १ । ३१
६३७ बृहत्या आच्छादने ५ । ४ । ६

पृष्ठम् सूत्रम्

५३६ ब्रह्मणस्त्वः ५ । १ । १३६
११२ ब्रह्मणो जानपदा ५ । ४ । १०४
२२५ ब्रह्महस्तिभ्यां ५ । ४ । ७८
५६४ ब्राह्मणकोष्णिके ५ । २ । ७१
३६० ब्राह्मणमाणव ४ । २ । ४२
३२५ ब्राह्मोऽजातौ ६ । ४ । १७१

भ

४७७ भक्ताण्णः ४ । ४ । १००
४६९ भक्तादणन्य ४ । ४ । ६८
४२९ भक्तिः ४ । ३ । ९५
४० भक्ष्येण मिश्रीकर २ । १ । ३५
३१० भर्गात्त्रैगर्ते ४ । १ । १११
३९३ भवतष्ठक्छसौ ४ । २ । ११५
४५७ भस्त्रादिभ्यः ४ । ४ । १६
५०३ भागाच्च ५ । १ । ४९
३५७ भिक्षादिभ्योऽण् ४ । २ । ३८
२५४ भीरोः स्थानम् ८ । ३ । ८१
६०३ भूतपूर्वे चरट् ५ । ३ । ५३
९२ भूषणेऽलम् १ । ४ । ६४
३६४ भौरिक्याद्यैषुका ४ । २ । ५४
२९३ भ्रातरि च ज्याय ४ । १ । १६४
३२७ भ्रातुर्व्यच्च ४ । १ । १४४
२०९ भ्रातृपुत्रौ स्वसृदु १ । २ । ६८
३१५ भ्रुवो वुक्च ४ । १ । १२५

म

४६६ मड्डुकझर्झरादण् ४ । ४ । ५६
४७६ मतजनहलात्करण ४ । ४ । ९७
३७५ मतोश्च बह्वजङ्गात् ४ । २ । ७२
५६१ मतौ छः सूक्तसाम्नो ५ । २ । ५९

पृष्ठम्	सूत्रम्
२६२	मतौ बह्वचोऽन ६ । ३ । ११९
३१७	मद्रवृज्योः कन् ४ । २ । १३१
६६१	मद्रात्परिवापणे ५ । ४ । ६७
३६१	मद्रेभ्योऽञ् ४ । २ । १०८
३०९	मधुबभ्र्वोर्ब्राह्मण ४ । १ । १०६
२३४	मध्याद्गुरौ ६ । ३ । ११
४०१	मध्यान्मः ४ । ३ । ८
९५	मध्येपदेनिवचने १ । ४ । ७६
३८१	मध्वादिभ्यश्च ४ । २ । ८६
२३१	मनसः संज्ञायाम् ६ । ३ । ४
३६७	मनुष्यतत्स्थयोः ४ । २ । १३४
३३३	मनोर्जातावञ्यतौ ४ । १ । १६१
२४४	मन्थौदनसक्तुबि ६ । ३ । ६०
४२६	मयट् च ४ । ३ । ८२
४४५	मयड्वैतयोर्भाषा ४ । ३ । १४३
८५	मयूरव्यंसकादयश्च २ । १ । ७२
२७२	मस्करमस्करिणौ ६ । १ । १५४
३२७	महाकुलादञ्खञौ ४ । १ । १४१
३५५	महाराजप्रोष्ठपदा ४ । २ । ३५
४२९	महाराजाट्ठञ् ४ । ३ । ९७
३५३	महेन्द्राद्घाणौ च ४ । २ । २९
४८५	माणवचरकाभ्यां ५ । १ । ११
२०५	मातरपितरावुदीचां ६ । ३ । ३२
२३८	मातुःपितुर्भ्यामन्य ८ । ३ । ८५
३१२	मातुरुत्संख्यासं ४ । १ । ११५
२३८	मातृपितृभ्यां स्वसा ८ । ३ । ८४
३१९	मातृष्वसुश्च ४ । १ । १३४
४६२	माथोत्तरपदपदव्य ४ । ४ । ३७
५७२	मादुपधायाश्च मतो ८ । २ । ९
६०२	मानपश्वङ्गयोः क ५ । ३ । ५१
४४९	माने वयः ४ । ३ । १६२
५१५	मासाद्वयसि यत्खञौ ५ । १ । ८१
२६३	मित्रे चर्षौ ६ । ३ । १३०
४५९	मुद्गादण् ४ । ४ । २५
४७३	मूलमस्याबर्हि ४ । ४ । ८८
६४९	मृदस्तिकन् ५ । ४ । ३९
	य
५१२	यज्ञर्त्विग्भ्यां घख ५ । १ । ७१
३०८	यञञोश्च २ । ४ । ६४
३०६	यञिञोश्च ४ । १ । १०१
५५३	यत्तदेतेभ्यः परिमा ५ । २ । ३९
५३०	यथातथायथापुर ७ । ३ । ३१
५३८	यथामुखसंमुखस्य ५ । २ । ६
१६	यथाऽसादृश्ये २ । १ । ७
६७६	यथास्वे यथायथम् ८ । १ । १४
५३७	यवयवकषष्टिकाद्यत् ५ । २ । ३
३२१	यस्कादिभ्यो गोत्रे २ । ४ । ६३
२१	यस्य चायामः २ । १ । १६
४४	याजकादिभिश्च २ । २ । ९
६०१	याप्ये पाशप् ५ । ३ । ४७
१७	यावदवधारणे २ । १ । ८
६४७	यावादिभ्यः कन् ५ । ४ । २९
८२	युवा खलतिपलित २ । १ । ६७
६११	युवाल्पयोः कनन्य ५ । ३ । ६४
३५९	युवोरनाकौ ७ । १ । १
३९९	युष्मदस्मदोरन्यतर ४ । ३ । १
२८३	यूनि लुक् ४ । १ । ९०
४८१	ये च तद्धिते ६ । १ । ६१

पृष्ठम्	सूत्रम्
३२४	ये चाभावकर्मणोः ६ । ४ । १६८
१९३	येषां च विरोधः २ । ४ । ९
३७८	योगप्रमाणे च तदः १ । २ । ५५
५२२	योगाद्यच्च ५ । १ । १०२
५१३	योजनं गच्छति ५ । १ । ७४
५३५	योपधाद्गुरूपोत्त ५ । १ । १३२
	र
५२९	रऋतो हलादेर्ल ६ । ४ । १६१
६४८	रक्ते ५ । ४ । ३२
४६१	रक्षति ४ । ४ । ३३
३८७	रङ्कोरमनुष्येऽण्च ४ । २ । १००
५८१	रजःकृष्यासुतिप ५ । २ । ११२
२५५	रथवदयोश्च ६ । ३ । १०२
४३८	रथाद्यत् ४ । ३ । १२१
५७१	रसादिभ्यश्च ५ । २ । ९५
१८५	राजदन्तादिषु परम् २ । २ । ३१
३६३	राजन्यादिभ्यो वुञ् ४ । २ । ५३
५७३	राजन्वान्सौराज्ये ८ । २ । १४
३२४	राजश्वशुराद्यत् ४ । १ । १३७
१०५	राजाहःसखिभ्यष्टच् ५ । ४ । ९१
३९८	राज्ञः क च ४ । २ । १४०
१२०	रात्राह्नाहाः पुंसि २ । ४ । २९
२४९	रात्रेः कृति विभाषा ६ । ३ । ७२
५१६	रात्र्यहःसंवत्सराच्च ५ । १ । ८७
३८५	राष्ट्रावारपाराद्घखौ ४ । २ । ९३
३५४	रीङृतः ७ । ४ । २७
५८४	रूपादाहतप्रशंस ५ । २ । १२०
३२८	रेवत्यादिभ्यष्ठक् ४ । १ । १४६
४४१	रैवतिकादिभ्यः ४ । ३ । १३१
६५३	रोगाच्चापनयने ५ । ४ । ४९
३७६	रोणी ४ । २ । ७८
३९५	रोपधेतोः प्राचां ४ । २ । १२३
	ल
२१	लक्षणेनाभिप्रती २ । १ । १४
४६५	लवणाट्ठञ् ४ । ४ । ५२
४५९	लवणाल्लुक् ४ । ४ । २४
३४३	लाक्षारोचनाट्ठक् ४ । २ । २
४१२	लुक्तद्धितलुकि १ । २ । ४९
३०९	लुक्स्त्रियाम् ४ । १ । १०९
३७७	लुपि युक्तवद्व्यक्ति १ । २ । ५१
४५०	लुप्च ४ । ३ । १६६
३४४	लुबविशेषे ४ । २ । ४
३७८	लुब्योगाप्रख्याना १ । २ । ५४
६२७	लुम्मनुष्ये ५ । ३ । ९८
५०२	लोकसर्वलोकाट्ठञ् ५ । १ । ४४
१७१	लोपो व्योर्वलि ६ । १ । ६६
५७६	लोमादिपामादि ५ । २ । १००
६४७	लोहितान्मणौ ५ । ४ । ३०
	व
३०९	वतण्डाच्च ४ । १ । १०८
४९३	वतोरिड्वा ५ । १ । २३
५५९	वतोरिथुक् ५ । २ । ५३
४१३	वत्सशालाभिजि ४ । ३ । ३६
५७५	वत्सांसाभ्यां काम ५ । २ । ९८
६१३	वत्सोक्षाश्वर्षभेभ्यः ५ । ३ । ९१
२६०	वनगिर्योः संज्ञा ६ । ३ । ११७
२६०	वनं पुरगामिश्रका ८ । ४ । ४
१७९	वन्दिते भ्रातुः ५ । ४ । १५७

पृष्ठम्	सूत्रम्
१७४	वयसि दन्तस्य ५ । ४ । १४१
५८७	वयसि पूरणात् ५ । २ । १३०
३८०	वरणादिभ्यश्च ४ । २ । ८२
४२०	वर्गान्ताच्च ४ । ३ । ६३
२७१	वर्चस्केऽवस्करः ६ । १ । १४८
५२९	वर्णदृढादिभ्यः ५ । १ । १२३
५८८	वर्णाद्ब्रह्मचारिणि ५ । २ । १३४
६४७	वर्णे चानित्ये ५ । ४ । ३१
८३	वर्णो वर्णेन २ । १ । ६९
३८८	वर्णौ वुक् ४ । २ । १०३
५१७	वर्षस्याभविष्यति ७ । ३ । १६
४०५	वर्षाभ्यष्ठक् ४ । ३ । १८
५१७	वर्षाल्लुक् च ५ । १ । ८८
२६१	वले ६ । ३ । ११८
४७३	वशं गतः ४ । ४ । ८६
३६९	वसन्तादिभ्यष्ठक् ४ । २ । ६३
४५६	वस्नक्रयविक्रयाट्ठन् ४ । ४ । १३
५०४	वस्नद्रव्याभ्यां ५ । १ । ५१
३३२	वाकिनादीनां ४ । १ । १५८
६६६	वाक्यादेरामन्त्रित ८ । १ । ८
२४३	वा घोषमिश्रशब्दे ६ । ३ । ५६
५८६	वाचो ग्मिनिः ५ । २ । १२४
६४८	वाचो व्याहृतार्था ५ । ४ । ३५
५८७	वातातीसाराभ्यां ५ । २ । १२९
२९४	वान्यस्मिन्सपि ४ । १ । १६५
६२४	वा बहूनां जाति ५ । ३ । ९३
२६५	वा भावकरणयोः ८ । ४ । १०
३४७	वामदेवाड्ड्यड्ड्यौ ४ । २ । ९
३५३	वाय्वृतुपित्रुषसो ४ । २ । ३१
२४१	वा शोकष्यञ्रोगेषु ६ । ३ । ५१
१७१	वा संज्ञायाम् ५ । ४ । १३३
४२९	वासुदेवार्जुनाभ्यां ४ । ३ । ९८
५९३	वा ह च छन्दसि ५ । ३ । १३
२६४	वाहनमाहितात् ८ । ४ । ८
१८३	वाहिताग्न्यादिषु २ । २ । ३७
४९७	विंशतिकात्खः ५ । १ । ३२
४९३	विंशतित्रिंशद्भ्यां ५ । १ । २४
५६०	विंशत्यादिभ्यस्त ५ । २ । ५६
३१५	विकर्णकुषीतका ४ । १ । १२४
३१३	विकर्णशुङ्गच्छग ४ । १ । ११७
४२६	विदूराञ्ञ्यः ४ । ३ । ८४
४२४	विद्यायोनिसम्बन्धे ४ । ३ । ७७
४७२	विध्यत्यधनुषा ४ । ४ । ८३
५४७	विनञ्भ्यां नानाञौ ५ । २ । २७
६४४	विनयादिभ्यष्ठक् ५ । ४ । ३४
६१२	विन्मतोर्लुक् ५ । ३ । ६५
१९८	विप्रतिषिद्धं चान २ । ४ । १३
१८	विभाषा २ । १ । ११
४९६	विभाषा कार्षापण ५ । १ । २९
३५७	विभाषा कुरुयुगं ४ । २ । १३०
९४	विभाषा कृञि १ । ४ । ७२
११७	विभाषा चत्वारिंश ६ । ३ । ४९
६३९	विभाषाञ्चेरदिक्स्त्रि ५ । ४ । ८
५३७	विभाषा तिलमाषो ५ । २ । ४
५९८	विभाषा परावरा ५ । ३ । २९
२५६	विभाषा पुरुषे ६ । ३ । १०६
४०७	विभाषा पूर्वाह्णाप ४ । ३ । २४
३५१	विभाषा फाल्गुनी ४ । २ । २३

पृष्ठम्	सूत्रम्	पृष्ठम्	सूत्रम्
६४३	विभाषा बहोर्धावि ५।४।२०	३२९	वृद्धाट्ठक्सौवी ४।१।१४८
३९६	विभाषा मनुष्ये ४।२।१४४	३९४	वृद्धात्प्राचाम् ४।२।१२०
४०३	विभाषा रोगातप ४।३।१३	३९८	वृद्धादकेकान्त ४।२।१४१
५९८	विभाषाऽवरस्य ५।३।४१	१५१	वृद्धिनिमित्तस्य च ६।३।३९
२३५	विभाषा वर्षक्षर ६।३।१६	३९२	वृद्धिर्यस्याचा १।१।७३
४५७	विभाषा विवधात् ४।४।१७	३३५	वृद्धेत्कोसला ४।१।१६९
१६५	विभाषा वृक्षमृग २।४।१२	२०७	वृद्धो यूना तल्ल १।२।६५
१७५	विभाषा श्यावारो ५।४।१४४	७८	वृन्दारकनाग २।१।६२
२००	विभाषा समीपे २।४।१६	५४७	वेः शालच्छङ्क ५।२।२८
६५६	विभाषा साति का ५।४।५२	४५६	वेतनादिभ्यो ४।४।१२
६१२	विभाषा सुपो बहु ५।३।६८	२३२	वैयाकरणाख्यायां ६।३।७
१२८	विभाषा सेनासुरा २।४।२५	१६०	वोपसर्जनस्य ६।३।८२
२३८	विभाषा स्वसृ ६।३।२४	४५९	व्यञ्जनैरुप ४।४।२६
४८१	विभाषा हविरपूपा ५।१।४	३२७	व्यन्सपत्ने ४।१।१४५
२५३	विभाषोदरे ६।३।८८	४१६	व्याहरति मृगः ४।३।५१
३९४	विभाषोशीनरेषु ४।२।११८	५२१	व्युष्टादिभ्योऽण् ५।१।९७
२६३	विभाषौषधि ८।४।६	३०५	व्रातच्फञोर ५।३।११३
५६२	विमुक्तादिभ्यो ५।२।६१	५४५	व्रातेन जीवति ५।२।२१
५२३	विशाखाषाढाद् ५।१।११०	५३७	व्रीहिशाल्योर्ढक् ५।२।२
१९२	विशिष्टलिङ्गो २।४।७	४४७	व्रीहेः पुरोडाशे ४।३।१४८
७४	विशेषणं विशे २।१।५७	५८३	व्रीह्यादिभ्यश्च ५।२।११६
३७९	विशेषणानां १।२।५२		श
३६३	विषयो देशे ४।२।५२	४७२	शकटादण् ४।४।८०
२७१	विष्किरः ६।१।१५०	४६६	शक्तियष्ट्योरी ४।४।५९
६४१	विसारिणो ५।४।१६	४२९	शण्डिकादिभ्यो ४।३।९२
३७६	वुञ्छणकठजि ४।२।८०	४९४	शतमानविंशतिक ५।१।२७
६३२	वृकाट्टेण्यण् ५।३।११५	५८३	शतसहस्रा ५।२।११९
६०९	वृद्धस्य च ५।३।६२	४९२	शताच्च ठन्यताव ५।१।२१
३९३	वृद्धाच्छः ४।२।११४	५५६	शदन्तविंशतेश्च ५।२।४६

पृष्ठम्	सूत्रम्
४६१	शब्ददर्दुरं करोति ४ । ४ । ३४
४४५	शम्याः ष्लञ् ४ । ३ । १४२
२३५	शयवासवासि ६ । ३ । १८
३०६	शरद्वच्छुनक ४ । १ । १०२
२६२	शरादीनां च ६ । ३ । ११०
४१७	शरीरावयवाच्च ४ । ३ । ५५
४८१	शरीरावयवाद्यत् ५ । १ । ६
६३१	शर्करादिभ्योऽण् ५ । ३ । १०७
३८०	शर्कराया वा ४ । २ । ८३
४६५	शलालुनोऽन्य ४ । ४ । ५४
४४०	शाकलाद्वा ४ । ३ । १२८
६२९	शाखादिभ्यो ५ । ३ । १०३
४९८	शाणाद्वा ५ । १ । ३५
५४४	शालीनकौपीने ५ । २ । २०
३८३	शिखाया वलच् ४ । २ । ८९
६२९	शिलाया ढः ५ । ३ । १०२
४६५	शिल्पम् ४ । ४ । ५५
३१०	शिवादिभ्योऽण् ४ । १ । ११२
४२७	शिशुक्रन्दयम ४ । ३ । ८८
५६४	शीतोष्णाभ्यां ५ । २ । ७२
५११	शीर्षच्छेदाद्यच्च ५ । १ । ६५
४६६	शीलम् ४ । ४ । ६१
३५२	शुक्राद्घन् ४ । २ । २६
४२४	शुण्डिकादिभ्योऽण् ४ । ३ । ७६
३१५	शुभ्रादिभ्यश्च ४ । १ । १२३
१९४	शूद्राणामनिर २ । ४ । १०
४९४	शूर्पादञन्यतर ५ । १ । २६
६६०	शूलात्पाके ५ । ४ । ६५
३४९	शूलोखाद्यत् ४ । २ । १७

पृष्ठम्	सूत्रम्
५६६	शृङ्खलमस्य ५ । २ । ७९
६२२	शेवलसुपरिवि ५ । ३ । ८४
१७७	शेषाद्विभाषा ५ । ४ । १५४
३८४	शेषे ४ । २ । ९२
१२९	शेषो बहुव्रीहिः २ । २ । २३
४३४	शौनकादिभ्यः ४ । ३ । १०६
३६५	श्येनतिलस्य ६ । ३ । ७१
४११	श्रविष्ठाफल्गु ४ । ३ । ३४
४६८	श्राणामांसौ ४ । ४ । ६७
५६०	श्राद्धमनेन ५ । २ । ८५
४०३	श्राद्धे शरदः ४ । ३ । १२
७६	श्रेण्यादयः २ । १ । ५९
५६७	श्रोत्रियंश्छन्दो ५ । २ । ८४
४५५	श्वगणाट्ठञ्च ४ । ४ । ११
२१०	श्वशुरः श्वश्र्वा १ । २ । ७१
४०३	श्वसस्तुट् च ४ । ३ । १५
२२५	श्वसोवसीयः ५ । ४ । ८०
४५५	श्वादेरिञि ७ । ३ । ८
	ष
५५९	षट्कतिकतिपय ५ । २ । ५१
५१५	षण्मासाण्ण्यच्च ५ । १ । ८३
३२६	षपूर्वहन्धृत ६ । ४ । १३५
५१८	षष्टिकाः षष्टि ५ । १ । ९०
५६१	षष्ठ्यादेश्चासं ५ । २ । ५८
६०२	षष्ठाष्टमाभ्यां ५ । ३ । ५०
४४	षष्ठी २ । २ । ८
२३६	षष्ठ्या आक्रोशे ६ । ३ । २१
६०३	षष्ठ्या रूप्य ५ । ३ । ५४
६५३	षष्ठ्या व्याश्रये ५ । ४ । ४८

पृष्ठम्	सूत्रम्
२४५	ष्यङः सम्प्रसार ६ । १ । १३
	स
५६६	स एषां ग्रामणीः ५ । २ । ७८
३२४	संयोगादिश्च ६ । ४ । १६६
४१६	संवत्सराग्रहायणी ४ । ३ । ५०
५१३	संशयमापन्नः ५ । १ । ७३
४५८	संसृष्टे ४ । ४ । २२
४५४	संस्कृतम् ४ । ४ । ३
३४९	संस्कृतं भक्षाः ४ । २ । १६
२५८	संहितायाम् ६ । ३ । ११४
५३२	सख्युर्यः ५ । १ । १२६
३७५	सङ्कलादिभ्यश्च ४ । २ । ७५
१५४	संख्ययाव्यया २ । २ । २५
७०	संख्यापूर्वो २ । १ । ५२
४९२	संख्याया अतिश ५ । १ । २२
५५५	संख्याया अव ५ । २ । ४२
६४१	संख्यायाः क्रिया ५ । ४ । १७
५१७	संख्यायाः संवत्सर ७ । ३ । १५
५०७	संख्यायाः संज्ञासं ५ । १ । ५८
५५६	संख्याया गुणस्य ५ । २ । ४७
६००	संख्याया विधार्थे ५ । ३ । ४२
६५९	संख्यायाश्च गुणा ५ । ४ । ५९
२५	संख्या वंश्येन २ । १ । १९
१७४	संख्यासुपूर्वस्य ५ । ४ । १४०
६५०	संख्यैकवचनाच्च ५ । ४ । ४३
३६४	संग्रामे प्रयोजन ४ । २ । ५६
४३९	सङ्घाङ्कलक्षणेष्व ४ । ३ । १२७
१५०	संज्ञापूरण्योश्च ६ । ३ । ३८
६४	संज्ञायाम् २ । १ । ४४
५७२	संज्ञायाम् ४ । ३ । ११७
४३६	संज्ञायाम् ८ । २ । ११
४६४	संज्ञायां ललाटकु ४ । ४ । ४६
४०	संज्ञायां शरदो ४ । ३ । २७
३४५	संज्ञायां श्रवणाश्व ४ । २ । ५
४४७	संज्ञायां कन् ४ । ३ । १४७
६१७	संज्ञायां कन् ५ । ३ । ७५
६२३	संज्ञायां कन् ५ । ३ । ८७
१२६	संज्ञायां कन्थोशी २ । ४ । २०
६२७	संज्ञायां च ५ । ३ । ९७
४७२	संज्ञायां जन्याः ४ । ४ । ८२
४७४	संज्ञायां धेनुष्या ४ । ४ । ८९
५८८	संज्ञायां मन्मा ५ । २ । १३७
६६०	सत्यादशपथे ५ । ४ । ६६
५९५	सद्यःपरुत्परार्यै ५ । ३ । २२
१२३	स नपुंसकम् २ । ४ । १७
४०४	संधिवेलाद्यृतु ४ । ३ । १६
७७	सन्महत्परमो २ । १ । ६१
६५९	सपत्रनिष्पत्रा ५ । ४ । ६१
५६८	सपूर्वाच्च ५ । २ । ८७
१८०	सप्तमीविशेषणे २ । २ । ३५
६२	सप्तमी शौण्डैः २ । १ । ४०
५९३	सप्तम्यास्त्रल् ५ । ३ । १०
४७८	सभाया यः ४ । ४ । १०५
१२७	सभा राजाऽमनुष्य २ । ४ । २३
५२२	समयस्तदस्य ५ । १ । १०४
६५९	समयाच्च यापना ५ । ४ । ६०
१	समर्थः पदविधिः २ । १ । १
२७४	समर्थानां प्रथ ४ । १ । ८२

पृष्ठम्	सूत्रम्
४६४	समवायान्सम ४।४।४३
५४१	समांसमां विजा ५।२।१२
४७८	समानतीर्थे वासी ४।४।१०७
२५१	समानस्य च्छ ६।३।८४
४७८	समानोदरे शयि ४।४।१०८
५२३	समापनात्सपूर्वप ५।१।११२
५१६	समायाः खः ५।१।८५
६२९	समासाच्च तद्वि ५।३।१०६
२७	समासान्ताः ५।४।६८
२५४	समासेऽङ्गुलेः ८।३।८०
६४४	समूहवच्च बहुषु ५।४।२२
५२१	सम्पादिनि ५।१।९९
२४५	सम्प्रसारणस्य ६।३।१३९
५४७	सम्प्रोदश्च कटच् ५।२।२९
५०४	सम्भवत्यवहरति ५।१।५२
४१५	सम्भूते ४।३।४१
५३८	सर्वचर्मणः कृतः ५।२।५
४०५	सर्वत्राण्च तलोपश्च ४।३।२२
४८४	सर्वपुरुषाभ्यां ५।१।१०
५०१	सर्वभूमिपृथिवी ५।१।४१
६६२	सर्वस्य द्वे ८।१।१
५९१	सर्वस्य सोऽन्यतर ५।३।६
५९४	सर्वैकान्यकियत्तदः ५।३।१५
६४९	सस्नौ प्रशंसायाम् ५।४।४०
५६३	सस्येन परिजातः ५।२।६८
३	सह सुपा २।१।४
२५०	सहस्य सः संज्ञा ६।३।७८
९४	साक्षात्प्रभृतीनि च १।४।७४
५६९	साक्षाद्द्रष्टरि ५।२।९१
६५६	सात्पदाद्योः ८।३।१११
५४५	साप्तपदीनं सख्यं ५।२।२२
३५	सामि २।१।२७
४०५	सायंचिरंप्राह्णे ४।३।२३
३३५	साल्वावयव ४।१।१७१
३३४	साल्वेयगा ४।१।१६७
३५०	सास्मिन्पौर्णमा ४।२।२१
३५१	सास्य देवता ४।२।२४
५७८	सिकताशर्क ५।२।१०४
१६१	सिति च १।४।१६
६३	सिद्धशुष्कपक्व २।१।४१
५७४	सिध्मादिभ्यश्च ५।२।९७
४२९	सिन्धुतक्षशि ४।३।९३
४११	सिन्ध्वपकराभ्यां ४।३।३२
६६०	सुखप्रियादानुलो ५।४।६३
५८७	सुखादिभ्यश्च ५।२।१३१
३०३	सुधातुरकङ् च ४।१।९७
५	सुपो धातुप्राति २।४।७१
१७	सुप्प्रतिना मात्रार्थे २।१।९
१६६	सुप्रातसुश्वसुदि ५।४।१२०
३७५	सुवास्त्वादिभ्यो ४।२।७७
२५४	सुषामादिषु च ८।३।९८
४०९	सुसर्वार्धाज्जनपद ७।३।१२
१७६	सुहृद्दुर्हृदौ मित्रा ५।४।१५०
३७२	सूत्राच्च कोपधात् ४।२।६५
३३०	सेनान्तलक्षण ४।१।१५२
४६४	सेनाया वा ४।४।४५
४७८	सोदराद्यः ४।४।१०९
३५३	सोमाट्ट्यण् ४।२।३०

पृष्ठम्	सूत्रम्
४२८	सोऽस्य निवासः ४ । ३ । ८९
५०६	सोऽस्यांशवस्नभृत ५ । १ । ५६
३६४	सोऽस्यादिरिति ४ । २ । ५५
५३१	स्तेनाद्यन्नलोप ५ । १ । १२५
४४	स्तोकान्तिकदूरार्थ २ । १ । ३९
१३३	स्त्रियाः पुंवद्भाषित ६ । ३ । ३४
१७४	स्त्रियां संज्ञायाम् ५ । ४ । १४३
३३७	स्त्रियामवन्तिकु ४ । १ । १७६
२०८	स्त्री पुंवच्च १ । २ । ६६
२८०	स्त्रीपुंसाभ्यां नञ्स्न ४ । १ । ८७
३१४	स्त्रीभ्यो ढक् ४ । १ । १२०
३७५	स्त्रीषु सौवीरसाल्व ४ । २ । ७६
३४८	स्थण्डिलाच्छयि ४ । २ । १५
४१३	स्थानान्तगोशाल ४ । ३ । ३५
६४०	स्थानान्ताद्विभाषा ५ । ४ । १०
५१२	स्थालीबिलात् ५ । १ । ७०
६०९	स्थूलदूरयुवह्रस्व ६ । ४ । १५६
६३६	स्थूलादिभ्यः प्रका ५ । ४ । ३
२३६	स्थे च भाषायाम् ६ । ३ । २०
३४	स्वयं क्तेन २ । १ । २५
३२७	स्वसुश्छः ४ । १ । १४३
४५३	स्वागतादीनाञ्च ७ । ३ । ७
१५३	स्वाङ्गाच्चेतः ६ । ३ । ४०
५६२	स्वाङ्गेभ्यः प्रसिते ५ । २ । ६६
५८६	स्वामिन्नैश्वर्ये ५ । २ । १२६
	ह
४५७	हरत्युत्सङ्गादिभ्यः ४ । ४ । १५
३०६	हरितादिभ्यो ४ । १ । १००
४५१	हरीतक्यादिभ्यश्च ४ । ३ । १६७
२३३	हलदन्तात्सप्तम्याः ६ । ३ । ९
४३८	हलसीराट्ठक् ४ । ३ । १२४
४७२	हलसीराट्ठक् ४ । ४ । ८१
५८८	हस्ताज्जातौ ५ । २ । १३३
५३३	हायनान्तयुवा ५ । १ । १३०
४६८	हितं भक्षाः ४ । ४ । ६५
२४२	हिमकाषिहति ६ । ३ । ५४
६५३	हीयमानपापयो ५ । ४ । ४७
४७६	हृदयस्य प्रियः ४ । ४ । ९५
२४१	हृदयस्य हृल्लेख ६ । ३ । ५०
३१६	हृद्भगसिन्ध्वन्ते ७ । ३ । १९
४२६	हेतुमनुष्येभ्यो ४ । ३ । ८१
५४६	हैयङ्गवीनं संज्ञा ५ । २ । २३
५३६	होत्राभ्यश्छः ५ । १ । १३५
३८९	ह्रस्वात्तादौ तद्धि ८ । ३ । १०१
६२३	ह्रस्वे ५ । ३ । ८६

समासप्रभृतिपूर्वार्धपर्यन्तवार्तिकसूचिका ।

वार्तिकम्	सूत्रम्
अ	
अकच्प्रकरणे तूष्णीमः	२०२८
अकारान्तोत्तरपदो द्विगुः	८११
अगोवत्सहलेष्विति	८५०
अग्निकलिभ्यां ढक्वक्तव्यः	१०७८
अग्निपदादिभ्य उप	१७६१
अग्नीधः शरणे	१५००
अग्रादिपश्चाड्डिमच्	१३९१
अग्रत्त्रधर्मत्रिपूर्वा	१२७०
अग्नि शीर्ष इति वाच्यम्	१६६७
अज्ञस उपसंख्यानम्	९६०
अण् संज्ञायाम्	१७५८

वार्तिकम्	सूत्रम्
अतद्धित इति वाच्यम्	१०५७
अत्यादयः क्रान्ताद्यर्थे	७८०
अद्भुतायामसंहितम्	७५८
अद्वन्द्वतत्पुरुषविशेष	९३८
अधर्माच्चेति वक्तव्यम्	१५९१
अध्यात्मादेष्ठञिष्यते	१४३७
अनजादौ च विभाषा	२०३५
अनेकप्राप्तावेकत्र	९०३
अनेकशफेष्विति	९३९
अनो नलोपश्च वा	८२१
अन्ताच्च	१३९१
अन्ताच्च	९६९
अन्येभ्योऽपि दृश्यते	१९१६, १९१९, १९२७
अपरस्यार्धे पश्चभावो	७३७
अपील्वादीनामिति	१०४३
अपो योनियन्मतुषु	९७६
अभितःपरितः	६५९
अभूततद्भाव इति	२११७
अभ्यर्हितञ्च	९०५
अभ्रकुंसादीनामिति	९९९
अमानिनीति वक्तव्यम्	८४१
अमेहक्कतसित्रेभ्य	१३२४
अरण्याण्णः	१३२५, १३५३
अर्णसो लोपश्च	१९१६
अर्थाच्चासन्निहिते	१९४१
अर्थेन नित्यसमासो	६९८
अर्धाच्चेति वक्तव्यम्	१६९०
अर्हतो नुम् च	१७८८

वार्तिकम्	सूत्रम्
अलाबूतिलोमाभङ्गाभ्यः	१८३०
अवरस्योपसंख्यानम्	६९३
अवर्णान्ताद्वा	९४१
अवादयः क्रुष्टाद्यर्थे	७८०
अवारपाराद्विगृहीतादपि	१३१३
अवेर्दुग्धे	१२४२
अव्ययस्य च्वावीत्वं	२०१८
अव्ययानां भमात्रे	१३२४
अश्मनो विकारे	१५१४
अष्टनः कपाले	८०७
असमासवद्भावे	२१४७
अस्तोश्चेति वक्तव्यम्	१००७
अस्मिन्नर्थेऽण् डिद्वा	१२०८
अहर्महणं द्वन्द्वार्थम्	७८७
अह्नः खः क्रतौ	१२५१
आ	
आकर्षात्पर्पादे	१६२५
आकालाट्ठंश्च	१७७७
आख्यानाख्यायिकेतिहास	१२७०
आग्नीध्रसाधारणादञ्	२०९३
आद्यादिभ्य उपसंख्यानम्	२१११
आबन्तो वा	८२१
आमयस्योपसंख्यानम्	१९२८
आमुष्यायणामुष्यपुत्रिका	९७९
आहृतप्रकरणे वारि	१७४१
आहौ प्रभूतादिभ्यः	१५४९
इ	
इकन्पदोत्तरपदाच्छतषष्टेः	१२७०
इकारादाविति वाच्यम्	१५६०

वार्तिकम्	सूत्रम्
इके चरतावुपसंख्यानम्	९९१
इत्येऽनभ्यासस्य	१००७
इदम इश् समसण्	१९७०
इदमोऽश्भावो	१९७०
इयङुवङ्भाविनाम	९९९
इरिकादिभ्यः प्रति	१०५१
इवेन समासो	६५०
ई	
ईकक्च	१०७७
ईयसो बहुव्रीहेर्नेति	८९४
ईषद्गुणवचनेनेति	७५५
उ	
उत्तरपदं यत्प्राति	१०५५
उत्तरपदस्य चेति	९९५
उत्तरपदेन परिमाणिना	७१६
उपधिशब्दात् स्वार्थे	१६७५
उवर्णान्त इलस्य च	२०३५
उष्णभद्रयोः करणे वा	१००७
ऋ	
ऋतुनक्षत्राणां समाक्षरा	९०५
ऋतोर्वृद्धिमद्विधा	१३९७
ऋवर्णादपि	२०३५
ए	
एकविभक्तावषष्ठ्यन्त	७१३
एकाक्षरपूर्व	२०३७
एकाचो नित्यम्	१५२४
एतदो वान्यः	१९७२
ओ	
ओकारसकारभकारादौ सुपि	२०२८
क	
कच्छ्वा ह्रस्वत्वं च	१९१४
कप्रत्ययचिकादेशौ	१८३४
कम्बोजादिभ्य इति	११९४
कर्मप्रवचनीयानां	७८०
कर्मव्यतिहारे	२१४७
कल्पब्देशीयरौ	८३६
कारके छे च नायं	१०२५
कार्षापणाट्टिठन्	१६९०
कुम्भकुम्भ्यादीनामण्डादिषु	८३६
कृद्योगा च षष्ठी	७०३
कृत्यया न	९८६
कृष्णोदकपाण्डुसंख्या	९४३
केवलायाश्चेति	१६९८
कोपधप्रतिषेधे	८३८
कौपिञ्जल	१५१२
क्रोशशतयोजनशतयो	१७३८
क्लिन्नस्य चिल् पिल्लश्च	१८३४
क्षत्रियसमानशब्दा	११८६
ख	
खप्रत्ययानुत्पत्तौ	१८१३
खलतिकादिषु	१३००
खलादिभ्य इनिः	१२६०
खुरखराभ्यां वा णस्	८५७
ख्यश्च	८५९
ग	
गजसहायाभ्यां	१२५१
गड्वादेः परा सप्तमी	८९८
गणिकाया यञिति	१२४८
गन्धस्येत्त्वे तदेकान्त	८७४

वार्तिकम्	सूत्रम्
गवि च युक्ते	८०७
गिरिनद्यादीनां वा	१०५४
गिलगिले च	१००७
गिलेऽगिलस्य	१००७
गुणवचनेभ्यो मतुपो	१८६६
गुणान्तरेण तरलोप	७०३
गोरजादिप्रसङ्गे	१०७७
गोष्ठजादयः	१८३०
घ	
घोषग्रहणमपि कर्तव्यम्	१५०७
घ्यन्तादजाद्यदन्तम्	६०४
च	
चक्रद्रूहलोरुप	२०७५
चटकादिति वाच्यम्	११३४
चतुरश्रयतावाद्यक्षरस्य	१८५१
चतुर्थादच	२०३५
चतुर्थादनजादौ	२०३५
चतुर्थ्यर्थे	१७१३
चतुर्मासाण्णयो	१७५८
चतुर्वर्णादीनां	१७८६
चतुष्पाज्जातिरिति	७५३
चरट्जातीयरौ	८३६
चरणाद्धर्माम्नाययोरिति	१५०६
चित्रारेवती	१४०८
चिरपरुत्परारिभ्यः	११६१
चुल् च	१८३४
च्व्यर्थ इति वाच्यम्	७७५
छ	
छागवृषयोरपि	११७६
ज	
जातार्थे प्रतिप्रसूतो	१४११
जातिकालसुखादि	८६६
ज्योत्स्नादिभ्य उपसंख्यानम्	१६१०
ठ	
ठक्छसोश्च	८३६
ड	
डाचि विवक्षिते	२१२८
त	
ततोऽभिगमन	१७३८
तत्पचतीति	१७१८
तदन्ताच्च	१६४१
तदस्मिन्वर्तते	१२४१
तदर्हति	१५४८
तदो दावचनमनर्थकं	१६६८
तद्बृहतोः करपत्यो	१०७१
तप्पर्वमरुद्भ्याम्	१६२८
तरप्तमपौ	८३६
तस्येदमित्यपत्येऽपि	१०८८
तावतिथेन गृह्णाति	१८७७
तिलान्निष्फला	१२४२
तिल्यनौ	८३६
तीयादीकक् स्वार्थे	१६६४
त्यदादितः शेषे पुंनपुंसक	६३८
त्यदादीनां फिञ्वा	११८०
त्यदादीनां मिथः	६३८
त्यब्नेर्ध्रुव इति	१३२४
त्रतसौ	८३६
त्रौ च	१०२७

वार्तिकम्	सूत्रम्
त्युपाभ्यां चतुरो	६४५
त्वतलोर्गुणवचनस्य	८३६
थ	
थाल्	८३६
द	
दिक्छब्देभ्यस्तीरस्य	१०३४
दिवश्च दासे	६७६
दुरो दाशनाशदभ	१०३४
दूरादेत्यः	१३२५
दृशे चेति वक्तव्यम्	१०१७, १०१८
दृशिग्रहणाद्भवदादि	१६६३
देवाद्यञञौ	१०७७
देवानां प्रिय इति	७६७
दोष उपसंख्यानम्	१२२१
द्युप्रोभयाद्वक्तव्यः	१६७०
द्वन्द्वतत्पुरुषयोरुत्तरपदे	७२८
द्विगुप्राप्तापन्नालम्पूर्वगति	८१२
द्विगोर्नित्यम्	१८३८
द्वितीयं सन्ध्यक्षरं	२०३७
द्वित्वे गोयुगच्	१८३०
द्यन्तत्र्यजभ्यामेव	१०५१
ध	
धमुञन्तात्स्वार्थे	१६६१
धर्मादिष्वनियमः	६०२
धेनोर्भव्यायाम्	१००७
न	
नगपांसुपाण्डुभ्यश्च	१६१४
नञो नलोपस्तिङि	७५८
नञोऽस्त्यर्थानां वाच्यो	८३०
नराच्चेति	१५६६
नवस्य नू आदेशः	२०६३
न विद्यायाः	१६६४
नश्च पुराणे प्रात्	२०६३
नक्षासिकायाः	१६६६
नान्तस्य टिलोपे	१४८८
नित्यमाम्रेडिते डाचीति	२१२८
निरादयः क्रान्ताद्यर्थे	७८०
निष्के चेति वाच्यम्	६६४
निसो गते	१३२४
नील्या अन्वक्तव्यः	१२०३
नेतुर्नक्षत्रे अब्वक्तव्यः	८५४
प	
पञ्चजनादुपसंख्यानम्	१४३५
पञ्चजनादुपसंख्यानम्	१६७१
पत्त्राद्वाह्ये	१५०३
पथः संख्ययादेः	८२१
पथ्यध्यायन्याय	१३५३
परस्मादेयन्यहनि	१६७०
परिमुखादिभ्यः	१४३६
परेर्वर्जने वावचनम्	२१४१
पर्यायस्यैवेष्यते	८२६
पर्यादयो ग्लानाद्यर्थे	७८०
पर्श्वा णस् वक्तव्यः	१२५१
पल्यराजभ्यां चेति	६४६
पारश्चोर्ध्वेण	११८६
पात्राद्यन्तस्य न	८२१
पादशतग्रहणम्	२०७३
पिञरछन्दसि ङिच्च	१२४२

वार्तिकम्	सूत्रम्
पितुर्भ्रातरि व्यत्	१२४२
पिशाचाच्च	१६३५
पीतात्कन्	१२०३
पुण्यसुदिनाभ्यामह्न	८२१
पुरुषाद्वधविकार	१६७२
पुंवद्भावप्रतिषेधोऽप्र	८३२
पुष्पमूलेषु	१५४५
पुंसानुजो जनुषान्ध	६६०
पूरण इति वक्तव्यम्	६६३
पूरोरणवक्तव्यः	११८६
पूर्णमासादणवक्तव्यः	१२४१
पूर्वपूर्वतरयोः	१६७०
पूर्वान्यान्यतर	१६७०
पृच्छतौ सुस्नातादिभ्यः	१५४६
पृथिव्या ञाञौ	१०७७
पृथुमृदुभृशकृश	१७८७
पृष्ठादुपसंख्यानम्	१२५०
प्रकृतिप्रत्ययार्थ	१८४६
प्रकृत्या अके	१२४७
प्रतिपदविधाना	७०४
प्रमाणपरिमाणा	१८३८
प्रमाणे लः	१८३८
प्रयोजनं सुब्लोप	२१४६
प्रहरणार्थेभ्यः परे	६००
प्राक्शताद्वक्तव्यम्	८०८
प्राण्यङ्गादेव	१६०६
प्रादयो गताद्यर्थे	७८०
प्रादिभ्यो धातुजस्य	८३०
प्रायस्य चित्तिचित्तयोः	१०७१
फ	
फलपाकशुषामुप	१५४५
फलबर्हाभ्यामिनच्	१६२८
फलसेनावनस्पति	६१६
फल्गुन्याषाढाभ्यां	१४०८
ब	
बलावूलः	१६१८
बहिषष्टिलोपो यञ्च	१०७७
बहुपूर्वाच्चेति	१६६५
बह्वल्पार्थान्मङ्गला	२१०६
बाह्वरुपूर्वपदाद्बलात्	१६४१
ब्रह्मवर्चसादुप	१७०५
ब्राह्मणाच्छंसिन	६५६
भ	
भद्राच्चेति वक्तव्यम्	२१३८
भयभीतिभी	६६६
भवने क्षेत्रे शाकट	१८३०
भवार्थे तु लुग्वाच्यः	१०७७
भस्याढे तद्धिते	८३६, ८४२
भागरूपनामभ्यो	२०६३
भावप्रत्ययान्ता	१५७०
भूमनिन्दाप्रशंसासु	१८६४
भ्रातुज्ज्यायस	६०५
भ्राष्ट्राग्न्योरिन्धे	१००७
म	
मनुष्यलुपि	१३००
महत आस्वे घासकर	८०७
महाजनाट्ठञ्	१६७१
महानाम्न्यादिभ्यः	१७५८

वार्तिकम्	सूत्रम्
महिषाच्चेति	१३०६
मातञ्मातृकमातृषु वा	१००५
मातरि षिच्च	४९९, १२४२
मातुर्डुलच्	१२४२
मातृपितृभ्यां पितरि	१२४२
मिथोऽनयोः समासे	८९८
य	
यज्ञर्त्विग्भ्यां	१७३५
युवादेर्न	१०५५
यूनश्च कुत्सायां	१०९२
र	
रप्रकरणे खमुख	१९१४
राज्ञो जातावेवेति	११५३
रूपप्पाशपौ	८३६
ल	
लघ्वक्षरं पूर्वम्	९०५
लिङ्गबाधनं वा	२१००
लोकस्य पृणे	१००७
लोपः पूर्वपदस्य	२०३५
लोम्नोऽपत्येषु बहु	१०७७
व	
वटकेभ्य इनिर्वाच्यः	१८८२
वत्वन्तात्स्वार्थे	१८३८
वर्णानामानुपूर्व्येण	९०५
वहेस्तुरणिट् च	१५००
वा गोमयेषु	१३५३
वाग्दिक्पश्यद्भ्यो	९७९
वातपित्तश्लेष्मभ्यः	१७०४
वातात्समूहे	१९२८
वा नामधेयस्य	१३३८

वार्तिकम्	सूत्रम्
वा प्रियस्य	८९८
वायुशब्दप्रयोगे	९२२
वा हितनाम्न इति	११५७
विद्यायोनिसम्बन्धेभ्यः	९८१
विद्यालक्षण	१२७०
विनापि प्रत्ययं	२०३५
विभाजयितुर्णि	१५९९
विशसितुरिड्लोप	१५९९
विष्णौ न	९२५
विष्वगित्युत्तर	१९०७
विस्तारे पटच्	१८३०
वृत्तादौ विशेषणामेव	९१६
वृत्तेश्च	१९०८
वृद्धस्य च पूजायां	१०९२
वृद्धाच्चेति वक्तव्यम्	१२४७
वृद्धेर्वृधुषिभावो	१५८०
वेर्ग्रो वक्तव्यः	८५९
वैरे देवासुरादिभ्यः	१५०५
व्यासवरुडनिषाद	१०९७
श	
शकलकर्दमाभ्यां	१२०३
शतरुद्राद्घ च	१२३०
शसि बहुल्पार्थस्य	८३६
शाकपार्थिवादीनां	७३९
शिखामालासं	१९२३
शीतोष्णतृप्रेभ्य	१९२८
शीले को मलोपश्च	२०२८
शुनो दन्तदंष्ट्राकर्ण	१०४९
शृङ्गवृन्दाभ्यामारकन्	१९२८
शेफपुच्छलाङ्गूलेषु	९७९

वार्तिकम्	सूत्रम्	वार्तिकम्	सूत्रम्
श्रविष्ठाषाढाभ्यां	१४०८	सर्वादेश्च	१६४१
श्रेण्यादिषु च्व्यर्थवचनं	७३८	सर्वादेः सादेश्च	१२७०, १७८१
श्रोत्रियस्य यलोपश्च	१७६५	सर्वोभयार्था	१६५६
ष		सविशेषणस्य प्रतिषेधः	८१८
षट्त्वे षङ्गवच्	१८३०	सहायाद्वा	१७६७
षष उत्त्वं दतृदशधा	८११	सामान्ये नपुंसकम्	८२१
षषष्ठाजादिवचना	२०३७	सुसर्वार्धदिक्शब्देभ्यः	१३६८
स		सूत्रान्तात्वकल्पा	१२७०
संख्यापूर्वपदानां	१६८३	स्तोमे डविधिः	१७२४
संख्याया अल्पीयस्याः	८६८	स्त्रियामपत्य	१३३४
संख्याया नदीगोदा	६४३	स्त्रीनपुंसकयोरुत्तर	२१४७
संख्यायास्तत्पुरुषस्य	८५१	स्थाम्नोऽकारः	१०७७
सङ्घाते कटच्	१८३०	स्थेणोर्लुगिति वक्तव्यम्	६०७
संज्ञायां स्वार्थे	१७२४	स्नेहे तैलच्	१८३०
सम्भ्रमेण प्रवृत्तौ	२१३७	स्वतिभ्यामेव	६५१
समानस्य	१६७०	स्वरूपस्य	१५८१
समाहारे चायमिष्यते	६७४	स्वार्थे उपसंख्यानम्	१२६४
समिधामाधाने	१५००	**ह**	
सर्वजनाट्ठञ्	१६७१	हरिद्रामहार	१२०३
सर्वत्राग्नि	१२२६	हरीतक्यादिषु	१३००
सर्वनामसंख्ययोरुप	८६८	हिमाच्चेलुः	१६२८
सर्वनाम्नो वृत्तिमात्रे	७२८, २१४७	हृदयाच्चालुरन्यतरस्याम्	१६२८
सर्वाण्णो वेति	१६७२	हृद्भुभ्यां च	६६७

समासप्रभृतिपूर्वार्धपर्यन्तपरिभाषासूचिका ।

परिभाषा	सूत्रम्	परिभाषा	सूत्रम्
अनिनस्मन्ग्रहणा	८६०	लक्षणप्रतिपदोक्तयोः	८०७
उत्तरपदाधिकारे तदन्त	६८८	संज्ञापूर्वको विधिरनित्यः	८४७
कृद्ग्रहणे गतिकारक	६६४	सन्नियोगशिष्टानाम्	१३११
गतिकारकोपपदानां	७८२	स्त्रीप्रत्यये चानुपसर्जने न	१००४

व्याकरणचन्द्रोदय

पं० चारुदेव शास्त्री

व्याकरणचन्द्रोदय अब सम्पूर्ण पाँच खण्डों में प्रकाशित हो चुका है। प्रथम खण्ड कारक-निरूपणात्मक है। द्वितीय कृत्तद्धित-विषयक है। तृतीय तिङ-व्याख्यान-परक है और चतुर्थ स्त्रीप्रत्यय-सुप्-अव्ययार्थ-निदर्शक है। पञ्चम खण्ड शिक्षा-संज्ञा-परिभाषा-सन्धि-लिङ्ग-निरूपक है। प्रक्रिया-ग्रंथ होते हुए भी यह कृति व्याक्रियाप्रधान है। लक्ष्यलक्षणे व्याकरणम्—यह सर्वसम्मत व्याकरण का स्वरूप माना जाता है। तो भी पूर्व विद्यमान व्याकृतिग्रंथों में लक्ष्य का अत्यल्प उपादान है। पुरानी शैली से लिखे गये वृत्ति आदि ग्रंथों में एक-दो लक्ष्यों में लक्षण (सूत्र) की प्रवृत्ति को दिखाने से वृत्तिकारादि अपने को कृतार्थ मानते हैं। नूतन रीति से लिखे गये व्याकरण ग्रंथों में प्रयोगों के उदाहरण देने का प्रयत्न तो है, पर वे उदाहरण या तो स्वयं घटित होते हैं, या भट्टिकाव्यादि से उठाये जाते हैं, जहाँ व्याकरण सिखाने के लिये वे घड़े गये हैं और जिनमें अनेकानेक ऐसे हैं जो साहित्य में कहीं भी प्रयुक्त नहीं हुए, अतः अव्यवहार्य हैं। इस वर्ग के विद्वान् भूल जाते हैं कि व्याकरण अन्वाख्यान-स्मृति है—व्याक्रियन्ते पदानीह क्रियन्ते नूतनानि न।

इस कृति का वाग्व्यवहार सिखाना प्रधान लक्ष्य है। प्रक्रिया इस साध्य में साधनमात्र है। व्यवहार उपकार्य है, प्रक्रिया उपकारक। अतः इस कृति में जहां सूत्रादि की विशद व्याख्या की गई है, सूत्रादि की प्रवृत्ति द्वारा सरल, शङ्कासमाधान सहित, क्रम-बद्ध रूपसिद्धि दी गई है, वहां वैदिक-लौकिक उभय-विध वाङ्मय से शतशः वाक्य उद्धृत किये हैं जो व्याकरण-व्युत्पादित उस-उस लक्ष्य को प्रयोगावतीर्ण दिखाते हुए उसकी साधुता को यथेष्ट रूप से प्रमाणित करते हैं और व्यवहार सिखाने में अत्यन्तोपकारक हैं।

स्थान-स्थान पर अपेक्षित नूतनार्थोपन्यास, पूर्वमतसमीक्षा, संक्षिप्त वैया-करणोक्तिविशदीकरण, यथासंभव अष्टाध्यायीगतसूत्रक्रमाश्रयण, आदि असा-मान्य धर्म इस कृति को अन्य कृतियों से पृथक् करते हैं और इसकी मौलिकता की ओर संकेत करते हैं।

प्रथम खण्ड (कारक व समास)	8.00
द्वितीय खण्ड (कृत् व तद्धित)	22.50
तृतीय खण्ड (तिङन्त)	40.00
चतुर्थ खण्ड (स्त्रीप्रत्यय-सुप्-अव्ययार्थ)	20.00
पंचम खण्ड (संज्ञा-परिभाषा-सन्धि-लिङ्गानुशासन)	55.00

आकार डिमाई :: कुल पृष्ठ २,३३२ :: कपड़े की जिल्द सहित

मोतीलाल बनारसीदास

दिल्ली □ वाराणसी □ पटना